KALIDASA'S

ABHIJNANA-SAKUNTALAM

WITH AN ORIGINAL

SANSKRIT COMMENTARY

AND

CRITICAL AND EXPLANATORY NOTES

BY

SARADARANJAN RAY, VIDYAVINODE, M. A.,
Principal, Metropolitan College.

THIRD EDITION.

Revised and Enlarged

Cloth Rs. 3/4, Paper Rs. 3

PRINTED BY

GOBARDHAN PAN

AT THE GOBARDHAN PRESS,

161, Muktaram Babu Street, Calcutta.

PUBLISHED BY

PRANKRISHNA CHAKRAVARTY

FOR

S. RAY & CO.

11/1, Esplanade, and 90/3A, Harrison Road,

CALCUTTA.

PREFACE TO THE FIRST EDITION

There exist now so many good editions of Kalidasa's Abhijnana-Sakuntalam that a fresh attempt to edit the book seems hardly called for. A word is therefore necessary to justify the appearance of the present work.

The Sakuntala (शाकुन्तल)* is the masterpiece of India's greatest poet. Manuscripts of the book exist all over India. But they read differently. In the midst of this difference, however, general agreement is seen in certain manuscripts which has led European scholars to divide the manuscripts into three broad classes. These are—

* This is the name under which the book is referred to in standard Sanskrit works. The प्रस्तावना however calls it अभिज्ञान-शकुन्तल—a queer compound variously derived, thus—अभिज्ञानेन स्मृता शकुन्तला अभिज्ञानशकुन्तला—Sakuntala remembered by means of the token (Ring). शाकपार्थिवादिः। By transference of epithets this means the नाटक which tells us how Sakuntala is remembered by means of the ring. नाटकविशेषणत्वात् क्लीबत्वम्। The final vowel is then shortened by the rule "ह्रस्वो नपुंसके प्रातिपदिकस्य"। Or thus—अभिज्ञानञ्च शकुन्तला च gives a द्वन्द्व compound which is taken in the singular by the Varttika "सर्वो द्वन्द्वो विभाषया एकवद्भवतीति वाच्यम्"। When singular (एकवद्भाव), it is in the neuter by the rule "स नपुंसकम्" giving the form अभिज्ञानशकुन्तलम् in the sense—"The token and Sakuntala." By transference of epithets this is applied to the drama the subject matter of which is "The Token and Sakuntala."

(1) Manuscripts written in the Bengali character.

(2) Those written in the Devanagari character.

(3) Manuscripts written in Telugu.

These are known respectively as the *Bengali Recension*, the *Devanagari Recension*, the *South India Recension.*

Several eminent scholars have made a special study of the Bengali Recension.

In 1860 Pandit Premchandra Tarkavagisa brought out his edition under the supervision of Prof. E. B. Cowell. This is a specially valuable edition embodying as it does the result of the co-operation of European research with the erudition and profundity of indigenous scholarship. Dr. R. Pischel's edition appeared in 1877.

The Devanagari Recension is almost equally well represented. The excellent edition of Pandit Isvara Chandra Vidyasagara with a collation of readings from eight manuscripts is deservedly popular with Indian students. Prof. Monier-Williams prepared his edition from very trustworthy manuscripts. The subtlety and judgment of the [illegible]tor has rendered this work indispens-able to all readers of the Sakuntalam.

I have no direct knowledege of the *South India Recension.*

But the *Recensions* are only a means to an end. They present processes of corruption—deviations from the poet's original. The utmost that can be said of them is that when they are finally determined the hunt after manuscripts ceases. The editor's problem with

reference to any particular passage is to determine how the poet had put it, and not how any particular *Recension* has it. Hence the work of editing enters into a new stage when the *Recensions* are complete. The editor has now to compare the *Recensions* carefully to ascertain which of them, if any, represents the poet's original.

It is necessary that the editor approaches his work at this stage without bias or against any particular *Recension*.

Dr. Pischel has little regard for the reliability of the *South India Recension*. He says "it is in South India that Sanskrit Dramas have been adulterated". Prof. Monier-Williams' contempt for the *Bengali Recension* is equally pronounced. He explains his preference for the *Devanagari Recension* saying that Upper India "has produced copyists without scholarship, who have faithfully transcribed what they did not understand, and, therefore could not designedly alter".

I do not know what happens in South India, but in Bengal books are copied by the pupils when they commence reading them. They take down daily from the Professor's manuscript their lesson for the next day. At this stage they are not competent to add or alter "designedly". Indeed I do not think additions or alterations come from the copyists be they with or "without scholarship". These are due to the Professors themselves and arise apparently from three causes—

(1) An idea strikes when reading through a passage and vanity prompts the reader to versify and incorporate it with the text.

(2) A passage seems obscure. * Unwilling to leave it obscure when reading with his pupils the Professor notes down in the margin an emendation which in course of time as the manuscript passes from generation to generation is taken by later copyists as belonging to the poet's original.

(3) A few letters some how or other have become illegible. A guess is hazarded which in course of time passes as the text.

Pandits are Pandits all over India and additions and alterations are expected to oocur in all the three *Recensions* from the *same* cause. It is unfair to the other *Recensions* to suppose that the *Devanagari* is the only reliable one. A glaring instance of "omission and commission" occurs in the *Devanagari Recension* at the beginning of Act IV. Several others could be cited. Indeed no single *Recension* is pure. They are all corrupt more or less. Laborious sifting and comparison

* Obscurities are expected considering that the poet lived at a remote period of antiquity. At one time it was customary to refer him to the sixth century A. D.. Prof. Monier-Williams places him in the third century A. D.. Prof. Macdonell is not definite, but he is inclined not to have a later date than that. On this point perhaps I may have to say something on a future occasion. At present I may note that there seem to exist strong reasons to assign him the first century B. C. one of which reasons is the existence of internal evidence to suspect that Asvaghosha borrowed from Kalidasa and not Kalidasa from Asvaghosha as postulated by Prof. Cowell.

alone will yield the correct text. The portion common to all the three *Recensions* may be safely taken as genuine. For the rest we have to depend upon the context, propriety, considerations of style, and so forth.

I have derived my text from a comparison of those of Vidyasagara, Tarkavagisa, Nyayapanchanana, Raghava Bhatta, Pischel and Monier-williams. The numerous quotations that occur in works on Rhetoric have also been of much service. In referring to them I have used the following abbreviations—वि—for Vidyasagara, त—for Tarkavagisa, न्या—for Nyayapanchanana, रा—for Raghava Bhatta, पि—for Pischel, म—for Monier-Williams, भो—for Bhoja, सा—for the Sahitya-Darpana.

This volume contains the Text, Tika, and Translation. The Tika is my own. I have tried to make it simple. It explains all the difficult passages of the text, briefly touches important grammatical points, and refers to different readings. All other points such as discussion of the propriety of the readings, elucidation of character &c. I reserve for a second volume of Notes.

My thanks are due to Mahamahopadhyaya Pandit Haraprasad Sastri, M. A., who very kindly placed the Library of the Sanskrit College at my disposal during the holidays, to Professors Kaliprasanna Bhattacharya, M. A., of the Presidency College, and Rajendranath Vidyabhusan of the Sanskrit College for loan of books, and to Professors Kalikrishna Bhattacharya and Radharaman Vidyabhusan of the Metropolitan College for valuable suggestions and correction of Proof sheets.

The Sakuntalam is a Text Book for the B. A. Examination under the new University Regulations. I have tried my best in this edition to meet the altered circumstances, but

नवाध्यापनवैदग्ध्यो नवोऽध्ययनडम्बरः ।
नवं सारस्वतं सत्रं हन्त यातं नवं वयः ॥

CALCUTTA, January, 1908. — SARADARANJAN RAY.

PREFACE TO THE THIRD EDITION.

In this edition the Introduction has been enlarged and additional reasons adduced for deeming the poet as anterior to Christ.

CALCUTTA, June, 1917. — SARADARANJAN RAY.

INTRODUCTION

1. THE AGE OF KALIDASA

TRADITION

The Indian learns in his childhood that Kalidasa, the greatest poet of India after Vyasa and Valmiki, was one of the "nine gems" of the court of a certain prince named Vikramaditya. Tradition also has it that Samvat era, which is still current, was introduced by this prince to commemorate his accession to the throne of Ujjayini. It is the 1973rd of the Samvat era to-day. Hence 1973 years ago in the first century B. C. Kalidasa wrote his immortal works.

FERGUSSON'S ATTACK

Against this we read—"It has long been an open secret however...that there is absolutely no documentary evidence of the existence of such a king Vikramaditya in the first century B. C. But the puzzle has always been, how the belief in such a king, living in the first century B. C.....could have arisen, and this puzzle has at last been solved...by...Mr. Fergusson...I cannot help thinking that the main his solution will turn out to be correct". Thus writes Prof. Max Muller in his "*India what can it teach us*". The 'solution' is that king Harsha of Ujjayini, surnamed Vikramaditya, defeated the Mlechchhas at the great battle of Korur in 544 A. D., expelled them from India, and, in commemoration of the victory, founded the Vikrama era. He dated this new era 600 years back thus making it appear as if it commenced in 57 B. C. The Vikrama era "cannot therefore occur in any historical document before" 544 A. D. Along with Vikramaditya,

Kalidasa is brought down to the middle of the sixth century A. D.

CORROBORATION OF FERGUSSON

(i). Prof. Max Muller believes that Mallinatha corroborates Fergusson's theory while commenting on the 14th verse of the Meghadutam. "Whatever we may think of the pointed allusion which Mallinatha discovers in Kalidasa's own words to Nikula and Dignaga—and I confess that I believe he is right—there can be little doubt that Mallinatha must have known of both Nikula and Dignaga as contemporaries of Kalidasa, before he could have ventured on his explanation...we shall probably now feel more confident in placing Kalidasa in the middle of the sixth century"—Max Muller, *India, what can it teach us.*

(ii). An indirect corroboration is also seen by the supporters of this theory in the fact that Kalidasa uses the word *jamitra* in Kumara VII, I. This word is borrowed from the Greeks. The great borrower in this respect was Aryabhata whose approximate date is 499 A. D. Kalidasa therefore must have lived pretty long after 499 A. D.

CORROBORATION OF LITTLE VALUE

Before discussing the theory itself I shall take up the corroborations as noted above.

In the first place, Prof. Macdonell says on Mallinatha's interpretation—"This explanation...is extremely dubious in itself. Then it is uncertain whether Mallinatha means the Buddhist teacher Dignaga. Thirdly, little weight can be attached to the Buddhistic tradition that Dignaga was a pupil of Vasubandhu, for this statement is not found till the sixteenth century. Fourthly, the assertion that Vasubandhu belongs to the sixth century depends chiefly on the Vikramaditya theory, and is opposed to Chinese evidence, which indicates that works of Vasubandhu were translated in A. D. 404."

Secondly, I believe Kalidasa himself never thought of such an explanation. This is abvious from the verse itself. The text is—

स्थानादस्मात् सरसनिचुलादुत्पतोदङ्मुखः खं ।
दिङ्नागानां पथि परिहरन् स्थूलहस्तावलेपान् ॥

I doubt if स्थूलहस्तावलेप can be legitimately compounded to mean "foolish vauntings as expressed by gesticulations". Even if this point is allowed, the plural in दिङ्नागानाम् becomes indefensible. When the word दिङ्नाग is not intended for many individuals, the plural will indicate *respect* (गौरव) for दिङ्नाग on the part of the poet. Would that be consistent in the case of a "hated rival" contempt for whom is already expressed by the ridicule in स्थूलहस्तावलेप ?

Prof. Max Muller makes much of the fact that Mallinatha believed Nichula and Dignaga to be contemporaries of Kalidasa. In other words he accepts the belief of a single individual (Mallinatha) against that of the whole of India that Kalidasa and Vikramaditya were contemporaries in the first century B. C.

Referring to the astronomical argument, Prof. Macdonell says—"But it has been shown by Dr. Thibaut that an Indian astronomical treatise, undoubtedly written under Greek influence, the Romaka Siddhanta, is older than Aryabhata, and cannot be placed later than A. D. 400."

Max Muller refers with approval to the stress laid by Prof. Jacobi on the appearance of the word जामित्र in Kumara. This approval implies two things—

(1) That the word is exclusively Greek.

(2) That the Indians borrowed it not long before the 6th century.

Prof. Macdonell's reply quoted above demolishes the 6th century theory. But it does not go far enough. जामित्र and

Diametron may mean the same thing, yet neither need be the progenitor of the other. The supposition is possible that both come from a certain primitive word which like पितृ, मातृ, भ्रातृ, दुहितृ &c., the nations possessed in common when they were together before the migrations. When the primitive Aryan house-holder, after the day's toil, sat chatting with his family, the vessel of drink (call it Soma or Amrita if you like) going round, he could not have helped noticing the utility of sitting all in a ring and the ease with which every diametrically opposite pair can then speak to each other. It is not then unlikely that a name was given to diametrically opposite positions and along with it to the diameter also.

Again, even if we admit the borrowing, the word is so common that no one need be surprised if it was appropriated when the very first batch of Greeks set foot on India.

But I believe we are beating an empty bush here. In the present instance Mallinatha seems to afford us an illustration of the habit of seeing new ideas in old expressions. The main, in fact the only, reason for taking जामित्र as derived from the Greek *Diametron* is that the word is supposed to have no derivation in Sanskrit. It is extremely hazardous to say that a purely Sanskrit derivation cannot be found for जामित्र। जामि is known to mean "daughter". The वाचस्पत्य gives this meaning on the authority of the शब्दार्थचिन्तामणि। जामिं दुहितरं त्रायते gives जामित्र with the affix क attached to the root त्रै to protect. The sense is "That which guards the daughter from evil". This derivation is sanctioned by the rule "आतोऽनुपसर्गे कः"। No possible objection can be urged against it. If this is allowed, जामित्र derived thus, or in any other legitimate way, may exist side by side with the technical, let us say, for argument's sake, Greek derivative जामित्र without either interfering with the scope of the other's usage. Instances of such double existence are numerous. The words आख्यात, संहिता &c., have special

meaning in Grammar. They are constantly being used in other senses also. Even in scientific works the same word may be used technically and in the ordinary sense as well. A Geometer in arguing with an adversary is not barred from exclaiming "What is the *point* of your argument" though his science gives a special meaning to the word "point". All depends upon the context. I believe जामित्र, as I have derived it, actually suits the context better than जामित्र in the sense of *Diameter.* I quote the sloka—

अथौषधीनामधिपस्य वृद्धौ तिथौ च जामित्रगुणान्वितायाम् ।
समेतबन्धुर्हिमवान् सुताया विवाहदीक्षाविधिमन्वतिष्ठत् ॥

In the first place, what is गुण of जामित्र ? Mallinatha explains saying गुण means शुद्धि । Even then शुद्धि of जामित्र—"purity of the *diametrically opposite place*"—is unintelligible, because Astrology defines जामित्र with reference to the लग्न and not to the तिथि as the context has it here. Mallinatha's defence, that what attaches to the लग्न may be attributed to the तिथि also, does not seem satisfactory. This leads me to suspect that जामित्र is not here used in the sense Mallinatha attaches to it.

My suspicion is strengthened from another consideration. I am told—I speak under correction—that, at marriages, the purity of त्रिकोण (the two positions 90 degrees either way from the लग्न) has to be considered, while the purity of the लग्न itself is at least as important as that of the जामित्र । It is imperative to avoid जामित्रवेध and युतवेध—impurities of the लग्न and the opposite place. Why then is the poet silent about impurities at त्रिकोण and the लग्न ? It will not do to say that if the जामित्र is pure, impurities elsewhere do not matter. For युतवेध is as bad as जामित्रवेध । Besides, who are the parties involved ? The parents of the Universe are to be united ; on the issue of the union depends the welfare of the whole host of gods and men. Such an occasion has to be accompanied by a combination of *all*

auspicious circumstances and must not be burdened with such short-comings of the वय as an ordinary Bengali father of an भरक्षणीया कन्या has to put up with.

I therefore take जामित्र here in the sense I have already explained. The sloka then means that—Himalaya performed the भाभ्युदयिक ceremony for his daughter's marriage at a phase of the moon that was calculated to ward off evil influences from her married life.

Hence *Jamitra* offers no corroboration—

(i) Because *Jamitra* in the sense *Diametron*, does not suit the context, therefore it is a different word derived from Sanskrit.

(2) Because even if *Jamitra* has the sense of *Diametron* the supposition that the two come from a common primitive is possible. That *Diametron* has a Greek derivation does not bar the supposition ; for पितृ, मातृ, दुहितृ &c., have Sanskrit derivations.

(3) Because, if borrowed, there is nothing to exclude the hypothesis that it came to India with Seleucus.

FERGUSSON'S THEORY UNTENABLE

These considerations show the character of the corroborations of Fergusson's guess. On the theory itself, Prof. Macdonell remarks—"The epigraphical researches of Mr. Fleet have destroyed Fergusson's hypothesis. From these researches it results that the Vikrama era of 57 B.C., far from having been founded in 544 A.D., had already been in use for more than a century previously under the name of the Malava era."—*History of Sanskrit Literature.*

Victories are commemorated by pillers with inscriptions. These were called जयस्तम्भ in Kalidasa's time and are more than once referred to in the Raghuvamsam. An era commemorates the installation of a king. But be it the commemoration of a victory or of a coronation, the *ante-dating* affair is ridiculous.

The additional years joined will mislead people and make them forget the very date intended to commemorate. Mr. Fergusson's Vikramaditya could not have been in a very enviable state of mind when he instituted the era and threw back its commencement 600 years to 57 B. C. to perpetuate the memory of his great victory at Korur in 544 A. D. !

Vardhamana the author of the Ganaratnamahododhi closes his work with the sloka—

सप्तनवत्यधिकेष्वेकादशसु शतेष्वतीतेषु ।
वर्षाणां विक्रमतो गणरत्नमहोदधिर्विहित: ॥

He does not refer to the Samvat. The तस् in विक्रमत: is very significant. It means "*from* the time of Vikrama", whether from the time of his *coronation* or from that of his *death* is not clear. What would the advocates of "ante-dating" think of this "commemoration" if the Samvat era had misled Vardhamana into this statement ! If on the other hand Vardhamana had independent means to calculate 1197 years "from Vikrama" the value of the sloka cannot be over-rated.

Here is an instance of its utility. Mallinatha is supposed to belong to the 14th century. He frequently quotes the Ganaratnamahodadhi in his commentaries. If 1350 be taken as Mallinatha's approximate date, then, supposing the Ganaratnamahodadhi to be at least a hundred years older than Mallinatha so that it could be considered by him an authority worth quoting from, the book was written not later than about 1250 A. D. Vikrama preceded the book by 1197 years. Hence Vikrama reiged *before* 53 A. D.

THE LATEST THEORY

Prof. Macdonell says in his History of Sanskrit Literature that Kalidasa flourished in the reign of king Chandragupta II, at the beginning of the fifth century A. D. There is no evidence to connect this prince with our Kalidasa except that Chandra-

gupta II was named Vikramaditya, and that the existence of an earlier Vikramaditya has not yet been traced. This is rather slippery ground to base a theory upon. In an essay read before the Sahitya-Sabha of Calcutta, I have discussed this theory at length. The essay will shortly be published; I shall therefore state here only the results obtained omitting all details.

I. There is no reference to the Gupta kings in the works of Kalidasa.

(a) Such reference can be assumed in any verse only when with such assumption the verse admits of a different interpretation consistent with the reference.

(b) Otherwise very awkward results follow bringing down the Mahabharatam, the Ramayanam and the Vedas all to the Gupta period and making a clumsy and thoughtless rhymester of our poet.

(c) Assuming such references to exist in the writings of the poet the circumstances of the *first* staging of the Malavikagnimitram become a highly incongruous affair.

II. The presence of the Huns in Bactria, at the time of the poet, does not follow from the description of the wars of Raghu.

(a) Kshirasvamin's Vahlika is not Bactria. The Mahabharata places Vahlika where the modern district of Attack is with Sakala (Sialkot ?) for its capital.

(b) वङ्क्षुतीरविचेष्टनैः should perhaps be सिन्धुतीरविचेष्टनैः which seems to be the reading of both Kshirasvamin and Mallinatha. Besides वङ्क्षु and Oxus seem to be different. The former has its source close to that of गङ्गा and falls into the Arabian Sea. The source of Oxus is some 700 miles away from that of the Ganges and this river falls into the sea of Aral. Moreover from descriptions furnished by the Vishnupurana and other books वङ्क्षु and सिन्धु seem to be identical.

Hence there is no basis for the supposition that Kalidasa lived in the fifth century A. D.

With the existence of more than one Vikramaditya*, attempts to determine the age of Kalidasa through him must be more or less unsatisfactory. But independent evidence of his age from outside as well as from the writings of the poet is not altogether unobtainable. I note a few below.

EVIDENCE OF THE BHITA MEDALLION

In the Report of the Archaeological Survey of India for 1909-10, we read on page 40 :—

"The most important work of research carried out in 1909-10 was undoubtedly Mr. Marshall's excavation at Bhita near Allahabad. ...The beautiful terra cotta medallion found by Mr. Marshall...reminds us of a scene from...the Sakuntala. In the two men on the quadriga in the centre of the medallion, we may perhaps see King Dushyanta and his charioteer who are being entreated by a hermit not to kill the antelope which has taken a refuge in Kanva's hermitage. We note also the hermit's hut and in front of it, a girl watering the trees in which we may recognise Sakuntala the heroine of the play."

The medallion is supposed to belong to the Sunga period. Now the Sunga kings ruled at Pataliputra from 184 B. C. to 72 B. C. If any of them knew of the Sakuntalam, then the drama and therefore its author Kalidasa must have existed before Christ.

* From the Kathasaritsagara we learn that the Brihatkatha which is supposed to have been written in the 1st or 2nd century A. D. mentions a vikramaditya of Pataliputra and also one of Ujjayini. The latter was a redoubtable exterminator of the Mlechchhas (See Kathasaritsagara, 7th Lambaka, 4th Taranga, and the whole of the 18th Lambaka). The Rajatarangini refers to a Vikramaditya in the 2nd Taranga.

This ought to be decisive. Unfortunately the Archæological Department does not deem it as such. It tries, though in a half-hearted manner, to dispute the identification of the scene. The Report continues :—

"The medallion, which must belong to the Sunga period, is no doubt much anterior to Kalidasa, and, on that account, the identification cannot be regarded as certain".

This is manifestly an obsession of the fifth-century-theory. It amounts to saying that—

(1) Some very old poet in one of his dramas had introduced a scene exactly like the opening scene of the Sakuntala.

(2) This scene Kalidasa has adopted in his drama.

(3) The work of the older poet is extinct. The medallion represents one of its scenes, while we, not being aware of the older poet, wrongly think that the scene is from Kalidasa's Sakuntala.

But there are no grounds, at least none have yet been adduced, for these assumptions. No one has the right to question the identification without first establishing the truth of these statements. So long as that is not done, the Bhita medallion has to be interpreted as showing that Kalidasa lived *before* Christ.

EVIDENCE OF STYLE

Kalidasa's prose, as we have it in his dramas, is charmingly simple. Yet it is remarkably terse and vigorous. Absence of diffuseness and long compounds is characteristic. It is *natural* prose. Now and then it reminds us of the prose of the Mahabhashya, and also, though less pointedly, of one or two of the prose pieces of the Mahabharata. The preference for the नपुंसके भावे क्त where it is usual with others to have भावे ल्युट् the use of यत्प्रत्ययान्त words as attributives in disagreement with the gender of the corresponding substantive, Kalidasa has

in common with Patanjali. Whether these are personal or characteristic of his age it is difficult to say. But it is to be noted that as we go back to older and older writers, the prose comes up more and more to this standard of *natural* as distinguished from *artificial* prose. Thus Bana, Subandhu, Dandin are less and less artificial in order. Prof. Macdonell notes artificiality of style in an inscription composed by Harishena in the 4th century. But of the Girnar and Nasik inscriptions of the 2nd century, the learned Professor says that they are altogether less artificial than the prose parts of Harishena's Kavya and *a fortiori* than the works of Dandin, Subandhu and Bana.

These considerations justify the inference that the older the writer the less artificial he is. We are however concerned with the converse proposition, viz, the less artificial the writer the older he is. If the converse is allowed, then Kalidasa is older than the Girnar and Nasik inscriptions. As a rule, in such cases, the converse comes out to be true. Yet here we shall not take it for granted without further proof.

EVIDENCE OF LANGUAGE

When a language is in the stage of formation, fresh words are imported, sometimes old words fall into disuse or change meaning. Change of meaning may imply that the language is growing ; it is certainly a sign that the language is nôt dead yet.

Now take the word परमेष्ठिन् । This word is not sanctioned by पाणिनि । Katyayana allows it. Amarasimha in the 6th century at the latest, declares it as a संज्ञा of ब्रह्मन् । But Kalidasa does not treat it as a संज्ञाशब्द । He speaks of Vishnu "भूतार्थव्याहृतिः सा हि न स्तुतिः परमेष्ठिनः" । Of Rama as Vishnu he makes परशुराम say "आहितो जयविपर्ययोऽपि मे श्लाघ्य एव परमेष्ठिना त्वया" । Referring to ब्रह्मन् he says "दिवमध्यास्व शासनात् परमेष्ठिनः" । If परमेष्ठिन् were a संज्ञाशब्द at his time, he would not have used it promiscuously for ब्रह्मन् as well as विष्णु । The lexicographer records usage,

he does not invent meanings. Hence long before अमरसिंह, the word had acquired the character of a संज्ञा। This would not have been possible if the language were dead at the time of Kalidasa.

Again, Vamana the rhetorician writes in the 8th century that पेलव is a word that involves an obscene idea (अश्लीलार्थ) and should not find a place in polite literature. This is not Vamana's personal opinion. Popular verdict at his time must have been to that effect. Mammata, towards the latter part of the 11th century, echoes Vamana's condemnation. The साहित्यदर्पण is of the same tenor.

It is strange however that पेलव is one of Kalidasa's favourite words. Not only he does not hesitate to use it, but he actually prefers it to the usual word कोमल in describing delicate objects. Thus referring to Parvati's penance he writes "मृणालिकापेलवमेवमादिभिः" though मृणालिकाकोमलमेवमादिभिः preserves the metre as well, and perhaps improves the diction. Some of his female characters in the highest society have said "धनुषः पेलवपुष्पपत्रिणः", "अपर्णया पेलवयापि तप्तम्", "नवकुसुमपेलवा त्वम्", "प्रकृतिपेलवा प्रियसखी" &c. He makes the mother address the daughter "—तपः क्व वत्से क्व च तावकं वपुः। पदं सहेत भ्रमरस्य पेलवं शिरीषपुष्पं न पुनः पतत्रिणः"।

What a revolutionary change of meaning has overcome the word which was once so chaste in its signification ! I believe this cannot be accounted for except on the supposition that Sanskrit was the *spoken* language of the learned when Kalidasa flourished. Without entering into the question—"At what time did Sanskrit cease to be the spoken language of the learned"—it may be safely said that this points to a time *before* rather than *after* Christ.

EVIDENCE OF GRAMMAR

Kalidasa was a profound grammarian. The consummate skill with which he handles intricate points of grammar shows

the specialist. From among a host of instances, we may refer to the distinction made between ग्राहि with two accusatives and the same with one accusative only (*c. f.* तं सुतां ग्राहयितुम्, तं पाणिम-ग्राहयत्, जायाप्रतिग्राहितगन्धमाल्याम्, &c.), between the तद्धित affix अण् causing आदिवृद्धि and the same with उभयवृद्धि (*c. f.* अपभिन्नसौहृद:, मम वयोरूपरमणीय भवतीनां सौहार्द्दम् &c.), between the कृत्य affix in agreement with the substantive and the same in disagreement (*c. f.* कार्य्या मालिनी, शक्य पवन: &c.), between the प्रयोजक without णिच् and the same with णिच् (*c. f.* "सर्वशैला दुदुहुर्धरित्रीम्" "माता तां प्रणमय्य &c.), and so forth. His deep insight into the philosophy of grammar is seen in the sloka—"—वतुमुखसमीरिता । प्रवृत्तिरासी-च्छब्दानां चरितार्था चतुष्टयी" । Grammar was his favourite study as is evident from the number of similes he has derived from that science (*c. f.* "प्रत्ययप्रकृतियोगसन्निभ:", "पश्चादध्ययनार्थस्य धातोरधिरिवाभवत्", "धातो: स्थान इवादेशं सुग्रीवं संन्यवेशयत्", &c.). He begins his great work the Raghuvamsam with a simile from the science of grammar—"वागर्थाविवसंपृक्तौ जगत: पितरौ" । This is again seen in Kumara—"तमर्थमिव भारत्या सुतया योक्तुमर्हसि" ।

Yet anomalous grammatical forms are common in his writings. In Kumara, canto III, he writes त्रियम्बकं संयमिनं ददर्श । He was not unaware of the usual form ; for he writes व्यकीर्यत त्र्यम्बकपादमूले, and elsewhere जड़ीकृतस्त्र्यम्बकवीक्षणेन &c. Nor was the anomaly necessitated by the metre ; for त्रिलोचनं संयमिनं ददर्श agrees with the metre and avoids the anomaly. He knew that त्रिलोचन was a name of Siva as he writes त्रिलोचनस्तामुपचक्रमे च । How then are we to explain this apparently wanton violation of grammar ? Only one answer seems reasonable. Kalidasa believed that he *had the option* to write त्रियम्बक or त्र्यम्बक । In other words, त्रियम्बक came to be restricted to the Vedas *after* the time of Kalidasa.

In another place, he writes "मोहेनान्तर्वरतनुरियं सुच्यमाना विभाति गङ्गा रोध:पतनकलुषा गच्छतीव प्रसादम्" । We cannot say he did not

know that the usual form was गच्छती and not गच्छन्ती। Compare "बभौ तमनुगच्छन्ती" "गच्छन्तीनां रमणवसतिम्", &c. Nor was the metre in his way, for he could have easily written "गङ्गा रोध:पतनकलुषा बिभ्रतीव प्रसादम्"। As before, here too he thought it was legitimate to write गच्छती or गच्छन्ती।

Again we find him writing "मन्दं मन्दं नुदति पवन:"। Usually the duplicated form मन्दं मन्दम् is treated like a कर्मधारय compound and takes the shape मन्दमन्दम्। Our poet knew this, for he writes also "निर्हितमसकृद्दुःखदुःखेन गात्रम्", "अहरपि कथं मन्दमन्दातपं स्यात्"। The explanation is the same as before, viz, the poet thought he had the right to treat or not to treat the duplicated form like a कर्मधारय compound.

Here is another instance. Kalidasa writes "तं पातयां प्रथममास" instead of the usual form पातयामास ; in place of प्रभ्रंशयाञ्चकार he has "प्रभ्रंशयां यो नहुषं चकार" ; for संयोजयामास he writes "संयोजयां विधिवदास"। As before the explanation is that he believed the व्यवधान between the आम्प्रत्यय and the अनुप्रयोग was legitimate.

Before quoting more instances I may note that the examples given above seen unmistakably to point to the inference that the rigour of Panini's grammar was not yet adopted in popular writings when Kalidasa flourished. It is very important to remember that not a single one of the above is an example of grammatically *incorrect* usage. They are instances of विकल्प, of usages which Panini denies to लौकिक writers, but to which वैदिक writers are fully entitled. The Mahabhashya recognises the principle सर्वे विधयश्छन्दसि विकल्प्यन्ते। Kalidasa here exercises rights of which पाणिनि has deprived लौकिक writers, rights which *all* enjoyed before पाणिनि।

Hence at the time of the poet, the form of the language, *i.e.*, of भाषा as distinguished from छन्दस् was not yet cast in the unalterable mould forged by Panini. When an उपसर्ग precedes

a root, we say, after पाणिनि, that it is placed *before* the root—"ते प्राग्धातोः" are Panini's words. But Kalidasa says it is *after* the root (*c. f.* "पश्चादध्ययनार्थस्य धातोरधिरिवाभवत्" quoted above). Indeed the great grammarian did not at all influence the poet. We say then that Kalidasa is a writer of the period of transition from the Vedic literature (छन्दस्) to the Sanskrit literature (भाषा) । Thus though Kalidasa writes in भाषा, his भाषा has points of resemblance with छन्दस् ।

I note here a few more points of resemblance. The मुक् preceding शानच् is absent in "कामयानावस्थो राजा" । The root सह takes the वैदिक affix ण्वि in "तुरासाहं पुरोधाय", "तुराषाडिव शार्ङ्गिणम्" । घञ् is absent in "कुसुमावचयश्रमदृश्ना" । उषस् is used in the feminine in "इहरागया नवोषसा" । Vedic metre is used in the verse—

अमी वेदिं परितः क्लृप्तधिष्ण्याः समिद्वन्तः प्रान्तसंस्तीर्णदर्भाः ।
अपघ्नन्तो दुरितं हव्यगन्धैर्वैतानास्त्वां वह्नयः पावयन्तु ॥

If we suppose that Panini flourished about 300 B. C., and that it took about 200 years for his system to establish a dominant influence over the language, we are brought to a period covering the 1st and 2nd centuries B. C. which may be taken as the period of transition at which भाषा may be expected to bear such a resemblance to छन्दस् । Hence Kalidasa probably lived some time in the 1st and 2nd centuries B. C.

EVIDENCE OF THE SAKUNTALAM

The Sakuntalam ends with a prayer. The poet first prays for princes—प्रवर्तताम् प्रकृतिहिताय पार्थिवः—Let rulers work for the good of the people. We note that he does not say प्रकृतिरञ्जनाय —to *please* the people, but प्रकृतिहिताय—for the *good* of the people. His prayer is—May kings in their undertakings consider if good will result to the people therefrom. Next comes the prayer for the people—सरस्वती श्रुतिमहतां महीयताम्—Let the declarations of those that are learned in the Vedas gain respect,

i.e., May people have implicit faith in what learned Brahmanas declare. Last is the prayer for self—ममापि च क्षपयतु नीललोहितः पुनर्भवं परिगतशक्तिरात्मभूः—and let Siva remove my re-birth.

This is typical of the true Brahmana—the Brahmana to whom even when he is performing the श्राद्ध of his father the thought does not occur to offer the first share of the पिण्ड to the soul of his sire, but to those who have "न माता न पिता न बन्धुः"—the Brahmana who, even after this first share is disposed of, does not think of dedicating the rest to him for whom the ceremony is intended, but approaches the priest with the query शेषमन्नं किं देयम्—the Brahmana whose father goes without a share of the पिण्ड until and unless the priest utters the permission इष्टाय दीयताम्। What an example of self-sacrifice! किं देयम् is the query, not कस्मै देयम्। Even the *idea* of an offer is absent, not to say of the departed dear one who is to receive the offer.

Such a Brahmana is praying. The last clause of the prayer suggests that to him the glow of life has faded. The time has come when he is reminded of a re-birth. At such a moment, with the noblest work of his life finished the prayer must have proceeded from the bottom of his heart and embodied his dearest wishes, not to himself but to others—the princes and the people. The verse deserves and will repay careful study.

The prayer सरस्वती श्रुतिमहतां महीयताम्—Let the declarations of those that are learned in the Vedas gain respect—is out of place unless we suppose that it refers to current contempt of Vedic teachings. Along with this let us read the last line of the opening verse—प्रत्यक्षाभिः प्रपन्नस्तनुभिः &c.—Siva known by his directly perceived forms &c. A plain statement like अवतु वः ईशः—May the Lord protect you—is a perfect form of आशिस्। Why then this solicitude to tell people how ईश is known? An

exactly similar anxiety is shown by the poet elsewhere where he says स स्थाणुः स्थिरभक्तियोगसुलभो निःश्रेयसायास्तु वः—May Siva who is easily reached by steady devotion promote your welfare. There too स्थाणुः निःश्रेयसायास्तु वः would have been a complete and welcome benediction. But the poet is not satisfied without telling in the same breath with the benediction that स्थाणुः is स्थिरभक्तियोगसुलभः। Kalidasa never says anything superfluous. If any poet in India may boast of the avoidance of व्यर्थविशेषण, it is he. I really do not see how to explain the presence of प्रत्यक्षाभिः प्रपन्नस्तनुभिः and स्थिरभक्तियोगसुलभः except on the supposition that, when the poet lived, the country was full of sceptics who ridiculed Vedic rites and disputed the very existence of God. His third drama is more explicit. There he says सन्मार्गालोकनाय व्यपनयतु स वस्तामसीं वृत्तिमीशः—May the Lord remove those propensities in you that are caused by ignorance so that you may discern the course followed by the wise (Or—discern the righteous course). This seems to be a pretty broad reference to Buddhism under the influence of which people, at the time of the poet, adopted an evil course (तामसी वृत्ति) and began to ridicule the ways of the wise (सन्मार्ग)! Even the lowest stratum of society must have been convulsed, or the simple fisherman would not have said it with warmth to the face of the head of the City-Police—

"सहजं किल यत् विनिन्दितं न हि तत् कर्म विवर्जनीयम्।
पशुमारणकर्मदारुणोऽनुकम्पामृदुरपि श्रोत्रियः॥"

—I am not going to give up my profession because of your ridicule, I kill fish no doubt, but that does not show that I am heartless. Why, the Brahman kills animals at sacrifices. Yet how kindly disposed he is! Who ever thinks he is cruel?

The poet here exposes his aching heart. The Sakuntalam, as I shall show in detail in the next chapter, is the protest of injured Brahmanism against aggressive Buddhism.

It is not clear whether Kalidasa wanted to be offensive while protesting. But even if he had wished and tried to be so, he could not have made the opening lines of the Sakuntalam more aggressive towards Buddhist feelings. He begins with the killing of an animal, not killing for food which, though extremely bad, has a sort of excuse however lame it may be, but wanton killing for pleasure, for killing's sake. Nay, he makes his hero minutely describe the distress of the victim with evident relish—

ग्रीवाभङ्गाभिरामं मुहुरनुपतति स्यन्दने दत्तदृष्टिः
पश्चार्धेन प्रविष्टः शरपतनभयाद्भूयसा पूर्वकायम् ।
दर्भैरर्धावलीढैः श्रमविवृतमुखभ्रंशिभिः कीर्णवर्त्मा
पश्योदग्रप्लुतत्वाद्वियति बहुतरं स्तोकमुर्व्यां प्रयाति ॥

Referring to the line प्रवर्त्ततां प्रकृतिहिताय पार्थिवः—Let the king work for the good of the people—I may say it would obviously sound ridiculous at the time of Rama, or Yudhishthira, or any other good king. I believe when the poet said so he had in his mind instances of kings who did not work for the *good* of the people. He says हिताय not रञ्जनाय । We know the poet holds the view that a king is a *king* because he *pleases* the people—"यथा प्रह्लादनाच्चन्द्रः प्रतापात्तपनो यथा—अन्वर्थो राजा प्रकृतिरञ्जनात्" । रञ्जन is the *nature* of राजा । Just as the चन्द्र ceases to be चन्द्र by not gladdening the heart of men, the तपन (Sun) is no longer तपन if it does not heat, so the राजा is not राजा without रञ्जन । When such a person omits रञ्जन in his prayer for the राजा, and substitutes हित, it cannot be without a purpose. We have seen above the mood our poet is in, and what is preying on his mind, when he writes these lines. It is easy to see then what he considers हित and what अहित to the people. To him, as to every devout Brahmana, the spread of Buddhism is an अहित । This line therefore is a prayer that princes may not interest themselves in Buddhism.

Thus the sloka, taken as a whole, tells us that when Kalidasa flourished the effect of Buddhist teachings was manifest all round and the memory of the efforts made by kings for the spread of Buddhism was still fresh. We therefore place him *after* Asoka who reigned in the 3rd century B. C., but he did not come *long* after. First to second century B. C., is a likely period.

EVIDENCE OF ASVAGHOSHA

Asvaghosha's Buddhacharita is an old book written in the 1st century A. D. The language bears marked resemblance to the writings of Kalidasa. Words that are peculiar to Kalidasa such as धिष्ण्य in the sense of "resting place", निर्वहिण to express "carrying away", &c. are found in the same sense in Asvaghosha also. Identically the same compounds are used in the same sense by the two poets, and this so frequently that it is difficult to believe that they were separated by a very long interval of time, unless one of them is a close and clever imitator of the other.

In spite of this close resemblance, however, there seem to exist grounds to say that Asvaghosha represents a later stage of the development of the language.

In the first place, from a cursory examination of the Buddhacharita, I could not detect in it a single वैदिक form except the व्यवधान between the आम्प्रत्यय and the अनुप्रयोग। But this व्यवधान *alone* cannot be decisive. For, though कात्यायन prohibits. the व्यवधान in भाषा, later grammarians do not respect the prohibition. The भट्टि allows it. Haradatta refers to it with a sneer. I think, therefore, *Asvaghosha came after the period of transition.*

Secondly, the form of the language appears to be finally fixed already at the time of Asvaghosha. The Buddhist is thoroughly under the influence of Panini's grammar. So much so, that he devotes a section of the second book of his Buddha-

charita to illustrate certain rules of Panini in a way that makes it possible to pass them off as extracts from the Bhattikavyam Thus "व्याङ्परिभ्यो रमः" is illustrated by 'शमेऽभिरेमे विरराम पापात्", "स्वरितजितः कर्त्रभिप्राये क्रियाफले" by "भेजे दमं संविबभाज साधून्"। This is verse 33. "विपराभ्यां जेः" is illustrated by the next verse—

नाधीरवत् कामसुखे ससंजे न संरराजे विषमं जनन्याम्।
इन्द्रियाश्वांश्चपलान् विजिग्ये बभ्रंश्च पौराश्च गुणैर्जिगाय॥

The verse following is devoted to "इणो गा लुङि"। Thus—

नाध्यैष्ट दुःखाय परस्य विद्यां ज्ञानं शिवं यत्तु तदध्यगीष्ट।

He proceeds till the end of Book II in this strain. For instance we find आनर्च, जुहाव, ददौ in II. 36 ; सस्नौ, पपौ in II. 37 ; बभाषे, जजल्प, अशकत् in II. 38 ; प्रपेदे, मेने in II. 39 ; अचेच्छिदिष्ट, अवेभिदिष्ट in II. 40 ; विनिन्ये, जुगोप, तत्याज, ररक्ष, प्राप, बुबुधे, जज्ञे, प्रजह्रौ in II. 41 , अजीघनत्, ददर्श, बबंध in II. 42 ; अचारीत्, अह्वासीत्, आपत्, in II. 43 ; अजिहीर्षीत्, अचिकीर्षीत्, अविवक्षीत्, अदिधक्षीत् in II. 44, and so on.

After this it is no matter for surprise, that his style is more artificial than that of Kalidasa. He does not hesitate to sacrifice sense to sound. He opens his book with a rhyme—

श्रियं पराङ्गीं विदधद्विधातृजित्, तमो निरस्यन्नभिभूतभानुभृत्।
नुदन्निदाघं जितचारुचन्द्रमाः, स वन्द्यतेऽर्हन्निह यस्य नोपमा॥

Slokas 14, 15, 16 of Book I, are illustrations of अन्त्य and मध्ययमक। Instances like "रत्नप्रभोद्भासिनि यत्र लेभे तमो न दारिद्र्यमिवावकाशम्", "भूभृत्पराद्धर्योऽपि सपक्ष एव प्रहृत्तदानोऽपि मदानुपेतः" furnish us with the germ of that tendency to pun which subsequently attained full development at the hands of Bana and Subandhu. As an instance of fanciful description we may note, among others, the following verse of Book I—

रामामुखेन्दून् परिभूतपद्मान् यतापयातोऽप्यविभाव्य भानुः।
सन्तापयोगादिव वारि वेष्टुं पश्चात् समुद्राभिमुखः प्रतस्थे॥

The moons of the faces of the females there, had disgraced the lotuses. The sun, passing over these moon-faces without punishing them, burns within with pent up rage, and proceeds to the sea itself for a good supply of water for a plunge to allay the burning !

This reminds us of the following from the Naishadha—

निजांशुनिर्दग्धमदङ्गभस्मभिर्मुधा विधुर्वाञ्छति लाञ्छनोन्मृजाम् ।
तदास्यतां यास्यति तावतापि किं वधूवधेनैव पुनः कलङ्कितः ॥

The moon requires a supply of good quality ash to remove his stain. Hence he his burning me up under his personal supervision with his own rays. But the fool does not see that even then he cannot resemble the face of Nala, because this very act of killing a woman will cause fresh stains to appear on him ;

Thus, at the time of Asvaghosha, Vaidika forms have disappeared from भाषा, the study of the grammar of Panini has become popular so that Asvaghosha deems it necessary to add illustrations to facilitate the study. Popular taste is changing and artificiality is replacing the natural poetry as seen in the writings of Kalidasa. At least a century may be allowed to bring about these changes. Hence, if Asvaghosha lived late in the 1st century A. D. Kalidasa may be placed early in the 1st century B. C.

I am surprised to find that Prof. Cowell places Asvaghosha *before* Kalidasa. In the preface to his edition of the Buddhacharita, referring to slokas 5—12, Raghu VII, he says —"I can hardly doubt that Kalidasa's finished picture was suggested by the rough, but vigorous outlines in Asvaghosa... One verse certainly in Asvaghosha seems to me to have been directly taken and amplified by Kalidasa".

Those who have followed me thus far will see the injustice of this charge. The physical impossibility of the suggession did

not strike Prof. Cowell, because he was labouring under the delusion of the now exploded 6th-century-theory.

The scholarship and erudition of the learned professor, however, demand an *independent* examination of the question.

The description in Raghu runs thus—

ततस्तदालोकनतत्पराणां सौधेषु चामीकरजालवत्सु ।
बभूवुरित्थं पुरसुन्दरीणां त्यक्तान्यकार्य्याणि विचेष्टितानि ॥ ५ ॥
आलोकमार्गं सहसा व्रजन्त्या कयाचिदुद्वेष्टनवान्तमाल्यः ।
बन्धुं न सम्भावित एव तावत् करेण रुद्धोऽपि च केशपाशः ॥ ६ ॥
प्रसाधिकालम्बितमग्रपादमाक्षिप्य काचिद्द्रवरागमेव ।
उत्सृष्टलीलागतिरा गवाक्षादलक्तकाङ्कां पदवीं ततान ॥ ७ ॥
विलोचनं दक्षिणमञ्जनेन सम्भाव्य तद्वञ्चितवामनेत्रा ।
तथैव वातायनसन्निकर्षं ययौ शलाकामपरा वहन्ती ॥ ८ ॥
जालान्तरप्रेषितदृष्टिरन्या प्रस्थानभिन्नां न बबन्ध नीवीम् ।
नाभिप्रविष्टाभरणप्रभेण हस्तेन तस्थाववलम्ब्य वासः ॥ ९ ॥
अर्धाचिता सत्वरमुत्थितायाः पदे पदे दुर्निमिते गलन्ती ।
कस्याश्चिदासीद्रसना तदानीमङ्गुष्ठमूलार्पितसूत्रशेषा ॥ १० ॥
तासां मुखैरासवगन्धगर्भैर्व्याप्तान्तराः सान्द्रकुतूहलानाम् ।
विलोलनेत्रभ्रमरैर्गवाक्षाः सहस्रपत्राभरणा इवासन् ॥ ११ ॥
ता राघवं दृष्टिभिरापिबन्त्यो नार्य्यो न जग्मुर्विषयान्तराणि ।
तथाहि शेषेन्द्रियवृत्तिरासां सर्वात्मना चक्षुरिव प्रविष्टा ॥ १२ ॥
स्थाने वृता भूपतिभिः परोक्षैः स्वयंवरं साधुममंस्त भोज्या ।
पद्मेव नारायणमन्यथासौ लभेत कान्तं कथमात्मतुल्यम् ॥ १३ ॥

Asvaghosha has the following—

ततः कुमारः खलु गच्छतीति श्रुत्वा स्त्रियः प्रेष्यजनात् प्रवृत्तिम् ।
दिदृक्षया हर्म्यतलानि जग्मुर्जनेन मान्येन कृताभ्यनुज्ञाः ॥ १४ ॥
ताः स्रस्तकाञ्चीगुणविघ्निताश्च सुप्तप्रबुद्धाकुललोचनाश्च ।
वृत्तान्तविन्यस्तविभूषणाश्च कौतूहलेनापि भृताः परीयुः ॥ १५ ॥

प्रासादसोपानतलप्रणादैः काञ्चीरवैर्नूपुरनिस्वनैश्च ।
विभ्रामयन्त्यो गृहपक्षिसंघानन्योन्यवेगांश्च समाक्षिपन्त्यः ॥ १६ ॥
कासांचिदासान्तु वराङ्गनानां जातत्वराणामपि सोत्सुकानाम् ।
गतिं गुरुत्वाज्जगृहुर्विशालाः श्रोणीरथाः पीनपयोधराश्च ॥ १७ ॥
शीघ्रं समर्थापि तु गन्तुमन्या गतिं निजग्राह ययौ न तूर्णम् ।
ह्रिया प्रगल्भानि निगूहमाना रहः प्रयुक्तानि विभूषणानि ॥ १८ ॥
परस्परोत्पीड़नपिण्डितानां संमर्दसंक्षोभितकुण्डलानाम् ।
तासां तदा सस्वनभूषणानां वातायनेष्वप्रशमो बभूव ॥ १९ ॥
वातायनेभ्यस्तु विनिःसृतानि परस्परोपासितकुण्डलानि ।
स्त्रीणां विरेजुर्मुखपङ्कजानि सक्तानि हर्म्येष्विव पङ्कजानि ॥ २० ॥
ततो विमानैर्युवतीकलापैः कौतूहलोद्घाटितवातयानैः ।
श्रीमत् समन्तान्नगरं बभासे वियद्विमानैरिव साप्सरोभिः ॥ २१ ॥
वातायनानामविशालभावादन्योन्यगण्डार्पितकुण्डलानि ।
मुखानि रेजुः प्रमदोत्तमानां बद्धाः कलापा इव पङ्कजानाम् ॥ २२ ॥
तस्मिन् कुमारं पथि वीक्षमाणाः स्त्रियो बभुर्गामिव गन्तुकामाः ।
ऊर्ध्वोन्मुखाश्चैनमुदीक्षमाणा नरा बभुर्द्यामिव गन्तुकामाः ॥ २३ ॥
दृष्ट्वा च तं राजसुतं स्त्रियस्ता जाज्वल्यमानं वपुषा श्रिया च ।
धन्यास्य भार्य्येति शनैरवोचन् शुद्धैर्मनोभिः खलु नान्यभावात् ॥ २४ ॥

In the lists above, Prof. Cowell thinks sl. 11 of Kalidasa is directly taken from sl. 19 and 21 of Asvaghosha, and the entire description in the former is suggested by that in the latter. I see, however, very little in common in the two descriptions except the fundamental idea that *females rushed to have* a look at the prince. The rush of females towards windows and terraces to witness marriage processions, is of every day occurrence to every city in India, and no Indian is in need of this idea of a rush of females being put into his head by another person. The *details* of the description will of course vary with

the writer. In the above, we have only two points of detail that are common—the idea that *with the female faces crowding there, each window looked as if decorated with so many lotuses*, and the *remark made by the females.* We have to find out to whom these are due—to Asvaghosha or to Kalidasa.

Before proceeding further, we note that *all the slokas quoted above from the Raghuvamsam*, along with a *very* large number of other slokas not quoted, *occur in the Kumarasambhavam also* with slight verbal changes where necessary to suit the context. Besides, there are several others in the two poems, Kumara and Raghu, which embody the same thought in different words. When an author repeats in one book what he has written in another, it is a sure sign that he is repeating his favourite ideas. On this consideration, the presumption is that *Kalidasa is the author of these common ideas.* If he were not, he would not have paraded them this way. The thief does not make a display of stolen goods.

On the other hand, an examination of Asvaghosha's Buddhacharita shows that, with all his mastery of the language, the writer is poor in ideas. Fine ideas abound in his work it is true, but in almost every case I have been able to trace them to Valmiki, or Vyasa, or Kalidasa. Asvaghosha is an expert in adapting other people's ideas to serve his own purpose. His description of the scene as quoted above is apparently a nice piece of poetry. But it does not contain a single idea which Kalidasa has not expressed in his works. The difference is that the ideas are scattered in Kalidasa, but focussed in Asvaghosha. Let me try to prove what I say.

The 15th verse of Asvaghosha quoted above presents the picture of women with their jewellery misplaced (हत्तान्तविन्यस्त) through eagerness, and with their progress hampered by the waist-chain which has slipped down.

Kalidasa describes the misplacing of jewellery in Kumara, I. 4.—"यश्चाप्सरोविभ्रममण्डनानाम् &c." The waist-chain interfering with motion is described in Kumara, III, 55—"स्रस्तां नितम्बादवलम्बमाना पुनः पुनः केशरदामकाञ्चीम्" ।

The idea *of haste* expressed by this sloka of Asvaghosha does not seem to suit the occasion. Preparations for the prince's going out were going on for days as is obvious from verses 3, 4, 5. The time for the start was also fixed (See verse 6). Verses 10, 11, 12 show that the prince's chariot was moving very slowly (शनैः शनैः राजपथं जगाहे) with a view to give an opportunity to such of the citizens as wished to have a good look at him. The citizens too, males and females, came out of their houses and prostrated themselves before him. The females of position waited upon their elders for permission to go up to the roofs of the houses to witness the prince pass (sl. 14). Up to this point, every thing was progressing leisurely. But all of a sudden people had to be roused from sleep ; they had to dress dreamily and jewellery got misplaced (sl. 15) ! The prince did not pass at midnight, and it is difficult to understand this sleep in high quarters.

Asvaghosha's verse 16 says—so many females rushed together that the tumult and clinking of anklets frightened the birds in the house.

Exactly the same scene is given by Kalidasa, in Raghu, XVI, 56—

सा तीरसोपानपथावतारादन्योऽन्यकेयूरविघट्टिनीभिः ।
सनूपुरक्षोभपदाभिरासीदुद्विग्नहंसा सरिदङ्गनाभिः ॥

Here, in Asvaghosha, the roof and the stair-case resounded with the noise of hasty footsteps. Does not this imply people running up the steps. But in the previous verse the females are described as obliged to move slowly (स्रस्तकाञ्चीगुणविघ्निता) । Verse 16 assumes not only great speed but a jostling crowd also

(अन्योन्यवेगाच्च समाचिक्षिपुः)। There was no occasion for the crowd. It was not that every house was celebrating a marriage at the time to account for the presence of so many females.

Kalidasa's sloka on the other hand describes the जलक्रीडा of the inmates of the vast harem of prince कुश in the river सरयू, and suits the occasion very well.

(Asvaghosha, verse 17). The picture is that of females eager to run fast but unable to do so because of their heavy hips and breasts. This is just the picture we see in Kumara, I. 11—

उद्वेजयत्यङ्गुलिपार्ष्णिभागान् मार्गे शिलीभूतहिमेऽपि यत्र
न दुर्वहश्रोणिपयोधरार्ता भिन्दन्ति मन्दां गतिमश्वमुख्यः ॥

(Asvaghosha, verse 18). Obscene. For an exact parallel, however, see Kumara, VIII. 87. This too of Asvaghosha is incongruous. She should not have thought of this at a time when she was so eager to see the prince. Besides, with the eye of all on the prince, there was none there to notice her.

(Asvaghosha, verse 19). Crowd—Jingling of jewellery—Tumult at the windows. This is almost a repitition of verse 16, and is fully met by the verse from Raghu XVI, 56.

(Asvaghosha, verse 20). Crowd so great that ear-rings came into contact. The faces thrust out through the windows looked like so many lotuses attached to the houses. Compare Kalidasa sl. 11, above.

(Asvaghosha, verse 21). The houses looked like so many heavenly cars, and the females like celestial nymphs in the cars.

Kalidasa has a similar idea when he says in Raghu VI. 1, that the princes at the Svayamvara ceremony of Indumati, seated on stages, looked like so many gods seated on celestial cars—

स तत्र मञ्चेषु मनोज्ञवेषान् सिंहासनस्थानुपचारवत्सु ।
वैमानिकानां मरुतामपश्यदाकृष्टलीलान्नरलोकपालान् ॥

(Asvaghosha, Verse 22). Crowding at the windows—Ear-rings in contact—Faces like so many lotuses bound into a bundle. Compare Kalidasa, sl. 11, above.

As I have already remarked, the occasion was not one on which every house was expected to be over-crowded. Hence verses 19 to 22 of Asvaghosha will take a lot of explaining. Moreover, if we remember that the famales had permission to get up to the *terraces* (See verse 14), the necessity for over-crowding the *windows* is not clear.

Thus, though Asvaghosha's ideas, considered singly, are fine, they either do not suit the occasion, or clash with one another. His entire scene is a piece of patch-work poetry, rather clumsily done up, with the seams clearly visible.

The suspicion is unavoidable that the ideas are borrowed from Kalidasa in whose works they *all* occur, but the context being different, their combination in Asvaghosha has produced a heterogeneous mass.

(Asvaghosha, verse 23). All were so eagerly looking at the prince, that the females appeared as if they wanted to go down and the males as if they wanted to go up.

Just now I do not recollect where I have seen this in Kalidasa, though the idea seems to be a familiar one.

(Asvaghosha, verse 24). Seeing the beauty of the prince, the females exclaimed—"How lucky must be his wife".

See Raghu 13 above. Also compare Kumara VII. 65—

स्थाने तपो दुश्चरमेतदर्थमपर्णया पेलवयाऽपि तप्तम् ।
या दास्यमप्यस्य लभेत नारी सा स्यात् कृतार्था किमुताङ्कशय्याम् ॥

The post-script in Asvaghosha शुद्धैर्मनाभिः खलु नान्यभावात्—with a chaste heart and not from any other motive—is suspicious. It looks like a fling at Kumara, quoted above, in which the remark या दास्यमप्यस्य &c. does not indeed appear to be wholly innocent. Kalidasa too has altered the second half in Raghu so as

to leave no room any longer to doubt the motive of the females. Had Asvaghosha's book been before him to guide him as a model, as Prof. Cowell supposes it was, he would not have written या दास्यमप्यस्य लभेत in Kumara. This slip and the subsequent correction in Raghu seem to be in themselves proof that Kalidasa supplied the original which Asvaghosha copied.

EVIDENCE OF THE MALAVIKAGNIMITRAM

The concluding verse (भरतवाक्य) of the Malavikagnimitram, the first drama by our poet, is the half stanza—

"आशास्यमभ्यधिगमात् प्रभृति प्रजानां सम्पद्यते न खलु गोप्तरि नाग्निमित्रे ।"

It differs in character from the भरतवाक्य of all existing dramas those by the poet himself not excepted. The difference seems therefore to be intentional.

The points of difference are :—

(1) It speaks of a particular king, अग्निमित्र, while other dramas refer to society in general.

(2) It is not an आशिस् at all.

The language is—"Since the accession of Agnimitra no one can say that his prayer has not been granted." Compare this with the words of the Vikramorvasiya—"सर्वस्तरतु दुर्गाणि सर्वो भद्राणि पश्यतु । सर्वः कामानवाप्नोतु सर्वः सर्वत्र नन्दतु ॥" The change is remarkable and cannot but strike the most casual reader.

Add to this that the Malavikagnimitram speaks of Agnimitra here in the *present tense.* सम्पद्यते is the word used, not समपद्यत । The poet was therefore a contemporary of Agnimitra.

Again mark how the assertion is strengthened. आशास्यं सम्पद्यते—one gets what one asks for—is strong enough. But the poet is not satisfied, he puts it in a stronger form with the addition of two negatives—आशास्य न सम्पद्यते न । Even now he thinks a further strengthening is necessary and adds the *intensive* word खलु । Really the whole thing looks like a

challenge to the audience to send up any of its members to say that such and such prayer of his was not granted on such and such occasion.

The language is obviously of an ardent admirer of अग्निमित्र ।

Well then we shall not be wrong perhaps to say that Kalidasa was the court-poet of अग्निमित्र and lived at विदिशा in the second century B. C.

This explains the Bhita Medallion and shows the groundlessness of the suspicions of the Archæological Department.

RECAPITULATION

I conclude with a summary of the results. I have tried to establish—

(1). That the current theory which places Kalidasa in the fifth century A. D. is untenable.

(2). That from the Bhita-medallion it ought to be obvious that Kalidasa lived *before* Christ.

(3). That from the absence of artificiality in his style he appears to be *older than* the Girnar and Nasik inscriptions of the *2nd century A. D.* This corroborates (2).

(4) and (5). That from the history of certain words, Sanskrit seems to have been the spoken language of the learned at the time of Kalidasa. From the free use of Vedic forms in his writings the poet seems not to have been influenced by Panini's grammar and to belong to the post-Paninean period of transition from Vedic to Sanskrit literature which probably extended from 300 B. C. to 100 B. C. This is another confirmation of (2).

(6). That from allusions to Buddhism and its patronage by royalty in the Sakuntalam, the poet seems to have flourished soon after Asoka. This too points to the period 300 to 100 B. C. and confirms (2).

(7). That from considerations of style, taste, &c, our poet seems to have been older than Asvaghosha the Buddhist poet of the 1st. century A. D. which again supports (2).

(8). That the Malavikagnimitram seems plainly to indicate that Kalidasa was the court-poet of king Agnimitra in the second century B. C.

II. AN ANALYSIS

LESSONS OF THE SAKUNTALAM

We have already remarked that the Sakuntalam is a protest of Brahmanism against Buddhism. It briefly touches the main points of *popular* Buddhism and places before the audience Brahmana's opinion of them. It has nothing to do with the philosophy of Buddhism, but concerns itself with its popular aspect. Thus the most important point for it to consider is the way in which Buddhism affects people's notion of the existence of God. Direct *Perception* (प्रत्यक्ष) is the only sort of proof admitted as satisfactory by the Buddhists. But the existence of God is a matter for *Inference* (अनुमान) । As such it is not indisputable. Hence it is waste of time to discuss whether God exists or not. The question is better left out of consideration altogether.

The poet's reply to this is that, in the first place, there is unimpeachable *Testimony* (आप्तवाक्य) to the existence of God (Note the word आहुः—*declare*—in यामाहुः सर्वबीजप्रकृतिरिति and in वेदान्तेषु यमाहुरेकपुरुषम्) । The witnesses had direct *Perception* (प्रत्यक्ष) of God. To *us* His existence is evident from the manifestations around us (*c. f.* प्रत्यक्षाभिस्तनुभिः प्रपन्न ईशः, परिगतशक्ति-

नीललोहित:) । Besides, such of us as are steady in their devotion are allowed the privilege of having direct *Perception* of Him (*c. f.* स्थिरभक्तियोगसुलभ: स्थाणु:) ।

Again, the discussion of this question is a necessity. It is of vital importance both to the Buddhist and the Brahmana. Re-birth (पुनर्जन्म) is admitted by the Buddhists too. This evil—re-birth—can be avoided by the grace of God alone, Who, in the plenitude of His power, will sever the कर्मबन्ध of the devotee. Hence it is that the poet ends with the prayer "ममापि च क्षपयतु नीललोहित: पुनर्भवं परिगतशक्तिरात्मभू:"—Let Nila-Lohita *cause* the cessation of my re-birth. The prayer is put in the causative form. He does not say "Let re-birth *cease*".

The poet next combats the belief—due undoubtedly to Buddhist teachings—that renunciation of the world (गृहत्याग) is a necessity to facilitate meditation (तपस्या) । Without this the devotee will not merit the grace of Dod and escape re-birth.

Kalidasa lays it down that the house-holder (गृहस्थ) who properly does his duty, practises तपश्चर्या every day and thereby merits divine favour. This sentiment he very aptly puts into the mouth of one who has himself renounced the world. Thus a disciple of कण्व says of the king—

अध्याक्रान्ता वसतिरमुनाप्याश्रमे सर्वभोग्ये
रक्षायोगादयमपि तप: प्रत्यहं सञ्चिनोति ।
अस्यापि द्यां स्पृशति वशिनश्चारणद्वन्द्वगीत:
पुण्य: शब्दो मुनिरिति मुहु: केवलं राजपूर्व: ॥

Besides thus promoting the practice of penance, the गृहस्थाश्रम secures blessings that are in themselves of no mean value. No lovely sight on earth is comparable to the sight of the son's face. In Act VII we read—

आलक्ष्यदन्तमुकुलाननिमित्तहासैरव्यक्तवर्णरमणीयवचःप्रवृत्तीन् ।
अङ्काश्रयप्रणयिनस्तनयान् वहन्तो धन्यास्तदङ्गरजसा मलिनीभवन्ति ॥

The thrill of pleasure from a son's touch is indescribable. Says दुष्यन्त—

अनेन कस्यापि कुलाङ्कुरेण स्पृष्टस्य गात्रेषु सुखं ममैवम् ।
कां निर्वृत्तिं चेतसि तस्य कुर्याद् यस्यायमङ्गात् कृतिनः प्ररूढः ॥

Again, Kalidasa continues, the man who renounces the world, shifts for himself only. He has no thought for his forefathers. How selfish ! Look at the plight he leaves his ancestors in ! Thinking of his childlessness, Dushyanta exclaims—

अस्मात् परं बत यथाश्रुतिसम्भृतानि को नः कुले निवपनानि करिष्यतीति
नूनं प्रसूतिविकलेन मया प्रसिक्तं धौताश्रुशेषमुदकं पितरः पिबन्ति ॥

Leave apart the consideration for the ancestors ; from selfish motives too one should think twice before renouncing the world. For instance, what is to become of the ancestral wealth the would be *Sannyasin* has to inherit. It goes to others who had never toiled for it, Dushyanta thus gives expression to this disquieting thought—

अनपत्यः किल तपस्वी । कष्टं खल्वनपत्यता...एवं भोः सन्ततिच्छेदनिरवलम्बानां मूलपुरुषावसाने सम्पदः परमुपतिष्ठन्ति । ममाप्यन्ते पुरुवंशश्रिय एष वृत्तान्तः ।

Here the poet meets a possible rejoinder of the Buddhists, viz, Let one beget a son and then take up सन्यास as शाक्यसिंह did. Hold ! says the poet. Have you thought of your dependents, the कुटुम्बs whom it is your duty to maintain ? Apparently you have not. Considerations of self should come last to the true Brahmana. Complete sacrifice of self should be the guiding principle of the Brahmana's life. Learn to think of others. Rear your child, see that he is able to take care of himself and to succour distressed relatives, then go out by all means. Thus Kanva says to Sakuntala—

भूत्वा चिराय चतुरन्तमहीसपत्नी दौष्यन्तिमप्रतिरथं तनयं निवेश्य ।
भर्त्रा तदर्पितकुटुम्बभरेण सार्धं शान्ते करिष्यसि पदं पुनराश्रमेऽस्मिन् ॥

Lastly, the Buddhists deny the efficacy of sacrifices and describe them as due to the desire of wily Brahmanas to secure a source of livelihood to themselves at the expense of a credulous society. Against this the poet places the testimony of no less a personage than मारीच the father of Indra who thus speaks of the utility of sacrifices—

तव भवतु बिडौजाः प्राज्यवृष्टिः प्रजासु त्वमपि विततयज्ञः स्वर्गिणः प्रीणयस्व ।
युगशतपरिवर्तानेवमन्योऽन्यकृत्यैर्नयतमुभयलोकानुग्रहश्लाघनीयैः ॥

As to the cupidity of the Brahmanas, Dushyanta himself declares that he gets more from the ascetics than from the classes—

यदुत्तिष्ठति वर्णेभ्यो नृपाणां क्षयि तद्धनम् ।
तपःषड्भागमक्षय्यं ददत्यारण्यका हि नः ॥

Brahmanas, as a class, instead of deserving contempt as the denunciations of the Buddhists imply, deserve the highest respect. Expression of this sentiment occurs frequently in the Sakuntalam. सरस्वती श्रुतिमहतां महीयताम् is only one instance out of dozens. Disrespect towards a Brahmana, intentional or unintentional, leads to awful consequences as is seen from the sufferings of Sakuntala through the curse of Durvasas.

These are some of the teachings of the Sakuntalam in its capacity as an antidote to Buddhism. I purposely pass over illustrations of the law of कर्मन् and other things it has in common with Buddhism. The lessons are worked into the body of the text not merely without the obtrusiveness of a sermon, but with the highest dramatic skill that leaves lasting impressions with the reader though he is all along not even aware of their presence there.

THE CHARACTERS

(*a*). *Dushyanta*—Dushyanta is the principal male character in the drama. In him the poet gives us the Brahmanical ideal of a man and a king. He is a model both physically and morally,

His physique is impressive. The ascetics exclaim on seeing him—

नैतच्चित्रं यदयमुदधिश्यामसीमां धरित्रीम्

एकः कृत्स्नां नगरपरिघप्रांशुबाहुर्भुनक्ति ॥

His charioteer compares him to Siva himself—

कृष्णसारे ददच्चक्षुस्त्वयि चाधिज्यकार्मुके ।

मृगानुसारिणं साक्षात् पश्यामीव पिनाकिनम् ॥

Even the gods look at him with wonder. Aditi says of his Stature—सम्भावनीयानुभावा अस्य आकृतिः ।

His body is capable of bearing great physical strain—रविकिरणसहिष्णु क्लेशलेशैरभिन्नम् । With all this he is of an uncommonly attractive appearance (*c. f.* "मधुरगम्भीराकृतिः", "अहो दीप्तिमतोऽपि विश्वसनीयतास्य वपुषः", "एवमुत्सुकोऽपि प्रियदर्शनो देवः", "स्थाने खलु प्रत्यादेशविमानितापि अस्य कृते शकुन्तला क्लाम्यति" &c.)

Perfect mastery of the weapons of war is of course one of his accomplishments. He is a delightful conversationist too (*c. f.* "चतुरं प्रियञ्च आलपन् प्रभाववानिव लक्ष्यसे") । Besides, he is a keen observer (*c. f.* "नीवाराः शुकगर्भकोटरमुखभ्रष्टास्तरूणामधः" &c., "यदालोके सूक्ष्मं व्रजति सहसा तद्विपुलताम्" &c., "शैलानामवरोहतीव शिखरादुन्मज्जतां मेदिनी" &c.), an appreciative lover of nature

(*c. f.* "कार्या सैकतलीनहंसमिथुना स्रोतोवहा मालिनी

पादास्तामभितो निषण्णहरिणा गौरीगुरोः पावनाः ।

शाखालम्बितवल्कलस्य च तरोर्निर्मातुमिच्छाम्यधः

शृङ्गे कृष्णमृगस्य वामनयनं कण्डूयमानां मृगीम् ॥" &c.),

and an ardent admirer of the sublime (*c. f.* प्राणानामनिलेन वृत्तिरुचिता सत्कल्पवृक्षे वने &c.) He has thus the makings of a first

class painter and practises the art with great success (*c. f.* "एषा राजर्षिनिपुणता जाने सखी मे अग्रता वर्त्तते इति" &c.).

Dushyanta's moral side is not less developed. Always ready to succour the distressed (*c. f.* "आर्तत्राणाय वः शस्त्रम्" &c., "आर्त्तानां भयमपनेतुमात्तधन्वा" &c.), he takes special delight in removing hindrances to the rites of the virtuous (*c. f.* "कुतो धर्मक्रियाविघ्नः सतां रक्षितरि त्वयि" &c., "किं तावद्व्रतिनामुपोढतपसां विघ्नैस्तपो दूषितम्" &c.)- A warm friend, he does not hesitate even to risk his life in furthering the cause of his friend. Compare—

सुखपरस्य हरेरुभयैः कृतं त्रिदिवमुद्धृतदानवकण्टकम् ।
तव शरैरधुनानतपर्वभिः पुरुषकेसरिणश्च पुरा नखैः ॥

He is a loving and considerate hasband and an affectionate father. Practice of virtue and constant thinking of virtuous acts have banished dishonest ideas from his mind. So much so that not only does his mind not incline to what is not virtues, but he can know with certainty that whichever way his mind inclines that must be the right course. He has reached that stage towards perfection when likes and dislikes regulate the moral code (*c. f.* "असंशयं क्षत्रपरिग्रहक्षमा यदार्यमस्यामभिलाषि मे मनः" &c., "कामं प्रत्यादिष्टां स्मरामि न परिग्रहं मुनेस्तनयाम् । बलवत्तु दूयमानं प्रत्याययतीव मां हृदयम् ॥") His regard for the Brahmanas is unbounded.

Such is Dushyanta as a man and Kalidasa's ideal of a man.

As a king, Dushyanta does not brook the existence of a rival ruler (*c. f.* "—उदधिश्यामसीमां धरित्रीमेकः कृत्स्नां नगरपरिघप्रांशुबाहुर्भुनक्ति" &c.). He is upright, always guarding the good against the aggressions of the wicked (*c. f.* "नियमयसि कुमार्गप्रस्थितानात्तदण्डः प्रशमयसि विवादं कल्पसे रक्षणाय" &c.). He considers his kingdom as a vast houselold of which he is the head, the subjects the members. Compare—

"प्रजाः प्रजाः स्वा इव तन्त्रयित्वा निषेवते श्रान्तमना विविक्तम् ।
यूथानि सञ्चार्य रविप्रतप्तः शीतं दिवा स्थानमिव द्विपेन्द्रः ॥"

"येन येन वियुज्यन्ते प्रजाः स्निग्धेन बन्धुना।
स स पापादृते तासां दुष्यन्त इति घुष्यताम्॥" &c.

He personally supervises the daily administration of justice in his capital and does not leave it wholly to the ministers (*c.f.* "वेत्रवति, मद्वचनादमात्यमार्य्यपिशुनं ब्रूहि चिरप्रबोधान्न सम्भावितमस्माभिर्धर्मासनमध्यासितुम्। यत् प्रत्यवेक्षितं पौरकार्य्यमार्य्येण तत् पत्रमारोप्य दीयतामिति" &c.) There is evidence to show that he arranged tours to check the work of his representatives in the provinces. Thus when asked by अनसूया to explain his presence at the hermitage, the plea of a tour is offered and taken as a perfectly natural explanation (*c.f.* "यः पौरवेण राज्ञा धर्माधिकारे नियुक्तः सोऽहमविघ्नक्रियोपलम्भाय धर्मारण्यमिदमायातः" &c.). Hence everything goes right under his rule (*c.f.* "न कश्चिद्वर्णानामपथमपकृष्टोऽपि भजते" &c.) He firmly believes that the wicked do not exist in his kingdom and is shocked to hear his friend माधव्य over-powered by some wicked person.

His power was almost unbounded and he was answerable to no one on earth, except his conscience, for what he did. Under the circumstances the conscience must be well-nigh superhuman to keep its possessor in the path of virtue regardless of temptations. The poet has given two instances that appeal to two of the least resistible among the baser instincts of the human mind, and on each occasion his hero has come out with untarnished glory.

A *millionaire* dies childless. The minister decides that his entire property revert to the state, and reports accordingly. Dushyanta reverses the decision and directs that enquiries be made about the truth of a certain vague rumour that one of the wives of the *millionaire* was with child. Any modern court would laugh at Dushyanta and leave it to the child in the womb to come out and fight it out with the state!

A lady of distinguished parentage, nobler than that of the king himself, of fresh youth and unparalleled beauty, is brought

before him by her relatives as his wedded wife. He however does not remember having married her. But her beauty deeply impresses him. Compare—

इदमुपनतमेवं रूपमक्लिष्टकान्ति प्रथमपरिगृहीतं स्यान्न वेति व्यवस्यन् ।
भ्रमर इव विभाते कुन्दमन्तस्तुषारं न खलु सपदि भोक्तुं नैव शक्नोमि हातुम् ॥

The lady herself declares the marriage. Her kinsmen, including among them a venerable sage, bear witness to the marriage. In fact, there is absolutely no room for scandal in admitting her as wife. Yet the king disowns her because his conscience does not say she is his wife. This strength of character astounds the simple warder who exclaims "अहो धर्मावेक्षिता भर्त्तुः...कोऽन्यो विचारयति"। When the lady is about to be thrust upon him by her relatives, the king proudly declares "भोः किमत्रभवतीं विप्रलभसे ।

कुमुदान्येव शशाङ्कः सविता बोधयति पङ्कजान्येव ।
वशिनां हि परपरिग्रहसंश्लेषपराङ्मुखी वृत्तिः ॥"

This is family-pride which makes him believe that a descendant of पुरु is incapable of even thinking of vice (*c. f.* "वयस्य न परिहार्ये वस्तुनि पौरवाणां मनः प्रवर्त्तते", विनिपातः पौरवैः प्रार्थ्यते इति न श्रद्धेयमेतत्" &c.)

(*b*). *Kanva*—Kanva is to a certain extent the complementary of Dushyanta. Filial love is only partly illustrated by the latter. Dushyanta's affection for Sarvadamana may be due to the absence of male issue to perpetuate his race. Kanva's tenderness towards Sakuntala, however, is as genuine as it is remarkable ; because he is merely her foster-father and not the true father.

As a sage, Kanva had prevision of what was going to happen to Sakuntala (*c. f.* "तपःप्रभावात् प्रत्यक्षं सर्वमेव तत्रभवतः...अतः खलु मम नातिक्रुद्धो मुनिः" &c.). Possibly this deepened his emotion at the time of her departure. He is greatly moved when

he says "अनसूये गतवती वां सहधर्मचारिणी"* । The single word गतवती speaks volumes. His affectionate nature stands fully revealed in the words—

"शममेष्यति मम शोकः कथं नु वत्से त्वया रचितपूर्वम् ।
उटजद्वारि विरूढं नीवारबलिं विलोकयतः ॥
गच्छ शिवास्ते पन्थानः सन्तु &c. *

Yet Kanva is not affected like an ordinary house-holder. He feels it like a sage. While he feels it, he analyses the feeling. Thus he notes that his heart, throat and the senses are not what they were. This surprises him. He marks the changes and traces them to their origin. Thus—

यास्यत्यद्य शकुन्तलेति हृदयं संस्पृष्टमुत्कण्ठया
कण्ठः स्तम्भितबाष्पवृत्तिकलुषश्चिन्ताजडं दर्शनम् ।
वैक्लव्यं मम तावदीदृशमहो स्नेहादरण्यौकसः
पीड्यन्ते गृहिणः कथं नु तनयाविश्लेषदुःखैर्नवैः ॥

This introspection while the emotion is in progress, marks the sage.

This sage is a perfect master of worldly affairs (*c. f.* वनौकसोऽपि लौकिकज्ञा वयम् &c.). His advice to Sakuntala and message to Dushyanta are gems of worldly wisdom. Compare—

शुश्रूषस्व गुरून् कुरु प्रियसखीवृत्तिं सपत्नीजने
भर्तुर्विप्रकृतापि रोषणतया मा स्म प्रतीपं गमः ।
भूयिष्ठं भव दक्षिणा परिजने भोगेष्वनुत्सेकिनी
यान्त्येवं गृहिणीपदं युवतयो वामाः कुलस्याधयः ॥

---

* गच्छ and गतवती task the actor's skill to the utmost and justify the words प्रतिपात्रमाधीयतां यत्नः &c.

and

अस्मान् साधु विचिन्त्य संयमधनानुच्चैः कुलञ्चात्मन-
स्त्वय्यस्याः कथमप्यबान्धवकृतां स्नेहप्रवृत्तिञ्च ताम्।
सामान्यप्रतिपत्तिपूर्वकमियं दारेषु दृश्या त्वया
भाग्यायत्तमतः परं न खलु तद्वाच्यं वधूबन्धुभिः॥

The study of the play of human feelings too is not neglected by him (*c. f.* अभिजनवतो भर्तुः श्लाघ्ये स्थिता गृहिणीपदे
विभवगुरुभिः कृत्यैस्तस्य प्रतिक्षणमाकुला।
तनयमचिरात् प्राचीवार्कं प्रसूय च पावनं
मम विरहजां न त्वं वत्से शुचं गणयिष्यसि॥)

He condemns the apathy of ordinary people towards a female child. A daughter is to him a trust property. As trust property has to be looked after with greater care than one's own property, so a daughter has to be treated with greater tenderness than a son until she is united to a suitable husband. Compare—

अर्थो हि कन्या परकीय एव तामद्य संप्रेष्य परिग्रहीतुः।
जातो ममायं विशदः प्रकामं प्रत्यर्पितन्यास इवान्तरात्मा॥

(*c*). *Madhavya*—Madhavya is the jester, but he does not est. He is not introduced with a view to illustrate any particular moral principle. A cripple and an idiot, he does very little work himself, but furnishes others with opportunity to do their work. For instance, when the king is in a fix and finds he has to disobey either his mother or the ascetics, Madhavya acts as his deputy and indirectly helps the king in the pursuit of his love. When told by the king that the Sakuntala-affair was a joke (*c. f.* परिहासविजल्पितं सखे परमार्थेन न गृह्यतां वचः) he believes it, acts according to this belief, and thus indirectly becomes a material helper in the development of the plot.

Again when sent to soothe Hamsapadika, through sheer

idiocy he suffers himself to be siezed by her and detained while Sakuntala is brought in by her relatives and dis-owned by the king. This would not have been if Madhavya were present before the king at the time. The fool knew that there was the risk of detention. Yet he was taken (*c.f.* गृहीतस्य तया परकीयैर्हस्तैः शिखण्डके ताड्यमानस्य अप्सरसा इव वीतरागस्य नास्ति इदानीं मे मोक्षः&c.)

Yet again, at the approach of Vasumati it is Madhavya who runs away with the portrait of Sakuntala and gives Matali an opportunity to rouse the king from his lethargy,

(d). Sarngarava—Sarngarava is the foremost of Kanva's disciples. He leads the party escorting Sakuntala. Kanva has confidence in him. He delivers his message to Sarngarava. This young anchorite thinks that the ascetic is the highest being on the earth, and has supreme abhorrence for every thing non ascetic (*c. f.* तथापीदं शश्वत्परिचितविविक्तेन मनसा जनाकीर्णं मन्ये हुतवहपरीतं गृहमिव)। This respect which others show to the ascetic is naturally his due from every good man (*c. f.* भो महाब्राह्मण, काममेतदभिनन्दनीयं, तथापि वयमत्र मध्यस्थाः &c.).

Owing to this exalted notion of the superiority of his own order, he brooks no contradiction,not even from the lord of the earth. Nay, he does not hesitate to hint that if he were Knava, he would have made the king feel the power of asceticism the moment he came to know of his wedding. Compare—

कृताभिमर्शामनुमन्यमानः सुतां त्वया नाम मुनिर्विमान्यः ।
मुष्टं प्रतिग्राहयता स्वमर्थं पात्रीकृतो दस्युरिवासि येन ॥

He gives vent to his contempt of kings and courts while saying "श्रुतं भवद्भिरधरोत्तरम् ।

आ जन्मनः शाठ्यमशिक्षितो यस्तस्याप्रमाणं वचनं जनस्य ।
परातिसन्धानमधीयते यैर्विद्येति ते सन्तु किलाप्तवाचः ॥"

Thus with all his learning and asceticism he proves a bad peace-maker.

(*e*). *Saradvata*—Saradvata's position among the disciples of Kanva is second only to that of Sarngarava. He is of an entirely different disposition. He has no contempt for the people, he pities them. Compare—

"अभ्यक्तमिव स्नातः शुचिरशुचिमिव प्रबुद्ध इव सुप्तम् ।
बद्धमिव स्वैरगतिर्जनमिह सुखसङ्गिनमवैमि" ॥

Cool and self-possessed he is practical and to the point. When Sarngarava works himself up to a white heat, Saradvata at once puts a stop to the quarrel by the most relevant suggestion possible at the time (*c. f.* शार्ङ्गरव विरम त्वमिदानीम् । शकुन्तले, वक्तव्यमुक्तमस्माभिः अयमत्रभवानेवमाह । दीयतामस्मै प्रत्ययप्रतिवचनम् ।). Again when Sarngarava a second time joins issue with the king, Saradvata with great decision of character comes to the rescue, saying "शार्ङ्गरव किमुत्तरेण । अनुष्ठितो गुरुनियोगः । प्रतिनिवर्तामहे वयम् । (राजानं प्रति)

तदेषा भवतः पत्नी त्यज वैनां गृहाण वा ।
उपपन्ना हि दारेषु प्रभुता सर्वतोमुखी ॥

"गौतमि गच्छाग्रतः" । The lead is here wrested from Sarngarava's hands and it is Saradvata that practically heads the party in its home-ward march.

(*f*). *Sakuntala*—Sakuntala is the poet's ideal of a woman. Her beauty is incomparable(*c.f.* "मानुषीषु कथं वा स्यादस्य रूपस्य सम्भवः" &c. "चित्ते निवेश्य परिकल्पितसत्त्वयोगा रूपोच्चयेन मनसा विधिना कृता नु" &c.).

But *perfect* beauty, as we have seen in the case of Dushyanta, has its physical as well as the mental side. Hence all the distinctive traits of the female mind are illustrated in Sakuntala. Her *timidity* gives the king an opportunity to introduce himself (*c. f.* अवसरोऽयमात्मानं दर्शयितुम् &c.). She is *affectionate* even to the inferior creation. The trees and shrubs of the hermitage are brothers and sisters to her (*c. f.* "अस्ति मे सोदरस्नेहोऽपि एतेषु" &c.

"पातुं न प्रथमं व्यवस्यति जलं युष्मास्वपीतेषु या
नादत्ते प्रियमण्डनापि भवतां स्नेहेन या पल्लवम् ।
आद्ये वः कुसुमप्रसूतिसमये यस्या भवत्युत्सवः
सेयं याति शकुन्तला पतिगृहं सर्वैरनुज्ञायताम् ॥" &c.)

She is a tender and expert *nurse.* Compare—

"यस्य त्वया व्रणविरोपणमिङ्गुदीनां तैलं न्यषिच्यत मुखे कुशसूचिविद्धे ।
श्यामाकमुष्टिपरिवर्द्धितको जहाति सोऽयं न पुत्रकृतकः पदवीं मृगस्ते ॥"
"अचिरप्रसूतया जनन्या विना विवर्द्धित एव" &c.

She cannot leave the hermitage without bidding farewell to the creeper वनज्योत्स्ना। She weeps when parting with the little fawn. Her eagerness to meet her husband still leaves room for an overpowering anxiety for the poor doe that is nearing the period of delivery.

So liberally endowed with the womanly virtues, she is unconscious of her merit (*c. f.* "अयि आत्मगुणावमानिनि" &c.). Of her filial love it is enough to say that she makes even Kanva exclaim—

"शममेष्यति मम शोकः कथं नु वत्से त्वया रचितपूर्वम् ।
उटजद्वारि विरूढं नीवारबलिं विलोकयतः ॥"

As a wife, Sakuntala seems to have resolved to live up to the ideal held before her by Kanva. We have no occasion to judge her in relation to her elders, co-wives, and attendants. But as regards her husband, the celebrated line भर्तुर्विप्रकृतापि रोषणतया मास्म प्रतीपं गमः has never been since uttered before a more willing and capable pupil. In the face of the gravest insult when she was apparently most meanly विप्रकृत, she could not use a word harsher than अनार्य towards her husband. When the fatal decision was finally announced, she only said "भगवति वसुधे देहि मे विवरम्" and blamed not her husband, the author of her misery, but her *destiny* (*c.f.* "सा निन्दन्ती स्वानि भाग्यानि बाला बाहूत्क्षेपं क्रन्दितुञ्च प्रवृत्ता" &c.) like another model woman, Sita, who—

"न चावदन्ति रवर्णमार्या निराकरिष्णोर्जिनादतेऽपि ।
आत्मानमेव स्थिरदुःखभाजं पुनःपुनर्दुष्कृतिनं निनिन्द ॥"

Both observe austerities after being discarded—Sakuntala like a poor mortal "वसने परिधूसरे वसाना नियमक्षाममुखी धृतैकवेणिः", but Sita with the divine resolve--

"साहं तपः सूर्यनिविष्टदृष्टिरूर्ध्वं प्रसूतेश्वरितुं यतिष्ये ।
भूयो यथा मे जननान्तरेऽपि त्वमेव भर्त्ता न च विप्रयोगः" ॥

(g). Anasuya—Anasuya and Priyamvada are about the same age as Sakuntala and almost as beautiful (*c. f.* "अहो मधुरमासां दर्शनम्" &c. "समवयोरूपरमणीयं भवतीनां सौहार्दम्" &c. "तिस्रस्तत्रभवत्यो दृश्यन्ते सर्वाश्च दर्शनीयाः" &c.). Mentally too the three resemble one another with just a shade of difference.

Priyamvada is the most sprightly, the most quick-witted of the three. Anasuya is the most reserved and the least shy and timid. Hence we find that, at the sudden appearance of the king. Anasuya is the first to recover self-possession. She receives the king and arranges for the rites of hospitality.

Priyamvada is more confiding, Anasuya more suspicious or rather circumspect. One sanguine, the other apprehensive. Priyamvada thinks more of the present, Anasuya more of the future. Hence Anasuya is provident (*c. f.* "एतन्निमित्तमेव कालान्तरक्षमा निक्षिप्ता मया केशरमालिका" &c.). While Priyamvada is busy expressing her satisfaction at the union of Dushyanta and Sakuntala, Anasuya is negotiating with the king for the *future* happiness of her friend (*c. f.* "वयस्य बहुवल्लभा राजानः श्रूयन्ते । यथा आवयोः प्रियसखी बन्धुजनशोचनीया न भवति तथा निर्वाहय" &c.). While Anasuya is apprehensive (*c. f.* "प्रियंवदे यद्यपि गान्धर्वेण विधिना...निर्वृतं मे हृदयं तथापि एतावच्चिन्तनीयम्" &c. "अद्य स राजर्षि...नगरं प्रविश्य...इतोगतं वृत्तान्तं स्मरति वा न वा" &c.). Priyamvada is confident (*c.f.* "विस्रब्धा भव । न तादृशा आकृतिविशेषा गुणविरोधिनो भवन्ति" &c.).

Priyamvada cares more for sentiment (*c. f.* "तात इदानीमिमं वृत्तान्तं श्रुत्वा न जाने किं प्रतिपत्स्यते इति &c.). Anasuya is more practi-

cal (*c. f.* गुणवते कन्यका प्रतिपादनीया इति प्रथम: सङ्कल्प:। तं यदि दैवमेव सम्पादयति ननु अप्रयासेन कृतार्थो गुरुजन:" &c.) In this respect the friends compare well with the disciples शार्ङ्गरव and शारद्वत।

By virtue of her self possession Anasuya is more capable of acting at emergencies. We have seen an instance when Dushyanta discloses himself at the hermitage. When Durvasas has pronounced his curse, Priyamvada is stunned and commences blaming destiny, but Anasuya sees the value of time and at once sends off Priyamvada to pacify the sage (*c. f.* "गच्छ पादयो: प्रणम्य निवर्त्तयैनम्" &c.).

Both are devotedly attached to Sakuntala. But owing to the difference of temperament Priyamvada is anxious that Sakuntala may *for the present* be able to bear her grief easily (*c. f.* सुखशयितपृच्छिका शकुन्तलासकाशं गता" &c.). Anasuya does not think of the present grief at all, but is busy thinking of means to remove the further accession of grief *in the furture* (*c. f.* "तदित: अभिज्ञानमङ्गुलीयकमस्य विसृजाव:" &c.). Indeed Anasuya notices very little of the present. She does not observe with the solicitude of Priyamvada how Sakuntala is suffering, or Dushyanta is getting emaciated. When Sakuntala says referring to the *present* "दुष्करमहं करोमि" Anasuya replies pointing to the *future* "गुर्वपि विरहदु:खमाशाबन्ध: साहयति"।

To Sakuntala, therefore, Priyamvada is the more *immediately* helpful of the two friends. Consequently she thinks more of her. She refers to her friends saying "प्रियंवदामिश्रा: सख्य:" not "अनसूयामिश्रा:"। But precisely for the same reasons Kanva has less confidence in Priyamvada and more in Anasuya. When the friends weep, he addresses Anasuya ignoring Priyamvada (*c. f.* "अनसूये अलं रुदित्वा। ननु भवतीभ्यामेव स्थिरीकर्त्तव्या शकुन्तला" &c.). He gives the same prominence to Anasuya when calling the friends back to the hermitage after Sakuntala's departure (*c. f.* अनसूये गतवती वां सहधर्मचारिणी। निगृह्य शोकमनुगच्छतं माम्" &c.).

(*h*). *Vasumati*—Vasumati plays almost no part in the drama, except that, owing to her, Madhavya falls into the hands of Matali. However, the poet preaches through her a valuable lesson to good wives (*c. f.* 'कार्य्येशा कार्य्योपरार्धं मे परिहरति") ।

(i). *Sanumati*—Sanumati is introduced to remove the suspense of the audience. Sanskrit dramatists avoid a tragic end. The fifth act closes almost tragically with the disappearance of Sakuntala (*c. f.* "उत्क्षिप्यैनां ज्योतिरेकं जगाम") । In the sixth act Sanumati informs the audience that Sakuntala is alive, and is still devoted to Dushyanta (*c. f.* "अस्य कृते शकुन्तला क्लाम्यति"), that an heir is born to Dushyanta and the continuity of his race is assured (*c. f.* "सति खलु दीपे व्यवधानदोषेणायमन्धकारदोषमनुभवति" &c.), and lastly that Dushyanta will soon be reunited with Sakuntala (*c. f.* देवा एव तथानुष्ठास्यन्ति यथा अचिरेण धर्म्मपत्नीं भर्त्ताभिनन्दिष्यतीति" &c.). Sanumati thus soothes the anxiety of the listeners and prepares them for the seventh act.

III. THE SOURCE OF THE STORY

(*a*) THE MAHABHARATAM.

The story of Sakuntala occurs in the Mahabharatam.

King Dushyanta, a descendant of Puru, going out on a hunting excursion, reaches the hermitage of Kanva at a time when the sage is out in quest of fruits. His daughter Sakuntala receives the king. Questioned by the king she tells him the story of her birth. The king proposes marriage under the Gandharva system. Sakuntala agrees on condition that the issue of the marriage becomes king after Dushyanta. The king then leaves before Kanva's return promising soon to remove Sakuntala to his capital. Kanva on his return learns every

thing through his power of asceticism and approves of the marriage.

In the meantime Dushyanta forgets the marriage. Sakuntala is delivered of a boy in the hermitage. The child developes supernatural stature and strength and even when only six years old overcomes wild animals by his prowess. He is therefore named Sarvadamana.

When the boy was still a child, Kanva sent him with Sakuntala to king Dushyanta at Hastinapura. Sakuntala reminds the king of his promise. The king instantly remembers all but pretends ignorance. Sakuntala resents the treatment and as she starts to go back to the hermitage, a celestial messenger in the air confirms her story. The king draws the attention of all present to the voice and accepts Sakuntala with her child explaining to her that he remembered every thing the moment he saw her but was hesitating as to how people would take the story without confirmation.

Kalidasa has modified the story materially. Thus in the drama, at the time of Dushyanta's visit, Kanva is absent from the hermitage, not in quest of fruits as the Mahabharata has it, but on a pilgrimage (which keeps him away for days—a fact of vital importance to the story) to mitigate the severity of an impending calamity to Sakuntala (*c. f.* दैवमस्याः प्रतिकूलं शमयितुम्" &c.). This prepares us for another modification, the curse of Durvavasas, which is the calamity Kanva has in view.

Next, telling herself the story of her birth—the sort of birth she had—may not be incongruous in the case of a तापसी to whom the world is an illusion. But Kalidasa wants a model गृहस्थकन्या। He sees the breach of decorum it implies and creates अनसूया to relate the story. Also with a view to bring the romantic element into prominence he has the scene of watering the shrubs.

The meeting of the hero and the heroine and the proposal of marriage in the Mahabharata is rather abrupt. The poet finds it necessary therefore to make the king stay for a short time in the hermitage before making the proposal. Hence he introduces Acts II and III which offer him several opportunities to dilate upon the विरह of his hero and heroine.

Again as a model गृहस्थकन्या it is not proper for Sakuntala herself to work out plans to meet Dushyanta. Nor is it prudent to place the whole burden of it upon *one* friend only—अनसूया। The other friend प्रियंवदा is thus a necessity. Also to sift the pros and the cons carefully, to scrutinise thoroughly the dark side and the bright side of the question, it is necessary that the two friends should be of a *different turn of mind*. so as to discuss matters together from different points of view.

The Sakuntala of the Mahabharata is a thorough तापसी। Marriage to her is a mere question of *duty* (धर्म) leaving no scope for *feeling*. Hence there is nothing improper in her dictating at the time of marriage the condition about the succession of her child. Kalidasa's Sakuntala cannot do it. The poet however makes his hero childless and absolutely mad brooding over his childlessness. Thus Sarvadamana's succession to the throne is assured, the only question is how he is to be restored to his father.

The Mahabharata does not explain why Dushyanta forgets his marriage. This is a vital point. The poet introduces Durvasas in explanation who curses Sakuntala. At the entreaties of Priyamvada the sage declares that the curse will cease at the sight of some token of recognition. The poet provides for this token by making Dushyanta leave his signet-ring with Sakuntala at the time of his departure from the hermitage.

In the Mahabharata, Kanva waits more than nine years before he makes up his mind to send Sakuntala to Hastina-

pura. As a sage, he alone knew why he waited so long. Ordinary people are apt to suppose that he was indifferent to the welfare of his daughter. Kalidasa's Kanva sends out Sakuntala the very day he learns of her marriage. The haste he explains saying—

अर्थो हि कन्या परकीय एव तामद्य सम्प्रेष्य परिग्रहीतुः ।
जातो ममायं विशदः प्रकामं प्रत्यर्पितन्यास इवान्तरात्मा ॥

The Sakuntala of the Mahabharata is a high-spirited तापसी । She has no hesitation in introducing herself to the king in the audience hall and personally demanding the legitimate rights on behalf of her boy. She wins her cause by her courage. Of course she was greatly helped by the fact that Dushyanta was only *feigning* forgetfulness.

Kalidasa's Sakuntala on the other hand was standing before a king who was hopelessly out of his mind at the time owing to the curse of Durvasas. To add to her confusion she discovered that the signet-ring was missing. By this means the poet provides for her disowning and removal by Menaka, and arranges for the beautiful scene of restoration in Act VII. Thus except the barest outlines of the story (viz, the king's visit to the hermitage, marriage of Sakuntala in Kanva's absence, forgetting the marriage, and Kanva's sending of Sakuntala) everything in the drama is Kalidasa's own.

(*b*) THE PADMAPURANAM.

The story of Sakuntala occurs in the Padmapurana also. This Purana is Vaishnava in its teachings and contains the legend of Radha who occupies a very important place in modern Vaishnavism. It is however worthy of note that the name of Radha does not appear in such well-known and professedly Vaishnava works as the Harivamsa, the Vishnupurana, and the Bhagavata. The Padmapurana must therefore be later than

these works. Now the Bhagavata is believed to date from the 13th century A. D. Hence the Padma coming so late as the 13th century or later naturally prefers to give the story of Sakuntala after Kalidasa.

From the stern asceticism of Sakuntala as she is described in the Mahabharata we may guess what the ideal of ascetic life was at the time of Vyasa. In Kalidasa's drama the ideal has changed. Asceticism has lost much of its sternness and indifference and has become a compromise between its old self and elevated गार्हस्थ्य। The austere author of the Puranas would not have stooped to point the picture of asceticism we see in the Sakuntalam. The Padmapurana is indebted to the dramatist and not he to the Purana.

टीकाकृतो मङ्गलाचरणम्

वाणीं शिवञ्च जनकञ्च गुरूंश्च नत्वा
पूर्वोक्तिमर्म च मया बहुधा विभाव्य ।
शाकुन्तलस्य विवृतिः क्रियते प्रयत्नाद्
बालप्रबोधजननी मितभाषिणीयम् ॥ १ ॥

गूढ़ाशयं किल वचः कविकुञ्जरस्य
पाठान्तरैरिह पुनः पिहितस्वरूपम् ।
मोघं श्रमं मतिमतामपि पश्यतो मे
दुश्चेष्टितं जड़धियो विबुधाः क्षमध्वम् ॥ २ ॥

सुकृतं कर्तुमशक्यं
लेशतः कृतमपि भूयसा सुखदम् ।
श्रममिह तेन सुदुर्गे
सारदारञ्जनो वितनोति ॥ ३ ॥

अभिज्ञानशकुन्तलम्

या सृष्टिः स्रष्टुराद्या वहति विधिहुतं या हविर्या च होत्री
ये द्वे कालं विधत्तः श्रुतिविषयगुणा या स्थिता व्याप्य विश्वम् ।
यामाहुः सर्वबीजप्रकृतिरिति यया प्राणिनः प्राणवन्तः
प्रत्यक्षाभिः प्रपन्नस्तनुभिरवतु वस्ताभिरष्टाभिरीशः ॥

May Isa (Siva) protect you—Isa known by [*Or*—protect you with] those eight perceptible forms—the form that is the first creation of the Creator—the form that carries the duly offered *Ghi*—the form that performs sacrifice—the two forms that regulate time—the form that pervades the universe and has the object of the sense of hearing for its attribute—the form that is called the source of all germs—the form by which the living are endowed with life.

येति ॥ अन्वयः । या स्रष्टुः आद्या सृष्टिः, या विधिहुतं हविर्वहति, या च होत्री, ये द्वे कालं विधत्तः, श्रुतिविषयगुणा या विश्वं व्याप्य स्थिता, यां सर्वबीजप्रकृतिरिति आहुः, यया प्राणिनः प्राणवन्तः, ताभिः प्रत्यक्षाभिः अष्टाभिः तनुभिः प्रपन्नः ईशः वः अवतु ॥ व्याख्या । 'या' जलरूपा मूर्त्तिः 'स्रष्टुः' जगत्कर्त्तुः 'आद्या सृष्टिः' प्रथमा कृतिः ["अप एव ससर्जादौ" इति मनुः]। 'या' अग्निरूपा मूर्त्तिः 'विधिना' यथाशास्त्रं 'हुतं' दत्तं 'हविः' घृतं 'वहति' ["अग्निमुखा वै देवाः" इत्युक्तेः]। 'या च होत्री' यजमानरूपा मूर्त्तिः। 'ये द्वे' चन्द्रसूर्यरूपे मूर्त्ती 'कालम्'

अहोरात्रात्मकं 'विधत्त:' जनयत:। 'श्रुत:' श्रवणेन्द्रियस्य 'विषय:' ज्ञेय: अर्थ:, शब्द:, स 'गुणो' यस्या: तादृशी शब्दगुणा 'या' आकाशरूपा मूर्त्ति: 'विश्वं' ब्रह्माण्डं 'व्याप्य स्थिता' अनुप्रविश्य वर्त्तते। 'यां' पृथिवीरूपां मूर्त्तिं 'सर्ववीजानां' सर्वशस्यानां 'प्रकृति:' मूलकारणम् 'इति आहु:' कथयन्ति पण्डिता इति शेष: ["ब्रुव: पञ्चानामादित आह च ब्रुव:" इति वर्त्तमाने उस् आहादेशश्च]। 'यया' वायुरूपया मूर्त्या 'प्राणिनो' जीवा: 'प्राणवन्त:' जीविन:। 'ताभि:' वर्णिताभि: 'प्रत्यक्षाभि:' इन्द्रियग्राह्याभि: 'अष्टाभि: तनुभि:' मूर्त्तिभि: 'प्रपन्न:' प्राप्त:, लब्ध:, अस्तीति ज्ञात: 'ईश:' शिव: ["भूतार्कचन्द्रयज्वानो मूर्त्तयोऽष्टौ प्रकीर्त्तिता:" इत्यष्टमूर्त्ति: शिव:] 'व:' युष्मान् रङ्गागतान् सभ्यान् 'अवतु' रक्षतु ॥ इत्याशी: सूत्रधारेण पठिता॥ एते जलादय: साक्षादुपलभ्यन्ते। एषामधिष्ठाता कश्चिदस्ति इति च अनुमीयते। स हि विश्वात्मा परमकारुणिक: शिव: युष्मान् रक्षतु इति तात्पर्य्यम् ॥ ["प्रपन्न:" (रा-, वि-, म-,)—"प्रसन्न:" (त-, न्या-)] ॥

NOTES

1. अभिज्ञानशकुन्तलम्—For derivation see Preface, also see note on अभिज्ञानशकुन्तलनामधेयेन (*Infra*).

2. (**a**). ये द्वे कालं विधत्त:—Refers to the Sun and Moon. These two by their revolution serve to measure time (काल)। The day, month, year are all reckoned in India by both methods—Solar and Lunar. (**b**). श्रुतिविषयगुणा &c.—Refers to आकाश (Ether) which propagates sound. Hence sound is a गुण of आकाश। तत्पुरुषगर्भो बहुव्रीहि: (See व्याख्या)। (**c**). सर्ववीजप्रकृति:—This has become उक्त owing to its connection with इति। Hence उक्तार्थत्वात्, *i. e.*, अभिहितत्वात्, प्रथमा। कर्मधा— and द्वन्द्—(See व्याख्या)। (**d**). यया—Refers to वायु (Air). वायु is called जगत्प्राण। Hence naturally वायुना जीवा: प्राणवन्त:। This gives तृतीया करणे। If we suppose that प्राण exists *because of* वायु, then यया takes हेतौ तृतीया। (**e**). प्रत्यक्षाभि:—Here अक्षि means इन्द्रिय sense. "सुवमिन्द्रियं वृत्तिविषये अक्षिशब्दो वर्त्तते" इति कैयट:। प्रतिमुखत्वमक्ष्णाम् इत्यव्ययीभावे "प्रतिपर (?) समनुभ्योऽक्ष्ण:" इत्यच् समासान्त:। प्रत्यक्षम् इन्द्रियाभिमुखत्वम् accessibility

of the senses. तत् अस्थामाम् इति प्रत्यच + अच् मत्वर्थे स्त्रियाम् = प्रत्यचा: accessible to the senses. Or, प्रतिगता अचाणि इन्द्रियाणि प्रत्यचा:, प्रादितत्— । ताभि: । (f). प्रपन्न:—प्र + पद + क्त कर्मणि । प्राप्त: known, *i. e.*, inferred to exist. The existence of Isa is inferred from his eight forms (अष्टाभि: तनुभि:) which are *directly perceived* (प्रत्यचाभि:) । The अनुमान is sound, because based upon प्रत्यच । प्र + पद् is प्राप्त्यर्थ because it is गत्यर्थ । Instances of its गत्यर्थता are numerous. Thus—"तां जन्मने शैलवधूं प्रपेदे", "तां प्रपेदिरे प्राक्तनजन्मविद्या:", "प्रपेदिरे चिरेण नाभिं प्रथमोदविन्दव:" &c. Others take प्रपन्न in the sense युक्त: । Others again read प्रसन्न: and explain प्रसन्न ईश: प्रत्यचाभिरष्टाभिस्तनुभि: व: अवतु—Let Siva be pleased and protect you with his eight perceptible forms. But in this case, as well as when प्रपन्न: is explained as युक्त:, it is difficult to see what purpose is served by the epithet प्रत्यचाभि: । The sense does not suffer if प्रत्यचाभि: is omitted altogether. In our interpretation the reference to प्रत्यच is indispensable serving as the basis of the अनुमान about the existence of Siva.

3. *Metre*—The metre is स्रग्धरा defined as "म्रभ्नैर्यानां त्रयेण त्रिमुनियतियुता स्रग्धरा कीर्तितेयम्"—It is स्रग्धरा if the triads म, र, भ, न, य, य, य follow in order with pause after every seventh syllable.

4. *Remark*—At the time of Kalidasa, Buddhism was on the decline and Brahmanism once more in the ascendant. But the baneful effects of the preaching of godlessness had not yet disappeared. Hence the poet deems it fit here to combat the prevailing scepticism (See *Introduction*).

नान्द्यन्ते सूत्रधार: (नेपथ्याभिमुखमवलोक्य)—आर्ये, यदि नेपथ्यविधानमवसितम्, इतस्तावदागम्यताम् ।

(*After the Nandi*) MANAGER (*Looking towards the dressing room*)—Gentle Lady, if your dressing (*lit.*—making of your toilet) is over, do thou come over here.

(प्रविश्य) नटी—अज्जउत्त, इयम्हि [आर्य्यपुत्र, इयमस्मि] ॥

(*Entering*) LADY MANAGER—My noble Lord, here I am.

सूत्रधारः—आर्य्ये, अभिरूपभूयिष्ठा परिषदियम्। अद्य खलु कालिदासग्रथितवस्तुना अभिज्ञानशकुन्तलनामधेयेन नवेन नाटकेनोपस्थातव्यमस्माभिः। तत् प्रतिपात्रमाधीयतां यत्नः।

MANAGER—Gentle Lady, this assembly is mainly of learned men. We have to-day to attend with a new drama too. *Abhijnana-Sakuntala* by name, the matter of which has been compossd by *Kalidasa*. So let special care be taken with all the *Dramatis Personæ*.

नान्द्यन्ते इति। 'नान्द्याः' पूर्वोक्तायाः श्लोकरूपाया आशिषः ["नान्दी आशीर्वचनसंयुता" इति भरतः] 'अन्ते' अवसाने, स्वयमेव नान्दीश्लोकं पठित्वा इत्यर्थः, सूत्रं कथामूलं धारयतीति 'सूत्रधारः' नटानां नेता रङ्गदेवतायाः पूजकः ("सूत्रधारः पठेन्नान्दीम्" इति भरतः)। 'नेपथ्यस्य' वेषरचनास्थानस्य 'अभिमुखम्' अवलोक्य कथयति—'आर्य्ये' हे मत्पत्नि, 'यदि नेपथ्यस्य' वेषरचनायाः 'विधानं' कार्य्यम् 'अवसितं' समाप्तं, तदा 'इतस्तावत्' अस्मिन् रङ्गमञ्चे 'आगम्यताम्'।

प्रविश्येति। 'नटी' सूत्रधाराख्यस्य नटस्य पत्नी 'प्रविश्य' नेपथ्यात् रङ्गमञ्चे आगत्य आह—'आर्य्यपुत्र' भोः स्वामिन् 'इयम्' अहम् आगता 'अस्मि'। [अतः परम्—"आज्ञापयतु आर्य्यः को नियोगः अनुष्ठीयताम् इति" (त-, स्वा-, म-)]॥

आर्य्ये इति। 'आर्य्ये इयं परिषत्' एषा पुरो दृश्यमाना सभा 'अभिरूपैः' पण्डितैः 'भूयिष्ठा' बहुला 'अभिरूपभूयिष्ठा' पण्डितबहुला। बहवः पण्डिता अत्र समागताः। 'अद्य खलु' ननम् 'अस्माभिः कालिदासेन' तदाख्येन प्रसिद्धेन कविना 'ग्रथितं' निबद्धं 'वस्तु' कथास्वरूपं यस्य तथाविधेन 'अभिज्ञानशकुन्तलम्' इति 'नामधेयं' नाम यस्य तेन 'नवेन' अनभिनीतपूर्वेण 'नाटकेन' दृश्यकाव्यविशेषेण 'उपस्थातव्यं' सेवितव्यम्। 'तत्' तस्मात् 'प्रतिपात्रं' पात्रे पात्रे सर्वास्वपि नाटकीयासु व्यक्तिषु 'यत्नः आधीयतां' क्रियतां भवत्या। विचारनिपुणा सभा

दृष्टे अभिनये न तुष्येत्। अतिगूढाशयः किल कालिदासः भावगाम्भीर्यात् अभिनेतृन् कदर्थयेत्, इति न चित्रम्। नूतनञ्चैतन्नाटकं नास्माभिः अभिनीतपूर्वम्। इति बहूनि शङ्कास्थानानि समापतितानि। अतोऽहं ब्रवीमि हे आर्ये सावधाना सती नाटकीयान् जनान् सज्जं प्रापय इति तात्पर्य्यम्॥

NOTES

1. (a). नान्द्यन्ते &c.—नन्दनं नन्दः Rejoicing. भावे घञ्। नन्देन पठ्यते इति नन्द+अण् शैषिकः स्त्रियाम्—नान्दी a benediction. "देवद्विजनृपादीनामाशीर्वादपरायणा। नन्दन्ति देवता यस्मात्तस्मान्नान्दी प्रकीर्त्तिता॥" The object of the नान्दी is to secure a happy termination of the acting. "तथाप्यवश्यं कर्त्तव्या नान्दी विघ्नोपशान्तये"। The preceding sloka is the नान्दी here. (b). सूत्रधारः—सूत्र+धारि+अण् कर्त्तरि। "नाट्यस्य यदनुष्ठानं तत्सूत्रं स्यात् सबीजकम्। रङ्गदैवतपूजाकृत् सूत्रधार इति स्मृतः॥" He is the first actor to enter the stage.

2. नेपथ्याभि &c.—नेपथ्य means "Dressing" also "Dressing-Room." "नेपथ्यं तु प्रसाधने रङ्गभूमौ वेषभेदे" इति हैमः। Here it is "Dressing Room."

3. आर्य्ये &c.—The सूत्रधार here addresses his wife, *i. e*, the person who appears in the character of his wife. "पत्नी चार्य्येति सम्भाष्या"। Hence नेपथ्यविधान may be taken to mean either the dressing necessary to make him appear as his wife, or generally, the dressing of the different actors who are about to play their parts.

4. आर्य्यपुत्र—अर्य्यते गम्यते सेव्यत्वेन आश्रीयते इति ऋ+ण्यत् कर्मणि=आर्य्यः one of noble character Here she refers to her "father-in-law." तस्य पुत्रः, *i. e.*, the husband.

5. (a). अभिरूप &c.—अभिलक्ष्यं दर्शनीयं रूपमेषामिति अभिरूपाः पण्डिताः। "प्रादिभ्यो धातुजस्य—" इति बहुव्रीहिः। "अभिरूपो बुधे रम्ये" इति मेदिनी। अतिशयेन बह्वी इति बहु+इष्ठन् स्त्रियाम्—भूयिष्ठा। Next सुप्सुपा। (b). परितः सीदन्ति अस्याम् इति परि+सद+क्विप् अधिकरणे=परिषत् an assembly. (c). अभिज्ञान &c.—अभिज्ञायते अनेन इति अभि+ज्ञा+ल्युट् करणे=अभिज्ञानम् a token. Here it means *The Ring*. Now see Preface, Page i. नाम एव नामधेयम्। स्वार्थे धेयप्रत्ययः। Of the two derivations

given in the Preface, the one with a द्वन्द्व compound is preferable It makes अभिज्ञान and शकुन्तला equally prominent, which is quite proper considering the prominent part the *Ring* (अभिज्ञान) plays in the drama. (**d**). नाटकेन &c.—नट अवस्यन्दने चुरादि + ण्वुल् कर्तरि=नाटकम् a drama. "देवतानां मनुष्याणां राज्ञां लोके महात्मनाम्। पूर्ववृत्तानुचरितं प्रख्यातोदात्तनायकम्। प्रवेशकार्थविष्कम्भादिभिः सम्भिरन्वितम्। ..नानाभावरसैराढ्यं नाटकं सूरयो विदुः॥" (**e**). तत् प्रतिपात्रम् &c.—Here the सूत्रधार enumerates the difficulties. First, the assembly is of experts, so cannot be duped. The poet is no other than Kalidasa himself whose writings require patient and intelligent study to master. The drama again is new, *i. e.*, being acted for the first time to-day. Thus the test is extremely severe and every actor requires careful looking after.

नटी—सुविहिदप्पओअदाए अज्जस्स न किम्पि परिहाइस्सदि [सुविहितप्रयोगतया आर्य्यस्य न किमपि परिहास्यते]।

Lady M.—Owing to my noble Lord's well-directed arrangements, nothing will be found wanting.

सूत्रधारः—आर्य्ये, कथयामि ते भूतार्थम्—

आ परितोषाद्विदुषां न साधु मन्ये प्रयोगविज्ञानम्।
बलवदपि शिक्षितानामात्मन्यप्रत्ययं चेतः॥

Manager—Gentle Lady, I tell you the truth—I do not deem the knowledge of acting perfect until the satisfaction of experts. The mind of the trained, though strong, is without confidence in itself.

नटीति। 'आर्य्यस्य' भवतः 'सुविहितः' साधुकृतः 'प्रयोगः' अभिनयव्यवस्था येन। तस्य 'सुविहितप्रयोगता'। तया, अभिनयकौशलेन [हेतौ तृतीया], 'किमपि' किञ्चिदपि 'न परिहास्यते' परिहीणं भविष्यति। सर्वमदोषं भविष्यति इत्यर्थः।

सुवेति। 'आर्य्ये ते तुभ्यं 'भूतं' यथार्थम् 'अर्थं' तत्त्वं 'कथयामि'। यत्तु तत्त्वतो मे मनसि वर्त्तते तत् शृणु—

आ इति। अन्वयः—विदुषां परितोषात् आ, प्रयोगविज्ञानं साधु न मन्ये। शिक्षितानां चेतः बलवत् अपि आत्मनि अप्रत्ययम्॥ व्याख्या—'विदुषां' पण्डितानां 'परितोषात्' प्रीतेः 'आ', यावत् न प्रीतिः तावत्, 'प्रयोगस्य' अभिनयस्य 'विज्ञानं' विशिष्ट ज्ञानं 'साधु' निर्दोषं 'न मन्ये' न गणयामि। 'शिक्षितानाम्' अस्मद्विधानां निपुणानां 'चेतः' चित्तं 'बलवत् अपि' दृढमपि सत 'आत्मनि' स्वविषये 'अप्रत्ययम्' अदृढं भवति। निपुणाः परकीयं बलाबलं निश्चितं जानन्तोऽपि आत्मना अनुष्ठितेषु, सफलाः भवेयं न वा इति, सदैव सशङ्का इति भावः॥

NOTES

1. (a). सुविहित &c.—परि + हा त्यागे means to leave, to forsake. (b). न किमपि परिहास्यते nothing will be forsaken (by सुचारुता), the construction being किमपि अभिनयाङ्गं सुचारुतया न परिहास्यते—सर्वं सुचारु सम्पत्स्यते इत्यर्थः। Hence किम् in किमपि has उक्ते कर्मणि प्रथमा and परिहास्यते has कर्मणि लृट्। (c). This confidence of the नटी in the abilities of the सूत्रधार renders the latter's diffidence very pleasing.

2. आर्य्ये &c.—भूत means सत्य true. "भूतं सत्योपमानयोः" इति हैमः। ते has चतुर्थी सम्प्रदाने by the rule "कर्मणा यमभिप्रैति—" ; or चतुर्थी कर्मणि by the rule "क्रियार्थोपपदस्य—"।

3. (a). आ परितोषात् &c.—परितोषात् has पञ्चमी in connection with आ। (b). बलवत् is taken by others along with शिक्षितानाम् as शिक्षणक्रियाविशेषण। Thus, 'बलवत्' अत्यर्थं 'शिक्षितानामपि'—even of those that are extremely learned. (c). This is a gentle rebuke to the self-reliant नटी। The metre is आर्य्या which is defined "यस्याः पादे प्रथमे द्वादशमात्रास्तथा तृतीयेऽपि। अष्टादश द्वितीये चतुर्थके पञ्चदश सार्य्या॥" (d). The figure of speech (अलङ्कार) is अर्थान्तरन्यास। "ज्ञेयः सोऽर्थान्तरन्यासो वस्तु प्रस्तुत्य किञ्चन। तत्साधनसमर्थस्य न्यासो योऽन्यस्य वस्तुनः॥" Here this own diffidence is the प्रस्तुतवस्तु ;

this is justified (साधन) by another वस्तु, viz, शिक्षितानामप्रत्ययं चेतः ।

नटी—एव्वं णेदम् । अनन्तरकरणिज्जं दाव अज्जो आणवेदु [एवमेतत् । अनन्तरकरणीयं तावदार्य्य आज्ञापयतु] ।

LADY M.—So it is. Let my noble Lord but command what has to be done presently.

सूत्रधारः—किमन्यदस्याः परिषदः श्रुतिप्रसादनतः ? तदिममेव तावत् अचिरप्रवृत्तमुपभोगक्षमं ग्रीष्मसमयमधिकृत्य गीयताम् । सम्प्रति हि—

सुभगसलिलावगाहाः पाटलसंसर्गसुरभिवनवाताः ।
प्रच्छायसुलभनिद्रा दिवसाः परिणामरमणीयाः ॥

MANAGER—What else besides regaling the ears of this assembly ? Do then sing, touching this enjoyable summer season that has not yet long commenced. Now indeed are the days pleasant towards the close when a dip into the water is agreeable, the sylvan breeze is fragrant from contact with *Patala* flowers, and sleep is easily obtained in well-shaded places.

नटीति । 'एतत्' भवदुक्तम् 'एवम्' ईदृशमेव । शिक्षिताः सशङ्का एव इत्यर्थः । 'आर्य्य' भवान् 'अनन्तरम्' अस्मिन् एव क्षणे, यत 'करणीयं' कर्त्तव्यं तत् 'आज्ञापयतु' । प्रतिपात्रं यत्न आश्रित एव नास्ति सन्देहः । तत् ब्रूहि प्रथमं किं करिष्ये ।

सूत्रेति । 'अस्याः' समागतायाः 'परिषदः' सभायाः 'श्रुतेः' श्रवणेन्द्रियस्य 'प्रसादनतः' प्रीणनात् 'अन्यत्' परं 'किम्' अनन्तरकरणीयमस्ति ? आदौ सभायाः कर्णविनोदः कर्त्तव्यः । 'तत्' तस्मात् 'अचिरं' सम्प्रति 'प्रवृत्तं' प्रारब्धम् । 'उपभोगस्य' अवगाहनादिसुखस्य 'क्षमं' योग्यम् 'इमम्' एतं 'ग्रीष्मसमयम् एव अधिकृत्य' विषयीकृत्य 'गीयतां तावत्' । 'सम्प्रति' अधुना आगते ग्रीष्मे 'हि'—

सुभगेति। 'सुभगः' उदारः प्रीतिप्रदः 'सलिले' जले 'अवगाहः' निमज्जनं येषु तादृशाः, 'पाटलस्य' वनपुष्पविशेषस्य 'संसर्गेण' सम्पर्कात् 'सुरभयः' घ्राणतर्पणा 'वनवाताः' वनवायवो येषु तादृशाः, 'प्रच्छायेषु' छायाप्रधानेषु स्थलेषु 'सुलभा' सुखप्राप्या 'निद्रा' येषु तादृशा 'दिवसाः परिणामे' अवसाने 'रमणीयाः' प्रीतिकरा भवन्ति। स्नातः सुरभिणा वातेन सेव्यमानः छायासु निद्रितः इति नातः परः उपभोगविधिरस्ति; स च ग्रीष्म एव दिनावसाने सम्भवति। अहो सुभगता ग्रीष्मस्य। इति भावः॥

NOTES

1. अनन्तर &c.—अविद्यमानम् अन्तरम् अवकाशः कालविप्रकर्षो यस्मिन् कर्मणि तत् यथा तथा अनन्तरम् without delay. Qualifies करणीयम्। अनन्तरं करणीयम्। सुप्सुपा।

2. श्रुतिप्रसादनतः has पञ्चम्यास्तस्। The पञ्चमी is owing to अन्यत्। Nothing else but treating them to a sweet song; this is the only अनन्तरकरणीयं कर्म।

3. (a). अचिर &c.—द्वितीया तत्—by the rule "अत्यन्तसंयोगे च"। (b). ग्रीष्मस्य समयः the time of summer. तस्। It was summer at the time of acting and also when the play opens.

4. (a). सुभग &c.—सलिले सलिलस्य वा अवगाहः सलिलावगाहः immersion in water. सहसुपेति समासः or ६तत्—। Then बहुव्रीहिः। (b). पाटल &—वनस्य वाताः वनवाताः। पाटलस्य रक्तवर्णपुष्पविशेषस्य संसर्गः पाटलसंसर्गः contact of the Patala flowers. तेन सुरभयः पाटलसंसर्गसुरभयः। सहसुपेति समासः the तृतीया being कर्तृ। तादृशा वनवाता येषु। (c). प्रच्छाय &c.—सु+लभ+खल् कर्मणि स्त्रियाम्—सुलभा easily available. प्रकृष्टा छाया येषु ते प्रच्छायाः or प्रकृष्टच्छायाः। तेषु सुलभा प्रच्छायसुलभा। सहसुपेति समासः। तादृशी निद्रा येषु। (d). परिणाम &c.—परि+नम्+घञ् अधिकरणे—परिणामः the end, i. e., the afternoon. रम+अनीयर् कर्तरि बाहुलकात्—रमणीयाः pleasing. Strictly speaking रमणीय should mean "capable of being pleased" in the कर्मवाच्य। The अनीयर् कर्तरि is an irregularity suggested by the rule "कृत्यल्युटो बहुलम्"। परिणामे रमणीयाः। सहसुपेति समासः। We cannot have परिणामो रमणीयो येषामिति बहुव्रीहिः because that gives

रमणीयपरिणामाः । (e). *Remark*—The sloka shows how the summer is उपभोगक्षम । The metre is आर्य्या as already explained.

नटी – तह [तथा] । (गायति)—

LADY M.—True [*Or*—Very well]. (*Sings*)—

ईसीसिचुम्बिआइं भमरेहिं सुउमारकेसरसिहाइं ।
ओदंसअन्ति दअमाणा पमदाओ सिरीसकुसुमाइं ॥
[ईषदीषच्चुम्बितानि भ्रमरैः सुकुमारकेशरशिखानि ।
अवतंसयन्ति दयमानाः प्रमदाः शिरीषकुसुमानि ॥]

Women are tenderly handling and making into ear-drops *sirisha* flowers the tips of whose filaments are very delicate and which have been lightly kissed by black-bees.

सूत्रधारः—आर्य्ये साधु गीतम् । अहो रागबद्धचित्तवृत्ति रालिखित इव सर्वतो रङ्गः । तदिदानीं कतमत् प्रकरण-माश्रित्य एनमाराधयामः ?

MANAGER.—Well sung, gentle Lady. Ah ! the house, with the functions of its mind rivetted on the melody, looks like one painted all round. Now then, which drama shall we take up to serve it ?

नटीति । 'तथा' तदेव भवतु । ग्रीष्ममेव आश्रित्य गायामि । इत्युक्त्वा 'गायति' ।

ईषदिति । अन्वयः—प्रमदाः सुकुमारकेशरशिखानि, भ्रमरैः ईषदीषच्चुम्बि-तानि, शिरीषकुसुमानि दयमानाः अवतंसयन्ति ॥ व्याख्या—'प्रमदाः' युवत्यः 'सुकुमारा' अतिकोमलाः 'केशराणां' किञ्जल्कानां 'शिखाः' अग्राणि येषां तानि, कोमलत्वात् 'भ्रमरैः ईषदीषत्' मन्दमन्दम् ["प्रकारे गुणवचनस्य" इति प्रकारे द्विरुक्तम्] न तु निर्भरं 'चुम्बितानि' पीतानि, 'शिरीषकुसुमानि दयमानाः'

सकृपाः, अकठोरं स्पृशन्त्य इत्यर्थः, 'अवतंसयन्ति' अवतंसं कर्णभूषणं कुर्वन्ति ["तत्करोति तदाचष्टे" इति णिच्]। स्वभावकोमलानि कुसुमानि प्राक् भ्रमरैरनुकम्पितानि अधुना नारीभिः इत्यर्थः॥ अत्र ("सुकुमारकेशरशिखानि शिरीषकुसुमानि" इति शकुन्तला लक्ष्यते। "भ्रमरैरीषच्चुम्बितानि" इति दुष्यन्तेन तस्याः चुम्बनमागमः) "दयमानाः प्रमदा अवतंसयन्ति" इति अप्सरोभिः अनुकम्पया तस्याः रक्षणं च॥ ["ईषदीषत्" (रा-, वि-, स-) — "लघु" (त-, न्या-)]॥

सर्वति। 'आर्ये साधु' अतिमधुरं यथा तथा 'गीतं' भवत्या गानं कृतम् [भावे क्तः]। 'अहो' आश्चर्ये 'रङ्गः' नाट्यालयः, लक्षणया तत्स्थो जनः 'रागेण' गीतरागेण 'बद्धा' गृहीता 'चित्तवृत्तिः' यस्य तथाभूत सन् 'सर्वतः' सर्वासु दिक्षु, यत्र यत्र विलोकयामि तत्र तत्र इत्यर्थः 'आलिखित इव' चित्रित इव प्रतिभाति। ननु अभिमुखीकृतो रङ्गः। 'तत्' तस्मात् 'इदानीम्' अभिमुखीभूते रङ्गे 'कतमत् प्रकरणमाश्रित्य' किं स्वित् नाटकमवलम्ब्य 'एनं' रङ्गम् [अन्वादेशे एनादेशः] 'आराधयामः' उपस्थास्यामहे।

NOTES

1. तथा—This may be taken either as an approval of the sentiment expressed by the सूत्रधार, or as assent to sing. In its latter capacity compare "तथा (स्थं स्थापयति)"—*Infra.*

2. (*a*). ईषत् &c.—Expresses प्रकार and qualifies नुम्बनक्रिया. The duplicated form behaves like a compound word by the rule "कर्मधारयवदुत्तरेषु"। Hence the synonym is मन्दमन्दम् and not मन्दं मन्दम्। (**b**). सुकुमार &c.—केशराणां शिखाः केशरशिखाः tops of filaments. Then बहु—। (**c**). दयमानाः &c.—Taking pity. The शिरीष flowers being very delicate they are pitied by the bees who kiss them *gently*; the girls too *pity* them while they pluck them. (**d**). Note that both सूत्रधार and नटी describe the summer, but with this difference that while the former notices *facts* only the latter refers to *feelings*. The metre is गाथा—a variety of the आर्या noticed before.

3. *Remark*—The poet here seems to be hinting at the story of the drama. The delicate शिरीष flowers stand for Sakuntala ; the gentle kissing by the bees represents the temporary union of Dushyanta and Sakuntala ; and pitying by girls symbolises the protection afforded to Sakuntala by the celestial nymphs.

4. (**a**). रागबद्ध &c.—राग with करणे and रङ्ग with अधिकरणे घञ्। चित्तस्य वृत्तिः चित्तवृत्तिः functions of the mind. The melody had captured all the functions of the mind of the whole house. The audience heard nothing but the exquisite strain, saw nothing, felt the touch of nothing, smelt nothing, and so on ; hence it looked like a painted scene. Compare "ताः शङ्करं दृष्टिभिरापिबन्त्यो नार्य्यो न जग्मुर्विषयान्तराणि। तथाहि शेषेन्द्रियवृत्तिरासां सर्वात्मना चक्षुरिव प्रविष्टा॥" (**b**). प्रकरणम्—प्रकरण and नाटक are varieties of रूपक। "नाटकमथ प्रकरणं भाणव्यायोगसमवकारडिमाः। ईहामृगाङ्कवीथ्यः प्रहसनमिति रूपकाणि दश॥" Here the two are used synonymously.

नटी—णं अज्जमिस्सेहिं पढमं एव्व आणत्तं अहिण्णाणसउन्दलं णाम अपुव्वं णाड्अं पओए अहिकरीअदु त्ति [ननु आर्य्यमिश्रैः प्रथममेव आज्ञप्तम् अभिज्ञानशकुन्तलं नाम अपूर्वं नाटकं प्रयोगे अधिक्रियताम् इति]।

LADY M.—Well, even at the outset it has been ordered by your honoured self that the new drama named Abhijnana-Sakuntala be put on the stage.

नटीति। 'ननु' निश्चितमहं स्मरामि 'आर्य्यमिश्रैः' मान्यैः भवद्भिः 'प्रथममेव' प्रविष्टायामेव मयि रङ्गम् 'अभिज्ञानशकुन्तलं नाम नाटकं प्रयोगे' अभिनये 'अधिक्रियतां' प्रयुज्यताम् 'इति आज्ञप्तम्' आदिष्टम्।

NOTES

1. (**a**). आर्य्यमिश्रैः &c.—आर्य्य is the usual form of addressing the सूत्रधार by नटी। "वाच्यौ नटीसूत्रधारावार्य्यनाम्ना परस्परम्"। मिश्र

is a प्रशंसावचन word of the मतल्लिकादि class. Hence प्रशस्ता आर्य्या आर्य्यमिश्रा: the पूर्वनिपात of आर्य्य being regulated by the rule "प्रशंसावचनैश्च"। तैः। गौरवे बहुवचनम्, *i. e.*, the plural is *intensive*, the गौरव being already expressed by मिश्र। (**b**). प्रयोगे—प्र + युज + घञ् भावे - प्रयोग: acting. प्रयोगे अधिक्रियताम् = be taken up in acting.

सूत्रधार:—आर्य्ये सम्यगनुबोधितोऽस्मि। अस्मिन् क्षणे विस्मृतं खलु मया। कुत: ?—

तवास्मि गीतरागेण हारिणा प्रसभं हृत:।
एष राजेव दुष्यन्त: सारङ्गेणातिरंहसा॥ (निष्क्रान्तौ)

इति प्रस्तावना।

MANAGER—Noble Lady, I am rightly reminded. Indeed I forgot it at this moment. Do you ask 'why'? By the winning melody of thy song I have been forcibly carried away like this king Dushyanta by the speedy antelope. (*Exeunt*).

Here ends the *Prologue.*

सूत्रेति। 'आर्य्ये सम्यक्' साधु 'अनुबोधित:' स्मारित: 'अस्मि'। 'अस्मिन् क्षणे' एतस्मिन् मुहूर्त्ते 'विस्मृतं खलु मया'। 'कुत:' कुतो विस्मृतम् इति पृच्छसि चेत् शृणु—

तवेति। अन्वय:—हारिणा तव गीतरागेण, अतिरंहसा सारङ्गेण एष राजा दुष्यन्त इव, प्रसभं हृत: अस्मि। व्याख्या—'हारिणा' मनोहरेण 'तव गीतरागेण' गानस्वरेण 'अति' अतिशायि 'रंहः' वेगो यस्य तेन प्रबलवेगेन 'सारङ्गेण' चित्राङ्गेण मृगेण 'एष:' अयं दृश्यमान: 'राजा दुष्यन्त इव प्रसभं' बलात् 'हृत:' विषयान्तरं नीत: 'अस्मि'। यद्वा—अस्मि इति अहमर्थे अव्ययम्। सारं शबलमङ्गमस्य इति सारङ्ग: कृष्णसार: शशकादि:। भस्मलाञ्छनेन मुनिरपि शबलाङ्ग:। मुनौ तु पुन: साराङ्ग: इति भेद:। श्लोकेऽस्मिन् उच्चारणकौशलात्, सारङ्ग: इति साराङ्ग: इति वा उक्तम्, इति श्रोतॄणां सन्देह:

स्यात। सारङ्ग (मुनि) पक्षे—'अतिरंहसा' तीव्रवेगेण चिप्रकारिणा इत्यर्थः 'सारङ्गेण' मुनिना दुर्वाससा यथा 'दुष्यन्तो हृतः' शकुन्तलारूपात वस्तुतः अपनीतः तथा। इति दुर्वाससः शापः शकुन्तलायाः प्रत्याख्यानञ्च ध्वन्यते॥ ["दुष्यन्तः" (रा-,वि-, स-)—"दुष्मन्तः" (त , न्या-)]॥

निष्क्रान्ताविति। 'निष्क्रान्तौ' रङ्गमञ्चाद्बहिर्गतौ। "एष राजा" इति वाचा पात्रप्रवेशं सूचयित्वा सभ्यान् उन्मुखीकृत्य गतौ। निष्क्रान्तश्च निष्क्रान्ता च इति 'निष्क्रान्तौ' ["पुमान् स्त्रिया" इत्येकशेषः]। यद्वा—"निष्क्रान्तौ अभिनेतारौ जनौ" इति वाक्यशेषः। अयमेव पक्षो ज्यायान्। एकशेषपक्षे तु प्रथमचतुर्थ-सप्तमानाम् अङ्कानामन्ते "निष्क्रान्ताः सर्वे" इति न सङ्गच्छते। "निष्क्रान्ताः सर्वे अभिनेतारो जनाः" इति वाक्यशेषे सर्वमनवद्यम्।

प्रस्तावनेति—प्रस्तुतस्य कथावस्तुन आक्षेपः इत्यर्थे प्रस्तवना कथामुखम्।

NOTES

1. (**a**). तवास्मि &c.—He too was like the audience under the influence of the melody. Hence he was forcibly (**प्रसभम्**) dragged away from his subject. (**b**). हारिणा—साधु हरति इति हृ + णिनि साधुकारिणि कर्त्तरि = हारी that which thoroughly overpowers. तेन। (**c**). एष राजेव &c.—Here he points with his finger at the dressing room from which are seen three actors coming out—one dressed as king, another as his charioteer, and a third as a stag. As there is nothing to tell the audience that this is king Dushyanta entering, the announcement is made by **सूत्रधार** himself. There is no anachronism in this because the reference is to what is *present.* The metre is **श्लोक** defined as "**श्लोके षष्ठं गुरु ज्ञेयं सर्वत्र लघु पञ्चमम्। द्विचतुःपादयोर्ह्रस्वं सप्तमं दीर्घमन्ययोः॥**"

2. *Remark*—Here again future events are reflected. For **सारङ्गेण** may be so pronounced by a skilful actor as to leave the audience in doubt whether **सारङ्गेण** or **साराङ्गेण** is the word. But **सारङ्गेण** = by the stag, and **साराङ्गेण** = by the sage. In the latter case, reference is to the fiery (**अतिरंहसा**) Durvasas whose imprecation forcibly carries away (**प्रसभं हृतः**) Dushyanta from

Sakuntala. सार+अङ्ग सारङ्ग (शकन्ध्वादि) when meaning मृग, but—साराङ्ग when it means मुनि।

3. *Reading*—दुष्यन्त is to be preferred to दुष्मन्त। This is obvious from the alliteration in the sloka "येन येन वियुज्यन्ते प्रजाः स्निग्धेन बन्धुना। स स पापादृते तासां दुष्यन्त इति घुष्यताम्॥"—Act VI, *Infra*. दुष्मन्त spoils the alliteration.

4. निष्क्रान्तौ—Qualities अभिनेतारौ understood. See व्याख्या।

5. प्रस्तावना—प्र+स्तु+णिच्+युच् भावे स्त्रियाम्। The साहित्यदर्पण thus defines प्रस्तावना—"नटी विदूषको वापि पारिपार्श्विक एव वा। सूत्रधारेण सहिताः संलापं यत्र कुर्वते॥ चित्रैर्वाक्यैः स्वकार्य्योत्थैः प्रस्तुताक्षेपिभिर्मिथः। आमुखं तत्तु विज्ञेयं नाम्ना प्रस्तावनापि सा॥" The same authority takes this as a प्रस्तावना of the अवलगित variety. "यत्रैकत्र समावेशात् कार्य्यमन्यत् प्रसाध्यते। प्रयोगे खलु तज्ज्ञेयं नाम्नावलगितं बुधैः॥"

प्रथमोऽङ्कः

(ततः प्रविशति मृगानुसारी सशरचापहस्तो राजा रथेन सूतश्च)। सूतः (राजानं मृगञ्चावलोक्य) - आयुष्मन्—

कृष्णसारे ददच्चक्षुस्त्वयि चाधिज्यकार्मुके।
मृगानुसारिणं साक्षात् पश्यामीव पिनाकिनम्॥

(Then enter in a chariot following an antelope, the king with a bow and arrow in hand and the charioteer)

CHARIOTEER—*(Eyeing the king and the antelope)*— O Long-lived One, casting my eye on the antelope and on thee with thy bow strung, I behold as it were Pinakin (Siva) himself chasing the deer.

तत इति। 'ततः' तदनन्तरं प्रस्तावनाया अन्ते 'शरचाप'-सहितौ 'हस्तौ' यस्य सः धृतधनुर्बाण इत्यर्थः मृगम् अनुसरतीति 'मृगानुसारी राजा सूतश्च' सारथिश्च 'रथेन प्रविशति'।

कृष्णेति। अन्वयः—कृष्णसारे अधिज्यकार्मुके त्वयि च चक्षुर्ददत् (अहं) मृगानुसारिणं साक्षात् पिनाकिनं पश्यामीव। व्याख्या—'कृष्णसारे' पुरः पलायमाने अस्मिन् चित्राङ्गे मृगे 'अधिज्यम्' आरोपितमौर्वीकं 'कार्मुकं' धनुर्यस्य तस्मिन् त्वयि च' भवति च 'चक्षुः' [जातावेकवचनम्] 'ददत्' पातयन्, पर्यायेण द्वावपि पश्यन् ["नाभ्यस्तात्शतुः" इति नुमभावः] अहं 'मृगानुसारिणं' दक्षाध्वरे मृगरूपेण पलायमानं यागं वधार्थमनुसरन्तं 'साक्षात्' स्वयं 'पिनाकिनं' पिनाकपाणिं शिवं 'पश्यामीव'। प्रकृष्टेन वपुषा शिवमनुकरोति भवान् धनुश्च ते पिनाक इव भीषणम् इति भावः।

NOTES

1. *Summary*—अथ कदाचित् पौरवो राजा दुष्यन्तः मृगयया विहरन् हिमगिरेरुपकण्ठं प्राप। अजानता तत्र तेनानुसृतः कश्चिद्दतिजव आश्रममृगस्तं कुलपतेः कण्वस्य तपोवनान्तिकं निनाय। स हि असन्निहिते मुनौ शिष्यैरनुरुद्ध एकलः परिहृतराजवेषस्तपोवनं प्रविष्टः। तत्र तेन उपवनभूमौ बालपादपेभ्यो जलं ददत्यस्तिस्रः कन्यका दृष्टाः। स च ताभिः सत्कृतः। एका तासु शकुन्तला नाम तस्मिन् जातरागा रूपेण तस्य चेतो विवेश। "बाल्यात् प्रभृति लालनादियं कण्वस्य कन्या औरसी तु विश्वामित्रस्य मेनकागर्भसम्भवा" इति इतराभ्यामाख्यातः सोऽभूत् तथा अर्थी। तदैव च "राजसैन्यैर्भीषितो वनगजस्तपोवनं विशति" इति तत्र आनिरुद्धतः। तेन सम्भ्रान्ताः कन्यकाः पुनर्दर्शनार्थं राजानमुपनिमन्त्र्य पर्णशालां प्रविष्टाः राजापि शिविरं प्रत्यागतः।

2. अङ्कः—अङ्क्यते चित्र्यते लोकचरितमस्मिन् इति अङ्क+घञ् अधिकरणे। An Act. Every period ending with "*all* the actors leaving the stage" is an अङ्क। "अन्तर्निष्क्रान्तनिखिलपात्रोऽङ्क इति कीर्तितः"—*Darpana.*

3. (a). मृगानुसारी—मृगं साधु अनुसरति इति मृग+अनु+सृ+णिनि साधुकारिणि कर्त्तरि closely following a stag. (b) सशरचापहस्तः—शरेण सह सशरः together with an arrow. बहु:—। तादृशश्चापः ययोस्तौ सशरचापौ, बहु—। तादृशौ हस्तौ यस्य सः। बहु—।

4. आयुष्मन्—प्रशस्तमायुरस्य इति आयुस्+मतुप्=आयुष्मान्। The charioteer has to address the warrior as आयुष्मन्। "आयुष्मन् रथिनं सूतः"—*Darpana.*

5. (a). कृष्णसारे—कृष्णश्च सारः शवलश्च कृष्णसारः black and spotted. "वर्णो वर्णेन" इति कर्मधा—। A kind of antelope. तस्मिन्। (b). ददत्—not ददन् because of the prohibition "नाभ्यस्ताच्छतुः"। (c). अधिगता ज्या गुणः अनेन, or अधिकृतं ज्याम् अधिज्यम् strung. बहु—or प्रादि—। कर्मणे प्रभवति इति कर्मन्+उकञ्=कार्मुकम् bow.

6. *Allusion*—Daksha, the father-in-law of Siva, once performed a sacrifice at which he invited every one except his son-in-law. Sati, the wife of Siva, was present. In the course of

the sacrifice, Daksha made some offensive remarks on Siva at which Sati was so incensed that there and then she renounced her body by योग। In revenge, Siva killed Daksha, dispersed the guests, and, Pinaka in hand, pursued the Yajna which assumed the form of a stag and fled.

7. *Remark*—The metre is श्लोक। Here we have उत्प्रेक्षा which Dandin defines "अन्यथैव स्थिता वृत्तिश्चेतनस्येतरस्य वा। अन्यथोत्प्रेक्ष्यते यत्र तामुत्प्रेक्षां विदुर्बुधाः—॥" Here the वृत्ति of दुष्यन्त in chasing the deer is taken as the वृत्ति of पिनाकिन् in pursuing the sacrifice. Either of the two Vrittis is quite different (अन्यथा) from the other.

राजा—सूत, दूरममुना सारङ्गेण वयम् आकृष्टाः। अयं पुनरिदानीमपि—

ग्रीवाभङ्गाभिरामं मुहुरनुपतति स्यन्दने दत्तदृष्टिः
पश्चार्धेन प्रविष्टः शरपतनभयाद्भूयसा पूर्वकायम्।
दर्भैरर्धावलीढैः श्रमविवृतमुखभ्रंशिभिः कीर्णवर्त्मा
पश्योदग्रप्लुतत्वाद् वियति बहुतरं स्तोकमुर्व्यां प्रयाति॥

तदेष कथमनुपतत एव मे प्रयत्नप्रेक्षणीयः संवृत्तः?

KING—Charioteer, we are drawn far by this antelope. Yet see even now—With his look ever and anon cast on the pursuing chariot gracefully with a turn of his neck—having in a great measure entered the forepart of his body with the hinder part through fear of the descent of the arrow—and with his track strewn with half chewed Kusa grass dropping from his mouth which is open through fatigue—he is moving more in air and less on ground because of his terrible jumps. How then has he become hardly visible to me though I am following, to be sure?

राजेति। 'अमुना' दृश्यमानेन दूरस्थेन 'सारङ्गेण' चित्राङ्गेण मृगेण 'वयम्' ["अस्मदो द्वयोश्च" इति बहुवचनम्] 'दूरमाकृष्टाः'। एतेन अस्य मृगस्य धावनखेदो भवितुमर्हति इत्यभिप्रायः।

अयमिति। अन्वयः—पश्य अयं पुनरिदानीमपि अनुपतति स्यन्दने मुहुः ग्रीवाभङ्गाभिरामं दत्तदृष्टिः (सन्), शरपतनभयात् पश्चार्द्धेन भूयसा पूर्वकायं प्रविष्टः (सन्), श्रमविवृतमुखभ्रंशिभिः अर्द्धावलीढ़ैर्दर्भैः कीर्णवर्त्मा (सन्), उदग्रप्लुतत्वात् वियति बहुतरम् उर्व्यां स्तोकं प्रयाति। व्याख्या—'पश्य' [वियति बहुतरं स्तोकमुर्व्यां प्रयाति इति वाक्यार्थः कर्म। यद्वा—पश्य इत्याश्चर्य्य अव्ययम्] 'अयं' पुरो दृश्यमानो मृगः 'पुनरिदानीमपि' अधुनापि दूरं धावितोऽपि इत्यर्थः 'अनुपतति' अनुसरति 'स्यन्दने' रथे 'मुहुः' वारं वारं 'ग्रीवायाः' कन्धरायाः 'भङ्गेन' भङ्ग्या 'अभिरामं' मनोहरं यथा तथा 'दत्त-दृष्टिः' पातितचक्षुः सन्, 'शरस्य' बाणस्य 'पतनभयात्' पातशङ्कया। अपरः अर्द्धो भागः 'पश्चार्द्धः' उत्तरकायः ["अपरस्यार्द्धे पश्चभावो वक्तव्यः" इति अपरस्य पश्चादेशः]। तेन 'भूयसा' बाहुल्येन 'पूर्वकायं प्रविष्टः' सन्। पश्चाद्धावितः प्रहर्त्ता उत्तरकाये एव प्रहरेत्, इत्युत्तरकायं पूर्वकाये सुदूरं प्रवेश्य इत्यर्थः। 'श्रमेण' धावनश्रमेण 'विवृतं' व्यात्तं यत् 'मुखं' तस्मात् 'भ्रंशद्भिः' पतद्भिः 'अर्द्धम्' असम्पूर्णं यथा तथा 'अवलीढ़ैः' भुक्तैः 'दर्भैः' कुशैः 'कीर्णवर्त्मा' व्याप्तपथः सन्' 'उदग्रम्' उत्कटं 'प्लुतं' लम्फो यस्य तद्भावात् भीमलम्फत्वात् 'वियति' आकाशे 'बहुतरम्' अधिकम् 'उर्व्यां' भूमौ 'स्तोकम्' अल्पं 'प्रयाति'। अधुना दूरधावनात् खेदमनुभवतोऽपि ईदृक् प्रचण्डमस्य धावनम्। अहो भयानकता अस्य इति भावः॥ ["दत्तदृष्टिः" (त-, व्या-)—"बद्धदृष्टिः" (वि-, रा-, म-)]॥

तदिति। 'तदेष' मृगः 'अनुपतत एव' पश्चाद्धावितस्यैव 'मे' मम सम्बन्धे 'कथं प्रयत्नेन' अतिनिपुणदर्शनेन 'प्रेक्षणीयः' दर्शनीयः 'संवृत्तः' जातः। सत्यमयं धावति मृगः, किन्त्वहमपि पश्चात् पतामि। तत् कथं पूर्वं स्पष्टलक्ष्योऽपि अधुना कष्टलक्ष्यो जातः—इति सूतं प्रति प्रश्नः॥

NOTES

1. सूत &c.—पुनः indicates भेद difference. The sense is—

We are carried far, and the long run ought to have tired out the stag. But no (भेद difference) he is still strong. The construction is—अयं पुनरिदानीमपि वियति बहुतरं स्तोकमुर्व्यां प्रयाति—Even now he moves more in the air and less on the earth. The king praises the stamina of the stag..

2. (a). ग्रीवा &c.—Qualifies दृष्टिदानक्रिया in दत्तदृष्टिः। The grace in the दर्शनक्रिया comes from the turn of the neck (ग्रीवाभङ्ग)। (b). स्यन्दने—स्यन्दते धावति इति स्यन्द्+ल्यु कर्त्तरि=स्यन्दनः a chariot. The name is happily chosen as the chariot was moving very fast (धावति) at the time. (c). दत्तदृष्टिः—दत्ता दृष्टिर्येन that which has cast a look. "बद्धदृष्टिः" implies that the look is *riveted* to the car, which is not the case, because मुहुः implies cessation and renewal of the act. दत्तदृष्टिः is better. *N. B.*—The frequent turning of the neck to watch the chariot hampers speed. Yet the stag इदानीमपि वियति बहुतरम् &c. O! the stamina of the stag! (d). पश्चार्द्धेन—It is the पश्चार्द्ध which has entered the पूर्वकाय। But the poet says the stag has entered. This implies अभेद of the stag with the पश्चार्द्ध। Hence पश्चार्द्धेन इति अभेदे करणे तृतीया। (e). शर &c.—शरस्य पतनं शरपतनम् the descent of the arrow. तस्मात् भयं शरपतनभयम्। तस्मात्। बाणपातशङ्कया। हेतौ पञ्चमी। It is in the पश्चार्द्ध that the arrow will strike when shot from behind. The पश्चार्द्ध is therefore drawn in. (f). भूयसा—बहु+ईयसुन्। Qualifies प्रवेशक्रिया। क्रियाविशेषणानां क्वचित् करणत्वमपि। Hence करणे तृतीया। (g). पूर्वकायम्—पूर्वं कायस्य पूर्वकायः the forepart of the body. तम्। एकदेशिसमासः, a variety of तत्पुरुषः। This bars षष्ठीसमास। Hence पूर्वं leads in the compound. Again though पूर्वं is दिक्शब्द, still, barring पञ्चमी, कायस्य takes षष्ठी as in "तस्य परमाम्रेडितम्"। *N. B.*—This is another impediment to the stag's speed. Yet the stag इदानीमपि &c. (h). दर्भैः &c.—अव+लिह+क्त कर्मणि=अवलीढ़ाः eaten भुक्ताः। अर्द्धम् अवलीढ़ा अर्द्धावलीढ़ाः half-eaten. सहसुपेति समासः। तैः। (i). श्रम &c.—श्रमेण विवृतं श्रमविवृतम्। तादृशं मुखं श्रमविवृतमुखम्। तस्मात् साधु भ्रश्यन्ति इति श्रमविवृतमुख+भ्रंश्+णिनि साधुकारिणि कर्त्तरि। तैः। खेदव्यात्तवदनपातिभिः। (j). कीर्णवर्त्मा—कॄ+क्त

कर्णमणि = कीर्णम् strewed. कीर्णं वर्त्म येन सः। *N. B.*—He is fatigued. yet इदानीमपि &c. (k). उदग्र &c.—उन्नतमग्रमस्य उदग्रम् terrible. The jumps are terrible covering immense ground. On the ground again there is just a touch and up again he goes. Hence वियति बहुतरं प्रयाति (owing to the long jumps), and स्तोकमुर्व्याम्।

3. *Figure*—The figure is स्वभावोक्ति or जाति which Dandin defines thus—"नानावस्थं पदार्थानां रूपं साक्षाद्विवृण्वती। स्वभावोक्तिश्च जातिश्च— ॥" We have here a picture (रूप) of flight and fatigue in a strong animal. The metre is स्रग्धरा (explained).

4. तद्देष &c.—The stag was not very far off a moment before. But when the king was about to point it out to the charioteer (पश्य &c.) he noticed great distance. Hence the surprise and question.

सूतः—आयुष्मन्, उद्घातिनी भूमिरिति मया रश्मिसंयमनाद्रथस्य मन्दीकृतो वेगः। तेन मृग एष विप्रकृष्टान्तरः। सम्प्रति समदेशवर्त्तिनस्ते न दुरासदो भविष्यति।

CHARIOTEER—O Long-lived one, the speed of the car has slackened, because, the ground being bumpy, the reins were tightened by me. Hence the deer has become separated by a long interval. Now that you are on level ground, he will not be difficult to get at by you.

राजा—तेन हि मुच्यन्तामभीषवः।

KING—Then do loosen the reins.

सूत इति। 'भूमिः' अवत्या भूः 'उद्घातिनी' विषमा 'इति' हेतोः 'मया रश्मेः' प्रग्रहस्य कृतं यत् 'संयमनम्' आकर्षणं, तस्मात् 'रथस्य मन्दीकृतो वेगः'। 'तेन' हेतुना 'एष मृगः विप्रकृष्टं' सातिशयम् 'अन्तरम्' अवकाशो यस्य तादृशः, अतिदूरवर्त्ती जात इत्यर्थः। 'सम्प्रति समे देशे वर्त्तते' यस्तथाविधस्य 'ते' भवतः

सम्बन्धे दुःखेन आसद्यते इति 'दुरासदो' दुष्प्रापो 'न भविष्यति' ॥ ["समदेशवर्त्तिनस्ते" (रा-, वि-, म-)—"समदेशवर्त्ती न ते" (त-, न्या-)] ॥

राजेति। 'तेन हि' तस्मात्। यदि अनुद्घाते सुखलभ्योऽयं मृगः तत् 'अभीषवः' प्रग्रहाः ["अभीषुः प्रग्रहे रश्मौ" इत्यमरः] 'मुच्यन्ताम्' असंयताः क्रियन्ताम्। अश्वान् धावय मृगं हन्मि इत्यर्थः।

NOTES

1. (a). उद्घातिनी—उत् ऊर्ध्वं हन्तुं शीलमस्या इति उद्+हन्+णिनि कर्त्तरि ताच्छील्ये that which gives upward shocks, *i. e.*, un-even. (b). विप्रकृष्टान्तरः—वि+प्र+कृष+क्त कर्त्तरि=विप्रकृष्टम् excessive अत्यधिकम्। (c). समदेश &c.—समो देशः समदेश even ground. तस्मिन् साधु वर्त्तते :इति समदेश+वृत+णिनि कर्त्तरि=समदेशवर्त्ती occupying even ground. तस्य। (d). ते—This takes शेषे षष्ठी not कर्त्तरि। कर्त्तृषष्ठी is prohibited by the rule "न लोकाव्ययनिष्ठाखलर्थतृनाम्" because दुरासद is derived with खल् कर्मणि।

2. *Reading*—समदेशवर्त्ती न ते &c. places the *stag* on even ground, which is the more reason for the interval (अन्तर) increasing still further. Our reading (समदेशवर्त्तिनः ते) makes the *chariot* move on level ground, hence gives the king chance to over-run the stag.

सूतः—यथाज्ञापयत्यायुष्मान्। (रथवेगं निरूप्य) आयुष्मन्, पश्य पश्य—

मुक्तेषु रश्मिषु निरायतपूर्वकाया
निष्कम्पचामरशिखा निभृतोर्द्ध्वकर्णाः।
आत्मोद्धतैरपि रजोभिरलङ्घनीया
धावन्त्यमी मृगजवाक्षमयेव रथ्याः॥

CHARIOTEER—As the Long-lived one orders. (*Acting the speed of the car*) O Long-lived one, look! look!—

The reins being loosened, the steeds, becoming unassailable even by the dust raised by themselves, are rushing as if through intolerance of the speed of the stag, with the fore-part of their body out-streched, the tips of their chowries quiverless, their ears erect and steady.

सूत इति। 'आयुष्मान् यथा आज्ञापयति' आदिशति तथैव करोमि। अश्वान् धावये। 'रथस्य वेगं' शीघ्रगमनं 'निरूप्य' नाटयित्वा हस्तपादादिचालनेन अभिनीय इत्यर्थः। 'पश्य पश्य' इति विस्मये द्विरुक्तम्। अश्वानां साधु धावनात् विस्मयः॥ ["यथाज्ञापयति" (त-, व्या-, म-)—"यदाज्ञापयति" (वि-, रा-)]॥

मुक्तेष्विति। अन्वयः—रश्मिषु मुक्तेषु अमी रथ्याः मृगजवाक्षमया इव निरायत-पूर्वकायाः निष्कम्पचामरशिखाः निभृतोर्ध्वकर्णाः आत्मोद्धतैरपि रजोभिः अलङ्घनीयाः (सन्तः) धावन्ति॥ व्याख्या—'रश्मिषु' प्रग्रहेषु 'मुक्तेषु' असंयतेषु सत्सु [भावे सप्तमी], 'अमी' प्रत्यासन्ने 'रथ्याः', रथवाहिनः अश्वाः ["तद्वहन्ति रथयुगप्रासङ्गम्" इति यत्], 'मृगस्य' पुरो धावितस्य यो 'जवः' वेगः, तत्र 'अक्षमया' अमर्षेण 'इव नितराम् आयतः' दीर्घः 'पूर्वकायो' येषां तथाविधाः, वेगदीर्घीकृताङ्गाः इत्यर्थः, 'निष्कम्पाः' निश्चलाः 'चामराणां' कर्णयोरन्तराले भूषणार्थं दत्तानां चमरीपुच्छानां 'शिखा' अग्राणि येषां तथाविधाः, 'निभृतौ' स्थिरौ 'ऊर्ध्वौ' ऊर्ध्वं गतौ च 'कर्णौ' येषां तथाविधाः, 'आत्मना उद्धतैः' उत्थापितैः 'अपि', न तु केवलं चक्रोद्धतैः, 'रजोभिः' धूलिभिः 'अलङ्घनीयाः' अनतिक्रमणीयाः सन्त 'धावन्ति' अतिवेगं गच्छन्ति। मृगेण स्पर्धया एते अनुकूलमेत वातमपि अतीत्य गच्छन्ति इति भावः॥ मूलम् (रा,- वि,- म-) —"स्वेषामपि प्रसरतां रजसामलङ्घ्याः। निष्कम्पचामरशिखाश्रुतकर्णभङ्गा धावन्ति वर्त्मनि तरन्ति नु वाजिनस्ते॥" (त-, व्या-)]॥

NOTES

1. निरूप्य—नि + रूप + णिच् + ल्यप् having acted. The root रूप means 'to act' from which comes रूपक a drama. Compare "अवस्थाभां रूपयति", "भूयो रथवेगं निरूपयति" &c.

2. (a). निरायत &c.—This indicates running at top speed.

(b). निष्कम्प &c.—The Chamaras were ornamental, and were placed between the ears. Owing to great speed, their कम्प was not noticed. (c). निभृतोर्द्ध &c.— निभृत is स्थिर। In this sense compare निभृत in निष्कम्पवृक्षं निभृतद्विरेफं मूकाण्डजं शान्तमृगप्रचारम्। तच्छासनात् काननमेव सर्वं चित्रार्पितारम्भमिवावतस्थे॥" Also we have अनिभृत in the sense अस्थिर in "अनिभृतकरेष्वाक्षिपत्सु प्रियेषु"। ऊर्द्ध does not mean *vertical*. It merely implies that the ears were inclined upwards, and not drooping. (d). आत्मोद्धतैः &c.—We assume that the wind was favourable, *i. e.*, blowing from behind. Even thus the dust did not touch them. Hence they were faster than the wind.

3. *Remark*—The metre is वसन्ततिलका or वसन्ततिलकम्। "उक्तं वसन्ततिलकं तभजा जगौ गः। The triads त, भ, ज, ज appear in order followed by two heavy syllables. The *figure* is स्वभावोक्ति in the first three lines and उत्प्रेक्षा in the last.

राजा—सत्यमतीत्य हरितो हरींश्च वर्त्तन्ते वाजिनः। तथा हि—

यदालोके सूक्ष्मं व्रजति सहसा तद्विपुलतां
यदर्द्धा विच्छिन्नं भवति कृतसन्धानमिव तत्।
प्रकृत्या यद्वक्रं तदपि समरेखं नयनयोर्
न मे दूरे किञ्चित् क्षणमपि न पार्श्वे रथजवात्॥

सूत पश्यैनं व्यापाद्यमानम्। (शरसन्धानं नाटयति)।

KING—Verily, the horses are surpassing the *Harits* and the *Haris*. For, through the speed of the ear, that which is minute to the view suddenly attains vastness, that which is really disconnected at once becomes as if with union effected, even that which is by nature crooked immediately appears straight to the eyes; no-

thing for a moment even remains at a distance or at my side. Charioteer, behold it being killed (*Acts aiming the arrow*).

राजेति। 'वाजिनः' मदीया अश्वा 'हरितः' सूर्य्याश्वान् 'हरीन्' इन्द्राश्वान् 'च अतीत्य' वेगेन पराभूय 'वर्त्तन्ते' इति 'सत्यम्'। 'तथा हि' यतः—

यदिति। अन्वयः—रथजवात्—सहसा आलोके यत् सूक्ष्मं तत् विपुलतां व्रजति, यत् अर्द्धा विच्छिन्नं तत्कृतसन्धानमिव भवति, यत् प्रकृत्या वक्रं तदपि नयनयोः समरेखं—क्षणमपि न किञ्चित् मे दूरे न पार्श्वे॥ व्याख्या—'रथस्य जवात्' वेगात् [हेतौ पञ्चमी] 'सहसा' तत्क्षणमेव, 'आलोके' दर्शने 'यत्' वस्तु 'सूक्ष्मम्' अतिक्षुद्रं प्रतिभाति 'तत् विपुलतां' बृहत्तां 'व्रजति' लभते। दूरेण यत् सूक्ष्मं दृश्यते तदेव तत्क्षणं रथवेगात् समीपे भूत्वा स्थूलं लक्ष्यते। 'यत्' वस्तु 'अर्द्धा' तत्त्वतः 'विच्छिन्नं' व्यवधानवत् दृश्यते 'तत्' तदेव तत्क्षणं 'कृतं सन्धानं' योजना यस्य तत् 'इव भवति' लक्ष्यते। यौ द्वौ समीपे व्यवहितौ दृष्टौ तावेव वेगात् तत्क्षणं दूराद्दृष्टौ संलग्नाविव लक्ष्येते। 'यत्' वस्तु 'प्रकृत्या' स्वभावेन 'वक्रं' समीपात् दृष्ट कुटिलं दृश्यते 'तदपि' तत्क्षणं 'नयनयोः' नेत्रयोः सम्बन्धे, न तु तत्त्वतः, 'समा' ऋज्वी 'रेखा' यस्य तत् भवति। 'क्षणमपि न किञ्चित्' किमपि वस्तु 'मे दूरे' तिष्ठति 'न पार्श्वे' समीपे तिष्ठति॥ ["यदर्द्धा" (त-, न्या-)—"यदर्द्धे" (रा-, म-)—"यदन्तः" (वि-)॥ "मे दूरे...न पार्श्वे" (रा-, त-, न्या-, म-)—"मे पार्श्वे...न दूरे" (वि-)॥

सूतेति। 'एनं' हरिणम् [अन्वादेशे एनादेशः] 'व्यापाद्यमानं' मया हन्यमानं 'पश्य'। 'शरस्य सन्धानं' मृगं प्रति प्रयोगाध्यवसायं 'नाटयति' नाट्येन दर्शयति। राजवेशो नटः हस्तसञ्चालनादिना बाणक्षेपोद्योगं सूचयति इत्यर्थः॥

NOTES

1. सत्यम् &c.—This is a hyperbole. तथा हि introduces the next sloka as an apparent justification for the exaggeration.

2. (**a**). आलोके सूक्ष्मम्—आ + लोक + घञ् भावे = आलोकः seeing दर्शनम्। आलोके सूक्ष्मम्—minute in seeing, *i. e.*, looks minute *owing to great distance.* (**b**). सहसा—Suddenly. The suddenness of

the change suggests great speed. (c). अद्धा—An अव्यय meaning तत्त्वत: in reality. "स्फुटेऽवधारणे तत्त्वे चाद्धा प्रोक्ता मनीषिभिः।" अर्थे or अन्त: for अद्धा does not seem to give good sense. (d). कृत-सन्धानम् &c.—सम् + धा + ल्युट् भावे = सन्धानम् placing together, *i. e.*, joining. The disconnected appear connected ; this too is सहसा, hence again the inference of speed. (e). समरेखम्—सम is ऋजु straight. रेखा line, *i. e.*, out-line. This may apply to the transference of the object from near to far, or the reverse. (f). दूरे पार्श्वे—This is the order of the words in almost all editions. Only one edition reads पार्श्वे दूरे। Remembering that the first line refers to change from दूर to पार्श्व, and the second to that from पार्श्व to दूर, it seems natural to have first दूर then पार्श्व in the fourth line. The third line is not decisive as it applies equally to both kinds of change.

3. *Remark*—The metre is शिखरिणी the definition being "रसैरुद्रैश्छिन्ना यमनसभला ग: शिखरिणी"—the triads य, म, न, स, भ are in order followed by *one* light and *one* heavy syllable.

4. व्यापाद्यमानम्—वि + आ + पद + णिच् + शानच् कर्मणि being killed.

नेपथ्ये—भो भो राजन्, आश्रममृगोऽयं न हन्तव्यो न हन्तव्य: ।

(IN THE DRESSING-ROOM)—Ho ! Ho ! King, it is a stag of the hermitage, it must not be killed, it must not be killed !

सूत: (आकर्ण्यावलोक्य च)—आयुष्मन्, अस्य खलु ते बाणपथवर्तिन: कृष्णसारस्यान्तरे तपस्विन उपस्थिता: ।

CHARIOTEER (*Listening and espying*)—O Long-lived one, anchorites have appeared in the region of the stag which is now in the very line of flight of your arrow.

राजा (ससम्भ्रमम्)—तेन हि प्रगृह्यन्तां वाजिन: ।

KING (*Hastily*)—Then indeed let the horses be checked.

सूतः—तथा। (रथं स्थापयति)।

CHARIOTEER—Very good. (*Stops the car*).

नेपथ्ये इति। 'आश्रमस्य' कण्वाश्रमस्य 'मृगः अयं न हन्तव्यः' त्वया [आवेगे द्विरुक्तम्]।

सूत इति। 'आकर्ण्य' नेपथ्ये यदुक्तं तत् श्रुत्वा 'अवलोक्य' दृष्ट्वा 'च' आह। 'ते' बाणस्य पन्थाः 'बाणपथः' ["ऋक्पूरब्धूःपथामानक्षे" इति समासान्तः अप्रत्ययः]। तस्मिन् वर्त्तते यः 'कृष्णसारः' तस्य 'अन्तरे' अवकाशे। यत्र भवान् बाणं प्रयुङ्क्ते तस्मिन्नेव देशे, तव च हरिणस्य च मध्ये इत्यर्थः 'तपस्विन उपस्थिताः' प्राप्ताः। एतेन ब्रह्महत्याभयं दर्शितम्॥ ["बाणपथ" (वि-, म-)—"बाणपात" (रा-, त-, न्या-)]।

राजेति। 'सम्भ्रमेण' त्वरया 'सह'। 'तेन हि' निमित्तेन 'वाजिनः' अश्वाः 'प्रगृह्यन्तां' स्थिरीक्रियन्ताम्। अन्यथा रथेन दलिताः मुनयः।

सूत इति। यथा भवान् आज्ञापयति 'तथा' करोमि, अश्वान् प्रगृह्णामि-इत्यर्थः।

रथमिति। 'स्थापयति' स्थिरीकरोति।

NOTES

1. प्रगृह्यन्ताम्—प्र + ग्रह + लोट् अन्ताम् कर्मणि let them be checked. The ascetics were in imminent danger of being run over by the car. Hence the सम्भ्रम of the king.

(ततः प्रविशति सशिष्यो वैखानसः)। वैखानसः (हस्त-मुद्यम्य)—राजन्, आश्रममृगोऽयं न हन्तव्यो, न हन्तव्यः।

न खलु न खलु बाणः सन्निपात्योऽयमस्मिन्
मृदुनि मृगशरीरे तूलराशाविवाग्निः।

क्व वत हरिणकाणां जीवितञ्चातिलोलं
क्व च निशितनिपाता वज्रसाराः शरास्ते ॥
तत् साधु कृतसन्धानं प्रतिसंहर सायकम् ।
आर्त्तत्राणाय वः शस्त्रं न प्रहर्त्तुमनागसि ॥

(*Then enter an anchorite with disciples*) ANCHORITE (*Raising his hand*)– Sire, this is a stag of the hermitage, it must not be killed, it must not be killed. This arrow is indeed not to be planted on the tender body of the stag—not to be planted indeed—like fire on a heap of cotton. Alas! where is the frail existence of poor stags, and where are your shafts, keen at the point and strong as the thunder-bolt? Well, then retract the shaft that has been aimed. Your weapon is for the protection of the distressed and not to strike at the innocent.

तत इति । 'ततः' तदनन्तरं स्थापिते रथे शिष्याभ्यां सह 'सशिष्यः' शिष्यद्वयसमेतः 'वैखानसः' तापसः 'प्रविशति' रङ्गमञ्चमागच्छति ॥ ["सशिष्यः" (त-, न्या-, वि-)—"आत्मनातृतीयः" (रा-, म-)] ।

वैखेति । 'हस्तं' दक्षिणहस्तम् 'उद्यम्य' उद्धृत्य । निषेधसूचनार्थं हस्तोत्तोलनम् ।

नेति । अन्वयः—मृदुनि अस्मिन् मृगशरीरे अयं बाणः तूलराशौ अग्निरिव न खलु सन्निपात्यः । हरिणकानाम् अतिलोलं जीवितञ्च वत क्व, निशितनिपाता वज्रसाराः ते शराश्च क्व ॥ व्याख्या—'मृदुनि' सुकुमारे 'अस्मिन् मृगस्य' आश्रममृगस्य 'शरीरे' देहे 'अयं बाणः' धनुषि योजित एष शरः 'तूलानां राशौ' समूहे 'अग्निरिव' 'न खलु न खलु' न नून 'सन्निपात्यः' पातयितव्यः [आवेगे द्विरुक्तम्] । 'हरिणकानाम्' अनुकम्पितानां मृगाणां 'अतिलोलं' सुचञ्चलं 'जीवितञ्च' प्राणास्तु 'क्व' कुत्र, 'निशिताः' तीक्ष्णा 'निपाताः' अग्रभागाः येषां तथाविधाः, 'वज्रस्य' सार इव

'शारौ' बलं येषां तथाविधाः 'ते शराश्च' बाणाः पुनः 'क्व' कुत्र। शरशरीरयोर्महदन्तरं क्व इति द्विरुक्तं सूचयति। च इति भेदे॥ [राघवभट्टस्तु इमं श्लोकं न पठति]॥

तदिति। अन्वयः—तत् कृतसन्धानं सायकं साधु प्रतिसंहर। वः शस्त्रम् आर्त्तत्राणाय, अनागसि प्रहर्त्तुं न। व्याख्या—'तत्' तस्मात् 'कृतं सन्धानं' धनुषि योजना यस्य तथाविधं 'सायकम्' एतं बाणं 'साधु प्रतिसंहर' तूणीरं प्रत्यानय [साधु इति वाक्यालङ्कारे। "साधु यामि" इत्यादौ यथा]। 'वः' युष्माकं पौरवाणां 'शस्त्रम् आर्त्तानां' विपन्नानां 'त्राणाय' रक्षार्थम् अस्ति [तादर्थ्ये चतुर्थी], 'अनागसि' निरपराधे 'प्रहर्त्तुं न' अस्ति [अस्तिक्रियायोगात् तुमुन्]॥ ["तत् साधु" (रा-, वि-, म-)—तदाशु" (त-, न्या-)॥ "वः शस्त्रम्" (रा-, त-, न्या, म-)—"ते शस्त्रम्" (वि-)]॥

NOTES

1. वैखानसः—An ascetic. The derivation is uncertain. "वैखानसो वनेवासी वानप्रस्थश्च तापसः"—वैजयन्ती quoted by Mahamahopadhyaya Nyayapanchanana.

2. सन्निपात्यः—सम्+नि+पत+णिच्+यत् कर्मणि। Ought to be planted पातनयोग्यः।

3. (a). बत हरिणकानाम् &c.—बत implies निन्दा censure (See next). "निन्दायां विस्मये बत" इति हलायुधः। हरिणक has कन् अनुकम्पायाम्। Or 'बत expresses अनुकम्पा pity. "खेदानुकम्पा सन्तोषविस्मयामन्त्रणे बत" इत्यमरः। But in this case हरिणक has कन् ह्रस्वे *not* अनुकम्पायाम् because अनुकम्पा is already expressed by बत। (b). निशितनिपाताः—नि+शो+क्त कर्मणि=निशिताः keen तीक्ष्णाः। निपतन्ति एभिः इति नि+पत+घञ् करणे=निपाताः the parts by which they alight, *i. e.*, the *tips*, the *points*.

4. क्व जीवितं क्व शराः—Implies great incongruity between the two. Compare "क्व सूर्य्यप्रभवो वंशः क्व चाल्पविषया मतिः"। The bringing together of two such incongruous things is mildly censured by बत। The metre is मालिनी defined as "ननमयययुतेयं मालिनी भोगिलोकैः"—The triads न, न, म, य, य appear in order giving

fifteen syllables to each line. The *figure* is उपमा। The definition is "यथाकथञ्चित् सादृश्यं यत्रोद्भूतं प्रतीयते। उपमा नाम सा— ॥" In the first half मृगशरीर and तूलराशि also बाण and अग्नि are compared. In the second half the समास in वज्रसार establishes resemblance between वज्र and शर।

5. (a). तत्—Therefore, *i. e.*, such being the incongruity, put back your arrow. (b). सायकम्—स्यति खण्डयति इति सो + ण्वुल् कर्त्तरि = सायक: the chopper बाण:। (c). अनागसि—अविद्यमानम् आग: पापम् अपराधो वा यस्य यस्मिन् वा अनागा: or अविद्यमानागा: by the Varttika "नञोऽस्त्यर्थानां वा चोत्तरपदलोप:"। तस्मिन्। आधारे सप्तमी। When a distinction is made between देह and देहिन् the former is taken as the आधार—as it really is—of प्रहारक्रिया। Compare "मयि नान्तकोऽपि प्रभु: प्रहर्त्तुम्", "रुद्रौजसा तु प्रहृतं त्वयास्याम्", "तस्मिन् प्रजह्रुर्युधि सर्व एव" &c.

6. *Remark*—The metre is श्लोक। This verse too conveys a mild censure. Your arrow is meant for one purpose, you are using it to another! "व: शस्त्रम्" is the more common reading. It refers to the uniform family practice of the Pauravas, and thus gives point to the censure. As to the practice itself, compare "आपन्नाभयसत्रेषु दीक्षिता: खलु पौरवा:—*Act II, Infra*.

राजा—एष प्रतिसंहृत:। (यथोक्तं करोति)।

KING—Here, it is retracted (*Does as said*).

वैखानस:—सदृशमेतत् पुरुवंशप्रदीपस्य भवत:।
जन्म यस्य पुरोर्वंशे युक्तरूपमिदं तव।
पुत्रमेवंगुणोपेतं चक्रवर्त्तिनमाप्नुहि ॥

ANCHORITE—This is worthy of thee the light of the race of Puru. This is extremely worthy of you whose birth is in the race of Puru. May you get a son endowed with such virtues and presiding over the whole circle.

राजा (सप्रणामम्)—प्रतिगृहीतम् ।

KING (*With a bow*)—Accepted.

राजेति । 'एष' इति अविलम्बसूचकः । आज्ञातमात्रमेव 'प्रतिसंहृतः' इत्यर्थः । 'यथा उक्तं' तथा 'करोति' । यद्वा—उक्तस्य अनतिक्रमः 'यथोक्तम्' । तत् करोति । बाणं प्रतिसंहरति ।

वंशेति । 'पुरोः' ययातितनयस्य यो 'वंशः' तस्य यः 'प्रदीपः' प्रदीपवत् उद्भासकः तस्य 'भवतः एतत्' ब्राह्मणानुवर्त्तित्वं 'सदृशं' योग्यम् । पौरवाः सदैव ब्राह्मणानामनुकूला आज्ञाकराश्च इत्यर्थः ।

जन्मेति । अन्वयः—इदं तव युक्तरूपं यस्य पुरोर्वंशे जन्म । एवंगुणोपेतं चक्रवर्त्तिनं पुत्रम् आप्नुहि ॥ व्याख्या—'इदं' ब्राह्मणाज्ञापालनं 'तव युक्तरूपम्' अतिशयेन युक्तम् [प्रशंसायां रूपप् प्रत्ययः] 'यस्य' ते 'पुरोः वंशे जन्म' [यच्छब्दस्य उत्तरवाक्यगतत्वेन उपादानात् तच्छब्दोपादानं नापेक्षितम्] । 'एवम्' ईदृशैः 'गुणैः उपेतं' युक्तम् । चक्रे वर्त्तते राजचक्रमाक्रम्य तिष्ठति इति 'चक्रवर्त्तिनं' राजाधिराजं 'पुत्रम् आप्नुहि' लभस्व ॥ इत्यमोघात्सुष्टात् विप्राद्दाशिषः ॥

राजेति । प्रथमं ब्राह्मणा आशिषमुच्चारयन्ति, ततो राजा प्रणम्य तामाशिषं स्वीकरोति, इति राजसु नियमः । प्रणामेन सह 'सप्रणामम्' । 'प्रतिगृहीतं' स्वीकृतम् । ब्राह्मणवच इति शेषः । आशीरियं गृहीता इत्यर्थः ।

NOTES

1. एष &c.—एषः implies *instant execution* तत्क्षणकरणम् । Compare "एष त्वामभिनवकण्ठशोणितार्थी शार्दूलः पशुमिव हन्मि चेष्टमानम्"—*Act VII, Infra.* Mark how the king stands unruffled under the censure. He is all humility.

2. एवंगुण &c.—एवं गुणाः एवंगुणाः such virtues. सह्सुपेति समासः । तैः उपेतः । तृतीया तत्—। तम् । Benediction of a Brahmana is of unfailing efficacy. Hence this foretells the birth of सर्वदमन । Compare "पुत्रं लभस्वात्मगुणानुरूपं भवन्तमीड्यं भवतः पितेव ॥ इत्थं प्रयुज्याशिषमग्रजन्मा राज्ञे प्रतीयाय गुरोः सकाशम् । राजापि लेभे सुतमाशु तस्मात्—॥" The metre is श्लोक ।

वैखानसः—राजन्, समिदाहरणाय प्रस्थिता वयम्। एष खलु कण्वस्य कुलपतेरनुमालिनीतीरमाश्रमो दृश्यते। न चेदन्यकार्य्यातिपातः, प्रविश्य प्रतिगृह्यताम् आतिथेयः सत्कारः। अपि च—

रम्यास्तपोधनानां प्रतिहतविघ्नाः क्रियाः समवलोक्य।
ज्ञास्यसि कियद् भुजो मे रक्षति मौर्वीकिणाङ्क इति॥

. ANCHORITE—Sire, we are going to collect faggot. The hermitage of Kanva, the master of *Munis*, can indeed be seen (from here) on the bank of the Malini. Unless there is obstruction of other duties, please enter and accept the rites of hospitality. Besides—Beholding the rites of the ascetics, with obstructions removed and therefore pleasant, you will know (the answer to) this—"How far defends my arm marked with the scar of the bow-string ?"

वैखेति। 'समिधां' यज्ञकाष्ठानाम् 'आहरणाय' संग्रहाय 'वयं प्रस्थिताः' चलिताः। 'एष खलु' अयं हि 'अनुमालिनीतीरं' मालिनीनदीतीरे [विभक्त्यर्थेऽव्ययीभावः] 'कुलपतेः' अयुतशिष्यपोषकस्य मुनिकुलेश्वरस्य 'कण्वस्य आश्रमो दृश्यते'। 'चेत्' यदि 'अन्यस्य कार्य्यस्य अतिपातो' व्याघातो 'न' स्यात्, 'प्रविश्य' आश्रमं गत्वा 'आतिथेयः सत्कारः' अतिथियोग्या पूजा 'प्रतिगृह्यतां' स्वीक्रियताम्। कुलपतिना आज्ञप्ताः समित्संग्रहाय याम इति भवन्तं नीत्वा आश्रमं प्रापयितुमशक्ता वयम्। तत् स्वयमेव गच्छ इति भावः॥ ["कण्वस्य कुलपतेः" (रा-, त-, न्या-, म-)—"काश्यपस्य कुलपतेः" (वि-)]।

रम्या इति। अन्वयः—तपोधनानां प्रतिहतविघ्नाः रम्याः क्रियाः समवलोक्य "मौर्वीकिणाङ्कः मे भुजः कियत् रक्षति" इति अपि ज्ञास्यसि च॥ व्याख्या—'तपोधनानां' तापसानां 'प्रतिहताः' निरस्ता 'विघ्नाः' प्रत्यूहाः याभ्यः यासां वा ताः, अतएव

'रम्याः' तोषकरीः 'क्रियाः' अनुष्ठानानि 'समवलोक्य' दृष्ट्वा 'मौर्व्याः' गुणस्य 'किणः' चिह्नं ज्याघातरेखा। स 'अङ्कः' भूषणं यस्य तादृशो 'मे भुजः' अयं बाहुः 'कियत्' किंपरिमाणं 'रक्षति इति अपि ज्ञास्यसि' प्रत्यक्षीकरिष्यसि च॥ महती हि रक्षा त्वया नो विहिता। तच्च न ते विदितम्। आश्रमं गत्वा न केवलमातिथ्यं लप्स्यसे, किन्तु तां रक्षाम् अपि ज्ञास्यसि इति भावः॥

NOTES

1. समिदाहरणाय &c.—समिदाहरणं कर्तुम् or समिदाहरणार्थम् gives कर्मणि चतुर्थी by the rule "क्रियार्थोपपदस्य च कर्मणि स्थानिनः" (when a तुमुन्नन्तक्रिया disappears, its कर्म takes चतुर्थी) or तादर्थ्ये चतुर्थी। This explains why he cannot accompany the king and see him entertained.

2. कुलपतेः—कुलपति is a sage who boards and lodges ten thousand disciples. "मुनीनां दशसाहस्रं योऽन्नदानादिपोषणात्। अध्यापयति विप्रर्षिरसौ कुलपतिः स्मृतः॥" Quoted by Vidyasagara.

3. *Remark*—कण्वस्य कुलपतेः is the usual reading. It gives the name of the sage and hence is preferable to काश्यपस्य कुलपतेः which refers to the गोत्र only.

4. (a). तपोधनानाम्—तपो धनमेषां तपोधनाः to whom asceticism is wealth. Hence the रक्षा is with regard to asceticism (तपम्) only. (b). अपहतविघ्नाः—विहन्यन्ते एभिः इति वि + हन + क करणे घञर्थे = विघ्नाः obstructions. The obstructions being removed, तपस् is well protected. Owing to this the क्रिया must be pleasing (रम्या) to you to whom the रक्षा is due. The रक्षा is complete.

राजा—अपि सन्निहितोऽत्र कुलपतिः ?

KING—Is the master of *Munis* present there ?

वैखानसः—इदानीमेव दुहितरं शकुन्तलाम् अतिथि-सत्काराय सन्दिश्य, दैवमस्याः प्रतिकूलं शमयितुं सोमतीर्थं गतः।

ANCHORITE—Just now, having ordered his daughter

Sakuntala to honour guests, he has gone to *Soma-Tirtha* to avert an adverse destiny of hers.

राजा—भवतु, तामेव पश्यामि। सा खलु विदितभक्तिं मां महर्षेः कथयिष्यति।

King—Very well, her I shall see. Surely she will report me to the sage on knowing my devotion.

राजेति। 'अपि कुलपतिः' कण्वः 'अत्र' आश्रमे 'सन्निहितः' आत्मना उपस्थितः।

वैखेति। 'इदानीमेव' अस्मिन्नेव क्षणे 'दुहितरं' शकुन्तलाम् 'अतिथीनां सत्काराय' पूजायै अतिथिसत्कारं कर्त्तुमित्यर्थः 'सन्दिश्य' आज्ञाप्य 'अस्याः' दुहितुः 'प्रतिकूलं' सकोपं 'दैवं' भागधेयम् 'शमयितुम्' अनुकूलयितुं 'सोमतीर्थं गतः'। आश्रमं गच्छ शकुन्तला ते आतिथ्यं विधास्यति इत्यर्थः॥ प्रतिकूलदैवशमनेन शापात् त्यक्तापि शकुन्तला भूयो दुष्यन्तेन सङ्गता भविष्यति इति सूच्यते॥

राजेति। 'भवतु' इत्यव्ययं निश्चयद्योतकम्। असन्निहितः कुलपतिः, तत् आश्रमं यामि न वा इति वितर्के निश्चयमाह—'तामेव' दुहितरं शकुन्तलामेव 'पश्यामि'। 'सा खलु विदिता' ज्ञाता 'भक्तिः' तापससेवा यस्य तथाविधं 'मां महर्षेः' कण्वस्य समक्षं 'कथयिष्यति'। मद्गतां श्रद्धां स्वयं ज्ञात्वा कण्वस्य गोचरे करिष्यति इत्यर्थः।

NOTES

1. (a). अतिथिसत्काराय—"क्रियार्थोपपदस्य—" (See Note 2, above) इति कर्मणि चतुर्थी। There are arrangements to receive guests in his absence; you will not be inconvenienced. (b). दैवमस्याः &c.—कण्व knew शकुन्तला would suffer much, though it is not clear if the exact nature of her misery was also known to him at this early stage. (c). शम्+णिच्+तुमुन्=शमयितुम् the वृद्धि being barred by the rule "नोदात्तोपदेशस्य मान्तस्यानाचमेः"। (d). सोमतीर्थ is a name of प्रभासतीर्थ। Here सोम was cured of consumption. "पुण्यं प्रभासं समुपाजगाम यत्रोडुराड् यक्ष्मणा क्लिश्यमानः।... एवं तु तीर्थप्रवरं पृथिव्यां प्रभासनात्तस्य तु स प्रभासः॥"—*Bhagavata* quoted in the वाचस्पत्य।

2. (a). पश्यामि has वर्तमान in the भविष्यत्काल owing to वर्त-मानसामीप्य। (b). भक्ति is of the प्रियादि class. Hence the पुंवद्भाव of विदिता in विदितभक्ति comes under the prohibition"—अपूरणी-प्रियादिषु"। Bhoja explains that the भक्ति in the प्रियादि list means the *object* of worship and is derived भज्यते सेव्यते इयम् इति भज+क्तिन् कर्मणि। It thus bars पुंवद्भाव in compounding भवानो भक्तिरस्य which gives भवानोभक्तिः *without* पुंवद्भाव and *not* भवभक्तिः *with* पुंवद्भाव। But भक्ति is derived with भावे क्तिन् in compounds like विदितभक्ति, दृढभक्ति &c. Hence the prohibition does not apply and we have पुंवद्भाव। Vamana however gives a different explanation. He starts with a सामान्यनिर्देश like इदम् अस्य अस्ति। The विशेष comes in afterwards thus—दृढं किमस्ति? *Ans*—यत् दृढमस्ति सा भक्तिः। So he says—"दृढभक्तिरित्येवमादिषु स्त्रोपूर्वपदस्याविवक्षि-तत्वात् सिद्धम्"। (c). महर्षेः—शेषे षष्ठी। महर्षेः समीपे कथयिष्यति इति अप्रयुज्यमान "समीपे" "सकाशम्" इत्यादिपदं गम्यते।

वैखानसः—साधयामस्तावत्। (सशिष्यो निष्क्रान्तः)।

Anchorite—Now then we proceed. (*Exit with pupils*).

राजा—सूत, नोदयाश्वान्। पुण्याश्रमदर्शनेनात्मानं पुनो-महे।

King—Charioteer, urge on the horses. We purify ourselves with a look at the holy hermitage.

सूतः—यदाज्ञापयत्यायुष्मान्। (भूयो रथवेगं निरूपयति)।

Charioteer—As the long-lived one commands (*Again acts the speed of the car*).

राजा—सूत, अकथितोऽपि ज्ञायते एव अयम् आभोग-स्तपोवनस्येति।

King—Charioteer, though not told, this (place) is indeed known as the outskirts of the forest of penance.

सूत:—कथमिव ? CHARIOTEER—How so ?

वैखेति। तावदिति वाक्यालङ्कारे अवधारणे वा ; 'साधयामो' गच्छाम:। शिष्याभ्यां सह 'सशिष्यो' वैखानसौ 'निष्क्रान्त:' रङ्गमञ्चादपगत:।

राजेति। 'सूत अश्वान् नोदय' प्रेरय। 'पुण्यस्य' पावनस्य 'आश्रमस्य' कण्वाश्रमस्य 'दर्शनेन आत्मानं पुनीमहे' पवित्रीकुर्महे।

सूत इति। 'आयुष्मान् यत् आज्ञापयति' तत्करोमि, अश्वान् नोदयामि इत्यर्थ:। 'भूय:' पुनरपि 'रथस्य वेगं' सत्वरगमनं 'निरूपयति' नाटयति, हस्तसञ्चालनादिना वेगाभिनयं करोति।

राजेति। 'सूत अयम्' एष देश: 'अकथितोऽपि' अन्येन अनिवेदितोऽपि 'तपोवनस्य आभोग:' विस्तार: प्रान्तभूमि: 'इति ज्ञायते एव'। न केनापि कथ्यते वयं तपोवनस्य प्रान्तभूमिम् आगता इति, किन्तु लक्षणानि दृष्ट्वा ज्ञायते इत्यर्थ: ॥ ["आभोगस्तपोवनस्य" (रा-, त-, न्या-, म-)—"आश्रमस्तपोवनस्य" (वि-)] ॥

NOTES

1. साधयाम:—साध + णिच् means "to go." "प्रायेण एयन्तक: साधिर्गमे: स्थाने प्रयुज्यते"—*Sahityadarpana*. प्रायेण implies two things—(1) That the use is not restricted to नाटक। Compare "साधयाम्यहमविघ्नमस्तु ते"—*Raghu*. Also (2) That गम too appears in नाटक। Compare "गच्छायत:" "अयमहमागच्छामि" &c.

2. निरूपयति—नि + रूप + णिच् + लट् ति, acts अभिनयति।

3. सूत &c.—अकथित: undescribed, *i. e.*, no one has told me that these are the precincts of the hermitage, yet from certain signs I know this place to be such. आभोग is पूर्णता fullness. भावे घञ्। "पूर्णत्वयत्नावाभोगौ" इति विकाण्डशेष:। But "कृदभिहितो भावो द्रव्यवत् प्रकाशते"। Hence आभोग secondarily means the *things* that accomplish पूर्णता, *i. e.*, the precincts, out-skirts.

4. *Remark*—The reading "आभोगस्तपोवनस्य" is preferable to "आश्रमस्तपोवनस्य" because the आश्रम was *not reached then*. Later on *further progress* is recorded (स्तोकमन्तरं गत्वा)। The car

then stops and the king proceeds on foot. Then again we find him *go still further* (परिक्रम्य अवलोक्य च) when he sees the entrance of the आश्रम and exclaims इदमाश्रमद्वारं यावत् प्रविशामि। Hence here he has reached only the *precincts* (आभोग) of the hermitage and not the hermitage itself. Thus आभोगस्तपोवनस्य is more suitable.

राजा—किं न पश्यति भवान् ? इह हि—
नीवाराः शुकगर्भकोटरमुखभ्रष्टास्तरूणामधः
प्रस्निग्धाः क्वचिदिङ्गुदीफलभिदः सूच्यन्त एवोपलाः ।
विश्वासोपगमादभिन्नगतयः शब्दं सहन्ते मृगास्
तोयाधारपथाश्च वल्कलशिखानिस्यन्दरेखाङ्किताः ॥

KING—Do you not see ? Here indeed—(In some places) under the trees are wild-grains slipped from mouths of hollows in which dwell parrots ; somewhere slabs of stone, excessively oily, are indeed betrayed as crackers of the Ingudi fruit ; owing to access of confidence, the deer, with their gait unchanged, tolerate the sound (of the car) ; and the paths to the reservoirs of water are marked with lines of water runing from the ends of bark-garments.

सूतः—सर्वमुपपन्नम् । CHARIOTEER—All true.

नीवारा इति । अन्वयः—इह हि (क्वचित्) तरूणामधः शुकगर्भकोटरमुखभ्रष्टा नीवाराः (दृश्यन्ते) ; क्वचित् प्रस्निग्धा उपला इङ्गुदीफलभिद एव सूच्यन्ते ; (क्वचित्) विश्वासोपगमात् अभिन्नगतयो मृगाः शब्दं सहन्ते ; (क्वचित्) च तोयाधारपथा वल्कलशिखानिष्यन्दरेखाङ्किताः (दृश्यन्ते) ॥ व्याख्या—'इह हि' अत्र तु 'क्वचित्' कुत्रापि देशे 'तरूणामधः' तले 'शुका गर्भे' मध्ये येषां तादृशानाम् [गड्वादेराकृतिगणत्वात् सप्तम्यन्तस्य परनिपातः] 'कोटराणां' विलानां 'मुखेभ्यः भ्रष्टाः'

भूमौ पतिता 'नीवारा' दृश्यन्ते । 'क्वचित्' क्वापि 'प्रकर्षेण स्निग्धाः' स्नेहवन्तः 'उपलाः' शिलातलानि 'इङ्गुदीफलानि भेत्तु'' शीलमेषाम् इति 'सूच्यन्ते' अनुमीयन्ते । क्वचित् अन्यत्र 'विश्वासस्य उपगमात्' आविर्भावात् 'अभिन्ना' अविकृता 'गतिः' गमनं येषां तथाविधाः, त्रासविरहात् गतिभेदम् अनवलम्बमाना 'मृगाः शब्दं' रथगर्जनं 'सहन्ते' साधु क्षमन्ति ; क्वचित् 'च' कुत्राप्यन्यत्र 'तोयाधाराणां' जलाशयानां 'पन्थानः' मार्गाः ["ऋक्पूरब्धूःपथामानक्षे" इति समासान्तः अप्रत्ययः] 'वल्कलानां' स्नानोत्थितानां मुनीनां परिधेयभूतानां 'शिखाभ्यः' यः 'निष्यन्दः' जलस्रावः तस्य या 'रेखाः' धाराः ताभिः 'अङ्किताः' चिह्निताः दृश्यन्ते ॥ अत्र नीवाराः, अन्यत्र इङ्गुदीफलभिदः उपलाः, तत्र अवस्रवो हरिणा, अमुत्र च वल्कलपतिता जलधाराः । नैतत् सर्वं तपोवन-सन्निकर्षादन्यत्र सम्भवति ॥ ["शुकगर्भकोटर" (रा-, वि-, म-)—"शुक-कोटरार्भक" (त-, न्या-)] ।

सूत इति । 'सर्वम् उपपन्नं'' युक्तम् । युक्तमुक्तं भवता । तपोवनाभोग एवायम् इत्यर्थः ।

NOTES

1. (a). शुकगर्भ &c.—गर्भ here means अभ्यन्तर inside. शुका गर्भे येषां ते शुकगर्भाः । बहु— । तादृशाः कोटराः शुकगर्भकोटराः hollows having parrots inside. तेषां मुखानि शुकगर्भकोटरमुखानि । तेभ्यो भ्रष्टाः । सहसुपेति समासः । The idea is—Parrots carry wild grains to their young ones in the hollows. These advance up to the edge of the hollows to receive the grains, and, through inexperience and eagerness, drop some. The Bengali reading शुककोटरार्भक-मुखभ्रष्टाः brings out the idea very clearly. (b). प्रस्निग्धाः – प्र indicates, *excess* प्रकर्ष । From excess of oiliness, follows the inference that nuts are constantly being cracked on them. Hence the proximity of ascetics. (c). इङ्गुदी &c.—इङ्गुदी is a tree from the fruits of which oil is extracted by ascetics for domestic purposes. इङ्गुद्याः फलानि इङ्गुदीफलानि । इङ्गुदीफल + भिद् + क्विप् तच्छीले कर्तरि । तादृशाः सूच्यन्ते declared as crackers of Ingudi-nuts. (d). अभिन्न-गतयः—The deer do not alter their gait, *i. e.*, do not run away.

Hence they are not wild, so some hermitage must be near. (e). तोयाधारपथाः—आध्रियन्ते एषु इति आ+धृ+घञ् अधिकरणे संज्ञायां निपातनात्=आधाराः receptacles. तोयानाम् आधाराः तोयाधाराः। तेषां पन्थानः। अ is समासान्त। (f). वल्कलशिखा &c.—नि+स्यन्द+घञ् भावे=निस्यन्द or निष्यन्द। ष is optional in the case of अप्राणि by the rule "अनुविपर्यभिनिभ्यः स्यन्दतेरप्राणिषु"। वल्कलानां शिखाः वल्कलशिखाः। ताभ्यो निस्यन्दः वल्कलशिखानिस्यन्दः flow from the tips of barks. But कृदभिहितो भावो द्रव्यवत् प्रकाशते। Hence this means the *thing*, that establishes the flow, *i. e.*, जल। तस्य रेखाः वल्कलशिखानिस्यन्दरेखाः। ताभिरङ्किताः।

2. *Remark*—After this the Bengali editions, followed by Monier-Williams, read—अपि च

कुल्याम्भोभिः पवनचपलैः शाखिनो धौतमूला
भिन्नो रागः किसलयरुचामाज्यधूमोद्गमेन।
एते चार्वागुपवनभुवि च्छिन्नदर्भाङ्कुरायां
नष्टाशङ्का हरिणशिशवो मन्द मन्दं चरन्ति॥

I am sorry having to reject this fine sloka. It has poetry in it, and the diction is very good. Unfortunately it does not seem to suit the context. The first half of the sloka suits admirably the *hermitage itself* but *not* its *precincts*. The second half is only a paraphrase of the third line of the preceding sloka. A cautious writer like Kalidasa will have *one* of these only, not the two together. But the first sloka in undoubtedly authentic as it is quoted by आनन्दवर्द्धन in his ध्वन्यालोक written about the seventh century A. D. Hence I think the second has to go.

राजा (स्तोकमन्तरं गत्वा)—तपोवननिवासिनामुपरोधो मा भूत्। एतावत्येव रथं स्थापय। यावदवतरामि।

KING—(*Going a short distance*) Let there be no incon-

venience to the residents of the hermitage. Here do thou stop the car. I will get down.

सूतः—धृताः प्रग्रहाः। अवतरत्वायुष्मान्।

CHARIOTEER—The reins are drawn. Let the long-lived one alight.

राजा (अवतीर्य्य)—सूत विनीतवेषेण प्रवेष्टव्यानि तपोवनानि नाम। इदं तावद्गृह्यताम्। (सूतस्याभरणानि धनुश्च उपनीय) सूत, यावदाश्रमवासिनः प्रत्यवेक्ष्य अहमुपावर्त्ते, तावदार्द्रपृष्ठाः क्रियन्तां वाजिनः॥

KING (*Having alighted*)—Charioteer, hermitages have to be entered in a humble attire. You better hold this. (*Having made over his bow and jewellery to the charioteer*)—Charioteer, let the horses have their back watered by the time I come back visiting the inmates of the hermitage.

सूतः—तथा। (निष्क्रान्तः)।

CHARIOTEER—Very well. (*Exit*).

राजेति। 'स्तोकम्' अल्पम् 'अन्तरम्' अवकाशं 'गत्वा' आह—'तपोवने ये निवसन्ति' तापसाः 'तेषाम् उपरोधः' पीड़ा 'मा भूत्'। 'एतावति एव' एतत्परिमाणे एव वर्त्मनि गते 'रथं स्थापय' स्थिरीकुरु। 'अवतरामि यावत्' पद्भ्यामेव गच्छामि। यावदवधारणे।

सूत इति। 'प्रग्रहा' रश्मयः 'धृताः' संयमिताः। 'आयुष्मान् अवतरतु'।

राजेति। 'अवतीर्य्य' रथात् भुवं प्राप्य। 'तपोवनानि नाम' ["नाम कोपेऽभ्युपगमे" इति मेदिनी] 'विनीतः' शान्तः यो 'वेषः' वस्त्रालङ्कारादिः तेन 'प्रवेष्टव्यानि' प्रवेष्टुं योग्यानि। शान्तेन वेषेण तपोवनं विशेत् इत्यर्थः। 'इदम्' एतत् 'तावत् गृह्यताम्' रक्ष्यतां त्वया। 'सूतस्य' [दानाभावात् षष्ठी एव न चतुर्थी]

'आभरणानि' अलङ्करणानि 'धनुश्च उपनीय' उपहृत्य आह। 'यावत्' यत्कालम् 'अहम् आश्रमे' ये 'वसन्ति' तान् 'प्रत्यवेत्य' दृष्ट्वा सम्भाष्य 'उपावर्त्ते' प्रत्यागतो भवामि 'तावत्' तत्कालं 'वाजिनः' अश्वाः 'आर्द्रपृष्ठाः' सजलानि 'पृष्ठानि' येषां तथाविधाः 'क्रियन्तां' विधीयन्ताम्। अश्वान् विश्रामय इत्यर्थः॥ ["सूतस्य" (रा-, त-, न्या-, म-)—"सूताय" (वि-)॥ "उपनीय" (म-)—"उपनीय अर्पयति" (रा, त-, न्या, वि-)]॥

सूत इति। 'तथा' यथा भवान् आदिशति तथा करोमि। 'निष्क्रान्तः' रङ्गमञ्चादपगतः।

NOTES

1. (a). तपोवननिवासिनाम्—तपःसाधनं वनं तपोवनम्। तपोवन+नि+वस+णिनि कर्त्तरि ताच्छील्ये=तपोवननिवासिनः। तेषाम्। कृद्योगे कर्मणि षष्ठी। (b). मा भूत्—"माङि लुङ्" इति माङ्योगे भविष्यत्काले लुङ्। "न माङ्योगे" इत्यडागमप्रतिषेधः।

2. (a). सूतस्य—No दान is implied. Hence षष्ठी as in रजकस्य वस्त्रं ददाति। (b). उपनीय—उप+नी+ल्यप् having made over. Several editions read उपनीय अर्पयति। But the usual and more logical practice, is to have the stage direction with a तिङन्त or क्तान्त word when the speech ends, otherwise one with क्त्वा, ल्यप् &c. Compare निमित्तं सूचयन् (not सूचयति), अवलोक्य च (not अवलोकते च), निपुणं निरूप्य (not निरूपयति) &c., *in the middle* of a speech; also विलोकयन् स्थितः (not स्थित्वा), वृक्षसेचनं रूपयति (not रूपयित्वा), शिथिलयति (not शिथिलयित्वा) &c. *at the end.* Hence अर्पयति is better omitted.

राजा (परिक्रम्यावलोक्य च)—इदमाश्रमद्वारम्। यावत् प्रविशामि। (प्रविश्य निमित्तं सूचयन्),

शान्तमिदमाश्रमपदं स्फुरति च बाहुः कुतः फलमिहास्य।
अथवा भवितव्यानां द्वाराणि भवन्ति सर्वत्र॥

KING (*Going round and espying*)—This is the entrance to the hermitage. I will enter. (*Entering and indicating an omen*) The site of this hermitage is self-restrained, yet my arm quivers. Whence is its fruition here ? Or, there are doors for the destined everywhere.

नेपथ्ये—इदो इदो सहीश्रो [इत इत: सख्यौ]।

IN THE DRESSING-ROOM—This way, my friends this way.

राजेति। 'परिक्रम्य' रङ्गमञ्चं परित: कतिचित् पदानि गत्वा 'अवलोक्य' अग्रतो दृष्ट्वा 'च' आह। परिक्रमणन्तु अग्रे गमनस्य सूचकम्। 'इदम् आश्रमस्य द्वारं' प्रवेशमार्गो लक्ष्यते। 'यावत् प्रविशामि' आश्रमान्तर्गच्छामि। 'प्रविश्य' अन्तर्गत्वा 'निमित्तं' परिणयशंसि दक्षिणबाहुस्पन्दनं 'सूचयन्' नाट्येन दर्शयन् आह—

शान्तेति। अन्वय:—इदम् आश्रमपदं शान्तम्। बाहुश्च स्फुरति। इह अस्य फलं कुत: ? अथवा भवितव्यानां द्वाराणि सर्वत्र भवन्ति॥ व्याख्या—'इदम् आश्रमपदं' तपोवनस्थलं 'शान्तं' शमप्रधानम्। सर्वत्रात्र शमो राजते, राजसस्य कुतोऽवकाश:। 'बाहुश्च' तथापि मम दक्षिणो भुज: 'स्फुरति' स्पन्दते। 'इह' अस्मिन् आश्रमे 'अस्य' बाहुस्फुरणस्य 'फलं' वराङ्गनासङ्गम: 'कुत:' हेतो: सम्भवति। न कुतोऽपि इत्यर्थ:। 'अथवा' सुतरामसम्भवमेतत्रापि वा भवेत्। कुत इत्याह—'भवितव्यानाम्' अवश्यम्भाविनाम् अर्थानां 'द्वाराणि' आगममार्गा: 'सर्वत्र भवन्ति'। यदा विधिरभिमुख: तदा कुतोऽपि आनीय घटयति तत् केनापि वक्तुं न शक्यते। तदलं विचार्य इति भाव:।

नेपथ्ये इति। हे 'सख्यौ इत इत:' अस्मिन् प्रदेशे आगच्छतम्। [सम्भ्रमे द्विरुक्तम्।]

NOTES

1. निमित्तं सूचयन्—निमित्त is सूचक, an omen. Here it is the throbbing of the right arm which indicates approaching

marriage. सूचयन्—सूच + णिच् + शतृ having indicated, *i. e.*, having shown to the audience by gestures &c. that the right arm was throbbing.

2. (a). श्रान्तम्—श्रम + णिच् + क्त कर्मकर्त्तरि = श्रान्तम् or श्रमितम्। (b). आश्रमपदम्—आश्राम्यति अस्मिन् इति आ + श्रम + घञ् अधिकरणे = आश्रमः hermitage. तस्य पदं स्थानम्। (c). भवितव्यानाम्—भू + तव्य आवश्यके कर्त्तरि बाहुलकात् = भवितव्यानि those that are destined to be. तेषाम्। This कर्त्तरि तव्य does not bar the usual भावे तव्य। The metre is आर्य्या। (See आ परितोषात् &c. *Ante.*)

राजा (कर्णं दत्त्वा)—अये दक्षिणेन वृक्षवाटिकाम् आलाप इव श्रूयते। यावदत्र गच्छामि। (परिक्रम्यावलोक्य च) अये, एतास्तपस्विकन्यकाः स्वप्रमाणानुरूपैः सेचनघटैर्बालपादपेभ्यः पयो दातुम् इत एवाभिवर्त्तन्ते। (निपुणं निरूप्य) अहो मधुरमासां दर्शनम्।

शुद्धान्तदुर्लभमिदं वपुराश्रमवासिनो यदि जनस्य।
दूरीकृताः खलु गुणैरुद्यानलता वनलताभिः॥

यावदिमां छायामाश्रित्य प्रतिपालयामि। (विलोकयन् स्थितः)।

King *(Listening)*—Hah! Methinks I hear conversation to the right of the grove of trees. I will go there. (*Going round and espying*)—Ah! Here are ascetic girls, with watering vessels suited to their size, coming this very way to water the young plants. (*Eyeing closely*) Oh! Pleasing is their appearance. If to one living in a hermitage belongs this figure which is rarely found in the inner apartments, then indeed are garden-creeepers distanced by virtues by forest-creepers. I will wait going under this shade (*Stands watching*).

राजेति। 'कर्णं दत्त्वा' श्रवणार्थं प्रेरयित्वा आह—'अये' इति सम्भ्रमे। 'वृक्षाणां' या 'वाटिका' मण्डपः पुरो दृश्यते, तां 'दक्षिणेन' ततो दक्षिणे देशे [एनप्प्रत्यययोगे द्वितीया] 'आलापः श्रूयते इव' मन्ये संलापो वर्त्तते। 'एताः' पुरो दृश्यमानाः 'तपस्विनां' तापसानां 'कन्यकाः' कुमार्य्यः 'बालेभ्यः' क्षुद्रेभ्यः 'पादपेभ्यो' वृक्षेभ्यः 'पयो' जलं 'दातुं' स्वस्य प्रमाणस्य' आकृतेः 'अनुरूपैः' योग्यैः क्षुद्रैरित्यर्थः 'सेचनार्थः घटैः' कलसैः 'इत एव' अस्यामेव दिशि अभिवर्त्तन्ते आगच्छन्ति। ('निपुणं' सम्यक् 'निरूप्य' दृष्ट्वा) 'अहो' आश्चर्य्ये 'आसां' तपस्विकन्यकानां 'दर्शनं' रूपं 'मधुरं' मनोहरम्।

शुद्धान्तेति। अन्वयः—इदं शुद्धान्तदुर्लभं वपुः आश्रमवासिनो जनस्य यदि (तदा) खलु उद्यानलता वनलताभिः दूरीकृताः॥ व्याख्या—'इदम्' अग्रतो दृश्यमानं 'शुद्धान्ते' राजावरोधे ["शुद्धान्तोऽन्तःपुरे" इति मेदिनी] 'दुर्लभं' दुष्प्रापं 'वपुः' शरीरम् 'आश्रमे' तपोवने यो 'वसति' तस्य जनस्य 'यदि' सम्भूतं, तदा 'खलु' नूनम् 'उद्यानलालिता लताः वनस्थाभिः' अयत्नरूढाभिः 'लताभिः गुणैः' सौन्दर्य्यसौरभादिभिः 'दूरीकृताः' अधःकृताः॥

यावदिति। 'यावदिमां छायामाश्रित्य' छायया अन्तरितः सन् 'प्रतिपालयामि' तिष्ठामि। ('विलोकयन्' पश्यन् 'स्थितः')।

NOTES

1. दक्षिणेन—दक्षिण + एनप् सप्तम्यर्थे। An अव्यय meaning here "*close* to the south." एनप् is not available if not *close*. If a *long way* to the south, we should say वृक्षवाटिकाया दक्षिणे with सप्तमी।

2. (a). तपस्वि &c.—तप एषामस्ति इति तपस् + विनि मत्वर्थे = तपस्विनः ascetics. कन्या एव कन्यकाः। कन् स्वार्थे। Optionally we get कन्यिका also. (b). स्वप्रमाण &c.—प्रमाण is measure ; hence here, stature. अनुगतं रूपमेषाम् अनुरूपाः similar. स्वस्य प्रमाणं स्वप्रमाणम्। तस्य अनुरूपाः। तैः। (c). सेचनघटैः—सिच् + ल्युट् भावे = सेचनम् watering. तदर्थाः or तस्य घटाः सेचनघटाः। शाकपार्थिवादि or ६तत्—। तैः। इत्यम्भूतलक्षणे तृतीया। The watering-vessels indicate that they are going out

to water plants. Hence these are लक्षण (indicator) of इत्यभूत (पयोदानोन्मुख)। Or घटैः सह इति सहार्थे तृतीया।

3. दर्शनम्—दृश + ल्युट् कर्मणि बाहुलकात् that which is seen, रूप, appearance. Here he is equally interested in all the three girls and speaks in the plural (आसाम्)। He is not yet specially attracted towards any one of them.

4. (a). शुद्धान्तदुर्लभम्—शुद्धः अन्तः अवधिर्यस्य स शुद्धान्तः the royal apartments. बहु—। तत्र दुर्लभम् rare in the royal apartments. सुप्सुपा। (b). इदं वपुः &c.—जातावेकवचनम्। He is thinking of all the three though speking in the singular. This is obvious from the plural in आसाम्, and वनलताभिः। (c). आश्रमवासिनः—आश्रम + वस + णिनि कर्त्तरि ताच्छील्ये। तस्य।

5. *Remark*—The king believed that the inmates of his royal apartments could not be beaten in point of beauty anywhere on the earth. But the belief is shattered on seeing these girls. In wonder he exclaims that this defeat of the beauties of the harem by dwellers of a hermitage, is as surprising as that creepers that grow wild in the forest should surpass in beauty those that are reared in his gardens with constant care. The यदि in the text implies comparison. *If* this, *then* that, *i. e.*, both are *equally* (सदृश) surprising. Hence the अलङ्कार is निदर्शन which Dandin thus defines "अर्थान्तरप्रवृत्तेन किञ्चित्तत्सदृशं फलम्। सदसद्वा निदर्श्येत यदि तत् स्यान्निदर्शनम्॥" Here the king is तापसकन्यकाकर्त्तृकमन्तःपुरनारीपराभवं वर्णयितुं प्रवृत्तः। The तत्सदृशं फलम् is वनलताकर्त्तृक उद्यानलतापराभवः। Dandin's definition of प्रतिवस्तूपमा does not apply here. He says—"वस्तु किञ्चिदुपन्यस्य न्यसनात् तत्सधर्मणः। साम्यप्रतीतिरस्तीति प्रतिवस्तूपमा—॥" Here न्यस्य न्यसनम् clearly implies *two distinct statements* (वाक्यद्वयम्)। On this point he has the support of *all* later Rhetoricians. Thus Mammata defines "—प्रतिवस्तूपमा तु सा। सामान्यस्य द्विरेकस्य यत्र वाक्यद्वये स्थितिः॥" In the sloka above we have a *single* statement, not two distinct statements. The metre is आर्य्या।

(ततः प्रविशति यथोक्तव्यापारा सह सखीभ्यां शकुन्तला)।

शकुन्तला—इदो इदो सहीओ [इत इतः सख्यौ]।

SAKUNTALA—This way, my friends, this way.

(*Then enter, engaged as described, Sakuntala with her two friends*).

अनसूया—हला सउन्दले, तुवत्तो वि तादकस्सवस्स इमे अस्समरुक्खआ पिअदरेत्ति तक्केमि। येन णोमालिआकुसुमपेलवा वि तुमं एदाणं आलवालपूरणे णिउत्ता [हला शकुन्तले त्वत्तोऽपि तातकाश्यपस्य इमे आश्रमवृक्षकाः प्रियतरा इति तर्कयामि। येन नवमालिकाकुसुमपेलवापि त्वम् एतेषाम् आलवालपूरणे नियुक्ता]।

ANASUYA—My Sakuntala, I believe these plants in the hermitage are dearer than thee to father Kasyapa ; for which reason, though tender as the Navamalika flower, thou hast been employed to fill their trenches.

शकुन्तला—ण केवलं तादणिओओ एव्व, अत्थि मे सोदरसिणेहोवि एदेसु [न केवलं तातनियोग एव, अस्ति मे सोदरस्नेहोपि एतेषु]। (वृक्षसेचनं रूपयति)।

SAKUNTALA—In the matter of these, there is my fraternal affection too, certainly not father's command alone. (*Acts watering the trees*).

तत इति। 'ततः' अनन्तरं राजनि अन्तरिते। उक्तस्य अनतिक्रमः यथोक्तम्। तद्वान् 'यथोक्तः' कथितानुरूपः 'व्यापारः' चेष्टा यस्याः, सेचनोद्यता इत्यर्थः 'शकुन्तला सखीभ्यां सह प्रविशति' रङ्गमञ्चमागच्छति।

अनसूयेति। 'हला' इति सखीनां सादरसम्भाषणम्। 'हला' अयि 'शकुन्तले तातस्य काश्यपस्य' कश्यपसगोत्रस्य कण्वस्य 'इमे आश्रमवृक्षकाः' तपोवनतरवः

'त्वत्तोऽपि प्रियतराः' वल्लभतराः 'इति तर्कयामि' ऊहे। 'येन' हेतुना, प्रियतरत्वेन इत्यर्थः—यद्वा 'येन' काश्यपेन 'नवमालिकाकुसुममिव पेलवा' कोमला 'अपि'। सर्वथा एतदनर्हा इत्यर्थः। 'त्वम् एतेषां' वृक्षकाणाम् 'आलवालस्य' जलाधारस्य 'पूरणे नियुक्ता' व्यापारिता।

शकुन्तलेति। 'न केवलं तातस्य नियोगः' आदेश 'एव' मे जलसेचने कारणं, किन्तु 'एतेषु' वृक्षकेषु 'मे सोदरेषु' सहोदरेषु भ्रातृषु यः 'स्नेहः' ममता सः 'अस्ति'। यथा ताताज्ञया, स्नेहाच्च तथैव सिञ्चामि।

NOTES

1. (a). यावत्—Implies अवधारण। "यावत्तावच्च साकल्येऽवधौ मानेऽवधारणे"। (b). यथोक्त &c.—उक्तस्य अनतिक्रमः यथोक्तम् accordance with what is said. अव्ययीभावः। यथोक्त + अच् मत्वर्थे = यथोक्तः as said. Now see Tika.

2. हला &c.—(a). त्वत्तः—"पञ्चमी विभक्ते" इति पञ्चमी। ततस्तसिः। (b). तातश्चासौ काश्यपश्च। तस्य॥ (c). क्षमा वृक्षा वृक्षकाः। अल्पार्थे कन्। आश्रमस्य वृक्षकाः॥ (d). येन = For which reasan, *i. e.*, because he loves the shrubs more. An अव्यय। Or येन = by whom. तच्छब्द is not necessary. उत्तरवाक्यगतत्वेन उपादानात् तच्छब्दस्यपेक्षा नास्ति। (e). नवमालिका is a night-blooming sweet-scented flower. नवमालिका च कुसुमञ्च नवमालिकाकुसुमम्। "विशेषणं विशेष्येण" इति समासः। तदिव पेलवा। उपमानसमासः। (f). आलवाल &c.—आ समन्तात् लवं जललवम् आलाति गृह्णाति इति आ + लव + आ + ला + क कर्त्तरि = आलवालम् trenches dug round the root of trees for watering purposes.

3. (a). न केवलम् &c.—नि + युज् + घञ् भावे = नियोगः order. This is a reply to Anasuya whose speech insinuates that Sakuntala does not like the watering herself—is an unwilling worker at it—but waters them because her father orders it. The reply is—Even if father had not ordered me I would have done it because अस्ति मे सोदरस्नेहः। (b). सोदर &c.—सह also means सदृश। Hence सदृशमुदरमेषाम् इति सोदराः or सहोदराः brothers. बहु—of the नित्यसमास class. सह becomes स optionally by the rule "वोपसर्जनस्य"।

राजा—कथमियं सा कण्वदुहिता। असाधुदर्शी खलु तत्रभवान् काश्यपः य इमामाश्रमधर्मे नियुङ्क्ते।

इदं किलाव्याजमनोहरं वपुस्तपःक्षमं साधयितुं य इच्छति।
ध्रुवं स नीलोत्पलपत्रधारया शमीलतां छेत्तुमृषिर्व्यवस्यति॥

भवतु, पादपान्तरित एव एनां विस्रब्धां पश्यामि। (तथा करोति)।

KING—How now! Is this the daughter of Kanva? Truly, his holiness Kasyapa is not a good judge—Kasyapa who commands this one to the course of life in a hermitage. The sage who hopes to render this artlessly charming figure capable of penance, certainly tries to cut a Sami twig with the edge of a leaf of the blue lotus. Well, concealed as I am by trees, I will watch her at her ease. (*Does the same*).

राजेति। 'कथम्' आश्चर्ये। आश्चर्यात् सम्भ्रमः ["कथं प्रश्ने सम्भ्रमे च" इति विश्वः]। 'इयं सा' वैखानसोक्ता 'कण्वस्य' कुलपतेः 'दुहिता' कन्या। राज्ञा तु प्रथमम् इयम् अन्यबुद्ध्या नीता। पश्चात् सख्या 'हला सउन्दले' इति संबोधनात् ज्ञातम् इयमेव कण्वदुहिता इति। 'असाधु' असमीचीनं 'पश्यति खलु' पश्यत्येव 'तत्रभवान्' पूज्यः 'काश्यपः यः' [उत्तरवाक्यत्वेन न तच्छब्दोपादानम्] 'इमाम् आश्रमस्य' तपोवनस्य 'धर्मे' अनुष्ठाने 'नियुङ्क्ते' व्यापारयति॥

इदमिति। अन्वयः—यः ऋषिः अव्याजमनोहरम् इदं वपुः तपःक्षमं साधयितुम् इच्छति, स ध्रुवं नीलोत्पलपत्रधारया शमीलतां छेत्तुं व्यवस्यति किल। व्याख्या—यः 'ऋषिः' कण्वः 'अव्याजं' कृत्रिमशोभारहितञ्च 'मनोहरं' मधुरञ्च, स्वभावसुन्दरमित्यर्थः 'इदम्' अनुपमं 'वपुः' शकुन्तलायाः शरीरं 'तपःक्षमं' तपसो योग्यं 'साधयितुं' कर्त्तुम् 'इच्छति' वाञ्छति, 'स' ऋषिः 'ध्रुवं' निश्चितं 'नीलोत्पलपत्रस्य' इन्दीवरदलस्य 'धारया' पार्श्वेन 'शमीलतां' कठिनां शमीशाखां 'छेत्तुं' 'व्यवस्यति' यतते 'किल' मन्ये अहम् इत्यर्थः ["वार्त्तायामरुचौ किल" इति विकाण्डशेषः]॥ कोम-

-नया उत्पलपत्रधारया शमीशाखाच्छेदनं यथा असम्भवं सुकुमारेण शकुन्तलाया: शरीरेण तपश्चरणमपि तथैव इति भाव: ॥

भवात्विति । 'भवतु' आस्तां तावदेतत् । 'सम्प्रति पादपै:' वृक्षै: 'अन्तरित:' व्यवहित 'एव' प्रकाशमगत्वा इत्यर्थ: 'एनां' शकुन्तलां 'विश्रब्धां' विश्वस्तां, पुरुषान्तरस्य सान्निध्यम् अज्ञात्वा प्रकृतिस्थाम् इत्यर्थ: 'पश्यामि' विलोकयामि । ('तथा करोति' पादपान्तरित एव विलोकयति इत्यर्थ:) ।

NOTES

1. (a). कथमियम् &c.—Sakuntala has now revealed herself by replying to अनसूया । सा refers to what was said by the वैखानस । प्रक्रान्तार्थत्वात् यच्छब्दोपादान नापेक्षते । . (b). साधु = सम्यक् proper. न साधु असाधु । Qualifies दर्शनक्रिया । असाधु + दृश + णिनि कर्त्तरि ताच्छील्ये । (c). तत्र भवान्—तत्र has here प्रथमार्थे त्रल् । This is allowed in connection with the words भवत्, दीर्घायुष्, आयुष्मत्, देवानांप्रिय by the rule "इतराभ्योऽपि दृश्यन्ते" । (d). इमाम् refers to शकुन्तला । The king here speaks of the impropriety of employing शकुन्तला in this work. The impropriety regarding the other two girls does not strike him. He is *interested*, but the interest has not yet deepened into love.

2. (a). अव्याज &c.—वि + अज + घञ् करणे = व्याज: a counterfeit. कृत्रिमशोभा । अविद्यमानो व्याज: अस्मिन् अव्याजम्, बहु— । तच्च तत् मनोहरञ्च artless yet charming. कर्मधा— । (b). नीलोत्पल &c.—नीलमुत्पलं नीलोत्पलम् a variety of lotus इन्दीवरम् । कर्मधा— । तस्य पत्रम् leaf of the blue-lotus. तस्य धारा the edge of a leaf of the blue-lotus. तया । (c). शमीलताम्—लता is शाखा a twig. शमी is a sacred tree with a tough timber. शम्या लता a twig of the शमी । ताम् । Specially mentions the शमी because that is a tree whose twigs have to be cut every day by ascetics for sacrificial purposes. (d). वि + अव + सो दिवादि + लट् ति = व्यवस्यति । सनो, सास्यति, असात्—असासीत् । कर्मणि—व्यवसीयते ।

3. *Remark*—वंशस्थविल is the metre. The figure is निदर्शना or निदर्शन for which see under शुद्धान्तदुर्लभमिदम् &c. Also we have

विभावना in the first line "प्रसिद्धहेतुव्यावृत्त्या यत्किञ्चित् कारणान्तरम्। यत्र स्वाभाविकत्वं वा विभाव्यं सा विभावना ॥" Here the मनोहरत्व is taken as स्वाभाविक।

4. (a). भवतु—Be it so, let it pass, &c. This is idiomatic. It is used when one subject is dropped and a new subject taken up. (b). पादैन पिवतीति पाद+पा+क कर्त्तरि=पादप: a tree. अन्तर=अन्तर्द्धि: concealment. "अन्तरमवकाशावधिपरिधानान्तर्द्धिभेदतादर्थ्ये" इत्यमर:। अन्तरं जातमस्य इति अन्तर+इतच्=अन्तरित: concealed. (c). एव —Indicates determination not to come out of his concealment. He was concealed already ; c. f. यावदिमां छायामाश्रित्य प्रतिपालयामि (*Ante*). (d). विस्रब्धम्—वि+स्रम्भ (श्रम्भ)+क्त कर्त्तरि=विस्रब्धा at ease विस्रम्भवती। "समौ विश्वासविस्रम्भौ" इति कोष: ॥

शकुन्तला (स्थित्वा)—सहि अनसूए अदिपिणद्धेण वक्कलेण पिअंवदाए णिअन्तिदम्हि। सिढिलेहि दाव णं [सखि अनसूये, अतिपिनद्धेन वल्कलेन प्रियंवदया नियन्त्रितास्मि। शिथिलय तावदेतत्]।

SAKUNTALA (*Having stopped*)—Friend Anasuya, I am pinioned by Priyamvada with a bark fastened too tight. Do loosen it.

अनसूया—तह [तथा]। (शिथिलयति)।

ANASUYA—All right. (*Loosens*).

प्रिअंवदा (सहासम्)—एत्थ पओहरवित्थारइत्तअं अत्तणो जोव्वणं उवालह [अत्र पयोधरविस्तारयितृ आत्मनो यौवनम् उपालभस्व]।

PRIYAMVADA (*With a laugh*)—In this matter, blame your youth that causes the expansion of the breasts.

शकुन्तलेति। ('स्थित्वा' सेचनात् विरम्य)। पिनद्धं बद्धम्। 'अतिपिनद्धेन' अतिमात्रं बद्धेन दृढ़बद्धेन इत्यर्थ: [अपि पूर्वात् नह बन्धने इत्यस्मात् क्त:।

अपेरल्लोपः पाक्षिकः] 'वल्कलेन' त्वचा वासोभूतया 'नितरां यन्त्रिता' निरुद्धव्यापारा 'अस्मि'। 'एतत्' वल्कलं 'तावत् शिथिलय' शिथिलं कुरु। ('शिथिलयति' शिथिलं करोति)।

प्रियंवदेति। (हासेन सह 'सहासं', विहस्य इत्यर्थः, आह) 'अत्र' अस्मिन् नियन्त्रणे 'आत्मनः' तव 'पयोधरयोः' स्तनयोः 'विस्तारयितृ' वर्द्धकं 'यौवनं' वाल्यात् परं वयः 'उपालभस्व' निन्द। यौवनेन वर्द्धितं स्तनयुगं नाधुना स्वल्पायतने वल्कले माति, अत्र को मे दोषः इति परिहासः।

NOTES

1. (a). अतिपिनद्धेन—अपि + नह + क्त कर्मणि = अपिनद्धम् or पिनद्धम् the अ of अपि being dropped optionally. "वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोः। आपञ्चैव हलन्तानां यथा वाचा निशा दिशा॥" इति वचनात्। (b). शिथिलय—शिथिलं श्लथं कुरु इति शिथिल + णिच् + लोट् हि = शिथिल (नाम धातु) + हि = शिथिलय slacken. (c). तावत् indicates अवधारण।

2. (a). अत्र—In this matter, *i. e.*, in the restraint. (b). विस्तारयतीति वि + स्तृ + णिच् + तृच कर्त्तरि क्लीवे = विस्तारयितृ that which has caused to develop. धरतीति धृ + अच् कर्त्तरि = धरः the holder. पयसो दुग्धस्य धरः पयोधरः the breasts. तस्य विस्तारयितृ। शेषषष्ठ्या समासः। (c). उपालभस्व—उप + आ + लभ + लोट् स्व do censure. उपालम् means to censure.

3. *Remark*—The old garments have just become too tight. This indicates fresh youth.

राजा—काममननुरूपमस्या वपुषो वल्कलम्। न पुनरलङ्कारश्रियं न पुष्यति। कुतः—

सरसिजमनुविद्धं शैवलेनापि रम्यं
मलिनमपि हिमांशोर्लक्ष्म लक्ष्मीं तनोति।
इयमधिकमनोज्ञा वल्कलेनापि तन्वी
किमिव हि मधुराणां मण्डनं नाकृतीनाम्॥

KING—True, the bark is unsuitable for her figure. But it is not that it does not cherish the charm of a decoration. (You ask) why ?—The lotus is lovely even though smeared with the scum (*saivala*). The spot, though dark, promotes the beauty of the moon. This slim one is more attractive even with a bark. What indeed is not a decoration for a charming figure ?

राजेति । 'वल्कलम्' एतत् वासोभूतम् 'अस्याः' शकुन्तलाया 'वपुषः' लावण्यमयस्य शरीरस्य 'अननुरूपम्' अयोग्य' 'कामम्' मया अनुमन्तव्यम् ["कामं प्रकामेऽनुमतौ" इति विश्वः] । 'पुनः' किन्तु 'अलङ्कारश्रियं' वपुषो भूषणशोभां 'न पुष्यति' न तनोति इति 'न'। अयोग्यमपि वल्कलमिदमस्या वपुर्भूषयत्येव ॥ ["वपुषो वल्कलम्" (त-, न्या-, म-)—'वयसो वल्कलम्' (रा-, वि-)] ॥

सरसिजेति । अन्वयः—शैवलेनापि अनुविद्धं सरसिजं रम्यम् ; लक्ष्म मलिनमपि हिमांशोर्लक्ष्मीं तनोति ; वल्कलेनापि तन्वी इयम् अधिकमनोज्ञा । मधुराणामाकृतीनां किमिव हि न मण्डनम् । व्याख्या—'शैवलेनापि' तुच्छया जलनील्या अपि [गर्ह्यायाम् अपि] 'अनुविद्धं' संवद्धं 'सरसिजं' कमलं 'रम्यं' मधुरम् । 'लक्ष्म' चिह्नं कलङ्कः ["चिह्नं लक्ष्म च" इत्यमरः] 'मलिनमपि' कृष्णवर्णम्, अतः कुत्सितमपि, 'हिमाः' शिशिराः 'अंशवः' किरणा यस्य तस्य, शीतरश्मेश्चन्द्रस्य 'लक्ष्मीं' शोभां 'तनोति' विस्तारयति । 'वल्कलेनापि' हेयेन वल्कलवाससा अपि 'तन्वी' कृशाङ्गी 'इयं' शकुन्तला 'अधिकं' यथा तथा 'मनोज्ञा' हृद्या, मनोहरतरा । एतत् वितयमालोच्य मन्ये 'मधुराणां' मनोज्ञानाम् 'आकृतीनां' वपुषां 'किमिव हि' तुच्छमपि 'वस्तु न मण्डनं' न भूषणम् । अपि तु सर्वमेव कान्तमूर्त्तेर्भूषणं भवति ॥

NOTES

1. (a). कामम्—Implies अनुमति admission. (b). अनुगतं रूपमस्य इति अनुरूपं योग्यम् । प्रादितत्— । न अनुरूपम् unsuitable. नञ्तत्— । (c). पुनर्—Implies भेद difference. "पुनरप्रथमे भेदे" इति कोषः । (d). अलङ्कारश्रियम्—अलङ्क्रियते भूष्यते अनेन इति अलम्+कृ+घञ् करणे = अलङ्कारः decoration. तस्य श्रीः or तत्कृता श्रीः the charm caused by deco-

ration. इतत्—or आकपार्थिवादि। ताम्। (e). न...न—The double negation emphasises the affirmation.

2. *Remark*—A bark garment for this charming figure is an obvious incongruity. This is the *admission* implied by कामम्। But पुनर् *modifies* the admission. Though *obviously* incongruous, you cannot say that the bark does not enhance her beauty. I prefer the reading वपुषः, because the poet closes the sloka following with "किमिव हि मधुराणां मण्डनं नाकृतीनाम्।" The inference there being about आकृति, it seems more relevant here to speak of वपुस् than of वयस which is not आकृति।

3. (a). सरसिजम्—सरसि जातम् इति सरसि + जन + ड कर्त्तरि = सरसिज or सरोज by the rule "तत्पुरुषे कृति बहुलम्।" The बहुल implies *variety, i. e.*, whether लुक् or अलुक् or both, has to be known from शिष्टप्रयोग। Thus both सरसिज and सरोज occur in authoritative writings; but write सरोरुह *not* सरसिरुह, पङ्केरुह *not* पङ्करुह। (b). अधिकमनोज्ञा—मनसा जानाति इति मनस् + ज्ञा + क कर्त्तरि = मनोज्ञा Lit. that which takes one by the mind, *i. e.*, captivates the mind. Hence —charming. अधिकं यथा तथा मनोज्ञा excessively charming. सुप्सुपेति समासः। (c). वल्कलेन—तृतीया करणे। It is करण of the क्रिया in मनोज्ञा। (d). किमिव—the इव here is merely ornamental—वाक्यालङ्कारे। "इवेति ईषदर्थोपमोत्प्रेक्षावाक्यालङ्कारेषु" इति वर्द्धमानः। (e). हि—is *emphatic*. Thus किं न मण्डनम् means "what is not a decoration" which is a mere question, or by काकु may imply that *everything* is a decoration. The हि emphasises the काकु—"what *indeed* is not a decoration."

4. *Remark*—Note the course of the king's love. His interest in Sakuntala has now developed into *admiration*. The metre is मालिनी and the figure अर्थान्तरन्यास (see under आ परितोषाद्विदुषाम् &c. *Ante*). Here the particular instances are first cited, the general conclusion then follows. This is perfectly legitimate. When दण्डिन् says वस्तु प्रस्तुत्य तत्साधनसमर्थस्य न्यासः he does not mean that in *actual writing* the conclusion has to be stated first. In *thought* however, the conclusion is first before

the mind's eye and facts are then brought together in support.

शकुन्तला (अग्रतोऽवलोक्य)—एसो वादेरिदपल्लवङ्गुलीहिं तुवरेदि विअ मं केसररुक्खओ। जाव णं सम्भावेमि [एष वातेरितपल्लवाङ्गुलीभिस्त्वरयति इव मां केशरवृक्षकः। यावत् एनं सम्भावयामि]। (परिक्रामति)।

SAKUNTALA *(Looking in front)*—This Kesara tree hurries me as it were with its fingers of twigs urged by the wind. I will attend to it. (*Walks round*).

प्रियंवदा—हला सउन्दले, एत्थ एव्व दाव मुहुत्तअं चिट्ठ। जाव तुए उवगदाए लदासणाहो विअ अअं केसररुक्खओ पडिभादि [हला शकुन्तले अत्र एव तावत् मुहूर्त्तकं तिष्ठ। यावत् त्वया उपगतया लतासनाथ इव अयं केशरवृक्षकः प्रतिभाति]।

PRIYAMVADA—My Sakuntala, do thou stay at this very place for a moment. For, with you near, this Kesara-tree appears as if blessed with a creeper.

शकुन्तला—अदो क्खु पिअंवदासि तुमं [अतः खलु प्रियंवदासि त्वम्]।

SAKUNTALA—Hence indeed you are called Priyamvada.

शकुन्तलेति। ('अग्रतः' पुरः 'अवलोक्य' आह) 'एष' अग्रतो दृश्यमानः 'केशरवृक्षकः' वकुलपादपः 'वातेन': वायुना 'ईरिताः' चालिता याः 'पल्लवरूपा अङ्गुल्यः' ताभिः 'मां त्वरयति' सत्वरगमनार्थम् आह्वयति 'इव'। एहि शकुन्तले झटिति मां सेचनेन संवर्द्धय इति सङ्केतयति इव। 'यावत् एनं' वकुलकं 'सम्भावयामि' गत्वा जलसेचनेन संवर्द्धयामि। ['परिक्रामति' रङ्गमञ्चं परितो भ्रमति]।

प्रियंवदेति। 'हला' अयि 'शकुन्तले अत्र' केशरतरुतले 'एव तावत् मुहूर्त्तकं' क्षणमात्रं 'तिष्ठ'। 'यावत्' प्रशंसायाम् ["यावत् कार्त्स्न्येऽवधारणे। प्रशंसायाम्" इति मेदिनी] 'उपगतया' समीपवर्त्तिन्या 'त्वया' [इत्थं तृतीया] 'अयं केशरवृक्षकः' वकुलपादपः 'लतया सनाथः' नाथवान् 'इव' अलङ्कृत इव इत्यर्थः 'प्रतिभाति' लक्ष्यते। त्वमत्र वकुलमूले स्थिता, मन्ये लतया एव कयाचित् अयमनुगृहीतो वकुलः, इति शकुन्तलायाः रूपप्रशंसा।

शकुन्तलेति। मधुरमुच्यते त्वया 'अतः खलु' इदृशेनैव प्रियभाषणेन 'त्वं प्रियंवदा असि' प्रियंवदा इति नाम्ना आहूयसे। या प्रियं वदति सैव प्रियंवदा। प्रियभाषणेन पुनर्यथार्थं ते नाम।

NOTES

1. (a). वातेरित &c.—ईर + क्त कर्मणि = ईरिताः urged. पल्लवरूपा अङ्गुल्यः पल्लवाङ्गुल्यः। वातेन ईरिता वातेरिताः urged by the wind. तादृश्यः पल्लवाङ्गुल्यः। ताभिः। (b). केशरवृक्षकः—स्वार्थे वृक्षः वृक्षकः young tree. केशर is a name of वकुल। स चासौ वृक्षकश्च। (c). यावत् indicates अवधारण।

2. *Remark*—Here we have रूपक in पल्लवाङ्गुली। The definition is "उपमैव तिरोभूतभेदा रूपकमुच्यते"। Through the रूपक, we see अङ्गुलिसञ्चलन in the केशरवृक्ष। This is likened, not openly but by implication (समासरूप), to a lover's accosting (नायकसङ्केत)। Hence the रूपक raises a समासोक्ति which is "वस्तु किञ्चिदभिप्रेत्य तत्तुल्यस्यान्यवस्तुनः। उक्तिः संक्षेपरूपत्वात् सा समासोक्तिरिष्यते॥" as defined by दण्डिन्। Lastly Sakuntala goes to the केशरवृक्षक *as if*—though not really—through this accosting. This is उत्प्रेक्षा (see under कृष्णसारे ददच्चक्षुः &c.)। रूपकानुप्राणितसमासोक्त्युत्प्रेक्षयोः सङ्करः।

3. खलु implies अवधारण; for this *very* reason. प्रियभाषण is the cause of your being called प्रियंवदा। The reference is to the derivation of the word. Thus प्रियं वदतीति प्रिय + वद + खच कर्त्तरि स्त्रियाम् = प्रियंवदा by the rule "प्रियवशे वदः खच्"।

राजा—प्रियमपि तथ्यमाह शकुन्तलां प्रियंवदा। अस्याः खलु—

अधरः किसलयरागः कोमलविटपानुकारिणौ बाहू।
कुसुममिव लोभनीयं यौवनमङ्गेषु सन्नद्धम्॥

KING—Priyamvada speaks to Sakuntala the truth though agreeable. Indeed—Her lower lip has the lustre of a new leaf, the arms imitate tender twigs, in the limbs is arrayed attractive youth like (a crop of) flowers.

अनसूया—हला सउन्दले, इअं सअंवरवहू सहआरस्स तुए किदणामहेआ वणजोसिणि त्ति णोमालिआ। णं विसुमरिदा सि [हला शकुन्तले, इयं स्वयंवरवधूः सहकारस्य त्वया कृतनामधेया वनज्योत्स्नेति नवमालिका। एनां विस्मृतासि]।

ANASUYA—My Sakuntala, here is the self-elected bride of the Sahakara, the Navamalika named by thee Vanajyotsna. Hast thou forgotten it ?

राजेति। लोके हि यत् प्रियमुच्यते तत् मिथ्या भवति। किन्तु यदेतत् 'प्रियंवदा शकुन्तलाम् आह' कथयति ["ब्रुवः पञ्चानामादित आह च ब्रुवः" इति वर्त्तमाने णल् आहादेशश्च] तत् 'प्रियमपि' मधुरमपि 'तथ्यं' सत्यं न मिथ्या। नूनमियं शकुन्तला बकुलमूले लता इव लक्ष्यते। नायं प्रियंवदायाश्चाटुवादः।

अधर इति। अन्वयः—अस्याः खलु अधरः किसलयरागः, बाहू कोमलविटपानुकारिणौ, अङ्गेषु कुसुममिव लोभनीयं यौवनं सन्नद्धम्। व्याख्या—'अस्याः खलु' शकुन्तलायाः किल 'अधरः' निम्नोष्ठः 'किसलयस्य' नवपल्लवस्य 'रागः' रक्तिमा इव 'रागो' यस्य तथाविधः पल्लवाताम्र इत्यर्थः। 'बाहू कोमलयोः' नम्रयोः नवजातयोः 'विटपयोः' शाखयोः 'अनुकारिणौ' सदृशौ। 'अङ्गेषु' स्तनजघनादिषु 'कुसुममिव' पुष्पमिव 'लोभनीयं' मनोहरं 'यौवनं' तरुणिमा 'सन्नद्धं' सज्जितं

विजृम्भितम्। शकुन्तलाया अधरः नवपल्लवसदृशः, बाहू च अचिरप्ररूढौ विटपौ इव, यौवनं तु कुसुममिव। एभिः पुनरियमपि लतासदृशी इति सत्यम्।

अनसूयेति। 'इयम्' एषा पुरोवर्त्तिनी 'सहकारस्य' रसालस्य 'स्वयंवरप्राप्ता वधूः' [शाकपार्थिवादिः] या हि स्वयमेव प्रसृत्य सहकारं श्रितवती सा इत्यर्थः 'त्वया कृतं' विहितं 'वनज्योत्स्ना इति नामधेयं' नाम [स्वार्थे धेयप्रत्ययः] यस्याः सा 'नवमालिका' कुसुमलता। 'एतां नवमालिकां विस्मृता असि' [गौणवृत्त्या गत्यर्थत्वात् कर्त्तरि क्तः] मन्ये विस्मृतिवशात् एषा त्वया न सिक्ता।

NOTES

1. प्रियमपि &c.—Sakuntala takes Priyamvada's remark as merely complimentary. But the king thinks the remark is a *true* one.

2. (a) किसलय &c.—किसलयरागः the lustre of a new leaf. ६तत्—। स इव रागो यस्य whose lustre is like that of a new leaf. बहु—by the Varttika "सप्तम्युपमानपूर्वस्योत्तरपदलोपश्च वक्तव्यः" ॥ (b). कोमल etc.—साधु अनुकृतः इति अनु + कृ + णिनि साधुकारिणि कर्त्तरि = अनुकारिणौ। कोमलौ विटपौ two tender twigs. कर्मधा—। तयोः अनुकारिणौ imitators of two tender twigs, *i. e.*, *like* two twigs. "तस्य अनुकरोति" is a सादृश्यवाचक phrase. "तस्य चानुकरोतीति शब्दाः सादृश्यसूचकाः" इति दण्डी ॥

3. लोभनीयम्—लुभ विमोहने + अनीयर कर्त्तरि बाहुलकात् attractive.

4. *Remark*—लोभनीय is suggestive. It betrays the king's wish to possess her. But just now the wish is not perceptible even to the king himself. Hence he says in a general manner लोभनीयं यौवनम्, *not* लोभयति मां यौवनम् with a personal reference.

5. स्वयंवर—स्वयम् आत्मना व्रियते अस्मिन् इति स्वयम् + वृ + घ अधिकरणे संज्ञायाम् = स्वयंवरः by the rule "पुंसि संज्ञायां घः प्रायेण"। तत्र वधूः। Or after भागुरि, स्वयं वृणीते इति स्वयम् + वृ + खच् कर्त्तरि स्त्रियाम् = स्वयंवरा one who chooses a husband herself. सा च सा वधूश्च। कर्मधा—।

6. (a) वनज्योत्स्ना—ज्योतिरस्त्यस्याम् इति ज्योतिस् + न मत्वर्थे = ज्योत्स्ना निपातनात् by the rule "ज्योत्स्ना तमिस्रा—"। वनस्य ज्योत्स्नेव उल्लास-

कत्वात्। (b) एनाम्—There is no शेषविवक्षा here. Hence the rule "अधीगर्थदयेशां कर्मणि" does not apply. We get द्वितीया because of कर्मविवक्षा। (c). विस्मृता—वि + स्मृ + क्त कर्त्तरि। स्मरति = मनसा गच्छति। Hence secondarily स्मृ is गत्यर्थ। So it takes कर्त्तरि क्त by the rule "गत्यर्थाकर्मक—"।

शकुन्तला—तदा अत्ताणं वि विसुमरिस्सं [तदा आत्मानमपि विस्मरिष्यामि]। (लतामुपेत्य अवलोक्य च) हला रमणीए क्खु काले इमस्स लदापाअवमिहुणस्स वइअरो संवुत्तो। णवकुसुमजोव्वणा वणजोसिणी, बद्धपल्लवदाए उवहोअक्खमो सहआरो [हला रमणीये खलु काले अस्य लतापादपमिथुनस्य व्यतिकरः संवृत्तः। नवकुसुमयौवना वनज्योत्स्ना, बद्धपल्लवतया उपभोगक्षमः सहकारः]॥ (पश्यन्ती तिष्ठति)।

SAKUNTALA—Then I shall forget even my own self. (*Approaching the creeper and looking at it*). Darling, at a most opportune moment indeed has taken place the union of this couple of a creeper and tree. The Vanajyotsna has youth in her fresh flowers, and the Sahakara is capable of enjoying because of its growth of twigs. (*Stands gazing*).

शकुन्तलेति। यदि वनज्योत्स्नां विस्मरामि 'तदा आत्मानमपि विस्मरिष्यामि'। अभिन्ना इयं मत्तः, या हि वनज्योत्स्ना सैव अहम् इत्यर्थः। ('लतां' वनज्योत्स्नाम् 'उपेत्य' प्राप्य, लतासमीपं गत्वा, 'अवलोक्य' दृष्ट्वा 'च' आह) 'हला' अनसूये 'रमणीये' मनोहरे 'खलु काले' समये 'लतायाः' वनज्योत्स्नायाः, 'पादपस्य' सहकारस्य च यत् 'मिथुनं' द्वयं, तस्य 'अस्य व्यतिकरः' समागमः 'संवृत्तः' जातः। रमणीयतां दर्शयति—'वनज्योत्स्ना' तदाख्या इयं नवमालिका 'नवम्' अचिरोद्गतम्, नूतनत्वात् मनोरमं 'कुसुमसरूपं यौवनं' यस्याः तादृशी 'सहकारः' आम्रः 'बद्धाः'

-सन्नद्धाः 'पल्लवाः' यस्य तत्तया, नवपल्लवोद्गमात्, 'उपभोगस्य' छायासेवनादिसुखस्य 'क्षमः' योग्यः। प्रवृत्तस्तीक्ष्णातपो ग्रीष्मकालः, पल्लवैः प्रच्छायशीतलश्च सहकारतरुः, तथापि नवमालिकाकुसुमसौरभम्। इत्यहो लोकसुभगोऽयमनयोः समागमः। ('पश्यन्ती' लतापादपौ अवलोकयन्ती मनसा च समागममाधुर्यं स्तुवती 'तिष्ठति' आस्ते)।

NOTES

2. (a). रमणीये &c.—रमयति इति रम+णिच्+अनीयर् कर्त्तरि बाहुलकात् = रमणीयः charming. तस्मिन्। (b). लतापादप &c.—लता च पादपश्च लतापादपौ creeper and tree. तयोर्मिथुनं द्वन्द्वम् pair of a creeper and tree. तस्य। (c). व्यतिकरः—वि+अति+कृ+घ अधिकरणे संज्ञायाम्। Union. (d). नवकुसुम &c.—नवं कुसुमं नवकुसुमम्। तत् यौवनं यस्याः। (e). बद्धपल्लव &c.—बद्धाः पल्लवा यस्य स बद्धपल्लवः having an array of twigs. तस्य भावः बद्धपल्लवता। तया। (f). उपभोग &c.—उप—भुज+घञ् भावे उपभोगः enjoyment तस्य क्षमः। ६तत्—।

प्रियंवदा—अणसूए, जाणासि किं सउन्दला वनजोसिणिं अदिमेत्तं पेक्खदित्ति [अनसूये जानासि किं शकुन्तला वनज्योत्स्नाम् अतिमात्रं प्रेक्षते इति]।

PRIYAMVADA—Do you know Anasuya why Sakuntala is earnestly looking at Vanajyotsna ?

अनसूया—ण क्खु विभावेमि। कहेहि [न खलु विभावयामि। कथय]।

ANASUYA—I cannot indeed guess. Do tell me.

प्रियंवदा—जह वणजोसिणी अणुरूवेण पाअवेण संगदा अवि णाम एव्वं अहं वि अत्तणो अणुरूवं वरं लहेअं त्ति [यथा वनज्योत्स्ना अनुरूपेण पादपेन सङ्गता, अपि नाम एवमहमपि आत्मनः अनुरूपं वरं लभेय इति]।

PRIYAMVADA—"As Vanajyotsna is united with a suitable

tree, so may not I too get a bridegroom suiting myself"—This (is her thought).

शकुन्तला—एसो णूणं तुह अत्तगदो मणोरहो [एष नूनं तव आत्मगतो मनोरथः]। (कलसमावर्जयति)।

SAKUNTALA—Surely this is the desire within yourself. (*Inverts the pitcher*).

प्रियंवदेति। 'अनसूये शकुन्तला किं' किंनिमित्त' 'वनज्योत्स्नाम् अतिगता मात्रा' यस्मिन् तत् यथा तथा, सातिशयमित्यर्थः, 'प्रेचते' पश्यति, पश्यन्ती आस्ते 'इति' एतत् 'जानासि'? इति काकुः।

अनसूयेति। 'न खलु' न नूनं 'विभावयामि' अनुमातुं शक्नोमि। यदि त्वं जानासि 'कथय' मे।

प्रियंवदेति। 'यथा' यद्वत् 'वनज्योत्स्ना अनुरूपेण' आत्मसदृशेन 'पादपेन' वृक्षेण सहकारेण 'सङ्गता' मिलिता 'अपि नाम' किमिदं सम्भावितं यत् 'अहमपि एवम् आत्मनः अनुरूपं' सदृशं 'वरं' भर्तारं 'लभेयं' लब्धुं शक्नुयाम् 'इति' एतत् मनसिकृत्य इयं वनज्योत्स्ना चूतसङ्गतां प्रेक्षमाणा तिष्ठति।

शकुन्तलेति। 'नूनं' निश्चितम् 'एष' त्वया उक्तः 'तव आत्मगतः' मनसिस्थितः 'मनोरथः' अभिलाषः। अयि चतुरिके मामाश्रित्य स्वाभिलाषं प्रकटयसि? ['कलसं' सेचनघटम् 'आवर्जयति' किञ्चित् अधोमुखं करोति]।

NOTES

1. जानासि—The कर्म is इति। Do you know *this* (इति)। The इति again refers to the sentence किं शकुन्तला वनज्योत्स्नामतिमात्रं प्रेक्षते।

2. (a). अपि नाम &c.—The अपि is repeated. The first indicates a question. "गर्हासमुच्चयप्रश्नशङ्कासम्भावनास्वपि" इत्यमरः। She is questioning herself. नाम—Implies *possibility* सम्भाव्य। "नाम प्राकाश्य सम्भाव्य क्रोधोपगमकुत्सने" इत्यमरः। Together अपि नाम = Is it possible. The second अपि is समुच्चये। अहमपि = I too. (b). लभेय—लभ् + लिङ् ईय। शकि लिङ्। (c). इति—This, *i. e.*, this is her thought. इति ध्यायति अतः अतिमात्रं प्रेक्षते इत्यर्थः।

3. *Remark*—Priyamvada's reply urges the king on in his course of love. On hearing this, naturally the thought arises in him whether he would be a suitable husband (अनुरूपो वरः) for Sakuntala.

4. आत्मगतः—आत्मानं गतः residing in thyself. स्वत्—। The point of the retort is—Priyamvada herself is anxious to be united to a suitable husband. Priyamvada's speech is *direct*, अहम् referring to शकुन्तला। Sakuntala naughtily misinterprets अहम् = the speaker, *i. e.*, प्रियंवदा।

5. आवर्जयति—आ + वृज + णिच् + लट् ति। Inverts, *i. e.*, empties on some shrub at hand, presumably the नवमालिका। Comp. नवमालिकाकुसुमपेलवा &c. *infra.* आवर्जन is bending. Compare "आवर्जितजटामौलिविलम्बिशशिकोटयः"। "शाखाभिरावर्जितपल्लवाभिः" &c.

राजा—अपि नाम कुलपतेरियमसवर्णक्षेत्रसम्भवा स्यात्? अथवा कृतं सन्देहेन।

असंशयं क्षत्रपरिग्रहक्षमा यदार्यमस्यामभिलाषि मे मनः।
सतां हि सन्देहपदेषु वस्तुषु प्रमाणमन्तःकरणप्रवृत्तयः॥
तथापि तत्त्वत एनामुपलप्स्ये।

KING—Can it be that this maiden is born of some wife of the Kulapati not of the same caste with him? Or, away with doubts! She is undoubtedly fit to be wedded by a Kshatriya, because my honourable mind is inclined towards her. For, to the good, in matters of doubt, the inclinations of their mind are the final authority. Still I must know the facts about her.

राजेति। 'अपि नाम' किमिदं सम्भावितं यत् 'इयम्' एषा शकुन्तला 'कुलपतेः' अयुतशिष्यपोषकस्य मुनिकुलेश्वरस्य कण्वस्य 'असवर्णे' ब्राह्मणेतरं यत् 'क्षेत्र' कलत्रम् ["क्षेत्रं कलत्रे केदारे" इति कोषः] 'तत्सम्भवा' तज्जाता 'स्यात्' भवेत्। 'अथवा' पक्षान्तरे 'सन्देहेन' संशयेन 'कृतम्' अलम्। इयं ब्राह्मणपत्नीप्रसूता, तदितरजाता वा, इति आकारकः संशयः।

असंशयमिति। अन्वयः—(इयम्) असंशयं क्षत्रपरिग्रहक्षमा, यत् मे आर्य्यं मनः अस्याम् अभिलाषि। सन्देहपदेषु सताम् अन्तःकरणप्रवृत्तयो हि प्रमाणम्। व्याख्या—'इयं' शकुन्तला 'असंशयं' निश्चितं 'क्षत्रस्य' क्षत्रियजातेः 'परिग्रहः' पत्नीत्वेन स्वीकारः तस्य 'क्षमा' योग्या। कथमेतत् ज्ञायते इत्याह—'यत्' यस्मात् 'मे' मम पुरुवंशप्रभवस्य 'आर्य्यम्' आचारपूतं 'मनः अस्यां' शकुन्तलायाम् 'अभिलाषि' सस्पृहम्। यदि प्रवृत्तिरेव अनुसर्त्तव्या, उत्पथप्रवृत्तिरपि आपतति इत्याह—'सन्देहस्य पदेषु' स्थानेषु ["पदं व्यवसितत्राणस्थानलक्ष्माङ्घ्रिवस्तुषु" इत्यमरः] संशयस्थलेषु 'वस्तुषु' विषयेषु, यानि यानि वस्तूनि संशयस्थलानि तेषु तेषु इत्यर्थः, 'सतां' साधूनां, न तु प्राकृतानामपि, 'अन्तःकरणस्य' मनसः 'प्रवृत्तयः' प्रवर्त्तनानिवर्त्तनालक्षणा व्यापारा 'हि' ता एव 'प्रमाणं' कर्त्तव्याकर्त्तव्यनिर्णायकम्॥ कर्त्तव्याकर्त्तव्येषु साधूनां मन एव प्रमाणम्। पौरवोऽहं साधुरेव। मनश्च मे शकुन्तलां प्रति याति। तन्नूनमियं मे ग्राह्या इति भावः॥

तथापीति। 'तथा' एवं तर्केण निर्णीते 'अपि' अथ 'एनां' शकुन्तलां 'तत्त्वतः' स्वरूपेण 'उपलप्स्ये' ज्ञास्ये। आश्रमवासिभ्यः परिपृच्छादिभिः आमूलं शकुन्तलाया वृत्तान्तम् अवगमिष्यामि।

NOTES

1. (a). अपि नाम &c.—The king is discussing the propriety of his union with Sakuntala, as suggested by Priyamvada's reply (b). कुलपति—This has a technical sense. "मुनीनां दशसाहस्रं योऽन्नदानादिपोषणात्। अध्यापयति विप्रर्षिरसौ कुलपतिः स्मृतः"॥ (c). असवर्ण &c.—सम्भवत्यस्मात् इति सम्+भू+अप् अपादाने=सम्भवः. origin उत्पत्तिस्थानम्। समानो वर्णो यस्य तत् सवर्णम् of the same caste. न सवर्णमसवर्णम्। असवर्णं क्षेत्रम् a wife not of the same caste. कर्मधा—। तत् सम्भवो यस्याः सा। बहु—। (d). स्यात्—शकि लिङ्। We do not say सम्भावनायां लिङ् because सम्भावना is already expressed by नाम। (e). कृतम्—It is an अव्यय in the sense अलम्। Hence गम्यमानोपयोगक्रिया प्रति करणत्वात् "सन्देहेन" इति करणे तृतीया।

2. (a). असंशयम्—सम्+शी+अच् भावे=संशयः doubt. अविद्यमानः संशयो यस्मिन् कर्मणि तत् यथा तथा। बहु—। (b) क्षत्रपरि &c.—परि+

ग्रह + अप भावे = परिग्रहः acceptance (as bride). क्षत्रस्य परिग्रहः marriage by a Kshatriya. तस्य क्षमा। Or क्षत्रपरिग्रहं क्षमते इति क्षत्रपरिग्रह + क्षम + ण कर्त्तरि स्त्रियाम् tolerating marriage by a Kshatriya. (c). प्रमाणम्—Always neuter singular. (d). अन्तःकरण &c.—क्रियते अनेन इति कृ + ल्युट् करणे = करणम् sense इन्द्रियम्। अन्तःस्थं करणम् अन्तःकरणम् the inner sense, *i. e.*, the mind. शाकपार्थिवादि।

3. (a). तथापि—Still, *i. e.* though I have no doubts. The enquiry is through curiosity only. He is sure of the result of the enquiry ; it will end by proving that Sakuntala is eligible for marriage by a Kshatriya. (b). तत्त्वतः—तत्त्व is *facts.* Literally I will ascertain her *by* facts, *i. e.*, I will ascertain the facts about her.

शकुन्तला (ससम्भ्रमम्)—अम्मो सलिलसेअसम्भमुग्गदो णोमालिअं उज्झिअ वअणं मे महुअरो अहिवट्टइ [अम्मो, सलिलसेकसम्भ्रमोद्गतः नवमालिकाम् उज्झित्वा वदनं मे मधुकरः अभिवर्त्तते]। (भ्रमरबाधां रूपयति)।

SAKUNTALA—(*In a fright*)—Ah ! Raised by the agitation caused by the sprinkling of water, a bee, having left the Navamalika is coming towards my face ! (*Acts the annoyance caused by a bee*).

राजा (सस्पृहमवलोक्य)—

चलापाङ्गां दृष्टिं स्पृशसि बहुशो वेपथुमतीं,
रहस्याख्यायीव स्वनसि मृदु कर्णान्तिकचरः।
करौ व्याधुन्वत्याः पिबसि रतिसर्वस्वमधरं
वयं तत्त्वान्वेषान्मधुकर हतास्त्वं खलु कृती॥

KING (*Gazing longingly*)—O bee ! We are undone through search after facts, thou art successful indeed !

Thou touchest repeatedly her trembling eyes the corners of which are restless ; hovering near her ears, thou softly hummest like one whispering a secret ; while she is waving her hands, thou sippest her lower lip which is the very essence of desire.

शकुन्तलेति। ('सम्भ्रमेण' सन्त्रासेन 'सह' आह) 'अम्मो' इति आवेगे। 'सलिलस्य' जलस्य 'सेकात्' यः 'सम्भ्रमः' आन्दोलनं तस्मात् 'उद्गतः' उत्पतितः 'मधुकरः' कश्चित् भ्रमरः 'नवमालिकां' वनज्योत्स्नाम् 'उज्झित्वा' परित्यज्य 'मे वदनं' पद्मगन्धि मुखम् 'अभिवर्त्तते' लोभात् अनुधावति। ('भ्रमरात् बाधा' पीड़ां 'निरूपयति' नाट्येन दर्शयति)।

राजेति। (स्पृहा अभिलाषः, तेन सह इति 'सस्पृहं' साभिलाषं 'विलोक्य' भ्रमरवृत्तं दृष्ट्वा आह)।

चलेति। अन्वयः—हे मधुकर वेपथुमतीं चलापाङ्गां दृष्टिं बहुशः स्पृशसि ; रहस्याख्यायीव कर्णान्तिकचरः (सन्) मृदु स्वनसि ; करौ व्याधुन्वत्याः रतिसर्वस्वम् अधरं पिबसि ; वयं तत्त्वान्वेषात् हताः, त्वं खलु कृती। व्याख्या—हे 'मधुकर' भ्रमर, भयात् 'वेपथुमतीं' कम्पमानाम्, अपि च भवदनुसरणात् 'चलः' चञ्चलः 'अपाङ्गः' प्रान्तभागो यस्याः तादृशीं 'दृष्टिं' लोचनं 'बहुशो' वारं वारं 'स्पृशसि'। रहस्यं गोपनीयं किञ्चित् आचष्टे इति 'रहस्याख्यायी' निभृतप्रवक्ता 'इव कर्णयोः अन्तिके' समीपे चरतीति तथाभूतः सन् 'मृदु' नीचैः 'स्वनसि' अस्मद्विधानां सम्बन्धे अव्यक्तं भाषसे। 'करौ' हस्तौ 'व्याधुन्वत्याः' त्वामेव निषेद्धुं विशेषेण समन्तात् चालयन्त्याः अस्याः शकुन्तलायाः 'रतिसर्वस्वं' काममारम् 'अधरं' निम्नोष्ठं 'पिबसि' एनां चुम्बसि इत्यर्थः। 'वयम्' अहम् ["अस्मदो द्वयोश्च इति बहुवचनम्] 'तत्त्वस्य' मदुद्वाहयोग्या न वा इति वस्तुनः 'अन्वेषात्' निर्णयार्थमनुसरणात् 'हताः' भग्नमनोरथाः जाताः 'त्वं खलु' त्वमेव 'कृती' कृतकृत्यः॥ नवमालिकामुज्झित्वा प्रथमं नीलोत्पलभ्रमात् शकुन्तलाया नेत्रं प्रति धावितो भ्रमरः। समीपस्थः पुनः कर्णशिरीषाभ्याम् आकृष्टः तत्र एव चलितः। ततोऽपि च पक्वबिम्बबुद्ध्या अधरमभिगतः। राजा तु अस्यां जातस्पृहः भ्रमरे कामिचरितमारोप्य सासूयमाह इति तात्पर्य्यम्।

NOTES

1. (a). सलिल &c.—सलिलस्य सेकः sprinkling of water. तस्मात् सम्भ्रमः agitation from the sprinkling &c. सहसुपेति समासः। तस्मात् उद्गतः raised by the agitation &c. (b अभिवर्तते—अभि is here usually taken as a कर्मप्रवचनीय to explain the द्वितीया in वदन। वदनम् अभि = वदनं लक्ष्यीकृत्य। Or we may say अभिवृत् is सकर्मक owing to अभि। "उपसर्गवशात् सकर्मकत्वम्"। In that case वदन takes कर्मणि द्वितीया।

2. चल &c.—(a). The king is ardently in love, and envies the bee that is seen playing with her. The metre is शिखरिणी। समासोक्ति is the figure. See under वान्तरित &c. *Ante.* (b). बहुशः—Several times, *repeatedly*. I have not got the chance even *once !* Hence the envy. (c). रहस्याख्यायी—रहसि भवम् इति रहस्+यत्= रहस्यम् a secret. तत् आचष्टे आख्याति वा इति रहस्य+आ+चक्ष or ख्या+ णिनि साधुकारिणि कर्त्तरि। According to भट्टोजि however ख्या is not available here and we have to derive from चक्ष। "अयं सार्वधातुकमात्रविषयः" इति भट्टोजिः। (d). कर्णान्तिक &c.—कर्णयोः अन्तिकम् neighbourhood of the ears. तत्र चरतीति कर्णान्तिक+चर+ट कर्त्तरि॥

3. (a). तत्त्वा &c.—अनु+इष+घञ् भावे=अन्वेषः search. तत्त्वस्य अन्वेषः। तस्मात्। हेतौ पञ्चमी। (b). हताः—Baffled अकृतार्थाः or restrained प्रतिबद्धाः। "मनोहतः प्रतिहतः प्रतिबद्धो हतश्च सः।" (c). कृती—Successful. "इष्टादिभ्यश्च" इति इनि प्रत्ययः is the usual derivation. But opinions differ as to whether कृत is of the इष्टादि class. An alternative may be given. कृ+क्त कर्मणि भावे वा=कृतम् achievement. तदस्य अस्ति इति कृत+इनि मत्वर्थे।

शकुन्तला—ण एसो धिट्ठो विरमदि। अण्णदो गमिस्सं [न एष धृष्टो विरमति। अन्यतो गमिष्यामि]। (पदान्तरे स्थित्वा सदृष्टिक्षेपम्) कहं इदो वि आअच्छदि। हला परित्ताअह मं इमिणा दुव्विणीदेण महुअरेण अहिहूअमाणं

[कथम् इतोऽपि आगच्छति ? हला परित्रायेथां माम् अनेन दुर्विनीतेन मधुकरेण अभिभूयमानाम्] ।

SAKUNTALA—This impudent bee won't stop. I will move elsewhere. (*Stepping aside and looking round*). How now! he is coming this way too. Save me darling, I am being overpowered by this ill-mannered bee.

शकुन्तलेति । 'एष धृष्टः' दुर्विनीतो भ्रमरः 'न विरमति' निवर्त्तते । 'अन्यत्र' अन्यस्मिन् स्थाने 'गमिष्यामि' । (अन्यत् पदं स्थानं 'पदान्तरं' स्थानान्तरम् । तत्र 'स्थित्वा' गमनात् विरता भूत्वा 'दृष्टेः' दर्शनस्य 'क्षेपः' पातः, तेन सह भ्रमराभिमुखं दृष्ट्वा आह) 'कथम्' किमेतत् यत् एषः भ्रमरः 'इतः अपि' अस्मिन्नपि स्थाने 'आगच्छति' । 'हला' अयि सख्यौ 'अनेन दुर्विनीतेन' अशिष्टेन 'मधुकरेण अभिभूयमानां' बाध्यमानां 'मां परित्रायेथां' रक्षतम् ।

NOTES

1. (a). न एष &c.—विरमति takes परस्मैपद by the rule "व्याङ्परिभ्यो रमः" ॥ (b). अन्यत: takes तसि after ङि in the सप्तमी विभक्ति । Compare इतः in "प्रद्युम्नमप्यस्त्वमितो वृथा स्यात्" । (c). कथम् is आश्चर्ये—an अव्यय । Compare "कथमियं सा कण्वदुहिता", "कथं निगड़संयतासि" ॥ (d). हला is सखीषु कोमलामन्त्रणे अव्ययम् । "समानाभिस्तथा सख्यो हला भाष्याः परस्परम् ।" (e). दुर्विनीतेन—दुर्+वि+नी+क्त कर्मणि or दुष्टु विनीतः badly disciplined. सहसुपेति समासः । Or विनीतं विनयः discipline भावे क्तः । दुःस्थितं विनीतं यस्य तेन । बहु— ॥ (f). अभिभूयमानां परित्रायेथाम् = अभिभवात् परित्रायेथाम् ॥

उभे (सस्मितम्)—का वअं परित्तादुं । दुस्सन्दं अक्कन्द । राअरक्खिदव्वाइं तवोवणाइं णाम [का वयं परित्रातुम् । दुष्यन्तमाक्रन्द । राजरक्षितव्यानि तपोवनानि नाम] ।

THE TWO FRIENDS (*Laughing*)—Who are we to save! Call Dushyanta. Forests of penance are known as to be protected by the king.

राजा—अवसरोऽयमात्मानं प्रकाशयितुम्। न भेतव्यम्—(अर्द्धोक्ते स्वगतम्) राजभावस्त्वभिज्ञातो भवेत्। भवतु, एवं तावदभिधास्ये—

KING—This is the opportunity to disclose myself. Don't be alarmed—(*Aside, when only half-uttered*) But the royal character will be disclosed. Well then, I will speak thus—

शकुन्तला (पदान्तरे स्थित्वा सदृष्टिक्षेपम्)—कहं इदो वि मं अणुसरदि [कथमितोऽपि मामनुसरति]।

SAKUNTALA (*Stepping aside and looking round*)—What! following me here too!

उभे इति। 'उभे' द्वे अपि सख्यौ 'स्मितेन' ईषद्धास्येन सह आह। 'परित्रातुं' परित्राणकर्मणि इत्यर्थः 'वयम्' आवां द्वे 'का' इति काकुः ["अस्मदो द्वयोश्च" इति बहुवचनम्]। वयं परित्राणे सर्वथा अनिपुणाः। 'दुष्यन्तं' तदाख्यं राजर्षिम् 'आक्रन्द' आघोषय। 'तपोवनानि' आश्रमपदानि 'राज्ञा रक्षितव्यानि' त्रातव्यानि 'नाम'। परिहासोक्तिरियम्॥ अनेन शकुन्तलायाः सुकुमारता भीरुता च गम्यते॥

राजेति। 'आत्मानं प्रकाशयितुं' गोपनात् प्रकटयितुम् 'अयम्' एषः 'अवसरः' क्षणः। अस्मिन् मुहूर्त्ते पादपव्यवधानात् बहिर्गच्छेयम् इत्यर्थः। 'न भेतव्यं' भयं मा कुरुध्व। (अतः परम् "अयमहमागतः" इत्याकारं किञ्चित् वक्तुमुद्यतः 'अर्द्ध' न भेतव्यम् इत्यंशे 'उक्ते' सति, शेषमनुक्त्वा एव 'स्वगतम्' आत्मगतम् आह) "अयमहम्" इति यदि ब्रूयां तदा 'तु राजभावः' मम राजस्वरूपम् 'अभिज्ञातो' विदितः 'भवेत्'। 'भवतु' यातु 'एवं तावत्' इत्याकारम् एव 'अभिधास्ये' वक्ष्ये।

शकुन्तलेति। 'अनुसरति' अभिवर्त्तते।

NOTES

1. (a). परित्रातुम्—भवामः is understood. Hence भव्यर्थयोगेण तुमुन्। Or तुमुन् is भावे by the maxim "अव्ययकृतो भावे"। Hence परित्रातुम्=परित्राणम्। तस्मिन् विषये का वयम् giving विषये सप्तमी to

परिवातुम्। The सप्तमी is elided (अव्ययत्वात्)। (b). नाम इति प्राकाश्ये अव्ययम्। "नाम प्राकाश्य सम्भाव्य क्रोधोपगमकुत्सने" इत्यमरः॥

2. प्रकाशयितुम्—The construction is प्रकाशयितुम् अवसरः। We have तुमुन् by the rule "कालसमयवेलासु तुमुन्" which includes all कालवाचक words. "पर्य्यायोपादानमर्थोपलक्षणार्थम्। कालार्थेषु उपपदेषु तुमुन् स्यात्"—*Bhattoji.* Up to this time, the girls do not hear what the king says. But न मेतव्यम् is pronounced aloud so as to be heard. Hence some stage direction is necessary before न भेतव्यम्।

3. स्वगतम्—This is supposed not to be within the hearing of the other actors on the stage, at the time, though uttered loud enough for the audience. "अश्राव्यं खलु यद्वस्तु तदिह स्वगतं मतम्।"

राजा (सत्वरमुपसृत्य)—

कः पौरवे वसुमतीं शासति शासितरि दुर्विनीतानाम्।
अयमाचरत्यविनयं मुग्धासु तपस्विकन्यासु॥

(सर्वा राजानं दृष्ट्वा किञ्चिदिव सम्भ्रान्ताः)।

KING (*Hastily advancing*)—Who is this showing insolence towards guileless ascetic maidens whilst a descendant of Puru, a chastiser of the ill-trained, governs the earth ? (*All slightly confused on seeing the king*)

अनसूया—अज्ज ण क्खु किं वि अच्चाहिदं। इअं णो पिअसही महुअरेण अहिहूअमाणा कादरीभूदा [आर्य्य न खलु किमपि अत्याहितम्। इयमावयोः प्रियसखी मधुकरेण अभिभूयमाना कातरीभूता]। (शकुन्तलां दर्शयति)।

ANASUYA—Nothing indeed very alarming, Noble Sir. This dear friend of ours, teased by a bee, has got frightened. (*Points to Sakuntala*).

राजेति। ('सत्वरं' झटिति 'उपसृत्य' अग्रे गत्वा आह)।

क इति। अन्वयः—कः अयं, दुर्विनीतानां शासितरि पौरवे वसुमतीं शासति मुग्धासु तपस्विकन्यासु अविनयम् आचरति। व्याख्या—'कः अयं' क एष 'दुर्विनीतानाम्' अशिष्टानां 'शासितरि' शासके 'पौरवे' पुरुकुलप्रसूते राजनि 'वसुमतीं' मही 'शासति' रक्षति सति। मही शासन्तं पौरवमनादृत्य ["षष्ठी चानादरे" इति चकारात्सप्तमी] 'मुग्धासु' सरलासु 'तपस्विनां कन्यासु' मुनिकुमारीषु 'अविनयम्' औद्धत्यम् 'आचरति' प्रयोजयति॥ पुरुकुले दीप्यमाने भुवि दुर्विनीता नैव स्युः। यदि कश्चिदस्ति तमहमभिभूय राजसकाशं प्रेषयिष्यामि इति भावः॥

('सर्वाः' तिस्र एव मुनिकन्यका 'राजानं दृष्ट्वा 'किञ्चिदिव' ईषदेव न बलवत् 'सम्भ्रान्ताः' त्रस्ताः)।

अनसूयेति। 'आर्य्य' हे मान्य 'न खलु' न नूनं किमपि अत्याहितं महद्भयं प्राप्तम्। किन्तु 'इयमावयोः प्रियसखी' शकुन्तला 'मधुकरेण अभिभूयमाना' बाध्यमाना सती अकातरा कातरा सम्पद्यमाना भूता 'कातरीभूता' व्याकुलीकृता।

NOTES

1. (a). पौरवे—Refers to दुष्यन्त। अनादरे भावलक्षणे सप्तमी। (b). शासितरि—शास + तृच् अर्हे कर्त्तरि = शासिता the chastiser. तस्मिन्। Owing to the तृच् we have षष्ठी in दुर्विनीतानाम्। पौरवो दुर्विनीतानां शासिता = पौरवो दुर्विनीतान् शासितुमर्हति। The metre is आर्य्या (see आ परितोषात् &c. *Ante*).

2. *Remark*—We have an exact parallel in "कोऽयं मही शासति सूर्य्यवंशे निरागसः प्राणहरः क एषः।"

3. सर्वाः &c.—All were confused but अनसूया was the first to recover self-possession. She addressed the king.

4. (a). आर्य्य &c.—अर्य्यते गम्यते शरणत्वेन आश्रीयते इति ऋ + ण्यत् कर्मणि = आर्य्यः Lit. one who succours the distressed. This is very aptly used towards दुष्यन्त at the time he offers protection to the girls. The word is however more commonly used in its secondary sense of a *noble* man, one of generous impulses, साधु। "महाकुलकुलीनार्य्यसभ्यसज्जनसाधवः" इत्यमरः। (b). अत्याहितम्—

अतीव आहितं मनसि that which has made a deep impression on the mind ; hence a *great danger* महाभीतिः। "अत्याहितं महाभीतिः" इत्यमरः।

राजा (शकुन्तलाभिमुखो भूत्वा)—अपि तपो वर्द्धते ? (शकुन्तला साध्वसादवचना तिष्ठति)।

KING (*Facing towards Sakuntala*)—Do your devotional rites prosper ? (*Sakuntala stands speechless through confusion.*)

अनसूया—दाणिं अदिधिविसेसलाहेण। हला सउन्दले गच्छ उड़अं फलमिस्सं अग्धं उवहर। इदं पादोदअं भविस्सदि [इदानीम् अतिथिविशेषलाभेन। हला शकुन्तले, गच्छ उटजम्, फलमिश्रम् अर्घमुपहर। इदं पादोदकं भविष्यति]।

ANASUYA—(They do) now by the arrival of a distinguished guest. Dear Sakuntala, go to the cottage and fetch an offering mixed with fruits. This will become water for the feet.

राजा—भवतीनां सूनृतयैव गिरा कृतमातिथ्यम्।

KING—Verily, the rites of hospitality have been rendered by your sweet and sincere words.

राजेति। ('शकुन्तलामभि' तया एकदिक् 'मुखं' यस्य तथा 'भूत्वा' आह) 'अपि तपो वर्द्धते' चीयमानं भूयते। तपसः कुशलं किम् ? ('शकुन्तला साध्वसात्' सम्भ्रमात् अविद्यमानं वचनं भाषणमस्या इति 'अवचना' निरुत्तरा 'तिष्ठति')।

अनसूयेति। शकुन्तलां निरुत्तरां दृष्ट्वा अनसूया आह—'अतिथीनां विशेषः' उत्तमः 'अतिथिविशेषः' उत्तमातिथिः भवानेव। तस्य 'लाभेन' प्राप्त्या 'इदानीम्' अधुना तपो वर्द्धते। चाटुवाद एष राजनि। पित्रा आदिष्टम् अतिथिपूजनं स्मारयन्ती आह—'हला शकुन्तले उटजं' पर्णशालां 'गच्छ'। ततः 'फलैः मिश्रं' युक्तम् 'अर्घम्' अर्घार्थद्रव्यम् आनीय अत्र भवते 'उपहर' प्रापय। 'इदम्' एतत् अत्र-

ष्यितं जलमेव 'पादोदकं' पाद्यं वारि, भविष्यति'। जलमस्ति, दधिकुशादिकं मङ्गल्यमानीय प्रथमं पादप्रक्षालनार्थं पाद्यं, ततः पूजार्थमर्घं, ततश्च भक्षणार्थं फलं देहि इत्यर्थः।

राजेति। 'भवतीनां सूनृतया' सत्यप्रियया ["सूनृतन्तु प्रिये सत्ये" इत्यमरः] 'वाचा एव आतिथ्यं कृतम्' अलं तदर्थं पुनरायासेन।

NOTES

1. राजा &c.—अभिगतं मुखमस्य इति अभिमुखः facing. बहु—by the Varttika "प्रादिभ्यो धातुजस्य वाच्यो वाचोत्तरपदलोपः"। शकुन्तलाया अभिमुखः।

2. शकुन्तला &c.—She has not yet recovered from the confusion. On the contrary, being directly addressed by the king, she is more confused and cannot answer. Priyamvada too is confused. Hence Anasuya saves the situation by answering for Sakuntala.

3. (a). अतिथिविशेष &c.—विशेष्यते इति वि+शिष+घञ् कर्मणि= विशेष lit. that which is *left* (when the husks are removed) *i. e.*, the kernel, the *best*. अतिथीनां विशेषः the best of guests. इतत्—। There is no निर्द्धारण in the वाक्य because निर्द्धारण requires the presence of *three* things, the निर्द्धार्यमाण, the class from which the निर्द्धारण is made, and the quality which is the basis of निर्द्धारण। These conditions are not fulfilled in the present instance. Hence the prohibition "न निर्द्धारणे" does not apply. (b). पादोदकम्—पादाय उदकम् water for the feet, *i. e.*, water to wash the feet with. पाद्यम्। सहसुपेति समासः। Or पादार्थम् उदकम् इति शाकपार्थिवादि॥

4. *Remark*—Here Anasuya reminds Sakuntala of her father's injunction to attend to guests that come to the hermitage during his absence. Sakuntala is not doing her duty by thus standing confused.

5. (a). सूनृतया—सुष्ठ नृत्यन्ति जना अनेन हर्षात् इति सु+नृत+क्त करणे घञर्थे स्त्रियाम्। This is Bhanuji's derivation. It is open to the

objection that वृत्त does not occur in the Varttika "छन्दसि कविकर्मणि वा प्रा अपि इति युष्यर्थम्"। Hence Bhanuji suggests the alternative सु + वृत + घञ् करणे संज्ञायाम् and explains that वृते does not take गुण (*i. e.*, it does not become वर्त) by the maxim "संज्ञापूर्वको विधिरनित्यः"। Lastly सु becomes दीर्घ by the rule "अन्येषामपि दृश्यते"॥
(b). आतिथ्यम्—अतिथये इदम् इति अतिथि + ञ्य॥

प्रियंवदा—तेण हि इमस्सिं पच्छाअसीअलाए सत्तवण्णवेदिआए मुहुत्तअं उपविसिअ परिस्समविणोदं करेदु अज्जो [तेन हि अस्यां प्रच्छायशीतलायां सप्तपर्णवेदिकायां मुहूर्तकमुपविश्य परिश्रमविनोदं करोतु आर्यः]।

PRIYAMVADA—Then let your honour allay his fatigue seated a while on this cool and shady embankment round the Saptaparna tree.

राजा—ननं यूयमप्यनेन कर्मणा परिश्रान्ताः।

KING—Surely you too are all fatigued by this work.

अनसूया—हला सउन्दले, उइदं णो पज्जुवासणं अदिहीणं। एहि उवविसम्ह [हला शकुन्तले, उचितं नः पर्युपासनमतिथीनाम्। एहि उपविशामः]। (सर्वे उपविशन्ति)।

ANASUYA—Dear Sakuntala, it is proper for us to sit near the guest. Come let us sit down. (*They all sit down*).

प्रियंवदेति। यदि आतिथ्यं कृतमेव मन्यते भवता 'तेन हि' ततश्च 'प्रकृष्टाभिश्छायाभिः सेविते देशे शीतलायाम् अस्यां सप्तपर्णवृक्षस्य वेदिकायां' मूलबन्धनभित्तौ 'मुहूर्त्तकं' अल्पकालम् 'उपविश्य आर्यः' मान्यो भवान् 'परिश्रमस्य' पथिक्लान्तेः 'विनोदं' अपनयं 'करोतु'। प्रच्छाय इति बहुव्रीहिः। प्रकृष्टा छाया इति प्रादिसमासे तु प्रच्छाया इति स्यात्।

राजेति। 'नूनं' निश्चितं 'यूयमपि अनेन' वृक्षसेचनरूपेण 'कर्मणा परिश्रान्ताः' जातखेदाः। तत् यूयमपि उपविश्य श्रमनोदनं कुरुत।

अनसूयेति। 'अतिथीनां पर्य्युपासनं' परित्यज्य स्थितिः, लक्षणया छन्दानुवर्त्तनं -नः' अस्माकम् 'उचितम्'। यदतिथये रोचते तत् नः कर्त्तव्यम्। 'एहि उपविशाम:'।

NOTES

1. प्रच्छाय &c.—प्रकृष्टा छाया यस्मिन् देशे स प्रच्छाय: a shady place. तच्च शीतला। Or प्रकृष्टा छाया यस्यां वेदि॰यां सा प्रच्छाया। सा च शीतला च इति कर्मधा—। Also see व्याख्या।

2. पर्य्युपासनम्—परि+उप+आस+ल्युट् भावे lit. sitting near in a circle. Secondarily 'to humour.' It may be taken here in both senses.

3. सर्वे—Qualifies (अभिमतारो) जना: understood. See Tika *Ante* on निष्क्रान्तौ। Here एकशेष is not available.

शकुन्तला (आत्मगतम्)—किं णु क्खु इमं पेक्खिअ तवो-वणविरोहिणो विआरस्स गमणीअ म्हि संवुत्ता [किं नु खलु इमं प्रेक्ष्य तपोवनविरोधिनो विकारस्य गमनीया अस्मि संवृत्ता]।

SAKUNTALA (*Aside*)—How it is that, on seeing this person, I have become the subject of an emotion inconsistent with the penance-grove ?

राजा (सर्वा विलोक्य)—अहो समवयोरूपरमणीयं भव-तीनां सौहार्द्दम्।

KING (*Gazing on all of them*)—Oh! Your friendship, charming by equal age and beauty !

प्रियंवदा (जनान्तिकम्)—अनसूए, को णु क्खु एसो महुरगम्भीराकिदो चउरं पिअं आलवन्दो पहाववन्दो विअ लक्खीअदि [अनसूये को नु खलु एष मधुरगम्भीराकृति: चतुरं प्रियम् आलपन् प्रभाववान् इव लक्ष्यते]।

PRIYAMVADA (*Aside*)—Anasuya, who indeed is this that, with a pleasing and dignified appearance, speaking smartly and sweetly, looks like one full of majesty ?

शकुन्तलेति । ('आत्मानं गतं' यथा तथा अन्यैरश्रुतमित्यर्थः आह) 'किं नु खलु' कथं तावत् 'इमम्' एतमतिथिं 'प्रेक्ष्य तपोवनस्य' आश्रमस्य 'विरोधिनः' विरुद्धस्य संयमप्रतिकूलस्य 'विकारस्य' चेतोविकृतेः, सात्त्विकभावस्य इत्यर्थः 'गमनीया' आस्पदं 'संवृत्ता अस्मि' जातास्मि ? इमं वीक्ष्य कुतो मे चेतोविकृतिः ?

राजेति । 'सर्वाः' तिस्रोऽपि कन्यकाः 'विलोक्य' दृष्ट्वा आह) 'अहो' आश्चर्यं 'वयसो रूपस्य' च 'समतया' अतीव 'रमणीयं' जातं 'भवतीनां सौहार्द्दं' सख्यम् ["हृद्भगसिन्ध्वन्ते पूर्वपदस्य च" इत्युभयपदवृद्धिः । "अनणि हृद्भावात्" इति वामनः] ।

प्रियंवदेति । (जनानामन्तिके समीपे यथा तथा 'जनान्तिकम्' अभीष्टं जनं विना अन्यान् अपवार्य्य, तेषाम् अश्रुतम् आह) 'अनसूये को नु खलु एषः' कस्तावदयं जनः 'आकृत्या मधुरः' मनोहरः अभिगम्यः, अथ च 'गम्भीरः' अधृष्यः चतुरं' निपुणं 'प्रियं' हृद्यम् 'आलपन्' आभाषमाणः 'प्रभाववान्' प्रतापशाली 'इव लक्ष्यते' अनुमीयते । आकृत्या वाचा च मन्ये नायं प्राकृतो जनः ।

NOTES

1. आत्मगतम्—This is the same as स्वगतम् । See Note *Ante.* अश्राव्य, there, is of course to all *except the audience.*

2. (a). किं नु &c.—किम् implies प्रश्न to herself. नु suggests वितर्क and खलु indicates अवधारण । The अवधारण is about the fact that *the emotion* **is** *there.* The प्रश्न refers to the **cause** *of its presence.* Last is the वितर्क indicating an attempt on her part *to* **discover** *the cause.* "नु वितर्कावमानयोः" इति मेदिनी ॥ (b). तपोवन &c.—तपसो वनं तपःसाधनं वनं वा तपोवनम् । तस्य विरोधी, *i. e.*, opposed to a hermit-life. तस्य । विक्रियते अनेन इति विकारः emotion. घञ् करणे । Here it is *Love.* (c). गमनीया—गम+अनीयर् कर्मणि fit to be reached, *i. e.*, accessible.

3. (a). समवयो &c.—वयश्च रूपञ्च age and beauty. द्वन्द्व । समी-

वयोरूपे equal age and beauty. ताभ्यां रमणीयम् ॥ (b). सौहार्द्दम्—शोभनं हृदयमस्य इति सुहृत् a friend, निपातनात् by the rule "सुहृद्दुर्हृदौ मित्रामित्रयोः"। तस्य भावः इति सुहृत्+अण्=सौहार्द्दम् friendship. Also see under प्रथमसौहृदम्—*Infra*, Act VI.

4. जनान्तिकम्—This is heard by the audience *and the person for whom intended.* "त्रिपताककरेणान्यानपवार्य्यान्तरा कथाम्। अन्योन्यामन्त्रणं यत् स्यात् तज्जनान्ते जनान्तिकम्" ॥—सा॰ द॰।

5. अनसूये &c.—(a) कः implies प्रश्न। नु suggests वितर्क। Hence this is a वितर्कगर्भः प्रश्नः। खलु is only ornamental—वाक्यालङ्कारे। "निषेधवाक्यालङ्कारजिज्ञासानुनये खलु" इत्यमरः ॥ (b) मधुर &c—माधुर्य्य creates confidence, and गाम्भीर्य्य inspires awe. मधुरा च गम्भीरा च मधुरगम्भीरा। कर्मधा—। मधुरगम्भीरा आकृतिर्यस्य of a pleasing and august presence; or मधुरा गम्भीरा आकृतिर्य्यस्य। त्रिपदबहु—॥ (c) चतुर &c.—These are adverbs qualifying आलपनक्रिया ॥ (d) प्रभाव &c.—प्रकृष्टो भावः इति प्रभावः majesty. प्रादितत्—। We cannot attach घञ् to प्र+भू to obtain प्रभाव because by the rule "श्रिणीभुवोऽनुपसर्गे" the root भू does not take घञ् when an उपसर्ग precedes.

अनसूया—सहि, मम वि अत्थि कोदूहलं। पुच्छिस्सं दाव णं [सखि ममापि अस्ति कौतूहलम्। प्रक्ष्यामि तावदेनम्]। (प्रकाशम्) अज्जस्स महुरालावजणिदो वीसम्भो मं मन्तावेदि। कदमो अज्जेण राएसिवंसो अलङ्करीअदि, कदमो वा विरहपज्जुस्सुअजणो किदो देसो, किं णिमित्तं वा सुउमारदरो वि तवोवणपरिस्समस्स अत्ता पदं उवणीदो [आर्य्यस्य मधुरालापजनितो विश्रम्भः मां मन्त्रयते। कतमः आर्य्येण राजर्षिवंशः अलङ्क्रियते। कतमो वा विरहपर्य्युत्सुकजनः कृतो देशः। किंनिमित्तं वा सुकुमारतरोऽपि तपोवनपरिश्रमस्य आत्मा पदम् उपनीतः]।

ANASUYA—Friend, mine too is the curiosity. Well I will ask him. (*Aloud*) The confidence caused by the sweet words of your honour prompts me. Which race of the royal sages is being adorned by your honour? Which country has now its people rendered pining through separation from you? And for what reason even this extremely delicate self has been subjected to the fatigue of a journey to the forest of penance.

अनसूयेति। 'सखि ममापि कौतूहलं' निर्णयकौतुकम् 'अस्ति'। अयं तर्कः मयि अपि आस्ते। 'एनं तावत्' इमं जनमेव 'प्रक्ष्यामि'। ('प्रकाशं' स्पष्टम् उच्चैः राजानं प्रति आह)। 'आर्य्यस्य' मान्यस्य भवतो मधुरालापेन' मञ्जुवचसा 'जनितः' उत्पादितः यो 'विस्रम्भः' विश्वासः ["समौ विस्रम्भविश्वासौ" इत्यमरः] स 'मां मन्त्रयते' मन्त्रकर्मणि, वाक्प्रयोगे, नियोजयति। विश्वासेन प्रेरिता अवश्यं ब्रवीमि, धृष्टतां मर्षय इति भावः। 'आर्य्येण कतमः' प्रसिद्धेषु को वा 'राजर्षीणां वंशः' अलङ्क्रियते' जन्मना भूष्यते। पञ्चालशूरसेनादिषु 'कतमो वा देशः' एतन्मुहूर्त्ते 'विरहेण' भवददर्शनेन 'पर्य्युत्सुकाः' उत्कण्ठिताः 'जनाः' यस्मिन् तादृशः क्रियते। प्रजारञ्जनात् अन्वर्थनामा राजासि। 'किंनिमित्तं वा' कस्मात् वा निमित्तात् 'सुकुमारतरोऽपि' अतिमृदुरपि 'आत्मा' भवतो देहः ["आत्मा देहमनोब्रह्मस्वभावधृतिबुद्धिषु। प्रयत्ने चापि" इति विश्वः] 'तपोवनस्य' यः 'परिश्रमः' आगमनक्लेशः तस्य 'पदं' स्थानम् 'उपनीतः' प्रापितः। आश्रमागमनक्लेशस्वीकारस्य को हेतुः।

NOTES

1. (a). सखि &c.—Literally "The curiosity exists in me too", *i. e.,* I am myself curious to know who he is. (b). कुतूहलमेव कौतूहलम् curiosity. अण् स्वार्थे। प्रज्ञादि। "रम्यवस्तुसमालोके लोलता स्यात् कुतूहलम्"। The latter occurs in "माधव्य अस्ति शकुन्तलादर्शने कुतूहलम्"—Act II.

2. मधुरालाप &c.—(a). मधुरः आलापः sweet speech. तेन जनितः। (b). विस्रम्भः—वि + स्रम्भ + घञ् भावे confidence. (c). मन्त्रयते—This

is causative. Thus—अहं मन्त्रये I hold conversation. विश्रम्भो मां मन्त्रयते confidence prompts me to hold conversation. Hence मन्त्र (चुरादि) + हेतुमति णिच् + लट ते ॥ (d) अलङ्क्रियते—अलम् (भूषणार्थे) + कृ + लट ते कर्मणि। अलम् is गतिसंज्ञक in the sense of भूषण। No समास। (e). विरह &c.—विरहेण पर्युत्सुकाः। सुप्सुपा। तादृशा जना यस्मिन्। विच्छेदविधुरप्रजं ॥ (f). सुकुमार &c.—तरप् implies comparison of two things. Here आत्मा is one thing, the second thing is not mentioned. There is *mental* (बुद्ध्या) comparison of दुष्यन्त with *other kings*. Anasuya suggests 'You look like a prince. From your speech I believe you are popular (c. f. विरहपर्युत्सुकजनः) with your people. Your features are more delicate than those of an ordinary king." Hence बौद्धप्रतियोग्यपेक्षया अतिशायने तरप ॥ (g). आत्मा &c.—The form in the कर्तृवाच्य was आर्यः आत्मानं पदमुपनीतवान्। कर्मणि it becomes आर्येण आत्मा पदमुपनीतः। Of the two classes of द्विकर्मक roots the ण्यादि class takes लकार &c. in its प्रधान and the दुहादि in the अप्रधान कर्म in the कर्मवाच्य। Hence the प्रधानकर्म here (आत्मा) becomes उक्त।

शकुन्तला (आत्मगतम्)—हिअअ मा उत्तम्म। एसा तुए चिन्तिदाइं अनसूआ मन्तेदि [हृदय मा उत्ताम्य। एषा त्वया चिन्तितानि अनसूया मन्त्रयते]।

SAKUNTALA (*Aside*)—O heart, be not troubled. This Anasuya is uttering thy thought.

राजा (आत्मगतम्)—कथमिदानीमात्मानं निवेदयामि, कथं वा आत्मापहारं करोमि। भवतु एवं तावदेनां वक्ष्ये— (प्रकाशम्) भवति, यः पौरवेण राज्ञा धर्माधिकारे नियुक्तः, सोऽहमविघ्नक्रियोपलम्भाय धर्मारण्यमिदमायातः।

KING (*Aside*)—How shall I describe myself now and (yet) how shall I preserve the incognito of myself? Well I will address her thus—(*Aloud*) Honoured maiden, I, the

person that is employed in the department of Religion by the king descended from Puru, have come to this holy forest to know if rites are without obstruction.

शकुन्तलेति। ('आत्मगतम्' अन्यैरश्रुतम् आत्मनो हृदयं प्रति आह) हे 'हृदय' मदन्तःकरण 'मा उत्ताम्य' अधीरं मा भूः [तमु इति दैवादिकस्य लोटि मध्यमैकवचने रूपम्। मा शब्दः अव्ययमस्ति, स च "माङि लुङ्" इत्यस्य अविषयः। तेन लोट्। "मा कुरु धनजनयौवनगर्वम्" इत्यादिषु यथा] यानि 'त्वया चिन्तितानि' तानि 'एषा अनसूया मन्त्रयते' भाषते।

राजेति। अन्यैरश्रुतमाह—'इदानीम्' अधुना पृष्टः सन् 'कथं' कया रीत्या 'आत्मानं निवेदयामि' कथयामि आत्मपरिचयं ददामि। 'कथं वा' केन प्रकारेण च पुनः 'आत्मनः अपहारं' गोपनं 'करोमि'। सत्यं ब्रूयाम् अज्ञातश्च तिष्ठेयम् इति दुष्करं मन्ये। 'भवतु' अस्तु 'तावत् एवम्' अनया रीत्या 'एनाम्' अनसूयां 'वक्ष्ये' अभिधास्ये। इति तत्क्षणमेव कथनप्रकारं निश्चित्य द्व्यर्थकम् आह—हे 'भवति' मान्ये 'यो' जनः 'पौरवेण राज्ञा' दुष्यन्तेन, अथ च 'पौरवेण राज्ञा' मत्पित्रा 'धर्माधिकारे' तपश्चरणविभागे, अथ च 'धर्माधिकारे' क्षत्रियस्य धर्मतोऽधिकारे, राज्ये इति यावत्, 'नियुक्तः' व्यापारितः, 'सः' अहम् 'अविघ्नाः' अप्रतिबन्धाः याः 'क्रियाः' तपोऽनुष्ठानानि तासां 'उपलम्भाय' सम्यक् ज्ञानाय, क्रिया अविघ्ना न वा इति ज्ञातुम् 'इदं धर्मारण्यं' तपोवनम् 'आगतः'।

NOTES.

1. हृदय &c.—(a). मा उत्ताम्य don't be impatient. उद्+तम (दिवादि)+लोट् हि=उत्ताम्य। लट्—ताम्यति, लुङ्—अतमत्॥ (b). एषा—Refers to अनसूया, or indicates प्रियंवदा; thus हृदय wants information and forthwith (प्रियंवदा) अनसूया asks the king for it. (c). मन्त्रयते—Here no हेतुमण्णिच् is necessary (*c. f.* मन्त्रयते *Ante*).

2. (a). कथम् &c.—This is how the king deliberates—"She wants to know who I am. I cannot tell a lie. Yet I do not want to be known. How (कथम्) to tell the truth and preserve

the incognito is the quesion." (b). भवतु—Indicates that the king has made up his mind. कर्त्तव्यनिश्चयद्योतकम् ॥ (c): भवति &c.—This is truth as well as hoax. The king refers to *his father* by पौरवेण राज्ञा and to his *kingdom* by धर्माधिकारे। He thus speaks the truth. अनसूया however understands दुष्मन्त by पौरवेण राज्ञा and the तपश्चरणविभाग by धर्माधिकार। Hence she is hoaxed. Thus the king speaks the truth and yet remains unknown. (d). अविघ्न &c.—विहन्यते एभिः इति वि + हन + क करणे = विघ्नाः obstacles. क though used कर्त्तरि may be had here करणे by the Varttika "घञर्थे कविधानं स्था स्ना पा व्यधिहनियुध्यर्थम्"। (e). उप + लभ + घञ् भावे = उपलम्भः ascertaining. अविद्यमाना विघ्ना यासु ता अविघ्नाः। अविघ्नाः क्रियाः unobstructed rites. तासामुपलम्भः—Literally "Ascertaining unobstructed rites", *i. e.*, to ascetain if rites are unobstructed or not. कर्माविघातोपलम्भाय इत्यर्थः। (f). धर्मारण्यम्—रणे साधु रण्यम् suitable for a battle. न रण्यम् अरण्यम्। A forest is so called because there the movement of horses, chariots &c. is impeded and no battle can be fought. धर्मार्थं धर्मसाधनं वा अरण्यम्।

अनसूया—सणाहा दाणिं धम्मचारिणो [सनाथा इदानीं धर्मचारिणः]। (शकुन्तला शृङ्गारलज्जां नाटयति)।

ANASUYA—The performers of rites are now provided with a lord. (*Sakuntala acts the bashfulness of amour*).

सख्यौ (उभयोराकारं विदित्वा जनान्तिकम्)—हला सउन्दले, जइ एत्थ अज्ज तादो सण्णिहिदो भवे [हला शकुन्तले यदि अत्र अद्य तातः सन्निहितो भवेत्]।

THE FRIENDS (*Noticing the demeanour of the two—Aside*)—Dear Sakuntala if father comes back here today—

शकुन्तला—तदो किं भवे [ततः किं भवेत्]।

SAKUNTALA—What will happen then ?

सख्यौ—इमं जीविदसव्वस्सेण वि अदिहिविसेसं किदत्थं करिस्सदि [इमं जीवितसर्वस्वेनापि अतिथिविशेषं कृतार्थं करिष्यति]।

THE FRIENDS—He will make this august guest happy even with all he owns in life.

अनसूयेति। 'इदानीम्' अधुना त्वयि तपोवनम् आयाते 'धर्मचारिणः' धर्मक्रियानिरताः तापसाः 'सनाथाः' नाथवन्तो जाताः।

('सनाथा' इत्यस्य 'भर्त्तृमन्तः' इत्यपि अर्थः। अतः 'शकुन्तला शृङ्गाररसाश्रयां लज्जां नाटयति' अवनतेन मुखेन मुकुलितेन चक्षुषा च दर्शयति)।

सख्याविति। ('उभयोः' शकुन्तलादुष्यन्तयोः 'आकारं' चेष्टां स्निग्धावलोकितं, परावृत्तञ्च वदनं 'विदित्वा' ज्ञात्वा 'जनान्तिकं' राज्ञः अश्रुतम् आहतुः) 'यदि अद्य तातः' कण्वः 'अत्र' आश्रमे 'सन्निहितो भवेत्' प्रत्यासन्नः स्यात्।

शकुन्तलेति। 'ततः किं भवेत्' इत्यपि जनान्तिकमेव।

सख्याविति। 'इमम् अतिथिविशेषम्' उत्तमातिथिं 'जीवितस्य' जीवनस्य यत् 'सर्वस्वं' धनं तेन 'अपि' तदपि दत्त्वा इत्यर्थः 'कृतार्थं सिद्धमनोरथं 'करिष्यति'। त्वामस्मै प्रदास्यति इति व्यङ्ग्यम्। जनान्तिकञ्चैतत्।

NOTES

1. सनाथा &c.—(a). नाथ्यते याच्यते अर्थिभिः इति नाथ+घञ् कर्मणि=नाथः the king. Or नाथ्यते पत्न्या इति नाथः the husband. नाथेन सह वर्त्तमानाः॥ (b). धर्मचारिणः—धर्मं चरन्तीति धर्म+चर+णिनि कर्त्तरि those who practice penance. This includes both males and females. Thus the remark means—"Ascetics now feel it that they have a king to look after them." But to unmarried female ascetics it may also suggest "Ascetic maidens have now found a husband", *i. e.*, they have found it in *you*.

2. शृङ्गार &c.—शृङ्गार is love. शृङ्गाराश्रया लज्जा the bashfulness of love. शाकपार्थिवादि। ताम्। Sakuntala takes Anasuya's remark in the second sense noted above. Specially because the moment before the king's appearance, the friends had

broached to Sakuntala the question of a suitable husband for her ; and because Sakuntala was already feeling herself attracted towards the stranger.

3. सख्यौ &c.—आक्रियते अनेन इति आ + कृ + घञ् करणे = आकारः, इङ्गितम्, appearance, gesture, manner चेष्टा। "आकाराविङ्गिताकृती" इत्यमरः॥ (**b**). सन्निहितः—सम् + नि + धा + क्त कर्मणि near. सन्निहितो भवेत् comes near *i. e.*, comes back. हेतौ लिङ्।

4. इमम् &c.—(**a**). जीव + क्त भावे = जीवितम् life. सर्वं स्वं सर्वस्वम् all own. जीवितस्य सर्वस्वम् life's all own, *i. e.*, that which being taken away life ceases. Refers to Sakuntala. The plain meaning is "what he values most". (**b**). अतिथि &c.—विशिष्यते इति वि + शिष + घञ् कर्मणि = विशेषः Lit. That which is left. But the kernal is left when the husks are removed. Hence विशेष means the *best*. अतिथीनां विशेषः the best of guests. As already explained, the prohibition "न निर्द्धारणे" does not apply, and we have षष्ठीतत्— ॥ (**c**). कृतार्थम्—कृतः निर्वर्तितः अर्थः प्रयोजनं शकुन्तलालाभरूपं यस्य तम् whose object is accomplished. "अर्थोऽभिधेय रै वस्तु प्रयोजननिवृत्तिषु" इत्यमरः। The sly hint is—"This person is in love with you. You are not averse to him. He seems to be a suitable bridegroom too. If father were here he would have at once offered him your hand."

शकुन्तला—तुम्हे अवेध। किं वि हिअए करिअ मन्तेध। ण वो वअणं सुणिस्सं [युवाम् अपेतम्। किमपि हृदये कृत्वा मन्त्रयेथे। न युवयोर्वचनं श्रोष्यामि]।

SAKUNTALA—Go you hence. You have got something into your mind and are chattering. I won't listen to your words.

राजा—वयमपि तावद्भवत्योः सखीगतं पृच्छामः।

KING—I too enquire about your friend.

सख्यौ—अज्ज अणुग्गहो एव्व इअं अब्भत्थणा [आर्य, अनुग्रह एव इयमभ्यर्थना] ।

THE FRIENDS—Noble Sir, this request is a favour indeed.

राजा—भगवान् काश्यपः शाश्वते ब्रह्मणि स्थित इति प्रकाशः । इयञ्च वः सखी तदात्मजा इति कथमेतत् ?

KING—His reverence Kasyapa is known as living in perpetual celibacy. But how is it that this friend of yours is his daughter ?

शकुन्तलेति । 'युवाम् अपेतं' दूरं गच्छतम् । 'किमपि' वस्तु 'हृदये कृत्वा' मनसि निधाय 'मन्त्रयेथ' एवं भाषेथे । 'युवयोर्वचनं न श्रोष्यामि' । युवामेव जानीथ युवयोरभिप्रायम् । यत् न बुध्यते तच्छ्रुत्वा मे किम् इत्यर्थः । सर्वमेतज्जनान्तिकं जातम् ।

राजेति । 'वयमपि' ["अस्मदो द्वयोश्च:" इति बहुवचनम्] । सख्यौ गतः 'सखीगतः' शकुन्तलाश्रयः कोऽपि विषयः । तं 'पृच्छामः' । "तथापि तत्त्वत एनामुपलप्स्ये" इति प्रागुक्तस्य अयमनुबन्धः ।

सख्याविति । 'इयं' भवता कृता 'अभ्यर्थना' प्रश्नप्रार्थना 'अनुग्रह एव' । भवादृशैः कृते प्रश्ने मादृशा अनुगृहीता भवन्ति इत्यर्थः ।

राजेति । 'भगवान्' षडैश्वर्यशाली 'काश्यपः शाश्वते' नित्ये 'ब्रह्मणि' ब्रह्मचर्ये 'स्थितः' नैष्ठिकब्रह्मचारी 'इति' एवम् इत्थंभूतः 'प्रकाशः' लोके विदितः । 'इयञ्च' पक्षान्तरे एषा 'वः सखी तस्य आत्मजा' औरसी कन्या । 'इत्येतत् कथं' कीदृशम् ? सम्बद्धम् असम्बद्धं वा वद ।

NOTES

1. युवाम् &c.—Sakuntala here feigns anger. Or perhaps she is really annoyed that the friends have divined her wish. It would have been better if the passage could be rendered "युवाम् अवेथः किमपि हृदये कृत्वा मन्त्रयेथे"—You alone know with what trash in your mind you are talking.

2. आर्य्य &c.—अभि + अर्थ + युच् भावे स्त्रियाम् = अभ्यर्थना prayer, *i. e.*, the king's prayer to be allowed to ask questions.

3. (a). शाश्वते—शश्वत् is an अव्यय meaning सदा। "पुनः सदार्थयोः शश्वत्" इत्यमरः। शश्वत् भवम् इति शश्वत् + अण् = शाश्वतम् perpetual नित्यम्। "शाश्वतस्तु ध्रुवो नित्यसदातनसनातनाः" इत्यमरः। The maxim "अव्ययानां भमात्रे टिलोपः" does not operate here owing to the prohibition "शाश्वते प्रतिषेधो वक्तव्य"। This very Varttika gives us the option to attach अण् to शश्वत, otherwise we should have had ठञ् alone by the rule "कालात् ठञ्" as we see in the rule "येषाञ्च विरोधः शाश्वतिकः।" "भाष्यकारवचनप्रामाण्यादण्प्रत्ययः" ठञा च समावेशः। Hence the two forms शाश्वत with अण् and शाश्वतिक with ठञ्॥ (b). ब्रह्मणि—ब्रह्मन् here stands for ब्रह्मचर्य्य (तपस्) which enjoins celibacy. "ब्रह्म तत्त्वतपोवेदे न द्वयोः पुंसि वेधसि" इति मेदिनी। The king's question is "How can a celibate have a daughter."

अनसूया—सुणादु अज्जा। अत्थि को वि कोसिओत्ति गोत्तणामहेओ महाप्पहावो राएसी [शृणोतु आर्य्यः। अस्ति कोऽपि कौशिक इति गोत्रनामधेयः महाप्रभावो राजर्षिः]।

ANASUYA—Let your honour listen. There is a certain highly majestic royal sage whose family name is Kausika.

राजा—अस्ति श्रूयते।

KING—Yes. So I hear.

अनसूया—तं णो पिअसहीए पहवं अवगच्छ। उज्झिआए सरीरसंबड्ढणादिहिं तादकस्सवो से पिदा [तम् आवयोः प्रियसख्याः प्रभवम् अवगच्छ। उज्झितायाः शरीरसंवर्द्धनादिभिः तातकाश्यपः अस्याः पिता]।

ANASUYA—Know him as the progenitor of our dear friend. Father Kasyapa is her father only because of the rearing of her body &c., when she was abandoned.

राजा—उज्झितशब्देन जनितं मे कौतूहलम्। आ मूलात् श्रोतुमिच्छामि।

KING—My curiosity is excited by the word "abandoned." I wish to hear from the beginning.

अनसूयेति। 'अस्ति कोऽपि कौशिक इति गोत्रं नामधेयं' नाम यस्य तादृशः, गोत्रनाम्ना कौशिक इति ख्यातः, 'महाप्रभावः' प्रभूतप्रतापः 'राजा ऋषिरिव'। ऋषिरिव कश्चिद्राजास्ति गोत्रेण कौशिकः नाम्ना च।

अनसूयेति। 'तं' कौशिकम् 'आवयोः प्रियसख्याः' शकुन्तलायाः 'प्रभवम्' उत्पत्तिस्थानम् 'अवगच्छ' जानीहि। 'उज्झितायाः' त्यक्तायाः अस्याः 'शरीरस्य संवर्द्धनादिभिः' पोषणादिभिः कर्मभिः 'तातकाश्यपः अस्याः पिता' जातः ["स पिता यस्तु पोषकः" इति]।

राजेति। 'उज्झितशब्दो' भवत्या प्रयुक्तः। तेन 'मे कौतूहलं' कौतुकं 'जनितम्'। 'आ मूलात्' आमूलम्, आदित आरभ्य 'श्रोतुमिच्छामि'।

NOTES

1. (a). कुशिकस्य राजर्षेर्गोत्रापत्यं पुमान् कौशिकः। Refers to विश्वामित्र who was the grandson of कुशिक। "कान्यकुब्जे महानासीत् पार्थिवो भरतर्षभ। गाधीति विश्रुतो लोके कुशिकस्यात्मसम्भवः। तस्य धर्मात्मनः पुत्रः समभवद्बलवाहनः। विश्वामित्र इति ख्यातो बभूव रिपुमर्दनः॥" (b). गोत्र &c.—नाम एव इति नाम+धेय स्वार्थे=नामधेयम् name. Now see टीका॥ (c). राजर्षिः—राजायम् ऋषिरिव राजर्षिः: sage-like king. उपमितकर्मधा—॥

2. (a). तम &c.—प्रभवत्यस्मात् इति प्र+भू+अप् अपादाने=प्रभवः the source कारणम्, *i. e.*, the father पिता॥ (b). उज्झ+क्त कर्मणि स्त्रियाम्=उज्झिता abandoned. (c). शरीर &c.—शरीरस्य संवर्द्धनम् nourishing of the body. तत् आदिर्येषां तैः by all necessary measures commencing with the rearing of her person. तृतीया करणे॥ (d). पिता—c. f. "प्रजानां विनयाधानाद्रक्षणाद्भरणादपि। स पिता पितरस्तासां केवलं जन्महेतवः॥"

3. (a). उज्झितः इति शब्दः उज्झितशब्दः the word उज्झित। कर्मधा—। तेन। अनुक्ते प्रयोजके कर्तरि तृतीया॥ (b) जनितम्—जन्+

णिच्+क्त कर्मणि caused. (c). आ मूलात्—मूल beginning आदि। "मूलमाद्ये शिफाभयोः" इत्यमरः। आ is a कर्मप्रवचनीय here with an inclusive sense (अभिविधि)। पञ्चमी by the rule "पञ्चम्यपाङ्परिभिः"। अव्ययीभाव is optionally allowed by the rule "आङ्मर्य्यादाभिविध्योः"। The compounded form is आमूलम्।

अनसूया—सुणादु अज्जो। पुरा किल तस्स राएसिणो उग्गे तवसि वट्टमाणस्स किं वि जादसङ्केहिं देवेहिं मेणआ णाम अच्छरा पेसिदा णिअमविग्घकारिणी [शृणोतु आर्य्यः। पुरा किल तस्य राजर्षेः उग्रे तपसि वर्त्तमानस्य, किमपि जातशङ्कैः देवैः मेनका नाम अप्सराः प्रेषिता नियमविघ्नकारिणी]।

ANASUYA—Let your honour listen. Some time back, when this royal sage was engaged in severe penance, a nymph named Menaka was sent to him as an obstructor of his vow, by the gods who somehow got alarmed.

राजा—अस्त्येतदन्यसमाधिभीरुत्वं देवानाम्।

KING—There is this nervousness of the gods about other's austerities.

अनसूया—तदो वसन्तोदारसमए से उम्मादइत्तअं रूवं पेक्खिअ [ततो वसन्तोदारसमये अस्या उन्मादयितृ रूपं प्रेक्ष्य] —(अर्द्धोक्ते लज्जया विरमति)।

ANASUYA—Then, in pleasant spring time, having noticed her maddening charms—(*Stops through delicacy when half-uttered*).

अनसूयेति। 'पुरा किल' इतः पूर्वं तु 'उग्रे' कठोरे 'तपसि वर्त्तमानस्य' दुश्चरं तपश्चरतः 'तस्य' कौशिकस्य [सम्बन्धसामान्ये षष्ठी] 'नियमस्य' संयमस्य

'विघ्नकारिणी' विघातिका 'मेनकानाम अप्सरा:' ["एका अप्सरा:" इति प्रयोगात् अप्सर:शब्द एकवचनेऽपि] 'किमपि' केनापि कारणेन 'जाता शङ्का' येषां तै: भीतै: 'देवै: प्रेषिता'।

राजेति। 'एतत् अन्यस्य समाधे:' नियमात् 'भीरुत्वं' भयशीलता 'देवानामस्ति'।

अनसूयेति। 'तत:' मेनकाया: आगमनात् परं 'वसन्तेन' तदाख्येन ऋतुना 'उदार:' मनोहर: य: 'समय:' तस्मिन् 'अस्या' मेनकाया 'उन्मादयितृ' सम्मोहनं 'रूपं प्रेक्ष्य' ('अर्द्धे' असमग्रे 'उक्ते' कथिते 'लज्जया विरमति' विरता भवति)।

NOTES

1. (a). शृणोतु &c.—तपसि वर्त्तमानस्य engaged in penance तपश्चरणे निरतस्य। (b). किमपि—Kalidasa often uses this as an अव्यय meaning कुतोऽपि निमित्तात् somehow or other. *c. f.* "किमप्यहिंस्यस्तव चेन्मतोऽहम्" ॥ (c). अप्सरा.—Usually अप्सरस् is in the plural. Here it is singular. Compare "आप: सुमनसो वर्षा अप्सरा: सिकता: समा:। एते स्त्रियां बहुत्वे स्युरेकत्वेऽप्युत्तरत्रयम् ॥" Compare also "अप्सरसा वीतरागस्येव नास्तीदानीं मे मोक्ष:"—Act. V. (d). नियम &c.—नियम्यते अनेन इति नि + यम + अप् करणे = नियम: vow व्रतम्। "नियमो व्रतमस्त्री" इत्यमर:। तस्य विघ्न: (see अविघ्न—*Ante*)। नियमविघ्नं साधु करोतीति नियमविघ्न + कृ + णिनि साधुकारिणि कर्त्तरि स्त्रियाम्। Or विघ्न + कृ + णिनि साधुकारिणि कर्त्तरि = विघ्नकारिणी। नियमस्य विघ्नकारिणी।

2. अन्येतत् &c.—अन्यसमाधे: भीरु: अन्यसमाधिभीरु: alarmed at others austerities. सुप्सुपा। तस्य भाव:। परतपस्त्रास:। The gods always get nervous in such cases.

3 (a) तत: &c.—उदर्य्यते उत्कर्षं प्राप्यते इति उद् + ऋ + घञ् कर्मणि = उदार: improved ; hence—attractive, pleasant मनोहर:। In this sense compare—"साकेतोपवनमुदारमध्युवास", "तथाहि ते शीलमुदारदर्शने" &c. वसन्तेन हेतुना उदार: pleasant by reason of the spring season: सुप्सुपा। तादृश: समय: ॥ (b). उन्मादयितृ शीलमस्य इति उद् + मद + णिच् + तृन् ताच्छील्ये कर्त्तरि ॥ (c). अर्द्धम् उक्तम् अर्द्धोक्तम् half-uttered. कर्मधा—। तस्मिन् ॥ (d). विरमति—परस्मैपद by the rule "व्याङ्परिभ्यो रम:"।

राजा—परस्ताद्गम्यत एव। सर्वथा अप्सर:सम्भवैषा।

KING—The sequel is easily guessed. After all, she is born of a nymph.

अनसूया—अहइ [अथ किम्]।

ANASUYA—What else ? (Even so).

राजा—उपपद्यते।

मानुषीषु कथं वा स्यादस्य रूपस्य सम्भवः
न प्रभातरलं ज्योतिरुदेति वसुधातलात्॥

(शकुन्तला अधोमुखी तिष्ठति)।

KING—That's proper. How could the birth of such beauty happen amongst females that are human ? The flash that is tremulous with lustre does not emanate from the surface of the earth. (*Sakuntala remains with down-cast eyes*).

राजा (आत्मगतम्)—लब्धावकाशो मे मनोरथः।

KING (*Aside*)—My desire has found scope.

राजेति। 'परस्तात्' ततः 'गम्यते' बुध्यते 'एव'। 'सर्वथा' सर्वप्रकारेण 'एषा' शकुन्तला 'अप्सरःसम्भवः' उत्पत्तिस्थानं यस्याः तादृशी।

अनसूयेति। 'अथकिम्' एवमेव ['अथकिम्' इति स्वीकारे]।

राजेति। एतत् 'उपपद्यते' युज्यते।

मानुषीति। अन्वयः—मानुषीषु अस्य रूपस्य सम्भवः कथं वा स्यात्। प्रभातरलं ज्योतिः वसुधातलात् न उदेति। व्याख्या—'मानुषीषु' मानवस्त्रीषु 'अस्य' अमानुषस्य 'रूपस्य' आकृतेः 'सम्भवः' उत्पत्तिः 'कथं वा स्यात्' कथमपि न स्यात् [सम्भावनायां लिङ्]। 'प्रभाभिः तरलं' चञ्चलं 'ज्योतिः' तेजः वैद्युतं ज्योतिः, सूर्यो वा, चन्द्रो वा, 'वसुधायाः तलात्' पृष्ठात् भूतलात् 'न उदेति' न उद्गच्छति। विद्युत् भूतलात् न स्फुरति, ईदृशञ्च रूपं मानवीषु न जायते।

('शकुन्तला' आत्मस्तुत्या, विशेषतोऽभिमतजनात् स्तुत्या, लज्जिता 'अधोमुखी तिष्ठति')।

राजेति। 'मे मनोरथः' अभिलाषः 'लब्धः' प्राप्तः 'अवकाशः' अन्तरं येन सः। उद्वाहयोग्या एव मे शकुन्तला मदभिलाषस्य विषयो भवितुमर्हति। [अतः परम्— "किन्तु सख्याः परिहासोदाहृतां वरप्रार्थनां श्रुत्वा धृतद्वैधीभावकातरं मे मनः" (रा-, वि-, म-)]।

NOTES

1. अप्सरःसम्भवा—अप्सरस् is not always plural. Compare "आपः सुमनसो वर्षा अप्सराः सिकताः समाः। एते स्त्रियां बहुत्वे स्युरेकत्वेऽप्युत्तरत्रयम्॥" The भाष्य has एका अप्सराः। Also see Note 1 preceding.

2. (a). मानुषीषु—मनोरपत्यानि स्त्रियः इति मनु + अञ् = मनुष् + अञ् = मानुषः। The षुक् comes in by the rule "मनोर्जातावञ्यतौ षुक् च"। तासु। (b). कथं वा स्यात्—This is an indirect and emphatic contradiction. How could it happen—most assuredly it could not happen. (c). प्रभातरलं ज्योतिः—This is not necessarily *Electricity*. Any *bright* object—any beautiful woman—may be said to have तरलप्रभा। Compare—"सुन्दरी सा न वेत्त्येष विवेकः केन जायते। प्रभामात्रं हि तरलं दृश्यते न तदाश्रयः॥"—*Dandin.*

3. The figure is प्रतिवस्तूपमा। See under शुद्धान्तदुर्लभ &c.—*Ante.* Here there is साम्यप्रतीति। The birth of such रूप among मानुषी is *as absurd as* the उदय of प्रभातरलं ज्योतिः from वसुधातल। Also we have वाक्यद्वय। Hence the लक्षण applies. The metre is श्लोक।

4. लब्धावकाशः &c.—Here *two* things encourage him. First and foremost of course is Sakuntala's charms coupled with the fact that she is not a ब्राह्मणकन्या। The second is her pedigree. She is अप्सरःसम्भवा from a क्षत्रिय। This places her higher than any ordinary क्षत्रिय girl.

5. *Readings*—I have omitted the portion "किन्तु सख्याः परिहासोदाहृता वरप्रार्थनां श्रुत्वा धृतद्वैधीभावकातरं मे मनः"। The परिहास—joke—is "यथा वनज्योत्स्ना···अनुरूपं वरं लभेय"—*Ante.* धृतद्वैधीभाव-

-कातरम् = distressed by having acquired द्वैधीभाव। Here evidently the च्विप्रत्यय is superfluous; because अभूततद्भाव is already expressed by the word भूत। Say *either* भूतद्वैधभावकातरम् *or* द्वैधीभावकातरम्, but *not* भूतद्वैधीभावकातरम्। As a rule कालिदास does not write so loosely. Again, द्वि + धमुञ् प्रकारे or अधिकरणविचाले = द्वैधम् *in two ways*, or *divided into two.* This is मकारान्त। With अ स्वार्थे we get द्वैधम् + अ = द्वैधम् which is द्वैध in the neuter. च्वि is not available in the first sense because no meaning can be got out of it (अनभिधानात्)। In the second sense, अद्वैधस्य द्वैधस्य भावः इति द्वैध + च्वि + भू + घञ् भावे = द्वैधीभावः the division into two of one previously undivided. This is an extremely cumbrous statement. All this is for च्वि। The purpose is easily served without च्वि। Thus द्विधाभवनम् इति द्वैधभावः द्विप्रकारेण स्थितिः इत्यर्थः। तेन कातरम् द्वैधभावकातरम्। A clumsy statement where a simple one is possible is rare with कालिदास।

These two considerations, taken with the fact that the Bengali Recensions omit it, raise grave doubts about the authenticity of the passage.

There is yet another and more serious consideration against the passage. *It does not fit in with what follows.* For, admitting the passage, we find Dushyanta in a fix. He loves Sakuntala, but he is distressed with the *suspicion that she loves another person* (note वरप्रार्थना and भूतद्वैधीभावकातर)। But presently he exclaims—"Away with suspicions! Advance love!" (भव हृदय साभिलाषं सम्प्रति सन्देहनिर्णयो जातः &c.—*Infra*). How so? What has happened to allay his suspicions and justify this jubilation? Nothing, except the information that her father has made up his mind to get her married to a suitable bridegroom if available (गुरोः पुनरस्या अनुरूपवरप्रदाने सङ्कल्पः—*Infra*). Dushyanta was not a fool to think that her father would force her to marry against her will; or that, at the command of her father, her affection will forsake its present object and flow towards himself! So this information does not account for the

king's joy. The passage is *not consistent* with the king's exclamation and I am afraid it has to go.

प्रियंवदा (सस्मितं शकुन्तलां विलोक्य, नायकाभिमुखी भूत्वा)—पुणो वि वत्तुकामो विअ अज्जो [पुनरपि वक्तुकाम इव आर्य्यः]। (शकुन्तला सखीमङ्गुल्या तर्जयति)।

PRIYAMVADA—(*Looking at Sakuntala with a smile and then facing the hero*)—Your honour seems as if wishing to speak again. (*Sakuntala rebukes her friend with her finger*).

राजा—सम्यगुपलक्षितं भवत्या। अस्ति नः सच्चरित-श्रवणलोभादन्यदपि प्रष्टव्यम्।

KING—Rightly observed by you. From my desire to hear the story of the good, arises yet another question.

प्रियंवदा—अलं विआरिअ। अणिअन्तणाणुओओ तपस्सिअणो णाम [अलं विचार्य्य। अनियन्त्रणानुयोगः तपस्विजनो नाम]।

PRIYAMVADA—No use deliberating. Hermits are indeed persons to whom unrestricted questions may be put.

प्रियंवदेति। ('शकुन्तलाम्' अधोमुखीं 'विलोक्य स्मितेन सह' ईषत् हसित्वा 'नायकस्य' कथानायकस्य, राज्ञ इत्यर्थः, 'अभिमुखी भूत्वा' तमेव संबोध्य आह) 'आर्य्यः' मान्यो भवान् 'पुनरपि' भूयोऽपि किञ्चित् 'वक्तुं' 'कामो' यस्य तादृश 'इव' लक्ष्यते ["तुं काममनसोरपि" इति तुमो मकारलोपः]। मन्ये अन्यदपि भवतो वक्तव्यमस्ति।

('शकुन्तला सखीं' प्रियंवदाम् 'अङ्गुल्या' तर्जन्या 'तर्जयति' भर्त्सयति [तर्जि भर्त्सोरनुदात्तेत्त्वेऽपि चक्षिङो ङित्करणात् परस्मैपदम्। न हि आत्मने-

पदापवादः। तेन तर्जयते भर्त्सयते इत्यपि भवति]। तिष्ठ दुर्विनीते, अस्य वचसा मां लज्जितां दृष्ट्वा, मद्गतमेव अयं पृच्छति इति जानती अपि, भूयोऽपि मां लज्जापयितुं यतसे—ईदृशस्तर्जनप्रकारः)।

राजेति। 'भवत्या सम्यक्' साधु 'उपलक्षितं' निरूपितम्। 'सतां' साधूनां 'चरितस्य' वृत्तस्य 'श्रवणम्' आकर्णनं, तत्र यो 'लोभः' स्पृहा तस्मात् कारणात् 'नः' अस्माकम् 'अन्यदपि प्रष्टव्यं' जिज्ञासितव्यम् 'अस्ति'। श्रवणीयं श्रुत्वा न तृप्यामि, अन्यच्च श्रोतुमिच्छामि इत्यर्थः।

प्रियंवदेति। 'अलं विचार्य' पृच्छामि न वा इति विचारणा मा भूत्। 'तपस्विजनः' तापसाः 'अनियन्त्रणः' निर्बाधः 'अनुयोगः' प्रश्नः येषु तथाविधाः 'नाम' यथेच्छं प्रष्टव्याः किल।

NOTES

1. सस्मितम् &c.—सस्मितम् qualifies आह understood. She noticed that Sakuntala was feeling uncomfortable through bashfulness. Out of sheer naughtiness she wanted to enjoy the fun at the expense of the poor girl and with a smile—note the smile which betrays her wickedness—she urged the king to talk on in this strain.

2. वक्तुकामः—वच् + तुमुन् कर्त्तरि = वक्तुम् one who will say (यो वक्ष्यति सः)। This is by the general principle "कर्त्तरि कृत"। वक्तुं कामो यस्य is the वाक्य of a समानाधिकरणपद बहु—in which वक्तुम् qualifies कामः। The म of वक्तुम् disappears by the maxim "लुम्पेदवश्यमः कृत्ये तुङ्कामसनसोरपि। समो वा नतहितयोर्मांसस्य पचि· युड्घञोः॥" Again वक्तुम् is an अव्यय and there is another view according to which कृत् affixes that make अव्यय derivatives are all in the भाववाच्य·["अव्ययकृतो भावे" इति भाष्यम्]। Hence वक्तुम् means वचनम् saying. This gives a व्यधिकरण बहु—। Thus वक्तुं वचने कामो यस्य। वक्तुम् in this has लुप्तसप्तमी because the word is an अव्यय। It is *first* (पूर्वनिपात) in the compound by the rule "सप्तमीविशेषणे बहुव्रीहौ।"

3. तर्जयति—She threatens her for her wicked query. तर्जि

drops इ which is an अनुदात्त vowel. So तर्जि is अनुदात्तेत्। Therefore by the rule "अनुदात्तङित आत्मनेपदम्" we except तर्जयते। Hence तर्जयति requires defending. The root चक्षिङ् suggests the defence. This root drops इ which is अनुदात्त, and it drops ङ् as well. Hence it is अनुदात्तेत् and also ङित्। The effect of either of these is to give it the आत्मनेपद। But when पाणिनि attached इ to चक्ष् making it चक्षि, he should have stopped there; for, the अनुदात्त इकार would have secured the आत्मनेपद desired. But he is not satisfied, and adds ङ् after चक्षि for the sake of the आत्मनेपद। This shows that अनुदात्तेत् roots are *not necessarily* in the आत्मनेपद; *there are exceptions.* तर्जि and भर्त्सि are among the exceptions. Thus तर्जयति तर्जयते, भर्त्सयति भर्त्सयते।

4. सच्चरित &c.—This is of course only an excuse. He wants to be taken as an indifferent listener, guided in his questions by no other motive but an ardent desire to hear the story of good people. लोभात् has हेतौ पञ्चमी। प्रष्टव्यस्य सद्भावे लोभो हेतुः।

5. (a). विचार्य—Here there is no क्रियार्थक्रिया, yet we have ल्यप्। This is owing to अलम् in the sense of "prohibition" (प्रतिषेध)। "अलंखल्वोः प्रतिषेधयोः प्राचां क्त्वा" is the rule. अलं विचार्य is also allowable. (b). अनु+युज्+घञ् भावे=अनुयोगः question प्रश्नः। "प्रश्नोऽनुयोगः पृच्छा च" इति कोषः। नि+यन्त्र (चुरादि)+ल्युट् or युच् भावे=नियन्त्रणम् or नियन्त्रणा restraint. अविद्यमानं नियन्त्रणं यस्मिन् सः अनियन्त्रणः unrestricted. बहु—। "नञोऽस्त्यर्थानां वा चोत्तरपदलोपः" इति "विद्यमान"-पदलोपः। (c). तपस्वी चासौ जनश्च a person practising penance. कर्मधा—। (d). नाम indicates अङ्गीकार, अभ्युपगम admission. "नाम कोपेऽभ्युपगमे" इति मेदिनी। You want to question, *I admit* (अभ्युपगम) your right to question.

राजा—इति सखीं ते ज्ञातुमिच्छामि—

वैखानसं किमनया व्रतमा प्रदानाद्

व्यापाररोधि मदनस्य निषेवितव्यम्।

अत्यन्तमेव सदृशेक्षणवल्लभाभिर्
आहो निवत्स्यति समं हरिणाङ्गनाभिः ॥

KING—I wish to know this of your friend—Is the vow of a hermit, that hinders the operation of love, to be observed by her until betrothal, or will this one, dear to these female deer because her eyes are like theirs, really live with them for ever ?

राजेति । 'ते सखीं शकुन्तलाम् इति' इत्याकारेण 'ज्ञातुमिच्छामि' । अनुपदं कथ्यमानयोः प्रकारयोः एकतरप्रकारेण ज्ञातुमिच्छति ।

वैखेति । अन्वयः—किमनया मदनस्य व्यापाररोधि वैखानसं व्रतम् आ प्रदानात् निषेवितव्यम्, आहो सदृशेक्षणवल्लभा अत्यन्तमेव आभिः हरिणाङ्गनाभिः समं निवत्स्यति ? व्याख्या ।—'किम्' इति, 'आहो' इति च, पक्षद्वयम् निर्द्दिश्यते । 'किमनया' शकुन्तलया 'मदनस्य' कामस्य 'व्यापारं' प्रवृत्तिं 'रोद्धुं' प्रतिषेद्धुं शीलमस्य इति 'व्यापाररोधि' प्रवृत्तिविघातकं 'वैखानसं' तापसं 'व्रतं' धर्मः, ब्रह्मचर्य्यम् 'आ प्रदानात्' प्रदानपर्य्यन्तं विवाहपर्य्यन्तमित्यर्थः ["पञ्चम्यपाङ्परिभिः" इति पञ्चमी] 'निषेवितव्यम्' अनुष्ठातव्यम्, 'आहो' अथवा 'सदृशे' तुल्ये 'ईक्षणे' नेत्रे यासां तासां हरिणीनां 'वल्लभा' तुल्यचक्षुष्ट्वादेव प्रिया शकुन्तला ["विशेषणमात्रप्रयोगो विशेष्यप्रतिपत्तौ" इति विशेषणमात्रप्रयोगः] 'अत्यन्तमेव' चिरमेव 'आभिः' पुरो दृश्यमानाभिः 'हरिणाङ्गनाभिः' मृगवधूभिः 'समं' सह ["समं सह" इत्यमरः] 'निवत्स्यति' । सम्प्रति मुनिव्रतापि इयं प्रदेया, अथवा यावज्जीवं ब्रह्मचारिणी, इति सखीं ते ज्ञातुमिच्छामि—इति पूर्वेण सम्बन्धः ॥ ["अत्यन्तमेव सदृशे" (त-, वि-, न्या-)— "अत्यन्तमेव मदिरे" (रा-)—"अत्यन्तमात्मसदृशे" (म-)] ॥

NOTES

1. इति—Has the sense of एवम् thus. I wish to know your friend thus, *i.e.*, I wish to know whether your friend is to be *thus*, or *thus*. *Thus* has reference to the alternatives mentioned in the sloka following.

2. (a). वैखानसम्—वैखानसस्य इदम् इति वैखानस+अण् belonging to a hermit. (b). वि+आ+पृ+घञ् भावे=व्यापार: operation प्रवृत्ति:। तं रोद्धुं शीलमस्य इति व्यापार+रुध+णिनि कर्त्तरि ताच्छील्ये क्लीवे॥ (c). निर्षेवितव्यम्—"परिनिविभ्य: सेव-सित—" इति षत्वम्॥ (d). अतिगतम् अन्तं यस्मिन् कर्मणि तत् यथा तथा till the end, *i. e.*, so long as life lasts. Qualifies निवत्स्यति॥ (e). सदृशे &c.—Usually the whole is taken as one word qualifying हरिणाङ्गनाभि:। सदृशेक्षणाभ्यां वल्लभाभि: favourite because having similar eyes. But then निवत्स्यति wants the nominative. Hence it seems preferable to separate आभि: making सदृशेक्षणवल्लभा the nominative as in the Tika. The epithet then implies that Sakuntala was dear to the does because her eyes resembled theirs, so they had confidence in her. (f). अङ्गानि सन्त्यासां कल्याणानि इति अङ्ग+न मत्वर्थे स्त्रियाम्=अङ्गना: fair-limbed, *i. e.*, the female sex. हरिणानामङ्गना:। ताभि:। समभिति सहार्थयोगे तृतीया। न केवलं सहयोगे, तत्पर्य्यायर्योगेऽपि तृतीया। योगश्च चाक्षुषो बौद्धो वा। "वृद्धो यूना—" इति वचनात्।

3. *Readings*—The reading मदिरेक्षणवल्लभा does not sufficiently explain why शकुन्तला was वल्लभा of the does. The other reading आत्मसदृशे &c. omits एव which is not desirable. अत्यन्तमेव—Is it really for the whole life—indicates *disapproval* (परिभव) of the idea. Dushyanta has now so far advanced in his career of love that the suggestion of अत्यन्तवास he cannot broach with approval or even indifference. The एव implies the expected *disapproval* (परिभव)। "एवौपम्ये परिभवे" इति हैम:।

प्रियंवदा—अज्ज धम्मचरणे वि परवसो अअं जणो। गुरुणो उण से अनुरूववरप्पदाणे संकप्पो [आर्य्य, धर्मचरणेऽपि परवश: अयं जन:। गुरो: पुनरस्या अनुरूपवरप्रदाने सङ्कल्प:]।

PRIYAMVADA—Noble sir, even in religious practices this person is subject to another. Her father's wish, however, is to betroth her to a suitable husband.

राजा (आत्मगतम्)—न खलु दुरवापेयं प्रार्थना ।
भव हृदय साभिलाषं सम्प्रति सन्देहनिर्णयो जातः ।
आशङ्कसे यदग्निं तदिदं स्पर्शक्षमं रत्नम् ॥

KING (*Aside*)—This prayer is indeed not difficult to obtain. O Heart, be hopeful. The solution of doubts is now achieved. What you suspect as fire, is a gem that bears handling.

शकुन्तला (सरोषमिव)—अणसूए गमिस्सं अहं [अनसूये, गमिष्याम्यहम्] ।

SAKUNTALA (*As if in anger*)—Anasuya, I will go.

प्रियंवदेति । धर्मानुष्ठाने स्त्रियः स्वातन्त्र्यमस्ति, किन्तु 'अयं जनः' शकुन्तलारूपः 'धर्मस्य चरणे' अनुष्ठाने 'अपि परवशः' पराधीनः पित्राज्ञावर्त्ती । 'गुरोः पुनः' पितुः कण्वस्य तु 'अस्याः' शकुन्तलायाः 'अनुरूपाय' योग्याय 'वराय' पात्राय 'प्रदाने सङ्कल्पः' अभिलाषः ॥ योग्योऽसि त्वमस्याः, पितरं प्रार्थयस्व, एषा तवैव भविष्यति, इति ध्वनिः ॥

राजेति । 'खलु' नूनं निश्चितम् 'इयं प्रार्थना' एषोऽभिलाषः, शकुन्तलालाभेच्छा दुःखेन अवाप्यते इति 'दुरवापा' दुर्लभा 'न' । क्षत्रियग्राह्या कन्या, प्रदानार्थी पिता, योग्यश्चाहं क्षत्रियः अर्थी, एतत्त्रितयसन्निधाने मन्ये सुलभा मे शकुन्तला ।

भवेति । अन्वयः—हृदय, सम्प्रति सन्देहनिर्णयो जातः, साभिलाषं भव । यत् अग्निमाशङ्कसे, तत् इदं स्पर्शक्षमं रत्नम् । व्याख्या—हे 'हृदय' मदीयं चेतः 'सम्प्रति' अधुना 'सन्देहस्य' सन्दिग्धवस्तुनः शकुन्तलारूपस्य 'निर्णयः' तत्त्वतो निरूपणं 'जातः' । यद्वा—'सन्देहस्य' संशयस्य, मत्परिणयग्रहणयोग्येयं न वा इत्याकारस्य 'निर्णयः' निराकरणम्, अपगमः इत्यर्थः 'जातः' निर्वृत्तः । तेन हि 'साभिलाषं' सस्पृहं 'भव' शकुन्तलागतमभिलाषं सादरं पोषय । कोऽसौ निर्णय इत्याह—'यत्' वस्तु त्वम् 'अग्निं' स्पर्शे विदाहि 'आशङ्कसे' मन्यसे 'तत् इदं' वस्तु 'स्पर्शं क्षमते' सहते इति 'स्पर्शक्षमं' सुखस्पर्शम् आदेयं 'रत्नं' मणिः ।

शकुन्तलेति। ('रोषेण' क्रोधेन 'मह इव' क्रुद्धस्य प्रकारमभिनीय। नहि तत्त्वत: क्रुद्धा भूत्वा)।

NOTES

1. न खलु &c.—Note the reasons why *not* दुःखाय। In सुलभा मे in the Tika मे has अर्थे षष्ठी—मम सम्बन्धे सुलभा। You may write सुलभा मया if you prefer, but then the diction will suffer.

2. (**a**). साभिलाषम्—अभि + लष + घञ् भावे = अभिलाष: desire. तेन सह। सह—by the rule "तेन सहेति तुल्ययोगे" the तुल्ययोग here being in विद्यमानतामात्र॥ (**b**). सम् + दिह + घञ् कर्मणि or भावे = सन्देह: that about which doubt is felt (कर्मणि), *i. e.*, here शकुन्तला। If भावे, the act of doubting. निर् + नी + अच् भावे = निर्णय: solution, removal. In the first case he means that he has now got definite information about Sakuntala and is no longer in doubt. (**c**). स्पर्शं क्षमते इति स्पर्श + क्षम + ण कर्त्तरि = स्पर्शक्षमम् that which tolerates handling. (**d**). The second half means—You saw the glow only and thought it was fire (शङ्का—सन्देह); but it turns out to be a gem (निर्णय)। The glow refers to तप:प्रभाव which *burns* and is therefore like अग्नि। Compare "शमप्रधानेषु तपोधनेषु गूढं हि दाहात्मकमस्ति तेज:।"—Act. II.

अनसूया—किं णिमित्तं [किं निमित्तम्]।

ANASUYA—What for?

शकुन्तला—इमं असंबद्धप्पलाविणिं पिअंवदं अज्जाए गोदमीए णिवेदइस्सं [इमामसंबद्धप्रलापिनीं प्रियंवदाम् आर्य्यायै गौतम्यै निवेदयिष्यामि]।

SAKUNTALA—I will report this incoherent babbler Priyamvada to venerable Gautami.

अनसूया—सहि ण जुत्तं अकिदसक्कारं अदिहिविसेसं विसज्जिअ सच्छन्ददो गमणं [सखि न युक्तमकृतसत्कारमतिथि-

विशेषं विसृज्य स्वच्छन्दतो गमनम्]। शकुन्तला न किञ्चि-दुक्त्वा प्रस्थितैव)।

ANASUYA—Friend, it is not proper to leave a distinguished guest, with rites of hospitality un-rendered, and go away wilfully. *(Sakuntala moves on without saying anything).*

अनसूयेति। 'किं निमित्तं' कस्मान्निमित्तादित्यर्थः गमिष्यसि। गमनकारणं किम्?

शकुन्तलेति। 'आर्य्यायै' मान्यायै 'गौतम्यै' गौतमीमभिप्रेत्य गौतमीं बोधयितुं वा 'असम्बद्धम्' असङ्गतं 'प्रलपितुं' भाषितुं शीलं यस्याः यद्वा पुनः पुनरसम्बद्धं प्रलपति या ताम् 'इमां प्रियंवदा निवेदयिष्यामि'। प्रियंवदा मामधिकृत्य असंबद्धं प्रलपति इति विज्ञापयिष्यामि।

अनसूयेति। 'अकृतः' अविहितः 'सत्कारः' पूजा यस्मै तम् 'अतिथिविशेषं' विशिष्टमतिथिं 'विसृज्य' विहाय 'स्वच्छन्दतः' स्वेच्छया 'गमनं न युक्तम्' अनुचितम्। यस्मै कस्मैचिदपि अतिथये पूजामदत्त्वा गमनमयुक्तम् अयञ्च पुनरुत्तमातिथिः, गमनमपि यदृच्छया कुरुषे, नास्ति कार्य्यान्तरेण आकृता, इति किम् अयुक्ततरमतो भवेत्। तस्मात् याहि इत्यर्थः।

('न किञ्चिदुक्त्वा' अनसूयायै प्रतिवचनमदत्त्वा 'प्रस्थिता' चलिता 'एव शकुन्तला')।

NOTES

1. (a). असम्बद्ध &c.—सम्+बन्ध+क्त कर्मणि=सम्बद्धम् coherent. न सम्बद्धम् incoherent. नञ् तत्—। तत् यथा तथा प्रलपति इति असम्बद्ध+प्र+लप+णिनि कर्त्तरि ताच्छील्ये आभीक्ष्ण्ये वा स्त्रियाम्। ताम्॥ (b). गौतम्यै—गौतमीमभिप्रेत्य प्रियंवदां निवेदयिष्यामि makes a सम्प्रदान of गौतमी by the rule "कर्मणा यमभिप्रैति स सम्प्रदानम्"॥ चतुर्थी सम्प्रदाने। Or गौतमीं बोधयितुं प्रियंवदां निवेदयिष्यामि, whence suppressing बोधयितुम् we get गौतम्यै as कर्मणि चतुर्थी by the rule "क्रियार्थोपपदस्य च कर्मणि स्थानिनः"॥

2. (a). विशिष्यते इति वि+शिष+घञ् कर्मणि=विशेषः excellent, the best. अतिथीनां विशेषः the best of guests, an illustrious guest. इतत्—। तम्। Here अतिथीनाम् has शेषे षष्ठी। निर्द्धार is not available, because three things are necessary for निर्द्धार—(1) the individual separated, (2) the class from which separated, (3)

the ground for separation. We have not got them here. Thus the prohibition "न निर्धारणे" does not apply, and we get शेषषष्ठ्या समासः ॥ (b). छन्द is अभिप्राय will. "अभिप्रायवशौ छन्दौ" इति कोषः। स्वस्य छन्दः or स्वः छन्दः स्वच्छन्दः own will. तेन इति स्वच्छन्द + तस् करणे = स्वच्छन्दतः। करणे तस् is available by the Varttika "तसिप्रकरणे आद्यादिभ्य उपसंख्यानम्"। Compare—स्वरतः and वर्णतः for स्वरेण and वर्णेन in "दुष्टः शब्दः स्वरतो वर्णतो वा"। अनसूया is always matter-of-fact. She *reasons* ; shows the impropriety of leaving her guest so abruptly. Note the steps of her reasoning (See Tika).

राजा (ग्रहीतुमिच्छन् निगृह्यात्मानम्। आत्मगतम्)—अहो चेष्टाप्रतिरूपिका कामिजनमनोवृत्तिः। अहं हि—

अनुयास्यन् मुनितनयां सहसा विनयेन वारितप्रसरः।
स्थानादनुच्चलन्नपि गत्वेव पुनः प्रतिनिवृत्तः ॥

KING (*Intending to catch hold of her and having checked himself—Aside*)—Ah ! the mere inclination of the mind of a lover works exactly like the corresponding effort. About to follow the hermit's daughter impulsively, but with my progress stopped by decorum, though not moving from my seat, I am indeed like one come back after having gone.

प्रियंवदा (शकुन्तलां निरुध्य)—हला ण दे जुत्तं गन्तुं [हला न ते युक्तं गन्तुम्]।

PRIYAMVADA (*Having checked Sakuntala)*—Darling, you should not go.

शकुन्तला (सभ्रूभेदम्)—किं णिमित्तं [किं निमित्तम्]।

SAKUNTALA (*With a frown*)—What for ?

प्रियंवदा—रुक्खसेअणे दुवे धारेसि मे। एहि दाव अत्ताणं मोआवेहि, तदो गमिस्ससि [वृक्षसेचने द्वे धारयसि मे। एहि तावदात्मानं मोचय, ततो गमिष्यसि]। (बलादेनां निवर्तयति)।

PRIYAMVADA—You owe me two waterings of trees. Come, do release yourself, then you shall go. (*Stops her by force*).

राजेति। ('गृहीतु'' शकुन्तलां निरोद्धुम् 'इच्छन्' अभिलषन् 'आत्मानं निगृह्य' निवारयित्वा गृहणेच्छां नियम्य इत्यर्थः आह) 'अहो' आश्चर्यं 'कामिजनानां' सकामानां 'मनोवृत्तिः' मनसो व्यापारः 'चेष्टायाः' देहव्यापारस्य 'प्रतिरूपिका' तुल्यधर्मिणी। कामिनां देहव्यापारेण यथा आयासः मनोव्यापारमात्रेणापि तथैव ["चेष्टाप्रतिरूपिका" (रा, वि-, म-)—"चेष्टानुरूपिणी" (त-, व्या-)]॥

अन्विति। अन्वयः—मुनितनयां सहसा अनुयास्यन्, विनयेन पुनः वारितप्रसरः, अहं स्थानात् अनुच्चलन् अपि गत्वा प्रतिनिवृत्त इव हि। व्याख्या—'मुनेः' कण्वस्य 'तनयां' कन्यां शकुन्तलां 'सहसा' अतर्कितम् 'अनुयास्यन्' अनुगन्तुमुद्यतः 'विनयेन पुनः' दमेन तु 'वारितः' निरुद्धः 'प्रसरः' क्रिया, प्रवृत्तिरित्यर्थः, यस्य तथाविधः, संरुद्ध-चेष्टः 'अहं स्थानात्' आसनात् 'अनुच्चलन् अपि' अनुत्तिष्ठन् अपि 'गत्वा' गमनव्यापारं निर्वर्त्य 'प्रतिनिवृत्तः' कृतप्रत्यागमनव्यापारः 'इव हि'। गमनस्य इच्छामात्रमभून्मे मनसि। तन्मात्रकेऽपि चेष्टा अपि मया कृता इत्येव मे मतिरस्ति।

प्रियमिति। ('निरुध्य' गमनात् वारयित्वा)।

शकुन्तलेति। ('भ्रुवोः भेदः' भङ्गः। तेन सह)।

प्रियंवदेति। 'द्वे' द्विरावृत्ते 'वृक्षयोः सेचने' सेचनकर्मणी 'मे' मह्यं ["धारेरुत्तमर्णः" इति सम्प्रदानत्वात् चतुर्थी] 'धारयसि'। त्वत्कृते अहं द्वौ वृक्षकौ सिक्तवती। तन्मूल्यं ते ऋणमस्ति। 'एहि' आगच्छ 'आत्मानं तावत् मोचय' ऋणमुक्तं कुरुष्व, 'ततः' तदनन्तरं 'गमिष्यसि'। मूल्यं वा देहि, मदर्थं वा द्वौ वृक्षकौ सिञ्च, ततो गच्छ इति भावः। ('एनां' शकुन्तलां 'बलात्' तरसा [हेतौ पञ्चमी। बलं प्रयुज्य निवर्तयति इति ल्यब्लोपे वा।] 'निवर्तयति' निवृत्तां करोति)।

NOTES

1. (a). चेष्टाप्रति &c.—प्रतिबिम्बितं रूपमस्याम् अस्या वा इति प्रतिरूपा the exact reflection. बहु—। सैव इति प्रतिरूपा + कन् स्वार्थे = प्रतिरूपिका

a reflection. (b). कामिजन &c.—काम: अस्ति अतिशयेन एषाम् इति काम + इनि अतिशायने = कामिन: those that have intense desire. मनसो वृत्ति: inclination of the mind, *i. e.*, a mental effort. कामिनो जना: । कर्मधा— । Here चेष्टा is physical effort. Hence the meaning is—So ardent is the inclination, that an effort done mentally seems like a physical effort. It is a *general* principle which the king supports by an example (See अनुयास्यन् &c).

2. *Reading*—चेष्टानुरूपिणी is ambiguous. It may mean (1) *corresponding* to चेष्टा, or (2) *like* चेष्टा । *Like* चेष्टा meets our case. It is a simpler expression. Not a bad reading on the whole.

3. अनुयास्यन् &c.—When he saw Sakuntala leaving, he very thoughtlessly (सहसा) wanted to follow her. The very next moment his good sense prevailed and he desisted. [What was thoughtless here ? Of course the *wish* to follow, not the *check* put on the wish. Hence the proper construction is सहसा अनुयास्यन् not सहसा वारितप्रसर:]. He did not leave his seat. There was no physical effort to follow. Yet he felt as if he had actually followed and come back. The feeling was due to the intensity of the wish. The wish and the effort produce like effects (चेष्टाप्रतिरूपिका कामिजनमनोवृत्ति:) । The figure is अर्थान्तरन्यास, the verse going to establish (साधन) the general principle in अहो &c. above. The metre is आर्य्या ।

4. हला &c.—गन्तुम् is गमनम् the तुम् being भावे in such cases. "अव्ययकृतो भावे" इति भाष्यम् ।

5. किं निमित्तम्—"What for", *i. e.*, "How so", "How is it improper (न युक्तम्) to leave."

6. मोचय—मुच् means 'to release'. Here, however, the meaning is 'to become free'. अनेकार्थत्वाद्धातूनाम् । Hence it is अकर्मक । Thus आत्मा मुच्यतु—let your person become free—gives त्वम् आत्मानं मोचय with णिच् the अणिकर्त्ता having become कर्म by the rule "गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामणिकर्त्ता स णौ" । Compare this wicked move of the naughty प्रियंवदा with the plain appeal of the simple अनसूया ।

राजा—भद्रे, वृक्षसेचनादेव परिश्रान्तामतभवतीं लक्षये। तथा ह्यस्याः—

स्रस्तांसावतिमात्रलोहिततलौ बाहू घटोत्क्षेपणाद्
अद्यापि स्तनवेपथुं जनयति श्वासः प्रमाणाधिकः।
बद्धं कर्णशिरीषरोधि वदने घर्माम्भसां जालकं
बन्धे स्रंसिनि चैकहस्तयमिताः पर्य्याकुला मूर्द्धजाः॥

तदहमेनामनृणां करोमि। (अङ्गुलीयं दातुमिच्छति। उभे नाममुद्राक्षराणि अनुवाच्य परस्परमवलोकयतः)।

KING—O gentle one, I see this maiden fatigued even from (her own share of) watering the trees. For, through the lifting of the pitcher, her arms, even now, have the shoulders drooping and the palms excessively red; even now, her abnormal breathing causes a tremor in her breasts; on her face have formed drops of perspiration-water that obstruct the Sirisha flowers in her ears; and the knot constantly unloosening, her locks, restrained with one hand, are dishevelled. I will then free her of debt. (*Offers his ring. The two stare at each other on reading the letters of the name on the seal*).

राजेति। 'भद्रे' हे साधुवृत्ते प्रियंवदे 'अत्रभवतीं' शकुन्तलां 'वृक्षसेचनात् एव' स्वेषां वृक्षाणां सेचनादेव 'परिश्रान्तां' गुरुखेदां 'लक्षये' पश्यामि। 'तथाहि' पश्यतु भवती।

स्रस्तेति। अन्वयः—घटोत्क्षेपणात् अस्याः बाहू स्रस्तांसौ अतिमात्रलोहिततलौ, प्रमाणाधिकः श्वासः अद्यापि स्तनवेपथुं जनयति, वदने कर्णशिरीषरोधि घर्माम्भसां जालकं बद्धम्, बन्धे स्रंसिनि मूर्द्धजाश्च एकहस्तयमिताः पर्य्याकुलाः। व्याख्या—'घटस्य' सेचनकलसस्य 'उत्क्षेपणात्' ऊर्द्ध्वं वहनात् [हेतौ पञ्चमी] 'अस्या बाहू स्रस्तौ' अवनतौ 'अंसौ' स्कन्धसन्धी ययोः तथाभूतौ, 'अतिमात्रं' प्रकृतेरधिकं

'लोहितं' रक्तं 'तलं' करतलं ययोः तथाभूतौ च। 'प्रमाणात्' स्वमात्रायाः 'अधिकः श्वासः' गुरुश्वसनम् 'अद्यापि' इदानीमपि 'स्तनयोः वेपथुं' कम्पं 'जनयति' करोति। प्रकृत्या नतौ अंसौ श्रमात् प्रकामविनतौ जातौ, लोहिते तले अतिमात्रं लोहिते, श्वासोऽपि गुरुः। तन्नेयमिदानीमपि विश्रान्ता। अपि च 'वदने' मुखे 'कर्णयोः' दत्तं 'शिरीषं रोद्धुं' स्थिरीकर्त्तुं शीलं यस्य तथाविधं 'धर्माम्भसां' स्वेदजलानां 'जालकं' बिन्दुसमूहरूपं 'बद्धं' समुदितम्, 'बन्धे' केशबन्धे 'स्रंसिनि' पुनः पुनर्गलति सति ["बहुलमाभीक्ष्ण्ये" इति पौनःपुन्ये णिनिः] 'मूर्द्धजाश्च' केशा अपि 'एकेन हस्तेन यमिता' बन्धनं नीताः सन्तः 'पर्य्याकुलाः' विकीर्णाः ["बद्धं" (त-, ख्या-, म-)—"स्रस्तं" (रा-, वि-)]।

तदिति। 'तत्' तस्मात्, सर्वथा एषा भूयो वृक्षसेचनानर्हा अतः, 'अहं' सेचनमूल्यं दत्त्वा 'एनां' ते अधमर्णाम् 'अविद्यमानम् ऋणं' यस्याः तथाविधाम्, ऋणमुक्तां 'करोमि'।

('अङ्गुलीयम्' अङ्गुरीयकं 'दातुमिच्छति'। अस्य च अङ्गुल्या उन्मोचनकाले 'नाममुद्रायाः' तत्र मुद्रितस्य नाम्नः 'अक्षराणि' वर्णान् 'अनुवाच्य' पठित्वा 'परां परां' प्रियंवदा अनसूयाम्, अनसूया च प्रियंवदाम्, इत्यर्थः [द्वित्वम्। असमासवद्भावः। पूर्वस्य सुपः सुः] 'अवलोकयतः' पश्यतः। तत्र राज्ञो दुष्यन्तस्य नाम उत्कीर्णं दृष्ट्वा द्वे अपि सख्यौ विस्मिते, किमेतत् इति अन्योऽन्यमुखावलोकनं कुरुतः। अथवा उभे इति शकुन्तलाप्रियंवदे)।

NOTES

1. (a). भद्रे—O gentle one. A happy epithet at the moment, because she roughly handles Sakuntala. (b). अत्रभवतीम्—Here अत्र takes द्वितीयार्थे त्रल् because it qualifies भवतीम्। This is allowed by the rule "इतराभ्योऽपि दृश्यन्ते"।

2. (a). स्रस्तांसौ—A slight droop of the shoulders is a point of beauty in females. Compare the word प्रकाम in "प्रकामविनतांसौ"—Act. III., *Infra*. (b). अतिमात्र &c.—अतिगता मात्रा यस्मिन् तत् अतिमात्रम् excessive. बहु—। अतिमात्रं लोहितम् excessively red. सुप्सुपेति समासः। A certain amount of redness of the palms is

considered a मुखक्षय। (c). घटोत्क्षेपणात्—उत्क्षेपण is ऊर्ध्वप्रेरण। This is necessary. Without an upward jerk the tops cannot be watered. (d). कर्णशिरीषरोधि—कर्णस्थं शिरीषं कर्णशिरीषम् the शिरीष in the ears used as कर्णभूषण। शाकपार्थिवादि। Compare "अवतंसयन्ति दयमानाः प्रमदाः शिरीषकुसुमानि"—*Prelude.* "कृतं न कर्णार्पितबन्धनं सखे शिरीषमागण्डविलम्बिकेशरम्"—Act. VI., *Infra.* &c. कर्णशिरीष + रुध + णिनि तच्छीले कर्त्तरि। रोधन is obstruction. The flowers *stick* (रोध) on the face owing to the perspiration and no longer oscillate. She was profusely perspiring. (e) घर्मस्य अम्भांसि or घर्मजानि अम्भांसि, तेषाम्॥ (f). एकहस्त &c.—यम + णिच् + क्त कर्मणि = यमिताः restrained. एकः हस्तः एकहस्तः। "पूर्वकालैक—" इति कर्मधा—। She used one hand only, the other was engaged with the pitcher. Note that the king is now too far interested in Sakuntala to check his effusion.

3. *Readings*—स्रस्त in स्रस्तं कर्णशिरीष &c. means *slipped down.* This does not seem to suit the context. जालक (समूह) seems to suggest the formation of *separate* drops, and does not agree with the *running down* of perspiration.

4. (a). नाममुद्रा &c.—मुद्र + अ भावे = मुद्रा engraving. नाम्नो मुद्रा engraving of the name, *i. e.*, the name engraved. कृदभिहितो भावो द्रव्यवत् प्रकाशते। तस्या अक्षराणि॥ (b). अनु + वच + णिच् + ल्यप् = अनुवाच्य having read. (c). परस्परम्—Each stares at the other. Hence there is व्यतिहार reciprocity. This gives द्वित्व by the Varttika "कर्मव्यतिहारे सर्वनाम्नो द्वे वाच्ये समासवच्च बहुलम्"। We have now परां पराम् अवलोकयतः। We do not get समासवद्भाव in परां पराम् owing to बहुलग्रहण। "बहुलग्रहणात् अन्यपरयोर्न समासवत्"। Next "असमासवद्भावे पूर्वपदस्थस्य सुपः सुर्वक्तव्यः"। Hence परास् पराम् अवलोकयतः। Next the टाप् disappears बाहुलकात् leaving परस् परम् = परःपरम् = परस्परम् because of निपातन in the कस्कादि list or in the sutra "अपरस्पराः क्रियासातत्ये"। Lastly the final विभक्ति is optionally changed into आम् by the Varttika "स्त्रीनपुंसकयोरुत्तरपदस्थाया विभक्तेराम्भावो वा वक्तव्यः"। Hence परस्परम् or परस्पराम्। For the disappearance of टाप् compare—"इलवये टाबभावः क्लीबे चाद्द्विरक्षः स्वमोः। समासे सोरलुक

चेति सिद्धं बाहुलकात् तयम् ॥" The टाप् may be dropped at any stage *after the duplication.*

राजा—अलमस्मानन्यथा सम्भाव्य । राज्ञ: प्रतिग्रहोऽयम् ।

KING—Stop thinking otherwise of me. It is a gift from the king.

प्रियंवदा—तेण हि ण अरिहदि एदं अङ्गुलीअअं अङ्गुलीविओअं । अज्जस्स :वअणेण अरिणा दाणिं एसा [तेन हि नार्हत्येतत् अङ्गुलीयकम् अङ्गुलीवियोगम् । आर्यस्य वचनेन अनृणा इदानीमेषा] । (किञ्चिद्विहस्य) हला सउन्दले मोइदा सि अणुअम्पिणा अज्जेण अहवा महाराएण । गच्छ दाणिं [हला शकुन्तले मोचितासि अनुकम्पिना आर्य्येण अथवा महाराजेन । गच्छ इदानीम्] ।

PRIYAMVADA—Then certainly it does not deserve parting from the finger. She is now free of debt by the word of your honour. *(Laughing slightly)* Dear Sakuntala, you are released by this kind sir, or by the great king. You may go now.

शकुन्तला (आत्मगतम्)—जइ अत्तणो पहविस्सं [यदि आत्मन: प्रभविष्यामि] । (प्रकाशम्). का तुमं विसज्जिदव्वस्स रुन्धिदव्वस्स वा [का त्वं विस्रष्टव्यस्य रोद्धव्यस्य वा] ।

SAKUNTALA (*Aside*)—If I can control myself. (*Aloud*) Who art thou for one to be discharged or detained ?

राजेति । 'अस्मान्' माम् 'अन्यथा' अन्यप्रकारेण, यथा मया परिचयो दत्त: तद्विपरीतभावेन, 'सम्भाव्य' अनुमान्य 'अलम्' । मा माम् असत्यवादिनं मन्येथाम् ।

"राज्ञः' सकाशात् 'अयं प्रतिग्रहः' एतल्लब्धम्। केन लब्धम् इत्यंशे सन्देहः। "राज्ञः सकाशात् अयं प्रतिग्रहो मे" इति प्रियंवदां बोधयति। वस्तुतस्तु "राज्ञः सकाशात् अयं प्रतिग्रहो भवत्याः" इति आह। अन्यथा असत्यवादी स्यादेव॥ ["प्रतिग्रहोऽयम्" (त-, व्या-)—"प्रतिग्रहोऽयमिति राजपुरुषं मामवगच्छथ" (म-)—"परिग्रहोऽयमिति राजपुरुषं मामवगच्छत" (रा-, वि-)]॥

प्रियंवदेति। 'तेन हि' निमित्तेन, तथा सति इत्यर्थः, यदि राज्ञा तुभ्यं दत्तं तदा, 'एतत् अङ्गुलीयकम् अङ्गुल्या वियोगं' वियोजनं 'न अर्हति'। राज्ञा दत्तं यवतो रत्नं, तदेतत् भवत एव अङ्गुल्यां तिष्ठतु। 'इदानीम् एषा' शकुन्तला, अङ्गुलीयकदानं विनापि 'आर्यस्य वचनेन अनृणा' ऋणमुक्ता। राज्ञो वचनभङ्गीं बुद्ध्वा, राजा एवायम् इति ज्ञात्वा, राजानं प्रति इमां वक्रोक्तिमाह प्रियंवदा—"अहमनामनृणां करोमि" इति यत् आर्यस्य वचनं, राजाज्ञा हि सा, तेनेयम् ऋणमुक्ता, किमङ्गुरीयकेण इति भावः। (इत्थं गूढस्य राजभावस्य प्रकाशात् 'किञ्चित्' ईषत् 'विहस्य', राजसन्निधानसंयता अनुसंहृसित्वा, शकुन्तलां प्रत्याह) 'अनुकम्पिना' त्वयि सदयेन 'आर्येण अथवा महाराजेन' ऋणात् 'मोचिता असि'। अनुकम्पिना इति साभिप्रायं वचः, गूढमत व्यङ्गम्। अनुरक्तोऽयं त्वयि, एनं परित्यज्य यदि गन्तुं शक्नोषि 'गच्छ इदानीम्'।

शकुन्तलेति। गमिष्यामि 'यदि आत्मनः' स्वस्य 'प्रभविष्यामि' प्रभुर्भविष्यामि। आत्मा मे अधुना परवशो जातः तत् कथमयं मया अन्यत्र नीयते? ('प्रकाशं' स्पष्टम्, उच्चैः इत्यर्थः, आह) यो हि जनो 'विसर्ष्टव्यः' विसृष्टुं योग्यः, यो वा 'रोद्धव्यः' रोद्धुमर्हः, तदुभयस्य सम्बन्धे 'त्वं का' इति काकुः। न कापि इत्यर्थः। त्वद्वचनात् कश्चित् यास्यति स्थास्यति वा इति मा मन्यस्व।

NOTES

1. *Reading*—राज्ञः प्रतिग्रहोऽयम्—It is a gift from the king. The sentence is purposely left unfinished. Gift to whom? Fill up the ellipsis to suit facts, or, at your option, to serve as a feint. Thus "From the king *to Priyamvada*" means "I am the king, I give it to you" which is the truth. Or thus "From the

king *to me*" meaning "I got it from the king" which is a feint. Now if we add "इति राजपुरुषं मामवगच्छत" with a कर्मधा—in राजपुरुष instead of the usual षष्ठीतत्—, we gain nothing, but the whole thing loses its refinement and becomes a broad and clumsy feint.

2. (**a**). आर्यस्य वचनेन &c.—The king perhaps succeeded in duping Anasuya, but Priyamvada was too clever to be taken that way. The sly girl retorts "आर्यस्य वचनेन अनृणा"—The king's command has freed her! (See Tika). Then she *laughs* (विहस्य)। The laugh is significant. It is Greek meeting Greek. The laugh says "No! I am not to be caught so easily". Her laugh is *not loud* (किञ्चित्) because she now feels the restraint of royal presence. (**b**). अनुकम्पिना—साधु अनुकम्पते दयते इति अनु+कम्प+णिनि कर्त्तरि साधुकारिणि। तेन। The king is so *thoroughly kind* (साधुकारिणि णिनि:) towards you that he relieves you of the debt. This sort of kindness has its reason. *The king loves you*. Thus the speech is a thrust at both the king and Sakuntala. (**c**). गच्छ इदानीम् Go now, *i. e.*, a moment before you were anxious to go, go then if you can, now that in a manner he has openly avowed his love for you.

3. यदि &c.—I would go if I could. The place has now become too dear to leave.

4. का त्वम् &c.—You are nobody to discharge or detain. Don't you think I would go because you want me to go. I leave or stay as I wish. She feigns perverseness to excuse her stay. विसर्जयितव्यस्य and रोद्धव्यस्य qualify जनस्य understood.

राजा (शकुन्तलां विलोक्य आत्मगतम्)—किं नु खलु यथा वयमस्याम् एवमियमप्यस्मान् प्रति स्यात्। अथवा लब्धावकाशा मे प्रार्थना। कुत: ?—

वाचं न मिश्रयति यद्यपि मद्वचोभि:
कर्णं ददात्यवहिता मयि भाषमाणे।

कामं न तिष्ठति मदाननसम्मुखीयं
भूयिष्ठमन्यविषया न तु दृष्टिरस्याः ॥

KING (*Watching Sakuntala, aside*)—Could it possibly be that she is disposed towards me the same way as I am towards her? Or, my prayer has found scope. (Do you ask) Why?—Though she mingles not her speech with my words, she listens attentively when I am speaking; true, she does not stay looking at my face, but her eye is never engaged long with other objects.

राजेति। ('शकुन्तलां विलोक्य' निपुणं निरूप्य तस्या भावोदयमिव मत्वा 'आत्मगतं स्वं' प्रति)। 'यथा' यद्वत् 'खलु वयमस्यां' शकुन्तलायां वर्त्तामहे 'एवं' तद्वत् 'इयमपि' शकुन्तला 'अस्मान् प्रति स्यात् नु किम्'। अनुरागोऽयं द्वयोरपि आवयोः, उत केवलं ममैव इति वितर्कः॥ निर्णयते—'अथवा' पक्षान्तरे 'मे' मम 'प्रार्थना' प्रणयः 'लब्धः' प्राप्तः 'अवकाशः' अन्तरं यया तादृशी एव। 'कुतः' एवं ब्रवीमि चेत् शृणु—

वाचमिति। अन्वयः—इयं यद्यपि मद्वचोभिः वाचं न मिश्रयति, मयि भाषमाणे अवहिता कर्णं ददाति। कामं मदाननसम्मुखी न तिष्ठति, अस्या दृष्टिस्तु भूयिष्ठम् अन्यविषया न। व्याख्या—'इयम्' एषा शकुन्तला 'यद्यपि' यदि तु 'मम वचोभिः' वचनैः सह 'वाचम्' आत्मनो वचनं 'न मिश्रयति' न योजयति, मया सह न संलपति इत्यर्थः तथापि 'मयि भाषमाणे' वदति लपति सति ["यस्य च भावेन भावलक्षणम्" इति भावे सप्तमी] 'अवहिता' दत्तावधाना सती 'कर्णं ददाति' शृणोति। 'कामम्' एतदप्यनुमन्ये ["अकामानुमतौ कामम्" इत्यमरः] यत् 'मदाननस्य' मम 'मुखस्य सम्मुखी' अनुकूला 'न तिष्ठति' न वर्त्तते, सम्मुखी भूत्वा एव निवर्त्तते इत्यर्थः 'अस्या दृष्टिस्तु' नयनं पुनः 'भूयिष्ठं' बाहुल्येन 'अन्यविषया' इतरसंक्रान्ता 'न'। मां न सम्भाषते, किन्तु मद्वचने सादरा। दृष्टिः मयि पतिता एव संक्रियते सत्यं, किन्तु अन्यत्रापि न तिष्ठति, मयि एव भूयः पतति। तन्मन्ये इयञ्च मयि अनुरक्ता इति भावः॥ ["सम्मुखीयं" (त-, न्या-)—"सम्मुखीना" (रा-, वि-)—"सम्मुखी सा" (म-)]॥

NOTES.

1. (a). किं नु &c.—किं प्रश्ने, नु वितर्के, खलु वाक्यालङ्कारे। "नु वितर्कविमानयो:" इत्यादि मेदिनी। "निषेधवाक्यालङ्कारजिज्ञासानुनये खलु" इत्यमरः। (b). वयम्—Plural or singular by the rule "अस्मदो द्वयोश्च"। (c). अवकाश scope अन्तर। My suit has found scope, *i. e.*, there are signs of reciprocation of feeling, I may therefore persevere. (d). प्र + अर्थ + युच् भावे = प्रार्थना suit.

2. वाचम् &c.—He enumerates the signs he notices. (a). मिश्रं करोति इति मिश्र + णिच् + लट् ति = मिश्रयति mixes. She does not mix her speech with mine, *i. e.*, she does not hold conversation with me. This discourages and accounts for the doubt किं नु खलु &c. (b). अव + धा + क्त कर्त्तरि स्त्रियाम् अवहिता attentive. कर्णं ददाति &c. is encouraging and justifies hope (लब्धावकाशा &c.). (c). सङ्गतं प्राप्तं मुखं यया सा सम्मुखी she who has approached the face, *i. e.*, has faced. "स्वाङ्गाच्चोपसर्जनात्—" इति ङीष्। सम्मुखा is an alternative form. (d). कामम् &c.—*He admits here* she does not face him for any appreciable time. This, he admits (कामम्), looks like a rebuff and raises doubts. But (तु) there is a set-off against it, *viz.*, she does not remain long with her eyes turned away from him. (e). अन्यः मद्व्यतिरिक्तः कश्चित् पदार्थः विषयो यस्याः सा अन्यविषया।

3. (a). *Readings.* अभिमुखम् towards. She turns her ear towards me when I am speaking—does not express the idea as well as अवहिता कर्णं ददाति। (b). सम्मुखीना suppresses the nominative altogether which is not desirable. The choice lies between सम्मुखीयम् and सम्मुखी सा। I prefer the former because the reference being to an object (शकुन्तला) which is before the speaker, it is better spoken of with इदम् शब्द। तद् is used for things out of sight. Compare—"इदमस्तु सन्निकृष्टं समीपतरवर्त्ति चैतदो रूपम्। अदसस्तु विप्रकृष्टं तदिति परोक्षे विजानीयात् ॥"

नेपथ्ये—भो भोस्तपस्विनः, सन्निहितास्तपोवनसत्त्वरक्षायै भवत। प्रत्यासन्नः किल मृगयाविहारी पार्थिवो दुष्यन्तः।

तुरगखुरहतस्तथाहि रेणुर्विटपविषक्तजलार्द्रवल्कलेषु ।
पतति परिणतारुणप्रकाशः शलभसमूह इवाश्रमद्रुमेषु ॥

अपि च—

तीव्राघातप्रतिहततरुस्कन्धलग्नैकदन्तः
पादाकृष्टव्रततिवलयासङ्गसञ्जातपाशः ।
मूर्त्तो विघ्नस्तपस इव नो भिन्नसारङ्गयूथो
धर्मारण्यं प्रविशति गजः स्यन्दनालोकभीतः ॥

(सर्वाः कर्णं दत्त्वा किञ्चिदिव सम्भ्रान्ताः) ।

In the dressing room—O ye ascetics, be close by for the protection of the animals of the forest of penance. King Dushyanta is indeed at hand enjoying a hunt. For, the dust having the colour of the setting sun, struck up by the hoofs of his horses, are, like a host of locusts, settling on the trees of the hermitage to the boughs of which are attached bark-garments wet with water. Moreover, an elephant scared at the sight of the car, having one tusk stuck on to the shoulder of a tree that has been struck back with a violent blow, provided with a noose by clinging coils of creepers dragged with his feet, having dispersed herds of deer, is entering the holy forest as if an embodied obstruction of our penance. (*Listening, all are slightly startled*).

नेपथ्ये इति । 'नेपथ्ये' वेषरचनास्थाने, रङ्गमञ्चात् बहिः, इति वाक् उद्गता— 'तपोवनसत्वानाम्' आश्रममृगाणाम् 'रक्षायै' परित्राणाय 'सन्निहिताः' समीपस्थाः 'भवत' । 'मृगयया' मृगान् विध्यन् 'विहरति' परिचरति इति 'मृगयाविहारी' आखेटयायी 'पार्थिवो' राजा 'दुष्यन्तः प्रत्यासन्नः' अन्तिकचारी 'किल' समागत एव ।

तुरगेति । अन्वयः—तथाहि तुरगखुरहतः परिणतारुणप्रकाशः रेणुः शलभसमूह इव विटपविषक्तजलार्द्रवल्कलेषु आश्रमद्रुमेषु पतति । व्याख्या—'तथाहि' यतः

प्रत्यासन्नत्वात् हि 'तुरगाणाम्' अश्वानां 'खुरैः हतः' उत्थापितः 'परिणतस्य' सान्ध्यस्य 'अरुणस्य' सूर्यस्य 'प्रकाश' इव 'प्रकाशो' दीप्तिर्यस्य तथाविधः, सान्ध्यरविसङ्काशः, आरक्तः इत्यर्थः 'रेणुः' धूलिः 'शलभानां' पतङ्गानां 'समूहः' राशिः 'इव विटपेषु' शाखासु 'विषक्तानि' आसञ्जितानि 'जलार्द्राणि' वारिसिक्तानि 'वल्कलानि' येषां तथाविधेषु 'आश्रमद्रुमेषु' तपोवनतरुषु 'पतति' यावत् धूलिभिर्न दूष्यन्ते तावदपसार्य्यन्तां वल्कलानि इत्यर्थः ।

तीव्रेति । अन्वयः—स्यन्दनालोकभीतः, तीव्राघातप्रतिहततरुस्कन्धलग्नैकदन्तः, पादाकृष्टव्रततिवलयासङ्गसञ्जातपाशः, भिन्नसारङ्गयूथः गजः, नः तपसो मूर्त्तो विघ्न इव, धर्मारण्यं प्रविशति । व्याख्या—'स्यन्दनानां' रथानाम् 'आलोकेन' दर्शनेन 'भीतः' अदृष्टपूर्वत्वात् त्रस्तः, 'तीव्रेण' गुरुणा 'आघातेन' प्रहारेण 'प्रतिहतः' निराकृतो यः 'तरुः' वृक्षः तस्य 'स्कन्धे' लग्नः एको दन्तो' यस्य तथाविधः, दन्तेन विद्धं भग्नं तरुं कर्षन्नेव इत्यर्थः । 'पादेन आकृष्टा' या 'व्रतत्यः' मार्गप्राप्ता लताः, तासां यानि 'वलयानि' मण्डलानि, तेषाम् 'आसङ्गेन' संसर्गेण 'सञ्जातपाशः' प्राप्तबन्धनरज्जुः, पादेन लताजालं वहन् पाशबद्ध इव प्रतीयमानः इत्यर्थः । 'भिन्नानि' विभक्तानि विद्रावितानि 'सारङ्गाणां' मृगाणां 'यूथानि' येन, तथाविधः 'गजः' वनहस्ती 'नः' अस्माकं 'तपसो मूर्त्तो' मूर्त्तिमान् 'विघ्न इव' धृतदेह इव धर्माचरणप्रत्यूहः, 'धर्मारण्यं' तपोवनं 'प्रविशति' ॥ पश्यत भो वनगजोऽयम् अदृष्टपूर्वान् रथान् दृष्ट्वा महता हि भयेन न दक्षिणतो नापि वामतः, किन्तु समरेखमेव धावितः, मार्गे यत् यत् आपतितं तत् सर्वं मर्दयित्वा चलितः । अत्र दन्ताघातपातितं वृक्षं दन्तेनैव वहन्, तत्र दलितानां लतागुल्मानां पादलग्नानि वलयानि पादेनैव कर्षन्, अन्यत्र च हरिणयूथेषु सहसा पतितः तानि विद्रावयन्, तैस्तैः विघ्नैः पदे पदे व्याहन्यमानगमनः नातिवेगमित एव आयाति । तत् त्यजत धर्मकर्माणि, झटिति मार्गमस्मै दत्त्वा आत्मानं रक्षत इति भावः ॥ . "तीव्राघातप्रतिहततरुस्कन्धलग्नैकदन्तः" (म-)—तीव्राघातादभिमुखतरुस्कन्धभग्नैकदन्तः" (त-, व्या-)—"तीव्राघातप्रतिहततरुःस्कन्धलग्नैकदन्तः" (रा-, वि-) ॥ "पादाकृष्ट" (रा-, वि-, म-)—"प्रौढाकृष्ट" (त-, व्या-) ॥ "सङ्गसञ्जात" (रा-, वि-, म-)—"सञ्जनाज्जात" (त-, व्या-)] । ['सर्वाः कर्णं दत्त्वा' श्रुत्वा 'किञ्चिदिव' ईषत् न तु बलवत् 'सम्भ्रान्ताः' त्रस्ताः] ।

NOTES

1. (a). तपोवन &c.—तपसो वनम् तपोवनम्। अश्वघासादिवत् तादर्थ्ये षष्ठी समासः। Or तपःसाधनं वनम्। शाकपार्थिवादिः। तस्य सत्वाः or सत्वानि the animals in the hermitage. तेषां रक्षा protection of the animals &c. तस्यै। तादर्थ्ये चतुर्थी। (b). किल is here निश्चये। प्रति+आ+सद्+क्त कर्त्तरि=प्रत्यासन्नः at hand. प्रत्यासन्नः किल he is surely very near. (c). मृग अन्वेषणे+णिच् स्वार्थे+श भावे निपातनात्=मृगया hunting. This is by the Varttika "परिचर्या परिसर्या मृगया अटाट्यानामुपसंख्यानम्"। तया विहरतीति मृगया+वि+हृ+णिनि ताच्छील्ये कर्त्तरि wandering in quest of game. In the next sloka the speaker gives the reason for his statement.

2. (a). तुरग &c.—तुरेण वेगेन गच्छतीति तुर+गम+ड कर्त्तरि=तुरगाः horses. तेषां खुराः तुरगखुराः। तैः हतः struck up by the horses' hoofs. हतः struck, *i. e.*, struck and thus *raised*. (b). विटप &c.—वि+सञ्ज+क्त कर्मणि=विषक्तानि attached. "उपसर्गात् सुनोति—" इत्यत्र सञ्ज-ग्रहणात् षत्वम्। This is a सकर्मक use of सञ्ज। Compare धुरम् आससञ्ज, चापम् आसज्य &c. विटप is शाखा। "विटपः पल्लवे षिड़्गे विस्तारे स्तम्बशाखयोः" इति विश्वः। विटपेषु विषक्तानि विटपविषक्तानि attached to the boughs. जलेन आर्द्राणि wet with water. विटपविषक्तानि जलार्द्राणि वल्कलानि येषु येषां वा। विपदबहु—। After bath the bark garments were spread out on the branches of trees to dry. (c). परिणत &c.—परि+नम+क्त कर्त्तरि=परिणतः mature. प्रकाशते अनेन इति प्र+काश+घञ् करणे =प्रकाशः lustre. परिणतः अरुणः the mature sun, *i. e.*, the evening sun, the setting sun. तस्य प्रकाशः the glow of the setting sun. स इव प्रकाशो यस्य। बहु—by the Varttika "सप्तम्युपमान—"।

3. *Remark*—This sloka only explains why the speaker thinks the king must be close by and hunting. He is *hunting* because dust is being raised by the horses rushing about after the game. He is *not very far* because the dust is invading the hermitage.

4. अपि च—The speaker next explains why he apprehends danger from the royal hunt.

5. (a). तीव्राघात &c.— आ + हन + घञ् भावे = आघात a blow. तीव्रः आघातः a violent blow. कर्मधा— । तेन प्रतिहतः struck back with a violent blow. इतत्— । [The blow was not intentional. It was a mad rush *through fear*, and he simply ran *against* the tree]. तादृशः तरुः a tree struck back &c. कर्मधा— । तस्य स्कन्धः the trunk of a tree &c. तस्मिन् लग्नः lodged into the trunk &c. [Note the word लग्न । The tusk *got stuck* (लग्न), not that he butted against the tree. *The act was unintentional*]. तादृशः एकः दन्तः यस्य । He had no time to think of extricating his tusk. Such was his terror. (b). पादाकृष्ट &c.—आ + सञ्ज + घञ् भावे = आसङ्गः adhesion, clinging. पादेन or पादैः आकृष्टाः dragged with his feet. इतत्— । तादृश्यः व्रतत्यः creepers dragged &c. कर्मधा— । तासां वलयानि coils of creepers &c. तेषामासङ्गः clinging of coils &c., *i. e.*, आसक्तानि वलयानि the clinging coils. कृदभिहितो भावो द्रव्यवत् प्रकाशते । तेन सञ्जातः पाशो यस्य । This too indicates *haste*. Away he rushed from the seat of danger without stopping to clear his feet from the encumbrances. With the tree to his tusk and the mass of creepers to his feet, he was being hampered in his movement, but his first thought was to put a good distance between himself and the hunters.

6. (a). मूर्त्तः—मूर्छ + क्त कर्त्तरि embodied. (b). विहन्यते अनेन इति वि + हन् + घञर्थे करणे क = विघ्नः obstruction. (c). सारं शबलम् अङ्गमेषाम् इति सार + अङ्ग = सारङ्गाः like शक + अन्धु = शकन्धुः । A kind of spotted deer. तेषां यूथानि herds of spotted deer. भिन्नानि सारङ्गयूथानि येन । These epithets complete the picture of havoc, and indicate what may be expected if he gets into the penance-forest. Trees reared with tender care, shrubs and creepers so assiduously looked after, the pet animals that are like children unto us—all are in danger. (d). धर्मार्थमरण्यं, धर्मस्य अरण्यं, धर्मसाधनमरण्यं वा धर्मारण्यम् । Here ! He is entering our sacred forest. Be quick, there is time yet, for he cannot move fast with his encumbrances.

7. *Readings*—अभिमुख and भग्न in the first line instead of प्रतिहत and लग्न do not show the fright and consequent haste

which are so necessary here. In Raghava's reading स्कन्धनग्नकदम्बः is obscure. पादाकृष्ट is better than प्रौढाकृष्ट because it plainly states *where* the creepers have stuck, and how easily they could have been removed and yet were not removed *through fright and haste.* It is difficult to choose between भग्नसञ्जात and भग्नजात। The former *perhaps* improves the flow of the style and better preserves the uniformity by making a single compound of each पाद in the first half.

राजा (आत्मगतम्)—अहो धिक् पौरा अस्मदन्वेषिण-स्तपोवनमुपरुन्धन्ति। भवतु, प्रतिगमिष्यामस्तावत्।

KING (*Aside*)—O fie, the citizens searching for me are disturbing this forest of penance. Well, I must go back.

सख्यौ—अज्ज, इमिणा आरण्णअवुत्तन्तेण पज्जाउल म्ह। अणुजाणाहि णो उडजगमणस्स [आर्य, अनेन आरण्यक-वृत्तान्तेन पर्याकुलाः स्मः। अनुजानीहि नः उटजगमनाय]।

THE FRIENDS—Noble sir, we are greatly disturbed by this news of the wild elephant. Permit us to return to the cottage.

राजा (ससम्भ्रमम्)—गच्छन्तु भवत्यः। वयमप्याश्रमपीडा यथा न भविष्यति तथा प्रयतिष्यामहे। (सर्वे उत्तिष्ठन्ति)।

KING (*Hurriedly*)—Go noble ones. I too shall arrange that there be no disturbance of the hermitage. (*They all get up*).

सख्यौ—अज्ज, असम्भाविदादिहिसक्कारा भूओवि पेक्खण-णिमित्तं लज्जेमो अज्जं विण्णविदुं [आर्य, असम्भावितातिथि-सत्कारा भूयोऽपि प्रेक्षणनिमित्तं लज्जामहे आर्यं विज्ञा-पयितुम्]।

THE FRIENDS—Noble sir, not having rendered the rites

of hospitality, we are ashamed to request your honour to see us again.

राजेति। 'अहो अस्मान्' माम् 'अन्विष्यन्ति' विचिन्वन्ति ये तथाविधा: 'पौरा:' नागरिका: 'तपोवनम् उपरुन्धन्ति' पीडयन्ति एतत् 'धिक्' गर्हामहे। 'भवतु प्रतिगमिष्याम:' प्रत्यावृत्ता-भविष्याम 'स्तावत्'।

सख्याविति। 'आरण्यकस्य' वनगजस्य 'वृत्तान्तेन' वार्त्तया 'पर्य्याकुला:' सन्त्रस्ता: 'स्म:'। 'न.' अस्मान् 'उटजे' पर्णशालायां 'गमनाय अनुजानीहि' अनुमन्यस्व।

राजेति। (उद्विग्नत्वात् 'सम्भ्रमेण' त्वरया 'सह' यथा तथा आह) 'वयमपि' अहञ्च 'आश्रमस्य पीड़ा' तपोवनोपरोधो 'यथा न भविष्यति तथा प्रयतिष्यामहे' प्रयत्नवान् भविष्यामि। इत्यहमपि गमनार्थम् उद्विग्न एव। ["ससम्भ्रमम्" (रा-, म-)—"असम्भ्रमम्" (वि-)]॥

सख्याविति। 'असम्भावित:' अकृत: 'अतिथे:' आगन्तुकस्य ते 'सत्कार:' पूजा याभि: तथाविधा वयम् 'आर्य्यं' भवन्तं 'भूयोऽपि प्रेक्षणनिमित्तं' दर्शनार्थं 'विज्ञापयितुम्' अभ्यर्थयितुं 'लज्जामहे' लज्जिता भवाम:। अतिथिर्भवान् न च पूजित:, तत् कथं ब्रूम: पुनरपि अत्रागच्छतु इति। यद्येतदुदारतया क्षम्यते भवता, तदागम्यतां भूयोऽपि इति भाव:। ["सत्कारा:" (वि-)]—"सत्कारं" (रा-, त-, न्या-, म-)]॥

NOTES

1. (a). आरण्यक &c.—रणे साधु इति रण+यत्=रण्यम् suitable for battle, *i. e.*, an open space. न रण्यम् अरण्यम् a forest. नञ् तत्—। तत्र दृष्ट इति अरण्य+वुञ्=आरण्यक: a wild elephant. वुञ् is available in this sense by the Varttika "पथ्यध्यायन्यायविहारमनुष्यहस्तिषु इति वक्तव्यम्"। Hence आरण्यको हस्ती, आरण्यको मनुष्य: &c. but आरण्य: पशु: *not* आरण्यक: पशु:॥ (b). उटज &c.—उटजे गमनम् उटजगमनम्। सह सुपेति समास:। तस्मै। तादर्थ्ये चतुर्थी।

2. ससम्भ्रमम्—सम्भ्रम haste त्वरा or संवेग। He was in haste to go back. Compare "भवतु प्रतिगमिष्यामस्तावत्" above. But was waiting impatiently that the suggestion to separate may come from the maidens. The impatience may be read between the

lines in the present speech also. It is owing to these indications of impatience that I have rendered it "hurriedly" ; otherwise the temptation is great to say ससम्भ्रमं सादरम्। "सम्भ्रमः साध्वसेऽपि स्यात् संवेगादरयोरपि" इति विश्वः।

3. *Reading.* असम्भ्रमम्—without being moved—does not commend itself.

4. उत्तिष्ठन्ति—"उदोऽनूर्ध्वकर्मणि" bars the आत्मनेपद here because "to rise" (उत्तिष्ठन्ति) implies ऊर्ध्वकर्म upward action.

5. (a). असम्भावित &c.—सम्यक् भावितः सम्पादितः इति सम्+भू+णिच्+क्त कर्मणि=सम्भावितः rendered. न सम्भावितः। नञ्तत्—। असम्भावितः अतिथिसत्कारः याभिः those that have not rendered the rites of hospitality. बहु—। This gives the reason why they feel delicacy to ask him to come again. (b). प्रेक्षणं दर्शनं निमित्तं कारणं यस्मिन् that in which the motive is to see. तत् यथा तथा। Qualifies विज्ञापयितुम्। (c). भूयोऽपि प्रेक्षणनिमित्तं विज्ञापयितुम् to ask for another interview. विज्ञापयितुम्—वि+ज्ञा+णिच्+तुमुन् भावे, to pray. "अव्ययकृतो भावे" इति भावे तुमुन्। विज्ञापयितुं विज्ञापनं लज्जामहे इत्यन्वयः। The सप्तमी disappears because विज्ञापयितुम् is अव्यय। Also, because it is an अव्यय, we do not get षष्ठी in आर्यम्। The rule "न लोकाव्ययनिष्ठाखलर्थतृनाम्" prohibits षष्ठी in the अनुक्तकर्म in the case of an अव्ययकृत्।

6. *Reading.* "—सत्कारम्" makes the compound qualify आर्यम्। Our reading emphasises the lapse of duty on the part of the maidens, and the admission coming from the maidens themselves adds polish to the speech and imparts to it the force of an almost irresistible appeal for another visit.

राजा—मा मैवम्। दर्शनेनैव भवतीनां पुरस्कृतोऽस्मि।

KING—No, you must not say so. I am rewarded even by the sight of you.

शकुन्तला—अणसूए, अहिणवकुससूईए परिक्खदं मे चलणं, कुरवअसाहापरिलग्गं च वक्कलं। दाव परिपालेध

म्‌ जाव णं मोआवेमि [अनसूये, अभिनवकुशसूच्या परिक्षतं मे चरणं कुरवकशाखापरिलग्नं च वल्कलम्। तावत् परिपालयतं मां यावदेनत् मोचयामि]। (राजानमवलोकयन्ती सव्याजं विलम्ब्य सह सखीभ्यां निष्क्रान्ता)।

SAKUNTALA—Anasuya, my foot is pricked by a young Kusa-shoot, and my bark-garment is caught in a Kuravaka-branch. Do then wait for me until I release it. (*Gazing at the king delaying with pretexts, proceeds to go out with the friends*).

राजेति। 'एवम्' ईदृशम्, अपूजितत्वात् पुनर्दर्शनाय विज्ञापयितुं लज्जध्वे इत्याकारं, 'मा' ब्रूत 'मा' ब्रूत। सम्भ्रमे द्विरुक्तम्। 'भवतीनां' साधुशीलानाम्, असुलभदर्शनानामित्यर्थः 'दर्शनेनैव' [किमुत सम्भाषणेन इत्येवकारार्थः] 'पुरस्कृतोऽस्मि' सत्कृतोऽस्मि। पुण्यदर्शनानां दर्शनमेव सत्कारः, मया तु सम्भाषणमपि लब्धम्। तत् कथमकृतः सत्कारः इति भावः।

शकुन्तलेति। 'अभिनवा' नूतना या 'कुशसूचिः' कुशाग्रं तया, दर्भाङ्कुरेण 'मे चरणम्' [चरणशब्दो द्विलिङ्गोऽपि पुंस्येव भूरिप्रयुक्तः] 'परिक्षतं' गाढं विद्धम्, 'वल्कलञ्च कुरवकस्य' कण्टकबहुलस्य पुष्पवृक्षविशेषस्य 'शाखासु परिलग्नं' दृढं सक्तम्। गाढवेधात् दृढसङ्गाच्च मोचने विलम्बो भविष्यति। तत् 'यावत्' यत्कालम् 'एनत्' चरणं वल्कलञ्च 'मोचयामि', कुशकण्टकात् कुरवकशाखायाश्च इत्यर्थः, 'तावत्' तत्कालं 'मां प्रतिपालयत' प्रतीक्षेथाम्॥ [राघवेण अपठितमेतत्]॥ (इति 'व्याजेन' छलेन 'सह', छलपूर्वकं 'विलम्ब्य'। राजानं पुनरपि द्रष्टुं छल एष उद्भावित इत्यर्थः। 'निष्क्रान्ता' रङ्गमञ्चात् बहिर्यातुं प्रवृत्ता [आदिकर्मणि क्तः])।

NOTES

1. पुरस्कृतः—पुरस् + कृ + क्त कर्मणि Literally—Placed in front. Hence—Honoured.

2. अनसूये &c.—(**a**). कुशस्य सूचिः a shoot of Kusa grass. अभिनव new, and therefore *short*. The shorter the stronger they are, and more likely to hurt the feet. (**b**). In परिक्षत and परिलग्न the

परि is *intensive.* The thorn has gone deep in, the garment has stuck firm—all this is a ruse to tarry a little longer. परिपालि is to wait for. Here the appeal is to अनसूया because she knows the quick-witted प्रियंवदा will meet her with some sharp retort.

3. सव्याजम्—वि + अज गतिक्षेपणयोः + घञ् करणे = व्याजः Lit.—That which diverts attention. Hence छल pretence (अपदेश) ॥ "व्याजः शाठ्यापदेशयोः" इति कोषः। तेन सह। Qualifies विलम्ब्य not निष्क्रान्ता।

4. *Readings.* Raghava omits this passage. But the poet refers to the incident in Act II.—"मिथः प्रस्थाने...शाखासु वल्कल-मसक्तमपि द्रुमाणाम्"। कुरुवक occurs in several editions. But कुरवक is not wrong and seems to be the poet's favourite spelling. Compare the यमक in "मधुलिहां मधुदानविशारदाः कुरवका रवकारणतां ययुः"—Raghu, IX, 29.

राजा—मन्दौत्सुक्योऽस्मि नगरगमनं प्रति। यावदनुयायिकान् समेत्य नातिदूरे तपोवनस्य निवेशयामि। न खलु शक्नोमि शकुन्तलाव्यापारात् आत्मानं निवर्त्तयितुम्। मम हि—

गच्छति पुरः शरीरं धावति पश्चादसंस्थितं चेतः।
चीनांशुकमिव केतोः प्रतिवातं नीयमानस्य ॥

(निष्क्रान्ताः सर्वे)।

KING—I have become less anxious to go back to town. I will meet my followers, and encamp them not far from the penance forest, I cannot indeed bring back myself from occupying about Sakuntala. Mine indeed—Forward goes the body, backward rushes the restless mind like the China-Silk of a banner which is carried against the wind. (*Exeunt all*).

प्रथमोऽङ्कः—THE FIRST ACT.

राजेति। 'नगरं गमनं' प्रत्यावर्त्तनं तत् 'प्रति' [प्रतीति कर्मप्रवचनीययोगे द्वितीया] 'मन्दं' मृदु 'औत्सुक्यम्' उत्कण्ठा यस्य तथाविधः अधुना संवृत्तः 'अस्मि'। शकुन्तलादर्शनेन नगरगमनं न इच्छामि। 'अनुयात्रिकान्' अनुगामिनः 'समेत्य' सम्प्राप्य 'तपोवनस्य नातिदूरे' अनतिदूरे [नञर्थेन नशब्देन सहसुपेति समासः] 'निवेशयामि' संस्थापयामि। आश्रमपीडा मा भूत् इति अतिदूरे एव सेनानिवेशः कर्त्तव्यः, तत् कथं 'नातिदूरे' इत्याह—'शकुन्तलायां' शकुन्तलाविषये 'व्यो व्यापारः' प्रवर्त्तनं 'प्रवृत्तिः' तस्मात् 'आत्मानं निवर्त्तयितुं' निवृत्तं कर्त्तुं 'न शक्नोमि खलु'। अतः तपोवनस्य अतिदूरे न गच्छामि॥ ["नातिदूरे" (रा-, म-)—"अतिदूरे" (त-, न्या-)—"नातिदूरेण" (वि-)॥ "शकुन्तलाव्यापारात्" (रा-, वि-, म-)—"शकुन्तलादर्शनव्यापारात्" (त-, न्या-)]॥

गच्छतीति। अन्वयः—प्रतिवातं नीयमानस्य केतोरिव मम हि शरीरं पुरो गच्छति चीनांशुकमिव असंस्थितं चेतः पश्चात् धावति। व्याख्या—'प्रतिवातं' वायोः प्रतिकूलं 'नीयमानस्य' उह्यमानस्य न तु स्वयं गच्छतः [केतुपक्षे अचेतनत्वात्, राजपक्षे औत्सुक्याभावात्] 'केतोरिव' ध्वजस्येव 'मम हि' मम तावत् 'शरीरं' केतुपक्षे ध्वजदण्डः, राजपक्षे वपुः 'पुरः' अग्रे 'गच्छति' मन्दं मन्दं चलति 'चीनांशुकं' चीनदेशोद्भवं ध्वजवसनम् 'इव असंस्थितम्' अस्थिरं चञ्चलम् [चीनांशुकपक्षे लाघवेन हेतुना वायुना अभिभूतत्वात्, चेतःपक्षे शकुन्तलाव्यापारेण अभिभूतत्वात्] 'चेतः' चित्तं 'पश्चात् धावति' जवेन याति [सर्त्तेः वेगितायां गतौ धावादेशः]। कर्त्तव्यबुद्धिर्मां नयति न त्वहमितो यामि। तेनाह ध्वज इव। शकुन्तला च वातसंहतिरिव। शरीरं मे ध्वजदण्ड इव, चेतश्च ध्वजवसनमिव। शकुन्तलारूपाया वातसंहतेः प्रतिकूलमहं कर्त्तव्यबुद्धिना नीयमानः। देहो मे ध्वजदण्ड इव मन्दं पुरो याति, चेतस्तु अस्थिरं सत् ध्वजवसनमिव पश्चात् धावति। अत इव शब्दो द्विः पाठ्यः॥ ["असंस्थितं" (त-, वि-, न्या-)—"असंस्तुतं" (रा-, म-)]॥

('सर्वे' अभिनेतारो जनाः 'निष्क्रान्ताः' रङ्गमञ्चात् बहिर्गताः। तदानीमपि सखीभ्यां शकुन्तला बहिर्न गता। इतः पूर्वं गन्तुमारब्धा हि सा। व्याजविलम्बोऽपि जातः। अधुना च सर्वे अपि, राजा सख्यौ शकुन्तला च इत्यर्थः 'निष्क्रान्ताः')।

NOTES

1. (**a**). अनुयायिकान्—अनु पश्चात् याता गमनम् अनुयाता। सा अस्ति एषाम् इति ठन् इति वाचस्पतिः। Followers. तान्॥ (**b**). नातिदूरे अनुयायिका निविशन्ते gives with णिच्—नातिदूरे अनुयायिकान् निवेशयामि। अकर्मकत्वात् अणिकर्त्तुः कर्मसंज्ञा। The क्रिया here makes नातिदूरे a सत्त्ववचन word, *i. e.*, it refers to some पदार्थ। Hence अधिकरणे सप्तमी॥ (**c**). तपोवनस्य may be explained as शेषे षष्ठी or "दूरान्तिकार्थैः षष्ठी अन्यतरस्याम्" इति दूरार्थनातिदूरशब्दयोगात् षष्ठी। पक्षे पञ्चमी॥ (**d**). आत्मानम् इति अणिकर्त्तुः कर्मसंज्ञा।

2. धावति—सृ + लट् तिप् becomes धौ + लट् तिप् when the root means 'to move *fast*'. सम् + स्था + क्त कर्त्तरि = संस्थितम् steady. न संस्थितम् unsteady. गच्छति शरीरम् the body moves *slowly* forward; धावति चेतः the mind *rushes*. Note the contrast; one moves *slow*, the other goes *quick*. केतु is banner (ध्वज) which includes the staff and the flag. चीनजम् अंशुकं वस्त्रं चीनांशुकम्।

3. *Reading*—Raghava has असंस्तुतम् which he explains शरीरेण अपरिचितम् which has become a stranger to the body. It is difficult to apply the meaning here.

द्वितीयोऽङ्कः ।



(ततः प्रविशति विषण्णो विदूषकः)

विदूषकः (निश्वस्य)—भो दिट्टं । एदस्स मिअआसीलस्स रण्णो वअस्सभावेण णिव्विण्णो म्हि [भो दिष्टम् । एतस्य मृगया-शीलस्य राज्ञो वयस्यभावेन निर्विण्णोऽस्मि] । अअं मिओ, अअं वराहो, अअं सद्दूलो त्ति मज्झण्हे वि गिम्हविरलपाअवच्छाआसु वणराइसु आहिण्डीअदि अडवीदो अडवी [अयं मृगः, अयं वराहः, अयं शार्दूलः, इति मध्याह्नेऽपि ग्रीष्मविरलपादपच्छायासु वनराजिषु आहिण्ड्यते अटवीतः अटवी] । पत्तसङ्करकसाआइं कडुआइं गिरिणईजलाइं पीअन्ति [पत्रसङ्करकषायाणि कटुकानि गिरिनदीजलानि पीयन्ते] । अणिअदवेलं सुल्ल-मंसभूइट्ठो आहारो अण्हीअदि [अनियतवेलं शूल्यमांसभूयिष्ठ आहारो भुज्यते] । तुरगाणुधावणकण्डिदसन्धिणो रत्तिम्मि मे णिकामं सयिदव्वं णत्थि [तुरगानुधावनकण्डितसन्धेः रात्रावपि मे निकामं शयितव्यं नास्ति] । तदो महन्ते एव्व पच्चूसे दासीएपुत्तेहिं सउणिलुद्धएहिं वणग्गहणकोला-हलेण पडिबोधिदो म्हि [ततो महति एव प्रत्यूषे दास्याःपुत्रैः शकुनिलुब्धकैः वनग्रहणकोलाहलेन प्रति-बोधितोऽस्मि] । एत्तएण दाणिं वि पीडा ण णिक्कमदि

[इयता इदानीमपि पीड़ा न निष्क्रामति]। तदो गण्डस्स उवरि पिण्डओ संवुत्तो [ततो गण्डस्य उपरि पिण्डकः संवृत्तः]। हिओ किल अम्हेसु ओहीणेसु तत्तहोदो मिआणुसारेण अस्समपदं पविट्टस्स तावसकण्णआ सउन्दला मम अधण्णदाए दंसिदा [ह्यः किल अस्मासु अवहीनेषु तत्र-भवतो मृगानुसारेण आश्रमपदं प्रविष्टस्य तापसकन्यका शकुन्तला मम अधन्यतया दर्शिता]। संपदं णअरगमणस्स मणं कहं वि ण करेदि [साम्प्रतं नगरगमनाय मनः कथमपि न करोति]। एव्वं एव्वचिन्तअन्तस्स मे पहादा अच्छिसु रअणी [एवमेव चिन्तयतः मे प्रभाता अक्ष्णोः रजनी]। का गदी। जाव णं किदाचारपरिकम्मं पेक्खामि [का गतिः। यावदेनं कृताचारपरिकर्माणं प्रेक्षे]। (परिक्रम्यावलोक्य च) एसो बाणासणहत्थाहिं जवणीहिं वणपुप्फमालाधारिणीहिं पड़िवुदो इदो एव्व आअच्छदि पिअवअस्सो [एष बाणासनहस्ता-भिर्यवनीभिः वनपुष्पमालाधारिणीभिः परिवृतः इत एव आगच्छति प्रियवयस्यः]। होदु, अङ्गभङ्गविअलो विअ भविअ चिट्ठिस्सं, जइ एव्वं वि णाम विस्समं लहेयं [भवतु अङ्ग-भङ्गविकल इव भूत्वा स्थास्यामि, यदि एवमपि नाम विश्रमं लभेय]। (दण्डकाष्ठमवलम्ब्य स्थितः)।

(*Then enter Vidushaka in a drooping mood*) VIDUSHAKA (*Sighing*)—O my luck! I am distressed by the friendship of this chase-loving king. "Here is a stag," "there goes a boar", "yonder escapes a tiger", thus we have to rush, even in mid-

day, from thicket to thicket, in rows of forests where, as it is summer, the shade of the trees is scanty. Waters of mountain-streams, brown through the mixture of leaves and bitter, have to be drunk. Meals, mostly of spitted meat, have to be eaten at irregular hours. With the joints bruised by galloping on horse-back, there is not much lying down for me even at night. Then, even at the earliest dawn, I am aroused by the din of sorrounding the forest by the sons of slaves—the bird-catchers. My trouble does not cease with even so much. Boil has now formed on the abscess. Only yesterday, while we lagged behind, Sakuntala, the hermit's daughter, was by my cursedness shown to his Highness as he entered the site of the hermitage in pursuit of a stag. Now on no account does he turn his mind towards going back to town. Even as I was thinking thus, night passed and dawn came to my eyes. Can't help ! I must see him when he has finished his usual morning duties. (*Going round the stage and looking about*) Here, my dear friend comes this very way surrounded by Yavana women who have bows in their hands and are wearing garlands of wild flowers. Well, I will stay looking as if powerless through palsy of limbs, if even thus I may get rest. (*Stands leaning on his staff*).

तत इति । ('विदूषकः' इति राज्ञो नर्मसहायः विकृतवेषो विकलाङ्गो ब्राह्मणविशेषः 'विषण्णः' खिन्न इव लक्ष्यमाणः 'प्रविशति') ।

विदूषक इति । 'भो दिष्टम्' अहो मे भागधेयम् । आत्मनः अदृष्टस्य गर्हणमेतत् ["दिष्टं दैवं भागधेयम्" इत्यमरः] । 'मृगयाशीलस्य' मृगयारतस्य 'एतस्य राज्ञो' दुष्यन्तस्य 'वयस्यभावेन' सखित्वेन ["वयस्यः स्निग्धः सवयाः" इत्यमरः] 'निर्विण्णः' खिन्नः 'अस्मि' ["निर्विण्णस्योपसंख्यानम्" इति णत्वम्] । 'ग्रीष्मे च' आतपेन 'विरला' मन्दा 'पादपच्छाया' यासु तथाविधासु 'वनराजिषु' काननश्रेणिषु अस्माभिः 'अटवीतः' एकाम् अटवीं गुल्मं विहाय [ल्यब्लोपे कर्मणि पञ्चमी] 'अटवीं'

अन्यो गुल्मः 'आहिण्ड्यते' अनुधाव्यते। इत्येवं विहारे खेदकारणम्। 'पत्राणां' गलितपर्णानां 'सङ्करेण' मिश्रणेन 'कषायाणि' आरक्तानि ["कषायो रसभेदे स्यात्" इत्युपक्रम्य "सुरभौ लोहिते त्रिषु" इति मेदिनी] 'कटुकानि' तीव्ररसानि 'गिरिनदीनां' प्रस्रवणानां 'जलानि पीयन्ते'। इति च पानीये खेदकारणम्। 'शूल्यं' शूलपक्वं यत् 'मांसं' तेन 'भूयिष्ठः' बहुलः 'आहारः' ओदनः 'अनियता' अनिश्चिता 'वेला' समयः यस्मिन् कर्मणि तत् यथा तथा 'भुज्यते'। अरुचिकरो गुरुपाकश्च ओदनः, सोऽपि पुनरसमये, इति आहारे खेदस्थानम्। 'तुरगेण' अश्वेन यत् 'अनुधावन' मृगानुसरणं तेन 'कण्डिताः' कुट्टिताः 'सन्धयः' यस्य तथाविधस्य 'मे रात्रावपि निकामं' यथेष्टं 'शयितव्यं नास्ति' शय्यासेवनं न भवति। ततो रजन्याश्चतुर्थे यामे यदा स्वल्पं सुप्तं तदा 'दास्याः-पुत्रैः' निन्दितजन्मभिः ["पुत्रेऽन्यतरस्याम्" इति कुत्सायामलुक्] एभिः 'शकुनिलुब्धकैः' पक्षिव्याधैः 'महति एव प्रत्यूषे वनग्रहणस्य' वनवेष्टनस्य यः 'कोलाहलः' आरावः तेन 'प्रतिबोधितोऽस्मि'। यथा विहारे तथा च आहारे, तथैव पुनर्मे शयने खेदः, अहो मे दुरदृष्टम्। 'इदानीम्' इति वाक्यालङ्कारे 'इयता अपि' एतावता च 'मे पीडा न निष्क्रामति' न मे क्लेशस्य अवसानम्। 'ततो गण्डस्य' स्फोटस्य 'उपरि पिण्डः' स्वल्पः स्फोटः 'संवृत्तः' जातः [एषा लौकिकोक्तिः]। तदेव दर्शयति— 'ह्यः' पूर्वस्मिन् दिने 'किल अस्मासु अवहीनेषु' पश्चात् स्थितेषु 'मृगस्य अनुसारः' अनुसरणं, तेन मृगमनुसृत्य इत्यर्थः 'आश्रमपदं' तपोवनभूमिं 'प्रविष्टस्य तत्रभवतो' राज्ञो दुष्यन्तस्य, प्रविष्टाय तत्रभवते इत्यर्थः [चतुर्थीस्थाने षष्ठी] 'तापसकन्यका शकुन्तला मम अधन्यतया' दुरदृष्टेन 'दर्शिता'। मन्ये ममैव दग्धभाग्यं राजानं तत्र वाहयित्वा शकुन्तलामस्मै दर्शयामास। 'साम्प्रतम्' अधुना शकुन्तलां दृष्ट्वा इत्यर्थः 'कथमपि' केनापि प्रकारेण 'नगरगमनस्य मनो न करोति', सर्वथा नगरगमनं परिहर्त्तुमिच्छति। 'एवमेव' इत्याकारेणैव 'चिन्तयतः' दुर्भाग्यं पर्य्यालोचयतो 'मे अक्ष्णोः' अनिमीलितयोः लोचनयोः, अनिमीलती लोचने अनादृत्य ["षष्ठी चानादरे" इति चकारात् सप्तमी] 'रजनी प्रभाता'। 'का गतिः' क उपायः। सर्वमेतत् सहनीयम्। यद्यपि ईदृशमनिशं खिद्यमानः, अद्य च पुनर्जाग्रत एव रात्रिर्याता, तथापि किं करिष्ये ? 'यावत् एनं' राजानं 'कृतम्' अनुष्ठितम् 'आचारप्रश्न' यथाचारं

कुलाचारोक्तं 'परिकर्म' सज्जा, यद्वा कृतम् आचारः प्रातःकृत्यं परिकर्म च येन तादृशं 'प्रेक्षे' द्रक्ष्यामि। परिकर्मणि समाप्ते गत्वा तस्मै आत्मानं निवेदयामि इत्यर्थः। ('परिक्रम्य' रङ्गमञ्चं परितो गत्वा 'अवलोक्य' अग्रतो दृष्ट्वा च) 'एष प्रियो' मे 'वयस्यः' मित्रं, राजा इत्यर्थः 'वनपुष्पाणां मालां धारयन्ति' याः ताभिः 'बाणासनं' धनुः 'हस्तं' यासां ताभिः 'यवनीभिः यवनरमणीभिः 'परिवृतः' वेष्टितः सन् 'इत एव' अस्यामेव दिशि 'आगच्छति'। अयं हि मृगयां प्रति चलित एव लक्ष्यते, मामपि मन्ये अन्विष्यन् आगच्छति इत्यर्थः। 'भवतु अङ्गानां भङ्गेन विकलो' जड इव 'भूत्वा स्थास्यामि यदि एवमपि नाम विश्रमं' विश्रान्तिम् ["नोदात्तोपदेशस्य मान्तस्यानाचमेः" इति घञि वृद्धिनिषेधः] 'लभेय' ('दण्डस्य' यष्टेः 'काष्ठम् अवलम्ब्य' तदाश्रित्य 'स्थितः')। ["एवमेव चिन्तयतो मे प्रभाता अक्ष्णोः रजनी" (त-, न्या-)—"अद्यापि तस्य तामेव चिन्तयतः अक्ष्णोः प्रभातमासीत्" (रा-, वि-, म-)॥ "कृताचारपरिकर्माणं" (म-)—"कृताचारपरिक्रमं" (रा-, वि-)—"कृतदारपरिग्रहं" (त-, न्या-)॥]

NOTES

1. *Summary.* अथ प्रभातायां रात्रौ तामेव मुनिकन्यकां ध्यायता निरुत्साहेन राज्ञा मृगया प्रतिषिद्धा। ततो विदूषकेण सह इत्थमभूत तस्य शकुन्तलागतो मन्त्रः—

राजा। माधव्य, रमणीरत्नं किल सा।

माध। रत्नं चेत्, राजग्राह्यं हि तत्। झटिति गृह्यताम्।

राजा। दूरे पिता प्रदाता, कथं झटिति गृह्येत ?

माध। अस्ति तत्राप्युपायः। ब्रूहि कीदृशी सा त्वयि।

राजा। ननु सानुरागा।

माध। तर्हि गान्धर्वोऽनुष्ठीयताम्।

राजा। युज्यते। कथय पुनः कथमनाहूतो राजाहं तत्र यायाम्।

एवं संवदमानयोस्तयोः कण्वशिष्याभ्यामागत्य यागविघ्नं विज्ञाप्य राक्षसवधार्थं राजा आहूतः। ततः सपदि सहर्षे राजनि सज्जे नगरात् राजमातुर्दूतः प्राप्तः। तस्मात् पुत्रकृत्यार्थं तूर्णं नगरगमनं प्रति मात्रादेशं श्रुत्वा सम्भ्रान्तो राजा माधव्यमात्मनः प्रतिनिधीकृत्य ससैन्यं नगरं प्रेषयामास। तत्र वञ्चयन्नाह सखे ऋषिगौरवादपोवनं

यामि मुनिसुतायां तु न मे प्रणयः। सोऽपि मूढत्वादिव तथ्यं मेने। ततः स्वस्थो राजा भूयोऽप्याश्रमं ययौ।

2. तत &c.—The Jester enters with a dejected look. He is a Brahmana—the king's companion. "विकृताङ्गवचोवेशैर्हास्यकारी विदूषकः"। He should excite laughter by his deformities, speech and attire. He is proverbially timid. Here he bemoans his luck.

3. (a). दिट्टम्—Raghava renders it दृष्टम्। "भो दृष्टम्?" is then a query. Have you seen? दिट्टम् is surely better. (b). मृगयाशीलस्य—मृग अन्वेषणे+श भावे स्त्रियां निपातनात्=मृगया hunting. तां शीलयति इति मृगया+शील+णिच्+ण कर्त्तरि addicted to chase. तस्य। (c). वयस्यभावेन—वयस्य Friend. तस्य भावः Friendship. तेन। इत्थं तृतीया। (d). निर्+विद्+क्त कर्त्तरि=निर्विण्णः disgusted. (e). एतस्य &c.—The king won't let me leave his side for a moment, he is so fond of me. But how can I, a cripple, keep pace with him when he is rushing at a break-neck speed after the quarry. All relish for life is gone out of me.

4. अयं मृगः &c.—(a). From मध्यम् अह्नः—the middle of the day—we expect अहर्मध्यम् because the rule for एकदेशिसमास mentions पूर्व, अपर, अधर, उत्तर only, not मध्य also. But पाणिनि himself refers to सायाह्न—The end of the day—in the rule "सङ्ख्या-वि-साय-पूर्वस्य अह्नस्य अहन् अन्यतरस्यां ङौ"। Hence the inference सर्वोऽप्येकदेशः अह्ना समस्यते—*all* parts are compounded with अहन् in an एकदेशि-समास। Some go even further and say सर्वोऽप्येकदेशः कालेन समस्यते। The समास being thus allowed we get पूर्वनिपात of मध्य giving मध्य+अहन्। The rule "अह्नोऽह्न एतेभ्यः" directs अह्न to be substituted after an एकदेश। Hence मध्याह्न। Next by the rule "परवल्लिङ्गं द्वन्द्वतत्-पुरुषयोः" this ought to be neuter because अहन् is neuter. But the rule 'रात्राह्नाहाः पुंसि' interferes and we get मध्याह्नः। तस्मिन्। (b). ग्रीष्म &c.—ग्रीष्म Heat आतपः, or Summer निदाघः। ग्रीष्मेण विरला ग्रीष्मविरला scanty because of summer. सह सुपेति समासः। पादैन पिबति

इति पाद + पा + क कर्त्तरि = पादप: a tree. जातावेकवचनम्। पादपस्य छाया पादपच्छाया the shade of trees. ग्रीष्मविरला पादपच्छाया यासु। Or पादपानां छाया पादपच्छायम्। Neuter by the rule "छाया बाहुल्ये"। ग्रीष्मविरलं पादपच्छायं यासु। Most trees shed their leaves towards the end of winter and do not get back their full foliage before the rains. Hence the shade is poor in summer. (c). वनराजिषु—वनानां राजय: rows of forests. तासु। (d). आ + हिण्ड गतौ + ल्युट् ने भावे [हिण्डते, जिहिण्डे, अहिण्डिष्ट]। (e). आहार, विहार, शयन these are the main headings on the physical side under which the pleasures of life may be arranged. The Jester here shows how wretched his life has now become so far as विहार is concerned.

5. (a). पत्र &c.—सम् together + कॄ + अप् + भावे = सङ्कर: mixture. पत्राणां सङ्कर: admixture of leaves. तेन कषायाणि। सह्सुपेति समास:। (b). गिरि &c.—गिरौ नद्य: or गिरिसम्भवा नद्य: गिरिनद्य: or गिरिणद्य: mountain-streams. The ण is optional by the Varttika "गिरि-नद्यादीनामुपसंख्यानम्"।

6. (a). अनियत &c.—नि + यम + क्त कर्मणि = नियता restricted, i. e., fixed. न नियता not fixed, i. e., irregular. नञ्तत्—। (b). शूले संस्कृतम् इति शूल + यत् = शूल्यम् roasted on spits. शूल्यं मांसम् spitted meat, कर्मधा—। तेन भूयिष्ठ:। ३तत्—। (c). आहार is a wide term including पान and भोजन। Here he first speaks of पान—The water we drink is brown and bitter! Next भोजन is described —We have to eat half-roasted tough meat, and even that not in time! It seems more natural to render अश्यते by अश्यते, but all commentators have भुज्यते।

7. (a). तुरग &c.—अनु + धृ वेगगमने + ल्युट् भावे = अनु + धौ + ल्युट् = अनुधावनम् pursuit. तुरं त्वरितं गच्छतीति तुर + गम + ड कर्त्तरि = तुरग: a horse. तेन अनुधावनम् galloping on horse-back. ३तत्—। This may be to keep company with the king, or independently. तेन कण्डिता: dislocated by galloping &c. कडि भेदने चुरादौ परस्मैपदी। (b). नि + कम + घञ् कर्मणि = निकामम् as much as desired, i. e., enough. क्लीवत्व-संभिधानात् इति वाचस्पति:। तत् यथा तथा। Qualifies शयितव्यम। (c).

My joints ache at night as if broken and I do not get sufficient sleep to refresh myself.

8. (a). ततः &c.—प्रत्यूषति रुजति इति प्रति+ऊष+क कर्त्तरि= प्रत्यूषः dawn. (b). दास्याःपुत्रैः—It is a compound—अलुकसमास। दासीपुत्रैः is also possible. Does not mean that their mothers were actually slaves, but used merely as an abuse. (c). शकुनि &c.—शकुनि Bird. "शकुनिः पुंसि विहगे" इति मेदिनी। तेषु लुब्धः a bird-catcher. स एव इति स्वार्थे कः। Or लुब्ध एव लुब्धकः hunter. शकुनिषु or शकुनीनां लुब्धकः। तैः। अनुक्ते प्रयोजके कर्त्तरि ३या। (d). वन &c.—वनानां ग्रहणम् surrounding the forests. तस्य कोलाहलः। तेन। (e). शयन is here taken up in two stages—the mere lying down and the sleep. It is painful to lie down. No sleep before the morning hours, but then the disturbance is awful. Thus his lot is truly miserable.

9. (a). पीड़ा—पीड़+अ भावे trouble. (b). निष्क्रामति—निस्+ क्रम+लट् ति। Goes out, i. e., leaves. The disease has got hold of me. (c). The पीडा is वनवास and मृगया। It ceases by going back to town. But this has become almost out of the question now. The reason follows.

10. (a). ह्यः &c.—ह्यस् is an अव्यय meaning पूर्वस्मिन् दिने। (b). अस्मासु—भावे सप्तमी। (c). अवहीनेषु—अव+हा (त्यागे परस्मैपदी)+क्त कर्म्मणि=अवहीनाः left behind. तेषु। (d). तापस &c.—तपः अस्यास्तीति तपस्+अण् मत्वर्थे। कन्या एव कन्यका not कन्यिका। Just as तारा gives तारका not तारिका। Or कन्यिका also like इभ्यिका। तापसस्य कन्यका। (e). अधन्यतया—धनं लब्धा इति धन+यत्=धन्यः blessed. धन्यता blessedness. अधन्यता cursedness. तया। अनुक्ते कर्त्तरि तृतीया। (f). नगरगमनस्य— चतुर्थ्यर्थे षष्ठी। Hence he does not want to go back to town ; my troubles will not therefore cease.

11. अन्योः—शेषे षष्ठी। अन्योः सम्बन्धे प्रभाता। Or सप्तमी as in Tika.

12. (a). यावत् is अवधारणे। (b). कृताचार &c.—परिकर्म is अङ्ग-संस्कार decoration. स्नानोद्वर्त्तनादि। आचारप्राप्तं परिकर्म आचारपरिकर्म customary decorations. शाकपार्थिवादि। कृतम् आचारपरिकर्म येन।

13. (a). बाणासन &c.—बाणा अस्यन्ते अनेन इति बाण + अस + ल्युट् करणे = बाणासनम् bow. तत् हस्ते यासां ताभिः। बहु—। हस्त is गड्वादि, hence the परनिपात। (b). वनपुष्प &c.—वनजानि पुष्पाणि wild flowers. शाकपार्थिवादि। तेषां माला:। तां धारयन्तीति वनपुष्पमाला + धृ + णिच् + णिनि कर्त्तरि स्त्रियाम्। ताभिः।

14. (a). अङ्ग &c.—विगता कला यस्य स विकलः deficient ; hence, powerless. अङ्गानां भङ्गः failure of the limbs. तेन विकलः powerless through the failure of the limbs. (b). लभेय—लभ + ईय। शकि लिङ्।

15. *Readings.* (a). दृष्टम् for दिष्टम् ignores the drift of the Jester's speech. He is cursing his luck. "मम अधन्यतया" confirms this. (b). अद्यापि तस्य &c. does not fit in with का गतिः, because का गतिः shows he is still lamenting his *own* misfortune. एवमेव &c. gives the cause for lament. Usually he takes a wink before the hunters commence shouting, but last night owing to these distracting thoughts even that wink was denied him. Hence the lament का गतिः &c. (c). कृतदारं &c. seems absurd.

(ततः प्रविशति यथानिर्दिष्टपरिवारो राजा)। राजा (आत्मगतम्)—

कामं प्रिया न सुलभा मनस्तु तद्भावदर्शनाश्वासि।
अकृतार्थेऽपि मनसिजे रतिमुभयप्रार्थना कुरुते॥

(स्मितं कृत्वा) एवमात्माभिप्रायसम्भावितेष्टजनचित्तवृत्तिः प्रार्थयिता विडम्ब्यते।

(*Then enters the king with attendants as described*). KING (*Aside*)—True, my darling is not easily obtainable, yet my mind is comforted by observing her gestures of love. Mutual solicitations give pleasure, even when love has not yet gained its object. (*Smiling*) Thus is deluded the suitor who has judged by his own wishes the working of the mind of his beloved person.

('यथा' यद्वत् 'निर्द्दिष्टः' तथैव 'परिवारा' यस्य यवनीपरिवृत इत्यर्थः) ।

राजेति । अन्वयः—प्रिया सुलभा न कामम्, तु मनः तद्भावदर्शनाश्वासि । मनसिजे अकृतार्थेऽपि उभयप्रार्थना रतिं कुरुते । व्याख्या—'प्रिया' शकुन्तला 'सुलभा न' सुखप्राप्या न, सुदुर्लभा इत्यर्थः, 'कामम्' इत्येतत् अभ्युपगमार्थ्यं मे । तर्हि त्यज्यतां तत्प्रार्थना इति चेत् न—'तु' किन्तु प्रियायाः सुदुर्लभत्वेऽपि 'मनः' चेतो मे 'तस्याः' शकुन्तलाया 'भावदर्शनेन' अनुरागचिह्नं दृष्ट्वा 'आश्वासि' आश्वस्तं भवति । सुदुर्लभा प्रिया, इति निराशस्य चित्तस्य शकुन्तलाया भावदर्शनात् किञ्चिदिव दुःखोपशमो भवति इति भावः । आश्चर्यं यत् दुर्लभं ज्ञात्वापि सुखं लभते, इति हेतुमाह—'मनसिजे' कामे 'अकृतार्थेऽपि' असिद्धेऽपि, प्रार्थिते अलब्धेऽपि इत्यर्थः 'उभयोः' नायकनायिकयोः 'प्रार्थना' परस्पराभिलाषः 'रतिं' प्रीतिं 'कुरुते' जनयति । यथा अहमस्मिन्, तथा अयमपि जनो मयि, इति ज्ञानात् सुखम् । अतएव दुर्लभा शकुन्तला इति जानतोऽपि मम, मयि तस्या अनुरागं दृष्ट्वा प्रीतिर्भवति इति भावः ॥ ["दर्शनाश्वासि" (त-, न्या-, म-)—"दर्शनायासि" (रा-, वि-)] ॥

('स्मितं कृत्वा' ईषत् हसित्वा । उत्कृष्टपात्रत्वात् 'स्मित'पदोल्लेखः) स्मित-कारणमाह—'आत्मनः' स्वस्य 'अभिप्रायेण' चित्तवृत्त्या 'सम्भाविता' निरूपिता 'इष्ट-जनस्य' प्रीतिपात्रस्य 'चित्तवृत्तिः' येन तादृशः, यथा अहमस्मिन् तथा अयं जनोऽपि मयि इति मन्यमानः 'प्रार्थयिता' प्रणयी 'विडम्ब्यते' वञ्चनां लभते । शकुन्तलायाश्चेष्टि-तानि कन्दर्पकृतानि इति कोऽत्र निर्णयः ? प्रणयवान् अहं न केवलं तानि कामकृतानि मन्ये, अपि तु मद्विषयाणि, ततश्च मे आश्वासोऽपि, इत्यहो विडम्बना—इति स्मितम् ।

NOTES

1. यथानिर्द्दिष्ट &c.—परिवार्य्यते अनेन इति परि + वृ + णिच् + घञ् करणे = परिवारः or परीवारः attendants. "उपसर्गस्य घञि अमनुष्ये बहुलम्" इति दीर्घविकल्पः । यथा निर्द्दिष्टः यथानिर्द्दिष्टः as described. सहसुपेति समासः । तादृशः परिवारो यस्य । बहु—

2. (a). प्रिया न सुलभा—She is प्रिय: yet not सुलभ। This should cause *anguish and despair*. But it does not. The reason follows—(b). मनस्तु &c.—तस्या भावः । तस्य दर्शनम् । तेन साधु

'आश्वसिति इति तद्भावदर्शन + आ + श्वस + णिनि कर्त्तरि। Mind derives comfort on seeing her indications of love. I admit there is ground for anguish and despair, but lo! I derive comfort by merely watching her. (c). अकृतार्थं—कृत: अर्थ: यस्य येन वा कृतार्थ: having the object accomplished. बहु—। न कृतार्थ:। (d). मनसिजे—मनसि जात: इति मनस् + जन् + ड कर्त्तरि भूते = मनसिज: love. तस्मिन्। (e). उभय-प्रार्थना—प्र + अर्थ + युच् भावे = प्रार्थना solicitation. उभयो: प्रार्थना। उभ becomes उभय when compounded. वृत्तिविषये उभशब्दस्य नित्यमयच्-प्रत्ययो भवति। उभ is dual and विशेष्यलिङ्ग but उभय is *usually* singular and neuter. (f). The second half of the sloka supports the first half. Hence we have अर्थान्तरन्यास of the kind सामान्येन विशेषसमर्थनम्। See under "आ परितोषाद्विदुषाम्" &c. *Prelude* (g). Compare—"परस्परप्राप्तिनिराशयोर्वरं शरीरनाशोऽपि समानुरागयो:"—मालविकाग्निमित्रम्।

3. *Reading.* With the reading दर्शनायासि explain तद्भावदर्शनाय आयस्यति इति तद्भावदर्शनायासि tries to watch her gestures of love. The second half offers the reason. *Because* उभयप्रार्थना रतिं कुरुते, *therefore* तद्भावदर्शनायासि। From this it does not by any means follow that "तद्भाव" *necessarily* exists. There is merely the *watching for indications*; that is all. On the other hand तद्भाव-दर्शनाश्वासि implies two things—(1) the assumption that तद्भाव really exsists; (2) hopes cherished in consequence. If then the assumption is false, the situation becomes ludicrous, and justifies the *smile* and also the *remark* that follows. I therefore prefer आश्वासि।

4. (a). आत्माभिप्राय &c.—अभि + प्रीञ् तर्पणे + भावे घञ् = अभिप्राय: wish आशय:। Or अभिमुखं प्रकर्षेण अयते अनेन इति अभि + प्र + अय गतौ + घञ् करणे। सम् + भू + णिच् + क्त कर्मणि = सम्भाविता assumed प्रकल्पिता। आत्मन: अभिप्राय:। ६तत्—। इष्ट: जन: the desired person, i. e., the beloved. कर्मधा—। चित्तस्य वृत्ति: the operation of the mind. सम्भाविता इष्टजनचित्तवृत्तिर्येन। बहु—। आत्माभिप्रायेण सम्भावितेष्टजनचित्तवृत्ति:। ३तत्—। Or आत्माभिप्रायेण सम्भाविता। ३तत्—। तादृशी इष्टजनचित्तवृत्तिर्येन ।

-बहु—। (b). The compound is an unusually long one for Kalidasa. But this is the reading of all the Recensions. The gist is—"I am comforted by the thought that Sakuntala loves me. What a delusion ! Where is the proof of her love ? I judge her feelings by my own [Or—I assume that her feelings towards me are as I wish them to be]. Is not this ridiculous ?" This makes him smile. Compare "न हि स्वाभिप्रायेण मे दर्शनम्"—Act. III.

स्निग्धं वीक्षितमन्यतोऽपि नयने यत् प्रेरयन्त्या तया
यातं यच्च नितम्बयोर्गुरुतया मन्दं विलासादिव ।
मा गा इत्युपरुद्धया यदपि सा सासूयमुक्ता सखी
सर्वं तत् किल मत्परायणमहो कामी स्वतां पश्यति ॥

The soft glance that she cast even when directing her eyes elsewhere ; the slow dalliance-like steps that she took through the weight of her hips ; the annoyed manner in which the friend was addressed when opposed saying "Do not go"—all that, forsooth, relates to me ; Ah ! How a lover fancies he sees his own !

विदूषकः (यथास्थित एव)—भो वअस्स ण मे हत्थपादा पसरन्दि वाआमेत्तएण जआवीअसि, जअदु जअदु भवं [भो वयस्य न मे हस्तपादं प्रसरति । वाङ्मात्रेण जाप्यसे—जयतु जयतु भवान्] ।

VIDUSHAKA (*Remaining as described*)—O Friend, my hands and feet do not move. You are being greeted with words only—Be thou victorious.

स्निग्धमिति । अन्वयः—अन्यतोऽपि नयने प्रेरयन्त्या तया स्निग्धं वीक्षितम् (इति) यत्, नितम्बयोः गुरुतया विलासादिव मन्दं यातं (इति) च यत्, मा गा इत्युपरुद्धया सा सखी सासूयम् उक्ता (इति) अपि यत्, तत् सर्वं मत्परायणं किल। अहो कामी

स्वतां पश्यति । व्याख्या—विडम्बनामेव प्रपञ्चयति । 'अन्यतोऽपि' मत्त: अन्यस्मिन् अपि वस्तुनि 'नयने प्रेरयन्त्या' पातयन्त्या 'तया' शकुन्तलया 'स्निग्ध'' मुग्धं 'वीक्षितं' दृष्टम्, इति 'यत्' प्रकृत्या स्निग्धं तस्या यत् वीक्षणम् इत्यर्थ:—'नितम्बयो: गुरुतया' दुर्वहत्वात् इत्यर्थ: 'विलासादिव' भावव्यञ्जकचेष्टया इव 'मन्दं' धीरं 'यातं' चलितम् इति 'च यत्', 'मा गा:' मा याहि अस्मात् स्थानात् 'इति' अनेन प्रकारेण 'उपरुद्धया' निवारितया शकुन्तलया 'सा सखी' प्रियंवदा 'सासूयं' सकोपम् 'उक्ता' "किं निमित्तम्" इति दोषाविष्कारपूर्वकं कथिता, इति 'अपि यत्', 'तत् सर्वं मत्परायणं किल' मदाश्रितं, मामेव विषयीकृत्य कृतम्, इति न श्रद्दधे, इत्यलीकं वा [किल इत्यरुचौ । "वार्त्तायामरुचौ किल" इत्यमर: । अलीके च किल] । 'अहो' आश्चर्यं 'कामी' कामोपहतचित्तो जन: 'स्वताम्' आत्मीयतां स्वविषयताम् ["स्वो ज्ञातावात्मनि स्वं त्रिष्वात्मीये स्वोऽस्त्रियां धने'' इत्यमर:] 'पश्यति' । स्निग्धवीक्षणं मन्दगमनञ्च तस्या: स्वभाव: । सख्यामपि प्रतिकूलाचरणात् परुषभाषणम् । अत्र कुत्रापि नाहं कारणम् । अहन्तु मन्ये मत्कृते एव एतत् सर्वम् । धिक् स्वार्थचिन्तां कामिनाम् ॥ ["प्रेरयन्त्या" (त-, न्या-, म-)—"प्रेषयन्त्या" (रा-, वि-) ॥ "यदपि सा" (रा-, वि-, म-)—"यदपि तत्" (त-, न्या-) ॥ "कामी स्वतां" (रा-, वि-, म-)—"काम: स्वतां" (त-, न्या-)] ॥

विदूषेति । ('तथा' तद्वत् दण्डकाष्ठमवलम्ब्य 'स्थित एव') 'मे हस्तौ च पादौ च 'हस्तपादं' करचरणम् [प्राण्यङ्गत्वात् एकवचनं नपुंसकता च] 'न प्रसरति' न कर्मणि प्रवर्त्तते । भवन्तं दृष्ट्वा आचारप्राप्तम् उपसर्पणं दक्षिणहस्तमुद्यम्य च आशीर्वचनं मया कर्त्तुं न शक्यते । अतो 'वाङ्मात्रेण' वचसा एव 'जाप्यसे' जयं नीयसे 'जयतु जयतु भवान्' श्रोत्रे वर्द्धताम् [अवायमकर्मको जयि:] ।

NOTES

1. (a). स्निग्धम्—स्निह् + क्त कर्त्तरि वर्त्तमाने soft. Qualifies वीक्षणक्रिया । स्निग्धवीक्षित was natural to her. It seems the same as मुग्धविलोकित referred to in "कृत इव मुग्धविलोकितोपदेश:"—Infra. (b). अन्यत:—अन्यस्यां दिशि or अन्यस्मिन् वस्तुनि इति अन्य + तसि सप्तम्यर्थे । Compare इत: in "प्रयुक्तमप्यस्त्रमितो वृथा स्यात्" । (c). प्रेरयन्त्या—प्र + ईर + णिच् + शतृ स्त्रियाम् = प्रेरयन्ती casting. तया । There is little to choose be-

-tween the readings प्रेरयन्त्या and प्रेषयन्त्या। (d). सासूयम्—असूञ्+यक् कण्ड्वादि+अ भावे स्त्रियाम्=असूया spite. तया सह। Qualifies उक्ता। मा गाः &c. refers to Priyamvada's "हला न ते युक्तं गन्तुम्"—and Sakuntala's "का त्वं विसृष्टस्य रोद्धव्यस्य वा"—Act I. (e). गाः—"माङि लुङ्" इति भविष्यति लुङ्। "इणो गा लुङि" इति गादेशः। "न माङ्योगे" इति अडागमप्रतिषेधः। (f). किल—This is sarcastic (अरुचि)। All these refer to me indeed! That is to say, these have nothing to do with me. (g). मत् &c.—अयते अनेन अस्मिन् वा इति अय+ल्युट् करणे अधिकरणे वा=अयनम् track पन्थाः; resort आश्रयः। परं प्रधानम् एकम् इत्यर्थः अयनं परायणम् the sole subject. कर्मधा—। अहं परायणं यस्य of which I am the subject. (h). कामी स्वतां पश्यति is a paraphrase of आत्माभिप्रायसम्भावितेष्टजनचित्तवृत्तिः प्रार्थयिता।

2. (a). वागेव इति वाङ्मात्रम् speech only. मयूरव्यंसकादि। नित्यसमास। तेन। "मात्रं कार्त्स्न्येऽवधारणे"। Here अवधारणे। (b). जाप्यसे—जि+णिच्+लट् से कर्मणि। जि becomes जा when णिच् follows ["क्रीङ्जीनां णौ"]। जि here does not mean "to conquer." It means "to prosper" (उत्कर्षप्राप्ति) and is अकर्मक। "जयतिर्याभिभवयोरादौ द्वेऽस्मावकर्मकः। उत्कर्षप्राप्तिरार्थोऽर्थो द्वितीयेऽर्थे सकर्मकः॥"

राजा—कुतोऽयं गात्रोपघातः?

KING—Whence is this palsy of limbs?

विदूषकः—कुदो किल सअं अच्छी आउलीकरिअ अस्सुकारणं पुच्छेसि [कुतः किल स्वयमक्षि आकुलीकृत्य अश्रुकारणं पृच्छसि]।

VIDUSHAKA—Why indeed do you ask the reason for tears after having troubled the eye yourself?

राजा—न खल्ववगच्छामि।

KING—Surely, I do not understand.

विदूषकः—भो वअस्स जं वेदसो कुज्जलीलं विडम्बेदि तं

किं अत्तणो पहावेण णं णईवेअस्स [भो वयस्य यत् वेतसः कुब्जलीलां विडम्बयति तत् किमात्मनः प्रभावेण ननु नदीवेगस्य] ।

VIDUSHAKA—Is it through its own power, or of the force of the current, that the cane imitates the gait of the hump-back ?

राजेति । 'अयं' ते 'गात्राणाम् उपघातः' स्तम्भः 'कुतः' प्राप्तः ।

विदूषेति । 'स्वयम्' आत्मना 'अचि' कस्यापि जनस्य चचः 'आकुलीकृत्य' अङ्गुल्यादिना जलाविलं कृत्वा 'अश्रुणः कारणं' इदं 'कुतः किल पृच्छसि' कस्मात् पृच्छसि ? अयं ते प्रश्नो न मे रोचते [किल इत्यरुचौ] ।

राजेति । 'न अवगच्छामि' न बुध्यते मया ।

विदूषेति । 'वेतसः' जलजलताभेदः 'कुब्जस्य' न्युब्जपृष्ठस्य जनस्य 'लीलां' चेष्टां 'विडम्बयति' अनुकरोति इति 'यत् तत् किम् आत्मनः' वेतसस्यैव 'प्रभावेण' महिम्ना 'ननु' उत 'नदीवेगस्य' स्रोतसः ? आक्षेपे ननु । अत्र पक्षमेकं प्रस्तुत्य तदाक्षेपकी द्वितीयः पक्षः प्रस्तुतः ["नन्वाक्षेपे परिप्रश्ने" इति हैमः] ["ननु" (रा॰, वि॰, म॰)— "अथवा" (त॰, न्या॰)] ॥

NOTES

1. गात्रोप &c.—उपहननम् इति उप + हन + घञ् भावे = उपघातः powerlessness. In this sense वाचस्पति quotes "तथात्वचे दिन्द्रियाणामुपघाते कथं स्मृतिः ।"

2. कुतः किल &c.—The point is—You are the cause of all this trouble and yet you ask what ails me ! This is queer.

3. भो वयस्य &c.—(a). वेतस &c. Refers to the water-cane. The force of the current bends it and its movements are hence like those of a hump-back. वैतसी वृत्ति is proverbial for 'yielding to force.' (b). प्रभावेण—भवनम् भावः । घञ् भावे । प्रकृष्टो भावः, तेन । प्रादितत्— । Here Bhattoji makes ण optional by the rule "प्रातिपदिकान्तनुम्-विभक्तिषु च" । The न is विभक्तिस्थ ; thus प्रभावेन or प्रभावेण । But the Vrittikara allows only प्रभावेन । (c). *Reading.* ननु implies आक्षेप

disapproval. Two alternatives are suggested आत्मनः and नदीवेगस्य, with *disapproval* of the *former.* It is not a mere question, but a question with an indication of the answer wanted; something like "Are you the master here or I" put by the owner of a house to an intruder. अथवा would make it a simple question. Hence I prefer ननु।

राजा—नदीवेगस्तत्र कारणम्।

KING—There the river-current is the cause.

विदूषकः—मम वि भवं [ममापि भवान्]।

VIDUSHAKA—And of me is thyself.

राजा—कथमिव।

KING—How so?

विदूषकः—एव्वं राअकज्जाणि उज्झिअ एआरिसे आउलप्पदेशे वणचरवुत्तिणा तुए होदव्वं, जं सच्चं पच्चहं सावदसमुच्छारणेहिं संखोहिअसंधिबंधाणं मम गत्ताणं अणीसो म्हि संवुत्तो। ता पसाद मे एक्काहम्पि दाव विस्समीअदु [एवं राजकार्य्याणि उज्झित्वा एतादृशे आकुलप्रदेशे वनचरवृत्तिना त्वया भवितव्यं यत् सत्यं प्रत्यहं श्वापदसमुत्सारणैः संक्षोभितसन्धिबन्धानां मम गात्राणाम् अनीशोऽस्मि संवृत्तः। तत् प्रसीद मे, एकाहमपि तावत् विश्रम्यताम्]।

VIDUSHAKA—Having left your royal duties you have to live so much as a forester in a wild tract like this, that really I have become powerless over my limbs, the ligatures of the joints of which have become thoroughly shaken by every day chasing beasts of prey. So favour me, do rest but a day.

राजेति। 'तत्र' तस्मिन् कुलशीलाविड़म्बने 'नदीवेगः' स्रोतः 'कारणम्' [कारणमिति नित्यं क्लीवे]।

विदूषेति। 'मम अपि' सम्बन्धे 'भवान्' कारणम्।

राजेति। 'कथमिव' अहं कारणम् ?

विदूषेति। प्रत्यह' प्रकृतिभि: मेलनादीनि 'राज्ञ: कार्य्याणि उज्झित्वा' त्यक्त्वा 'त्वया एतादृशे' भयावहे 'आकुले' शकुन्तलान्ये 'प्रदेशे एवम्' ईदृश' 'वनचरवृत्तिना भवितव्यं' वनचरेण इव वर्त्तितव्यम् वन्यवृत्तिश्च ईदृशी सञ्जाता इत्यर्थ: 'यत् सत्य' प्रत्यह' प्रतिदिनं 'श्वापदानां' व्यालमृगाणां 'समुत्सारणै:' विद्रावणै: 'सङ्क्षोभिता:' सञ्चालिता 'सन्धिबन्धा:' प्रत्यङ्गग्रन्थय: येषां तादृशानां 'मम गात्राणाम् अनीश:' अप्रभु: 'संवृत्तोऽस्मि' गात्रसञ्चालने नाहं समर्थ:। 'तत्' तस्मात् मे मम सम्बन्धे 'प्रसीद' प्रसन्नो भव, 'एकम्' एकमात्रम् 'अह: अपि' एकमपि दिनम् ["राजाह:सखिभ्यष्टच्" इति टच्। अत्यन्तसंयोगे द्वितीया।] 'विश्रम्यतां' मृगयाया विरम्य विश्रान्तिर्लभ्यतां भवता। तेन ममापि विश्रम: स्यात्। ["तत् प्रसीद मे एकाहमपि तावत् विश्रम्यताम्" (त-, न्या-)—"तत् प्रसादयिष्यामि विसृष्ट' माम् एकाहमपि तावत् विश्रमितुम्" (रा-, वि-, म-)] ॥

NOTES

1. कथमिव—इव is वाक्यालङ्कारे।

2. (a). कुल is समूह। आहृतानि कुलानि अस्मिन् आकुल: a place where all sorts of things are huddled together. तादृश: प्रदेश: a wild tract. तस्मिन्। (b) वने चरतीति वन+चर+ट कर्त्तरि=वनचर: or वनेचर:। तस्य वृत्ति:। सेव वृत्तिर्यस्य तेन। बहु—। (c). Several editions have a stop after भवितव्यम्, and begin the next line with यत् सत्यम्। Construe—You have to lead the life of a forester. Really I have become &c. यत् is idiomatic—वाक्यालङ्कारे। (d). अहनि अहनि प्रत्यहम् daily. वीप्सार्थे अव्ययीभाव:। टच् समासान्त:। प्रत्यहे is also allowable by the rule "तृतीयासप्तम्योर्बहुलम्"। Again an अव्ययीभाव ending with अन्, if the last word is neuter, takes टच् optionally. Hence प्रत्यह: is another form. (e). श्वापद &c.—शुन: पदानि श्वापदानि the feet of a dog. श्व becomes श्वा by the Varttika "शुनो दन्तदंष्ट्राकर्णकुन्दवराहपुच्छपदेषु"। श्वापदानि इव पदानि एषां श्वापदा: having feet like those of a

dog, *i. e.*, having *nails* instead of hoofs. Hence *beasts of prey.* सम् + उद् + सृ + णिच् + ल्युट् भावे = समुत्सारणानि starting from their lair. तैः । Plural shows this has to be done several times in the day. (f). संचोभित &c.—सम् + क्षुभ + णिच् + क्त कर्मणि = संचोभिताः thoroughly shaken. सन्धीनां बन्धाः ligatures of the joints.

3. (a). ईष्टे इति ईश + अच् कर्त्तरि = ईशः lord. न ईशः । (b). एकम् अहः इति एकाहः one day. टच् समासान्तः । "रात्राह्नाहाः पुंसि" इति पुंस्त्वम् । तम् । (c). वि + श्रम + लोट् ताम् भावे = विश्रम्यताम् ।

4. *Reading*. तत प्रसादयिष्यामि &c. is diffuse and less elegant than तत् प्रसीद । Besides the latter is more polite.

राजा (स्वगतम्)—अयं चैवमाह । ममापि काश्यपसुतामनुस्मृत्य मृगयाविक्लवं चेतः । कुतः—

न नमयितुमधिज्यमस्मि शक्तो धनुरिदमाहितसायकं मृगेषु ।
सहवसतिमुपेत्य यैः प्रियायाः कृत इव मुग्धविलोकितोपदेशः ॥

KING (*aside*)—This man speaks thus ; mine too the heart, thinking of the daughter of Kasyapa, is disinclined towards hunting. (Do you ask) Why ? This bow, strung and with the arrow placed, I am not able to bend at the deer by whom instruction in guileless look was, as it were, given after having obtained the companionship of my darling.

राजेति । 'अयं' विदूषकः 'च एवं' मृगयावैक्लव्यं विज्ञापयन् 'आह' भाषते । 'ममापि चेतः' चित्तं 'काश्यपस्य' कण्वस्य 'सुतां' शकुन्तलाम् 'अनुस्मृत्य' ध्यायत् 'मृगयायां' विषये 'विक्लवं' विमुखं जातम् । 'कुतः' इति चेत् शृणु—नेति । अन्वयः—अधिज्यम् आहितसायकम् इदं धनुः मृगेषु नमयितुं न शक्तोऽस्मि, यैः प्रियायाः सहवसतिम् उपेत्य मुग्धविलोकितोपदेशः कृत इव । व्याख्या—'अधिगता ज्या' मौर्वी येन तादृशम्, आरोपितमौर्वीकम् 'आहितः' संयोजितः 'सायकः' बाणः यस्मिन् तत् 'इदं' मदीयं 'धनुः मृगेषु' हरिणेषु 'नमयितुम्' आकृष्टुं 'न शक्तः' समर्थः 'अस्मि' भवामि । किञ्च तेषु मृगेषु एवमसामर्थ्यम् इत्याह—'यैः मृगैः 'प्रियायाः' कान्तायाः शकुन्तलायाः

'सहवसतिं' सहवासम् 'उपेत्य' लब्ध्वा, सहवासरूपं दानं गृहीत्वा 'मुग्धानि' मधुरसरलानि यानि 'विलोकितानि' आलोकनानि [नपुंसके भावे क्तः] तेषु 'उपदेशः' शिक्षा 'कृत इव' मुग्धविलोकनशिक्षणरूपं प्रतिदानं दत्तमिव। ये प्रियाया उपदेष्टारः तेषु कथं बाणः पात्यताम्। ["अस्मि शक्तः" (रा-, वि-, म-)—"मुत्सहिष्ये" (त-, न्या-) ॥ "मुग्धविलोकितोपदेशः" (रा-, वि-, म-)—"लोचनकान्तिसंविभागः" (त-, न्या-)] ॥

NOTES

1. विक्लव is विह्वल। Compare "वैक्लव्यं मम तावदीदृशम्"—Act IV.

2. (a). सह एकत्र वसतिः सहवसतिः co-lodging. सहसुपेति समासः। ताम्। (b). इण् गतौ is प्राप्त्यर्थक here. उप+इ+ल्यप्=उपेत्य having *received.* (c). प्रियायाः is better taken as पञ्चम्यन्त। (d). मुग्ध &c. —मुग्धानि विलोकितानि। कर्मधा—। तेषु उपदेशः। सुप्सुपा। The idea in the second half is—They *received* (उपेत्य) the privilege of co-lodging (सहवसतिम्) *from* my darling (प्रियायाः—५मी) and in return *gave her* (कृत इव) lessons as to how to look in a charmingly guileless way (मुग्धविलोकितोपदेशः)।

3. *Readings.* (a). उत्सहिष्ये in the future, refers to what will happen when meeting a stag. (b). लोचनकान्तिसंविभागः share in the beauty of eyes. She shared lodging with them, they shared beauty of eyes with her. (c). The idea is—The deer by the beauty of their eyes will remind me of the eyes of my darling and I shall not have the heart (उत्सहिष्ये) to shoot at them (नमयितुं धनुः)। It is difficult to choose between the two sets of readings.

विदूषकः (राज्ञो मुखं विलोक्य)—अत्तभवं किं वि हिअए करिअ मन्तेदि। अरण्णे मए रुदिअं आसि [अत्रभवान् किमपि हृदये कृत्वा मन्त्रयते। अरण्ये मया रुदितम् आसीत्]।

VIDUSHAKA (*Watching the king's face*)—Your honour has got some-thing in your mind and muttering. I did the crying in a wilderness.

राजा (सस्मितम्)—किमन्यत्। अनतिक्रमणीयं मे सुहृद्वाक्यमिति स्थितोऽस्मि।

KING (*With a smile*)—What else? I stay in (to-day) because the words of a friend are not to be disobeyed by me.

विदूषकः—चिरं जीअ [चिरं जीव]। (गन्तुमिच्छति)।

VIDUSHAKA—May thou live long! (*Wants to go*).

राजा—वयस्य तिष्ठ। मावशेषं मे वचः।

KING.—Stay, friend. My say is not over yet.

विदूषकः—आणवेदु भवं [आज्ञापयतु भवान्]।

VIDUSHAKA—Let your honour command.

विदूषेति। 'अत्रभवान्' पूज्य। 'किमपि' वस्तु 'हृदये कृत्वा' मनसि ध्यात्वा 'मन्त्रयते' जल्पति। एतत् 'मया अरण्ये रुदितम्' मम अरण्ये रोदनम 'आसीत्' अरण्ये रोदनमिव निष्फलं मे वचो जातम्। ["अरण्ये रुदितम्" इति लोकोक्तिः]। अन्यासक्तेन भवता मदुक्तं न श्रुतमेव। ["अरण्ये मया रुदितमासीत्" (रा-, वि-, म-)—"अरण्ये खलु मया रुदितम्" (त-, न्या-) ॥

राजेति। 'अन्यत्' अपरं 'किं' मन्त्रये? 'सुहृदो' भवतो 'वाक्यं मे अनतिक्रमणीयम्' अलङ्घ्यम् 'इति' हेतोः 'स्थितोऽस्मि' मृगयागमनात् विरतोऽस्मि।

राजेति। अवशिष्यते इति 'अवशेषः' अवशिष्टं वस्तु। तेन सह 'सावशेषम्' असमाप्तम्। 'मे वचः सावशेषम्'। उक्तादन्यत् अनुक्तमप्यस्ति तच्च शृणु इति भावः।

विदूषेति। अवहितोऽस्मि 'भवान् आज्ञापयतु'। आदिश्यतां यत् श्रोतव्यं मया।

NOTES

1. (a). अरण्ये &c.—मया has अनुक्ते कर्त्तरि तृतीया। षष्ठी is barred by "न लोकाव्ययनिष्ठाखलर्थतृनाम्"। "अरण्ये रुदितम्"—weeping in a wilderness—does no good; because no one listens, relief cannot be expected. Hence the phrase has become proverbial for *any thing* (not necessarily weeping) *done in vain.* The

construction is peculiar. अरण्ये मया रुदितम् इति यत् तदासीत्—It was as if I wept in a wilderness. Or मया कृतं रुदितम् अरण्ये आसीत् —my weeping was done in a wilderness. (b). The other reading "अरण्ये खलु &c." is more direct and simpler in construction.

2. सावशेषम्—अवशिष्यते इति अव+शिष+घञ् कर्मणि=अवशेषः residue. तेन सह। बहु—। With a residue, i. e., unfinished.

राजा—विश्रान्तेन भवता ममाप्येकस्मिन् अनायासे कर्मणि सहायेन भवितव्यम्।

KING—When rested, you will have to help me too in a matter requiring no exertion.

विदूषकः—किं मोदअखज्जिआए। तेण हि अअं सुगहीदो जणो [किं मोदकखादिकायाम्। तेन हि अयं सुगृहीतो जनः]।

VIDUSHAKA—Is it in eating sweet-meats? Then indeed this person has been well-chosen.

राजा—यत्र वक्ष्यामि। कः कोऽत्र भोः।

KING—In what I will tell you. Halo! Who is here?

(प्रविश्य) दौवारिकः (प्रणम्य)—आणवेदु भट्टा [आज्ञापयतु भर्त्ता]।

(*Entering*) WARDER (*bowing*)—Let sire command.

राजेति। 'विश्रान्तेन' विनीतश्रमेण 'भवता ममापि एकस्मिन्' कस्मिंश्चित् 'अविद्यमानः आयासः' श्रमः यस्मिन् तथाविधे, सुकरे 'कर्मणि' सह अयते गच्छति इति 'सहायः' सचिवः तेन 'भवितव्यम्'॥ यथा अहमधुना श्रमापनयनकर्मणि ते सहायो भूतः, तथा त्वमपि कस्मिंश्चित् कर्मणि मम सहायो भूयाः, तत्र ते क्लेशो न भविष्यति इत्यर्थः।

विदूषेति। 'मोदकानां' लड्डुकानां 'खादनं' भक्षणं, तदाख्या क्रीड़ा 'मोदकखादिका' [क्रीड़ायां ण्वुल् स्त्रियाम्] तस्यां 'किं' सहायमिच्छसि? 'तेन हि' तदा

तु 'अयं' मद्रूपो 'जनः सुगृहीतः' सुष्ठु चिन्तितः। "अनायासे कर्मणि" इति भवता उच्यते, किन्तु क्रीडां विना सर्वत्र क्लेशः। क्रीडास्वपि लड्डुकभक्षणम् अतीव सुकरम्। यदि तव सहायमिच्छसि, मत्तो योग्यतरः सहायो न लभ्यः इति भावः।

राजेति। 'यत्र' यस्मिन् कर्मणि अहं 'वक्ष्यामि' तत्र त्वं सहायो भूयाः। 'कः' अत्र आस्ते 'भोः कः' अत्र द्वारि तिष्ठति? इति दौवारिकम् आह्वयति [वाक्य-भिन्नत्वे वीप्साभावान्न कस्कादिः]।

प्रविश्येति। आह्वानं श्रुत्वा 'प्रविश्य' द्वारि नियुक्तः दौवारिकः ["तत्र नियुक्तः" इति ठक्] 'प्रणम्य' अभिवाद्य आह—'भर्त्ता' स्वामी 'आज्ञापयतु' आदिशतु, पाल्यते मया।

NOTES

1. (a). विश्रान्तेन—श्रम + क्त भावे = श्रान्तम् fatigue श्रमः। विगतं श्रान्तं यस्य तेन। बहु—। Or वि + श्रम + क्त कर्त्तरि = विश्रान्तः rested. तेन। (b). अपि—समुच्चये। I have helped you, do you too help me. (c). अनायासे—आ + यस + घञ् भावे = आयासः toil प्रयत्नः। (d). सहायेन—सह अयते गच्छति इति सह + अय + अच् कर्त्तरि = सहायः a helper.

2. (a). मोदक &c.—मोदयति इति मुद + णिच् + ण्वुल् कर्त्तरि = मोदकः a kind of sweet-meat. "मोदकः खाद्यभेदेऽस्त्री" इति मेदिनी। Bhanuji has मोदयते in the आत्मनेपद। मोदकाः खाद्यन्ते अस्यां क्रीड़ायाम् इति मोदक + खाद + ण्वुल् अधिकरणे संज्ञायाम् = मोदकखादिका eating of sweet-meats. तस्याम्। This is a piece of pleasantry- The king says अनायासे कर्मणि। The jester takes कर्म in the sense of क्रिया and mentions the easiest (अनायास) क्रिया। Very likely he invents the name (संज्ञा) for the occasion; or, possibly it was current· as a संज्ञा like अभ्यूषखादिका, आचोषखादिका given in the Vritti, under the rule "संज्ञायाम्" (Pan. 3. 3. 109).

3. कः कोऽत्र &c.—We do not get कस्कोऽत्र because this is not a case of वीप्सा। We have two different sentences with the क्रिया understood. Thus कः आस्ते? कः अत्र आस्ते?

4. द्वारि नियुक्त इति द्वार + ठक् = दौवार + ठक् = दौवारिक by the rule "द्वारादीनाञ्च," i. e., when a तद्धित dropping ञ, ण, or क follows ऐ comes before य and औ before व of words of the द्वारादि class.

5. भर्त्ता—This is the way menials have to address the king. "राजा स्वामीति देवेति भृत्यैर्भर्तेति चाधम:"—*Sahityadarpana.*

राजा—रैवतक, सेनापतिस्तावदाहूयताम्।

KING—Raivataka, let the Commandar-in-chief be summoned.

दौवारिक:—तह [तथा]। (निष्क्रम्य सेनापतिना सह पुन: प्रविश्य) एसो अस्सावअणुक्कण्ठो इदो दिण्णदिट्ठी एव्व भट्टा चिट्ठइ। उवसप्पदु अज्जा [एष आज्ञावचनोत्कण्ठ इतो दत्तदृष्टिरेव भर्त्ता तिष्ठति। उपसर्पतु आर्य्य:]।

WARDER—(I do) as your majesty commands. (*Going out and coming back with the Commander-in-chief*). Here, sire is waiting, even with his eyes directed this way, eager to speak out the order. Let your honour approach.

सेनापति: (राजानमवलोक्य)—दृष्टदोषापि स्वामिनि मृगया केवलं गुणायैव संवृत्ता। तथाहि देव:—

अनवरतधनुर्ज्यास्फालनक्रूरपूर्वं
रविकिरणसहिष्णु क्लेशलेशैरभिन्नम्।
अपचितमपि गात्रं व्यायतत्वादलक्ष्यं
गिरिचर इव नाग: प्राणसारं बिभर्त्ति॥

(उपेत्य) जयतु स्वामी। गृहीतश्वापदमरण्यम्। किमन्यत्रावस्थीयते।

COMMANDER-IN-CHIEF (*Looking at the king*)—Hunting, though of known defects, has, in our lord, worked for good only. For, like a hill-roaming elephant, sire shows a frame which is the very essence of vigour, tightened in the forepart by incessant drawing of the bow-string, tolerant of the rays of

the sun, untouched by the slighest trace of fatigue, though reduced in bulk yet through hugeness not noticeable as such. (*Approaching*) Let our lord prosper. The forest has its beasts of prey tracked. Why does Sire stay away ?

राजेति। 'रैवतक' इति दौवारिकनाम। 'सेनापतिः' सेनानायकः 'तावत् आहूयताम्' आहूय इत आनीयताम्।

दौवेति। 'निष्क्रम्य' रङ्गमञ्चात् बहिर्गत्वा।

एष इति। 'एष भर्त्ता' स्वामी 'आज्ञायाः' आदेशस्य 'वचनम्' उच्चारणं तस्मिन् 'उत्कण्ठः' उद्ग्रीवः 'इतः' अस्यां दिशि 'दत्ता दृष्टि'र्येन तादृश 'एव तिष्ठति' आस्ते। 'आर्य्यः' भवान् 'उपसर्पतु' भर्त्तुः समीपस्थो भवतु।

सेनेति। 'मृगया' आखेटः 'दृष्टा' लक्षिताः 'दोषाः' क्रूरतादयः यस्यां तादृशी 'अपि स्वामिनि' भर्त्तरि दुष्यन्ते 'केवलं गुणाय' प्रकर्षाय 'एव संवृत्ता' जाता। मृगयाशीलनात् यथा देहोत्कर्षादयो गुणा जायन्ते तथा क्रौर्य्यादयो दोषा अपि। स्वामिनस्तु गुणा एव जाता न तु ते दोषाः ["गुणायैव" (त-, व्या-,)—"गुण एव" (रा-, वि-, म-)]। तानेव गुणान् आह 'तथा हि' इति।

अनेति। अन्वयः—गिरिचरः नागः इव, देवः, अनवरतधनुर्ज्यास्फालनक्रूरपूर्वं, रविकिरणसहिष्णु, क्लमलेशैः अभिन्नम्, अपचितमपि व्यायतत्वात् अलक्ष्यं, प्राणसारं गात्रं बिभर्त्ति। व्याख्या—'गिरौ' पर्वते 'चरति' विहरतीति 'गिरिचरः' पर्वतविहारी 'नाग इव' गज इव 'देवः' स्वामी 'अनवरतं' निरन्तरं 'धनुर्ज्यायाः' धनुःसंयुक्तस्य गुणस्य 'आस्फालनेन' आकर्षणेन 'क्रूरः' कठिनः 'पूर्वः' पूर्वकायो यस्य तादृशम्, 'रविकिरणं' सौरकरं 'सहिष्णु' सहनशीलम्, ["न लोक—" इति षष्ठीनिषेधः] 'क्लमस्य' श्रमखेदस्य 'लेशैः' गन्धेनापि 'अभिन्नम्' अस्पृष्टम्, 'अपचितं' कर्कशविहारात् एभिर्दिनैः क्षीणम् 'अपि व्यायतत्वात्' विशालत्वात् 'अलक्ष्य'' क्षीणत्वेन अप्रतीयमानं, 'प्राणस्य' बलस्य ["प्राणोऽनिले बले" इति हैमः] 'सारं' स्थिरांशमिव ["सारो बले स्थिरांशे च" इत्यमरः] 'गात्रं' शरीरं 'बिभर्त्ति' धारयति॥ ["क्रूरपूर्वम्" (रा-, वि-, म-)—"क्रूरकर्मा" (त-, व्या-)॥ "सहिष्णु" (रा-, वि-, म)—"सहिष्णुः" (त-, व्या-)॥

"क्लेश" (म·)—"खेद" (रा-, त-, वि-, न्या-) ॥ "अभिन्नम्" (रा-, वि-, म-)—"अभिन्नः" (त-, न्या-)] ॥ उपेत्येति । 'उपेत्य' समीपं गत्वा आह—'स्वामी जयतु' जयेन युज्यताम् । 'गृहीताः' निरूपिताः 'श्वापदाः' व्यालमृगा यस्मिन् तथाविधं जातम् 'अरण्यम्' । कुत्र कश्चित् व्याघ्र आस्ते, कुत्र वा वृकः इति सर्वमस्माभिः परिज्ञातम् । 'तत् अन्यत्र' वनम् अगाहमानः अत्रैव देशे 'किं' किमर्थम् 'अवस्थीयते' देवेन ? झटिति आगत्य तत्र तत्र तान् व्यापादयतु स्वामी ।

NOTES

1. (a). आज्ञा &c.—ब्रू or वच + ल्युट् भावे = वचनम् speaking, uttering. आज्ञायाः वचनम् uttering the command. उन्नतः कण्ठः अस्य उत्कण्ठः Lit. with uplifted neck ; but this indicates *anxiety*. Hence उत्कण्ठः means *anxious, eager.* (b). इतः—इदम् + ङि (७मी) + स्वार्थे तसि this way.

2. (a). दृष्टदोषा—Which is known to produce evil effects (not that गुण does not exist). (b). स्वामिनि—The general is a servant (भृत्य) ; but he is a high officer ; hence he addresses the king as स्वामिन् । Contrast भर्त्ता तिष्ठति of the दौवारिक । (c). केवलम्—Alone, i. e., to the exclusion of दोष । (d). गुणाय—गुणम् आधातुं संवृत्ता = गुणाय संवृत्ता, i. e., "क्रियार्थोपपदस्य च कर्मणि स्थानिनः" इति कर्मणि चतुर्थी । (e). देवः—Compare "राजा स्वामीति देवेति भृत्यैर्भट्टेति चाधमैः" ।

3. *Reading.* दृष्ट in दृष्टदोषा and केवलम् go against the reading गुणः for गुणाय । If the former were intended, the poet would have probably said दोषोऽपि स्वामिनि मृगया गुण एव संवृत्ता । Besides गुण एव establishes the प्राधान्य of the विधेय which is गुण in the masculine. संवृत्ता will then have to be संवृत्तः । Compare एको वृक्षः पञ्च नौका भवन्ति ।

4. (a). अनवरत &c.—अव + रम + क्त कर्त्तरि = अवरतम् ceased. न अवरतम् । नञ्तत्— । धनुःस्थिता ज्या धनुर्ज्या string attached to the bow, शाकपार्थिवादि । Separate mention of धनुस् is necessary here, because pulling the ज्या alone is no exercise. But the ज्या attached

to the धनुम् (धनुःस्थिता) works as an excellent chest-expander. तस्या आस्फालनम् the drawing of the string attached to the bow. अनवरतं यथा तथा धनुर्ज्यास्फालनम् Incessant drawing of &c. सहसुपेति समासः। With आस्फालनक्रूर compare आस्फालनकर्कश in "ऐरावतास्फालनकर्कशेन हस्तेन पस्पर्श तदङ्गमिन्द्रः।"—*Kumara.* तेन क्रूरपूर्वम्। ३तत्—। क्रूरकर्मा for क्रूरपूर्वम् implies censure, and is therefore rejected. (b). रविकिरणं सहिष्णु। सहसुपेति समासः। Vamana takes these under "गमिगाम्यादि" as द्वितीया तत्—। (c). क्लेशलेशैः—Almost all editions read स्वेद for क्लेश। But the most valued of the benefits obtained from active exercise is श्रमजय—power to bear fatigue. It we omit क्लेश, there is nothing in the sloka to refer to this. कालिदास refers elsewhere to श्रमजय as a गुण derivable from मृगया। Thus "परिचयं चललक्ष्यनिपातने भयरुषोश्च तदिङ्गितबोधनम्। श्रमजयात् प्रगुणाञ्च करोत्यसौ तनुमतोऽनुमतः सचिवैर्ययौ॥"—*Raghu,* IX. This is a reason for retaining क्लेशलेशैः। There are also reasons to reject स्वेदलेशैः। In the first place absence of sweat (स्वेद) is almost a disease. Secondly कालिदास frequently refers to perspiration being allayed by river-breeze after a hunt. Thus—"अतानुगौढं मृगयानिवृत्तस्तरङ्गवातेन विनीतखेदः", "यद्वायुरन्विष्टमृगैः किरातैरासेव्यते भिन्नशिखण्डिबर्हः", "तस्य कर्कशविहारसम्भवं स्वेदमाननविलग्नजालकम्। आचचाम सतुषारशीकरो भिन्नपल्लवपुटो वनानिलः॥" &c. (d). व्यायतत्वात्—वि+आ+यम+क्त कर्त्तरि=व्यायतः vast विशेषेण आयत इत्यर्थः। तस्य भावस्तत्त्वात्। हेतौ पञ्चमी। A slight reduction in a huge body is not noticed. Hence व्यायतत्वात् (through hugeness) अलक्ष्यम् (not noticeable). (e). अलक्ष्यम्—लक्ष+णिच्+यत् कर्मणि=लक्ष्यम् noticeable. न लक्ष्यम् not noticeable, i. e., that which cannot be noticed as reduced. (f). प्राणसारम्—Raghava explains प्राणो बलमेव सारः स्थिरांशो यत्र तत् with vigour alone left.

5. गृहीत &c.—The General here feigns keenness—The beasts are tracked already. Sire is wasting precious time! Later, it would be too late for good sport !! For श्वापद see श्वापदसमुत्सारणैः—*Ante.*

राजा—मन्दोत्साहः कृतोऽस्मि मृगयापवादिना माधव्येन ।

KING—I am rendered feeble in my ardour by Madhavya who denounces chase.

सेनापतिः (जनान्तिकम्)—सखे स्थिरप्रतिबन्धो भव । अहं तावत् स्वामिनश्चित्तवृत्तिमनुवर्त्तिष्ये । (प्रकाशम्) प्रलपत्येष वैधेयः । ननु प्रभुरेव निदर्शनम् ।

मेदश्छेदकृशोदरं लघु भवत्युत्थानयोग्यं वपुः
सत्त्वानामपि लक्ष्यते विकृतिमच्चित्तं भयक्रोधयोः ।
उत्कर्षः स च धन्विनां यदिषवः सिध्यन्ति लक्ष्ये चले
मिथ्यैव व्यसनं वदन्ति मृगयामीदृग्विनोदः कुतः ॥

GENERAL (*Aside*)—Be of firm opposition my friend, I will but follow the bent of sire's mind. (*Aloud*) The fool is raving. Why, your Majesty himself is the proof. The body becomes light and fit for exertion, with the waist thin from reduction of fat. The minds of animals as disturbed in fright and anger, are noticed too. That indeed is the excellence of archers that arrows succeed in a moving mark. Verily, they falsely call chase a dissipation. Whence is such pleasure ?

राजेति । 'मृगयाम् अपवदितुम्' निन्दितुं शीलमस्य भीरुत्वात् इति 'मृगयापवादी' आखेटनिन्दकः, तेन 'माधव्येन' तन्नाम्ना विदूषकेण 'मन्दः' हीनः 'उत्साहः' आग्रहो यस्य तथाविधः आस्थाहीनः 'कृतोऽस्मि' जातोऽस्मि वर्त्ते ।

सेनेति । ('जनान्तिकम्' राज्ञा अश्रुतं यथा तथा माधव्यं प्रति आह) 'स्थिरः' अचलः 'प्रतिबन्धो' बाधा यस्य तादृशो 'भव' । 'चित्तस्य' चेतसो 'वृत्ति' व्यापारं छन्दमित्यर्थः 'अनुवर्त्तिष्ये' अनुसरिष्यामि । यदहं मृगयां स्तोष्यामि तत् स्वामिनस्तुष्ट्यै, न तु हि स्वमतेन । तत् त्वं दृढं बाधस्व येन भर्त्ता मदुक्तं न करोत्येव । 'एष वैधेयः' मूर्खो माधव्यः 'प्रलपति' असम्बद्धं भाषते । अस्य उक्तं न सङ्गतम् । तत्र प्रमाणं किं

ब्रूमः 'ननु प्रभुः' स्वामी भवान् 'एव निदर्शनं' दृष्टान्तः। भवन्त' दृष्ट्वा एव ज्ञायते माधव्योक्तम् उन्मत्तप्रलापमात्रम्। ["प्रतिबन्धो" (रा-, वि-, म-)—"प्रतिज्ञो" (त-, न्या-)॥ "प्रलपत्ये" (त-, न्या-, म-)—"प्रलपत्वे" (रा-, वि-,)॥ "वैधेयः" (त-, न्या-, वि-, म-)—"वैधवेयः" (रा-)]॥ मेद इति। अन्वयः—वपुः मेद-श्छेदकृशोदरं लघु उत्थानयोग्यं भवति। भयक्रोधयोः सत्त्वानां विकृतिमत् चित्तमपि लक्ष्यते। चले लक्ष्ये इषवः सिध्यन्ति (इति) यत् धन्विनाम् स च उत्कर्षः। मृगयां मिथ्या एव व्यसनं वदन्ति। ईदृक् विनोदः कुतः। व्याख्या—'वपुः' शरीरं 'मेदसो' वसायाः 'छेदेन' निरासेन 'कृशोदरं' तनुमध्यं दर्शनीयमित्यर्थः, अपि च 'लघु' उत्पतनक्षमं सत् 'उत्थानयोग्यम्' आयाससमर्थं 'भवति', तेन समरेषु अव-सादं न भजते। 'भये क्रोधे' च 'सत्त्वानां' प्राणिनां 'विकृतिमत्' विकृतं 'चित्त' मनः 'लक्ष्यते' दृश्यते, एष भीतस्य बहिराकारः, एष क्रुद्धस्य इति ज्ञायते, तेन च शत्रु-समागमे भीतोऽयं क्रुद्धो वा इति ज्ञात्वा कर्त्तव्यमाचरितु' शक्यते। 'चले' धावति 'लक्ष्ये' शरव्ये 'इषवः' शराः 'सिध्यन्ति' प्रसीदन्ति, चलदपि लक्ष्य' पातयन्ति इति 'यत् धन्विनां' धनुर्द्धराणाम् [धन्वशब्दोऽप्यस्ति धनुःपर्य्यायः] 'स च' स एव [विधेयप्राधान्यात् पु'लिङ्गता] 'उत्कर्षः' नैपुण्यम्। तच्च नैपुण्यं मृगयाया लभ्यम्। यस्या एते गुणाः तां 'मृगयां मिथ्या' अकारणम् 'एव व्यसनं' दोषं 'वदन्ति' पण्डिताः उदाहरन्ति ["मृगयाक्षो दिवास्वप्नः परिवादः स्त्रियो मदः। तौर्य्यत्रिकं वृथाट्या च कामजो दशको गणः॥" इति मनुः]। 'ईदृक्' एवंविधः 'विनोदः' आमोदः 'कुतः' कस्मादन्यस्मात् लभ्यते। आमोदः शिक्षा च युगपदेव मृगयाया भवति, नान्यतः कुतोऽपि। तस्माधव्यस्य निन्दावादोऽयमुपेक्ष्य एव॥

NOTES

1. (a). सखे &c.—You oppose, I will humour! We can see now what to think of his keenness in the preceding page. (b). प्रतिज्ञा for प्रतिबन्ध seems unsuitable.

2. (a). वैधेयः—वि+धा+यत् कर्मणि=विधेयम् that which has to be enjoined विधातव्यम् शास्त्रविधिः। तस्य अयम् (अधिकारी) इति विधेय+अण्=वैधेयः one who has yet to learn what the Sastras say; or,

perhaps better, one who goes by the Sastras alone without reference to practical experience. When such a man takes to delivering lectures we must call it 'raving' (प्रलपति)। (b). ननु is आक्षेपे—in refutation of Vidushaka. Your majesty furnishes the best answer by your splendid physical development due to मृगया।

3. (a). मेदश्छेद &c.—कृशम् उदरं यस्मिन्। बहु—। मेदसश्छेदः मेदश्छेदः, द्वन्द्व—। तेन कृशोदरम्। द्वन्द्व—। (b). लघु—Raghava says मेदश्छेदकृशोदरम्, अतो लघु। But मेदश्छेद is the हेतु of लघुत्व, and कृशोदरत्व as well. It seems better not to speak of कृशोदरत्व as हेतु of लघुत्व after having distinctly mentioned मेदश्छेद। Say मेदश्छेदलघु or कृशोदरलघु, but not both. I have therefore explained differently in the Tika. (c). उत्थानयोग्यम्—उद्+स्था+ल्युट् भावे=उत्थानम् exertion उद्योगः। तस्य योग्यम्।

4. (a). धन्विनाम्—धन्व and धन्वन् both mean धनुस् bow. Hence धन्वम् एषामस्ति or धन्व एषामस्ति इति धन्व or धन्वन्+इनि मत्वर्थे=धन्विनः archers. तेषाम्। "धन्वा तु मरुदेशे ना क्लीवं चापे स्थलेऽपि च" इति मेदिनी। Ordinarily इनि is not available after धन्वन् and the गणकार cites it under the व्रीह्यादि class so as to take इनि optionally by the rule "व्रीह्यादिभ्यश्च"। (b) व्यसनम्—व्यस्यते कर्त्तव्यात् अन्यत्र नीयते अनेन इति वि+अस+ल्युट् करणे।

विदूषकः (सरोषम्)—अवेहि रे उच्छाहहेतुअ। अत्तभवं पकिदिं आपस्रो। तुमं दाव अड़वीदो अड़वीं आहिण्डन्तो णरणासिआलोलुवस्स जिस्सरिच्छस्स कस्सवि मुहे पड़िस्ससि [अपेहि रे उत्साहहेतुक। अत्रभवान् प्रकृतिमापन्नः। त्वं तावत् अटवीतः अटवीमाहिण्डमानः नरनासिकालोलुपस्य जीर्णर्क्षस्य कस्यापि मुखे पतिष्यसि]।

VIDUSHAKA (*Angrily*)—Avaunt! You tempter. His Highness has returned to his senses. You, rushing from thicket.

to thicket, will surely fall into the mouth of some old bear fond of the human nose.

विदूषेति। ('रोषेण' कोपेन सह आह) 'रे उत्साहस्य' उद्यमस्य 'हेतुः' कारणम् [कुत्सिते कन्] 'अपेहि' दूरे भव। 'अतभवान्' मान्योऽयं राजा 'प्रकृतिं' स्वभावम् 'आपन्नः' प्राप्तः। त्वयैव उत्साहितः अयं मृगयां याति, अधुना तु प्रकृतिस्थः, तद्दूरमपसर। मन्ये 'त्वं तावत् अटवीतः' गुल्मात् 'अटवीं' गुल्मम् 'आहिण्डमानः' गाहमानः 'नराणां नासिकायां' नरनासिकाभक्षणे 'लोलुपस्य' सस्पृहस्य 'कस्यापि जीर्णर्क्षस्य' वृद्धभल्लूकस्य 'मुखे पतिष्यसि' तेन व्यापादयिष्यसे। ["अपेहि रे उत्साह-हेतुक" (त-, व्या-, म-)—राघवविद्यासागरौ एतत् न पठतः]।

NOTES

1. (a). उत्साह &c.—कुत्सित उत्साहहेतुः इति उत्साहहेतु + कन् or क। (b). नरनासिका &c.—गर्हितं लुम्पति इति लुप् + यङ् + अच् कर्त्तरि भावगर्हायाम् = लोलुपः greedy. (c). जीर्णः ऋक्षः जीर्णर्क्षः or जीर्णऋक्षः तस्य। Beasts of prey take to man-eating when they get old (जीर्ण) or otherwise unable to hunt. Probably the bear considers the human nose a delicacy. "भल्लूका मनुष्याणां नासिकां गृह्णन्ति"—*Dasakumara* quoted by *Monier-Williams*.

राजा—भद्र सेनापते, आश्रमसन्निकर्षे स्थिताः स्मः। अतस्ते वचो नाभिनन्दामि। अद्य तावत्—

गाहन्तां महिषा निपानसलिलं शृङ्गैर्मुहुस्ताडितं
छायाबद्धकदम्बकं मृगकुलं रोमन्थमभ्यस्यतु।
विस्रब्धं क्रियतां वराहततिभिर्मुस्ताक्षतिः पल्वले
विश्रामं लभतामिदञ्च शिथिलज्याबन्धमस्मद्धनुः॥

KING—Good General, we are staying near a hermitage. So I do not endorse your remark. To-day, then, let the buffaloes plunge into the waters of pools tossed up repeatedly with their horns ; let the deer-tribe practise rumination in herds

formed under shades ; let the digging up of bulbs be quietly done by rows of boars in shallow lakes ; and let this bow of ours enjoy rest with the grip of the string loose.'

गच्छेति। 'भद्र' सौम्य 'सेनापते आश्रमस्य सन्निकर्षे' समीपे 'स्थिताः स्मः' तिष्ठामः 'अतो' हेतोः 'ते वचनं न अभिनन्दामि' आद्रिये ॥ ["सन्निकर्षे" (त-, न्या-)—"सन्निकृष्टे" (रा-, वि-)—"सन्निकृष्टं" (म-)] ॥ गाहन्तामिति। अन्वयः—महिषा निपानसलिलं शृङ्गैर्मुहुस्ताडितं गाहन्ताम्। मृगकुलं छायाबद्धकदम्बकं रोमन्थमभ्यस्यतु। वराहततिभिः विस्रब्धं पल्वले मुस्ताक्षतिः क्रियताम्। इदम् अस्मद्धनुश्च शिथिलज्याबन्धं (सत्) विश्रामं लभताम्। व्याख्या—'महिषा निपानस्य' उपकूपजलाशयस्य 'सलिलं' जलं 'शृङ्गैः' विषाणैः 'मुहुः' वारं वारं 'ताड़ितम्' उच्चालितं यथा तथा 'गाहन्तां' विशन्तु' त्रासाभावात् स्वच्छन्दं जले मज्जन्तु। 'मृगकुलं' हरिणयूथम् अनुइ जितं 'छायायां बद्धकदम्बकं' रचितश्रेणि सत् 'रोमन्थं चर्वितचर्वणम्' 'अभ्यस्यतु' अनुशीलयतु ॥ 'वराहाणां' शूकराणां 'ततिभिः' श्रेणिभिः 'विस्रब्धम्' असम्भ्रमं यथा तथा 'पल्वले' क्षुद्रसरसि [जातावेकवचनम्] 'मुस्तानां' घासमूलानां 'क्षतिः' उत्खननं 'क्रियतां' विधीयताम्। 'इदम्' एतत् 'अस्माकं धनुश्च शिथिलः' अदृढः 'ज्याबन्धः' मौर्वीबन्धनं यस्मिन् तथाभूतं सत् 'विश्रामं' व्यापारविरतिम् [ण्यन्तात् पचाद्यच् । व्यवस्थितविभाषाश्रयणात् वृद्धिः] 'लभतां' प्राप्नोतु, निर्व्यापारं तिष्ठतु इत्यर्थः ॥ ["विस्रब्धं" (रा-, वि-, म-)—"विस्रब्धैः" (त-, न्या-) ॥ "तति" (वि-, म-) —"पति" (रा-, त-, न्या-)] ॥

NOTES

1. (**a**). सेनापते—This address pays the General a compliment. You being the सेनापति—the leader of my forces—this ardour suits you very well, but there are other considerations. We are near a hermitage and must not think of disturbing the ascetics by our shouting and yelling &c. (**b**). With the reading सन्निकृष्टे explain सन्निकृष्टे देशे।

2. (**a**). निपान &c.—निपीयते अस्मिन् इति नि+पा+ल्युट् अधिकरणे = निपानम् a pool. "आहावस्तु निपानं स्यादुपकूपजलाशये" इत्यमरः। Here उप-

कूपजलाशय—a trough near a well—does not apply. Such a trough is not possible in the wilderness. It is better taken as *any piece of shallow water.* (b). शृङ्गैर्मुहुस्ताडितम् is an adverbial phrase qualifying गाहन्ताम्। See Tika. Raghava takes it as qualifying निपानसलिलम्। (c). छाया &c.—कदम्ब means समूह। "वृन्दे कदम्बं नीपे ना"। कदम्बमिव कदम्बकम्। कन् स्वार्थे। बद्धं कदम्बकं येन। बहु—। कुल and कदम्ब mean apparently the same. To avoid tautology let बद्धकदम्बकम् refer to *formation of groups* in different places, and कुल to the whole herd, a single कुल producing different *Kadambakas.* (d). रोमन्थम्—रोगं मथ्नातीति रोग + मन्थ + अण् कर्त्तरि। The cure of disease. पृषोदरादि। The rumination is supposed to do good to the cattle. (e). अभ्यस्यतु—अभि + अस् दिवादि + लोट् तु let them do it over again. (f). These two lines indicate absence of disturbance, hence ease and confidence. On this point मुहुः and अभ्यस्यतु are suggestive. (g). वराहपतिभिः for वराहततिभिः has the weighty support of Bhoja and Vamana. It is supposed to imply that only the tuskers (पति) were deemed worth hunting for. (h). विश्रामम्—विश्रामयति इति वि + श्रम + णिच् अच् कर्त्तरि = विश्रामः that which relieves fatigue, i. e., rest. तम्। Here the sutra "नोदात्तोपदेशस्य मान्तस्यानाचमेः" bars वृद्धि। The वृत्तिकार has the remark "केचिदत 'वा' इत्यनुवर्त्तयन्ति। सा च व्यवस्थितविभाषा। तेन उत्क्रामयति संक्रामयति इत्येवमादि सिद्धं भवति"। Mallinatha takes advantage of this to defend "विश्रामय", "विश्रामयन्" &c. Haradatta however is opposed to it. Or say श्रम एव श्रामः fatigue. प्रज्ञादि। विगतः श्रामो यस्मिन् तम्। विश्रमम् is Bhoja's reading. Vamana has विश्रान्तिम्। (i). ज्याया बन्धः। इतत्—।

3. *Remark.* The metre is शार्दूलविक्रीडितम्। See under ग्रीवाभङ्ग &c. Act I. The figure is स्वभावोक्ति। See under ग्रीवाभङ्ग &c. Act I. The काव्यप्रकाश condemns the third line of प्रक्रमभङ्ग। The commentator thereon remarks "अत्र गाहन्तामिति कर्त्तृकारकवाचकतिङः प्रक्रमे क्रियतामिति कर्मकारकवाचकस्य"।

सेनापतिः—यत् प्रभविष्णवे रोचते।

GENERAL.—As master pleases.

राजा—तेन हि निवर्त्तय पूर्वगतान् वनग्राहिणः। यथा न मे सैनिकास्तपोवनमुपरुन्धन्ति तथा निषेद्धव्याः। पश्य—

शमप्रधानेषु तपोधनेषु गूढं हि दाहात्मकमस्ति तेजः।
स्पर्शानुकूला इव सूर्य्यकान्तास्तदन्यतेजोऽभिभवाद्वमन्ति॥

KING—Well, then recall the forest-surrounders that have gone before. My soldiers have to be so warned that they do not disturb the forest of penance. Know, in ascetics with whom quiet is predominant, there is hidden energy whose essence is burning. Like sun-gems, pleasant to touch, they emit it through aggression of other energies.

सेनापतिः—यदाज्ञापयति स्वामी।

GENERAL—As Sire commands.

सेनेति। 'प्रभविष्णवे' प्रभवणशीलाय स्वामिने ["क्रियार्थानां प्रीयमाणः" इति चतुर्थी सम्प्रदाने] 'यत् रोचते' तदेव भवतु। अद्य विश्रम एवास्तु।

राजेति। 'तेन हि' ततश्च 'पूर्वं गतान्' प्रस्थितान् 'वनग्राहिणो' वनवेष्टकान् 'निवर्त्तय' प्रत्याह्वय। 'मे सैनिकाः यथा तपोवनं न उपरुन्धन्ति' पीड़यन्ति 'तथा निषेद्धव्याः' निवारयितव्याः। 'पश्य' जानीहि—शमेति। अन्वयः—शमप्रधानेषु तपोधनेषु दाहात्मकं तेजो गूढम् अस्ति हि। स्पर्शानुकूलाः सूर्य्यकान्ता इव अन्यतेजोऽभिभवात् तत् (ते) वमन्ति। व्याख्या—'शमः' शान्तिः 'प्रधानं' प्राधान्येन सेव्यं येषां तेषु 'तपोधनेषु' मुनिषु 'दाहः' दहनम् 'आत्मा' स्वभावो यस्य तथाविधं 'तेजः' ज्योतिः 'गूढं' गुप्तम् 'अस्ति हि' अस्त्येव। 'स्पर्शस्य' करपरामर्शस्य 'अनुकूला' क्षमाः करग्राह्याः 'सूर्य्यकान्ताः' मणिभेदा 'इव अन्यस्मात् तेजसः' ज्योतिषः यः 'अभिभवः' तिरस्करणं तस्मात् हेतोः 'तत्' तेजः ते 'वमन्ति' आविष्कुर्वन्ति [गौण्या वृत्त्या ग्राम्यतापरिहारः]। ["इव" (रा-, वि-, म-)—"अपि" (त-, न्या-)॥ "तदन्य" (रा-, वि-, म-)—"तेजोन्य" (त-, न्या-)॥ "वमन्ति" (रा-, वि-, म-)—"दहन्ति" (त-, न्या-)]॥

NOTES

1. प्रभविष्णवे—प्र + भू + इष्णुच् तच्छीले कर्त्तरि = प्रभविष्णुः the lord. The usage is वैदिक। तर्क्य। This is artfully worded. He is over-joyed but assumes the air of chagrin. Oh ! how I should like to go out ! ! But what can my poor self do when प्रभु orders to stay in ! ! !

2. (a). पूर्वं गताः पूर्वगताः gone first. सह्सुपेति समासः। तान्। गतपूर्वान् is also allowable as ज्ञापित by the rule "भूतपूर्वे चरट्"। (b). वनग्राहिणः—वनं ग्रहीतुं शीलमेषाम् इति वन + ग्रह + णिनि कर्त्तरि ताच्छील्ये = वनग्राहिणः। तान्।

3. (a). अनुगताः कूलम् अनुकूलाः favourable. प्रादितत्—। स्पर्शानु-कूलाः tolerating handling. c. f. "स्पर्शक्षमं रत्नम्"—Act I. (b). अन्यतेजः &c.—अभि + भू + अप् भावे = अभिभवः affront. अन्यत् तेजः or अन्यस्य तेजः। कर्मधा—, or ६तत्—। तस्मात् or तेन अभिभवः। Affront from energy of others. सह्सुपेति समासः or ३तत्—। तस्मात्। हेतौ तृतीया। Or अभिभवं प्राप्य वमन्ति इति "ल्यब्लोपे" कर्मणि पञ्चमी। (c). वमन्ति—वम + लट् अन्ति literally to vomit. Here in the secondary sense—गौणवृत्ति— 'to exhibit.' It is ग्राम्य in the मुख्य sense, but not so in the गौण। दण्डिन् says "निष्ठ्यूतोद्गीर्णवान्तादि गौणवृत्तिव्यपाश्रयम्। अतिसुन्दरमन्यत्र ग्राम्यकक्षां विगाहते॥"

4. *Remark.* Here the king points out to the General the risk he runs if he does not check his men (सैनिक). The ascetics appear to be harmless creatures (शमप्रधान)। But your men must not take liberties with them, for they know how to burn. There is fire in them (तेजः अग्नि), only it is hidden (गूढं हि)। Molest them, they will show the fire. Look at the sun-glass. You can handle it. But let the sun's heat (अन्यतेजस्) oppress it, and it burns all that approach it. So do go and call back your men. This is a dodge to send the General away, because the king wants to be alone with the jester.

विदूषकः—धंसदु दे उच्छाहवुत्तन्तो [ध्वंसतां ते उत्साह-वृत्तान्तः]। (निष्क्रान्तः सेनापतिः)।

VIDUSHAKA—Your account of ardour be damned. (*Exit General*).

राजा (परिजनं विलोक्य)—अपनयन्तु भवत्यो मृगया-वेषम्। रैवतक, त्वमपि स्वं नियोगम् अशून्यं कुरु।

KING (*Looking at his attendants*)—Go and put off your hunting dress. Raivataka, you too see that your post is not vacated.

परिजनः—जं देओ आणवेइ [यत् देवः आज्ञापयति]। (निष्क्रान्तः)।

ATTENDANTS—As your resplendent self commands. (*Exit*).

विदूषकः—किदं भअदा णिम्मच्छिअं। सम्पदं इमस्सिं पादवच्छायाविरइदविदाणसणाहे सिलाअले उवविसदु भवं, जाव अहम्पि सुहासीणो होमि [कृतं भवता निर्मक्षिकम्। साम्प्रतम् अस्मिन् पादपच्छायाविरचितवितानसनाथे शिलातले उपविशतु भवान्, यावदहमपि सुखासीनो भवामि]।

VIDUSHAKA—Even the flies have been driven off by you. Now do you sit down on that stone slab furnished with a canopy made by the shade of yonder tree, so that I too may become seated comfortably.

विदूषति। 'ते उत्साहस्य' राज्ञः प्रोत्साहनस्य 'वृत्तान्तः' वार्त्ता 'ध्वंसतां' नश्यतु। मातः परमेनं प्रोत्साहय॥ ["ध्वंसतां" (रा- वि-)—"ध्वंसित" (म-)]॥

राजेति। ('परिजनं' यवनीगणं 'विलोक्य' दृष्ट्वा, यवनीनां मृगयावेषम् आलक्ष्य, आह) 'भवत्यः मृगयायाः वेषं' सज्जां 'अपनयन्तु परिहरन्तु। एतेन यवनीनाम् अपवाहनम्। 'रैवतक' इति दौवारिकसम्बोधनम् 'त्वमपि स्वम्' आत्मनो 'नियोगम्' अधिकारं द्वारमित्यर्थः [अधिकरणे घञ] 'अशून्यं' स्वोपस्थित्या पूर्णं 'कुरु' द्वारि एव तिष्ठ इत्यर्थः।

विदूषेति। 'भवता' मक्षिकाणामपि अभावः 'निर्मक्षिकम्' [अभावार्थेऽव्ययीभावः] 'कृतम्'। परिजनान् अपसार्य्य आवयोः सम्बन्धे निर्जनः कृतोऽयं देशः॥ 'साम्प्रतम्' अधुना 'अस्मिन् पादपच्छायया विरचितं' यत् 'वितानम्' उल्लोचः, चन्द्रातपः ["स्त्री वितानमुल्लोचे" इति त्रिकाण्डशेषः] तेन 'सनाथे' युक्ते 'शिलातले' पाषाणपृष्ठे भवान् 'उपविशतु'। उपविष्टे भवति 'यावत् अहमपि सुखम् आसीनो भवामि' कण्डितसन्धिः स्थातुमशक्तः उपवेशनसुखमनुभवामि इत्यर्थः ["पादपच्छायाविरचितवितानसनाथे शिलातले" (त-, न्या-, म-)—"पादपच्छायायां विरचितलतावितानदर्शनीयायाम् आसने" (रा-, वि-)]।

NOTES

1. (a). उत्साहवृत्तान्तः—वृत्तान्तः वार्त्ता account, or प्रवृत्तिः news. "वार्त्ता प्रवृत्तिर्वृत्तान्तः"। The Jester refers to the news "गृहीतस्वापदसरणम्" with which the General entered. The news is tempting to a hunter, it is an उत्साहवृत्तान्त। May such news cease to come (ध्वंसताम्)। (b). ध्वंसित will refer to the *past.* The Jester does not care for the past, he wants no such news in *future.*

2. परिजन—जन has जातावेकवचनम्। परिगतो जनः परिजनः attendants. Means attendants at the chase, i. e., the *Yavana* women.

3. (a). नियोगम्—नियुज्यते अस्मिन् इति नि + युज + घञ् अधिकरणे = नियोगः appointment, post, i. e., the door. (b). अशून्यम्—न शून्यः not vacant. तम्।

4. (a). निर्मक्षिकम्—The jester notices how the king sends away the General, the attendants, the warder. He expects some confidential talk, and remarks "कृतं भवता निर्मक्षिकम्", i. e., now tell me what you have got to say, there is none to overhear. (b). पादप &c.—वितन्यते इति वि + तन + घञ् कर्मणि = वितानम् a canopy. नाथेन सह सनाथम् furnished with a master. Hence secondarily "taken care of", "looked after", "well furnished" &c. पादेन पिवति इति पाद + पा + क कर्त्तरि = पादपः a tree, so called

because it drinks (पिबति) sap from the earth with its roots (पादैः)। पादपस्य छाया पादपच्छाया। We do not say पादपानाम् because that will give पादपच्छायम् in the neuter by the rule "छाया बाहुल्ये"। तया विरचितम्। इतत्—। तादृशं वितानम्। कर्मधा—। तेन सनाथम्। इतत्—। तस्मिन्। Here the jester points to a particular stone-slab under the shade of a tree which by completely shutting out the sun very well serves the purpose of a canopy spread over the slab.

5. (a). यावत् indicates *dependence.* My sitting *depends* upon your sitting. The गणकार says यावत् is used in senses other than those mentioned (अन्यत्रापि दृश्यते)। These have to be gathered from usage. (b) सुखासीनः—आस + शानच् = आसीनः seated सुखेन आसीनः indicates ease *when sitting down.* We require ease *while seated.* Prefer सुखमासीनः। सहसुपेति समासः।

राजा—गच्छाग्रतः।

KING—Go in front.

विदूषकः—एदु भवं [एतु भवान्]। (उभौ परिक्रम्य उपविष्टौ)।

VIDUSHAKA—Come Your Majesty. (*The two go round the stage and sit down.*)

राजा—माधव्य, अनवाप्तचक्षुःफलोऽसि येन त्वया दर्शनीयं न दृष्टम्।

KING—Madhavya, you are one that has not reaped the benefit of his eyes, as, what is worth seeing has not been seen by you.

विदूषकः—णं भवं अग्गदो मे वट्टइ [ननु भवान् अग्रतो मे वर्तते]।

VIDUSHAKA—Why, Your Honour stands before me.

राजेति। 'अग्रतो गच्छ' पुरो याहि।

विदूषेति। 'एतु' माम् अनुसृत्य आगच्छतु।

राजेति। 'अनवाप्तम्' अलब्धं 'चक्षुषोः फलं' द्रष्टव्यदर्शनं येन तथाभूतः 'असि'। 'येन' यस्मात् [येन इति हेतौ अव्ययम्] 'त्वया दर्शनीयं' द्रष्टव्यं वस्तु 'न दृष्टम्'। यद्वा 'येन त्वया दर्शनीयं न दृष्टं स त्वम् 'अनवाप्तचक्षुःफलोऽसि' इत्यन्वयः। अस्मिन् पक्षे येन इति त्वया इत्यनेन समानाधिकरणम्। उत्तरवाक्यगतत्वेन उपादानात् तच्छब्दोपादानं नापेक्षते। यदि द्रष्टव्यं न दृश्यते तदा किं फलं ते चक्षुषा इति भावः।

विदूषक इति। राजोक्तिम् असहमान आह 'ननु' दर्शनीयानाम् अग्रणीः 'भवान्' मे 'अग्रतः' सम्मुखे 'वर्त्तते' तत् किं वृथा आत्थ द्रष्टव्यं न दृष्टं मया इति ?

NOTES

1. अनवाप्त &c.—अव+आप+क्त कर्मणि अवाप्तम् obtained. चष्टे इति चक्ष+उसि (सि) कर्त्तरि=चक्षुः that which declares. Eye. न अवाप्तम् अनवाप्तम्। अनवाप्तं चक्षुःफलं येन। बहु—। Or—अवाप्तं चक्षुःफलं येन। बहु—। न अवाप्तचक्षुःफलः। We do not get चक्षुष्फलः because the विसर्ग in चक्षुः is प्रत्ययस्य।

2. ननु—Implies आक्षेप। How can you say I have not seen what is worth seeing ? Even now your majesty stands before me, and where on earth is there a better-looking person ?

राजा—सर्वः कान्तमात्मीयं पश्यति। अहं तु ताम् आश्रमललामभूतां शकुन्तलामधिकृत्य ब्रवीमि।

KING—Every one sees his own as beautiful. But I speak referring to Sakuntala the very ornament of this hermitage.

विदूषकः (स्वगतम्)—होदु से अवसरं ण दाइस्सं [भवतु अस्मै अवसरं न दास्यामि]। (प्रकाशम्) भो वअस्स, दे तावसकण्णआ अब्भत्थणीया दीसदि [भो वयस्य, ते तापसकन्यका अभ्यर्थनीया दृश्यते]।

VIDUSHAKA (*Aside*)—Well, I will not give him scope. (*Aloud*) Well friend, it seems a hermit's daughter has to be wooed by you !

राजेति। 'सर्वः आत्मीयं' स्वजनं 'कान्तं' मनोहरं 'पश्यति'। अतः खलु त्वं मामेव दर्शनीयं मन्यसे। 'अहं तु ताम् आश्रमस्य' अस्य तपोवनस्य 'ललामभूतां' भूषणस्वरूपाम् ["विषे धामनि भूषायां ललामेति बुधैर्मतम्" इत्यनेकार्थकोषः] 'शकुन्तलाम् अधिकृत्य' लक्षीकृत्य 'ब्रवीमि'। वृथा ते चक्षुः यतः सैव त्वया न दृष्टा।

विदूषक इति। ('स्वगतम्' आत्मगतम्) 'भवतु' अयं तावत् एवं ब्रवीतु किन्तु अहम् 'अस्मै अवसरम्' अभिलाषस्य प्रसरं 'न दास्यामि'। अभिलाषं विनिन्द्य एनं शकुन्तलाव्यापारात् निवर्त्तयिष्यामि। ('प्रकाशम' उच्चैराह) 'भो वयस्य' क्षत्रियस्य सतः 'ते' तव 'तापसकन्यका' तापसी ब्राह्मणकुमारी 'अभ्यर्थनीया' प्रार्थनीया 'दृश्यते' प्रतिभाति। किमेतत् अनार्य्यं ते ?

NOTES

1. आश्रम &c.—भूत is सम like (तुल्य)। "भूतं क्ष्मादौ...प्राप्ते वित्ते समे सत्ये" इत्यादि मेदिनी। ललाम or ललामन् is ornament. ललाम्नि or ललाम्ना समा ललामभूता।

2. (a). भवतु—An अव्यय indicating a sudden thought. A resolution made there and then. (b). अवसरत्यस्मिन् इति अव+सृ+घ अधिकरणे संज्ञायाम्=अवसरः an opportunity. (c). The jester here makes up his mind (भवतु) to thwart the king. अवसरं न दास्यामि= I will not encourage him.

3. तापसकन्यका—कन्या एव इति कन्यका or कन्यिका। तपः अस्यास्तीति तापसः an ascetic. अण् मत्वर्थे। तस्य कन्यका। Mark the impropriety. Being a क्षत्रिय you wish to marry a Brahmana girl. The regulator of आचार, you are going to violate आचार !

राजा—सखे, न परिहार्य्ये वस्तुनि पौरवाणां मनः प्रवर्त्तते।

सुरयुवतिसम्भवं किल मुनेरपत्यं तदुज्झिताधिगतम्।
अर्कस्योपरि शिथिलं च्युतमिव नवमल्लिकाकुसुमम्॥

KING—Friend, the mind of Puru's descendants does not lean towards that which should be avoided. Like a Navamallika flower loosened and fallen on an Arka tree, that hermit's daughter is really born of a celestial nymph but found when abandoned.

विदूषकः (विहस्य)—जह कस्सवि पिण्डखज्जूरेहिं उव्वेजिदस्स तिन्तिलीए अहिलासो भवे, तह इत्थिआरअणपरिभोइणो भवदो इअं अब्भत्थणा [यथा कस्यापि पिण्डखर्जूरैरुद्वेजितस्य तिन्तिल्याम् अभिलाषो भवेत्, तथा स्त्रीरत्नपरिभोगिणो भवत इयमभ्यर्थना]।

VIDUSHAKA (*Laughing*)—Just as of some one troubled with dates there might be a desire for the tamarind, so is this longing of Your Honour that enjoys the very gems of women.

राज्ञेति। पौरवाणां पुरुवंशीयानाम् आर्य्य 'मनः परिहार्य्ये' परिहर्त्तव्ये 'वस्तुनि' अवैधे विषये 'न प्रवर्त्तते'। यदि शकुन्तला चत्रियैः परिहर्त्तव्या स्यात्, मम प्रवृत्तिस्तत्र न स्यात्।

सुरेति। अन्वयः—शिथिलम् अर्कस्योपरि च्युतं नवमल्लिकाकुसुममिव उज्झिताधिगतं सुरयुवतिसम्भवं किल तत् मुनेरपत्यम्। व्याख्या—'शिथिलं' वृन्तात् भ्रष्टम् 'अर्कस्य' अर्कवृक्षस्य 'उपरि च्युतं' पतितं 'नवमल्लिकायाः कुसुममिव' पुष्पमिव, आदौ 'उज्झितं' मात्रा त्यक्तं पश्चात् 'अधिगतं' मुनिना प्राप्तं 'सुरयुवतिः' अप्सरा मेनका 'सम्भवः' कारणं यस्य तत् 'किल' तादृशमेव 'तत्' मदभिलषितं 'मुनेः' कण्वस्य 'अपत्यं' कन्या शकुन्तला। अप्सरःसम्भवा इयं कथं परिहार्य्या।

विदूषक इति। (राज्ञोक्तौ अनादरप्रकाशार्थं 'विहस्य' ईषद्वैहसित्वा आह) 'यथा' यद्वत् 'पिण्डखर्जूरैः' अतिमधुरैः खर्जूरभेदैः 'उद्वेजितस्य' पीड़ितस्य जाताकचेः 'कस्यापि' जनस्य 'तिन्तिल्याम्' अम्लरसायां चिञ्चायाम् 'अभिलाषो भवेत्' भवितुं सम्भवति (सम्भावनायां लिङ्) 'तथा' तद्वत् 'स्त्रीरत्नानि' वरस्त्रीः 'परिभोक्तुं' भोक्तुं

यस्य तस्य 'भवत: इयम्' एषा तपस्विकन्यापरिणयविषयिणी 'अभ्यर्थना' प्रार्थना। आस्तां तावदपरिहार्य्या एव शकुन्तला, किन्तु यानि रमणीरत्नानि ते अन्त:पुरे सन्ति तेषामग्रत: तुच्छेयं वनवासिनी। तत् त्यज्यतामियमाकाङ्क्षा इति भाव: ॥ ['स्त्री' (रा-, वि-)—'अन्त:पुरस्त्री—' (त-, न्या-, म-) ॥ '—परिभोगिण:' (त-, न्या-)—'—परिभाविण:' (रा-, वि- म-)] ॥

NOTES

1. (**a**). सुरयुवति &c.—युवन् + ति स्त्रियाम् = युवति: a young woman. सुराणां युवति: a heavenly maiden, i. e., an अप्सरस् referring to मेनका। (**b**). किल—वार्त्तायाम् or अवधारणे। (**c**). अपत्यस्—न पतन्ति पितर: अनेन इति नञ् + पत + यत् करणे बाहुलकात् that which prevents the ancestors from going to hell, i. e., progeny. (**d**). तत्—That, i. e,, the one of which I am speaking. Here यच्छब्द is not necessary. प्रक्रान्तार्थत्वात् यच्छब्दोपादानं नापेक्षते। (**e**). उज्झित &c.—Abandoned (by the mother) and found (by the sage), "पूर्वकालैक—" इति कर्मधा—। The mention of सुर and also a descent from a higher to a lower region suggests the high pedigree of the girl. The match will therefore give an exalted rank to the race of पुरु। Again सुरयुवति shows that even if the father were a Brahmana, the girl would be marriageable because "असवर्णक्षेत्रसम्भवा"। Hence the jester's attack fails from the social as well as moral point of view.

2. *Remark*—Note how the gender changes with the objects compared. Thus (i) सुरयुवति and नवमल्लिका both in the feminine ; this is necessary in speaking of the *mother*. (ii) मुनि and अर्क both masculine and represent the *father*. (iii) अपत्य and कुसुम both in the neuter ; this is proper because the progeny being *undefined* as son or daughter it should be represented by a general name (अपत्य)। Again the circumstances are similar too. (i) सुरयुवति is high मुनि is low ; so also नवमल्लिका is high and अर्क is a low bushy shrub. (ii) उज्झित by the higher

one and भविगत by the lower, so also शिथिल from the higher one and च्युत on the lower.

3. (a). The jester now attacks from another side. He ridicules the king's taste. (b). विहस्य—It is the laugh of ridicule. (c). उद्+विज+णिच्+क्त कर्मणि=उद्वेजित: troubled. पिण्डखर्जूर is very sweet. Too much of sweet things produces disgust and causes loss of appetite. Then a *chutni* of tamarind is welcome (तिन्तिण्यामभिलाष:) । But then that is for a moment only. The *chutni* is not eaten for its own sake, but only to whet the appetite for the sweets. Such seems to be the case with you now. (d). स्त्रीरत्न &c.—"जातौ जातौ यदुत्कृष्टं तद्रत्नमिति कथ्यते" । स्त्रीणां रत्नानि स्त्रीरत्नानि the best of the female sex. No निर्धारण, no prohibition of षष्ठीसमास, because निर्धारण takes place only when three things are mentioned, viz, (i) the whole, (ii) the part, (iii) the special property that separates the part from the whole. These do not occur here. स्त्रीरत्न+परि+भुज+णिनि कर्त्तरि ताच्छील्ये= स्त्रीरत्नपरिभोगी one who habitually enjoys the company of the best of the female creation. तस्य (e). The jester's point is—The incomparable beauties in your harem are the sweets. You have had too much of them. To improve your appetite for them you desire this tamarind of the hermit's daughter for a change. I understand you ! You will soon renounce her and go back to the beauties of the herem with greater ardour. Now, think if that would be either honourable on your part, or just with regard to this simple maiden af the forest.

4. *Reading.* (a). अन्त:पुरस्त्रीरत्न is more definite, but स्त्रीरत्न alone too leaves no doubt as to who are meant. (b). परिभाविन् (one who despises) does not suit the context.

राजा—न तावदेनां पश्यसि येनैवमवादी: ।

KING—You are not indeed looking at her, hence you have said so.

विदूषकः—तं क्खु रमणिज्जं जं भवदो वि विम्हअं उप्पादेदि [तत् खलु रमणीयं यत् भवतोऽपि विस्मयमुत्पादयति]।

VIDUSHAKA—That must be charming indeed which excites even your admiration.

राजा—वयस्य, किं बहुना—

चित्रे निवेश्य परिकल्पितसत्त्वयोगा
रूपोच्चयेन मनसा विधिना कृता नु।
स्त्रीरत्नसृष्टिरपरा प्रतिभाति सा मे
धातुर्विभुत्वमनुचिन्त्य वपुश्च तस्याः॥

KING—Friend, what use saying much? Considering the Creator's power and her person, she seems to me a second creation of a gem of a woman, endowed with life by the creator after delineation in a picture, or perhaps made mentally with an assemblage of the beautiful.

राजेति। 'एनां' शकुन्तलां 'तावत् न पश्यसि, येन' हेतुना 'एवम् अवादीः' उक्तवानसि [अद्यतने भूते लुङ्]। न हि सा तवाग्रतो वर्त्तते अतएव एवम् उच्यते त्वया।

विदूषक इति। निपुणोऽसि वयस्य। अतो यत् भवान् अपि तस्या रूपेण विस्मितः तत् मन्ये सुन्दरी किल सा—इत्यर्थः।

राजेति। 'बहुना' उक्तेन 'किं' संक्षेपतोऽहं ब्रवीमि—

चित्रे इति। अन्वय—धातुर्विभुत्वं तस्या वपुश्च अनुचिन्त्य मे, सा विधिना चित्रे निवेश्य परिकल्पितसत्त्वयोगा, मनसा नु रूपोच्चयेन कृता, अपरा स्त्रीरत्नसृष्टिः प्रतिभाति। व्याख्या—'धातुः' स्रष्टुः 'विभुत्वं' निर्माणसामर्थ्यं 'तस्याः' शकुन्तलायाः 'वपुश्च' अनुपमं शरीरञ्च 'अनुचिन्त्य' ध्यात्वा स्थितस्य 'मे' मम 'सा' शकुन्तला 'विधिना' स्रष्ट्रा प्रथमं 'चित्रे निवेश्य' आलिख्य पश्चात् 'परिकल्पितः' साधितः 'सत्त्वेन' प्राणवायुना

'योगो' यस्याः तादृशी 'मनसा नु' किं वा तूलिकादिभिः कठोरता स्यादङ्गेषु इति भयात्, बाह्यं करणं विहाय अन्तःकरणेन 'रूपाणां' त्रिलोकसौन्दर्य्याणाम् 'उच्चयेन' एकत्र संग्रहेण 'कृता' निर्मिता 'अपरा' द्वितीया, 'स्त्रीरत्नस्य सृष्टिः' निर्मितिः 'प्रतिभाति' अवभासते ॥ पुरा सुन्दोपसुन्दवधार्थं विधात्रा स्त्रीरत्नमेकं सृष्टम् इति श्रूयते। इयं हि शकुन्तला द्वितीया स्त्रीरत्नसृष्टिः। निर्माणकुशलस्य विधेर्नेतत् चित्रम्। परन्तु सोऽपि मन्ये प्रथमं महता यत्नेन आलिख्य, पश्चात् प्राणप्रतिष्ठामकरोत्। अथवा एतदपि नात्ममोहनस्य सौकुमार्य्यस्य। तत् किं चन्द्राल्लावण्यं, प्रवालादधरकान्तिम् इत्यादि क्रमेण रूपाणि संगृह्य यथास्थानं निवेश्य स मनसा एव तां निर्मम। ["चित्रे" (रा-, वि-, म-)—"चित्ते" (त-, न्या-) ॥ "सत्त्वयोगा" (रा-, वि-, म-)—"सत्त्व-योगात्" (म-)—"सर्वयोगान्" (त-, न्या-) ॥ "मनसा विधिना कृता नु" (रा-, वि-, म-)—"रचिता (घटिता) मनसा कृता नु" (भो)—"विधिना विहिता कृशाङ्गी" (त-, न्या-] ॥

NOTES

1. न तावत् &c.—The idiom is peculiar. The prior act, दर्शन, is in the वर्त्तमानकाल while the subsequent act, वदन, is भूत। We would say न पश्यसि येन वदसि or न अद्राक्षीः येन अवादीः or again न अद्राक्षीः येन वदसि। Language has changed since the days of कालिदास। अश्वघोष who lived about a hundred years after कालिदास (See *Introduction*) shows trace of this idiom. Thus he says यदा गच्छति तदा अभवत् in "यदा बहिर्गच्छति पार्थिवात्मजस्तदाभवद्द्वारमपावृतं स्वयम्"—*Buddha-charita*, VIII—46.

2. तत् खलु &c.—The jester is now completely disarmed. The king's calm and straight-forward reply has non-plussed him. He sees his error in comparing Sakuntala to the tamarind which the king wants merely *as a change*, and admits her to be as lovely as, or lovelier than, the beauties of the harem. Note the force of खलु and अपि। रमणीयं खलु, and not a mere change (रमणीयत्वादेव प्रार्थ्यते)। Why say so without seeing her ?

Because भवतोऽपि विस्मयः—it has excited the wonder of even a connoisseur like thyself.

3. (a) परिकल्पित &c.—सत्व is प्राण life. "सत्वं गुणे पिशाचादौ... चित्ते प्राणेषु जन्तुषु" इति विश्वः। तस्य or तेन योगः connection with life, i. e., infusion of life. परिकल्पितः सत्वयोगो यस्याः unto whom the infusion of life has been achieved. बहु—। (b). रूपोच्चयेन—उद्+चि+अच् भावे—उच्चयः culling, gleaning संग्रहः। रूपोच्चयः सौन्दर्यसंग्रहः, i. e., उचितानि रूपाणि। क्रदभिहितो भावो द्रव्यवत् प्रकाशते। (c). नु—Indicates विकल्प alternative. "नु पृच्छायां विकल्पे च" इति कोषः। Two alternatives are suggested—(i) She is a painting done with supernatural skill and then enlivened; (ii) She is a collection of all beautiful things in nature. Note the तृतीया in रूपोच्चयेन, मनसा, विधिना। The first refers to the *material* for the work (उपादान), the second to the *implements* (करण)। These two have करणे तृतीया। The third is the *agent* and has अनुक्ते कर्त्तरि तृतीया। (d). स्त्रीरत्नसृष्टिः—स्त्रीणां रत्नं श्रेष्ठ स्त्रीरत्नम् (See above)। तस्य सृष्टिः। (e). अपरा—Another. Allusion is to the creation of तिलोत्तमा। She too was made with रूपोच्चय। The object was to make the brothers सुन्द and उपसुन्द—two invincible demons—quarrel over her. Compare—"निर्ममे योषितं दिव्यां चिन्तयित्वा पुनः पुनः॥ त्रिषु लोकेषु यत्किञ्चिद्भूतं स्थावरजङ्गमम्। समानयद्दर्शनीयं तत्तदत्र स विश्ववित्॥...सा प्रयत्नेन महता निर्मिता विश्वकर्मणा। त्रिषु लोकेषु नारीणां रूपेणाप्रतिमाभवत्॥...तिलं तिलं समानीय रत्नानां यद्विनिर्मिता। तिलोत्तमेति तत्तस्या नाम चक्रे पितामहः॥...गच्छ सुन्दोपसुन्दाभ्यामसुराभ्यां तिलोत्तमे। प्रार्थनीयेन रूपेण कुरु भद्रे प्रलोभनम्॥—*Mahabharata.* Such was her loveliness, that Siva put forth four heads and Indra a thousand eyes to have a good look at her. Compare—"द्रष्टुकामस्य चात्यर्थं गतया पार्श्वतस्तया। अन्यदञ्चितपक्ष्माक्षं दक्षिणं निःसृतं मुखम्॥ पृष्ठतः परिवर्त्तन्त्या पश्चिमं निःसृतं मुखम्॥ गतया चोत्तरं पार्श्वमुत्तरं निःसृतं मुखम्॥ महेन्द्रस्यापि नेत्राणां पृष्ठतः पार्श्वतोऽग्रतः॥ रक्तान्तानां विशालानां सहस्रं सर्वतोऽभवत्॥—*Mahabharata.*

4. *Remark*—The sloka is a knotty one. No two commentators agree in their explanation. Raghava's construction

is—(शकुन्तला) विधिना चित्रे निवेश्य परिकल्पितसत्त्वयोगा नु । रूपोच्चयेन मनसा कृता नु । धातुर्विभुत्वं तस्य वपुश्च अनुचिन्त्य सा स्त्रीरत्नसृष्टिः मे अपरा प्रतिभाति । अपरा जगत्स्त्रीरत्नसृष्टिविलक्षणा । Vidyasagara construes—(शकुन्तला) विधिना चित्रे निवेश्य परिकल्पितसत्त्वयोगा । नु रूपोच्चयेन मनसा कृता । धातुर्विभुत्वं तस्य वपुश्च अनुचिन्त्य मे सा अपरा स्त्रीरत्नसृष्टिः प्रतिभाति । अपरा—जगद्विलक्षणा । Our explanation (see Tika) gives this sense—Thinking of her loveliness I cannot conceive how it was possible for विधि to create her. But when I remember that विधि is omnipotent, I fancy that like that celebrated स्त्रीरत्न, created for the destruction of सुन्द and उपसुन्द, we have here another स्त्रीरत्नसृष्टि in Sakuntala ; but this time, for greater perfection, if possible, it is ब्रह्मन् himself, and not his menial विश्वकर्मन्, that did the work. Even he had to draw a picture first and then infuse life into it ; or perhaps, for such delicate work, he found his *hands* too coarse, and did it all with his *mind* though the materials employed were the same as previously used by विश्वकर्मन्, viz., the assemblage of all that is beautiful in the universe. The result has been a lovelier production than तिलोत्तमा herself. Note the two ways how he explains the additional loveliness. First—*Implements* are the same (hands), the mode of work is different (चित्रे निवेश्य &c). Second—Material the same (रूपोच्चय), the *implements* are different (*mind* and *hands*). Of course there is this additional common difference that in one case the *servant* (विश्वकर्मन्) works, in the other the *master* (धातृ) himself.

5. *Readings*—If my interpretation is accepted, the reasons for adopting my readings are obvious. वसन्ततिलका is the metre.

विदूषकः—जइ एव्वं पच्चादेसो दाणिं रूववदीणं [यदि एवं, प्रत्यादेश इदानीं रूपवतीनाम्] ।

VIDUSHAKA—If so, now comes a dethronement of all beauties.

राजा—इदञ्च मे मनसि वर्त्तते ।

अनाघ्रातं पुष्पं किसलयमलूनं कररुहैर्
अनाविद्धं रत्नं मधु नवमनास्वादितरसम् ।
अखण्डं पुण्यानां फलमिव च तद्रूपमनघं
न जाने भोक्तारं कमिह समुपस्थास्यति विधिः ॥

KING—This is just what is in my mind [Or—This too is in my mind]. Her faultless beauty is a flower not yet smelt, a tender twig not yet plucked with the nails, a gem not yet bored, as it the very fruit of merits not yet divided. I know not whom the Ordainer will approach as the enjoyer in this matter.

विदूषक इति । 'यदि एवम्' ईदृशी एव शकुन्तला तर्हि 'इदानीं रूपवतीनां' स्वाभारोप्रभृतीनां 'प्रत्यादेशः' निराकृतिर्जाता । सर्वा रूपवत्यः अनया निराकृताः, एका शकुन्तला एव रूपवती जगति, नान्या काचित् ।

राजेति । 'इदञ्च' एतत्, 'मे मनसि वर्त्तते' । रूपवत्यो निराकृता इत्येवाहं मन्ये । यद्वा—'इदञ्च' एतदपि वक्ष्यमाणं 'मे मनसि वर्त्तते' । अस्मिन् पक्षे वक्ष्यमाण-श्लोकस्य चरणत्रयम् एतद्वाक्यस्य विषयः ।

अनाघ्रातमिति । अन्वयः—अनघं तद्रूपम् अनाघ्रातं पुष्पम्, कररुहैरलूनं किसलयम्, अनाविद्धं रत्नम्, अनास्वादितरसं नवं मधु, अखण्डं पुण्यानाञ्च फलमिव । विधिः इह कं भोक्तारं समुपस्थास्यति न जाने । व्याख्या—'अनघम्' अपापम् अदोषमित्यर्थः ["पापव्यसनयोरघम्" इत्यनेकार्थकोषः] 'तस्याः' शकुन्तलायाः 'रूपम् अनाघ्रातं' अकृतगन्धोपभोगं 'पुष्पं' कुसुमम् । 'कररुहैः' नखैः 'अलूनम्' अच्छिन्नं, मण्डनत्वेन अनुपभुक्तं 'किसलयं' नवपल्लवम् । 'अनाविद्धम्' अच्छिद्रं भूषणत्वेन अनुपभुक्तं रत्नं मणिः । 'अनास्वादितः' अनुपभुक्तः 'रसो' माधुर्यं यस्य तत् 'नवं' नूतनं 'मधु' ।

किं बहुना, 'अखण्डं' भक्षणार्थं कर्त्तर्या अविभक्तं 'पुण्यानाञ्च' मुक्ततराशीनामिव "फलमिव' मन्ये [इत्युत्प्रेक्षा । पूर्ववत् तु पुण्यादित्व न रूपणात् रूपकम्]। 'विधिः' विधाता 'इह' शकुन्तलारूपविषये 'कं' जनं 'भोक्तारं' भोगभाजं 'समुपस्थास्यति' "एहि भोः, अत्र त्वं भोक्ता" इति कस्य समीपवर्त्ती भविष्यति [उपसर्गवशात् सकर्मकत्वम् । उपेन व्यवधानात् "समवप्रविभ्यः स्थः" इत्यात्मनेपदं न] 'न जाने' । धन्यः स यः अस्य रूपस्य भोक्ता—इत्याकाङ्क्षातिशयाविष्करणम् ।

NOTES.

1. प्रति + आ + दिश + घञ् भावे = प्रत्यादेश supplanting. Or प्रत्यादिश्यते अनेन इति प्रति + आ + दिश + घञ् करणे = प्रत्यादेश that with which supplanted. He means to say—All well-known beauties are now put to shade by शकुन्तला ।

2. (a). आ + घ्रा + क्त कर्मणि – आघ्रातम् smelt न आघ्रातम not smelt. Flower is enjoyed by smelling. Her beauty is a flower unenjoyed. (b). लू + क्त कर्मणि = लूनम् plucked. न लूनम् not plucked. Tender twigs are enjoyed by plucking and wearing them in the ears. Her beauty is a tender twig unenjoyed. (c) करं रोहन्ति इति कर + रुह + क कर्त्तरि = कररुहाः nails. आ + व्यध + क्त कर्मणि – आविद्धम् pierced. न आविद्धम् not pierced. Gems are bored and strung into necklaces &c. This is *enjoying* gems. Her beauty is a gem unenjoyed. (d). आ + स्वद + णिच् + क्त कर्मणि – आस्वादित: tasted. तादृशो रसो यस्य whose flavour is tasted. न आस्वादितरसम् । Honey is enjoyed by tasting. Her beauty is fresh honey unenjoyed.

3. (a). खण्ड is a "part". "खण्डोऽस्त्री शकले" इति विश्व. । अक्षतः खण्डः अस्य अखण्डम् undivided, un-cut. बहु— । फल is enjoyed (eaten) by *cutting it up*. Her beauty is as if the very fruit of merits, but it is yet unenjoyed. Others explain अखण्ड as समग्र complete. न खण्डम् अखण्डम् not part, i. e., whole. (b). अविद्यमानम् अघमस्मिन् अनघम् faultless. (c). इह—In this matter, i. e., in तद्रूप, in her beauty. (d). जाने—ज्ञा + लट् ए । "अनुपसर्गात् ज्ञः" इति कर्त्रभिप्राये क्रियाफले आत्मनेपदम् ।

5. *Remark*—Both किसलय and किशलय are correct, but the former is Kalidasa's favourite. Comp. the यमक in "किसलयैः सलयैरिव पाणिभिः"—*Raghu*. There is a pun in the word फल in the third line. फल means "consequence" and also "fruit." The sense is—अनाघ्रातं पुष्पम् does not fall to the lot of one without luck. It is a पुण्यफल। Again करस्हैरलूनं किसलयम् is another पुण्यफल। So too is अनाविद्धं रत्नम्—a third पुण्यफल। Yet a fourth पुण्यफल is अनास्वादितरसं नवं मधु। By enjoying the beauty of Sakuntala this four-fold पुण्यफल is enjoyed. But this is not all. Her beauty is as it were the फल of *all* sorts of पुण्य। Whatever is enjoyable in the universe, is enjoyed by enjoying her beauty. Lucky indeed is the man whom विधि will invite to enjoy it.

6. The metre is शिखरिणी (see यदालोके &c.—Act I). We have रूपक in the first two lines (see वातेरित &c.—Act I) and उत्प्रेक्षा in the third line (See कृष्णसारे &c.—Act I).

विदूषकः—तेन हि लहु परित्ताअदु णं भवं। मा कस्सवि तवस्सिणो इङ्गुदीतेल्लचिक्कणसीसस्स हत्थे पडिस्सदि [तेन हि लघु परित्रायतामेनां भवान्। मा कस्यापि तपस्विनः इङ्गुदीतैलचिक्कणशीर्षस्य हस्ते पतिष्यति]।

VIDUSHAKA—Then you must rescue her quick. It must not be that she fall into the hands of some ascetic with his head shinning with Ingudi-oil.

राजा—परवती खलु तत्रभवती। न च सन्निहितोऽत्र गुरुजनः।

KING—But she has a master, and her superior is not at hand here.

विदूषक इति। 'तेन हि' यद्येवं तदा 'भवान् एनां' शकुन्तलां 'लघु' झटिति 'परित्रायतां' रक्षतु। कुतोऽस्या भयमित्याह—'इङ्गुदीतैलेन चिक्कणं' मसृणं 'शीर्षं'

मस्तकं यस्य तादृशस्य, अत्यन्ततः शकुन्तलायाः अयोग्यस्य इत्यर्थः, 'कस्यापि तपस्विनः हस्तं' सा 'पतिष्यति' तेन ऊढ़ा तद्भोग्या भविष्यति ["हस्ते पतनम्" इति लौकिकोक्तिः] इति 'मा-' मा भूत् ॥ ["तैलचिक्कण" (त-, न्या-, म-)—"तैलमिश्रचिक्कण" (रा-, वि-)] ।

राजेति । 'तत्रभवती' शकुन्तला 'परः' अन्यः अस्ति अस्याः प्रभुत्वेन इति 'परवती' पराधीना 'खलु'। 'गुरुजनः' येन सा परवती स 'च अत्र' अस्मिन् तपोवने 'न सन्निहितः' न उपस्थितः। अतो लघु परित्राणं न सम्भवति ।

NOTES

1. तेन हि &c.—The last line of the king's speech raises before the jester the picture of an ascetic marrying Sakuntala. He thinks that would be a calamity, and urges the king to rescue her from such a fate. In "तैलमिश्रचिक्कण" मिश्र is superfluous.

2. परवती &c.—The king points out that nothing can be done in a hurry. She is not her own master. Her father has to be approached, but is away. Who knows that by the time the sage comes back, some ascetic will not woo and win her ; or that some one is not even now negotiating her marriage with the sage where he is now. Indeed this is the problem in the solution of which the king wants the help of the jester (विश्रान्तेन भवता ··सहायेन भवितव्यम्—*Ante*).

विदूषकः—अथ भवन्तं अन्तरेण कीदिसो से दिट्ठिराओ [अथ भवन्तम् अन्तरेण कीदृशः अस्या दृष्टिरागः] ।

VIDUSHAKA—Well, what was the expression of her eyes towards your honor ?

राजा – निसर्गादेव अप्रगल्भस्तपस्विकन्याजनः । तथापि तु—

अभिमुखे मयि संहृतमीक्षितं हसितमन्यनिमित्तकृतोदयम् ।
विनयवारितवृत्तिरतस्तया न विवृतो मदनो न च संवृतः ॥

KING—A hermits' daughter is indeed naturally un-obtrusive. Yet she gazed at me, but I facing her, the glance was withdrawn, she smiled, but as if the smile arose from some other cause. Hence her love, with its course stopped by decorum, was neither revealed nor concealed.

विदूषकेति। 'अथ' पश्चात्तरं, गुरुजनस्य असन्निधानपक्षं पृच्छामि 'भवन्तमन्तरेण' भवन्तं प्रति ["अन्तरान्तरेणयुक्ते" इति द्वितीया] 'अस्याः' शकुन्तलायाः 'दृष्टिरागः' नेत्रप्रीतिः 'कीदृशः' ["अथ" (त-, न्या-, म) "अव" (रा-, वि) ॥ "भवन्तमन्तरेण" (रा-, वि-, म-)—"तवोपरि" (त-, न्या-)] ॥

राजेति। 'तपस्विकन्याकर्दो जनः निसर्गात्' प्रकृत्या [हेतौ पञ्चमी] 'एव अप्रगल्भः' अप्रौढः गूढभावः। 'तथापि तु' अप्रगल्भत्वेऽपि।

अभीति। अन्वयः—मयि अभिमुखे संहृतं तया ईक्षितम्। अन्यनिमित्तकृतोदयं हसितम्। अतो मदनो विनयवारितवृत्तिः न विवृतः न च संवृतः। व्याख्या—'मयि अभिमुखे' तस्यां दत्तनेत्रे सति 'संहृतं' परावर्तितं यथा तथा 'तया' शकुन्तलया 'ईक्षितं' दृष्टम् [भावे क्तः]। 'अन्यस्मात्' मद्भिन्नात् 'निमित्तात्' कारणात् 'उदयः' आविर्भावो यस्य हासस्य, तत् यथा तथा तया 'हसितं' हासः कृतः [भावे क्तः]। 'अतः मदनः' कन्दर्पः 'विनयेन' सुशिक्षया 'वारिता' निरुद्धा 'वृत्तिः' प्रसरो यस्य तथाविधः सन् 'न विवृतः' प्रकाशितः 'न च संवृतः' गोपितः। मयि ईक्षितं मत्सम्मुखं हसितञ्च तेन मन्ये सा अनुरक्ता। किन्तु ईक्षणं संहृतं हासश्च निमित्तान्तरात्, इति तु उदासीनेति प्रतीयते। एवं सति न जाने, वयस्य "कीदृशोऽस्याः दृष्टिरागः" इति भावः। ["ईक्षितम्" (त-, वि-, न्या-, म-)—"ईक्षणम्" (रा-) ॥ "कृतोदयम्" (रा-, वि-, म-)—"कथोदयम्" (त-, न्या-)] ॥

NOTES

1. (a). अथ—An अव्यय। Suggests an alternative (विकल्प)। "अथाथो संशये स्यातामधिकारे च मङ्गले। विकल्पानन्तरारम्भप्रश्नकार्त्स्न्यसमुच्चये ॥" इति मेदिनी। First, tell me if she likes you or not. If you are liked (विकल्प), a solution is possible, even though the father

be absent. (b). अन्तरेण—Towards ; with reference to. अव्यय। Compare—"देवीं वसुमतीमन्तरेण महदुपालम्भनं गतोऽस्मि"—Act V. (c). दृष्टिरागः—रज्यते अनेन इति रञ्ज+घञ्+करणे—रागः colour, i. e., expression. पश्यत्यनया इति दृश+क्तिन् करणे—दृष्टिः। तस्या रागः the expression of her eyes. (d) With the reading अत्र for अथ take अत्र as द्वितीयार्थे त्रल्। अत्र भवन्तम towards your honour.

2. (a). निसर्गात्—नितरां सृज्यते इति नि+सृज+घञ् कर्मणि—निसर्गः nature. तस्मात्। (b). प्रगल्भते इति प्र+गल्भ+अच् कर्त्तरि प्रगल्भः forward, out spoken. न प्रगल्भः।

3. (a). अभिगतं मुखमस्य अभिमुखः facing. बहु—। तस्मिन्। भावे क्तो। (b). अन्यत् निमित्तम् some other cause. कर्मधा—। तेन कृतः। इतत्—। तादृश उदयो यस्य तत् यथा तथा। (c). विनय &c.—वि+नी+अच् भावे—विनयः discipline. वृ+णिच्+क्त कर्मणि वारिता checked. विनयेन वारिता checked by decorum तादृशी वृत्तिर्यस्य। (d). The sense is, I may say, she betrayed love, because she glanced at me. But then she withdrew the glance when I faced her, which is not encouraging. Again her smile may raise hopes, but unfortunately it did not refer to anything of mine. So I can say neither she loves me, nor that she does not. The metre is द्रुतविलम्बित।

विदूषकः—ण क्खु दिट्ठमेत्तस्स तुह अङ्कं आरोहदि [न खलु दृष्टमात्रस्य तव अङ्कम् आरोहति]।

VIDUSHAKA—Indeed she cannot sit on your lap just as you are seen. [Or—She does not sit on your lap just as you are seen ?]

राजा—मिथः प्रस्थाने पुनः शालीनतयापि कामम् आविष्कृतो भावस्तत्रभवत्या। तथाहि—

दर्भाङ्कुरेण चरणः क्षत इत्यकाण्डे
तन्वी स्थिता कतिचिदेव पदानि गत्वा।

see the penance-grove has been turned by you into a pleasure-grove.

राजा—सखे, तपस्विभिः कैश्चित् परिज्ञातोऽस्मि। चिन्तय तावत् केनापदेशेन पुनराश्रमपदं गच्छामः।

KING—Friend, I have been recognised by some of the ascetics, think then with what pretext I may again visit the hermitage.

विदूषकः—को अवरो अवदेसो तुम्हाणं राआणं [कः अपरः अपदेशो युष्माकं राज्ञाम्]। णीवारच्छट्ठभाअं अम्हाणं उवहरन्तु त्ति [नीवारषष्ठभागम् अस्माकम् उपहरन्तु इति]।

VIDUSHAKA—What other pretext for you kings? Be it this "Let the anchorites bring our sixth part of the wild grains."

विदूषेति। 'तेन हि' यद्येवं तर्हि 'गृहीतं' सञ्चितं 'पाथेयं' गन्तुः पथि साधु वस्तु येन तादृशो 'भव'। शकुन्तलारूपात् लब्धात् त्वया न निवर्त्तितव्यं, किन्तु तत्प्रति गन्तव्यमेव। तत् पथि वर्त्तनयोग्यं पाथेयं गृहाण। आश्रमं याहि इत्यर्थः। 'त्वया तपोवनम् उपवन" प्रमोदवनं 'कृतम् इति' अहं प्रेक्षे। यत्रान्यैस्तपश्चीयते त्वया तु तत्र चित्तं प्रम, अहो निपुणता ते, इत्यभिप्रायः।

राजेति। 'परिज्ञातः' राजाहमिति विदितः। 'चिन्तय तावत्' विचिन्त्य ब्रूहि 'केन अपदेशेन' व्याजेन 'पुनः' भूयोऽपि 'आश्रमपदं गच्छामः'। पूर्वं वैखानसैर्निमन्त्रितोऽहं गतः, अधुना पुनः केन यामि इति प्रश्नः। ["पुनराश्रमपदं गच्छामः" (त-, न्या-, म-)—"सकृदपि आश्रमे वसामः" (रा-, वि-)]॥

विदूषेति। राज्ञां युष्माकम् 'अपरः' अन्यः 'कः अपदेशः' व्याजः। 'अस्माकं' राज्ञां प्राप्यं 'नीवारस्य षष्ठभागम् उपहरन्तु' मत्सकाशमानयन्तु तापसा 'इति' कृत्वा विशतु भवान्।

NOTES

1. (a). गृहीतपाथेयः = पथि साधु इति पथिन् + ढञ् = पाथेयम् proven-

der ; stores for the journey. Collect stores for the journey. This is the solution of the king's problem—"The sage is away. That does not matter. She loves you. Go then to the hermitage, stay there for some time (गृहीतपाथेयो भव) until she becomes yours by the गान्धर्व form of marriage which does not require the consent of the parents."

2. (a). The king likes the idea. The difficulty is to find a pretext to go there a second time. (b). तावत्—अवधारणे। Emphasises निश्चय। (c). अपदिश्यते वच्यते अनेन इति अप+दिश+घञ् करणे--अपदेशः a pretext. तेन। तृतीया करणे। (d). आश्रमपदम्—आश्राम्यन्ति अस्मिन् इति आ+श्रम+घञ् अधिकरणे--आश्रमः hermitage. तस्य पदम् the site of the hermitage. (e). This is the difficulty. An ordinary invidual may come in and go out unnoticed. The case of kings is different. They know me here. If I go, I must have some excuse to explain my visit.

3. (a). नीवार &c.—नितरां व्रियन्ते इति नि+वृ+घञ् कर्मणि नीवाराः wild grains. नि is lengthened by the rule "उपसर्गस्य घञि अमनुष्ये बहुलम्"--the final of an उपसर्ग is irregularly lengthened when घञ् follows and the compound does not refer to a human being.

राजा—मूर्ख, अन्यमेव भागधेयमेते तपस्विनो निर्वपन्ति, यो रत्नराशीनपि विहाय अभिनन्द्यते। पश्य—

यदुत्तिष्ठति वर्णेभ्यो नृपाणां क्षयि तद्धनम्
तपःषड्भागमक्षय्यं ददत्यारण्यका हि नः॥

King—Fool, quite a different kind of rent these ascetics pay which is prized foregoing even heaps of jewels. Behold—Of kings, the wealth which arises from the castes is perishable. The foresters give us the sixth part of their penance which is indeed imperishable.

नेपथ्ये—हन्त सिद्धार्थौ स्वः।

(*In the Tiring Room*)—Ah ! We have gained our object.

राजेति। भाग एव इति 'भागधेयः' [स्वार्थे धेयप्रत्ययः]। 'एते तपस्विनः अन्यमेव' प्रकृतिदेयात् भिन्नमेव 'भागधेयं' करम् ["भागधेयः करो बलिः" इत्यमरः] 'निर्वपन्ति' ददति, 'यो' भागधेयः [उत्तरवाक्यस्थितत्वादेव यच्छब्दसच्छब्दोपादानं नापेक्षते] 'रत्नानां' मणीनां 'राशीन् अपि' समूहान् अपि 'विहाय' परित्यज्य 'अभिनन्द्यते' बहुमन्यते। कुतोयमुतकर्ष इति चेत् 'पश्य'—

यदिति। अन्वयः—नृपाणां वर्णेभ्यो यत् धनम् उत्तिष्ठति तत् क्षयि। आरण्यका नः अक्षय्यं हि तपःषड्भागं ददति। व्याख्या—'नृपाणां' राज्ञां 'वर्णेभ्यो' ब्राह्मणादिभ्यो 'यत् धनं' कररूपं वित्तम् 'उत्तिष्ठति' आदीयते ["उदोऽनूर्ध्वकर्मणि" इत्यत्र "ईहा" ग्रहणात्, अत्र च ईहाया अभावात् नात्मनेपदम्] 'तत् क्षयि' विनाशि। 'आरण्यकाः' तपस्विनः 'नः' अस्मभ्यम् 'अक्षय्यं हि' क्षेतुमशक्यमेव ["क्षय्यजय्यौ शक्यार्थे" निपात्येते] 'तपसः षट्' षष्ठो 'भागः तपःषड्भागः' [अत्र षट्शब्दस्य षष्ठार्थत्वात् न संख्यात्वम्। तेन "दिक्संख्ये संज्ञायाम्" इति नियमो न प्रवर्त्तते। ततः समासः] तं 'ददति' ["नाभ्यस्ताच्छतुः" इति निषेधात् न नुम्]। ["तद्धनम्" (त-, न्या-)—"तत् फलम्" (रा-, वि-,म-)]।

नेपथ्ये इति। 'हन्त' हर्षे। 'सिद्धः' सम्पन्नः 'अर्थः' प्रयोजनं ययोः तथाविधौ 'स्वः' भवावः। राजदर्शनार्थं चलितौ मृगयां गतो न वा इति सन्दिहानौ न यातः इति श्रुत्वा हृष्टौ तापसौ एवम् ऊचतुः।

NOTES

1. निर्वपन्ति—निर् + वप + लट् अन्ति give [वपति—ते, उवाप—ऊपे, वप्स्यति—ते, अवाप्सीत्—अवप्त]।

2. (a). उत्तिष्ठति Accrues उत्पद्यते। उद् + स्था takes आत्मनेपद when it does not mean 'to get up'. Here 'to get up' is not the meaning, yet we do not get आत्मनेपद because for the आत्मनेपद the Varttika "ईहायामिति वक्तव्यम्" requires the meaning to be 'to make an effort.' (b). वर्णेभ्यः—from the four ग्रहिन् classes as distinguished from the forester (आरण्यक)। अपादाने पञ्चमी। (c). क्षयि—क्षीयते इति क्षि + इनि ताच्छील्ये कर्त्तरि। (d). तपःषड् &c.—षट् here means षष्ठ the sixth. Hence it is not a संख्या, and the rule "दिक्-

संख्ये संज्ञायाम्" does not apply. Thus षट् भागः षड्भागः। तपसः षड्भागः। तम्। (e). अचय्यम्—चेतुं शक्यम् इति चि+यत् कर्मणि=चय्यम् by निपातन in the rule "चय्यजय्यौ शक्यार्थे"। The usual form is चेयम् in the sense चेतुमर्हम्। (f). आरण्यकाः—अरण्ये भवा इति अरण्य+वुञ् by the rule "अरण्यान्मनुष्ये"।

3. *Remark.* उत्तिष्ठति is usually used with reference to *income* as in ग्रामात् शतमुत्तिष्ठति। It is customary to speak of income as धन not as फल। Hence I prefer the reading धनम् to फलम्।

राजा (कर्णं दत्त्वा)—अये धीरप्रशान्तस्वरैस्तपस्विभिर्भवितव्यम्।

KING—Ha ! By their deep and calm voice they are bound to be ascetics.

(प्रविश्य) दौवारिकः—जेदु जेदु भट्टा। एदे दुवे इसिकुमारआ पडिहारभूमिं उवट्ठिदा [जयतु जयतु भर्त्ता। एतौ द्वौ ऋषिकुमारकौ प्रतिहारभूमिम् उपस्थितौ]।

(*Entering*) WARDER—Be victorious, Sire, be victorious. Here, two hermit-youths have approached the ground at the door.

राजा—तेन हि अविलम्बितं प्रवेशय तौ।

KING—Then let them enter without delay.

दौवारिकः—एसो पवेसेमि [एष प्रवेशयामि]। (निष्क्रम्य ऋषिकुमारकाभ्यां सह प्रविश्य) इदो इदो भअन्ता [इत इतो भवन्तौ]।

WARDER—Here, I am letting them in. (*Going out and re-entering with the hermit youths*). This way, Sirs, this way.*

राजेति। ('कर्णं दत्त्वा' श्रुत्वा, आह) 'धीरा' गम्भीराः 'प्रशान्ताः' स्थिराश्च ये 'स्वराः' कण्ठध्वनयः तैः उपलक्षितैः ["इत्थम्भूतलक्षणे" इति तृतीया] 'तपस्विभिः'

'वक्तव्यम्'। यथा धीराः प्रशान्ताश्च कण्ठस्वराः श्रूयन्ते, तथा मन्ये तापसा आगता इति भावः।

जयत्विति। ऋषी चामू कुमारकौ चेति 'ऋषिकुमारकौ' तापसयुवानौ 'प्रतिहारस्य' द्वारस्य 'भूमिं' देशम् 'उपस्थितौ' प्राप्तौ।

तेनेति। 'तेन हि' ततः 'तौ' द्वौ 'अविलम्बितं' झटिति यथा तथा 'प्रवेशय'।

इत इति। हे 'भवन्तौ इतः इतः' अस्यां दिशि उपसर्पतम् अत राजा आस्ते।

NOTES

1. धीर &c.—धीर is *deep*. Compare "प्रमथ्यमानार्णवधीरनादिनीम्"। धीरप्रशान्तस्वरैस्तपस्वी is like जटाभिस्तापसः। Such voice, like matted locks, indicates the तपस्वी। Hence इत्थम्भूतलक्षणे तृतीया।

2. प्रतिहार &c.—प्रतिह्रियन्ते राजसकाशं नीयन्ते जना अस्मात् इति प्रति + हृ + घञ् अपादाने = प्रतिहारः or प्रतीहारः the gate. Or प्रतिह्रियन्ते अनेन इति प्रति + हृ + घञ् करणे = प्रतिहारः or प्रतीहारः the gate-keeper. तस्य भूमिः।

3. अविलम्बितम्—विलम्बितं विलम्बः। भावे क्त। अविद्यमानं विलम्बितं यस्मिन् कर्मणि तत् यथा तथा। बहु—।

4. एषः—Implies instant execution.

(उभौ राजानं विलोकयतः)। प्रथमः—अहो दीप्तिमतोऽपि विश्वसनीयतास्य वपुषः। अथवा उपपन्नमेतदस्मिन् ऋषिभ्यो नातिभिन्ने राजनि। कुतः—

अध्याक्रान्ता वसतिरमुनाप्याश्रमे सर्वभोग्ये
रक्षायोगादयमपि तपः प्रत्यहं सञ्चिनोति।
अस्यापि द्यां स्पृशति वशिनश्चारणद्वन्द्वगीतः
पुण्यः शब्दो मुनिरिति मुहुः केवलं राजपूर्वः॥

(*The two look at the king*). FIRST HERMIT—Oh! The attractiveness of his person though resplendent! Or, this is befitting in this one that does not differ much from the sages. (Do you ask) how? By him too residence is taken up in an

Asrama which is open to all for enjoyment. He too gleans penance every day through his engagement in protection. Perfect control of self and surroundings as he has, his too the holy appellation *Muni*—only preceded by the word *Rajan*—sung by a couple of bards, constantly reaches the heavens.

अहो इति। 'अहो' आश्चर्य्ये अव्ययम्। 'दीप्तिमतोऽपि' तेजसा भासुरस्यापि 'अस्य वपुषः' देहस्य 'विस्रम्भणीयता' विश्वासयोग्यता। अस्य भासुरमपि वपुः विश्वासमुत्पादयति इत्यर्थः। 'अथवा' नैतदाश्चर्य्यम्। 'उपपन्न' युक्तमेव 'एतदस्मिन् ऋषिभ्यः' कण्वादिभ्यः [अन्यार्थभिन्नशब्दयोगात् पञ्चमी] 'नातिभिन्न' अनतिभिन्नं ऋषिकल्पं [नञर्थेन न-शब्देन "सुप् सुपा" इति समासः] 'राजनि' दुष्यन्ते। ["एतदस्मिन्" (त-, न्या-, म-)—"एतत्" (रा-, वि-)॥ "ऋषिभ्यो नातिभिन्न" (रा-, वि-) —"ऋषिकल्पे" (त-, न्या-, म-)॥

अधीति। अन्वयः—अमुनापि सर्वभोग्ये आश्रमे वसतिः अध्याक्रान्ता। रक्षायोगात् अयमपि प्रत्यहं तपः सञ्चिनोति। वशिनः अस्यापि केवलं राजपूर्वः पुण्यः मुनिरिति शब्दः चारणद्वन्द्वगीतः मुहुः द्यां स्पृशति। व्याख्या—'अमुना' राज्ञा 'अपि' ऋषिणा इव 'सर्वः भोग्ये' व्यवहर्त्तव्ये 'आश्रमे' गृहस्थाश्रमे, ऋषिपक्षे तपोवने, 'वसतिः' वेश्म गृहम् ["वसती रात्रिवेश्मनोः" इत्यमरः] 'अध्याक्रान्ता' अधिकृता। 'रक्षायां' प्रजापालने 'योगात्' व्यापारात् 'अयमपि' ऋषिरिव 'प्रत्यहं तपः' सुकृतं 'सञ्चिनोति.' अर्जयति। 'वशिनः' लोकेशस्य आत्म शस्य च 'अस्यापि' ऋषेरिव 'केवलं राजन्' इति शब्दः 'पूर्वो' यस्मात् तादृशः 'पुण्यः' पवित्रः 'मुनिरिति शब्द' आख्या 'चारणयोः' वैतालिकयोः, देवगायनयोर्वा 'द्वन्द्व न' युग्मेन 'गीतः' सन् 'मुहुः' वारं वारं 'द्यां' स्वर्गं 'स्पृशति' अधिरोहति। ऋषिरिवायमाश्रमवासी तपश्चरणशीलः। भेदस्तु अयं राजपूर्वको ऋषिः राजर्षिः इत्येतावदेव। अतोऽहं ब्रवीमि "ऋषिभ्यो नातिभिन्न राजनि" इति।

NOTES

1. (a). उपपन्नम् &c.—Sages a·e of august appearance ; yet they can be approa:hed with confidence. This king does not

differ much from a sage. Hence, like that of sages, his appearance too is confidence-creating though august. The next sloka explains how he does not differ much from a ऋषि।

2. (a). अध्याक्रान्ता &c.—This is the first point of resemblance with a sage, viz, the king has an आश्रम which is the resort of all. (b). रक्षायोगात् &c.—Sages practice तपस्। So does this king by his self-sacrifice in offering protection to his subjects. (c). He too is वशिन् like a sage. The sage is वशिन् because he is जितेन्द्रिय। This king is doubly वशिन् because he is जितेन्द्रिय and also holds kingdoms under subjugation. "वश: परवशे विषु" इति कोष:। He is therefore entitled to be called a मुनि like the sages. For, "दु:खेष्वनुद्विग्नमना: सुखेषु विगतस्पृह:। वीतरागभयक्रोध: स्थिरधीर्मुनिरुच्यते॥" (d). With these three points of agreement and only one difference (केवलं राजपूर्व:) he is truly ऋषिभ्यो नातिभिन्न:। (e). द्वन्द्व—द्वि is duplicated and by निपातन becomes द्वन्द्व। "पूर्वपदस्य च अम्भावो निपात्यते। उत्तरपदस्य च अत्वम्"—*Bhashya.* Neuter by usage. क्लीवत्वं लोकात्। "अत्यन्तसहचरिते लोकविज्ञाते द्वन्द्वमित्युपसंख्यानम्"। Bards *always* (अत्यन्त) appear two *together* (सहचरित) before kings. Hence they are अत्यन्तसहचरित। Also they are लोकविज्ञात।

द्वितीय:—गौतम अयं स बलभित्सखो दुष्यन्त: ?

SECOND H.—Gautama, is this Dushyanta, the friend of Balabhit *(Indra)* ?

प्रथम: —अथ किम् ?

FIRST H.—Who else ?

द्वितीय:—तेन हि,

नैतच्चित्रं यदयमुदधिश्यामसीमां धरित्रीम्
एक: कृत्स्नां नगरपरिघप्रांशुबाहुर्भुनक्ति।
आशंसन्ते समितिषु सुरा बद्धवैरा हि दैत्यैर्-
अस्याधिज्ये धनुषि विजयं पौरुहूते च वज्रे॥

SECOND H.—Well, then, it is no wonder that this person, with arms long like the bar of the city-gate, alone guards the entire earth that has the ocean for its blue boundary, and that the Gods, having rooted enmity with the demons expect victory in battles from his strung bow as much as from the thunder-bolt of Puruhuta *(Indra)* [*Or*—from his strung bow notwithstanding that there is the thunder-bolt of Puruhuta].

गौतमेति। हे 'गौतम' किम् अयं 'सः' प्रसिद्धः 'बलभिदः' इन्द्रस्य 'सखा' ["राजाहःसखिभ्यष्टच्" इति टच्] 'दुष्यन्त' इति काकुः।

अथेति। 'अथ किम्' इति स्वीकारोक्तिः। स एव इत्यर्थः।

तेनेति। अन्वयः—तेन हि नगरपरिघप्रांशुबाहुः अयमेकः उदधिश्यामसीमां कृत्स्नां धरित्रीं भुनक्ति, दैत्यैः बद्धवैराः हि सुराः समितिषु अस्य अधिज्ये धनुषि पौरुहूते वज्रे च विजयमाशंसन्ते, (इति) यत् एतत् न चित्रम्। यद्वा—सुराः समितिषु पौरुहूते वज्रे (सति) अस्य अधिज्ये धनुषि विजयमाशंसन्ते च, (इति) यत् एतत् न चित्रम्। व्याख्या—'तेन हि' यदि साक्षादिव पिनाकी अयमेव दुष्यन्तः तदा 'नगरपरिघः' पुरार्गला इव 'प्रांशू' दृढ़दीर्घौ 'बाहू' भुजौ यस्य सः [अयं विशेषणद्वारेण हेतुपन्यासः] 'अयम् एकः' एकलः 'उदधिः' सागर एव 'श्यामा' नीला 'सीमा' यस्याः ताम् ["डाबुभाभ्यामन्यतरस्याम्" इति डाप्। उपसर्जनह्रस्वः। ततष्टाप्] 'कृत्स्नां' समग्रां 'धरित्रीं' भुवं 'भुनक्ति' पालयति, 'दैत्यैः' असुरैः सह 'बद्धं' दृढं 'वैरं' विरोधः येषां तथाविधा 'हि सुराः' देवाः। यतो बद्धवैरास्तत इत्यर्थः [हि हेतौ] 'समितिषु' युद्धेषु, दानवयुद्धेषु 'अस्य' दुष्यन्तस्य 'अधिज्ये' दत्तगुणे 'धनुषि' पुरुहूतस्य इन्द्रस्य इदं 'पौरुहूतम्' ऐन्द्रम्। तस्मिन् 'वज्रे च विजयम्' अरिपराभवम् 'आशंसन्ते' सम्भावयन्ति, विजयाशंसां स्थापयन्ति इत्यर्थः, इति 'यत् एतत् न चित्रं' न आश्चर्यम्। यद्वा—'सुराः समितिषु पौरुहूते वज्रे' सति, वज्रमनादृत्य ["षष्ठी चानादरे" इति अनादरे आवलक्षणे सप्तमी] 'अस्य अधिज्ये धनुषि विजयमाशंसन्ते च' [अयं भुनक्ति सुरा आशंसन्ते च इति समुच्चये चकारः] इत्यादि प्राग्वत्॥ सति एवंविधे देहोत्कर्षे

सर्वमेतत् सम्भवति इति भाव: ॥ ["समितिषु सुरा:" (त-, वि-, न्या-, म-)— "सुरयुवतय:" (रा-) ॥ "बद्धवैरा:" (रा , वि-)—"सक्तवैरा:" (त-, न्या-, म-)]॥

NOTES

1. बलभित् &c.—बलं तदाख्यमसुरं भिनत्ति दारयति वज्रेण तं निहन्ति इति बल + भिद् + क्विप् कर्त्तरि = बलभित् the slayer of बल। A proper name of Indra.

2. अथ किम्—This is a compound अव्यय indicating *assent* अभ्युपगम।

3. (a). उदधि &c.—By the rule "उदकस्योद: संज्ञायाम्," उदक becomes उद when leading in a compound which is a संज्ञा। Hence उदकानि धीयन्ते अस्मिन् इति उदक + धा + कि अधिकरणे संज्ञायाम् = उदधि: the sea. सीमन् + डाप् स्त्रियाम् = सीमा boundary. श्यामा सीमा श्यामसीमा blue boundary. कर्मधा—। उदधि: श्यामसीमा यस्या: ताम्। (b). धरित्रीम्—धरति इति धृ + इत्र + ङीष् स्त्रियाम् (गौरादि)the earth. (c). नगर &c.—परिहन्यते अनेन इति परि + हन + अप् करणे = परिघ: the bar of city-gates. "परिघोऽस्त्री योगभेदे परिघातेऽर्गलेऽपि च" इति हैम:। हन becomes घ by the rule "परौ घ:"। नगरस्य परिघ:। स इव प्रांशु long and stout like the bar of the city-gate. उपमानकर्मधा—। तादृशौ बाहू यस्य। This gives the *reason*, why it is not strange that this person lords it over the whole earth, and is invited to succour the gods. With such powerful arms, all this is expected of him. (d). भुनक्ति—guards. "भुजोऽनवने"—भुज will have आत्मनेपद except when meaning 'to guard' 'to protect' (अवन)। Here the meaning is 'to guard' hence भुनक्ति not भुङ्क्ते। Compare "बुभुजे पृथिवीपाल: पृथिवीमेव केवलाम्" in the sense 'to enjoy'. (e). आशंसन्ते—They expect. In this sense शंस is always preceded by आ and is आत्मनेपदी। "आशंसता बाणगतिं वृषाङ्के" has शतृ with a different root, आ + शंस, which means 'to say' and is परस्मैपदी। (f). समितिषु—सम्भूय यन्ति आसु इति सम् + इ + क्तिन् अधिकरणे = समितय: battles.

4. *Remark*—I have construed the sloka differently from the commentators. According to the usual construction, the

second half gives the reason for the first half—It is no wonder that this person &c. *because* the Gods expect &c. But then what purpose is served by तेन हि ? In fact तेन हि makes **what has gone before** *the reason* **for what follows**. Thus—If *this* (अयम्) be the man, *then indeed* (तेन हि) it is no wonder &c. Evidently the super-human physical development of the king has deeply impressed the speaker, and, in wonder, he exclaims—O! What arms! Everything is possible in the happy possessor of *these*. I have offered two constructions in place of the usual one (See Tika). The second seems better. It makes the king's bow superior to even Indra's thunderbolt. With धनुषि विजयमाशंसन्त, compare "निदध विजयाशंसां चापे सीतायां लक्ष्मणे"—*Raghu*.

5. *Readings*. (a). समितिषु सुराः seems better than सुरयुवतयः, because it is more natural to speak of the *males* of one country (सुराः) as in enmity with the *males* (दैत्यैः) of another country. सुरा दैत्यैर्बद्धवैराः is perfectly natural ; सुरयुवतयो दैत्यस्त्रीभिर्बद्धवैराः may be tolerated somehow, but सुरयुवतयो दैत्यैर्बद्धवैराः is as absurd as सुरा दैत्यस्त्रीभिर्बद्धवैराः । वैराचरण is not a feminine characteristic at all. (b). मरुद्वैराः gives the same *meaning*, but seems to sin against the *style*. आशंसन्त समितिषु सुराः सक्तवैराः makes the alliteration with the sibilants a little overdone, and spoils the वैदर्भीरीति which prevails in the sloka.

उभौ (उपगम्य)—विजयस्व राजन् ।

BOTH H. *(Having approached)*—Be thou victorious, O king.

राजा (आसनात् उत्थाय)—अभिवादये भवन्तौ ।

KING (*Rising from his seat*)—I salute both of you.

उभौ—स्वस्ति भवते । (फलानि उपहरतः) ।

BOTH H.—Blessings to thee. *(They offer fruits)*.

राजा (सप्रणामं परिगृह्य)—आज्ञामिच्छामि ।

KING (*Receiving with a bow*)—I solicit commands.

उभाविति । 'उप' समीपे गत्वा 'उपगम्य' । विजयस्वेति । "विपराभ्यां जेः" इत्यात्मनेपदम् । अभीति । 'भवन्तौ अभिवादये' नमामि ।

स्वस्तीति । 'भवते स्वस्ति' मङ्गलं भवतु ["नमः स्वस्ति—" इति चतुर्थी] ।

फलेति । रिक्तहस्तेन राजदर्शनं निषिद्धम् इति 'फलानि' गृहीत्वा आगतौ तौ। तानि राज्ञे 'उपहरतः' प्रयच्छतः ।

राजेति । ('प्रणामेन' प्रणत्या सह 'परिगृह्य' फलानि स्वीकृत्य आह) ।

आज्ञामिति । 'आज्ञां निदेशं' श्रोतुम् 'इच्छामि' किं कृत्वा भवन्तौ तोषयामि ब्रूतम् ["आज्ञामिच्छामि" (वि॰, म॰)—"आज्ञापयितुमिच्छामि" (रा॰)] ॥

NOTES

1. विजयस्व—No enemy is referred to. It is better taken as अकर्मक in the sense 'Do thou prosper.'

2. अभिवादये—The merit accruing from saluation goes to the agent. Hence "णिचश्च" इति कर्त्रभिप्राये क्रियाफले आत्मनेपदम् ।

3. फलानि उपहरतः—Kings have to be approached with some sort of present. "रिक्तहस्तेन नोपेयाद्राजानं दैवतं गुरुम्" । Compare—"हैयङ्गवीनमादाय घोषवृद्धानुपस्थितान्"—*Raghu.*, "सोपायनोपस्थितलोकपालम्"—*Bhatti* &c.

4. आज्ञापयितुमिच्छामि for आज्ञामिच्छामि is unnecessarily roundabout. The king is impatient to serve. This is *natural* with him and has nothing to do with his love affair.

उभौ—विदितो भवान् आश्रमसदामिहस्थः, तेन भवन्तं प्रार्थयन्ते—

BOTH——You are known to the dwellers of the hermitage as being here, so they request you—

राजा—किमाज्ञापयन्ति ?

KING—What do they command ?

उभौ—तत्रभवतः कण्वस्य महर्षेरसान्निध्यात् रक्षांसि न इष्टिविघ्नमुत्पादयन्ति। तत् कतिपयरात्रं सारथिद्वितीयेन भवता सनाथीक्रियतामाश्रम इति।

BOTH—That owing to the absence of his holiness the sage Kanva, Rakshasas are causing the obstruction of our sacrifies. So, for a few nights, let the hermitage be graced by you accompanied by your charioteer.

राजा—अनुगृहीतोऽस्मि।

KING—I am favoured.

विदूषकः (अपवार्य)—एसा दाणिं अणुऊला दे अब्भत्थणा [एषा इदानीमनुकूला ते अभ्यर्थना]।

VIDUSHAKA (*Aside*)—Now, this request is favourable to you.

विदित इति। इह तिष्ठतीति 'इहस्थः' अत्र स्थितः 'भवान्' आश्रमे सीदन्ति इति 'आश्रमसदः' तपोवनवासिनः ["सत्सूद्विष—" इति क्विप्] तेषां 'विदितः' ज्ञातः [वर्त्तमाने क्तः। "क्तस्य च वर्त्तमाने" इति अनुक्ते कर्त्तरि षष्ठी]। भवान् अत्र स्थितः इति मुनयो जानन्ति 'तेन' हेतुना 'त्वां भवन्तं प्रार्थयन्ते'।

तत्रेति। 'तत्रभवतो मान्यस्य 'महर्षेः कण्वस्य' सन्निधिरेव 'सान्निध्यम्' समीपस्थितिः। 'असान्निध्यात्' दूरावस्थानात् [हेतौ पञ्चमी] 'रक्षांसि नः इष्टेः' यागस्य 'विघ्नम् उत्पादयन्ति' जनयन्ति। 'तत्' तस्मात् 'कतिपयाः' का अपि अनिर्द्दिष्टसंख्याः [कतिपयशब्दः अनिर्द्दिष्टसंख्यार्थे अव्युत्पन्नं प्रातिपदिकम्] 'रात्रीः'[अच् समासान्तः। अत्यन्तसंयोगे द्वितीया] 'सारथिद्वितीयेन' सारथिसहायेन 'भवता आश्रमः' कण्वस्य अनुपस्थितौ अधुना 'असनाथः' अनायकः, भवदुपस्थित्या 'सनाथः' क्रियताम् 'इति प्रार्थयन्ते'।

विदूषेति। 'अपवार्य' अन्यैः अश्रुतम् उच्चार्य आह।

एषेति। 'एषा अभ्यर्थना' तपोवनवासिनां प्रार्थना 'इदानीम्' अस्मिन् अवसरे 'ते

अनुकूला' सपत्ना, आश्रमप्रवेशदायिनी । ["एषा इदानीं ते अनुकूला अभ्यर्थना" (रा-, वि-, म-)—"एष इदानीं भवतोऽनुकूलो गन्धहस्तः" (त-, न्या-)] ॥

NOTES

1. प्रार्थयन्ते—the nominative is आश्रमसदः which is got from आश्रमसदाम् by विभक्तिविपरिणाम । It is याच्ञार्थ, hence द्विकर्मक, one कर्म being भवन्तम् and the other इति further down. This इति refers to the whole of तत्र भवतः···क्रियतामाश्रमः ।

2. किमाज्ञापयन्ति—This is an interruption. The word प्रार्थ--यन्ते (they solicit) the king considers too high to come to *him* from the *Munis*, and he hastily puts in (what he considers) the correct word आज्ञापयन्ति (they *command*).

3. (a). असान्निध्यात्—सम् + नि + धा + कि भावे = सन्निधिः presence. सन्निधिरेव इति सन्निधि + ष्यञ् स्वार्थे = सान्निध्यम् । न सान्निध्यम्, नञ्तत्— । तस्मात् । (b). रक्षांसि—Rakshasas. This also takes a स्वार्थिकप्रत्यय, viz., अण् giving राक्षस in the masculine. सान्निध्य and राक्षस are instances of a स्वार्थिकप्रत्यय changing the gender of the stem—in the first, from masculine (सन्निधिः) to neuter, and in the second from neuter (रक्षांसि) to masculine. क्वचित् स्वार्थिकाः प्रकृतितो लिङ्गवचनान्यतिवर्तन्ते । (c). यज + क्तिन् करणे भावे वा = इष्टिः sacrifice. विहन्यते अनेन इति वि + हन + क करणे घञर्थे = विघ्नः obstruction. (d). कति &c.—The वाचस्पत्य derives कतिपय from कति with अयच् and the augment पुक् । But the rule "प्रथमचरमतयाल्पार्द्धकतिपयनेमाश्च" seems to be against this. There तय stands for अयच्, i. e., अयच्प्रत्ययान्त, words. So तय includes कतिपय if कतिपय is अयच्प्रत्ययान्त, and then कतिपय needs no separate mention in the *sutra*. The separate mention of कतिपय shows therefore that कतिपय is not अयच्प्रत्ययान्त at all. Besides there is no rule to attach अयच् to कति or to have पुक् either. The word is better taken as a primitive (अव्युत्पन्नप्रातिपदिक) । Again, from the presence of बहु and गण in the rule "बहुगणवतुडति संख्या" commentators argue that other words that *remotely* refer to संख्या such as भूरि, कतिपय, &c. are not to be taken as संख्या ।

"अनियतसंख्यावाचिनां चेत् संख्याकार्य्यं स्यात् तर्हि बहुगणयोरेव"—*Jnanendra Bhikshu.* "भूय्यादीनां निवृत्त्यर्थं संख्यासंज्ञा विधीयते"—*Vrittikara.* "कतिपयशब्दो न संख्या"—*Ibid.* Hence कतिपया रात्रयः समाहृताः इति कतिपयरात्रि + अच् समासान्त = कतिपयरात्रः in the *masculine* by the rule "रात्राह्नाहाः पुंसि"। "संख्यापूर्वं रात्रं क्लीवम्" does not apply because कतिपय is not a संख्या as already remarked. For the same reason the समासान्त affix अच् has to be attached by योगविभाग from the rule "अच् प्रत्यन्ववपूर्वात् सामलोम्नः" and not by "अहः सर्वैकदेशसंख्यातपुण्याच्च रात्रेः"। "अन्यत्रापि च दृश्यते...दीर्घरात्रः समरात्रः अरात्रः। तदेतत् सर्वं योगविभागं कृत्वा साधयन्ति"—*Vrittikara.* (e). सारथि &c.—सारथिना द्वितीयः or सारथिर्द्वितीयो यस्य तेन।

4. अनुकूला—अनुगता कूलम् towards the shore, i. e., favourable. The metaphor is derived from *navigation.* The wind is favourable (अनुकूल) when towards the shore and unfavourable (प्रतिकूल) if away from it. The moment before, you were after an excuse to enter the hermitage. Now, here you are! They request you to come!

5. *Reading.* "अनुकूलो गलहस्तः" is proverbial (लौकिकोक्तिः)। When one is dragged or turned out by the neck, provided such dragging or turning out is to one's advantage (e. g., when a thief is turned out instead of being made over to the police), the turning out becomes to him अनुकूलो गलहस्तः। Here a task is set to the king: he is dragged to do some work. It is welcome to him and is no *task*, but, by transference of epithets, an अनुकूलो गलहस्तः। The pleasantry suits very well the character of the jester. It is not easy to decide which reading to prefer.

राजा (स्मितं कृत्वा)—रैवतक मद्वचनादुच्यतां सारथिः सबाणासनं रथमुपस्थापयेति।

King (*Smiling*)—Raivataka, let the charioteer be ordered this, using my words, "Bring me the car with the bow."

दौवारिकः—जं देवो आणवेदि [यत् देवः आज्ञापयति] ।
(निष्क्रान्तः) ।

WARDER—As Sire commands. (*Exit*).

उभौ (सहर्षम्)—

अनुकारिणि पूर्वेषां युक्तरूपमिदं त्वयि ।
आपन्नाभयसत्रेषु दीक्षिताः खलु पौरवाः ॥

BOTH (*With joy*)—This is extremely proper in you, the imitator of your ancestors. The descendants of Puru are indeed ordained to the sacrifice "Absence-of-danger-of-the-distressed."

राजा (सप्रणामम्)—गच्छतां पुरो भवन्तौ । अहमपि अनुपदम् आगत एव ।

KING (*With a bow*)—Go first yourselves. I am coming too following you closely.

रैवतेति । 'रैवतक' इति दौवारिकनाम । 'बाणासनेन' धनुषा सह रथम् 'उपस्थापय' समीपमानय 'इति' एतत् 'मद्वचनात्' मद्वचनं मदुक्तिम् अवलम्ब्य [ल्यब्-लोपे कर्मणि पञ्चमी] 'सारथिः उच्यताम्' ।

अन्विति । अन्वयः—पूर्वेषाम् अनुकारिणि त्वयि इदं युक्तरूपम् । पौरवाः आपन्नाभयसत्रेषु दीक्षिताः खलु । व्याख्या—'पूर्वेषां' प्राचीनानां पौरवाणाम् 'अनुकारिणि' अनुवर्त्तिनि, तच्चरितचारिणि इत्यर्थः 'त्वयि इदम्' तापसवचनकरणं 'युक्तरूपम्' अतिशयेन युक्तम् [प्रशंसायां रूपप्प्रत्ययः] । कुत इत्याह—'पौरवाः' तव पूर्वे राजानः 'आपन्नानां' विपन्नानां भीतानामिति यावत् यत् 'अभयं' भयाभावः तदेव 'सत्राणि' यागाः तेषु 'दीक्षिताः खलु' धृतव्रता एव । आरण्यकानाम् ऋषीणामिव पौरवाणां राजर्षीणामपि अवश्यकर्त्तव्यं सत्रमस्ति, "आपन्नाभयम्" इति तस्य सत्रस्य नाम । तेन हि भीतानां भयमपगच्छति । तत् पौरवस्त्वं यत् अस्माकं भयनिरासार्थं यतसे, सुसदृशं त एतत् ।

गच्छतामिति। 'भवन्तौ पुरो गच्छतां' पूर्वम् आश्रमं प्रतिनिवर्त्तताम्। 'अहमपि अनुपदम्' अन्वक् भवताम् अनुगामी भूत्वा ["अन्वगन्वक्षमनुगेऽनुपदं क्लीवमव्ययम्" इत्यमरः] 'आगत: एव' आश्रमं प्राप्त एव। अविलम्बितं गच्छामि इत्यर्थ:।

NOTES

1. (a). साधु अनुकरोति इति अनु + कृ + णिनि साधुकारिणि कर्त्तरि = अनुकारी one who follows well. तस्मिन्। (b). इदम्—*This*, i. e., readiness in obliging ascetics. (c). आपन्न &c.—आ + पद + क्त कर्त्तरि = आपन्ना: the distressed. भयस्य अभाव: अभयम् absence of danger. अव्ययी—। तस्य सत्राणि sacrifices for the absence of danger. Also see Tika. तेषु।

2. (a). पूर्वस्मिन् काले इति पूर्व + ङि (७मी) + असि स्वार्थे = पुरस् First. पूर्व is changed into पुर् by the rule "पूर्वाधरावराणाम् असि पुर् अध् अवश्चैषाम्"। (b). अनुपदम्—पदस्य पश्चात् after your foot-steps. अव्ययी—। Amara makes this mean a *follower*. But Kalidasa often uses it in the general sense पश्चात् subsequent. Thus "अमोघा: प्रतिगृह्णन्तावर्घ्यानुपदमाशिष:"—*Raghu*. For this purpose, derive अनुगतं पदम् अनुपदम्। प्रादितत्—। This gives us a विशेष्यलिङ्ग word and not an अव्यय like the former.

उभौ—विजयस्व। (निष्क्रान्तौ)।

BOTH—Be thou victorious. (*Exeunt*).

राजा—माधव्य, अप्यस्ति शकुन्तलादर्शने कुतूहलम्।

KING—Mathavya, is there any curiosity to see Sakuntala?

विदूषक:—पढमं सपरिवाहं आसि। दाणिं रक्खसवुत्तन्तेन विन्दू वि ण अवसेसिदो [प्रथमं सपरिवाहम् आसीत्। इदानीं राक्षसवृत्तान्तेन विन्दु: अपि न अवशेषित:]।

VIDUSHAKA—At first it was to over-flowing. Not even a drop is now left at the news of the Rakshasas.

राजा—मा भैषी:। ननु मत्समीपे वर्त्तिष्यसे।

KING—Fear not, you will indeed be near me.

विदूषकः—एस रक्खसादो रक्खिदोम्हि [एष राक्षसा-द्रक्षितोऽस्मि]।

VIDUSHAKA—Here, I am saved from the Rakshasas.

प्रथममिति। 'प्रथमम्' इतः पूर्वं मे कुतूहलं 'परिवाहेण' परितो निर्गमनेन 'सह' वर्त्तमानम् 'आसीत्'। मदीये शरीरे कुतूहलं न माति स्म, किन्तु परितः प्रसृत-मेवासीत्। 'इदानीम्' अधुना 'राक्षसानां वृत्तान्तेन' कथया 'विन्दुरपि' कुतूहलस्य अणुः अपि 'न अवशेषितः' न स्थितः।

मेति। 'मा भैषीः' भयं मा गमः ["माङि लुङ्" इति भविष्यति लुङ्]। 'ननु' इत्यसहने आक्षेपे इत्यर्थः। 'मत्समीपे' मम पार्श्वे 'वर्त्तिष्यसे' स्थास्यसि तत् कुतस्ते भयम्।

एष इति। 'एष' इति अविलम्बितसूचनम्। 'राक्षसात्' [जातावेकवचनम्। भय-हेतोरपादाने पञ्चमी] 'रक्षितोऽस्मि'। यदि त्वत्समीपे, तत् रक्षित एवाहं, का भीतिः।

NOTES

1. (a). अपि—This implies प्रश्न question. "गर्हासमुच्चयप्रश्नशङ्का-सम्भावनास्वपि" इत्यमरः। (b). कुतूहलम्—Curiosity. "रम्यवस्तुसमालोके लोलता स्यात् कुतूहलम्"—*Darpana*. It gives कौतूहलम् with अण् स्वार्थे।

2. (a). परितो वहनम् इति परि+वह+घञ् भावे=परिवाहः or परीवाहः overflow. तेन सह यथा तथा। (b). राक्षस &c.—अनुक्ते कर्त्तरि तृतीया। Thus राक्षसवृत्तान्तः विन्दुम् अवशेषितवान्=राक्षसवृत्तान्तेन विन्दुः अवशेषितः। (c). अवशेषितः—अव+शिष चुरादि+क्त कर्मणि is left. (d). The metaphor is from the case of liquid overflowing from a reservoir. Overflow is always of what is in *excess*, and hence it stops soon, leaving the vessel full. But no, the news of Rakshasas being about has let the *whole* out, not a drop is left.

3. वर्त्तिष्यसे—वृत+लृट् से। Optionally वर्त्स्यसि in the परस्मैपद। "वृद्भ्यः स्यसनोः" इति परस्मैपदविकल्पः स्ये सनि च परतः। In the परस्मैपद we have no इट् by the prohibition "न वृद्भ्यश्चतुर्भ्यः"।

(प्रविश्य) दौवारिकः—सज्जो रधो भट्टिणो विजअप्पत्थाणं

अवेक्खदि । एस उण णअरादो देवीणं आणत्तिहरओ करभओ आअदो [सज्जो रथो भर्त्तुर्विजयप्रस्थानमपेक्षते । एष पुनर्नगराद्देवीनाम् आज्ञप्तिहरः करभक आगतः] ।

WARDER (*Entering*)—The car, ready, is biding Sire's start for victory, but here is Karabhaka come from town bearing the queen's orders.

राजा (सादरम्)—किमम्बाभिः प्रेषितः ।

KING (*Eagerly*)—Sent by mother ?

दौवारिकः—अह इं [अथ किम्] ।

WARDER—Just so.

राजा—ननु प्रवेश्यताम् ।

KING—Well, let him in.

दौवारिकः—तह [तथा] । (निष्क्रम्य करभकेण सह प्रविश्य) एसो भट्टा उवसप्प [एष भर्त्ता उपसर्प] ।

WARDER—As Sire commands. (*Going out and re-entering with Karabhaka*) Here is Sire. Approach.

सज्ज इति । 'रथः सज्जः' गमनाय सज्जितः सन् 'भर्त्तुः' स्वामिनस्ते 'विजयाय' राक्षसजयाय 'प्रस्थानम् अपेक्षते' । 'एष पुनः' अयं तु 'देवीनां' राजमातुः [गौरवे बहुवचनम्] 'आज्ञप्तिम्' आदेशं 'हरति' वहति इति 'आज्ञप्तिहरः' ["हरतेरनुद्यमनेऽच" इति अच्प्रत्ययः] 'करभकः' तन्नामा भृत्यः 'नगरात् आगतः' अत्र प्राप्तः ।

राजेति । ('आदरेण' औत्सुक्येन 'सह' आह) 'अम्बाभिः' मात्रा [गौरवे बहुवचनम्] ।

नन्विति । 'ननु' सम्भ्रमे । 'प्रवेश्यताम्' कथं विलम्बः क्रियते ।

एष इति । 'उपसर्प' समीपं गच्छ ।

NOTES

1. *(a)*. सज्जः—सज्जति सज्जते वा इति सज्ज+अच् कर्त्तरि=सज्जः ready. (b). पुनः—Indicates भेद, i. e., a hitch. The car is

ready for the hermitage, but (पुन:) you cannot start without attending to what the queen-mother commands. (c). आज्ञप्ति &c.—आ+ज्ञप+क्तिन् भावे=आज्ञप्ति: command आज्ञा। तां हरति इति आज्ञप्ति+हृ+अच् कर्त्तरि=आज्ञप्तिहर: messenger.

2. ननु प्रवेश्यताम्—ननु implies सम्भ्रम। The speech is a censure to the gate-keeper. He should have ushered him in at once without waiting for orders. "ननु प्रश्ने परकृतावधिकारे च सम्भ्रमे" इति मेदिनी। प्रवेश्यताम् with the णिच् emphasises the censure. ननु प्रविशतु would give स्वातन्त्र्य to करभक and thus censure him—Why *does he not* come in ? ननु प्रवेश्यताम्—Why are *you* (कर्त्ता) not letting him in ?

करभक:—जेदु जेदु भट्टा। देवी आणवेदि, आआमिणि चउत्थदिअहे पुत्तपिण्डपालणो णाम उववासो भविस्सदि। तहिं दीहाउणा अवस्सं अम्हे सम्भावइदव्वत्ति [जयतु जयतु भर्त्ता। देवी आज्ञापयति आगामिनि चतुर्थदिवसे पुत्रपिण्ड-परिपालनो नाम उपवासो भविष्यति। तत्र दीर्घायुषा अवश्यं वयं सम्भावयितव्या इति]।

KARABHAKA—Be victorious, Sire, be victorious. The queen-mother says—On the coming fourth day, the fast named "Putra-pinda-palana' comes off. At that I have to be honoured by thee, the long-lived one, without fail.

राजा—इतस्तपस्विकार्य्यम् इतो गुरुजनाज्ञा। इयमप्य-नतिक्रमणीयम्। किमत्र प्रतिविधेयम्।

KING—On the one hand is the work of the ascetics, the command of revered mother on the other. Both are unavoidable. What has to be done now ?

विदूषक:—तिसङ्कु विअ अन्तरा चिट्ठ [त्रिशङ्कुरिव अन्तरा तिष्ठ]।

VIDUSHAKA—Stay mid-way like Trisanku.

जयत्विति। 'आगामिनि चतुर्थे दिवसे पुत्रपिण्ड' पाल्यते' अनेन इति 'पुत्रपिण्ड-पालनो नाम' ["करणाधिकरणयोश्च" इति करणे ल्युट्] 'उपवासो भविष्यति'। 'तत्र' तस्मिन् उपवासे 'दीर्घायुषा' आयुष्मता भवता 'अवश्य' वयं सम्भावयितव्याः' स्वोपस्थित्या सम्मानयितव्याः—'इति देवी' राजमाता 'आज्ञापयति' आदिशति ["पुत्र-पिण्डपालनो नाम" (त-, न्या-, म-)—"प्रयुक्तपारणो मे" (रा-, वि-)]॥

इत इति। 'इतः' एकतः 'तपस्विनां कार्य्यम्' इष्टिविघ्ननिवारणम्, 'इतः' अन्यतः 'गुरुजनस्य' मातुः 'आज्ञा'। 'इयमपि अनतिक्रमणीयम्' अनुल्लङ्घनीयम्। अपि च एकस्य करणे अन्यत् अकृतं स्यात्। 'अत्र' अस्मिन् आकुले विषये 'प्रतिविधेयं' प्रति-विधानत्वेन अनुष्ठेयं 'किम्'। किं कृत्वा इदं सङ्कट' तरेयम्।

त्रिशङ्कुरिति। यथा इतः पूर्व त्रिशङ्कु र्नाम राजा "अधो याहि" इति इन्द्रेणोक्तः "ऊर्ध्वं गच्छ" इति विश्वामित्रेण च भाषितः नाधो न च ऊर्द्धं गत्वा मध्ये स्थितः तथा त्वमपि 'अन्तरा' मध्ये एव 'तिष्ठ'। तपोवनं मा याहि, मा च नगरम् इत्यर्थः। ["अन्तरा" (त-, न्या-, म-)—"अन्तराले" (रा-, वि-)]॥

NOTES

1. (a). आज्ञापयति—आ + ज्ञा + णिच् + लट् ति commands. Note that ज्ञप् of the चुरादि class would give आज्ञपयति like आज्ञप्ति above. There again we should have आज्ञाप्ति with ज्ञा + णिच्। (b). पुत्र &c.—पुत्रस्य पिण्डम् the son's *pinda* (sacrificial cake). Now see Tika. पिण्डपालन is the opposite of पिण्डलोप। पिण्डलोप occurs when progeny fails. Thus पिण्डपालन is a vow which *secures* progeny. Dushyanta's mother fasts with a view to secure progeny to her son. This suggests that Dushyanta was child-less, a fact which will play an important part later on.

2. *Reading.* The reading प्रयुक्तपारणः or प्रवृत्तपारणः speaks of the commencement of the *break-fast*, and assumes that the commencement of the *fast* itself is known to the king. But the king could not possibly know of it, because the *break-fast* was to commence *four days later.* Besides the other reading sounds perfectly natural in the case of a childless man. More-

over पुत्र plays a prominent part in this vow as is evident from "तत्रभवतीनां पुत्रकार्य्यमनुष्ठातुमर्हति"—*Infra.* All these considerations point to पुत्रपिण्डपालन as the more likely reading,

3. त्रिशङ्कु &c.—A prince of the solar dynasty. He requested Vasishtha to perform for him a sacrifice that will carry him to heaven in his mortal body. Vasishtha refused. He then referred to Vasishtha's sons who cursed him to become a Chandala. Visvamitra then undertook the sacrifice but the gods declined to take part in it. Nothing daunted, the mighty sage, by the force of his own asceticism, caused Trisanku to go up. But Indra declined to make room in the heaven for a Chandala and hurled the king down head foremost. Urged thus by two opposing forces, the king went neither up nor down, but rested midway (अन्तरा) in the starry regions as a constellation. Vidushaka says this in jest.

राजा—सत्यमाकुलीभूतोऽस्मि—

कृत्ययोर्भिन्नदेशत्वाद्द्वैधीभवति मे मनः।
पुरः प्रतिहतं शैले स्रोतः स्रोतोवहो यथा॥

(विचिन्त्य) सखे त्वमम्बया पुत्र इति प्रतिगृहीतः। अतो भवान् इतः प्रतिनिवृत्य, तपस्विकार्य्यव्यग्रमानसं मामावेद्य तत्रभवतीनां पुत्रकार्य्यमनुष्ठातुमर्हति।

King—I am really perplexed. The places of the two duties being different, my mind is divided into two, like the current of a stream stuck against a rock in front. *(Reflecting)* Friend, you have been accepted by my mother as a son. So, having returned and reported me as engaged with the affairs of the ascetics, it behoves you to do the duties of a son for Her Highness.

सत्यमिति। 'सत्यं' तत्त्वतः 'अनाकुलः' स्थिरः 'आकुलः' अस्थिरः 'भूतोऽस्मि' जातोऽस्मि।

कृत्ययोरिति। अन्वयः—कृत्ययोः भिन्नदेशत्वात् मे मनः, पुरः शैले प्रतिहतं स्रोतोवहः स्रोतो यथा, द्वैधीभवति। व्याख्या—'कृत्य' कार्य्यम्। ["विभाषा कृवृषोः" इति क्यप्] 'कृत्ययोः' कार्य्ययोः इष्टिविघ्ननिवारणमातृसम्भावनरूपयोः 'भिन्नौ देशौ' ययोः तत्त्वात्, भिन्नस्थाने कर्त्तव्यत्वात [हेतौ पञ्चमी] 'मे मनः' चेतः 'पुरः' अग्रतः 'शैले' पर्वते 'प्रतिहतं' प्राप्ताघातं 'स्रोतः' प्रवाहं 'वहति' या सा 'स्रोतोवह्' नदी ["क्विप् च" इति क्विप्] तस्याः 'स्रोतो यथा' प्रवाह इव। द्विविभागविशिष्टं द्वैधम् [अधिकरणविचाले धमुञ्। स्वार्थे डः। ततो मत्वर्थीयोऽच्]। अद्वैधं द्वैधं सम्पद्यमानं भवति 'द्वैधीभवति' द्विधाविभक्तस्य भावं धत्ते ["शैले" (रा-, वि-)—"शैलैः" (त-, न्या-, म-)]॥

विचिन्त्येति। 'विचिन्त्य' ध्यात्वा, कर्त्तव्यमवधार्य्य इत्यर्थः आह—'पुत्र इति' पुत्ररूपेण 'प्रतिगृहीतः' स्वीकृतः। 'अतः' अस्मात् कारणात् 'भवान् इतः' अस्मात् स्थानात् 'प्रतिनिवृत्य' नगरं गत्वा 'तपस्विनां कार्य्ये व्यग्र'' व्यापृतं 'मानसं' मनः [स्वार्थे अण्] यस्य तथाविधं 'माम् आवेद्य' मां विज्ञाप्य 'तत्रभवतीनां' मातुः [गौरवे बहु-वचनम्] 'पुत्रस्य कार्य्यं' कृत्यम् 'अनुष्ठातु ' कर्त्तुम् 'अर्हति' योग्यो भवति। पुत्र-स्थानीयस्त्व' सम्प्रति प्राप्त' पुत्रकृत्य' कुरु।

NOTES

1. (a) द्वैधी &c.—द्वयोः स्थानयोः स्थितिः इति द्वि + धमुञ् = द्वैधम् which is मान्त and अव्यय। द्वैधम् एव इति द्वैधम् + ड स्वार्थे = द्वैधम् in the neuter and अकारान्त। This means "division into two". द्वैधम् अस्ति अस्य इति द्वैध + अच् मत्वर्थे = द्वैधम् having two divisions. Or द्वि + धमुञ = divided into two द्व्यधिकरणकं वस्तु। तदेव इति द्वैधम् + ड स्वार्थे = द्वैधम् &c. as before. (b). The comparison is of (i) मे and स्रोतोवहः, (ii) मनः and पुरः प्रतिहतं शैले स्रोतः। In both cases (मनस् and स्रोतस्) the *result* is द्वैधीभवनम्। This result is due to कृत्ययोर्भिन्नदेशत्वम् in both cases. When applying to स्रोतस् we take कृत्य to mean क्रिया, i. e., प्रवहण flowing, and note that this (प्रवहण) takes in different places (भिन्नदेश) by the two sides of the rock.

2. *Reading.* शैलैः refers to several rocks. But then the stream is divided into more than two parts. शैले is better.

3. तपस्वि &c.—तपस्विनां कार्य्यम्। तस्मिन् व्यग्रम्। सहसुपेति समासः। तादृशं मानसं यस्य तम्। बहु—।

विदूषकः—ण क्खु मं रक्खोभीरुअं गणेसि [न खलु मां रक्षोभीरुकं गणयसि]।

. VIDUSHAKA—Verily, you do not take me as afraid of the Rakshasas ?

राजा (सस्मितम्)—कथमेतद्भवति सम्भाव्यते।

KING (*With a smile*)—How is this to be thought of thee ?

विदूषकः—जह राआणुएण गन्तव्वं तह गच्छामि [यथा राजानुजेन गन्तव्यं तथा गच्छामि]।

VIDUSHAKA—I go in the style a younger brother of the king has to go.

राजा—ननु तपोवनोपरोधः परिहरणीय इति सर्वाननुयात्रिकांस्त्वयैव सह प्रस्थापयामि।

KING—I am in fact sending back all followers with thee, as the disturbance of the hermitage has to be avoided.

विदूषकः—तेण हि जुवराओ म्हि दाणिं संवुत्तो [तेन हि युवराजोऽस्मि इदानीं संवृत्तः]।

VIDUSHAKA—Then indeed I am now become the "Young-prince".

नेति। 'न खलु' [खलु प्रश्ने] 'मां रक्षोभ्यः भीरुः' भयशीलः 'रक्षोभीरुः'। स एव 'रक्षोभीरुकः' [स्वार्थे कः] तथाविधं 'गणयसि' सम्भावयसि।

कथमिति। 'भवति' भवद्विषये 'एतत्' रक्षोभीरुत्वेन गणनं 'कथं सम्भाव्यते' युज्यते न कथमपि। इति परिहासोक्तिः।

यथेति। 'राज्ञः अनुजः' कनीयान् भ्राता, तेन 'यथा' येन विधिना 'गन्तव्यं' अनुमुचितं 'तथा गच्छामि' [भविष्यत्सामीप्ये लट्]॥ ["गच्छामि" (रा-, वि-)— "गमिष्यामि" (म-)]॥

नन्विति। 'ननु तपोवनस्य उपरोधः' पीड़ा 'परिहरणीयः' अकरणीयः 'इति' हेतोः 'सर्वान् अनुयात्रिकान्' अनुयायिनः 'त्वया एव सह प्रस्थापयामि' प्रेरयामि। अनुचरैस्तत्त्वं राजानुज इव गच्छसि इति किं वक्तव्यम्?

तेनेति। 'तेन हि इदानीम्' अधुना अनेन सत्कारेण 'युवराजः' कुमारः 'संवृत्तोऽस्मि'।

NOTES

1. रचोभीरुकम्—See Tika. The कन् may also be had कुत्सिते। Thus कुत्सितो रचोभीरुः रचोभीरुकः।

2. राजानुजेन—अनु पश्चात् जात इति अनु + जन + ड कर्त्तरि = अनुजः a younger brother. तेन। अनुक्ते कर्त्तरि तृतीया।

3. (a). ननु—Implies अनुज्ञा assent. The jester wants to go with a retinue suitable to his position as the younger brother of a reigning prince. The king notifies assent saying that *all* attendants go with him. "प्रश्नावधारणानुज्ञानुनयामन्त्रणे ननु" इत्यमरः। (b). अनुयात्रिकान्—Followers. See Act I. अणिकर्त्तुः कर्मसंज्ञा।

4. युवराजः—युवा राजा the young prince. "राजाहःसखिभ्यष्टच्" इति टच्।

राजा (स्वगतम्)—चपलोऽयं वटुः। कदाचित् अस्मत्प्रार्थनामन्तःपुरेभ्यः कथयेत्। भवतु एनमेवं वक्ष्ये—(विदूषकं हस्ते गृहीत्वा प्रकाशम्)—वयस्य, ऋषिगौरवादाश्रमं गच्छामि। न खलु सत्यमेव तापसकन्यायां ममाभिलाषः। पश्य—

क्व वयं क्व परोक्षमन्मथो मृगशावैः सममेधितो जनः।
परिहासविजल्पितं सखे परमार्थेन न गृह्यतां वचः॥

KING (*Aside*)—This fellow is a babbler. He might some time relate my desire to the ladies of the inner apartments. Well, I will tell him this. (*Taking Vidushaka by the hand—Aloud*) Friend, I go to the hermitage out of regard for the sages. Mine indeed is not really the desire in the hermit-girl. Friend, think where we are and where the person grown with fawns to whom love is unknown. Let not the word uttered in jest be taken as the very truth.

विदूषकः—अह इं [अथ किम्]। (निष्क्रान्ताः सर्वे) ।

VIDUSHAKA—Certainly. (*Exeunt All*).

द्वितीयोऽङ्कः । —— (*Second Act*).

चपल इति । 'अयं वटुः' मानवकः 'चपलः' वाचालः । 'कदाचित्' कदापि 'अस्माकं प्रार्थनां' शकुन्तलाभिलाषम् 'अन्तःपुरेभ्यः' अन्तःपुरस्थिताभ्यो देवीभ्यः [तात्स्थ्यात् ताच्छब्द्यम् । सम्प्रदाने चतुर्थी] 'कथयेत्' शंसेत् [सम्भावनायां लिङ्] : 'भवतु एवम्' ईदृशम् 'एनं' विदूषकं 'वक्ष्ये' कथयिष्यामि । एवमुक्त्वा एनं वञ्चयामि । 'वयस्य ऋषीणां यत् गौरवं' महिमा तस्मात् हेतोः अहम् 'आश्रमं गच्छामि' । 'न खलु सत्यमेव मम तापसकन्यायाम् अभिलाषो' वर्त्तते ।

क्वेति । अन्वयः—सखे वयं क्व, मृगशावैः समम् एधितः परोक्षमन्मथो जनः क्व पश्य । परिहासविजल्पितं वचः परमार्थेन न गृह्यताम् । व्याख्या—'सखे' वयस्य माधव्य 'वयं' राजचक्रवर्त्तिनः 'क्व' कुत्र वर्त्तामहे, 'मृगशावैः' हरिणशिशुभिः 'समं' सह 'एधितः' प्रवृद्धः 'परोक्षः' अतीन्द्रियः 'मन्मथः' कामो यस्य तथाविधः अविदितमदनवेदनो 'जनः' शकुन्तलारूपा व्यक्तिः 'क्व' कुत्र वर्त्तते 'पश्य' निपुणं विभावय [दर्शनमत्र ज्ञानमात्रम्]। आवयोर्महदन्तरं कुतः प्रणयः, इति द्वौ क्वशब्दौ सूचयतः। यद्येवं किमिदं जल्पितं भवता इत्याह—'परिहासेन' कौतुकेन 'विजल्पितं' विविधं जल्पितं 'वचः परमार्थेन' सत्येन सत्यरूपेण 'न गृह्यतां' न निर्णीयताम्। ["सममेधितः" (रा-, वि-, म-)—"सह वर्द्धितः" (त-, न्या-) । "विजल्पितं" (रा-, वि-, म-)—"विकल्पितं" (त-, न्या-)] ।

NOTES

1. वटुः—Literally is a Brahman boy. Compare "वटुपरिषदं पुण्यश्रीकः श्रियैव सभाजयन्" । The jester is thus referred to perhaps owing to his childishness. Sometimes it implies निन्दा as in "निवार्य्यताम् आलि किमप्ययं वटुः" "किं रे वटु रित्यधिक्षिपसि" &c.

2. (a). ऋषिगौरवात्—ऋषिषु गौरवम् ऋषिगौरवम् regard for the sages. Or—The majesty of the sages (See Tika). तस्मात् । हेतौ पञ्चमी । (b). खलु and एव both imply अवधारण । The first emphasises न and the second सत्यम् ।

3. (a). वयम्—Applies to kings in general. (b). परोक्ष &c. —मननम् इति मन+क्विप् भावे=मत् consciousness. मथतीति मथ+अच् कर्त्तरि=मथ: the destroyer. मतो मथ: मन्मथ: the destroyer of consciousness. A proper name of Cupid. शकपकृत्या समास:। This is Bhanuji's derivation. अक्षि means generally any इन्द्रिय। "इन्द्रिविषये सर्वमिन्द्रियमक्षिशब्दो वक्ति" इति कैयट:। Hence परलम् अक्षाम् इति पर+अक्षि+अच्(समासान्त)=परोक्षम् transcending the senses. अव्ययी —। परोक्षम् अस्ति अस्य इति परोक्ष+अच् मत्वर्थे=परोक्ष: that which transcends the senses. Two points have to be noted here. *First*, the अच् समासान्त is according to some by the गणसूत्र "प्रतिपरसमनुभ्योऽक्ष्ण:"। Others consider पर as an interpolation here, and attach अच् by the rule "अक्ष्णोऽदर्शनात्"। *Secondly*, पराक्ष is the form expected. Instead, we have परोक्ष by निपातन in the rule "परोक्षे लिट्"। The भाष्य says "परोभाव: परस्याक्षे परोक्षे लिटि दृश्यताम्। उक्तं वार्द: पराद्‌क्ष्ण: सिद्धं वाप्माभिपातनात्॥" Thus (i) पर+अक्ष=परो+अक्ष=परोक्ष, or (ii) पर+अक्ष=पर+उक्ष=परोक्ष, or again (iii) पर+अक्ष=परोक्ष by निपातन। (c). मृग &c.—मृगाणां शावा: young stags. तै:। सममिति सहार्थयोगे तृतीया। (d). परिहास &c.—परिहसनम् इति परि+हस+घञ् भावे=परिहास: jest. विरुद्धं जल्पितं विजल्पितम् perversely uttered. प्रादितत्—। परिहासेन विजल्पितम् uttered perversely in jest. (e). परमार्थेन—परम: अर्थ: Lit. The highest thing, i. e., truth. तेन। अभेदे करणे तृतीया (परमार्थ and वचस् are identified). Or, परमेण मुख्येन अर्थेन अभिप्रायेन in its *literal* sense. (f). The sense is—Kings are used to the blandishments of beauties trained in all the arts of fascination. By constant association with these beauties they have acquired peculiar tastes. It is impossible that an artless woman of the wild can please a king. My talk about Sakuntala is a huge joke. Do not be misled by it.

4. *Reading*. विकल्पितम् means विरुद्धं कल्पितम् stated othewise, i. e., falsely represented, which is equally good.

तृतीयोऽङ्कः ।

विष्कम्भकः ।

(ततः प्रविशति कुशानादाय यजमानशिष्यः) । शिष्यः— अहो महानुभावः पार्थिवो दुष्यन्तः । प्रविष्टमात्र एव आश्रमं तत्रभवति निरुपप्लवानि नः कर्माणि संवृत्तानि ।

का कथा बाणसन्धाने ज्याशब्देनैव दूरतः ।
हुङ्कारेणेव धनुषः स हि विघ्नानपोहति ॥

यावदिमान् वेदिसंस्तरणार्थं दर्भान् ऋत्विग्भ्यः उपहरामि । (परिक्रम्यावलोक्य च । आकाशे)—प्रियंवदे कस्येदमुशीरानुलेपनं मृणालवन्ति च नलिनीपत्राणि नीयन्ते । (श्रुतिमभिनीय), किं ब्रवीषि, आतपलङ्घनाद्बलवदस्वस्था शकुन्तला, तस्याः शरीरनिर्वापणाय इति । प्रियंवदे यत्नादुपचर्य्यताम् । सा हि तत्रभवतः कुलपतेरुच्छ्वसितम् । अहमपि तावद्वैतानिकं शान्त्युदकम् अस्यै गौतमीहस्ते विसर्जयिष्यामि । (निष्क्रान्तः) ।

(*Then enters a pupil of the sacrificer with Kusa-grass*). PUPIL—O of great majesty is king Dushyanta. Our rites became free from obstacles even when his Highness but entered the hermitage. What to say of aiming the arrow! Verily, he removes obstacles with even the twang of the bow-string from afar, as if with a growl of the bow. I will take these *Kusas* to the sacrificers for strewing them round the altar. (*Going round, looking about and addressing in the air*) Priyamvada, for whom are being carried this Usira-unguent and the lotus-leaves with stalks? (*Acting the hearing of the answer*)

Do you say that Sakuntala is greatly indisposed through a heat-attack [sun-stroke ?] and these are for soothing her body ? Priyamvada, let her be attended carefully. She is indeed the life of his Worship the Superior. I too will deliver, for her, evil-averting sacrificial water into the hands of Gautami. (*Exit*).

विष्कम्भकः—*Prelude*

तत इति। ('कुशान् आदाय' गृहीत्वा 'यजमानस्य' कण्वाश्रमवासिनः कस्यचित् ऋत्विजः 'शिष्यः' छात्रः 'प्रविशति')।

अहो इति। 'अहो' आश्चर्य्यम्। 'पार्थिवो' राजा 'दुष्यन्तो महान् अनुभावः' प्रभावो यस्य तादृशः। 'तत्रभवति' मान्ये तस्मिन् 'आश्रमं प्रविष्टमात्रे एव' यदैव प्रविष्टः स तदैव, 'नः कर्माणि' क्रियाः 'निर्गता उपप्लवा' विघ्ना येषां तथाविधानि 'संवृत्तानि' जातानि। ["महानुभावः पार्थिवो" (रा-, वि-)—"महाप्रभावो राजा"—(त-, न्या-, म-)॥ "प्रविष्टमात्रे" (रा-, वि-)—"येन प्रविष्टमात्रे" (त-, न्या-, म-)॥ "संवृत्तानि" (त-, न्या-, म-)—"प्रवृत्तानि भवन्ति" (रा-, वि-)]।

केति। अन्वयः—बाणसन्धाने का कथा। स हि दूरतः ज्याशब्देनैव धनुषः हुङ्कारेणेव विघ्नानपोहति। व्याख्या—किमयमुपप्लवाभावो बाणेन कृतः ? न इत्याह —'बाणस्य सन्धाने' धनुषि योजने 'का कथा'। तस्य कथैव नास्ति। 'स हि' नूनं सः, 'दूरतः' दूरात् 'ज्यायाः' धनुर्गुणस्य 'शब्देनैव' तन्मात्रेणापि, 'धनुषः हुङ्कारेण' हुंकृत्या 'इव' [इत्युत्प्रेक्षा], 'विघ्नान्' इष्टविघातकान् 'अपोहति' निराकरोति। [धनुषि रुद्रधर्मारोपः। हुङ्कारशस्त्रा हि रुद्राः]। ज्याघोषेण राक्षसाः पलायिताः। मन्ये नायं ज्याशब्दः किन्तु रुद्ररूपं तस्य धनुरेव हुङ्कारेण विघ्नान् निरास।

यावदिति। 'इमान्' संगृहीतान् 'दर्भान्' कुशान् 'वेद्याः' यज्ञवेदिकायाः 'संस्तरणार्थं' परितः पातनार्थं 'ऋत्विग्भ्यः' यजमानेभ्यः। ["ऋत्विग्दधृक्—" इति क्विन् निपातितः] 'उपहरामि' नयामि। नीत्वा तेभ्यो ददामि।

परीति। ('परिक्रम्य' रङ्गमञ्चं परितो गत्वा 'अवलोक्य आकाशे' अलक्ष्यं आह। रङ्गाद्बहिः स्थितं पात्रं संबोध्य यत् कथ्यते तत् 'आकाशे')। 'इदम् उशीरस्य' वीरणाख्यतृणस्य 'अनुलेपनं' देहचर्चा 'मृणालवन्ति' मृणालसहितानि 'नलिनीपत्राणि' पद्मपत्राणि 'च कस्य' अर्थे 'नीयन्ते'। ('श्रुतिं' श्रवणम् 'अभिनीय' रूपयित्वा। प्रतिवचनम् अश्रुतमपि श्रुतमिव नाटयित्वा)। ["श्रुतिमभिनीय" (त-, वि-, न्या-, म-)—"आकर्ण्य" (रा-)]॥

किमिति। 'आतपेन' सूर्य्येण ग्रीष्मेण वा 'लङ्घनात्' अभिभवात् शकुन्तला 'बलवत्' अत्यर्थम् 'अस्वस्था' अप्रकृतिस्था, कातरा इति यावत् जाता, 'तस्याः' शकुन्तलायाः 'शरीरस्य निर्वापणाय' तापविनोदाय एतत् सर्वम् 'इति ब्रवीषि किम्'? 'यत्नात्' यत्नमालम्ब्य [ल्यब्लोपे कर्मणि पञ्चमी] 'उपचर्य्यतां' सेव्यतां सा। 'सा हि' शकुन्तला 'तत्रभवतः' मान्यस्य 'कुलपतेः' अन्नपानादिदानेन मुनिकुलेश्वरस्य कण्वस्य 'उच्छ्वसितं' निश्वासवायुः, प्राणभूता [विधेयविशेषणमेतत्]। अतएव चिन्तनीया सा। 'अहमपि तावत् वैतानिकं' याज्ञिकं 'शान्त्युदकम्' आपच्छान्तिजलं 'गौतमीहस्ते अस्यै' शकुन्तलायै 'विसर्जयिष्यामि' प्रेषयिष्यामि ["प्रियंवदे यत्नादुपचर्य्यताम्" (त-, न्या-, म-)—"तर्हि त्वरितं गम्यताम्" (रा-, वि-)॥ "सा हि तत्रभवतः" (त-, न्या-, म-) "ननु सा खलु भगवतः कण्वस्य" (रा-, वि-)]॥

विष्कम्भक इति। यत् स्वयं तुच्छमपि कथायाः अंशद्वयं योजयति तत् विष्कम्भक इति कथ्यते। ["वृत्तवर्त्तिष्यमाणानां कथांशानां निदर्शकः। संक्षिप्तार्थस्तु विष्कम्भ आदावङ्कस्य दर्शितः"॥]

NOTES

1. *Summary.* ततः प्रतिदिनं राजनि रक्षितरि मुनिभिः कर्मानुष्ठीयते। वर्द्धते च राज्ञः शकुन्तलायाश्च सन्तापः। एकदा समाप्ते माध्यन्दिने कर्मणि खिन्नेन राज्ञा मालिनीतीरे विहरता वेतसगृहे विरहतप्ता शकुन्तला सखीभ्यां परिचर्य्यमाणा अदृश्यत। ताभ्यामर्थितया तदानीमनुरागस्तया विवृतः। श्रुत्वा राज्ञा सहर्षमुपसृत्य आत्मा निवेदितः। एवं विदिते परस्परानुरागे गान्धर्वेण विधिना परिणयः संवृत्तः। एतस्मिन्नन्तरे शकुन्तलायाः कुशलं जिज्ञासमाना तत्र वृद्धा तापसी गौतमी

प्राप्ता। सा शकुन्तलां विटपान्तरिते राजनि उटजं निनाय। ततः साग्न्यो होमः प्रवृत्ते विघ्नार्थेचागता राक्षसाः। राजापि तान् प्रत्येव प्रगतः।

2. (a). महानुभावः – अनुगतो भाव इति अनुभावः majesty. प्रादितत्— । We cannot say अनु + भू + घञ् भावे = अनुभावः because by the rule "श्रिणीभुवोऽनुपसर्गे" घञ् has to be attached to भू *only* when no उपसर्ग precedes. Or अनुभावयति इति अनु + भू + णिच् कर्त्तरि = अनुभावः। (b). प्रविष्टमात्रे &c.—मात्र is अवधारण। In this sense it is always neuter. "मात्रं कार्त्स्न्येऽवधारणे"। प्रविष्ट एव प्रविष्टमात्रम्। तस्मिन्॥ Here the अवधारण is with regard to प्रवेश—he has but entered and done nothing else. एव implies अवधारण regarding to *time*—Even at the time of entry, not a moment later. But Kalidasa very often has मात्र in such cases in the विशेष्यलिङ्ग। Thus "स विद्धमात्रः किल"—*Raghu.* The present may be a similar case. We may also attach मात्रच् in the sense of प्रमाण in defence of such cases. Thus प्रविष्ट इत्येतत् प्रमाणमस्य इति प्रविष्ट + मात्रच् = प्रविष्टमात्रः one of whom we can say nothing beyond the fact that he has entered (प्रविष्ट)। Practically this amounts to अवधारण। Hence the meaning is unchanged. (c). निरस्ता उपप्लवा येषां ते निरुपप्लवाः। बहु— । Also see Tika.

3. (a). का कथा &c.—What shall I say about his aiming his arrow? That his arrows will remove obstructors need not be stated, it is self-evident. The reason follows. (b). दूरतः—दूरात् from distance. दूरे स्थित्वा इति "ल्यब्लोपे—" अधिकरणे पञ्चमी। This is not अपादान पञ्चमी। Hence the तस् is attached by the Varttika "आद्यादिभ्य उपसंख्यानम्"। (c). हुङ्कारेण—हुङ्करणम् इति हुम् + कृ + घञ् भावे = हुङ्कारः a growl. हुम् is अनुकरण and गतिसंज्ञक by the rule "अनुकरणञ्चानितिपरम्"। तेन। The Rudras growl (हुङ्कार) and dispel enemies. So does his bow. (d). अपोहति—अप + ऊह + लट् ति removes. The परस्मैपद is optional by the Varttika "उपसर्गादस्यत्यूह्योर्वा वचनम्"।

4. *Remark.* The metre is श्लोक। The first line gives the *conclusion.* His arrows thoroughly extirpate obstructors. The *reason* is—Because even the twang of his bow scares them.

away ; such being the effect of the *twang* you may imagine the efficacy of the arrows. Hence the *figure* is अर्थान्तरन्यास। There is also उपमा or उत्प्रेचा in हुङ्कारेणेव।

5. (a). यावत्—अवधारणे। (b). वेदि &c.—समन्तात् स्तरणम् इति सम्+स्तृ+ल्युट् भावे=संस्तरणम् strewing. वेद्याः संस्तरणम्। तस्मै यथा तथा। "अर्थेन नित्यसमासः—" इति ४र्थीतत्—of the नित्यसमास class. Qualifies उपहरामि। क्रियाविशेषणत्वात् क्लीवत्वम्। For strewing of Kusa grass round the altar, compare "अमी वेदिं परितः क्लृप्तधिष्ण्याः समिद्वन्तः प्रान्तसंस्तीर्णदर्भाः" ।—Act. IV.

6. (a). आकाशे...किं ब्रवीषि—Only *one* actor is present. He imagines he sees some one in the distance, shouts out a question, and then feigns he hears the reply, though no answer is really given. In such cases the question is introduced by the stage direction आकाशे, and the actor pronounces the reply saying किं ब्रवीषि। "किं ब्रवीष्येवमित्यादि विना पात्रं ब्रवीति यत्। श्रुत्वेवानुक्तमप्येकस्तत् स्यादाकाशभाषितम्॥" (b). अस्वस्था—स्वस्मिन् तिष्ठति इति स्व+स्था+क कर्त्तरि=स्वस्था at ease. न स्वस्था। (c). शरीर &c.—निर्+वा often means 'to soothe' 'to comfort' with कालिदास। Compare "अये लब्धं नेत्रनिर्वाणम्"—*Infra*, "निर्वाप्य प्रियसन्देशैः सीतामचवधोद्धतः।"—*Raghu*, &c. निर्+वा+णिच्+ल्युट् भावे=निर्वापणम् soothing. शरीरस्य निर्वापणम्। तस्मै। तादर्थ्ये चतुर्थी। (d). उच्छ्वसितम्—उद्+श्वस+क्त भावे Lit. The breath ; here *Life*.

7. (a). वैतानिकम्—वितन्यते इति वि+तन+घञ् कर्मणि=वितानः a sacrifice यज्ञः। "वितानो यज्ञ उल्लोचे विस्तारे पुंनपुंसकम्" इति मेदिनी। विताने भवम् इति वितान+ठञ् अध्यात्मादि। (b). शान्त्युदकम्—शम+क्तिन् भावे=शान्तिः relief. शान्त्यर्थमुदकम्। शाकपार्थिवादि। (c). अस्यै—"कर्मणा यमभिप्रैति—" इति सम्प्रदाने ४र्थी। (d). गौतमीहस्ते—It is the आधार of विसर्जन। See next. (e). विसर्जयिष्यामि—The णिच् here is स्वार्थे as in "रामो राज्यमकारयत्", "आह्वायकान् भूमिपतेरयोध्यां व्यसर्जयन्नाथितमर्थ्यमुख्यः"—*Bhatti*, &c. Also सृज sometimes means merely 'to place'. Compare "विसृज्य मयि दुःखानि", "दिशामुपान्तेषु ससर्ज दृष्टिम्", &c. This is the sense here. Hence गौतमीहस्त is the आधार। (f). *Remark.* This prepares us for the interrup-

tion to the interview of दुष्यन्त and शकुन्तला as described towards the end of Act III. "चक्रवाकवधुके &c."—Act. III.

8, विष्कभ्नाति इति विष्कम्भः। पचाद्यच्। स एव विष्कम्भकः। It is a short statement showing the connection of events, past and future. It is of two kinds शुद्ध and सङ्कीर्ण—शुद्ध when acted by one or two मध्यम actors, and सङ्कीर्ण if both मध्यम and नीच are employed. "मध्येन मध्यमाभ्यां वा पात्राभ्यां सम्प्रयोजितः। शुद्धः स्यात् स तु. सङ्कीर्णो नीचमध्यमगोचरः॥" This is a शुद्ध विष्कम्भक।

तृतीयोऽङ्कः



(ततः प्रविशति कामयानावस्थो राजा)। राजा (निश्वस्य)—

जाने तपसो वीर्य्यं सा बाला परवतीति मे विदितम्।
अलमस्मि ततो हृदयं तथापि नेदं निवर्त्तयितुम्॥

(*Then enters the king in the state of one in love*). KING (*sighing*)—I know the power of penance. That girl has a master, is also known to me. Yet I am not able to withdraw this heart from her.

ततः इति। कामयते इति शानचि आगमशास्त्रमनित्यमिति मुकि अक्लते 'कामयानः' जातमदनः ["कामयानशब्दः सिद्धोऽनादिश्चेत्" इति वामनः]। तस्य अवस्था 'कामयानावस्था'। सा इव अवस्था यस्य, तथाविधः, क्षीणः पाण्डुराकृतिः इत्यर्थः ["सप्तम्युपमानपूर्वस्योत्तरपदलोपश्च वक्तव्यः" इति बहुव्रीहिः] 'राजा प्रविशति' ["कामयान" (रा॰ टीका, वि॰)—"समदन" (त॰, व्या॰, म॰)]॥

जाने इति। अन्वयः—तपसो वीर्य्यं जाने। सा बाला परवती इति मे विदितम्। तथापि इदं हृदयं ततो निवर्त्तयितुम् अलं न अस्मि। व्याख्या—'तपसो वीर्य्यं' तपोबलं 'जाने' तपोबलेन माम् अपराधिनं दग्धुं समर्थो मुनिः इति मे ज्ञातम्। तत् मुनिम् अप्रसाद्य शकुन्तलापरिणयः असम्भवः। सा बाला शकुन्तला 'परवती' परतन्त्रा, पित्राज्ञावर्त्तिनी 'इति' एतदपि 'मे विदितम्'। अतो गान्धर्वेणापि विधिना नेयमसन्निहिते पितरि उद्वाह्या। तेन हि सम्प्रति शकुन्तलारूपात् वस्तुनो मनो निवर्त्त्य पितुरागमनं प्रतीचस्व इति चेत् न—'तथापि' एवं सम्प्रति अस्या लाभे असम्भवेऽपि 'इदं हृदयम्' एतन्मे चित्तं 'ततः' शकुन्तलारूपात् वस्तुनः ["वारणार्थानामीप्सितः" इति अपादाने पञ्चमी] 'निवर्त्तयितुं' वारयितुम् 'अलं' समर्थो 'न अस्मि' न भवामि। अवशं मे मनः अलभ्ये प्राणसंशये प्रवर्त्तते किं करोमि।

["अलमस्मि" इत्यादि (रा-, वि-)—'न च निम्नादिव सलिलं निवर्तते मे ततो हृदयम्" (त-, न्या-, म-] ॥ [अतःपरं तर्कवागीशन्यायपञ्चाननपादानाम्—"भगवन् मन्मथ कुतस्ते कुसुमायुधस्य सतस्तैक्ष्ण्यमेतत् । (स्मृत्वा)

अद्यापि नूनं हरकोपवह्निस्त्वयि ज्वलत्यौर्व इवाम्बुराशौ ।
त्वमन्यथा मन्मथ मद्विधानां भस्मावशेषः कथमेवमुष्णः ॥

अपि च" इति] ॥

NOTES

1. कामयान &c.—कम + णिङ् + शानच् कर्त्तरि = कामयानः which is a वैदिक form. कामयान, कथयान, चिन्तयान &c. frequently occur in the रामायण and महाभारत । In भाषा the form expected is कामयमान by the rule "आने मुक्" । Raghava's efforts to defend कामयान in भाषा are amusing. He says "यद्वा कामस्य याने उद्गमने आरोहणे वा या अवस्था अभिलाषाद्याः ता यस्य सः" ! ! Vamana has the right solution.

2. (a). जाने—"अनुपसर्गात् ज्ञः" इति कर्त्रभिप्राये क्रियाफले आत्मनेपदम् । (b). मे—कर्त्तरि षष्ठी । See next. (c). विदितम्—विद + क्त कर्मणि वर्त्तमाने । Hence by the rule "क्तस्य च वर्त्तमाने" we have षष्ठी in मे the अनुक्तकर्त्ता । (d). निवर्त्तयितुम्—We have तुमुन् without क्रियार्थक्रिया owing to अलम् by the rule "पर्य्याप्तिवचनेष्वलमर्थेषु" । (e). The verse discloses the king's diffidence in spite of the resolution made in consultation with jester.

3. *Readings*—(a). न च निम्नात &c. places the कर्त्ता with हृदय । In the first half the कर्त्ता is with अहम् । Logically this is defective. "I know (अहं जाने), yet *heart* persists" is not as direct as "I know yet *I* persist". When the final result is the same, "A knows yet *he* persists" seems better than "A knows yet *B* persists" (b). अद्यापि &c. is childish. If मन्मथ is उष्ण because *there is fire* in him, he must be उष्ण to *all*, and not to the "मद्विध" only. If anything, he should feel less उष्ण to a कामिन् who is already उष्ण himself by love.

(मदनबाधां निरूप्य) भगवन् कुसुमायुध त्वया चन्द्रमसा च विश्वसनीयाभ्यामतिसन्धीयते कामिजनसार्थः । कुतः—

तव कुसुमशरत्वं शीतरश्मित्वमिन्दोर्
द्वयमिदमयथार्थं दृश्यते मद्विधेषु ।
विसृजति हिमगर्भैरग्निमिन्दुर्मयूखैस्
त्वमपि कुसुमबाणान् वज्रसारीकरोषि ॥

(*Acting love-sickness*) O mighty god with weapons of flowers, by thee and by the moon both seemingly reliable, the whole host of love-sick people is being deceived. For, your having flowery arrows and the moon's having cold rays, both these seem untrue for people like me. The moon casts fire with its rays that have cold within, and you too are making your arrows of flower of adamantine strength.

मदनेति । ('मदनेन' कन्दर्पेण 'बाधां' बाधनं, कन्दर्पकृतां पीडां 'निरूप्य' अभिनीय आह) 'भगवन् कुसुमायुध' पुष्पधन्वन् कुसुमेषो च ["अरविन्दमशोकञ्च चूतञ्च नवमल्लिका । नीलोत्पलञ्च पञ्चैते पञ्चबाणस्य शायकाः ॥"] 'त्वया चन्द्रमसा' चन्द्रेण 'च' द्वाभ्यामपि युवाभ्याम् 'विश्वसनीयाभ्याम्' [एकस्तावत् कोमलकुसुमेन प्रहरन्, अपरश्च हिमं विकिरन् विश्वसनीयः] 'कामिजनानां' कामिनां 'सार्थः' समूहः 'अतिसन्धीयते' वञ्च्यते । नैव त्वं मृदु प्रहरसि, नाप्यसौ चन्द्रः शीतरश्मिः कामिषु ।

तवेति । अन्वयः—तव कुसुमशरत्वम् इन्दोः शीतरश्मित्वम्, इदं द्वयं मद्विधेषु अयथार्थं दृश्यते । इन्दुः हिमगर्भैर्मयूखैः अग्निं विसृजति, त्वमपि कुसुमबाणान् वज्रसारीकरोषि । व्याख्या—'तव कुसुमानि' कोमलानि पुष्पाणि 'शरा' बाणा यस्य तस्य भावः तत्त्वम् । 'इन्दोः' चन्द्रस्य 'शीता' हिमाः 'रश्मयः' किरणा यस्य तस्य भावः तत्त्वम् । 'इदं द्वयं' द्वावयवं वस्तु 'मम' इव 'विधा' प्रकारो येषां तेषु कामिषु इत्यर्थः, 'अयथार्थम्' अर्थस्य अभिप्रेतस्य अननुरूपं असदृशं 'दृश्यते' अनुमीयते । कारणमाह—'इन्दुः हिमं गर्भः' अन्तरो भागो येषां तैः 'मयूखैः' किरणैः 'अग्निं विसृजति' विकिरति, 'त्वमपि कुसुमबाणान्' पुष्पशरान् अवज्रसारान् 'वज्रसारान्

करोषि'। न हि कुसुमस्य मर्मभेदिता, हिमस्य वा दाहकता अस्ति, तत् पुष्पशरत्वं शीतरश्मित्वञ्च इति वञ्चना नः कामिनाम्। ["मदनबाधां निरूप्य" इत्यत आरभ्य "परिक्रम्य" इत्यतः प्राक्पर्य्यन्तं प्रक्षिप्तमिव भाति। मध्याह्ने इन्दुकिरणस्य तीक्ष्णता-वर्णनं नातीव तमणीयम्] ॥

NOTES

1. (a). कुसुमायुध—आयुध्यते अनेन इति आ + युध + क करणे घञर्थे = आयुधम् weapon (includes bow and arrow). कुसुमम् आयुधमस्य। तत्संबुद्धौ। (b). अतिसन्धीयते—अति + सम् + धा + लट् ते कर्मणि। अति + सम् + धा means 'to cheat'. Compare "परातिसन्धानमधीयते यैः", "किं पुनरिमामतिसन्धाय लभ्यते"—Act. V.

2. (a). अयथार्थम्—अर्थस्य अभिधेयस्य योग्यं यथार्थम् agreeing with the sense. अव्ययी—। न यथार्थम्। (b). विसृजति—This is connected with मद्विधेषु in the first half. In मद्विधेषु अग्निं विसृजति, the सप्तमी is औपश्लेषिके आधारे। But मद्विधेषु अयथार्थम् and मद्विधेषु वज्रसारीकरोषि have विषये सप्तमी। (c). वज्र &c.—वज्रस्य सारः वज्रसारः। स इव सारो येषां ते वज्रसाराः having the strength of the thunder-bolt. अवज्रसारान् वज्रसारान् करोषि इति वज्रसार + च्वि + कृ + लट् सि। (d). This looks like an interpolation. See Notes below.

अथवा—

अनिशमपि मकरकेतुर्मनसो रुजमावहन्नभिमतो मे।
यदि मदिरायतनयनां तामधिकृत्य प्रहरतीति॥

(सखेदं परिक्रम्य) क्व नु खलु संस्थिते कर्मणि सदस्यैरनुज्ञातः खिन्नमात्मानं विनोदयामि। (निश्वस्य) न च प्रियादर्शनादृते शरणमन्यत्। यावदेनामन्विष्यामि।

Or, I like the fish-bannered god even constantly causing pain to my heart if it be that he smites referring to that damsel of broad quivering eyes. (*Walking round with signs of distress*) The rite being over, dismissed by the priests,

where indeed shall I comfort my distressed self? (*Sighing*) Nothing else but a sight of my beloved can help me. I will seek her.

'अथवा' इति पद्यान्तरे। अनिशमिति। अन्वयः—मदिरायतनयनां तामधिकृत्य प्रहरति इति यदि (तदा) मकरकेतुः अनिशं मनसो रुजमावहन्नपि मे अभिमतः। व्याख्या—'मदिरे' अन्तर्वेपमाने 'आयते' विशाले च 'नयने' यस्याः ताम् ["सौष्ठवेनापरित्यक्ता स्मेरापाङ्गमनोहरा। वेपमानान्तरा दृष्टिर्मदिरा परिकीर्तिता॥" इति हेमाद्रिः] 'तां' शकुन्तलाम् 'अधिकृत्य' विषयीकृत्य 'प्रहरति' मामिति शेषः 'इति यदि' यद्येवं भवति, तदा 'मकरकेतुः' कामः 'अनिशं' सततं 'मनसो रुजं' वेदनाम् 'आवहन्' कुर्वन् 'अपि मे अभिमतः' सम्मतः। शकुन्तलायां कामो मे इति चेत्, कामजा पीड़ा अपि सुखदा इत्यर्थः। [विद्यासागरपादा एतं न पठन्ति। तुच्छार्थोऽयं प्रक्षिप्तो वा]॥ [इत उत्तरम्—"भगवन् वसुपालस्य ते न मां प्रत्यनुक्रोशः। तथैव सङ्कल्पशतैरजस्रमनङ्ग नीतोऽसि मयातिवृद्धिम्। आकृष्य चापं श्रवणोपकण्ठे मय्येव युक्तस्तव बाणमोचः॥ (सखेदं परिक्रम्य)" इति (त-, व्या-, म-)]॥

सखेदमिति। ('खेदेन' आर्त्या 'सह' यथा तथा 'सखेदम्' आत्मानम् खिन्नमिव दर्शयित्वा इत्यर्थः) क्व इति। 'कर्मणि' यागकर्मणि 'संस्थिते' निष्पन्ने सति 'सदस्यैः' सभास्थैः तापसैः 'अनुज्ञातः' सुसम्पन्नो यागः, विश्राम्यतु भवान्, इति कृतानुमतिः 'खिन्न' प्राप्तखेदम् 'आत्मानं क्व नु खलु विनोदयामि' विनोदं कारयामि ["तत् करोति तदाचष्टे" इति णिच्। ततो हेतुमण्णिच्]। 'न च प्रियायाः' शकुन्तलाया 'दर्शनं' तस्मात् 'अन्यत्' तद्भिन्नं किञ्चित् 'शरणम्' अस्ति। तद्दर्शनादेव यदि विनोदः स्यात्, नान्यतः। ["खिन्नमात्मानम्" (त-, व्या-)—"श्रमक्लान्तम्" (रा-, वि-, म-)॥ "न च प्रियदर्शनात्" (त-, व्या-)—"किं नु खलु मे प्रियदर्शनात्" (रा-, वि-, म-)]॥

NOTES

1. (a). मकरकेतुः—मकरस्य प्रतिकृतिः इति मकर+कन्=मकरः the figure of a मकर which is a sea-monster. The कन् disappears in

the case of a ध्वज by the Karika "अर्चासु पूजनार्थासु चित्रकर्मध्वजेषु च। इवे प्रतिकृतौ लोप: कनो देवपथादिषु॥" स केतु: ध्वजो यस्य। (b). *Remark.* We have very careless writing from मदनबाधां निवेद्य to प्रहरतीति। The निर्णयसागर Press edition of Raghava Bhatta omits the verse अनिशमपि &c. Vidyasagara does the same. The whole passage is so glaringly defective that it is difficult to accept it as from Kalidasa. I notice some defects below—(i) विश्वसनीय as applied to चन्द्रमस् is not a happy epithet. When we say so and so is विश्वसनीय (reliable), we imply that outward appearance is suspicious, but in fact he may be trusted. In the case of कुसुमायुध, the mention of आयुध is apt to create distrust, so विश्वसनीय is all right. But चन्द्रमस् has the derivative meaning "the delightful time-keeper" [चन्दति आह्लादयति इति चन्द्र:। मिमीते कालम् इति मा:। चन्द्रश्चासौ माश्च]। In his case विश्वसनीय is meaningless. (ii) कामिजन and कामिसार्थ equally express the meaning of कामिजनसार्थ which is therefore unnecessarily cumbrous. (iii) Having directly mentioned कुसुमायुध and चन्द्रमस्—subsequent references should be by सर्वनाम except to avoid ambiguity. Now, in the verse, while कुसुमायुध is referred to by "तव," the name इन्दु is used for चन्द्रमस्। It would have been better to say तव कुसुमशरत्वं तस्य शीतद्युतित्वम् &c. (iv) मद्विधेषु for मयि is a kind of अप्रस्तुतप्रशंसा by no means pleasing. (v) The first half of the verse तव कुसुम &c. is only a repetition of त्वया चन्द्रमसा च &c. above. विसृजति हिमगर्भै: &c. immediately after कुत: is more direct and would have served the purpose quite well. The writer seems to be in want of materials to complete the verse and is obliged to repeat. (vi) In the first half, and the preceding prose, the order is त्वम्, चन्द्रमस्; but in the second half, this is, for no good reason, reversed, and we have इन्दु, त्वम्। (vii) It was mid-day at the time,and the reference to the unbearableness of moon-light is a queer अप्रस्तुतप्रशंसा to say the least of it. (viii) काम is addressed directly in the second person on the preceding page; but the verse अनिशमपि &c. puts him un-

accountably in the third person. (ix) The इति in प्रहरतीति is superfluous. The meaning is more easily expressed without it. (x) The verse means—I welcome Kama's blows if he strikes with reference to Sakuntala. The writer of this seems to be a superficial observer. If the object of the king's love were less endowed by nature than Sakuntala, even then she would have pleased him as Sakuntala pleases now. Compare the poet's remark "सर्वः कान्तमात्मीयं पश्यति"—Act II. (xi) श्रलमस्मि ततो हृदयं तथापि नेदं निवर्त्तयितुम् (See *Ante*) shows that the uppermost thought in the king's mind at the time is to search for Sakuntala. Hence क्व नु खलु संस्थिते कर्म्मणि &c. naturally follows after निवर्त्तयितुम्। The passage मदनबाधां निवेद्य...प्रहरतीति is thus an interruption. But there is nothing here to interrupt the thought.

2. *Reading.* The reading श्रमक्लान्तम् does not suit the context. There was no occasion to become श्रमक्लान्त। Besides, if he was really श्रमक्लान्त, there were plenty of shades available, and he would not have been at a loss for a suitable place and exclaimed क्व नु खलु &c. I prefer खिन्नम्। He was evidently खिन्न for the poet remarks सखेदं परिक्रम्य।

(सूर्य्यमवलोक्य) इमामुग्रातपवेलां प्रायेण लतावलयवत्सु मालिनीतीरेषु ससखीजना शकुन्तला गमयति। तत्रैव तावद्गच्छामि। (परिक्रम्यावलोक्य च) अनया बालपादपवीथ्या सुतनुरचिरं गतेति तर्कयामि। कुतः—

सम्मीलन्ति न तावद्बन्धनकोषास्तयावचितपुष्पाः।
क्षीरस्निग्धाश्चामी दृश्यन्ते किसलयच्छेदाः॥

(*Looking at the sun*) Generally, Sakuntala passes this period of fierce sun with her friends on the banks of the Malini where there are groves of creepers. There indeed I go. (*Going round and looking*) I guess the fine-figured

damsel has not long passed by this row of young trees. Why (do I say so)? The cases in the stalks whence flowers have been plucked, by her, do not yet close up, and those mutilated [*Or*—cuts in the] young shoots appear wet with milky juice.

सूर्य्येति। (वेलानिर्णयार्थं 'सूर्य्यम् अवलोक्य' दृष्ट्वा) 'शकुन्तला प्रायेण' बाहुल्येन, न तु नियतमेव, 'लतानां वलयानि' वेष्टनानि लतावेष्टितस्थानानि सन्ति येषु तेषु 'मालिनीतीरेषु' मालिनीनद्यास्तटेषु 'सखीजनेन' प्रियंवदया अनसूयया च 'सह इमाम्, उग्रः' कठोरः 'आतपो' रविः, रविकर इत्यर्थः यस्यां तथाविधां 'वेलां' क्षणं 'गमयति' अतिवाहयति।

अनयेति। 'सुतनुः' अनवद्याङ्गी शकुन्तला 'अनया बालपादपानां वीथ्या' श्रेण्या, वीथिशोभितेन वर्त्मना इत्यर्थः 'अचिरम्' अधुना एव 'गता इति तर्कयामि' मन्ये। 'कुतः' एवं ब्रवीमि इति चेत्—

सम्मीति। अन्वयः—तया अवचितपुष्पाः बन्धनकोषाः न तावत् सम्मीलन्ति। अमी किसलयच्छेदाश्च क्षीरस्निग्धा दृश्यन्ते। व्याख्या—'तया' शकुन्तलया 'अवचितानि' लूनानि गृहीतानि 'पुष्पाणि' येषां येभ्यो वा तथाविधाः 'बन्धनकोषाः' वृन्तकोषाः 'न तावत् सम्मीलन्ति' सम्मीलिता न भवन्त्येव। 'अमी' दृश्यमानाः। छिद्यते एषु इति छेदाः छेदनावकाशाः [अधिकरणे घञ्]। 'किसलयानां छेदाः' छिन्नाः किशलया वा, ते 'च क्षीरेण' छेदनमार्गात् स्रुतेन द्रवेण 'स्निग्धाः' आर्द्राः 'दृश्यन्ते' लक्ष्यन्ते। [राघवो विद्यासागरपादाश्च "परिक्रम्यावलोक्य" इत्यतः "किसलयच्छेदाः" इति यावत् न पठन्ति]॥

NOTES

1. (a). मालिनी &c.—तीरेषु तटदेशेषु plural with reference to different sites. तत्तद्देशानां बहुत्वाद्बहुवचनम्। (b). ससखीजना—सखीरूपो जनः सखीजनः। शाकपार्थिवादि।

2. बाल &c.—वीथी is पङ्क्ति a line, or वर्त्मन् a road. "वीथी वर्त्मनि पङ्क्तौ च" इति हैमः। In the first sense बालपादपपङ्क्ति means बालपादपपङ्क्तिशोभितं वर्त्म by लक्षणा। When वीथी is वर्त्मन्, say बालपादपशोभिता

वीथी। शाकपार्थिवादि। तथा। तृतीया करणे। Both वीथी and वीथि are seen. (b). अचिरम्—न चिरम् not long. It is a काल and used as कर्म of गमनक्रिया। "देशकालाध्वगन्तव्याः कर्मसंज्ञा ह्यकर्मणाम्"।

3. (a). तावत्—साकल्ये। The cases will first close up, then dry in the sun. They have not even closed yet. Hence the flowers must have been just now (अचिर) plucked. (b). तयावचित &c.—Sakuntala was too ill to attend to these things herself. The king thought she did these, because he did not know she was ill.

4. *Remark.* These signs guide the king. I think the passage ought to appear though Raghava omits it.

(संस्पर्शं रूपयित्वा) अहो प्रवातसुभगोऽयमुद्देशः
शक्यमरविन्दसुरभिः कणवाही मालिनीतरङ्गाणाम्।
अङ्गैरनङ्गतप्तैरविरलमालिङ्गितुं पवनः॥

(परिक्रम्यावलोक्य च) अस्मिन् वेतसपरिक्षिप्ते लतामण्डपे सन्निहितया शकुन्तलया भवितव्यम्। तथाहि—

अभ्युन्नता पुरस्तादवगाढ़ा जघनगौरवात् पश्चात्।
द्वारेऽस्य पाण्डुसिकते पदपङ्क्तिर्दृश्यतेऽभिनवा॥

(*Acting as if touched by the breeze*) Ah ! this spot is pleasant with its fine breeze. Here, by the love-striken limbs, can be closely embraced, the lotus-scented breeze, the carrier of the spray from the ripples of the Malini. (*Going round and looking about*) Sakuntala is bound to be near in this bower of creepers enclosed by canes. For, at its entrance, where there is pale-sand, is seen a fresh line of foot-prints raised outwards in front, and pressed down behind through the weight of the hips.

परिक्रम्येति। 'परिक्रम्य संस्पर्शं' वातसंस्पर्शं 'रूपयित्वा' आकारेण अभिनीय।

अहो इति। 'अहो' हर्षे 'प्रकृष्टेन वातेन सुभगः' हृद्यः 'अयम् उद्देशः' वनविभागः।

शक्यमिति। अन्वयः—(अत्र) अनङ्गतप्तैः अङ्गैः अरविन्दसुरभिः मालिनी-तरङ्गाणां कणवाही पवनः अविरलम् आलिङ्गितुं शक्यम्। व्याख्या—अत्र प्रदेशे 'अनङ्गेन' कामेन 'तप्तैः' पीड़ितैः, प्राप्तकामकृततापैः 'अङ्गैः' गात्रैः [अनुक्ते कर्त्तरि तृतीया] 'अरविन्दैः' कमलैः 'सुरभिः' पद्मगन्धिः, घ्राणतर्पणः, 'मालिन्याः तरङ्गाणां' वीचीनां 'कणवाही' शीकरवाही, सुशीतलत्वात् सर्वाङ्गतर्पण इत्यर्थः, 'पवनः' वातः, 'अविरलं' गाढ़ं यथा तथा 'आलिङ्गितुम्' आश्लेष्टुं 'शक्यम्'। मदनकृते अङ्गदाहे सुरभिशीतवातसेवनं हितम्। तच्च इहैव सम्भवति इति भावः। ["शकि-सहोश्च" इति कर्मणि यत्। एतत् शक्यम् एतत् अशक्यम्, इति प्रथमं सामान्यतो लिङ्गवचनयोः अविवक्षया एव वस्तुविभागः। ततः शक्येषु पवनस्य अन्तर्भावः। न हि साक्षात्कृतः शक्यपवनयोर्विशेष्यविशेषणभावः। तेन "शक्यं पवनः" इत्य-दोषम्। "शक्यमिति रूपं विलिङ्गवचनस्यापि कर्माभिधायां सामान्योपक्रमात्" इति वामनः]। ["शक्यम्" (रा-, वि-, म-)—"शक्यः" (त-, न्या-) ॥ "अविरलम्" (रा-, वि-, म-) ॥—"निर्दयम्" (त-, न्या-)] ॥

अस्मिन्निति। 'अस्मिन् वेतसैः परिक्षिप्ते' वेष्टिते 'लतामण्डपे' लतागृहे 'सन्नि-हितया' समीपस्थया 'शकुन्तलया' भवितव्यम्। अनुमानकारणमाह 'तथाहि'—

अभीति। अन्वयः—पाण्डुसिकते अस्य द्वारे पुरस्तात् अभ्युन्नता, जघनगौरवात् पश्चात् अवगाढ़ा अभिनवा पदपङ्क्तिः दृश्यते। व्याख्या—'पाण्डवः' पाण्डुवर्णाः 'सिकताः' वालुकाः यस्मिन् तादृशे [सिकताशब्दः स्त्रियां बहुत्वे प्रायेण क्वचित् एकत्वेऽपि] 'अस्य' लतामण्डपस्य 'द्वारे पुरस्तात्' पुरोभागे, अङ्गुलीषु, विशेषतः अङ्गुष्ठयोः इत्यर्थः, 'अभ्युन्नता' उदङ्गुलिमुद्रा 'जघनस्य' नितम्बस्य 'गौरवात्' गुरु-त्वात् 'पश्चात्' गुल्फयोः 'अवगाढ़ा' गभीरं गाढ़ा, न तु केवलं गाढ़ा 'अभिनवा' सद्यःकृता 'पदपङ्क्तिः' पादविन्यासरेखा 'दृश्यते' लक्ष्यते। त्रिसृषु रेखासु सतीषु अपि एकस्याः कथनं तस्या एव वरस्त्रीलक्षणलक्षितत्वात्।

NOTES

1. शक्यम्—With शक्यं पवनः compare युक्तम् अभिलाषः—*Infra.* सामान्योपक्रमात् नपुंसकम् as in विदित in विदितभक्ति—*Ante.* Vamana's विलिङ्गवचन means विरुद्धलिङ्ग (differing in gender) and विरुद्धवचन

(differing in number). For विरुद्धलिङ्ग compare शक्यं सुतम् in "शक्यश्वानेन श्वमांसादिभिरपि सुत्प्रतिहन्तुम्"—*Bhashya.* विरुद्धवचन is seen in शक्यं शालिमांसादीनि in "शक्यश्वानेन शालिमांसादीन्यपि व्रतयितुम्"—*Bhashya.* शक्यं करा: has both विरुद्धलिङ्ग and विरुद्धवचन in "शक्यमोषधिपतेर्नवोदया:...छेत्तुमग्रनखसम्पुटै: करा:"—*Kumara.*

2. वेतस &c.—परि + क्षिप means 'to surround.' Compare परिक्षेप in the sense of a moat in "महार्णवपरिक्षेपं लङ्कायाः परिखालघुम्" —*Raghu.*

3. अभ्युन्नता—This is a सुलक्षण। Compare "अभ्युन्नताङ्गुष्ठनखप्रभाभि:" &c.—*Kumara.*

4. पाण्डुसिकते—For a singular use of "सिकता" compare "एका च सिकता तैलदाने असमर्था"—*Bhashya.*

यावद्विटपान्तरेण अवलोकयामि । (परिक्रम्य तथा कृत्वा सहर्षम्) अये लब्धं नेत्रनिर्वाणम् । एषा मे मनोरथप्रियतमा सकुसुमास्तरणं शिलापट्टमधिशयाना सखीभ्यामुपास्यते । भवतु श्रोष्याम्यासां विस्रम्भकथितानि । (विलोकयन् स्थित:) ।

I will see through some opening in the branches. (*Going round and doing the same—Joyfully*) Ah ! The comfort of my eyes is found. There the dearest of my wishes, lying on a stone slab with a coverlet of flowers, is being waited upon by her two friends. Well, I shall hear their confidential utterances. (*Stands gazing*).

यावदिति । 'विटपानां' शाखानाम् 'अन्तरेण' अवकाशेन ["अन्तरमवकाशावधिपरिधानान्तर्धिभेदतादर्थ्ये" इत्यमर:] 'अवलोकयामि' अत्र शकुन्तला अस्ति न वा इति पश्यामि ।

परिक्रम्येति । 'तथा कृत्वा' विटपान्तरेण दृष्ट्वा, शकुन्तला अत्रास्ते इति ज्ञात्वा 'सहर्षम्' आह ।

अये इति । 'अये' हर्षे । 'नेत्रयो:' सन्तप्तयो: लोचनयो: 'निर्वाणं' निर्वृति-

अदं, सुखकरं वस्तु 'लभ्यम्'। तदेव स्फुटं कथयति—'कुसुमानाम् आस्तरणं' तेन 'सह' कुसुमैराच्छृतम् इत्यर्थः 'शिलापट्ट'' प्रस्तरतलम् 'अधिशयाना' प्रस्तरतले शयिता ["अधिशीङ्स्थासां कर्म" इत्याधारस्य कर्मत्वम्] 'मे मनोरथानां मनोरथेषु वा प्रियतमा' प्रियतमो मनोरथः, शकुन्तलारूप: पदार्थः 'सखीभ्याम् उपास्यते' सेव्यते, उपचर्य्यते इति यावत्। ["उपास्यते" (त-, न्या-)—"सा अन्वास्यते" (रा-, वि-, म-)]॥

भवत्विति। 'भवतु आसां विस्रम्भेन' विश्वासेन 'कथितानि' भाषितानि [नपुंसके भावे क्तः] विश्वस्तसंलापान् 'श्रोष्यामि'।

NOTES

1. (a). नेत्रनिर्वाणम्—निर्+वा+ल्युट् भावे=निर्वाणम् comfort, निर्वृतिः। "निर्वाणं निर्वृतौ मोक्षे" इति त्रिकाण्डशेषः। (b). मनोरथ &c.—मनः रथो यस्मिन् यस्य वा तदारूढत्वात् मनोरथः wish. Next इतन्—। No निर्द्धारण, hence the prohibition "न निर्द्धारणे" does not apply. (c). शिलापट्टम्—पट्ट is पीट a slab, a seat आसन। "पट्टः स्यादपि चासनम्" इत्यनेकार्थकोषः।

2. *Reading.* Both उपास्यते and अन्वास्यते imply सेवा nursing शुश्रूषा। "उपासनं शराभ्यासे शुश्रूषायाञ्च हिंसने" इति विश्वः। "अन्वासनं स्वे इवस्तौ सेवायामनुशोचने" इति हैमः। Either will do.

(ततः प्रविशति यथोक्तव्यापारा सह सखीभ्यां शकुन्तला)।

सख्यौ (उपवीज्य। सस्नेहम्)—हला सउन्दले, अवि सुहाअदि दे णलिणीपत्तवादो [हला शकुन्तले अपि सुखायते ते नलिनीपत्रवातः]।

(*Then enters with her two friends, Sakuntala engaged as described*). FRIENDS *(Tenderly, after having fanned her)*—Dear Sakuntala, does the breeze of the lotus-leaves appear refreshing to you ?

शकुन्तला—किं वीजअन्ति मं सहीओ [किं वीजयतो मां सख्यौ]। (सख्यौ विषादं नाटयित्वा परस्परमवलोकयतः)।

SAKUNTALA—Are you fanning me, friends? (*The friends, acting sorrow, stare at each other*).

राजा—बलवदस्वस्थशरीरा शकुन्तला दृश्यते। तत् किमयमातपदोषः स्यात्, उत यथा मे मनसि वर्त्तते।

KING—Sakuntala seems to be greatly distressed bodily. Now, is this the bad effect of the heat, or as it is in my mind?

ततः इति। व्याख्यातं प्राक्।

सख्यौ इति। 'उपवीज्य' समीपे स्थित्वा वीजयित्वा 'स्नेहेन सह' आहतुः।

हलेति। 'हला शकुन्तले, अपि' प्रश्ने 'नलिनीपत्राणां' कमलदलानां 'वातः' तत् सम्पर्कात् शीतो वायुः 'ते' तव सम्बन्धे 'सुखायते' सुखमिव आचरति किम् ["कर्त्तुः क्यङ् सलोपश्च" इति क्यङ्]।

किमिति। हे 'सख्यौ मां वीजयतः' नलिनीपत्रवातेन उपचरतः 'किम्'? मया तु व्यजनं नानुभूयते। इति तापाधिक्यात् अनवधानम्।

सख्यौ इति। 'विषादं' खेदं 'नाटयित्वा' अभिनीय 'परस्परम्' अन्योऽन्यम् 'अवलोकयतः'। अहो ईदृशी अस्याः समवस्था यत् वीजनमनया नानुभूयते इति खेदः।

बलेति। 'शकुन्तला बलवत्' अत्यर्थम् 'अस्वस्थम्' अप्रकृतिस्थं 'शरीरं' यस्याः तथाविधा 'दृश्यते'। 'तत्' तर्हि 'किमयम् आतपस्य' ग्रीष्मस्य 'दोषः स्यात्' ग्रीष्मकृतमस्वास्थ्यम् 'उत' अथवा 'यथा मे मनसि वर्त्तते' यथा अहं तर्कयामि। ग्रीष्मकृतः कामकृतो वा इति वितर्कः।

NOTES

1. (**a**). उपवीज्य—उप + वीज + णिच् स्वार्थे + ल्यप्। Panini does not recognise this root. (**b**). सुखायते—Raghava reads सुखयति [= सुखं करोति। तत्करोतीति णिच्]।

2. परस्परम् &c.—See Act. I., *Ante*.

3. (**a**). उत यथा—The king suspects love-sickness, but he does not forget that the effect of heat is very much like it. This

raises the doubt "Is it love or the heat". Presently he rejects the second [अथवा कृतं सन्देहेन &c.]।

(साभिलाषं निर्वर्ण्य) अथवा कृतं सन्देहेन ।

स्तनन्यस्तोशीरं प्रशिथिलमृणालैकवलयं
प्रियायाः साबाधं किमपि कमनीयं वपुरिदम् ।
समस्तापः कामं मनसिजनिदाघप्रसरयोर्-
न तु ग्रीष्मस्यैवं सुभगमपराद्धं युवतिषु ॥

(*Gazing wistfully*) Or, away with doubt. How indescribably charming is this my darling's distressed frame with the *Usira* applied to the breasts, and the single bracelet of lotus-shoot quite loose. Granted, the distress of love and of the advance of summer is the same with young women; but the transgression of heat is not so charming.

'साभिलाषं निर्वर्ण्य' सस्पृहं विलोक्य ('विचिन्त्य' ध्यात्वा समाधत्ते) 'अथवा' पक्षान्तरे 'सन्देहेन' संशयेन 'कृतम्' अलम् [कृतमिति व्यर्थार्थं अव्ययम्] ["साभिलाषं निर्वर्ण्य" (रा-, त-, न्या-, म-)—"विचिन्त्य" (वि-)] ॥

स्तनेति । अन्वयः—प्रियायाः साबाधं स्तनन्यस्तोशीरं, प्रशिथिलमृणालैकवलयम् इदं वपुः किमपि कमनीयम् । युवतिषु मनसिजनिदाघप्रसरयोः तापः समः कामम्, ग्रीष्मस्य अपराद्धं तु एवं सुभगं न । व्याख्या—'प्रियायाः' शकुन्तलायाः' 'आबाधया' पीड़या 'सह' वर्त्तमानम्, अतएव 'स्तनयोः न्यस्तम्' अर्पितम् 'उशीरं' वीरणमूलानुलेपो यस्मिन् तथोक्तं, 'प्रशिथिलम्' अतिश्लथ' 'मृणालस्य' बिसस्य 'एकम्' एव 'बलयं' कङ्कणं यस्मिन् तत् तथोक्तम्, 'इदं' दृश्यमानं 'वपुः' शरीरं 'किमपि' अनिर्वचनीयं यथा तथा 'कमनीयं' मनोहरम् । 'युवतिषु' विषये 'मनसिजस्य' मनोभवस्य कामस्य ["तत्पुरुषे कृति बहुलम्" इति सप्तम्या अलुक्] 'निदाघप्रसरस्य' ग्रीष्माधिक्यस्य च 'तापः' ज्वाला 'समः काम" तुल्यः इत्यभ्युपगम्यते । 'ग्रीष्मस्य' निदाघस्य 'अपरा-

क्षम्' अपराधः [नपुंसके भावे क्तः] 'तु' ग्रीष्मकृतः अतिक्रमः पुनः 'एवम्' ईदृशं 'सुभगं' सुन्दरं 'न'। कामतापात् कमनीयताबृद्धिरिति शकुन्तलायाः कामज एवायं तापः न निदाघजः। तदाह "अथवा कृतं सन्देहेन"। ["प्रशिथिल" (त-, न्या-, म-)—"शिथिलित" (रा-, वि-)॥ "किमपि कमनीयं" (रा-, वि-)—"तदपि कमनीयं" (त-, न्या-, म-)]॥

NOTES

1. सन्देहेन कृतम् = सन्देहेन अलम्। Hence गम्यमानसाधनक्रियां प्रति करणत्वात् तृतीया।

2, (a). प्रशिथिल &c.—एकं वलयम्। कर्मधा—। मृणालस्य एकवलयम्। प्रशिथिलं मृणालैकवलयं यस्मिन्। बहु— (b). साबाधम्—आबाधनम् इति आ + बाध + अ भावे = आबाधा distress. तया सह। बहु—। (c). किमपि—A compound अव्यय expressing indescribability. Adverb qualifying कमनीयम्। (d). कमनीयम्—कम + अनीयर् कर्मणि। Also कामनीय। (e). निदाघ &c.— नितरां दह्यते अस्मिन् इति नि + दह + घञ् अधिकरणे = निदाघः summer. "हो हन्तेर्ञ्णिन्नेषु" directs घ to be substituted for ह when न follows or before an affix that drops ञ or ण। प्र + सृ + अप् भावे = प्रसरः advance. मनसि जात इति मनसि + जन + ड कर्त्तरि भूते = मनसिजः like सरसिजः (*Ante*). मनसिजश्च निदाघप्रसरश्च, तयोः। (f). सुभगम्—The सुभगता is not due to the उशीरलेप on the breasts and the *loose* bracelet on the wrist, but to something altogether indescribable. (g). *Remark.* The suffering is *equal* from heat and love. But the latter adds charm to the person, hence serves to distinguish its action from that of the former. The additional loveliness of Sakuntala leaves no doubt (कृतं सन्देहेन) that she is love-sick. Compare—"शोच्या च प्रियदर्शना च मदनक्लिष्टेयमालक्ष्यते"—*Infra.*

3. *Reading.* (a). शिथिलित implies that the bracelet was previously tight. But bracelets are worn loose. प्रशिथिल agrees with this. What was loose is more so (प्र) now. (b). तदपि कमनीयम् as Monier-Williams has it after the Bengali Recensions,

implies that she appears lovely *in spite of* her distress, *i. e.*, though her loveliness has suffered, she is still attractive.

This seems inconsistent with the fourth line which supposes that the *pangs* of love enhance the attractiveness.

प्रियंवदा (जनान्तिकम्)—अणसूये, तस्स राएसिणो पढमदंसणादो आरहिअ पज्जुस्सुआ विअ सउन्दला। किं णु क्खु से तन्निमित्तो अअं आतङ्को भवे [अनसूये, तस्य राजर्षेः प्रथमदर्शनात् आरभ्य पर्य्युत्सुका इव शकुन्तला। किं नु खलु अस्यास्तन्निमित्तः अयमातङ्को भवेत्]।

PRIYAMVADA (*Aside*)—Anasuya, Sakuntala has been as though anxious (absent-minded, care-worn ?) since the first sight of that royal sage. Is it possible that this her ailment is due to him ?

अनसूया—सहि मम वि एरिसी आसङ्का हिअअस्स। होदु पुच्छिस्सं दाव णं [सखि ममापि ईदृशी आशङ्का हृदयस्य। भवतु प्रक्ष्यामि तावदेनाम्]। (प्रकाशम्) सहि, पुच्छिदव्वा सि किम्पि। बलिअं क्खु दे सन्दावो [सखि, प्रष्टव्यासि किमपि। बलीयान् खलु ते सन्तापः]।

ANASUYA—Friend, such is my mind's suspicion too. Well, I will ask her. (*Aloud*) Friend, you have to be questioned about something. Your distress is indeed great.

अनेति। 'राजर्षेः' दुष्यन्तस्य 'प्रथमं दर्शनं' समागमः ततः 'आरभ्य पर्य्युत्सुका इव' उत्कण्ठिता इव 'शकुन्तला' लक्ष्यते। 'किं नु खलु' अपि वा [वितर्कगर्भः प्रश्नः] 'अस्या अयमातङ्कः' एषा पीड़ा, 'स' राजर्षिरेव 'निमित्तं' कारणं यस्य तादृशो 'भवेत्'। दुष्यन्तार्थं इयं क्लिश्यते किम् ?

अनसूयेति। एतदपि प्रियंवदां प्रति जनान्तिकमेव। 'ईदृशी आशङ्का हृदयस्य' हृदयमेवम् आशङ्कते [कृत्योगात् कर्त्तरि षष्ठी]। दुष्यन्तस्यार्थे अस्यास्तापः

इत्यहमपि मन्ये। 'किमपि' वस्तु 'प्रष्टव्या असि' त्वामहं किमपि प्रष्टुमिच्छामि [प्रच्छेरप्रधानकर्मणि तव्य:]। 'बलीयान्' प्रबल: 'खलु ते सन्ताप:'। गुर्वी ते वेदना अत: पृच्छामि किञ्चित्।

NOTES

1. (**a**). प्रष्टव्यासि &c.—त्वामहं किमपि पृच्छेयम् becomes त्वं मया किमपि प्रष्टव्या, the अप्रधानकर्म becoming उक्त by maxim "ण्यादे: प्रधाने दुहादेरप्रधाने"। (**b**). खलु—This may also be taken as हेतौ। I wish to speak to you, *because* (खलु) you are suffering much.

शकुन्तला (पूर्वार्धेन शयनादुत्थाय)—हला किं वत्तुकामासि [हला किं वक्तुकामासि]।

SAKUNTALA (*Rising from the bed with her upper-half*)—What do you want to ask, dear ?

अनसूया—हला सउन्दले, अणब्भन्दरा क्खु अम्हे मअणगदस्स वुत्तन्तस्स। किन्दु जादिसो इदिहासणिबन्धेसु कामअमाणाणं अवत्था सुणीअदि तादिसीं दे पेक्खामि। कहेहि किंणिमित्तं दे सन्दावो [हला शकुन्तले अनभ्यन्तरा: खलु वयं मदनगतस्य वृत्तान्तस्य। किन्तु यादृशी इतिहासनिबन्धेषु कामयमानानाम् अवस्था श्रूयते तादृशीं ते प्रेक्षे। अथय किंनिमित्तं ते सन्ताप:]। विआरं क्खु परमत्थदो अजाणिअ अणारम्भो पडिआरस्स [विकारं खलु परमार्थत: अज्ञात्वा अनारम्भ: प्रतिकारस्य]।

ANASUYA—We are indeed inexperienced in matters concerning love. But yours I see is the same condition as is heard of lovers in historical compositions. Tell us to what your distress is due. Without having known the disturbing action in its character, counteraction cannot indeed be begun.

शकुन्तलेति। ('पूर्वार्धेन' पूर्वकायेण 'शयनात्' शिलाशय्याया: 'उत्थाय') ["शयनादुत्थाय" (रा·, त·, न्या·, म·)—"पुष्पशय्यामुदस्य" (वि·)]॥

इलीति। 'वक्तुं कामः' अभिलाषो यस्याः तादृशी 'असि' वक्तुमिच्छसि ["लुम्पेदवश्यमः कृत्ये तुङ्काममनसोरपि" इति तुमो मलोपः]।

इलीति। 'वयं मदनं' कामं 'गतस्य' प्राप्तस्य, कामसम्बन्धिनः इत्यर्थः 'वृत्तान्तस्य' वार्त्तायाः 'न अभ्यन्तराः' न तत्त्वज्ञाः। अज्ञातमदनवृत्तान्ता वयम्। स्वयं न कामयमानाः वयं, नापि दृष्टः कामयमानः कश्चित् जनोऽस्माभिः। 'इतिहासस्थिताः' ये 'निबन्धाः' प्रबन्धाः तेषु 'कामयमानानां' कामिनां 'यादृशी अवस्था श्रूयते तादृशीं ते प्रेक्षे'। नानुभूता न च दृष्टा किन्तु श्रुता। 'किंनिमित्त' कस्मिन् निमित्ते ["निमित्तकारणहेतुषु सर्वासां प्रायदर्शनम्" इति प्रथमा]। ["अनभ्यन्तराः खलु वयं मदनगतस्य" (रा-, वि-, म-)—"अलब्धान्तरा वयं ते मनोगतस्य" (त-, न्या-)]।

विकारेति। 'परमः अर्थः' परमार्थः तत्त्वम्। तत्तः स्वरूपतः। विक्रियते अन्यथापाद्यते अनेन इति 'विकारः' विकृतिकारणम्, 'अज्ञात्वा प्रतिकारस्य' प्रतिक्रियायाः 'अनारम्भः खलु' अननुष्ठानमेव प्राप्नोति। अज्ञाने रोगे किमौषधम् इत्यर्थः।

NOTES

1. वक्तुकामा – See वक्तुकामः, Act. I.

2. (a). अनभ्यन्तरा &c.—अभिगता अन्तरम् अभ्यन्तराः included. न अभ्यन्तराः not included बाह्याः outside. The sense is—We are outside the pale oi love-matters. We have no experience of these things direct or indirect. By *we* (वयम्), she means *all* ascetic girls.

3. *Reading*. The Bengali reading too is good. We do not know (अलब्धान्तरा वयम्) what is in your mind (ते मनोगतस्य)।

4. (a). परमार्थतः—करणे तसिप्रत्ययः as in स्वरतः and वर्णतः in "दुष्टः शब्दः स्वरतो वर्णतो वा"—*Bhashya*.

राजा—अनसूयामप्यनुगतो मदीयस्तर्कः। न हि स्वाभिप्रायेण मे दर्शनम्।

KING—My suspicion has haunted Anasuya also. Verily, I do not view it after my own mind.

शकुन्तला (आत्मगतम्)—बलवं क्खु मे अहिणिवेसो।

दाणिं वि सहसा एदाणं ण सक्कणोमि णिवेदिदुं [बलवान् खलु मे अभिनिवेशः। इदानीमपि सहसा एतयोर्न शक्नोमि निवेदयितुम्]।

SAKUNTALA (*Aside*)—Great is my anxiety (to conceal). Even now I cannot forthwith reveal to them.

प्रियंवदा – सहि सुट्ठु एसा भणादि। किं अत्तणो आतङ्कं उवेक्खसि। अणुदिवसं क्खु परिहीअसि अङ्गेहिं केवलं लावण्णमई छाया तुमं न मुञ्चदि [सखि सुष्ठु एषा भणति। किमात्मन आतङ्कमुपेक्षसे। अनुदिवसं खलु परिहीयसे अङ्गैः। केवलं लावण्यमयी छाया त्वां न मुञ्चति]।

PRIYAMVADA—Friend, she says rightly ; why do you neglect your trouble ? Even every day you are being thinned in the limbs. Only the glimmer of loveliness does not leave thee.

अनसूयेति। 'मदीयस्तर्क.' सन्देहः, अपि कामजा पीड़ा अस्या इत्येवंरूपः 'अनसूयामपि अनुगतः' प्राप्तः। अनसूयाया अपि अयमेव सन्देहो जातः। 'मे' मम 'दर्शनम्' अनुमानं 'स्वस्य' आत्मनः 'अभिप्राय.' अभिलाषः तेन तदनुसारेण 'न हि' नैव। "एवमात्माभिप्रायसम्भावितेष्टजनचित्तवृत्तिः प्रार्थयिता विडम्ब्यते" इति यत् प्राक् मया उक्तं तदसत्यम्। अन्यथा कथमनसूया अपि तथैव मन्यते ?

बलवानिति। 'मे अभिनिवेशः' यत्नः 'बलवान् खलु' अति हि मे गोपनेच्छा प्रबला। 'इदानीमपि' अधुना एवं सनिर्बन्धं पृष्टा अपि 'एतयोः' [शेषे षष्ठी], 'सहसा' अतर्कितमेव निवेदयितुं विज्ञापयितुं 'न शक्नोमि'।

सखीति। 'सखि' शकुन्तले '[ए]षा' अनसूया 'सुष्ठु' युक्तं 'भणति' भाषते। 'आत्मनः आतङ्क'' व्याधिं 'किमुपेक्षसे' कथमवजानासि "विषं व्याधिरुपेक्षितः"। 'अनुदिवसं खलु' प्रतिदिनमेव 'अङ्गैः' कपोलादिभिः 'परिहीयसे' हीना भवसि। व्याधिना अङ्गानि ते शुष्यन्ति। 'केवलं लावण्यमयी' लालित्यपूर्णा 'छाया' कान्तिः 'त्वां न मुञ्चति'। ["सखि सुष्ठु" (वि-)—"सखि शकुन्तले सुष्ठु" (रा-, म-)—"सुष्ठु" (त-, न्या-)]।

NOTES

1. स्वाभिप्रायेण—तृतीया करणे। See "एवमात्माभिप्राय—" Act. II.

2. (a). बलवान् &c.—My desire to conceal is indeed great, I cannot overcome it. It is out of the question to reveal my secret of my own accord. But they are pressing me now. Even thus I cannot come out with it at once. (b). निवेदयितुम्—तुमुन् without a क्रियार्थक्रिया, because of the root शक in शक्नोमि।

3. (a). अनुदिवसम्—दिवसे दिवसे इति वीप्सायाँ अव्ययी—। (b). परिहीयसे—ओहाक् त्यागे परस्मैपदी। लट् से कर्मणि। The root is not duplicated because the duplication takes place श्लौ, and in the कर्म and भाववाच्य the श्लु is replaced by यक्। (c). लावण्यमयी—लावण्य is कान्ति loveliness. "मुक्ताफलेषु छायायास्तरलत्वमिवान्तरा। प्रतिभाति यदङ्गेषु तल्लावण्यमिहोच्यते॥" Quoted by Mallinatha in Kumara. लावण्यं प्रचुरमस्याम् इति लावण्य + मयट् स्त्रियाम् = लावण्यमयी full of loveliness.

राजा—अवितथमाह प्रियंवदा। तथाहि—

क्षामक्षामकपोलमाननमुरः काठिन्यमुक्तस्तनं
मध्यः क्लान्ततरः प्रकामविनतावंसौ छविः पाण्डुरा।
शोच्या च प्रियदर्शना च मदनक्लिष्टेयमालक्ष्यते
पत्राणामिव शोषणेन मरुता स्पृष्टा लता माधवी॥

KING—Priyamvada speaks the truth—For, her face has the cheeks slightly emaciated, her chest has the breasts forsaken by firmness, the middle is thinner, the shoulders are very much drooping, the complexion is pale. Stricken by love, this damsel appears pitiable yet charming to look at, like the creeper Madhavi struck by the wind that dries up the leaves,

अवितथेति। 'तथा' सत्यम्। अव्ययमेतत्। विगतं तथा अस्मात् इति 'वितथं' मिथ्या। न वितथम् 'अवितथं' सत्यम्। सत्यत्वे कारणमाह 'तथा हि' इति।

क्षामेति। अन्वयः—आननं क्षामक्षामकपोलम्। उरः काठिन्यमुक्तस्तनम्। मध्यः क्लान्ततरः। अंसौ प्रकामविनतौ। छविः पाण्डुरा। मदनक्लिष्टा इयं, पत्राणां शोषणेन मरुता स्पृष्टा लता माधवी इव, शोच्या च प्रियदर्शना च आलक्ष्यते। व्याख्या—अनुदिवसम् अङ्गैरियं परिहीयते इति 'आननम्' अस्या मुखं 'क्षामक्षामौ' ईषत्क्षामौ ["प्रकारे गुणवचनस्य" इति द्विर्वचनम्] 'कपोलौ' गण्डौ यस्मिन् तथाविधं जातम्। 'उरः' वक्षः 'काठिन्येन' दृढ़तया 'मुक्तौ' वियुक्तौ 'स्तनौ' यस्मिन् तथाविधं जातम्। 'मध्यः' उदरं 'क्लान्ततरः' अतिशयेन क्षीणो जातः [बुद्धिस्थां पूर्वावस्थामपेक्ष्य प्रकर्षविवक्षया तरप्]। 'अंसौ' स्कन्धौ 'प्रकामम्' अत्यर्थं 'विनतौ' विस्रस्तौ। 'छविः' मूर्त्तिः 'पाण्डुरा' पाण्डुवर्णा जाता। अतएव 'मदनेन' कामेन 'क्लिष्टा' पीड़िता 'इयं' शकुन्तला 'पत्राणां शोषणेन' शोषकारकेण 'मरुता' चैत्रवायुना 'स्पृष्टा' ताड़िता 'लता माधवी इव शोच्या' अनुकम्पनीया, अपि च लावण्यमयी छाया इमां न मुञ्चति इति 'प्रियदर्शना च' मधुराकृतिश्च 'आलक्ष्यते' आभाति। ["क्लिष्टा" (रा-, वि-, म-)—"म्लाना" (त-, न्या-)]।

NOTES

1. (a). क्षाम &c.—क्षै क्षये भ्वादि + क्त कर्त्तरि = क्षामः emaciated. क्षामप्रकारौ इति क्षामौ क्षामौ the duplication being due to the rule "प्रकारे गुणवचनस्य"। The duplicated form is treated as a कर्मधारय by the rule "कर्मधारयवदुत्तरेषु"। Hence the सुप् disappears giving finally क्षामक्षामौ। Now see Tika. (b). प्रियदर्शना—प्रीणातीति प्री + क कर्त्तरि = प्रियम् pleasing, lovely. प्रियं दर्शनं यस्याः whose appearance is pleasing. बहु— with कर्मणि षष्ठी in यस्याः।

2. *Reading*. मदनम्लाना has कर्त्तरि क्त in म्लान। Hence मदन is the हेतु in the वाक्य—मदनेन म्लाना। But मरुत् is the कर्त्ता in मरुता स्पृष्टा। This loss of uniformity is avoided by reading मदनक्लिष्टा because क्लिष्ट has कर्मणि क्त।

शकुन्तला—सहि, कस्स वा अस्सस्स कहइस्सं। किन्दु आआसइत्तिआ दाणिं वो भविस्सं [सखि, कस्य वा अन्यस्य कथयिष्यामि। किन्तु आयासयित्री इदानीं युवयोः भविष्यामि]।

SAKUNTALA—Friends, to whom else shall I reveal. But I shall now be the cause of trouble to you.

उभे—अदो एव्व णिव्वन्धो। सिणिद्धजनसंविभत्तं हि दुक्खं सज्झवेदनं होदि [अतएव निर्बन्धः। स्निग्धजनसंविभक्तं हि दुःखं सह्यवेदनं भवति]।

BOTH—Hence indeed is the pressing. Trouble, shared with affectionate friends, becomes of bearable poignancy.

सखीति। 'कस्य वा अन्यस्य' जनस्य [सम्बन्धविवक्षया षष्ठी] 'कथयिष्यामि'। युवयोरेव कथयिष्यामि नान्यस्य। 'किन्तु इदानीम्' अधुना, एतदुक्त्वा इत्यर्थः, 'युवयोः' [कर्मणि षष्ठी] 'आयासयित्री' क्लेशदायिनी 'भविष्यामि'। दुष्करो मे पीड़ोपशमः, तदर्थं प्रयतमानयोर्युवयोः महान् आयासो भविष्यति। ["किन्तु आयासयित्री" (त-, न्या-, म-)—"आयासयित्री" (रा-, वि-)]॥

अत इति। व्याधिर्महान्, उपशमो दुष्करः 'अतएव निर्बन्धः' आग्रहातिशयः अस्माकम्। 'दुःखं' पीड़ा 'स्निग्धेषु' स्नेहयुक्तेषु 'जनेषु संविभक्तं' कृतविभागं सत् 'सह्या' सोढुं शक्या 'वेदना' आघातो यस्य तथाविधं 'भवति हि'। ["अतएव" (त-, न्या-)—"अतएव खलु" (रा-, वि-, म-)]॥

NOTES

1. (a). आयासयित्री—आ+यस+णिच्+तृच् कर्त्तरि स्त्रियाम् one causing trouble. (b). इदानीम्—Now, *i. e.*, by revealing to you. (c). The sense is—I have no one else to confide in ; I must tell you. But (किन्तु) by telling you, I shall only put you into trouble. This is why I have not told you so long. I think the किन्तु should not be omitted.

2. (a). उभे—उभ is dual, but उभय is singular. as a rule, though plural is seen in "सुखपरस्य हरेरुभयैः कृतम्"—Act. VII. (b). स्निग्ध &c.— स्निह+क्त कर्त्तरि वर्त्तमाने=स्निग्धाः affectionate. तादृशाः जनाः। कर्मधा—। Now see Tika.

राजा—

पृष्टा जनेन समदुःखसुखेन बाला
नेयं न वक्ष्यति मनोगतमाधिहेतुम् ।
दृष्टो विवृत्य बहुशोऽप्यनया सतृष्णम्
अत्रान्तरे श्रवणकातरतां गतोऽस्मि ॥

KING—Asked by persons who equally share her sorrows and joys, this girl will not refuse to disclose the cause of her trouble which rankles in her mind. Though longingly gazed at several times by her by turning round, I have become afraid of hearing at this juncture.

शकुन्तला—सहि, जदो पहुदि मम दंसणपहं आअदो सो तवोवणरक्खिदा राएसी [सखि, यतः प्रभृति मम दर्शनपथमागतः स तपोवनरक्षिता राजर्षिः]। (अर्द्धोक्तेन लज्जां नाटयति)।

SAKUNTALA—From the time that royal sage, the protector of our hermitage, crossed my line of sight—(*Acts bashfulness when partly said*).

पृष्टेति। अन्वयः—इयं बाला समदुःखसुखेन जनेन पृष्टा (सती) मनोगतम् आधिहेतुं न वक्ष्यति न। अनया बहुशः विवृत्य सतृष्णं दृष्टोऽपि अत्रान्तरे श्रवणकातरतां गतोऽस्मि। व्याख्या—'इयं बाला' मुग्धस्वभावा शकुन्तला दुःखञ्च सुखञ्च दुःखसुखे दुःखसुखं वा ["विप्रतिषिद्धञ्चानधिकरणवाचि" इति विभाषा द्वन्द्वैकवद्भावः] 'समे समं' वा 'दुःखसुखे दुःखसुखं' वा यस्य तेन 'समदुःखसुखेन' तुल्यवेदनेन 'जनेन' सखीजनेन 'पृष्टा' सती 'मनोगतम्' आन्तरं निगूहितमित्यर्थः 'आधेः' पीडाया 'हेतुं' कारणं 'न वक्ष्यति न' वक्ष्यत्येव। 'अनया' शकुन्तलया 'बहुशः' न तु एकवारमात्रं, द्विवां 'विवृत्य' परावृत्य 'सतृष्णं' साभिलाषं 'दृष्टोऽपि' [अपिना भावस्य स्फुटत्वम् सन्देहस्थानवकाशश्च]। 'अत्र' अस्मिन् 'अन्तरे' अवकाशे 'श्रवणे' उत्तरश्रवणे 'कातरतां' भयं 'गतोऽस्मि'। स्पष्टमियं मयि साभिलाषा, तथापि

अयकारणे भीतोऽस्मि किमियं वदेदिति। ["अन्तान्तरे" (रा-, वि-, म-)—"अन्तोत्तर" (त-, न्या-)]॥

सखीति। 'यतः' यस्मात् कालात् 'प्रभृति' आरभ्य [प्रभृतियोगे पञ्चमीनियमात् पञ्चमी] 'स तपोवनस्य रक्षिता' रक्षकः 'राजर्षिः' दुष्यन्तः 'मम दर्शनस्य' दृष्टेः 'पन्थानम्' ["ऋक्पूरब्धूःपथामानक्षे" इति समासान्तः अप्रत्ययः] 'आगतः' प्राप्तः—('अर्द्धेन उक्तेन' आंशिकेन भाषणेन 'लज्जां नाटयति' रूपयति)।

NOTES

1. (a). जनेन समदुःखसुखेन—*c. f.* समदुःखसुख. सखीजनः—*Raghu*, VIII. (b). बाला—A प्रौढा might mislead. But only a **frank** disclosure is expected from a बाला। (c). न, न—Two negatives emphasise the affirmation. न वक्ष्यति न not that she will not disclose—she will *certainly* disclose. (d). मनोगतम्—मनः गतम्, *i. e.*, मनसि लीनम् secretly cherished, un-revealed. (e). इत्थं &c.—Comp. आसीद् विहसवदना &c. Act. II.

2. (a). दर्शन &c.—पश्यत्यनेन इति दृश+ल्युट् करणे=दर्शनम् eye. तस्य पन्थाः &c. See Tika. (b). तपोवन &c.—रक्ष+तृच् कर्त्तरि=रक्षिता।

3. अर्द्धोक्तेन—अर्द्धम् उक्तम् अर्द्धोक्तम् partly uttered. सुप्सुपेति समासः the द्वितीया in अर्द्धम् being क्रियाविशेषणे। तेन। कृता तृतीया।

उभे—कधेदु कधेदु पिअसही [कथयतु कथयतु प्रियसखी]।

BOTH—Go on, go on, dear friend.

शकुन्तला—तदो पहुदि तग्गदेण अहिलासेण एतदवत्थम्हि संवुत्ता [ततः प्रभृति तद्गतेन अभिलाषेण एतदवस्थास्मि संवृत्ता]।

SAKUNTALA—Since that time with my desire fixed upon him, I am reduced to this state.

राजा (सहर्षम्)—श्रुतं यत् श्रोतव्यम्।

स्मर एव तापहेतुर्निर्वापयिता स एव मे जातः।
दिवस इवाभ्रश्यामस्तपात्यये जीवलोकस्य॥

KING (*Joyfully*)—What is worth hearing is now heard. Cupid indeed is the cause of my distress, he himself has become my comforter, as becomes the day dark with clouds at the end of summer, to the living world.

तत इति। 'ततः प्रभृति' आरभ्य 'तं' राजर्षिं 'गतेन' तद्विषयेन 'अभिलाषेण' मनोरथेन [हेतौ तृतीया] 'एषा अवस्था' यस्याः तथाविधा 'संवृत्तास्मि' जातास्मि। मनो मे दुष्यन्तेन समागमं प्रार्थयते, तेनेयमवस्था मे। [राघवो विद्यासागरपादाश्च "कथयतु कथयतु प्रियसखी" इति न पठन्ति]॥

श्रुतमिति। 'श्रोतव्यं' श्रवणयोग्यं 'यत्' तत् 'श्रुतम्'।

स्मर इति अन्वयः—तपात्यये जीवलोकस्य अभ्रश्यामो दिवस इव मे स्मर एव तापहेतुः स एव निर्वापयिता जातः। व्याख्या—'तपस्य' निदाघस्य ["निदाघ उष्णोपगम उष्ण ऊष्मागमस्तपः" इत्यमरः] 'अत्ययः' अवसानं, तस्मिन् 'जीवलोकस्य' प्राणिसमूहस्य सम्बन्धे 'अभ्रैः' मेघैः 'श्यामः' कृष्णः 'दिवस इव' मेघाच्छन्नो वासर इव 'मे' मम सम्बन्धे 'स्मरः' कन्दर्प 'एव तापहेतुः' दिवसपक्षे उष्णताजनकः, स्मरपक्षे सन्तापकरः 'स एव' दिवस एव, स्मर एव च, 'निर्वापयिता' विनोदहेतुः [उभयत्र समानमेतत्] 'जातः'। मेघाच्छन्नो दिवसः वर्षणात् पूर्वं तापं करोति पश्चाच्च हरति। कामोऽपि शकुन्तलाया वचनात् पूर्वं मे तापप्रद आसीत्, परञ्च तापहरो जातः इति भाव ["अभ्रश्यामः" (त-, न्या-, म-)—"अर्द्धश्यामः" (रा-, वि-)]॥

NOTES

1. (**a**). निर्वापयिता—निर्+वा+णिच्+तृच् कर्त्तरि the comforter. See under शरीरनिर्वापनाय—*Ante*. (**b**). तपात्यये—अति+इ+अच् भावे=अत्ययः end. Now see Tika. (**c**). जीवलोकस्य, मे—जीवानां प्राणिनां लोको भुवनं जीवलोकः the world of living creatures. तस्य शेषे षष्ठी। मे मम सम्बन्धे also जीवलोकस्य सम्बन्धे तापहेतुः and निर्वापयिता। Also we may have कृद्योगे कर्मणि षष्ठी। मे or जीवलोकस्य तापः=माम् or जीवलोकं तपति। मे or जीवलोकस्य निर्वापयिता=माम् or जीवलोकं निर्वापयति।

2. *Simile.* The following are compared—(i) स्मरः and अभ्रश्यामो दिवसः। (ii) अहम् and जीवलोकः। Also *remotely* (iii) मतान्तरे

and तपात्यये। Heat during summer oppresses like love-sickness (*c. f.* समस्तापः कामं मनसिजनिदाघप्रसरयोः—*Ante*). The oppression is very great (तापहेतु) when at last the sky is overcast (अभ्रश्याम), and the clouds are about the pour. Similarly the suspense of the king was intense when Sakuntala was about to make a declaration. The shower brings relief to the world and the declaration comforts the king. Thus स्मर behaves like the अभ्रश्याम day.

4. *Reading.* Raghava reads अर्द्धश्याम। He means the day is oppressive in the morning hours (अर्द्ध), and cool when it is श्याम in the evening (the other अर्द्ध)। We have to guess the reason for the श्यामता। I believe many will prefer to have the clouds (अभ्र) directly mentioned. Besides अर्द्धश्याम ignores the well-known fact that just as the clouds gather the heat increases, and does not abate unless there is a down-pour. Lastly we have a similar idea in Raghu XII, where श्यामाभ्रा दिवसा इव occurs. This leaves little doubt that here the poet wrote अभ्रश्याम।

शकुन्तला—तं जइ वो अणुमदं तह वट्टह जह तस्स राएसिणो अणुकम्पणिज्जा होमि। अस्सहा अवस्सं सिञ्चह मे तिलोदअं [तत् यदि युवयोः अनुमतं, तथा वर्त्तेथां यथा तस्य राजर्षेः अनुकम्पनीया भवामि। अन्यथा अवश्यं सिञ्चतं मे तिलोदकम्]।

SAKUNTALA—Now if approved by you, so arrange that I may become favoured by that royal sage. Or certainly sprinkle for me water with sesamum seeds.

राजा—संशयच्छेदि वचनम्।

KING—The declaration cuts short all hesitation.

प्रियंवदा (जनान्तिकम्)—अणसूए, दूरगअवम्महा अक्खमा इअं कालहरणस्स। जस्सिं बद्धभावा एसा सो ललामभूदो पोरवाणं। ता जुत्तं से अहिलासो अहिणन्दिदुं [अनसूये,

दूरगतमन्मथा अक्षमा इमं कालहरणस्य। यस्मिन् बद्धभावा एषा, स ललामभूतः पौरवाणाम्। तत् युक्तमस्या अभिलाषः अभिनन्दितुम्]।

PRIYAMVADA (*Aside*)—O Anasuya, with her love far advanced, this one is incapable of taking time. He, on whom her affection is placed, is the very gem of the Pauravas. So her desire deserves to be approved.

तदिति। 'तत्' तस्मात् 'यदि युवयोरनुमतं' यदि युवां युक्तं मन्येथे ["मतिबुद्धिपूजार्थेभ्यश्च" इति वर्त्तमाने क्तः। "क्तस्य च वर्तमाने" इति कर्त्तरि षष्ठी] तदा 'तथा' तेन प्रकारेण 'वर्त्तेथां' आचरतं 'यथा' येन प्रकारेण 'तस्य राजर्षेरनुकम्पनीया' अनुग्राह्या 'भवामि'। 'अन्यथा' अनुग्रहाभावे 'अवश्यं मे तिलोदकं' प्रेतदेयं तिलमिश्रं जलाञ्जलिं 'सिञ्चतम्'। निश्चितं मरिष्यामि यदि स राजा मां नानुकम्पते इत्यर्थः।

संशयेति। 'वचनं' शकुन्तलोक्तं, 'संशयं' एतत् कर्त्तव्यम्, एतत् वा, इत्याकारं संभ्रमं 'छिनत्ति'। एतत् श्रुत्वा सखीभ्यां कर्त्तव्यम् अवधारितमेव स्यात्।

अनसूये इति। 'दूरं गतः' प्राप्तो 'मन्मथः' कामो यस्याः तथाविधा 'इयं कालहरणस्य अक्षमा' अयोग्या। झटिति प्रतिविधेयम्। किं कामस्य उत्कर्षेऽस्य प्रतिविधानम्? न इत्याह—'एषा यस्मिन्' जने 'बद्धभावा' दत्तचित्ता 'स पौरवाणां ललामभूतः' भूषणस्वरूपः। 'तत्' तस्मात् 'अस्या अभिलाषः अभिनन्दितुं' पूरयितुं 'युक्तम्' [सामान्योपक्रमात् लिङ्गभेदेऽपि सामानाधिकरण्यम्। "शक्यं पवनः" इति यथा]। सत्पात्रे अस्या अभिलाषः स्तुत्यः न गर्ह्यः इत्यर्थः।

NOTES

1. (a). राजर्षेः—The तृतीया is also admissible. राजर्षेः राजर्षिणा वा अनुकम्पनीया by the rule "कृत्यानां कर्त्तरि वा"। (b). अन्यथा—अन्य+थाल्। अन्यप्रकारेण otherwise, *i. e.*, if not pitied by the royal sage; or, if not so arranged by you. (न चेत् तथा वर्त्तेथां तिलोदकं सिञ्चतम्)। (c). तिलोदकम्—तिलमिश्रम् उदकम्। शाकपार्थिवादि। तत्। तिलश्च उदकञ्च gives तिलोदके (unless उदक is taken as जातिवाचक)

and is therefore avoided. This is an offering to deceased persons. Hence the sense is—Otherwise I shall die.

2. संशय &c.—संशयं छिनत्ति इति संशय + छिद् + णिनि साधुकारिणि कर्त्तरि that which removes doubt. The doubt (संशय) does not refer to the king's doubt about her love ; but to the friends' doubt as to what has to be done. The king has no doubts, as is obvious from दृष्टा जनेन &c. and श्रुत यत् श्रोतव्यम्—*Ante.*

3. (a). अक्षमा—क्षमते इति क्षम + अच् कर्त्तरि स्त्रियाम् = क्षमा capable. न क्षमा। Something has to be done quick. (b). बहुभावा—भवतीति भू + ण कर्त्तरि = भावः desire. बहुो भावो यस्या यया वा। (c). ललामभूतः—See आश्रमललामभूताम्—Act. II.

अनसूया—तह जह भणासि [तथा यथा भणसि]।

ANASUYA—It is as you say.

प्रियंवदा (प्रकाशम्)—सहि, दिट्ठिआ अणुरूवो दे अहिणिवेसो। साअरं उज्झिअ कहिं वा महाणई ओदरइ। को दाणिं सहआरं अन्तरेण अदिमुत्तलदं पल्लविदं सहेदि [सखि, दिष्ट्या अनुरूपस्ते अभिनिवेशः। सागरं वर्जयित्वा कुत्र वा महानद्यः अवतरति। क इदानीं सहकारमन्तरेण अतिमुक्तलतां पल्लवितां सहते]।

PRIYAMVADA *(Aloud)*—Friend, fortunately your aim is worthy of you. Where indeed does a mighty river fall avoiding the sea ? Now, which tree except the *Sahakara* bears the *Atimukta* creeper in foliage ?

तथेति। 'यथा भणसि' कथयसि 'तथा'। अस्या अभिलाषः अभिनन्दनीयः इत्यर्थः।

सखीति। 'दिष्ट्या' भाग्येन 'ते अभिनिवेशः' अयमध्यवसायः 'अनुरूपः' सर्वथा ते योग्यः। सौभाग्यं नो यत् त्वं प्राकृते जने न दत्तचित्ता। अथवा एवमेव भवितव्यम्। 'सागरं वर्जयित्वा' त्यक्त्वा 'कुत्र वा' न कुत्रापि 'महानदी अवतरति'।

सागर एव महानद्या अनुरूपम् अवतरणस्थानम् दुष्यन्तोऽपि ते योग्यो वरः। 'सहकारं' रसालम् 'अन्तरेण' विना 'क इदानीं पल्लवितामतिमुक्तलतां' माधवीलतां 'सहते' नान्यः कोऽपि। एवं दुष्यन्तं विना नान्यः कोऽपि त्वां वोढ़मर्हः। एतत् शकुन्तलां प्रति। ["अनुरूपस्ते" (रा-, वि-)—"अनुरूपोऽस्याः" (म-)—"ते अनुरूपे" (त-, न्या-) ॥ "वर्जयित्वा" (रा-, वि-, म-)—"उज्झित्वा" (त-, न्या-)] ॥

NOTES

1. (a). दिष्ट्या—Luckily. An अव्यय। Or instrumental singular of दिष्टि which means भाग्य। इतौ तृतीया। (b). अनुरूप:—अनुगतो रूपम् befitting. प्रादितत्— । (c). अभिनिवेश:—अभि+नि+विश+घञ् भावे। आग्रहः। Or अभिनिविशते एतम् इति घञ् कर्मणि the object of desire. The आधार has become कर्म here by the rule "अभिनिविशश्च"। Here Priyamvada attributes it to chance (दिष्ट्या) that Sakuntala has not set her heart upon an ordinary ascetic. (d). वा—Expresses विकल्प। (e). सागरम् &c.—This modifies the sentiment expressed in the preceding line. No, chance has nothing to do with it. It is in the very nature of things impossible that Sakuntala should be attracted towards any *other* person. She was bound to be drawn towards दुष्यन्त just as a mighty river is drawn towards the sea. (f). इदानीम्—This is idiomatic वाक्यालङ्कारे। See क इदानीम् &c.—*Infra.*

2. *Reading.* Monier-Williams reads अनुरूपोऽस्याः for अनुरूपस्ते। But the stage-direction प्रकाशम् shows that the speech is intended for Sakuntala. Hence ते is the word, not अस्याः। We cannot say that प्रकाशम् means only that the speech is within Sakuntala's hearing not *necessarily* addressed to her. For, coming immediately after "तथा यथा भणसि" it is evidently the अभिनन्दन of Sakuntala's desire as suggested by प्रियंवदा (युक्तमस्या अभिलाषोऽभिनन्दितुम्—*Ante.*) Hence it has to be addressed to Sakuntala.

राजा—किमत्र चित्रं यदि विशाखे शशाङ्कलेखामनुवर्त्तेते।

KING—What is strange in it if the twin stars Vishakha follow the lunar digit?

अनसूया—को उण उबाओ भवे जेण अविलम्बिअं णिहुअं अ सहीए मणोरहं सम्पादेम्ह [कः पुनरुपायो भवेत् येन अविलम्बितं निभृतञ्च सख्या मनोरथं सम्पादयावः]।

ANASUYA—What can be the means by which we shall fulfil our friend's wish quickly and secretly.

प्रियंवदा—णिहुअंत्ति चिन्तणिज्जं भवे सिग्घंत्ति सुअरं [निभृतमिति चिन्तनीयं भवेत् शीघ्रमिति सुकरम्]।

PRIYAMVADA—The "secretly" may require thought, the "quickly" is easily done.

अनसूया—कहं विअ [कथमिव]।

ANASUYA—How so?

प्रियंवदा—णं सो राएसी इमस्सिं सिणिद्धदिट्ठीए सूइआहिलासो इमाइं दिअहाइं पजाअरकिसो लक्खीअदि [ननु स राजर्षिरस्यां स्निग्धदृष्ट्या सूचिताभिलाष इमान् दिवसान् प्रजागरकृशो लक्ष्यते]।

PRIYAMVADA—That royal sage, with his longing for this friend of ours betrayed, these days, by affectionate looks, appears emaciated through wakefulness.

किमत्रेति। 'विशाखे' तदाख्ये तारके 'शशाङ्कलेखां' चन्द्रकलाम् 'अनुवर्तेते' अनुसरतः इति 'यदि, अत्र चित्रम्' आश्चर्यं 'किं' न किञ्चित्। विशाखयोः चन्द्रलेखाया अनुसरणं नैसर्गिकमेव तत्र न किञ्चिदाश्चर्यम्। एवम् अनसूयाप्रियंवदयोरपि शकुन्तलाया अनुवर्त्तनं स्वाभाविकम्।

क इति। सत्यम् अनुरूपः अस्या अभिलाषः किन्तु 'कः पुनः उपायो भवेत् येन' उपायेन 'अविलम्बितं' झटिति, 'निभृतं' गुह्यं 'च सख्या मनोरथं सम्पादयावः' दुष्यन्तेन समागमं विधास्यावः?

निभृतमिति। 'निभृतं' सम्पादयावः 'इति' यत् त्वया उक्तं तत् 'चिन्तनीयं

भवेत्' चिन्तायोग्यं भवितुमर्हति 'शीघ्रं' सम्पादयाव: 'इति' यदुक्तं तत् 'सुकरं' सुखसाध्यम्। दुष्यन्तेन समागम: शीघ्रं कर्त्तुं शक्यते किन्तु निभृतं कथं स्यात् तत् चिन्त्यताम्।

नन्विति। 'ननु स राजर्षि: इमान् दिवसान्' ["अत्यन्तसंयोगे द्वितीया"] 'स्निग्धदृष्ट्या' सस्नेहावलोकनेन 'अस्यां' शकुन्तलायां 'सूचित: अभिलाषो' येन तादृश: सन् 'प्रजागरात्' शकुन्तलागतचिन्तया रात्रिजागरणात् 'क्रश:' चीण: 'लक्ष्यते'। राजापि उत्सुक एव, तत् शीघ्रं कर्त्तुं शक्यम्, निभृतं कथं भवेत् चिन्तय।

NOTES

1. (**a**). विशाखे—Dual because the reference is to two stars. (**b**). शशाङ्क &c.—लेखा is added to have the whole a *feminine* so as to agree with Sakuntala in gender. शशाङ्कमनुवर्त्तते does not serve the purpose so well.

2. (**a**). अविलम्बितम्—वि + लम्ब + क्त भावे = विलम्बितम् delay विलम्ब:। अविद्यमानं विलम्बितं यस्मिन् कर्मणि तत् यथा तथा। (**b**). निभृतम्—नितरां भृतम् इति नि + भृ + क्त कर्मणि। *Well-kept* as a secret. तत् यथा तथा। (**c**). सम्पादयाव:—"वर्त्तमानसामीप्ये वर्त्तमानवद्वा" इति लट्।

3. (**a**). भवेत्—सम्भावनायां लिङ्। (**b**). सुकरम—सुखेन क्रियते इति सु + कृ + खल् कर्मणि।

4. कथमिव—इव here has no special meaning. It is idiomatic (वाक्यालङ्कारे)।

5. (**a**). ननु—Implies आक्षेप censure. You ask "How so." What an idiot you are. Don't you see that the king loves Sakuntala? This is the censure intended. (**b**). स्निग्धदृष्ट्या—स्निह + क्त कर्त्तरि = स्निग्धा affectionate. तादृशी दृष्टि:। तया। तृतीया करणे। (**c**). प्रजागर &c.—प्रकृष्टं जागरणम् इति प्र + जागृ + घञ् भावे = प्रजागर: wakefulness निद्राक्षय:। Now see Tika. We do not get प्रजागार with वृद्धि because the rule "जाग्रोऽविचिण्णल्ङित्सु" directs गुण with all affixes except वि, चिण, णल् and those that drop ङ।

राजा—सत्यमित्थम्भूत एवास्मि। तथाहि—

इदमशिशिरैरन्तस्तापाद्विवर्णमणीकृतं
निशि निशि भुजन्यस्तापाङ्गप्रवर्त्तिभिरश्रुभि:।

अनभिलुलितज्याघाताङ्कं मुहुर्मणिबन्धनात्
कनकवलयं स्रस्तं स्रस्तं मया प्रतिसार्यते ॥

KING—Indeed, I have really become so. For, this golden bracelet—with the jewels rendered pale by tears that are hot through internal heat, and flow night after night from the corner of my eye placed on my arm (palm)—as it slips and slips down from the wrist, is repeatedly moved back by me without pressing against the scars of the bow-string.

सत्यमिति। 'इत्थम्भूतः' कृशः इत्यर्थः। अन्वयः—निशि निशि भुजन्यस्तापाङ्गप्रवर्त्तिभिः अन्तस्तापादशिशिरैः अश्रुभिः विवर्णमणीकृतं मणिबन्धनात् स्रस्तं स्रस्तम् इदं कनकवलयं मया अनभिलुलितज्याघाताङ्कं मुहुः प्रतिसार्य्यते। व्याख्या—'निशि निशि' रात्रौ रात्रौ ["नित्यवीप्सयोः" इति वीप्सायां द्विर्वचनम्] 'भुजे' हस्ते, वामहस्ते इति यावत् [अत्र भुजशब्दो बाहुवचनो बाह्वेरेकदेशे हस्ते वर्त्तते]. 'न्यस्तः' स्थापितः यः 'अपाङ्गः' वामनयनकोणः, तस्मात् प्रवर्त्तन्ते यानि तैः, 'अन्तस्तापात्' मनसिजकृतात् मनस्तापात् [हेतौ पञ्चमी] 'अशिशिरैः' उष्णैः 'अश्रुभिः' विवर्णौ मणयो यस्मिन् तत् 'विवर्णमणि' आविलतरतम्। अतथा तथा सम्पद्यमानं कृतं 'विवर्णमणीकृतम्' [अभूततद्भावे च्विः] 'मणिबन्धनात्' करप्रकोष्ठयोः सन्धिस्थानात् 'स्रस्तं स्रस्तं' पुनः पुनरधःस्खलितम् [पूर्वपरस्रंसनयोर्भेदमवलम्ब्य अत्रापि वीप्सा सिध्यति। ततो द्विर्भावः] 'इदं' वामहस्तस्थितं 'कनकवलयं' सुवर्णकङ्कणं 'मया अनभिलुलितः' अमर्द्दितः 'ज्याघातस्य' धनुर्गुणघर्षणस्य 'अङ्कः' चिह्नं यस्मिन् कर्मणि तत् यथा तथा 'मुहुः' वारं वारं 'प्रतिसार्य्यते' उद्धृत्य मणिबन्धं पुनर्नीयते। अत्र—चिन्तया शय्यात्यागः—उपविश्य वामहस्तन्यस्तकपोलेन निशामयनम्—तेन ऊर्द्ध्वं मणिबन्धः कूर्परस्य अधः—ततस्तापोष्णस्य नेत्रजलस्य वलयप्राप्तिः, तेन च मणिदूषणम्—दिने दिने प्रकोष्ठस्य कृशता—मणिबन्धात् कूर्परे वलयसंश्रंशः—कूर्परात् वलयस्य भूयो मणिबन्धनयनम्—तत्काले वलयेन प्रकोष्ठस्थितानां मौर्वीकिणानाम् असंस्पर्शः—इत्येतत् सर्वं यथाक्रमं संस्मृत्य उक्तं "सत्यमित्थम्भूत एवास्मि"। ["प्रव-

र्त्तिभिः" (त-, न्या-, म-)—"प्रसारिभिः" (रा-, वि-)॥ "अनभिलुलित" (रा-, वि-)—"अनतिलुलित" (त-, न्या-, म-)]॥

NOTES

1. (**a**). अन्तस्तापात्—अन्तर्गतस्तापः अन्तस्तापः internal heat. शाकपार्थिवादि। तस्मात्। (**b**). भुजन्यस्त &c.—Here भुजन्यस्त means हस्तन्यस्त। Compare "हस्तन्यस्तं मुखमसकलव्यक्ति" &c.—Meghaduta. हस्त again refers to वामहस्त the *left* hand. Compare "वामहस्तोपहितवदना आलिखिता इव प्रियसखी भर्त्तृगतया चिन्तया"—Act IV. Similarly अपाङ्ग is वामापाङ्ग। भुजे न्यस्तःplaced on the left hand. सुप्सुपेति समासः। भुजन्यस्तः अपाङ्गःthe outer corner of the left eye placed on the left hand. कर्मधा—। तस्मात् प्रवर्त्तन्ते इति भुजन्यस्तापाङ्ग+प्र+वृत+णिच् साधुकारिणि कर्त्तरि=भुजन्यस्तापाङ्गप्रवर्त्तीनि। तैः। (**c**). अनभिलुलित &c.—The friction of the bow-string causes abrasions on the fore-arm. Compare "शरासनज्याकिणलाञ्छनो भुजः", "शास्यसि कियद्भुजो मे रक्षति मौर्वीकिणाङ्क इति", &c. (**d**). मणिबन्धनात्—मणिर्बध्यते अस्मिन् इति मणि+बन्ध+ल्युट् अधिकरणे=मणिबन्धनः *Lit.* The place where a gem is worn, *i. e.*, the wrist. तस्मात्। (**e**). स्रस्तं स्रस्तम्—The वीप्सा gives the sense "*each* time it has slipped." The bracelet slips down to the *elbow* owing to the emaciation of the fore-arm. Compare कनकवलयभ्रंशरिक्तप्रकोष्ठः which implies that the bracelet has slipped and left the fore-arm altogether.

2. *Remark.* Raghava explains "भुजे उपधानीकृते न्यस्तो योऽयमपाङ्गः" &c. Again "अत्र प्रजागरात् शय्यायां परिवृत्तिविवर्त्तनैः सत्यपि उपधाने तस्य निष्फलत्वात् भुजोपधानत्वमुक्तम्"। Against this we remark that if the arm is used as a pillow it must be the *upper* arm. In that case the tears will be stopped by the अङ्गद and will not reach the वलय। Besides the मणिबन्ध will be *lower* than the elbow and the वलय will have to slip towards the tips of the fingers, which is not possible, be the emaciation ever so great. With this sort of slipping, it is out of place to say that the प्रकोष्ठ (fore-arm) has become रिक्त *because of it* (as the poet has it in the parallel passage quoted above) and that in trying to push the वलय back the ज्याघाताङ्क is not touched. Indeed अनभिलुलितज्याघाताङ्क requires

that the वलय be moved over the fore-arm (on which alone the ज्याघाताङ्क exists) in replacing it. This is possible only if we suppose (as I have explained in the Tika) that the king passed the night in a sitting posture with his left cheek placed on his left palm and the left elbow resting on the left thigh.

प्रियंवदा (विचिन्त्य)—हला मअणलेहो से करीअदु। इमं देवसेसावदेसेण सुमणोगोविदं करिअ से हत्थअं पावयिस्सम् [हला मदनलेखः अस्मै क्रियताम्। इमं देवशेषापदेशेन सुमनोगोपितं कृत्वा अस्य हस्तं प्रापयिष्यामि]।

PRIYAMVADA (*Reflecting*)—Well, let a love-letter be prepared for him. I will have it concealed by flowers, and under the pretext of a garland that has been offered to the gods, will cause it to reach his hands.

अनसूया—रोअइ मे सुउमारो पओओ। किं वा सउन्दला भणादि [रोचते मे सुकुमारः प्रयोगः। किं वा शकुन्तला भणति]।

ANASUYA—I like this delicate measure. But what does Sakuntala say ?

प्रियंवदेति। 'विचिन्त्य' ध्यात्वा कार्य्यं निश्चित्य इत्यर्थः।

हलेति। 'अस्मै' दुष्यन्ताय ["कर्मणा यमभिप्रैति स सम्प्रदानम्" इति सम्प्रदाने चतुर्थी] 'मदनस्य लेखः' लिपिः कन्दर्पपीड़ासूचिका लिपिः 'क्रियताम्'। 'इमं' मदनलेखं 'देवस्य' देवताविशेषस्य 'शेषा' माल्यं 'देवशेषा' निर्माल्यमिति यावत्। सा एव 'अपदेशः' छलम्। तेन। 'सुमनोभिः' पुष्पैः [सुमनस्शब्दः स्त्रियां बहुत्वे वर्त्तते। "आपः सुमनसो वर्षा अप्सरःसिकताः समाः। एते स्त्रियां बहुत्वे स्युरेकत्वेऽप्युत्तरत्रयम्॥"] 'गोपितं' निगूहितं 'कृत्वा अस्य हस्तं' प्रापयिष्यामि'। ["शेषा" (रा-, वि-, म-)—"सेवा" (ट-, न्या-)]॥

रोचते इति। 'सुकुमारः' सुन्दर एष 'प्रयोगः' उपायः 'मे' मह्यम् ["रुच्यर्थानां प्रीयमाणः" इति सम्प्रदाने चतुर्थी] 'रोचते'।

NOTES

I. (a). देवशेषा &c.—For शेषा in the sense of माल्य compare "तथेति शेषामिव भर्तुराज्ञामादाय मूर्ध्ना मदनः प्रतस्थे"—*Kumara.* (b). देव-सेवा means देवस्य राज्ञः सेवा पुष्पोपहारः। I prefer the reading देवशेषा।

शकुन्तला—को णिओओ विकप्पीअदि [को नियोगो विकल्प्यते]।

SAKUNTALA—What injunction is altered ?

प्रियंवदा—तेण हि अत्तणो उवणासपुव्वं चिन्तेहि दाव किम्पि ललिअपदबन्धणं [तेन हि आत्मन उपन्यासपूर्वं चिन्तय तावत् किमपि ललितपदबन्धनम्]।

PRIYAMVADA—Then think of some fine metrical composition with an allusion to thyself.

शकुन्तला—हला चिन्तेमि अहं। अवहीरणाभीरुअं पुणो वेवइ मे हिअअं [हला चिन्तयाम्यहम्। अवधीरणाभीरुकं पुनर्वेपते मे हृदयम्]।

SAKUNTALA—I am thinking, dear. But, apprehensive of slight, my heart trembles.

क इति। युवयोः 'कः नियोगः' आदेशः 'विकल्प्यते' अन्यथाक्रियते मया। युवां यदा यत् ब्रूथः तदेवाहं तदा करोमि। मदनलेखमेव अधुना करिष्ये इत्यभिप्रायः।

तेनेति। 'तेन हि' यदि नैव विकल्प्यते तर्हि 'आत्मनः' स्वस्य उपन्यसनम् 'उपन्यासः' उपस्थापनम् तत्-'पूर्वकं किमपि ललितं' मधुरं 'पदबन्धनं' छन्दोरचनं 'तावत् चिन्तय'। आत्मानम् उपस्थाप्य छन्दोमयीं गीतिं रचय इत्यर्थः।

हलेति। 'अहं चिन्तयामि, हृदयं पुनः' चेतस्तु 'अवधीरणा' अवज्ञा [अवधीर इति केषाञ्चिन्मते चुरादौ पठ्यते। ततो युच्] 'ततो भीरुकं' भीतं सत् 'वेपते' कम्पते ["अवधीरणा" (त-, वि-, न्या-)—"अवधीरण" (रा-, म-) ॥

NOTES

I. विकल्प्यते—विकल्पन is विषमकल्पन or विभिन्नकल्पन, &c. Compare विकल्पित in "परिहासविकल्पितं सखे"—Act. II (*Readings*).

2. (a). उपन्यास &c.—उप + नि + अस + घञ् भावे = उपन्यास: placing near, *i. e.*, alluding. स पूर्वो यस्मिन् तत् यथा तथा। (b). ललित &c.—पदानां गीतिपादानां बन्धनं रचनम्। Next कर्मधा—।

3. अवधीरणा has to be preferred because the verse below has अवधीरणा।

राजा—

अयं स ते तिष्ठति सङ्गमोत्सुको
विशङ्कसे भीरु यतोऽवधीरणाम्।
लभेत वा प्रार्थयिता न वा श्रियं
श्रिया दुरापः कथमीप्सितो भवेत्॥

KING—Here, longing for union with you, O timid one, stands he from whom you apprehend slight. The suitor may or may not attain Lakshmi ; how to Lakshmi can the wished for be inaccessible ?

सख्यौ—अयि अत्तगुणावमाणिणि, को दाणिं सरीरणिव्वावयित्तिअं सारदिअं जोसिणिं पडन्तेण वारेदि [अयि आत्मगुणावमानिनि, क इदानीं शरीरनिर्वापयित्रीं शारदीं ज्योत्स्नां पटान्तेन वारयति]।

FRIENDS—O Slighter-of-thy-merits, who ever keeps off with the skirt of his garment the autumnal moon-light that refreshes the body ?

शकुन्तला (सस्मितम्)—णिओइदा दाणिं म्हि [नियोजिता इदानीमस्मि]। (उपविष्टा चिन्तयति)।

SAKUNTALA—(*Smiling*)—Here, I am now engaged. (*Sits up and meditates*):

अयमिति। अन्वयः—हे भीरु यतः अवधीरणां विशङ्कसे, सः अयं ते सङ्गमोत्सुकः तिष्ठति। प्रार्थयिता श्रियं लभेत वा न वा। ईप्सितः श्रियाः दुरापः कथं

भवेत्। व्याख्या—हे 'भीरु' भयशीले शकुन्तले ["ऊङ् उतः" इत्यूङ्। संबुद्धि- ह्रस्वः] 'यतो' यस्मात् जनात् 'अवधीरणाम्' अवज्ञां 'विशङ्कसे सः अयं' मल्लक्षणो जनः 'ते' तव 'सङ्गमे' समागमे 'उत्सुक' उत्कण्ठः 'तिष्ठति'। 'प्रार्थयिता' अर्थी जनः 'श्रियं' लक्ष्मीं 'लभेत वा न वा' प्राप्नुयात् नापि वा पाप्नुयात् [शकि लिङ्]। 'ईप्सितः प्राप्तुमिष्टो जनः 'श्रियाः' लक्ष्म्याः सम्बन्धे। [यद्वा—'श्रिया' अनुक्ते कर्त्तरि तृतीया। "न लोक—" इति कर्तृषष्ठ्या निषेधः] 'दुरापः' दुष्प्रापः कृच्छ्रलभ्यः [कर्मणि खल्] 'कथं भवेत्' न कथमपि। लक्ष्मीश्चेत् प्रोता तदा एव लक्ष्मीलाभो भवति। एवं त्वया समागमः तवैव अनुग्रहः, समागतप्रार्थिनीं कस्मामवजानात् इति भावः।

अयीति। 'आत्मनो गुणान् अवमानयति' अवजानाति या तत्संबुद्धिः। 'शरीरस्य निर्वापयित्रीं' प्रीतिप्रदां 'शारदीं' शरत्कालसम्बन्धिनीं प्रौढ़ां 'ज्योत्स्नां' चन्द्रिकां 'क इदानीं पटान्तेन' वसनाञ्चलेन 'वारयति'। न कोऽपि। स राजा कथमपि त्वां नाव- धीरयेत् इत्यर्थः। इदानीमिति वाक्यालङ्कारे। ["इदानीं वाक्यभूषायां सम्प्रत्यर्थे च दृश्यते" इति मेदिनी]। ["पटान्तेन" (रा-, वि-, म-)—"आतपत्रेण" (त-, न्या-)]॥

नियोजितेति। 'इदानीं नियोजिता' गीतरचने व्यापारिता 'अस्मि'।

NOTES

1. (a). सङ्गमोत्सुकः—सङ्गमेन उत्सुकः or सङ्गमे उत्सुकः anxious for union. सहसुपेति समासः। (b). यतः—From whom. पञ्चम्यास्तस्। "ध्रुवमपा- येऽपादानम्" इत्यपादाने पञ्चमी। Some word or gesture indicating *slight* (अवधीरणा) is supposed to reach शकुन्तला *from* दुष्यन्त। Hence there is अपाय and दुष्यन्त is ध्रुव। So the sutra applies. We must not say विशङ्कसे इति भयार्थयोगात् भयहेतौ अपादाने पञ्चमी, because even when विशङ्कसे is absent we have पञ्चमी in दुष्यन्तात् अवधीरणा।

2. (a). श्रियाः—शेषे षष्ठी as in ते in "समदेशवर्तिनस्ते न दुरासदो भविष्यति"—Act I, *Ante.*

3. (a). आत्मगुण &c.—आत्मनो गुणाः आत्मगुणाः own merits. षष्ठी- तत्—। तान् अवमानयति इति आत्मगुण + अव + मान् + णिच् स्वार्थे + णिनि साधु- कारिणि कर्त्तरि। तत् सम्बुद्धौ। (b). पटान्तेन—पटस्य अन्तः। तेन। The reading आतपत्रेण seems unsuitable. One does not go out in moon-light with an umbrella (आतपत्र), so the reference to an umbrella is out of place.

4. नियोजिता—The णिच् shows her submission to the will of the friends.

राजा—स्थाने खलु विस्मृतनिमेषेण चक्षुषा प्रियामवलोकयामि। यतः—

उन्नमितैकभ्रूलतम् आननमस्याः पदानि रचयन्त्याः।
कण्टकितेन प्रथयति मय्यनुरागं कपोलेन॥

KING—How proper that I gaze on my beloved with eyes that have forgotten their wink! For, as she is composing the lines, her face, with one eye-brow turned up, notifies her love for me by means of the cheeks with the pores raised.

शकुन्तला—हला चिन्तिदं मए गीदवत्थु असण्णिहिदाणि उण लेहणसाहणाणि [हला चिन्तितं मया गीतवस्तु। असन्निहितानि पुनर्लेखनसाधनानि]।

SAKUNTALA—Friends, the substance of the song is thought out by me, but writing materials are not at hand.

स्थाने इति। 'विस्मृतः निमेषो' नेत्रनिमीलनं येन तेन 'चक्षुषा' [जातावेकवचनम्] 'प्रियामवलोकयामि' इति यत् तत् 'स्थाने' युक्तं 'खलु' ["युक्ते द्वे साम्प्रतं स्थाने" इत्यमरः। अव्ययमेतत्]। कुतो युक्तमित्याह 'यतो' यस्मात्—

उन्नमितेति। अन्वयः—पदानि रचयन्त्या अस्या उन्नमितैकभ्रूलतम् आननं कण्टकितेन कपोलेन मयि अनुरागं प्रथयति। व्याख्या—'पदानि' गीतपादान् गीतशब्दान् वा 'रचयन्त्याः' विचिन्त्य योजयन्त्याः 'अस्याः उन्नमिता' ऊर्द्ध्वं प्रेरिता 'एका भ्रूलता' यस्मिन् तादृशम् [ध्यानस्यस्य स्वभाव एषः] 'आननं' मुखं कर्त्तृ 'कण्टकितेन' जातरोमाञ्चेन [इतच्प्रत्ययः। तारकादिः] 'कपोलेन' गण्डेन [जातावेकवचनम्] 'मयि अनुरागं' भावं 'प्रथयति' विशेषयति। इयन्तं कालं यो मयि भावो गोपितः, सः अधुना घोषणया ज्ञाप्यते, अहञ्च पश्यामि। किमतो युक्ततरं दर्शनं भवेत्

इति भावः। ["कण्टकितेन प्रथयति" (रा-, वि-, म-)—"पुलकाञ्चितेन कथयति" (त-, न्या-)]॥

हलेति। 'मया गीतस्य' गानस्य 'वस्तु' उपादानं 'चिन्तितं' ध्यातम्। 'लेखनस्य साधनानि' लेखननिर्वाहकद्रव्याणि 'पुनः न सन्निहितानि' समीपस्थानि। गीतं रचितं किन्तु कथं लिख्यते ? ["चिन्तितं मया गीतवस्तु" (रा-, वि-)—"चिन्तिता मया गीतिका" (त-, न्या-, म-)]॥

NOTES

1. (a). उन्नमित &c.—उद्+नम+णिच्+क्त कर्मणि=उन्नमिता upturned, raised. भ्रूः लता इव भ्रूलता creeper-like eyebrow. उपमितकर्मधा—, the resemblance lying in taper, graceful movement, &c. एका भ्रूलता। "पूर्वकालैक—" इति समासः। उन्नमिता एकभ्रूलता यस्मिन्। Or उन्नमिता एका भ्रूलता यस्मिन्, त्रिपद बहु—। (b). *Remark.* She declares her love for me, not in words, which may deceive through dissimulation, but by the horripilation on her cheeks which can be caused by nothing but genuine emotion. I am a witness to this. A more pleasing slight cannot be imagined (स्थाने खलु)।

2. असन्निहितानि—न सन्निहितानि makes the नञ् a प्रसज्यप्रतिषेध। This sort of नञ् emphasises the negation. ("प्रतिषेधे प्रधानता"—*Darpana*). Strict logic therefore requires that it should not be compounded. But in the older days the spirit of the language was different and समास with प्रसज्यप्रतिषेध नञ् was common. Panini writes अश्रिति for न तु श्रिति, अकर्त्तरि for न तु कर्त्तरि &c.

प्रियंवदा—इमस्सिं सुओदरसिणिद्धे णलिणीपत्ते णहेहिं णिक्खित्तवण्णं करेहि [अस्मिन् शुकोदरस्निग्धे नलिनीपत्रे नखैर्निक्षिप्तवर्णं कुरु]।

PRIYAMVADA—Well, have the letters scratched with your nails on this lotus-leaf which is pleasant-looking like the parrot's breast.

शकुन्तला (यथोक्तं रूपयित्वा)—हला सुणुह दाणिं सङ्गदत्थं ण वेत्ति। [हला शृणुतमिदानीं सङ्गतार्थं न वेति]।

SAKUNTALA (*Acting as described*)—Listen dear, and see if it is proper in sense or not.

उभे—अवहिदम्ह [अवहिते स्वः]।

BOTH—We are attending.

शकुन्तला (वाचयति)—

तुज्झ ण आणे हिअअं मम उण मअणो दिवा वि रत्तिम्मि।
णिग्घिण तवइ बलीअं तुइ वुत्तमणोरहाइ अङ्गाइं॥
[तव न जाने हृदयं मम पुनर्मदनो दिवापि रात्रावपि।
निर्घृण तपति बलीयस्त्वयि वृत्तमनोरथाया अङ्गानि॥]

SAKUNTALA (*Reads*)—Thy heart I know not; but mine, O cruel one, with my desire placed on thee, Cupid heats the limbs by day and by night.

अस्मिन्निति। 'शुकस्य उदरं' शुकोदरम्। 'शुकोदरम्' इव 'स्निग्ध'' नेत्रानन्दनं तस्मिन् ["उपमानानि सामान्यवचनैः" इति समासः] 'अस्मिन् नलिनीपत्रे' कमलदले 'नखैः निक्षिप्ताः' उत्कीर्णा 'वर्णाः' यस्य तथाविधं 'कुरु'। पद्मपत्रे नखेन आलिख्यताम्। अहन्तु तस्मिन्नेव पत्रे पुष्पाणि निधाय राजानं प्रापयामि। ["शुकोदरस्निग्धे" (पि-)—"शुकोदरसुकुमारे" (रा-, त-, वि-, न्या-, म-)॥ "निक्षिप्तवर्णं कुरु" (रा-, वि-, म-)—"आलिख्यताम्" (त-, न्या-)]॥

शकुन्तलेति। 'यथोक्तम्' उक्तानुरूपं 'रूपयित्वा' अभिनीय। पद्मपत्रे नखेन लिखित्वा इत्यर्थः।

इलेति। 'सङ्गतः' संलग्नः युक्तः 'अर्थो' यस्य तादृशं 'न वा शृणुतम्'। श्रुत्वा कथय संलग्नमसंलग्नं वा इत्यर्थः।

अवेति। 'अवहिते' दत्तचित्ते 'स्वः' भवावः। शकुन्तलेति। 'वाचयति' पठति।

तवेति। अन्वयः—हे निर्घृण तव हृदयं न जाने। त्वयि वृत्तमनोरथाया मम पुनः मदनः दिवा अपि रात्रावपि अङ्गानि बलीयः तपति। व्याख्या—हे 'निर्घृण' निर्दय 'तव हृदयं' चित्तं 'न जाने'। 'त्वयि वृत्तः' जातः 'मनोरथः' अभिलाषो

यस्याः तथाविधाया 'मम' पुनः 'मदनः' कामः 'दिवा अपि' दिवसे च 'रात्रौ अपि' रजन्याञ्च 'अङ्गानि वलीयः' अत्यर्थं 'तपति' तापेन योजयति। ["रात्रावपि" (रा-, वि-)—"रात्रिमपि" (त-, न्या-, म-) ॥ "मदनः" (त-, न्या-)—"कामः" (रा-, वि-, म-) ॥ "मनोरथायाः" (त-, वि-, म-)—"मनोरथानि" (रा-, न्या-)]।

NOTES.

1. शकोदर &c.—The parrot's breast is not very well known for its सुकुमारता, but its mild yellow-green colour is very pleasing and resembles that of a lotus-leaf. Hence I prefer the reading स्निग्धे to सुकुमारे।

2. इति—कर्म of शृणुतः।

3. (a). दिवा—an अव्यय meaning दिवसे in the सप्तमी। (b). निर्घृण—निरस्ता घृणा अस्य इति निर्घृणः pitiless. बहु—।

4. *Readings.* (a). मदनः is preferable to कामः because in the sloka following the king uses the word मदनः। (b). रात्रिमपि requires दिवा also to be in the द्वितीया for the sake of uniformity. But दिवा is अधिकरणवचनः। Some indeed hold that दिवा may mean दिवसम् in the द्वितीया, but that is in compounds only (*e.g.*, दिवाकरः). The वृत्तिकार however explains "दिवाशब्दोऽधिकरणवचनः। दिवा दिवसे (*not* दिवसम्) करोति प्राणिनश्चेष्टायुक्तान् इति दिवाकरः"। I therefore prefer रात्रावपि। (c). मनोरथानि—It seems queer to speak of the मनोरथ of अङ्ग। मनोरथायाः is better.

राजा (सहसोपसृत्य)—

तपति तनुगात्रि मदनस्त्वामनिशं मां पुनर्दहत्येव।
ग्लपयति यथा शशाङ्कं न तथा हि कुमुद्वतीं दिवसः॥

KING (*Hastily approaching*)—Thee, O thou of slender limbs, cupid *heats*; but, verily, me he ceaselessly *burns*. The day certainly does not cause the lily to fade so much as it does the moon.

सख्यौ (विलोक्य सहर्षमुत्थाय)—साअदं अविलम्बिणो

मनोरथस्य [स्वागतमविलम्बिनो मनोरथस्य]। (शकुन्तला अभ्युत्थातुमिच्छति)।

FRIENDS (*Looking at him and rising with joy*)—Welcome to our desire that does not delay. (*Sakuntala wants to get up*).

राजेति। 'सहसा' अतर्कितम् 'उपसृत्य' समीपमागत्य। अन्वयः—हे तनुगात्रि मदनः अनिशं त्वां तपति मां पुनर्दहत्येव। दिवसो यथा शशाङ्कं ग्लपयति कुमुद्वतीं न हि तथा। व्याख्या—हे 'तनुगात्रि' कृशाङ्गि शकुन्तले 'मदनः अनिशं' सततं 'त्वां तपति' तापमात्रेण पीड़यति 'मां पुनः' मां तु 'दहत्येव' भस्मीकरोत्येव। नैतदयुक्तमिति दृष्टान्तमाह—'दिवसः' वासरः 'यथा शशाङ्कं' चन्द्रं 'ग्लपयति' तेजोहीनं करोति 'कुमुद्वतीं' चन्द्रप्रियां कुमुदिनीं 'न हि तथा'।

सख्यौ इति। 'उत्थाय' आचारप्राप्तम् अभ्युत्थानं कृत्वा। ["विलोक्य सहर्षमुत्थाय" (त-, न्या-, म-)—"सहर्षम्" (रा-, वि-)]।

स्वागतमिति। 'अविलम्बिनो' विलम्बम् अकुर्वतः, चिन्तितमात्रमुपस्थितस्य 'मनोरथस्य' अभिलाषस्य, अभिलाषरूपस्य तव 'स्वागतं' शोभनम् आगमनं भवतु।

शकुन्तलेति। 'अभ्युत्थातुम्' यथाचारं राज्ञः अभ्युत्थानकर्म कर्त्तुम् 'इच्छति'। अभ्युत्थानाध्यवसाय एव कृतः न तु उत्थिता सा।

NOTES

1. (a). तनुगात्रि—तनूनि स्वल्पानि गात्राणि यस्याः सा तनुगात्री or तनुगात्रा having slender limbs. बहु—। "अङ्गगात्रकण्ठेभ्यश्च" इति ङीष् वा। तत्सम्बुद्धौ। That which is very small (तनु) does not require much heat to heat it. So I do not think Cupid strikes you with much force; only, being तनुगात्री, you are easily heated, that is all. "तनुः काये कृशेऽल्पे च" इति कोषः। (b). माम्—"पुरुष कठिनशरीरम्" इति राघवः। The force is—Cupid pities you because you are a woman and of slender proportions. He does not vent his fury on you, but merely *heats* you. But look at me. He thinks I am his match and strikes with all his strength. The rascal is literally *burning* me down. (c). ग्लपयति—ग्लै + णिच् +

+ लट् ति = ग्लपयति or ग्लापयति (मित्वविकल्प) oppresses. No मित्व if an उपसर्ग precedes. Thus—प्रग्लापयति। (d). कुमुद्वतीम्—कुमुदानि सन्ति अस्याः इति कुमुद + ड्वतुप् स्त्रियाम्। ताम्। "कुमुदनड्वेतसेभ्यो" इति ड्वतुप्।

2. (a). अविलम्बिनः—न विलम्बते इति नञ् + वि + लम्ब + णिनि कर्त्तरि साधुकारिणि = अविलम्बी not delaying. तस्य। (b). मनोरथस्य—Here the मनोरथ (desire) is the king himself मनोरथविषयीभूतो जनः।

3. *Reading.* In the case of kings, उत्थान is the आचार। Hence सहर्षमुत्थाय is better than the simple सहर्षम्।

राजा—अलमलमायासेन—

सन्दष्टकुसुमशयनान्याशु विमर्दितमृणालवलयानि।
गुरुपरितापानि न ते गात्राण्युपचारमर्हन्ति॥

KING—Off, off with your effort. Your deeply suffering limbs, which quickly have the bed of flowers sticking on them and the bracelet of lotus-shoots smashed, are not fit for ceremonies.

अनसूया—इदो सिलातलेक्कदेसं अलङ्करेदु वअस्सो [इतः शिलातलैकदेशमलङ्करोतु वयस्यः]। (राजा उपविशति)। (शकुन्तला सलज्जं तिष्ठति)।

ANASUYA—Let our friend grace a part of the stone slab. (*The king sits down. Sakuntala remains bashful*).

अलमिति। 'आयासेन' अभ्युत्थानप्रयासेन 'अलम्' [आवेगे द्विरुक्तम्]।

सन्दष्टेति। अन्वयः—आशु सन्दष्टकुसुमशयनानि विमर्दितमृणालवलयानि गुरुपरितापानि ते गात्राणि उपचारं न अर्हन्ति। व्याख्या—'आशु' झटिति 'सन्दष्टं' लग्नं 'कुसुमशयनं' पुष्पशय्या येषु तथाविधानि, 'विमर्दितं' निष्पेषितं 'मृणालवलयं' यैः तथाविधानि 'ते गात्राणि' अङ्गानि 'उपचारम्' अभ्युत्थानादिकं राजदर्शनोचितम् आचारं 'न अर्हन्ति'। गात्रतापात् झटिति कुसुमानि विगलन्ति, ततः शय्या एव गात्रेषु लग्ना भवति। मृणालवलयञ्च परिधानमात्रमेव तापात् मर्दितं भवति। एवं-

विधेस्तापितैरङ्गैः कथम् अभ्युत्थानं क्रियते इति भावः। ["विमर्दितमृणालवलयानि" (त-, न्या-)—"क्लान्तविसभङ्गसुरभीणि" (रा-, वि-, म-)]।

इत इति। 'वयस्य:' सखा भवान् 'इत:' अस्मिन् स्थले 'शिलातलस्य एकदेशम् अलङ्करोतु' उपवेशनेन भूषयतु। इति शकुन्तलाया: शय्याभूतं शिलातलं निर्दिशति। अतएव वयस्य इति सुहृत्संबोधनम्। वयस्यो जन: एकासनोपवेशनमर्हति।

शकुन्तलेति। 'लज्जया', राज्ञा तस्या: शय्या अधिकृता इति व्रीडया सह 'तिष्ठति'।

NOTES

1. (a). अलम् अलम्—"चापले द्वे भवत इति वाच्यम्"। "मध्ये भेषु प्रवृत्तिश्चापलम्" इति वृत्तिकारः। (b). सन्दष्ट &c.—सम + दन्श + क्त कर्त्तरि = सन्दष्टम् attached. The root has become अकर्मक owing to the change of meaning. "धातोरर्थान्तरे वृत्तेर्धात्वर्थेनोपसंग्रहात्। प्रसिद्धेरविवक्षात: कर्मणोऽकर्मिका क्रिया"॥ अकर्मकत्वात् कर्त्तरि क्तः। In a similar sense compare सन्दष्टसर्पत्वचा—Act VII. *Infra.* शय्यते अस्मिन् इति शी + ल्युट् अधिकरणे = शयनम् bed. कुसुमरचितं शयनम् or कुसुमानां शयनम् कुसुमशयनम् flower-bed. Now see Tika. (c). विमर्दित &c.—वि + मृद + णिच् + क्त कर्मणि = विमर्दितम् Literally 'crushed', here 'caused to shrivel' म्लानिमापादितम्। मृणालस्य वलयम्। She had only *one* bracelet. Compare—प्रशिथिलमृणालैकवलयम्—*Ante.* (d). उपचारम्—उपचर्य्यते अनेन इति उप + चर + घञ् करणे = उपचारः customary formalities at the approach of the king. "उपचारस्तु सेवायां व्यवहारोपचर्य्ययो:" इति हैम:।

2. *Readings.* क्लान्त विसभङ्गसुरभीणि—भज्यते इति भञ्ज + घञ् कर्मणि = भङ्गः a piece छेदः। क्लान्तो मृदितो यो विसभङ्गो मृणालच्छेद: तेन सुरभीणि is the meaning. But there was the whole bed of flowers sticking on the body to make it fragrant (सुरभि). It therefore sounds rather queer to say that fragrance was due to the solitary piece of lotus-shoot on the wrist (विसभङ्गसुरभि). I therefore prefer विमर्दितमृणालवलयानि।

प्रियंवदा—दुवेणम्पि वो अस्सोस्साणुराओ पच्चक्खो। सहीसिणेहो उण मं पुणरुत्तवादिणीं करेदि [द्वयोरपि युवयो: अन्योऽन्यानुराग: प्रत्यक्ष:। सखीस्नेह: पुनर्मां पुनरुक्तवादिनीं करोति]।

PRIYAMVADA—Your mutual affection is obvious to both of you. Yet love for my friend makes me speak something superfluous.

राजा—भद्रे, नैतत् परिहार्य्यम्। विवक्षितं हि अनुक्तमनुतापं जनयति।

KING—O Gentle one, this should not be avoided. What is wished to be said, causes regret if unsaid.

प्रियंवदा—आवण्णस्स विसअवासिणो जणस्स अत्तिहरेण रण्णा होदव्वं त्ति एसो वो धम्मो [आपन्नस्य विषयवासिनो जनस्य आर्त्तिहरेण राज्ञा भवितव्यम् इति एष वो धर्मः]।

PRIYAMVADA—The king has to be the remover of the trouble of the distressed that are living in his kingdom—this is your duty.

राजा—नास्मात् परम्।

KING—Nothing higher than this.

द्वयोरिति। 'युवयोः अन्यस्य अन्यस्य' 'अन्यस्मिन् अन्यस्मिन्' वा 'अनुरागः द्वयोरपि' उभयोरपि भवतोः 'प्रत्यक्षः'। भवान् जानाति "इयं मयि रक्ता अहञ्च अस्याम्" इति—इयञ्च जानाति "राजा मयि रज्यति अहमपि राजनि"। एवं स्थिते कर्त्तव्यमपि उभावपि भवन्तौ जानीतः। अन्यस्य वाक्प्रयोगः अनावश्यकः 'सखीस्नेहः पुनः' शकुन्तलागतो मे स्नेहस्तु 'मां पुनरुक्तवादिनीम्' अधिकवादिनीं, निष्प्रयोजनजल्पिनीं 'करोति'। प्रीत्या ब्रवीमि वचनप्रयोजनन्तु नास्त्येव।

भद्रे इति। 'एतत्' वचनमित्यर्थः 'न परिहार्य्यम्' वर्जनीयम्। अवश्यमेव त्वया वक्तव्यम्, यतः 'विवक्षितं' वक्तुमिष्टं वस्तु 'अनुक्तं' सत् 'अनुतापं' पश्चात्तापं 'जनयति'। ब्रूहि यद्वक्तुमिच्छसि इति भावः।

आपन्नेति। 'राज्ञां, विषये' स्वाधिकारे 'वसति' यस्तस्य 'आपन्नस्य' विपद्गतस्य [कर्त्तरि क्तः] जनस्य 'आर्त्तिहरेण' विपद्विनाशिना 'भवितव्यम्—इति' यत् 'एषः' [विधेयप्राधान्यात् पुंलिङ्गता] 'वः' युष्माकम् 'धर्मः'। प्रजारक्षणं राजधर्मः इति संक्षेपः।

नेति। 'अस्मात्' प्रजारक्षणात् 'परम्' अधिकं 'न' नास्ति। अयमेव नः परमो धर्मः।

NOTES

1. (a). अन्योऽन्य &c.— अनु + रञ्ज + घञ् भावे = अनुरागः love. अन्यस्य अन्यस्य अनुरागः expresses व्यतिहार reciprocity, by the Varttika "क्रियाव्यतिहारे सर्वनाम्नो द्वे वाच्ये समासवच्च बहुलम्"। But owing to 'बहुलम्' (irregularly) in the Varttika, अन्य and पर do not get समासवद्भाव। "बहुलग्रहणादन्यपरयोर्न समासवत्"—*Bhattoji*. Now see परस्परम्, *Ante*. (b). सखीसं हः—सख्यां सं हः। सहसुपेति समासः। (c). पुनरुक्त &c.—*Lit.* पुनरुक्त is a *repitition*. But a *repitition* is *superfluous*; hence secondarily it means अधिक *superfluous*. तत् साधु वदतीति पुनरुक्त + वद + णिनि साधुकारिणि कर्त्तरि। ताम्।

2. *Remark.* Here इयोः is connected with प्रत्यक्षः। If taken with अन्योऽन्यानुरागः the sense becomes—your mutual attachment is evident to *us*. But then इयोरपि is rendered superfluous, because to give that sense "युवयोरन्योऽन्यानुरागः प्रत्यक्षः" serves as well as "इयोरपि युवयोः &c."। The point, however, is *not* that it should be evident to *us*, but to *the couple in love*. Then alone the request of a third person becomes unnecessary (पुनरुक्त)।

3. (a). विषय &c.—विषय is देश kingdom. "विषयौ देशगोचरौ" इति त्रिकाण्डशेषः। (b). आर्त्तिहरेण—आ + ऋ + क्तिन् भावे—आर्त्तिः distress पीड़ा। "आर्त्तिः पीडाधनुष्कोट्योः" इत्यमरः। तां हरतीति आर्त्ति + हृ + अच् कर्त्तरि ताच्छील्ये = आर्त्तिहर the reliever of distress. Here हृ implies no *lifting* (अनुद्यमन) ; hence अच् bars अण् by the rule "हरतेरनुद्यमने अच्"। तेन। अनुक्ते कर्त्तरि तृतीया।

4. अस्मात्—अधिकार्थपरशब्दयोगे पञ्चमी।

प्रियंवदा—तेण हि इअं णो पिअसही तुमं उद्दिसिअ इमं अवत्थन्तरं भअवदा मअणेण आरोविदा। ता अरिहसि अब्भुववत्तीए जीविदं से अवलम्बिदुं [तेन हि इयमावयोः प्रियसखी त्वामुद्दिश्य इदमवस्थान्तरं भगवता मदनेन आरोपिता। तदर्हसि अभ्युपपत्त्या जीवितमस्या अवलम्बितुम्]।

PRIYAMVADA—Well, then—This dear friend of ours has

been led to this changed state by all-powerful Madana with reference to thee. So it behoves thee to sustain her life by condescension.

राजा—भद्रे साधारणोऽयं प्रणयः। सर्वथा अनुगृहीतोऽस्मि।

KING—O Gentle one, this prayer is mutual. I am favoured in every way.

शकुन्तला (प्रियंवदामवलोक्य)—हला किं अन्तेउरविरहपज्जुस्सुअस्स राएसिणो उवरोहेण [हला किमन्तःपुरविरहपर्युत्सुकस्य राजर्षेरुपरोधेन]।

SAKUNTALA (*Looking at Priyamvada*)—What is gained, dear, by pressing the royal sage who is anxious through separation from the ladies of her inner apartments.

तेनेति। 'तेन हि' तस्माद्धेतोः, यतः प्रजारक्षणं वो धर्मः ततः [एतच्च वक्ष्यमाणवचनं प्रति हेतुः]—'इयम् आवयोः' प्रियसखी शकुन्तला 'भगवता' प्रभुणा 'मदनेन त्वामुद्दिश्य' भवन्तं विषयं कृत्वा 'इदम् अवस्थान्तरं' दशाविपर्य्ययम् 'आरोपिता' गमिता। विपन्ना इयं विषयवासिनी इत्यर्थः। 'तत्' तस्माद्धेतोः, यतो विपन्ना ततः, [एतत्तु जीवितावलम्बनं प्रति हेतुः] 'अभ्युपपत्त्या' अनुग्रहेण ["अथाभ्युपपत्तिरनुग्रहः" इति कोषः] 'अस्या जीवितमवलम्बितुमर्हसि'। प्रकर्षं गते ज्ञाते च परस्परभावे एतन्निष्प्रयोजनं वचः, तथापि स्नेहादब्रवीमि इति भावः।

भद्रे इति। 'अयं प्रणयः' एषा प्रार्थना, अभ्युपपत्त्या जीवितावलम्बनरूपा याच्ञा "साधारणः' समानः। यथा इयं मां प्रार्थयते तथा अहमपि इमां प्रार्थये "अभ्युपपत्त्या जीवितमवलम्ब्यताम्" इति। तत् ते अनेन वचनेन 'सर्वथा' सर्वप्रकारेण 'अनुगृहीतोऽस्मि'।

शकुन्तलेति। ["प्रियंवदाम्" (रा-, वि-, म-)—"अनसूयाम्" (त-, न्या-)]।

हलेति। 'अन्तःपुरैः' लक्षणया तत्रस्थितैः कलत्रैः यो 'विरहः' तेन 'पर्य्युत्सुकस्य' उत्कण्ठाकातरस्य 'राजर्षेः उपरोधेन' राजर्षिम् अनुरुध्य 'किं' लभ्यते न किमपि। प्रजागरकृशोऽयं न हि मत्कृते किन्तु अन्तःपुरविरहात्, तदलमेनमुपरुध्य।

NOTES

1. (a). अवस्थान्तरम्—अव + स्था + अङ् भावे = अवस्था state. Here क्तिन् does not bar अङ् as it ought to do in the case of स्था, गा, पा and पच् by the rule "स्था गा पा पचो भावे"। The reason is पाणिनि himself suggests the *option* of having क्तिन् or अङ् with स्था in the भाववाच्य, because he uses the word व्यवस्था in I. I. 34. "—व्यवस्थायामसंज्ञायाम् इति ज्ञापकात् नात्यन्ताय बाधा भवति"—*Vrittikara.* अन्या अवस्था अवस्थान्तरम् a नित्यसमास of the मयूरव्यंसकादि class. Here अन्तर means अन्य। (b). भगवता—भग implies six things ऐश्वर्य्य, वीर्य्य, यशस्, श्री, ज्ञान, वैराग्य। ऐश्वर्य्यस्य समग्रस्य वीर्य्यस्य यशसः श्रियः। ज्ञानवैराग्ययोश्चैव षण्णां भग इतीङ्गना"। Thus भगवता here suggests that मदन is powerful, and poor helpless Sakuntala is being oppressed by that matchless tyrant. She is thus आपन्न and deserves protection. (c). आरोपिता—आ + रुह + णिच् + क्त कर्मणि। Optionally आरोहिता।

2. (a) साधारणः—समानं धारणमस्य इति साधारणः that which is seen in more than one place, *i. e.*, common. समान becomes स by योगविभाग in the rule "समानस्य छन्दस्यमूर्द्धप्रभृत्युदर्केषु"। Next स becomes सा पृषोदरादित्वात्। This is Haradatta's explanation. Bhanuji derives through आधारण instead of धारण। Next the word *optionally* takes अञ् स्वार्थे by the Varttika "आग्नीध्रसाधारणादञ्"। The form does not differ and is still साधारणः। The difference is, however, seen in the feminine where *with* अञ् the form is साधारणी, and साधारणा *without* it. (b). प्रणयः—प्रणीयते अनेन or प्रणयनम् इति प्र + नी + अच् करणे भावे वा = प्रणयः solicitation याच्ञा। "प्रणयः प्रेमयाच्ञयोः" इति हैमः।

राजा—

इदमनन्यपरायणमन्यथा हृदयसन्निहिते हृदयं मम।
यदि समर्थयसे मदिरेक्षणे मदनबाणहतोऽस्मि हतः पुनः॥

KING—O thou with quivering eyes, that art enshrined in my heart, if thou deemest as otherwise this heart of mine

which is not devoted to others, then, pierced by Madana's arrow, I am pierced again.

अनसूया—वअस्स बहुवल्लहा राआणो सुणीअन्ति । जह णो पिअसही बन्धुअणसोअणिज्जा ण होइ तह णिव्वाहेहि [वयस्य बहुवल्लभा राजानः श्रूयन्ते । यथाऽऽवयोः प्रियसखी बन्धुजनशोचनीया न भवति तथा निर्वाहय] ।

ANASUYA—Friend, kings are known as having many wives. Do so arrange that our dear friend will not have to be pitied by her kinsmen.

इदमिति—हे मदिरेक्षणे, हृदयसन्निहिते, इदम् अनन्यपरायणं मम हृदयं यदि अन्यथा समर्थयसे, मदनबाणहतः पुनः हतोऽस्मि ।

व्याख्या—हे 'मदिरेक्षणे' चारुचञ्चललोचने [अनेन नेत्रमहिम्नैव मां त्वदधीनम् अनुमातुमर्हसि इति ध्वन्यते] हे 'हृदयसन्निहिते' मन्मनोवर्त्तिनि [एतेन प्रत्यक्षमेव तं मम हृदयं, ततश्च मां त्वदधीनं जानीहि इति ध्वनिः] 'इदं न अन्या' स्त्री 'परायणम्' आश्रयो यस्य तथाविधं, त्वदेकनिरतम् इत्यर्थः, 'मम हृदयं' मानसं 'यदि अन्यथा' अन्यप्रकारेण 'समर्थयसे' गणयसि, यद्यन्यपरायणमेव मन्यसे, तदा 'मदनबाणेन' कन्दर्पशरेण 'हतः' विद्धः अहं 'पुनः हतोऽस्मि' विद्धोऽस्मि । मदनुरागं प्रति प्रथमं प्रमाणमनुमानं, ततः प्रत्यक्षम् । यदि तु उभयमप्येतत् तुच्छं ते, ततो मरणमेव मे शरणम् इति भावः ["हतोऽस्मि" (रा-, वि-, म-)—"हतोऽपि" (त-, न्या-)] ॥

वयस्येति । 'राजानो बह्व्यो वल्लभाः' वनिताः येषां तथाविधाः 'श्रूयन्ते' [सामान्योक्त्या "बहूनि ते कलत्राणि" इति रूक्षं परिहरति] । तदसमं विभक्ता प्रीतिः क्वचित् नैव वा पतेत् । तेन 'यथा' येन प्रकारेण 'आवयोः प्रियसखी बन्धुजनैः' पित्रादिभिः 'शोचनीया' शोच्या 'न भवति तथा' तेन प्रकारेण 'निर्वाहय' निर्वर्त्तय । सर्वत्र तुल्यादरो भव, अस्यामनादरो मा भूत् इति भावः ।

NOTES

1. (a). अनन्य &c.—परा अयते अस्मिन् इति परा + अय + ल्युट् अधिकरणे

=परायणम् refuge आश्रयः। The ण is cerebral because by the rule "कृत्यचः" a कृत्स्थ नकार coming after a vowel, the cause for the change (रकार) being in an उपसर्ग preceding, becomes ण। If परायण be treated as a कर्मधा--compound of पर and अयन, the cerebral will not be available. I have therefore explained it as a गतिसमास। (b). हृदय &c.—सम् सम्यक्प्रकारेण निहिता सन्निहिता enshrined. हृदये सन्निहिता enshrined in the heart. सहसुपेति समासः। तत्-सम्बुद्धौ। (c). मदिरेक्षणे—माद्यत्याभ्याम् इति मद+किरच् करणे=मदिरे Lit. *maddening*, but technically it means the look of blooming youth that is languid, has the pupils restless, and the corners as it were laughing. Raghava quotes भरत thus—"आघूर्णमानमध्या या क्षामा चाञ्चिततारका। दृष्टिर्विकसितापाङ्गा मदिरा तरुणे मदे॥" ईक्षते आभ्याम् इति ईक्ष+ल्युट् करणे=ईक्षणे eyes. मदिरे ईक्षणे यस्यास्तत्संबुद्धौ। (d). मदन &c.—Madana has struck me already and you are striking again, *i. e.*, you are acting the ridiculous part of striking a dead man. (e). The sense is—Who can resist your charming looks? They have already enslaved me. This you can easily guess knowing the power of your eyes. But I need not leave it to guess to infer this. You are residing at my heart. Hence you have the evidence of your own eyes as to what is passing in the innermost recesses of my heart. If in spite of all this you think I am attached to some one else, why, death is my only refuge.

2. *Reading.* With हतोऽपि explain "struck again though already struck by Madana's arrow." मृतमारणं क्रियते इति गर्हा। But to what does हतः refer with that reading? Not to अहम् obtained by विभक्तिविपरिणाम from मम। For, मम being a विशेषण of हृदयम्, is अप्रधान। The प्रधान here is हृदयम्, and the reference ought to be to *it.* This requires हतः to be changed into हतम्। हतोऽस्मि is therefore preferable to हतोऽपि।

3. बहुवल्लभा—This is the ground for apprehension. You having many favourites, it is not unlikely that Sakuntala might suffer neglect.

राजा—भद्रे किं बहुना ?

परिग्रहबहुत्वेऽपि द्वे प्रतिष्ठे कुलस्य मे ।
समुद्ररसना चोर्वी सखी च युवयोरियम् ॥

KING—What need of many words ? Notwithstanding the plurality of wives, two are the main-stay of my race—the sea-girt earth and this friend of yours.

उभे—निव्वुदम्ह [निर्वृते स्वः] ।

BOTH—We are gratified.

प्रियंवदा (सदृष्टिक्षेपम्)—अनसूए जह एसो इदो दिण्ण-दिट्ठी उस्सुओ मिअपोदओ मादरं अण्णेसदि । एहि संजोएम णं [अनसूये यथा एष इतो दत्तदृष्टिः उत्सुको मृगपोतको मातरम् अन्विष्यति । एहि संयोजयाव एनम्] । (उभे प्रस्थिते) ।

PRIYAMVADA *(Casting about her look)*—Anasuya, by the way its looks are cast hither, this fawn is anxious and seeking its mother. Come let us help it to join its mother. (*Both proceed to leave*).

भद्रे इति । 'बहुना उक्तेन किं' बहूनि वचांसि निष्प्रयोजनानि । समासतो-ब्रवीमि—

परिग्रहेति । अन्वयः—परिग्रहबहुत्वेऽपि द्वे मे कुलस्य प्रतिष्ठे—समुद्ररसना उर्वी च युवयोः इयं सखी च । व्याख्या—'परिग्रहाणां' पत्नीनाम् ["पत्नीपरिजनादान-मूलशापाः परिग्रहाः" इत्यमरः] 'बहुत्वेऽपि' बाहुल्येऽपि 'द्वे' बह्वीषु तासु पत्नीषु द्वे एव 'मे कुलस्य' वंशस्य 'प्रतिष्ठे' आलम्बनस्वरूपे स्थितिहेतू ["आतश्चोपसर्गे" इत्यङ् कारणे] के ते द्वे पत्न्यौ इत्याह—'समुद्रो रसना' काञ्ची यस्याः सा रत्नाकरमेखला 'उर्वी च' वसुधा च [उर्वीति वसुधाप्रशंसा] 'युवयोः इयं सखी च' शकुन्तला च [च समुच्चये] । मुद्राभिरन्वितः समुद्रः स्वयं यस्या मेखला, महती सा वसुधा यथा मान्या मे एका पत्नी, तथा धन्या इयमप्यपरा । अन्या न गण्या मम इति भावः ।

"रसना" (त०, न्या०)—"वसना" (रा०, वि०)] ॥

निवृते इति। 'निवृते' सुखिते 'स्वः' भवावः।

प्रियंवदेति। 'दृष्टेः' नयनस्य 'क्षेपः' इतस्ततः प्रेरणं तेन सह। कथं निर्गच्छेव इति व्याजान्वेषणार्थं दृष्टिं चारयित्वा आह—

अनसूये इति। 'यथा' येन प्रकारेण 'एष इतः' अस्मदभिमुखं 'दत्तदृष्टिः' तेन मन्ये 'उत्सुकः' उत्कण्ठो 'मृगपोतकः' हरिणशावकः 'मातरम् अन्विष्यति'। अस्य दृष्टिपातस्य प्रकारं दृष्ट्वा एवं मन्ये। यद्वा—'एष उत्सुको मृगपोतको मातरम् अन्विष्यति, यथा' यतः 'इतो दत्तदृष्टिः'। अयमस्मदभिमुखं पश्यन् आस्ते तेनैव मन्ये मातरमन्विष्यति। अयं हि निर्गमनव्याजः यदर्थं प्रियंवदया दृष्टिक्षेपः कृतः।

NOTES

1. (**a**). परिग्रह &c.—परिगृह्यते स्वीक्रियते इति परि+ग्रह+अप् कर्मणि—परिग्रहः a wife. The king already regards शकुन्तला as a परिग्रह। This is because he has no doubt that he is going to be married forthwith. (**b**). प्रतिष्ठे—प्रतितिष्ठति अनयोः इति प्रति+स्था+अङ् अधिकरणे mainstay. (**c**). समुद्र &c.—मुद्राभि रत्नैः सह समुद्रः। This name is chosen on purpose to indicate *wealth*. The earth is *vast* (उर्वी) and *rich* (समुद्ररसना)। Hence naturally she is one of the mainstays of the race. (**d**). उर्वी—Lit. the *vast* one. (**e**). सखी—By calling शकुन्तला a mainstay, he implies that the family will be proud in possessing her as a स्नुषा। Raghava supposes that शकुन्तला was a mainstay because she gave birth to सर्वदमन। "महाचक्रवर्त्तिवंशोत्पादकपुत्रोत्पादात्"। But the king could not have referred to it *at this stage*. In fact the most illustrious member of a family—the one that adds lustre to the family—is often called कुलप्रतिष्ठा without reference to future progeny. Thus पार्वती is called the कुलप्रतिष्ठा of हिमालय in "तामर्चिताभ्यः कुलदेवताभ्यः कुलप्रतिष्ठां प्रणमय्य माता।"—*Kumara.*

2. *Readings*. (**a**). It is common with Sanskrit poets to speak of the earth as the king's spouse. The sea is called her girdle (मेखला)। Thus "कृतसीतापरित्यागः स रत्नाकरमेखलाम्। बुभुजे पृथिवीपालः पृथिवीमेव केवलाम्॥"—*Raghu.* Compare also "धात्रीं समुद्र-

रसनां वशगां करोति" &c. Hence रसना is preferable to वसना। (b). After निर्वृते स्वः the Bengali Recension has (The Prakritas are Sanskritized)—(शकुन्तला हर्षं सूचयति)। प्रियंवदा (जनान्तिकम्)—अनसूये पश्य पश्य मेघवाताहतामिव ग्रीष्मे मयूरीं क्षणे क्षणे प्रत्यागतजीवितां प्रियसखीम्।

शकुन्तला—हला मर्षयतं लोकपालं यदस्माभिर्विस्रब्धप्रलापिनीभिरुपचारातिक्रमेण भणितम्।

सख्यौ (सस्मितम्)—येन तन्मन्त्रितं स एव तन्मर्षयतु अन्यस्य कोऽत्ययः।

शकुन्तला—अर्हति खलु महाराज इदं विषोढुं परोक्षं वा न किं को मन्त्रयते।

राजा (सस्मितम्)—अपराधमिमं ततः सहिष्ये यदि रम्भोरु तवाङ्गसङ्गमृष्टे।

कुसुमास्तरणे क्लमापहेऽत्र स्वजनत्वादनुमन्यसेऽवकाशम्॥

प्रियंवदा (सोपहासम्)—नन्वेतावन्मात्रेण पुनस्तुष्टो भविष्यति।

शकुन्तला (सरोषमिव)—विरम विरम दुर्विनीते एतावदवस्थां गतया मया क्रीडसि।

This is in bad state, and, besides not consistent with what has gone before. The king is already seated on the stone-slab which Sakuntala occupies (See *Ante*). The request here made to be allowed to sit on the same seat with her is therefore meaningless. The passage does not appear to be genuine.

3. (a). सदृष्टि &c.—दृष्टेः क्षेपः पातः दृष्टिक्षेपः। तेन सह। बहु—। She is on the look out for some excuse to go out leaving the lovers to themselves. (b). यथा—In the sense यतः is rare. The विश्व notes the use of यथा when an inference (अनुमान) is drawn. "यथाशब्दस्तु निर्दिष्टस्तुल्ययोगानुमानयोः" इति विश्वः। (c). इतः—This way अस्यां दिशि। सप्तम्यर्थे तसि by the Varttika "तसि प्रकरणे आद्यादिभ्य उपसंख्यानम्"। Compare "प्रयुक्तमप्यस्त्रमितो वृथा स्यात्"। (d). दत्तदृष्टिः—दत्ता प्रेरिता दृष्टिर्येन सः। बहु—।

4. (a). मृग &c.—पोत is अर्भक little one. "पोतः पाकोऽर्भको डिम्भः" इति कोषः। मृगस्य पोतः। अनुकम्पितो मृतपोत इति मृगपोत+कन्। Its helplessness excites pity (अनुकम्पा)। The deerling neither sought its mother nor looked towards the speaker. (b). संयोजयाव—we two cause to join. मात्रा इति शेषः। Note the dual. She wants Anasuya to accompany her leaving the lovers to themselves.

शकुन्तला—हला असरणम्हि अग्गदरा वो आअच्छदु [हला अशरणास्मि अन्यतरा युवयोरागच्छतु]।

SAKUNTALA—I am helpless, dear. Do either of you come.

उभे—पुहवीए जो सरणं सो तुह समीवे वट्टइ [पृथिव्या यः शरणं स तव समीपे वर्त्तते]। (निष्क्रान्ते)।

BOTH—He, who is the helper of the world, is at your side? (*Exeunt*).

शकुन्तला—कहं गदाओ एव्व [कथं गते एव]।

SAKUNTALA—How ! Gone indeed !

उभे इति। 'प्रस्थिते' इति आदिकर्मणि क्तः प्रस्थातुमुद्यत इत्यर्थः।

हलेति। 'अविद्यमानं शरणं' गतिः यस्याः तथाविधा 'अस्मि'। उभयोर्गमनादिति भावः। तत् 'युवयोः अन्यतरा' या कापि एका ["अन्यतर" इत्यव्युत्पन्नम्। न तु डतरप्रत्ययान्तम्] 'आगच्छतु'।

पृथिव्या इति। 'यो' जनः 'पृथिव्याः' समग्रायाः धरायाः 'शरणं' रक्षिता, दुष्यन्त इत्यर्थः, 'स तव समीपे वर्त्तते' तत् कथं त्वम् अशरणा ?

NOTES

1. (a). अशरणा—"शरणं गृहरक्षित्रोः" इति यादवः। गृह or रक्षितृ suits equally well. It is नियतलिङ्ग। Hence पृथिव्या यः शरणम् &c. below. (b). अन्यतरा—अन्यतर is a primitive word (अव्युत्पन्न)। For, in the सर्वादि list डतरप्रत्यय occurs. Hence if अन्यतर were डतरान्त it would become a सर्वनाम by तदन्तविधि। "इह तदन्तग्रहणम्, केवलयोः (*i.e.*, of डतर and डतम) संज्ञायाः प्रयोजनाभावात्"—*Bhattoji*. But पाणिनि specifically mentions अन्यतर also in the list, implying thereby that अन्यतर is not डतरान्त। "अन्यतरान्यतमशब्दावव्युत्पन्नौ स्वभावात् द्विबहुविषये निर्द्धारणे वर्त्तेते"। (c). युवयोः—निर्द्धारणे षष्ठी।

राजा—अलमावेगेन। नन्वयमाराधयिता जनस्तव समीपे वर्त्तते।

किं शीकरैः क्लमविनोदिभिरार्द्रवातं
सञ्चालयामि नलिनीदलतालवृन्तम् ।
अङ्के निधाय करभोरु यथासुखं ते
संवाहयामि चरणावुत पद्मताम्रौ ॥

KING—Away with anxiety. This person, the server, stands indeed by your side. Shall I work the lotus-leaf-fan whose breeze is moist with particles of water that allay lassitude; or, O thou with thighs-like-the-outer-edge-of-the-palm-of-the-hand, having placed your lotus-red feet in my lap, shall I press them as is agreeable to you ?

शकुन्तला—ण माणणीएसु अत्ताणं अवराहयिस्सं [न माननीयेषु आत्मानम् अपराधयिष्यामि]। (उत्थाय गन्तुमिच्छति)।

SAKUNTALA—I shall not cause this self of mine to offend against those that deserve respect. (*Wants to get up and go*).

अलमिति। 'आवेगेन' सम्भ्रमेण 'अलम्'। यदि गते सख्यौ, किं तेन ? 'ननु' इत्यवधारणे। 'अयम् आराधयिता जनः' एष सेवकः, मद्रूपो जनः 'तव समीपे वर्त्तते'। गच्छतां सख्यौ।

किमिति। अन्वयः—क्लमविनोदिभिः शीकरैः आर्द्रवातं नलिनीदलतालवृन्तं सञ्चालयामि किम् ? उत हे करभोरु ते पद्मताम्रौ चरणौ अङ्के निधाय यथासुखं संवाहयामि। व्याख्या—'क्लमं' ग्लानिं 'विनोदयन्ति' अपनयन्ति ये तैः 'शीकरैः' जलकणैः [इत्थंभूतलक्षणे तृतीया] 'आर्द्रौ वातो' यस्य तत्, 'नलिनीदलं' पद्मपत्रमेव 'तालवृन्तं' व्यजनं तत् 'सञ्चालयामि किम्' ? 'उत' अथवा हे 'करभोरु' करभः पाणितलपार्श्वः। करभ इव ऊरू यस्याः। तत्संबुद्धिः ["ऊरूत्तरपदादौपम्ये" इत्यूङ् स्त्रियाम्। संबुद्धिह्रस्वश्च]। 'ते पद्ममिव ताम्रौ' रक्तौ 'चरणौ अङ्के' मत्क्रोडे 'निधाय' स्थापयित्वा 'यथासुखं' सुखं यथा भवति तथा 'संवाहयामि', मर्दनेन

विनीय खेदं करोमि । इति आराधयितुः सेवाप्रपञ्चः । ["शीकरैः" (त-, न्या-)—"शीतलैः" (रा-, वि-, म-) ॥ "विनोदिभिः" (रा-, वि-, म-)—"विमर्द्दिभिः" (त-, न्या-) ॥ "वातं" (त-, न्या-)—"वातान्" (रा-, वि-, म-) ॥ "सञ्चालयामि" (त-,न्या-)—"सञ्चारयामि" (रा-, वि-, म-) ॥ "वृन्तम्" (त-, न्या-)—"वृन्तैः" (रा-, वि-, म-)] ॥

नेति । 'माननीयेषु पूजार्हेषु, भवादृशेषु विषये 'आत्मानं न अपराधयिष्यामि' । सेवानुमत्या इति भावः [आत्मा अपराध्यति इति अकर्मकत्वात् णौ "गतिबुद्धि—" इत्यणिकर्त्तुः कर्मसंज्ञा] ।

NOTES

1. आराधयिता—आ + राध + णिच् स्वार्थे + तृन् साधुकारिणि कर्त्तरि । The root is here of the चुरादि class. Compare आराधय in "आराधय सपत्नीकः प्रीता कामदुघा हि सा"—*Raghu.*

2. (**a**). शीकरैः—with particles of water. "शीकरोऽम्बुकणाः स्मृताः" । (**b**). क्लम &c.—क्लम + वि + नुद + णिच् + णिनि कर्त्तरि ताच्छील्ये । (**c**). सञ्चालयामि —सम् + चल + णिच् + लट् मि । (**d**). नलिनी &c.—तालवृन्त is any *fan*, not necessarily one of palm-leaf. "व्यजनं तालवृन्तकम्" इत्यमरः । (**e**). करभोरु—करभ is the outer edge of the palm. "मणिबन्धादाकनिष्ठं करस्य करभो बहिः" इत्यमरः । Here करभ is by transference of epithets करभतुल्य । करभः ऊरुर्यस्याः gives करभ + ऊरु + ऊङ् because ऊरु is the उत्तरपद and comparison is implied (See Tika) = करभोरूः । The resemblance lies in the *tapering shape*. तत्संबुद्धिः । (f). यथा-सुखम्—सुखस्य अनतिक्रमो यस्मिन् कर्मणि तत् यथा तथा । अव्ययी— । That is to say not very hard so as to *pain* the feet. (g). संवाहयामि—सम् + वह + णिच् here means 'to shampoo.' (h). उत—Introduces an alternative (विकल्प) । (i). पद्मताम्रौ—"उपमानानि सामान्यवचनैः" इति समासः । The feet were red (ताम्र) without अलक्तकादिव्याज । Implies that it would be a valued privilege to the king to be allowed to shampoo such a pair of feet. "करभोरुपद्मताम्रौ इति पदाभ्यां चरणयोः संवाहनयोग्यत्वं ध्वनितम्"—*Raghava.*

3. *Remark.* The king here points out how he may be useful to her. In her state of health the best service she could get

from the two friends was that one shampooed her feet while the other fanned her into a quiet sleep. Alone he could render both these services. Hence she had no need to be anxious on account of the absence of her friends. The metre is वसन्ततिलका।

4. *Readings.* (a). आर्द्रवातम् requires that the reason for the आर्द्रता should be mentioned. Hence शीकरैः is necessary. शीतलैः does not give the reason. Besides the शैत्यगुण of the वायु should be left to be inferred, and must not be mentioned directly by words like शीत, शीतल, हिम &c. In the present case the inference follows from आर्द्र। (b). विमर्दिभिः sounds a bit heavy. विनोदिभिः is perhaps more gentle, and better suits the occasion. The rest is left to the reader.

5. माननीयेषु—विषये सप्तमी। The अण्यन्त form was आत्मा अपरात्स्यति My self will sin. With णिच् we have अहमात्मानम् (अणिकर्त्ता as कर्म) अपराधयिष्यामि I shall cause my self to sin. The rule "गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामणिकर्त्ता स णौ" applies because the root अपराध् is अकर्मक।

राजा—सुन्दरि, अनिर्वाणो दिवसः, इयञ्च ते समवस्था।
उत्सृज्य कुसुमशयनं नलिनीदलकल्पितस्तनावरणम्।
कथमातपे गमिष्यसि परिबाधापेलवैरङ्गैः॥

(बलादेनां निवर्त्तयति)।

KING—O fair one, the day is not yet extinguished, and this is your condition. Having left the bed of flowers in which lotus-leaves serve to cover the breasts, how can you go out in the sun with your limbs deticate through suffering? (*Stops her by force*).

शकुन्तला—पोरव रक्ख विणअं। मअणसन्तत्ता वि ण क्खु अत्तणो पहवामि [पौरव रक्ष विनयम्। मदनसन्तप्तापि न हि आत्मनः प्रभवामि]।

SAKUNTALA—O descendant of Puru, respect decorum. Though smitten by love, I cannot command myself.

सुन्दरीति। हे 'सुन्दरि' चार्वङ्गि [गौरादिः] 'दिवसः अनिर्वाणः' अधुनापि अनल इव ज्वलति। 'ते समवस्था' दशा 'च इयम्' ईदृशी। किं तेन इत्याह—

उत्सृज्येति। अन्वयः—नलिनीदलकल्पितस्तनावरणं कुसुमशयनम् उत्सृज्य परिबाधापेलवैः अङ्गैः कथम् आतपे गमिष्यसि? व्याख्या—'नलिनीदलाभ्यां' गुरुतापात् पद्मपत्राभ्यामेव 'कल्पितं' रचितं 'स्तनावरणं' स्तनाच्छादनं, वल्कलस्थानीयमित्यर्थः, यस्मिन् तादृशं 'कुसुमशयनं' पुष्पशय्याम् 'उत्सृज्य' त्यक्त्वा 'परिबाधया' परितः सन्तापेन 'पेलवैः' सुकुमारैः 'अङ्गैः' [करणे तृतीया] 'कथं' केन प्रकारेण 'आतपे' रविकरे 'गमिष्यसि'। यस्या ईदृशः सन्तापः यत् कोमला शीतला च पुष्पशय्या भजनीया भवति, तत्रापि पुनः पद्मपत्रेण स्तनयोस्तापः किञ्चिदिव लघूक्रियते, सा कदापि रविकरे विचरणं नार्हति। ["स्तनावरणम्" (रा-, वि-, म-)—"स्तनावरणा" (त-, न्या-)]॥

बलादिति। 'निवर्त्तयति' निवृत्तां गमनात् विरतां करोति।

पौरवेति। 'पौरव' हे पुरुकुलोद्भव [प्रसिद्धः पौरवाणां विनयः, अतः पौरव इति कुलनामग्रहणम्] 'विनयं' सदाचारं 'रक्ष' मा दूषय। अविनयी मा भूः। 'मदनेन सन्तप्ता' पीड़िता 'अपि न हि आत्मनः प्रभवामि' नाहमात्मनं स्वेच्छया कुत्रचित् नियोजयितुं समर्था। प्रभुरस्ति मे पिता कण्वः तमेव मे दातृत्वेन प्रमाणीकुरु।

NOTES

1. (a). सुन्दरि—सुन्दर is of the गौरादि class. Hence in the feminine we get सुन्दरी and not सुन्दरा by the rule "षिद्गौरादिभ्यश्च"। (b). अनिर्वाणः—निर् + वा + क्त कर्त्तरि = निर्वाणः when वात is not the कर्त्ता, otherwise निर्वातः। Thus निर्वाणो दिवसः but निर्वातो वातः—the wind has ceased. न निर्वाणः। नञ्तत्—। (c). समवस्था—सम् + अव + स्था + अङ् करणे भावे वा।

2. (a). कुसुमशयनम्—शी + ल्युट् अधिकरणे = शयनम् bed. कुसुमानां शयनम्। तत्। (b). नलिनीदल &c.—स्तनयोरावरणं स्तनावरणम्। नलिन्या दलं नलिनीदलं तेन कल्पितम्। ३तत्—। नलिनीदलकल्पितं स्तनावरणं यस्मिन्। बहु—।

(c). आतपे—आतपति इति आ+तप+अच् कर्त्तरि=आतपः sun or sunlight. तस्मिन्। अधिकरणे सप्तमी। (d). परिबाधा &c.—परि+बाध+अ भावे स्त्रियाम्=परिबाधा suffering.

3. *Readings.* (a). स्तनावरणा suggests going out with lotus-leaves on the breasts, which is not natural. स्तनावरणम् is preferable. (b). After बलादेनां निवर्त्तयति we read in the Bengali Rec.—

शकुन्तला—मुञ्च मुञ्च मां न खल्वात्मनः प्रभवामि। अथवा सखीमात्रशरणा किमिदानीमत्र करिष्यामि।

राजा—धिग् व्रीडितोऽस्मि।

शकुन्तला—न खल्वहं महाराजं भणामि, दैवमुपालभे।

राजा—अनुकूलकारि दैवं कथमुपालभ्यते।

शकुन्तला—कथमिदानीं नोपालप्स्ये यन्मामात्मनोऽनीशां कृत्वा परगुणैर्लोभयति।

राजा (स्वगतम्)—

अप्यौत्सुक्ये महति दयितप्रार्थनासु प्रतीपाः काङ्क्षन्त्योऽपि व्यतिकरसुखं कातराः स्वाङ्गदाने।

आबाध्यन्ते न खलु मदनेनैव लब्धान्तरत्वाद् आबाधन्ते मनसिजमपि क्षिप्तकालाः कुमार्य्यः॥

(शकुन्तला गच्छत्येव) राजा—न कथमात्मनः प्रियं करिष्ये (उपसृत्य पटान्तमवलम्बते।

Here, as in the interpolation already noticed, the prose portion is trash and serves only to introduce the verse following. But the substance of the verse does not bear scrutiny. Thus—

(1). क्षिप्त does not usually mean 'lost.' क्षिप् means 'to fling.' कालक्षेप occurs in Bengali. व्याक्षेप is not rare in Sanskrit. But क्षिप्त reminds one of the 'insane' and is thus निहतार्थ।

(2). (*a*). In the line कुमार्य्यः न खलु मदनेनैव आबाध्यन्ते किन्तु मदनमपि आबाधन्ते, suppose, instead of मदनमपि, we read मनसिजमपि। The remark loses its force and reads tame. The object of the line is to say that मदन is not only the oppressor but is also the oppressed. The identity of the oppressor and the oppressed is

not prominent when different names are used in referring to the two capacities. Hence मनसिजमपि is अपुष्टार्थ ।

(*b*). Again किन्तु, तु or some other equivalent is necessary in order to contrast with न खलु । अपि does not serve the purpose, for it goes to answer for एव । A cautious writer would have said भाबाधन्ते मदनमपि तु which avoids both the objections (*a*) and (*b*) and preserves the metre too.

(3). Lastly the 2nd line काङ्क्ष्न्योऽपि &c. is a repitation of the 1st line अप्यौत्सुक्ये &c. For काङ्क्ष्न्योऽपि व्यतिकरसुखम् implies the same as अप्यौत्सुक्ये महति, and कातरा: साङ्गदाने does not differ in substance from दयितप्रार्थनाम् प्रतीपा: ।

4. (a). आत्मन:—शेष षष्ठी । आत्मन: सम्बन्धे प्रभवामि इत्यर्थ: । (b). प्रभवामि—प्र + भू means 'to rule', 'to become master', 'to control' &c.

राजा—भीरु अलं गुरुजनभयेन । दृष्ट्वा ते विदितधर्मा तत्रभवान्नात्र दोषं ग्रहीष्यति कुलपति: । अपि च—

गान्धर्वेण विवाहेन बह्व्यो राजर्षिकन्यका: ।
श्रूयन्ते परिणीतास्ता: पितृभिश्चाभिनन्दिता: ॥

KING—O timid one, off with your fear for your superiors. Having known of you, his worship, the lord of anchorites, who is aware of the Sastras, will not take offence at it. Besides, several daughters of royal sages are heard as married by the *Gandharva-marriage* and welcomed by their fathers.

शकुन्तला—मुञ्च दाव मं । भूओवि सहीजणं अणुमाणइस्सं [मुञ्च तावन्माम् । भूयोऽपि सखीजनमनुमानयिष्यामि] ।

SAKUNTALA—Do release me. I will yet again honour my friends.

राजा—भवतु मोक्ष्यामि ।

KING—Well, I will release.

भीरु इति। हे 'भीरु' भयशीले [ऊङि कृते संबुद्धिह्रस्वः] 'गुरुजनभयेन अलम्'। तातः कुप्येत् इति मा मंस्थाः। 'ते' तव सम्बन्धे 'दृष्टा' आमूलं वृत्तं ज्ञात्वा [दृशिरत्र ज्ञानार्थे] 'विदितः' अवगतः 'धर्मः' शास्त्रार्थो यस्य सः, अधिगतविधिः 'तत्रभवान्' मान्यः 'कुलपतिः' पिता ते कण्वः 'अत्र' अस्मिन् त्वत्कृते आत्मसंप्रदानव्यापारे 'दोषं न ग्रहीष्यति'। न केवलं शास्त्रमेवात्र मानम्। 'अपि च आचारोऽपि। पश्य—

गान्धर्वेणेति। अन्वयः—बह्व्यो राजर्षिकन्यका गान्धर्वेण विवाहेन परिणीताः, ताः पितृभिः अभिनन्दिताश्च श्रूयन्ते। व्याख्या—'बह्व्यः' बहुतराः 'राजर्षीणां कन्यकाः' कुमार्यः 'गान्धर्वेण' रहसि परस्परानुमोदनकृतेन 'विवाहेन' ["गान्धर्वः समयान्मिथः" इति स्मृतेः] 'परिणीताः' कृतोद्वाहाः, ततश्च 'ताः' कन्यकाः 'पितृभिः' गुरुभिः 'अभिनन्दिताश्च' अनुमोदिताश्च 'श्रूयन्ते'। तदेहि स एव विवाहो भवतु। ["बह्व्यो राजर्षिकन्यकाः" (रा-, वि-, म-)—"बह्व्योऽथ मुनिकन्यकाः" (त-, न्या-) ॥ "अभिनन्दिताः" (रा-, वि-, म-)—"अनुमोदिताः" (त-, न्या-)] ॥

मुञ्चेति। 'भूयोऽपि' पुनरपि 'सखीजनम् अनुमानयिष्यामि' सम्मानयिष्यामि, सख्यौ अत्र किं मन्येते तज्जिज्ञासया सखीजनं पूजयिष्यामि।

NOTES

1. (a). भीरु—भीरु timid + ऊङ् स्त्रियाम् = भीरूः। This is नदीसंज्ञक। Hence by the rule "अम्बार्थनद्योर्ह्रस्वः" we have भीरु with उ short in the vocative singular. (b). विदितधर्मा—विदितधर्म + अनिच् समासान्त = विदितधर्मा। By the rule "धर्मादनिच् केवलात्"—अनिच् comes after a बहुव्रीहि in which धर्म is final and is preceded by only one पद। When more than one पद precedes धर्म as in परमः स्वः धर्मोऽस्य we shall have परमस्वधर्मः not परमस्वधर्मा। But परमस्वो धर्मोऽस्य will give परमस्वधर्मा because परमस्वः is the only पद preceding धर्म, in the final बहुव्रीहि।

2. *Readings*. (a). शकुन्तला was a राजर्षिकन्यका and not मुनिकन्यका। And गान्धर्वविवाह was not prevalent among *munis*. Hence the former is preferable. (b). अभिनन्दन is more acceptable than mere अनुमोदन and contrasts better with censure (दोषं ग्रहीष्यति) which शकुन्तला apprehends.

4. भूयः—बहु + ईयसुन् once again. The friends have already helped her with their advice regarding her choice. She wants their counsel *again* (भूयस्) with respect to the king's proposal to have the marriage performed in Kanva's absence.

शकुन्तला—कदा [कदा]।

SAKUNTALA—When ?

राजा—

अपरिक्षतकोमलस्य तावत् कुसुमस्येव नवस्य षट्पदेन।
अधरस्य पिपासता मया ते सदयं सुन्दरि गृह्यते रसोऽस्य।

(मुखमस्याः समुन्नमयितुमिच्छति। शकुन्तला परिहरति नाट्येन)।

KING—Meanwhile, O fair one, as is done of the fresh flower, by the bee, the flavour of this your tender and untouched lower lip is being gently tasted by me longing for a sip. *(Tries to raise her face. Sakuntala acts its avoidance).*

नेपथ्ये—चक्कवाकवहुए, आमन्तेहि सहअरं। उवट्ठिदा रअणी [चक्रवाकवधुके, आमन्त्रयस्व सहचरम्, उपस्थिता रजनी]।

IN THE DRESSING ROOM—Ah ! Chakravaka's spouse, bid adieu to your mate, night has approached.

अपरीति। अन्वयः—तावत् हे सुन्दरि, षट्पदेन नवस्य कुसुमस्य इव, पिपासता मया अपरिक्षतकोमलस्य अस्य ते अधरस्य रसः सदयं गृह्यते। व्याख्या—'तावत्' तत्कालं, यावत् मोक्ष्यामि तावत् इत्यर्थः [तावदिति अवधौ। "यावत्तावच्च साकल्येऽवधौ मानेऽवधारणे" इत्यमरः] हे 'सुन्दरि' मनोहारिणि शकुन्तले 'षट्पदेन' भ्रमरेण 'नवस्य' नूतनस्य, अस्पृष्टपूर्वस्य 'कुसुमस्य इव' यथा पुष्पस्य रसो भ्रमरेण गृह्यते तथा, 'पिपासता' पातुमिच्छता, पानार्थमाकुलेन इत्यर्थः 'मया, अपरिक्षतस्य' अस्पृष्टस्य 'कोमलस्य' सुकुमारस्य, अतएव स्पर्शवतश्च 'अस्य ते अधरस्य रसः'

स्वाद: 'हृदयं' कृपामृदु यथा तथा 'गृह्यते' आदीयते। मोक्ष्यामि, किन्तु यावत् मोक्ष्यामि तावत् रसो गृह्यते, इति पूर्वेण सम्बन्ध:। रसे गृहीते मोक्ष्यामि इति फलितम् ["तावत्" (वि-पाठान्तरम्, म-)—"यावत्" (रा-, वि-मूलम्)]।

चक्रेति। हे 'चक्रवाकवधुके' अनुकम्पिते रथाङ्गदयिते 'सहचरं' चक्रवाकम् 'आमन्त्रयस्व' सम्भाषस्व। युवयोर्मिथ: प्रस्थानसमय: प्राप्त:, यत: परिणतो दिवस: 'रजनी उपस्थिता' आगतप्राया। एतच्च शकुन्तलां प्रति सख्यो: सङ्केतवाक्यम्। गौतमी आगच्छति दुष्यन्तं विसर्जय इति भाव:।

NOTES

1. (**a**). अपरिक्षत: &c.—परि + क्षण हिंसायाम् + क्त कर्मणि = परिक्षत: pricked, *i.e.*, *touched*. न परिक्षत:। नञ्तत्—। अपरिक्षतश्चासौ कोमलश्च। कर्मधा—। (**b**). षट्पदेन—षट् पदानि अस्य इति षट्पद: *lit.* having six feet. A name of the back-bee.

2. *Readings*. (**a**). यावत् gives the same sense. The king does not *directly* answer Sakuntala's query "कदा"। (**b**). For शकुन्तला—मुञ्च तावन्माम्···परिहरति नाट्येन the Bengali Rec. reads—

(दिशोऽवलोक्य) कथं प्रकाशं निर्गतोऽस्मि। (शकुन्तलां हित्वा पुनस्तैरेव पदैर्निवर्तते)।

शकु' (पदान्तरे प्रतिनिवृत्य साङ्गभङ्गम्)—पौरव, अनिच्छापूरकोऽपि सम्भाषण-मात्रपरिचितोऽयं जनो न विस्मर्त्तव्य:।

राजा—सुन्दरि, त्वं दूरमपि गच्छन्ती हृदयं न जहासि मे।

दिनावसाने छायेव पुरो मूलं वनस्पते:॥

शकु' (स्तोकमन्तरं गत्वा आत्मगतम)—हा धिक् हा धिक् इदं श्रुत्वा न मे चरणौ पुरोमुखौ प्रसरत:। भवतु एभि: पर्य्यन्तकुरवकैरपवारितशरीरा भूत्वा प्रेक्षिष्ये तावदस्य भावानुबन्धम्। (तथा कृत्वा स्थिता)।

राजा—कथमेवं प्रिये अनुरागैकरसं मामुत्सृज्य निरपेक्षैव गतासि।

अनिर्दयोपभोगस्य रूपस्य मृदुन: कथम्।

कठिनं खलु ते चेत: शिरीषस्येव बन्धनम्॥

शकु'—एतच्छ्रुत्वा न मेऽस्ति विभवो गन्तुम्।

राजा—सम्प्रति प्रियाशून्ये किमस्मिन् लतामण्डपे करोमि। (अग्रतोऽवलोक्य)। हन्त व्याहतं मे गमनम्।

मणिबन्धाद्गलितमिदं संक्रान्तोशीरपरिमलं तस्याः।
हृदयस्य निगड़मिव मे मृणालवलयं स्थितं पुरतः॥

(सबहुमानमादत्ते)।

शकु (हस्तं विलोक्य)—अम्मो दौर्बल्यशिथिलतया परिभ्रष्टमेतन्मृणालवलयं न मया परिज्ञातम्।

राजा (मृणालवलयमुरसि निक्षिप्य)—अहो स्पर्शः।

अनेन लीलाभरणेन ते प्रियं विहाय कान्तं भुजमत्र तिष्ठता।
जनः समाश्वासित एष दुःखभागचेतनेनापि सता न तु त्वया॥

शकु—अतःपरं न समर्थास्मि विलम्बितुम्। भवतु एतेनैवापदेशेनात्मानं दर्शयिष्यामि (इत्युपसर्पति)।

राजा (दृष्ट्वा सहर्षम्)—अये जीवितेश्वरी मे प्राप्ता। परिदेवनानन्तरं प्रसादेनोपकृतोऽस्मि खलु दैवेन।

पिपासाक्षामकण्ठेन याचितश्चाम्बु पक्षिणा।
नवमेघोज्झिता चास्य धारा निपतिता मुखे॥

शकु (राज्ञः सम्मुखे स्थित्वा)—आर्य्य अर्द्धपथे स्मृत्वा एतस्य हस्तभ्रंशिनो मृणालवलयस्य कृते प्रतिनिवृत्तास्मि। कथितं मे हृदयेन त्वया गृहीतमिति। तन्निक्षिपेदम्। मा मामात्मानञ्च मुनिजनेषु प्रकाशयिष्यसि।

राजा—एकेनाभिसन्धिना प्रत्यर्पयामि।

शकु—केन पुनः।

राजा—यदीदमहमेव यथास्थानं निवेशयामि।

शकु—आ का गतिः भवत्वेतत्तावत् (इत्युपसर्पति)।

राजा—इतः शिलापट्टैकदेशं संश्रयावः (इत्युभौ परिक्रम्योपविष्टौ)।

राजा—(शकुन्तलाया हस्तमादाय)—अहो स्पर्शः।

हरकोपाग्निदग्धस्य दैवेनामृतवर्षिणा।
प्ररोहः सम्भृतो भूयः किं स्वित् कामतरोरयम्॥

शकु' (स्पर्शं रूपयित्वा)—त्वरतां त्वरतामार्य्यपुत्रः।

राजा (सहर्षमात्मगतम्)—इदानीमस्मि विश्वसितः। भर्तुराभाषणपदमेतत्। (प्रकाशम्) सुन्दरि, नातिश्लिष्टः सन्धिरस्य मृणालवलयस्य। यदि तेऽभिमतं तदन्यथा घटयिष्यामि।

शकु' (स्मितं कृत्वा)—यथा ते रोचते।

राजा (सव्याजं विलम्ब्य प्रतिमोच्य)—सुन्दरि दृश्यताम्।

अयं स ते श्यामलतामनोहरं विशेषशोभार्थमिवोज्झिताम्बरः।

मृणालरूपेण नवो निशाकरः करं समेत्योभयकोटिमाश्रितः॥

शकु'—न तावदेनं प्रेक्षे पवनकम्पितकर्णोत्पलरेणुना कलुषीकृता मे दृष्टिः।

राजा (सस्मितम्)—यद्यनुमन्यसे तदहमेनां वदनमारुतेन विशदां करवाणि।

शकु'—तदानुकम्पिता भवेयं किन्तु अहं न ते विश्वसिमि।

राजा—मा मैवं नवो हि परिजनः सेव्यानामादेशात् परं न वर्त्तते।

शकु'—अयमेवात्यादरोऽविश्वासजनकः।

राजा (स्वगतम्)—नाहमेवं रमणीयमात्मनः सेवावसरं शिथिलयिष्ये। (मुखमुन्नमयितुं प्रवृत्तः। शकुन्तला प्रतिषेधं रूपयन्ती विरमति)।

राजा—अयि मदिरेक्षणे अलमस्मदविनयाशङ्कया (शकुन्तला किञ्चिद्दृष्ट्वा व्रीड़ावनतमुखी तिष्ठति)।

राजा (अङ्गुलिभ्यां मुखमुन्नमय्य आत्मगतम्)—

आरुणा स्फुरितेनायमपरिक्षतकोमलः।

पिपासतो ममानुज्ञां ददातीव प्रियाधरः॥

शकु'—प्रतिज्ञानमन्थर इव आर्य्यपुत्रः।

राजा—कर्णोत्पलसन्निकर्षादीक्षणमूढ़ोऽस्मि (मुखमारुतेन चक्षुः सेवते)।

शकु'—भवतु प्रकृतिस्थदर्शनास्मि संवृत्ता। लज्जे पुनरनुपकारिणी प्रियकारिण आर्य्यपुत्रस्य।

राजा—सुन्दरि किमन्यत्।

इदमप्युपकृतिपक्षे सुरभि मुखं ते यदाघ्रातम्।

ननु कमलस्य मधुकरः सन्तुष्यति गन्धमात्रेण॥

शकु' (सस्मितम्)—अवसन्नोऽपि पुन: किं करोति ।

राजा—इदम् (इति व्यवसितः । शकुन्तला वक्त्रं ढौकते) ।

This is slovenly in style. In substance it is silly and does not care much for decorum. The passage describes at great length how the मृणालवलय was picked up by Dushyanta and put back on the wrist of Sakuntala. This however contradicts the poet ; for, later on we find the मृणालवलय *still lying in the grove.* Compare "हस्तादभ्रष्टमिदं बिसाभरणमित्यासज्जमानेचणो निर्गन्तुं सहसा न वेतसगृहाद्दीशोऽस्मि शून्यादपि"—*Infra*, which is undoubtedly authentic being common to all the recensions. The interpolation, clumsy as it is, must have been made at a very early date. The साहित्यदर्पण quotes the sloka चारुणा स्फुरितेनायम् &c. from the above. In the twelfth century the line हृदयस्य निगड़मिव मे, as it occurs here, was by वर्द्धमान ascribed to Kalidasa.

3. चक्रवाक &c.—चक्र इत्युच्यते इति चक्र + वच + घञ् कर्मणि = चक्रवाकः । तस्य वधूः । अनुकम्पिता सा इति चक्रवाकवधू + कन् स्त्रियाम् = चक्रवाकवधुका । तत्सम्बुद्धौ । By the rule "केऽणः" long आ, ई, ऊ become short if क of an affix follows. Hence वधू becomes वधु । Here चक्रवाक stands for दुष्यन्त, वधू for शकुन्तला, and रजनी for गौतमी ।

शकुन्तला (ससम्भ्रमम्)—पोरव, असंसअं मम सरीरवुत्तन्तोवलम्भस्स अज्जा गोदमी इदो एव्व आअच्छदि । दाव विडवान्तरिदो होहि [पौरव, असंशयं मम शरीरवृत्तान्तोपलम्भाय आर्य्या गौतमी इत एव आगच्छति । तावत् विटपान्तरितो भव] ।

SAKUNTALA (*with alarm*)—O descendant of Puru, doubtless venerable Gautami is coming this very way to have an account of my body. In the meantime get concealed by twigs.

राजा—तथा । (आत्मानमावृत्य तिष्ठति) ।

KING—As you say. (*Stands concealing himself*).

(ततः प्रविशति पात्रहस्ता गौतमी सख्यौ च)। सख्यौ—इदो इदो अज्जा गोदमी [इत इत आर्य्या गौतमी]।

(*Then enters Gautami with a vase in her hand, and the friends*) FRIENDS—This way, this way, let venerable Gautami proceed.

गौतमी (शकुन्तलामुपेत्य)—जादे अवि लहुसन्दावाइं दे अङ्गाइं [जाते, अपि लघुसन्तापानि ते अङ्गानि]।

GAUTAMI (*Approaching Sakuntala*)—My child, do your limbs suffer less now ?

शकुन्तलेति। 'सम्भ्रमेण' भयेन 'सह'। 'असंशयं' निश्चितं 'मम शरीरस्य वृत्तान्तः' वार्त्ता। तस्य 'उपलम्भाय' परिज्ञानाय। 'इत एव' अस्यामेव दिशि [सप्तम्यर्थे तसिः] 'आगच्छति'। यावत् सा न आयाति 'तावत्' तत्कालं 'विटपैः' शाखाभिः 'अन्तरितः' प्रच्छन्नो 'भव'।

तत इति। 'पात्रं' शान्तिजलस्य पात्रं 'हस्ते' यस्या सा [हस्त-पाणि-प्रभृतिभिर्बहुव्रीहौ सप्तम्यन्तस्य परनिपातो दृश्यते। तच्च गड्वादेराकृतिगणत्वात् बोध्यम्।] 'गौतमी प्रविशति', 'सख्यौ च' प्रविशतः इति विभक्तिविपरिणामः। एतच्च "अहमपि तावद्वैतानिकं शान्त्युदकमस्यै गौतमीहस्ते विसर्जयिष्यामि" इति शिष्योक्तशान्त्युदकभाजनम्।

इत इति। 'इत इतः आर्य्या गौतमी' आगच्छतु इति वाक्यशेषः।

जाते इति। जातमिति अपत्यमात्रमुच्यते। स्त्रियां संबुद्धौ हे 'जाते' पुत्रि शकुन्तले 'अपि अङ्गानि ते लघुः' मन्दः 'सन्तापो' येषां तथाविधानि किम् ? अपिः प्रश्ने। पीडालाघवं जातं न वा।

NOTES

1. (a). शरीर &c.—उप + लभ + घञ् भावे = उपलम्भः accession प्राप्तिः। वृत्तस्य जातस्य अन्तः समाप्तिः वृत्तान्तः the end of what has happened, *i. e.*, all details from beginning to end. Now see Tika. तादर्थ्ये चतुर्थी। (b). तावत्—अवधौ or अवधारणे। (c). विटप &c.—अन्तरम् अन्तर्द्धिः जातमस्य इति अन्तर + इतच् = अन्तरितः hidden. "अन्तरमवकाशावधिपरिधानान्तर्द्धिभेदतादर्थ्ये" इत्यमरः।

2. जाते—जन + कर्त्तरि = जातम् any thing born, *i. e.*, offspring in general. This gives जाता in the feminine. तत्संबुद्धौ ।

शकुन्तला—अज्जे अत्थि विसेसो [आर्य्ये अस्ति विशेषः] ।

SAKUNTALA—There is an improvement, respected Mother.

गौतमी—इमिणा दब्भोदएण णिराबाधं एव्व दे सरीरं भविस्सदि [अनेन दर्भोदकेन निराबाधमेव ते शरीरं भविष्यति]। (शिरसि शकुन्तलामभ्युक्ष्य) वच्छे परिणदो दिअहो। एहि उडजं एव्व गच्छम्ह [वत्से परिणतो दिवसः। एहि उटजमेव गच्छामः]। (प्रस्थिताः)।

GAUTAMI—With this water from Kusa-grass your body will indeed be free from suffering. (*Sprinkling her in the head*) My child the day has ended. Come, let us go to the cottage. (*Start to go out*).

आर्य्ये इति। हे 'आर्य्ये' मान्ये मातः 'विशेषः' उत्कर्षः 'अस्ति'। उपशमः अनुभूयते इत्यर्थः।

अनेनेति। 'अनेन दर्भमिश्रेण उदकेन' जलेन [शाकपार्थिवादिः। इतौ तृतीया] 'ते शरीरं निर्गता आबाधा' पीड़ा यस्मात् यस्य वा तादृशम् 'एव भविष्यति'। न केवलम् उपशमः, किन्तु समूलमेव नाशो भविष्यति।

वत्से इति। 'वत्से' जाते 'दिवसः परिणतः' चरमे यामे स्थितः। सन्ध्या आगतप्राया। रवेस्तापो नास्ति, किमवावस्थानेन, 'एहि उटजमेव गच्छामः'। 'प्रस्थिताः' प्रस्थातुमारब्धाः [आदिकर्मणि क्तः]।

NOTES

1. निराबाधम्—आबाधनम् इति आ + बाध + अ भावे = आबाधा suffering. Now see Tika.

शकुन्तला (आत्मगतम्)—हिअअ पढमं एव्व सुहोवणदे

मनोरहे कादरभावं ण मुञ्चसि। साणुसअविहड्डिअस्स कहं दे सम्पदं सन्दावो [हृदय, प्रथममेव सुखोपनते मनोरथे कातरभावं न मुञ्चसि। सानुशयविघटितस्य कथं ते साम्प्रतं सन्तापः]। (पदान्तरे स्थित्वा प्रकाशम्) लदावलअ, सन्दावहारअ, आमन्तेमि तुमं भूओवि परिभोअस्स [लतावलय, सन्तापहारक, आमन्त्रये त्वां भूयोऽपि परिभोगाय]। (दुःखेन निष्क्रान्ता शकुन्तला सहेतराभिः)।

SAKUNTALA (*Aside*)—My heart, at first, the object of desire readily presenting, you do not at all give up timidity. Now, separated with regrets, how are your regrets (justified) ? *(Stopping after a step or two—Aloud)* O Ivy-bower, remover of my sufferings, I invite thee for enjoyment again. (*Sakuntala sorrowfully leaves with the others*).

हृदय इति। हे 'हृदय प्रथमं मनोरथे' मनोरथविषयीभूते राजनि 'सुखेन' अस्मदीयमायासं विना एव 'उपनते' संप्राप्ते सति 'कातरभावं' भीरुतां 'नैव मुञ्चसि' [एवकारो भिन्नक्रमः]। 'अनुशयेन' पश्चात्तापेन 'सह विघटितस्य' मनोरथेन वियोजितस्य 'ते सन्तापः' अनुशय इत्यर्थः 'कथं साम्प्रतं' युक्तम् ["युक्ते द्वे साम्प्रतं स्थाने" इत्यमरः]। न कथमपि युक्तम्। यद्वा—'साम्प्रतम्' अधुना 'सानुशयविघटितस्य ते कथं सन्तापः' किमर्थम् अनुशयः। अयुक्तोऽयमनुशयः। उभयथा हृदयं प्रति तिरस्कारः। स्थिते अनादरः याते अनुशयः, इत्यसङ्गतं ते इति।

लतेति। लतानां वलयं लताभिर्वलयाकारेण वेष्टितं स्थानम्। तत्संबुद्धिः। हे 'लतावलय' लतागृह, हे 'सन्तापहारक' खेदविनोदन 'भूयोऽपि' पुनरपि 'परिभोगाय' उपभोगाय 'त्वाम् आमन्त्रये' प्रवर्त्तये। प्रार्थये त्वां पुनरपि मे खेदमपनोदय इत्यर्थः। राजानं प्रति सङ्केतोऽयम्।

NOTES

1. प्रथममेव—The एव should be taken with न। Thus नैव मुञ्चसि।

2. (a). सानुशय &c.— अनु + शी + अच् भावे = अनुशयः remorse पश्चात्तापः regret. "भवेदनुशयो द्वेषे पश्चात्तापानुबन्धयोः" इति विश्वमेदिन्यौ। तेन सह सानुशयम्। वि + घट + णिच् + क्त कर्मणि = विघटितम् separated. घट is to join ; विघट is to disjoin. सानुशयं यथा तथा विघटितम्। तस्य। (b). साम्प्रतम्—An अव्यय meaning युक्त proper.

3. (a). लतावलय &c.—Gautami takes it as an innocent address to the grove. It is really meant for the king inside the लतावलय। (b). सन्तापहारक—हरतीति हृ + ण्वुल् कर्त्तरि = हारकः reliever. सम् + तप + घञ् भावे = सन्तापः suffering. सन्तापस्य हारकः। षष्ठीतत्पुरुषः समासः। The plain sense of सन्ताप is here "the summer heat." लतावलय is then evidently सन्तापहारक। Applied to the king, सन्ताप is मदनबाधा which the king has relieved. (c). परिभोगाय—परि + भुज + घञ् भावे = परिभोगः enjoyment. In the case of the लतावलय it is the enjoyment of *shade* ; and in the case of दुष्यन्त, enjoying each other's company. "तुमर्थाच्च भाववचनात्" इति चतुर्थी।

राजा (पूर्वस्थानमुपेत्य सनिश्वासम्)—अहो विघ्नवत्यः प्रार्थितार्थसिद्धयः। मया हि—

मुहुरङ्गुलिसंवृताधरोष्ठं प्रतिषेधाक्षरविक्लवाभिरामम्।
मुखमंसविवर्त्ति पक्ष्मलाक्ष्याः कथमप्युन्नमितं न चुम्बितं तु॥

क्व नु खलु सम्प्रति गच्छामि। अथवा इहैव प्रियापरिभुक्तमुक्ते लतावलये मुहूर्त्तं स्थास्यामि। (सर्वतोऽवलोक्य)

तस्याः पुष्पमयी शरीरलुलिता शय्या शिलायामियं
क्लान्तो मन्मथलेख एष नलिनीपत्रे नखैरर्पितः।
हस्ताद्भ्रष्टमिदं बिसाभरणमित्यासज्जमानेक्षणो
निर्गन्तुं सहसा न वेतसगृहाद्दोशोऽस्मि शून्यादपि॥

KING (*Returning to the former place—Sighing*)—Ah ! How full of hindrances is the fulfilment of objects desired ! Of

that damsel with fine-eye-lashed eyes, the face, with the lower lip covered by the fingers, (therefore) charming through the half-uttered words of prohibition—the face, that was turning constantly towards the shoulders, was indeed lifted somehow by me, but not kissed. Where indeed shall I go now ? Or, here I will stay some time in this ivy-bower that has been enjoyed and vacated by my darling. (*Looking all round*) This is the bed of flowers on the stone pressed down by *her* body—This is the withered love-letter traced on the lotus leaf with *her* nails —This is the lotus-shoot-decoration slipped from *her* hand. With my eyes thus sticking, I am not able to go out in a hurry from the cane-bower even though deserted.

अहो इति। 'प्रार्थितानाम् अर्थानां सिद्धय:' निष्पत्तय: 'विघ्नवत्य:' अतर्कितैर्विघ्नैर्बहुला: [भूम्नि मतुप्]।

मुहुरिति। अन्वय:—पक्ष्मलाक्ष्या: अङ्गुलिसंवृताधरोष्ठं, प्रतिषेधाक्षरविक्लवाभिरामं, मुहु: अंसविवर्त्ति मुखं मया कथमपि उन्नमितं हि न तु चुम्बितम्। व्याख्या—'पक्ष्मले' प्रशस्तरोमवती [प्राशस्त्ये मत्वर्थीयो लच्] 'अक्षिणी' यस्या: तथाविधाया: तस्या: शकुन्तलाया: 'अङ्गुलिभि: संवृत:' रक्षार्थम् आच्छादित: 'अधरोष्ठो' निम्नोष्ठो यस्मिन् तथाविधं, तत: ओष्ठाच्छादनादेव 'प्रतिषेधाक्षरेषु' निषेधव्यञ्जकवर्णेषु 'विक्लवं' दीनम् अस्पष्टोच्चारणेन मोघयतम्। तच तत् 'अभिरामं' मनोहरञ्च, 'मुहु:' वारं वारं 'अंसयो:' स्कन्धयो: 'विवर्त्तते' मां परिहर्त्तुं विवलते यत् तथाविधं 'मुखं मया कथमपि' अतिप्रयत्नेन विघ्नान् व्याधूय 'उन्नमितं हि' उन्नमितमेव 'न तु चुम्बितम्'। बहूनपि विघ्नान् अतीत्य यदाहं तस्या वदनमुन्नमितवान् तदा मेने सिद्धमेव प्रार्थितम्। किन्तु तदैव गौतम्या विघ्नित:, वदनं नैव चुम्बितम्। इति विघ्नवत्य: सिद्धय:। ["चुम्बितं तु" (रा-, त-, व्या-, म-)—"चुम्बितं तत्" (वि-)]॥

क्वेति। 'प्रियया' प्राक् 'परिभुक्तम्' अधुना 'मुक्तम्' यत् तस्मिन् 'लतावलये मुहूर्त्तं' अल्पकालं 'स्थास्यामि'। ["परिभुक्तमुक्ते" (रा-, वि-, म-)—"परिभुक्ते" (त-, व्या-)]॥

सर्वत इति। 'सर्वत:' सर्वासु दिक्षु [सप्तम्यर्थे तसि:] 'अवलोक्य'। अन्वय:—तस्या: शरीरलुलिता शिलायाम् इयं पुष्पमयी शय्या। तस्या: नखै: अर्पित: नलिनीपत्रे

एष क्लान्तो मन्मथलेखः। तस्याः हस्तात् भ्रष्टम् इदं बिसाभरणम्। इति आसज्य-मानेक्षणः (सन्) शून्यादपि वेतसगृहात् सहसा निर्गन्तुं न ईशोऽस्मि। व्याख्या— 'तस्याः' शकुन्तलायाः [एतदुत्तरत्रापि संबध्यते] 'शरीरेण लुलिता' मर्दिता 'शिलायां' प्रस्तरतले 'इयं पुष्पमयी' कुसुमकल्पिता 'शय्या' शयनीयं दृश्यते। अत्र सा विरहिणी शयितासीत् इतीयं मां स्मारयति। तस्या 'नखैः अर्पितः' उत्कीर्णवर्णः 'नलिनीपत्रे' कमलदले 'एष क्लान्तो' म्लानः 'मन्मथलेखः' मदनलिपिः भाति। इह सा मयि भावमवर्णयत् इत्येष मे कथयति। तस्या 'हस्तात् भ्रष्टं' च्युतम् 'इदं बिसाभरणं' मृणालवलयम् आस्ते। अत्रासीत् चुम्बनाध्यवसाय इत्येतन्मे निवेदयति। 'इति' एभिः प्रकारैः 'आसज्यमाने' लग्ने 'ईक्षणे' नेत्रे यस्य तथाविधः सन् 'शून्यादपि' प्रियाविर-हितादपि 'वेतसगृहात्' वानीरवलयात्, 'सहसा' हठात् 'निर्गन्तुं' बहिर्यातुं 'न ईशोऽस्मि' न समर्थोऽस्मि। प्रियोपभुक्तं तत् तत् वस्तु मे दृष्टिं बध्नाति, तेन तेन विशेषेण तां तामवस्थां स्मारितो नाहमितो गन्तुं समर्थः। ["आसज्जमान" (त-, न्या-)—"आसज्यमान" (रा-, वि-, म-)॥ "ईशोऽस्मि" (त-, न्या-)— "शक्नोमि" (रा-, वि-)—"शक्नोस्मि" (म-)]॥

NOTES

1. (a). विघ्नवत्यः—विहन्यते एभिः इति वि + हन + क करणे घञर्थे = विघ्नाः obstacles. ते सन्ति बाहुल्येन आसु इति विघ्न + मतुप् भूम्नि = विघ्नवत्यः full of obstacles. (b). प्रार्थितार्थ &c.—प्रकर्षेण अर्थिता इति प्र + अर्थ + क्त कर्मणि = प्रार्थिताः longed after. प्रार्थिता अर्था वस्तूनि इति प्रार्थितार्थाः longed-for objects. सिध + क्तिन् भावे = सिद्धयः achievements. Now see Tika.

2. (a). अङ्गुलि &c.—अधरः ओष्ठः अधरोष्ठः or अधरौष्ठः the lower lip. कर्मधा—। अङ्गुलिभिः संवृतः covered by the fingers. तृतत्—। तादृशः अधरोष्ठो यस्मिन् तत्। बहु—। (b). प्रतिषेध &c.—प्रति + सिध + घञ् भावे = प्रतिषेधः prohibition. तस्य अक्षराणि words of prohibition, *i. e.*, the exclamation "Don't, O don't" (मा मा)। तत्र विक्लवम् powerless in the words of prohibition, *i. e.*, unable to utter clearly the words of prohibition (मा मा). The प्रतिषेधाक्षर being a *labial* (मा repeated) requires the free use of both lips to utter. But the lower lip was covered by the fingers. Hence the inability. अभि

समन्तात् रमते अनेन इति अभि + रम + घञ् करणे = अभिरामम् charming. प्रतिषेधाक्षरविक्लवम् अतएव अभिरामम्।

3. (a). अंसविवर्त्ति—अंस + वि + वृत् + णिनि कर्त्तरि by the rule "बहुलमाभीक्ष्ण्ये।"—णिनि is sometimes attached to indicate frequency of action. Here the face is *constantly* (आभीक्ष्ण्य) being turned from side to side to avoid the persistent attempts of the king to have a kiss. Hence the rule applies. (b). पक्ष्मलाक्ष्याः—पक्ष्माणि सन्ति मनोहराणि अस्मिन् इति पक्ष्मन् + लच् = पक्ष्मलम् having fine eyelashes. पक्ष्मन् is of the सिध्मादि class and takes लच् by the rule "सिध्मादिभ्यश्च"। तादृशम् अक्षि अस्या इति पक्ष्मलाक्षि + षच् (समासान्त) + ङीष स्त्रियाम् = पक्ष्मलाक्षी। तस्याः। षच् is guided by the rule "बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात् षच्" and here अक्षि is स्वाङ्गवाचक। Raghava thinks that this epithet points to the attraction that draws the king towards the face. (c). नु Expresses regret. तत् for तु takes away the regret which is not proper here, because "अहो" at the beginning of the speech prepares us for some such expression of regret.

4. *Remark.* The sloka substantiates the *general* (सामान्य) statement "विघ्नवत्यः प्रार्थितार्थसिद्धयः"। In the present case चुम्बन is the प्रार्थितार्थ। The obstacles (विघ्न) are numerous. Thus the lower lip is अङ्गुलिसंवृत which is the first obstacle. Then there is the direct prohibition (प्रतिषेध). The third obstacle is the constant turning of the face from side to side (अंसविवर्त्ति). And last of all is the interruption offered by Gautami. Here the *Figure* (अलङ्कार) is अर्थान्तरन्यास defined by दण्डिन् as "ज्ञेयः सोऽर्थान्तरन्यासो वस्तु प्रस्तुत्य किञ्चन। तत्साधनसमर्थस्य न्यासो योऽन्यस्य वस्तुनः॥"

5. (a). प्रिया &c.—पूर्वं परिभुक्तं पश्चात् मुक्तं परिभुक्तमुक्तम् enjoyed and vacated. "पूर्वकालैकसर्वजरत्पुराणनवकेवलाः समानाधिकरणेन" इति पूर्वकालकर्मधा—। प्रियया परिभुक्तमुक्तम्। एतत्—। तस्मिन्। (b). लतावलये—लतानां वलयम्। तस्मिन्। (c). सुहृत्तम्—अत्यन्तसंयोगे २या।

6. आसज्यमानेचण:—Here सञ्ज is used in the आत्मनेपद। Several grammarians think that सञ्ज cannot take the आत्मनेपद in the कर्त्तृवाच्य। Possibly this is the reason why राघव &c. read आसज्यमानेचण: in the कर्मवाच्य। But old writers often use सञ्ज in the आत्मनेपद। Thus

"स वाचा सज्जमानया" with words sticking in his throat ; "येषां नोपरि नाधस्तान्न तिर्यक् सज्जते गतिः" whose course is unimpeded upwards, downwards and oblique &c. in the *Ramayana*. These are not आर्ष (वैदिक) usages, for the भाष्यकार himself says "यदभिप्रायेषु सज्जते" though कालिदास, as we know, does not hesitate to use वैदिक forms. Hence सज्जमान is preferred. In the present instance the king's sight is arrested at every step—here by the flower bed, there by the lotus-bracelet, and elsewhere by the love-letter. He likes to linger and dwell on them.

(आकाशे)—राजन्,

सायन्तने सवनकर्मणि संप्रवृत्ते
वेदिं हुताशनवतीं परितः प्रकीर्णाः ।
छायाश्चरन्ति बहुधा भयमादधानाः
सन्ध्यापयोदकपिशाः पिशिताशनानाम् ॥

IN THE AIR—O king, the evening sacrificial rite being fairy begun, apparitions of cannibals, purple like evening clouds, scattered all round the altar on which there is the consumer of *Ghi* (Fire), move about striking terror in various ways.

राजा—अयमहमागच्छामि । (निष्क्रान्तः) ।

KING—Here, I am coming. (*Exit*).

तृतीयोऽङ्कः—THIRD ACT.

सायमिति । अन्वयः—सायन्तने सवनकर्मणि संप्रवृत्ते, हुताशनवतीं वेदिं परितः प्रकीर्णाः सन्ध्यापयोदकपिशाः पिशिताशनानां छायाः बहुधाः भयमादधानाश्चरन्ति । व्याख्या—सायं भवम् इति 'सायन्तनम्' ["सायंचिर—" इति ट्यु,ल् तुट् च] तस्मिन् । सान्ध्ये 'सवनकर्मणि' होमविधौ 'संप्रवृत्ते' सम्यक् प्रवृत्ते आरब्धे सति,

,हुतं' हविः अश्नाति यः अग्निः तद्वतीं 'वेदिं परितः' वेद्याः समन्तात् 'प्रकीर्णाः' विक्षिप्ताः, अग्नौ प्रदास्यमानं हविः आच्छिद्य ग्रहणार्थं गणशः आगत्य केचित् अत्र, कति च तत्र, केचन पुनरन्यत्र, इति क्रमेण अवस्थिता 'सन्ध्यापयोदः' सान्ध्यमेघ इव 'कपिशाः' पाटलवर्णाः 'पिशिताशनानां' क्रव्यादां 'छायाः' प्रतिबिम्बानि ["छाया सूर्य्यप्रिया कान्तिः प्रतिबिम्बमनातपः" इति कोषः] 'बहुधा' अनेकप्रकारेण 'भयम् आदधानाः' जनयन्त्यः सत्यः 'चरन्ति' विहरन्ति। अधुनैव हुताशे हविर्दास्यते, किन्तु मायिनो राक्षसाः प्राप्ताः, मायया छन्नदेहास्ते अग्नेर्मुखादपि तत् गृह्णीयुः इति भयं नः। तदेहि राजन् रक्षस्व देवतानां भागम् इति भावः। ["प्रकीर्णाः" (त-, न्या-, म-)—"प्रथस्ताः" (रा-, वि-)॥ "सन्ध्यापयोद" (रा-, वि-, म-)— "सन्ध्याभ्रकूट" (त-, न्या-)]।

अयमिति। 'अयम्' इति अविलम्बं सूचयति। "एष यामि" "एष त्वां हन्मि" इत्यादिषु एषशब्दो यथा। त्वरितं यामि, क्षिप्रं हन्मि इत्यादि तदर्थः। इहापि 'अयमहमागच्छामि' क्षिप्रमागच्छामि इत्यर्थः।

NOTES

1. (a). संप्रवृत्ते—सम् + प्र + वृत् + क्त कर्त्तरि or अन्तर्भावितण्यर्थात् कर्मणि = संप्रवृत्तम् that which has progressed. तस्मिन्। The ceremony having advanced, the Rakshasas have made their appearance. The apparitions were not noticed before. (b). हुताशनवतीम्—हुत + अश + ल्यु कर्त्तरि = हुताशनः fire. This supposes अश to be of the नन्द्यादि class. Thus it is that Bhanuji derives पन्नगाशन। But even then "कर्मण्यण्" bars ल्यु and gives the form हुताशः। Better say अश्नातीति अशनः (नन्द्यादि)। हुतस्य अशनः। वतुप्—। तद्वतीम्। The name suggests that आहुति is about to be offered to the fire, but Rakshasas have come to intercept it. (c). भयम्—The भय is not of personal risk, but of the misappropriation of the हुत (Ghi). (b). आदधानाः—आ + धा + शानच् कर्त्तरि। कर्त्रभिप्राये क्रियाफले आत्मनेपदम्। They terrify for their *own* benefit (कर्त्रभिप्राये क्रियाफले)।

चतुर्थोऽङ्कः ।

विष्कम्भकः ।

(ततः प्रविशतः कुसुमावचयं नाटयन्त्यौ सख्यौ) अनसूया —पिअंवदे, जइवि गान्धव्वेण विहिणा णिव्वुत्तकल्लाणा सउन्दला अणुरूपभत्तुगामिणी संवुत्तेति णिव्वुदं मे हिअअं, तहवि एत्तिअं चिन्तणिज्जं [प्रियंवदे, यद्यपि गान्धर्वेण विधिना निर्वृत्तकल्याणा शकुन्तला अनुरूपभर्तृगामिनी संवृत्तेति निर्वृतं मे हृदयं, तथापि एतावच्चिन्तनीयम्] ।

(*Then enter the friends acting the gathering of flowers*). ANASUYA—Priyamvada, though my heart is delighted, because, with her blessings performed by *Gandharva* rites, Sakuntala has become united to a suitable husband, still this much has to be thought about.

प्रियंवदा—कहं विअ [कथमिव] ।

PRIYAMVADA—How is that ?

तत इति । 'कुसुमानाम अवचयं' चयनम् [अवचिनोतेर्भावे अच् ॥ ननु अवचाय इति घञा भाव्यम् । वामनश्च "अवतारावचायशब्दयोर्दीर्घव्यत्यासो बालानाम्" इत्याह ॥ तत्र राघवभट्टः कन्यके इमे वृक्षान् आरुह्य पुष्पाणि चिनुतः, तेन प्रत्यासत्तेरभावात् न घञ् इति समाधत्ते ॥ वयन्तु वृक्षारोहणं न साधु मन्यामहे । शाब्दिकचूडामणिः साक्षादिव सरस्वती कविर्यदि अचमिच्छति अजीवास्तु के नाम तत्र विप्रतिपद्येरन्] 'नाटयन्त्यौ' अभिनयन्त्यौ 'सख्यौ' अनसूयाप्रियंवदे 'प्रविशतः' । ["नाटयन्त्यो" (रा-, वि-)—"अभिनयन्त्यौ" (त-, न्या-, म-)] ।

प्रियमिति । 'शकुन्तला गान्धर्वेण विधिना' अनुष्ठानेन विवाहानुष्ठानेन 'निर्वृत्त कल्याणं' मङ्गलं, विवाहमङ्गलं यस्याः तादृशी सती 'अनुरूपं भर्तारं गच्छति' इति योग्यपात्रस्था इत्यर्थः 'संवृत्ता' जाता 'इति' हेतोः 'यद्यपि निर्वृतं' सुखितं 'मे हृदयं,

तथापि एतावत्' एतन्मात्रं 'चिन्तनीयं' विचारणीयम्। ["विधिना" (रा-, वि-)— "विवाहविधिना" (त-, न्या-, म-)]।

NOTES

1. (a). कुसुमावचयम्—अवचयनम् इति अव + चि + अच् भावे = अवचयः gathering. Now see Tika. The rule "हस्तादाने चेरस्तेये" requires घञ् to be attached to चि when the gathering is from close quarters (*within reach*—प्रत्यासत्ति) excepting cases of theft. The form then becomes अवचाय as we have it in "अन्यत यूयं कुसुमावचाय कुरुध्वमत्रास्मि करोमि सख्यः"। Vamana condemns अवचय (See Tika). The poet however uses the form deliberately, for he repeats it in the मालविकाग्निमित्रम्। The fact is, it is a Vedic form which had not yet disappeared from भाषा at the time of Kalidasa. Raghava defends saying that this is not a case of घञ् at all, for the flowers were really *not* within reach and were reached only by climbing up the tree ! (b). अभिनयन्त्यौ seems to be the better reading. (See p. 287, note 3).

2. (a). गान्धर्वेण—"ब्राह्मो दैवस्तथैवार्षः प्राजापत्यस्तथाऽऽसुरः। गान्धर्वो राक्षसश्चैव पैशाचश्चाष्टमोऽधमः॥" Hence गान्धर्व is a वैधविवाहः and may be called a विधि। (b). विधिना—विधीयते इति वि + धा + कि कर्मणि = विधिः that which is sanctioned. तेन। (c). अनुरूप &c.—अनुगतो रूपम् अनुरूपः suitable. प्रादितत्—। तादृशा भर्ता अनुरूपभर्ता। तं साधु गच्छतीति अनुरूपभर्तृ + गम + णिनि कर्तरि साधुकारिणि। (d). निर्वृतम्—निर् + वृ + क्त कर्तरि satisfied. The root is अकर्मक (when निर् precedes) in this sense. (e). एतावत्—एतत् परिमाणमस्य इति एतद् + डावतु this much. Refers to "आरति वा न वा इति" (next page). Or refers to the whole marriage affair. The affair has to be viewed with misgivings.

3. कथमिव—How "with misgivings"? इव in such cases seems to imply that the speaker is *at a loss* to find out an answer to his query. Compare "कथमिव"—*Infra*, "किमिव"—*Infra*, &c.

अनसूया—अज्ज सो राएसि इट्ठिं परिसमाविअ इसीहिं विसज्जिओ अत्तणो णअरं पविसिअ अन्तेउरसमागदो इदो-

गदं वुत्तन्तं सुमरइ वा ण वेत्ति [अद्य स राजर्षिरिष्टिं परिसमाप्य ऋषिभिर्विसृष्टः आत्मनो नगरं प्रविश्य अन्तःपुरसमागतः इतोगतं वृत्तान्तं स्मरति वा न वा इति]।

ANASUYA—It is this. Dismissed to-day by the *Rishis* after having finished the sacrifice, whether or not that royal sage, having entered his town, associated with the ladies of the inner appartments, remembers the events that transpired here.

प्रियंवदा—विसद्धा होहि [विस्रब्धा भव]। ण तादिसा आकिदिविसेसा गुणविरोहिणो होन्ति। तादो दाणिं इमं वुत्तन्तं सुणिअ ण आणे किं पडिवज्जिस्सदि त्ति [न तादृशा आकृतिविशेषा गुणविरोधिनो भवन्ति। तात इदानीम् इमं वृत्तान्तं श्रुत्वा न जाने किं प्रतिपत्स्यते इति]।

PRIYAMVADA—Rest assured. Excellent features like those do not war with virtue. What Father will do now, having heard of this affair, I do not know.

अद्येति। 'ऋषिभिः इष्टिं' यागं 'परिसमाप्य अद्य विसृष्टः' स्वस्ति भवते नगरं प्रतिनिवर्त्तस्व इति कृताभ्यनुज्ञः 'स राजर्षिः आत्मनो नगरं प्रविश्य अन्तपुरैः' लक्षणया अन्तःपुरवर्त्तिनीभिः महिषीभिः 'समागतः' मिलितः 'इतोगतम्' इहस्थं 'वृत्तान्तं' वार्त्ता 'स्मरति वा न वा इति' एतत् चिन्तनीयम् इति पूर्वेण सम्बन्धः। इयञ्च आविन्या विपर्त्तेर्च्छाया।

विस्रब्धेति। 'विस्रब्धा' विस्रम्भवती, निःशङ्का इति यावत् 'भव'। सम्भ्रमं त्यज। 'तादृशाः' दुष्यन्तसदृशाः 'आकृतिविशेषाः' विशिष्टा आकृतयः, 'गुणविरोधिनो' गुणेन विरोधवन्तो 'न भवन्ति'। रूपेण गुणो वसति। दुष्यन्तस्य यथा रूपं तथा स अनार्य्यं नाचरेत्। मम तु अपरविधा शङ्का। 'इदानीं' जाते कर्मणि 'इमं वृत्तान्तं श्रुत्वा तातः' कण्वः 'किं प्रतिपत्स्यते' अवधारयिष्यति इति 'न जाने'। दुष्यन्तात् निःशङ्का भव, अहन्तु तातात् बिभेमि इति भावः।

NOTES

1. (a). इष्टिम्—इज्यते इति यज+क्तिन् कर्मणि=इष्टिः a sacrifice. नाम्। (b). अन्तःपुर &c.—अन्तःस्थितं पुरम् अन्तःपुरम् the inner apartments. शाकपार्थिवादि। By transference of epithets, this means the *ladies* of the inner apartments. Now see Tika. (c). इतो गतम्—इदम्+सप्तम्यास्तस्=इतः (आद्यादिः) here. गतम् transpired जातम्। इतो गतम् here transpired, सहसुपेति समासः। (d). स्मरति वा न वा—This is pre-sentiment of approaching danger. वृत्तान्तं स्मरति *not* वृत्तान्तस्य स्मरति because there is no शेषत्व here, the कर्म appears as कर्म। Again स्मरति has वर्त्तमानसामीप्ये भविष्यति लट् by the rule "वर्त्तमानसामीप्ये वर्त्तमानवद्वा"।

2. (a). आकृति &c.—आक्रियन्ते इति आ+कृ+क्तिन् कर्मणि=आकृतयः creations, *i. e.*, features. विशिष्यन्ते इति वि+शिष+घञ् कर्मणि=विशेषाः those that are left, *i. e.*, the *best*, because the best remain after the elimination of the worthless. आकृतीनां विशेषाः the best of features, *i. e.*, *persons* having excellent features. इतत्—, the षष्ठी in आकृतीनाम् being शेषे and not निर्द्धारणे। According to कैयट there is no निर्द्धारण unless the individual separated, the class from which it is separated, and the ground of separation are *all* mentioned. Hence the present case has nothing to do with the prohibition "न निर्द्धारणे"। (b). गुणविरोधिनः—गुणान् विरुन्धन्ति इति गुण+वि+रुध+णिनि ताच्छील्ये कर्त्तरि। Or विरोधः अस्ति एषाम् इति विरोध+इनि मत्वर्थे= विरोधिनः opposed. गुणैः विरोधिनः। गुण is here *mental.* The विरोध is एकाधारस्थितेरभावः। The देह is the आधार in which reside these excellent features. The suggestion is that *perfect features* and *perfect mind* reside in amity in the same आधार। So constantly do the two go together, that seeing that one of them (the features) is present, it may be inferred that the other (गुण) is also there.

3. *Remark.* Anasuya apprehends *wilful* neglect of Sakuntala. The king will not have the courage to disclose facts through fear of the other queens. This is a very low estimate of the virtues of Dushyanta. Priyamvada allays her anxiety by

referring to the attractive presence of the king. Such excellent features do not harbour a perverse mind. यत्राकृतिस्तत्र गुणा वसन्ति, hence Dushyanta cannot be unjust to Sakuntala.

अनसूया—जइ अहं देक्खामि तह तस्स अणुमदं भवे [यथा अहं पश्यामि तथा तस्य अनुमतं भवेत्]।

ANASUYA—As I see it, it will be approved hy him.

प्रियंवदा—कहं विअ [कथमिव]।

PRIYAMVADA—How is that ?

अनसूया—गुणवदे कस्सआ पडिवादणिज्जेत्ति अअं दाव पढमो सङ्कप्पो। तं जइ देव्वं एव्व संपादेदि णं अप्पआसेण किदत्थो गुरुअणो [गुणवते कन्यका प्रतिपादनीया इति प्रथमः सङ्कल्पः। तं यदि दैवमेव सम्पादयति ननु अप्रयासेन कृतार्थो गुरुजनः]।

ANASUYA—This indeed is the foremost desire that a daughter has to be given to a virtuous person. If luck alone accomplishes that, verily the superiors have their desire fulfilled without effort.

यथेति। 'अहं यथा' येन प्रकारेण 'पश्यामि तथा' तेन प्रकारेण यदि तातः पश्यति 'तस्य अनुमतम्' अनुमोदितं 'भवेत्'। एकमेव वस्तु भिन्नप्रकारेण दृष्टं भिन्नमिवाभाति। मद्दृष्ट्या यदि तातः पश्येत्, नूनमनुमोदेत सः।

गुणवते इति। 'कन्यका गुणवते' गुणिने 'प्रतिपादनीया' सम्प्रदातव्या 'इति' एष 'प्रथमो' मुख्यः 'सङ्कल्पः' अभिलाषः, गुरुजनस्य इत्यर्थः। 'तम्' सङ्कल्पं 'यदि दैवमेव' गुरुजनस्य प्रयासं विना एकलं दैवं 'सम्पादयति' सफलयति। 'ननु' अवधारणे। 'अप्रयासेन' प्रयत्नाभावेन 'कृतार्थः' सिद्धप्रयोजनो 'गुरुजनः'। कन्या सत्पात्रे देया इति निर्विवादम्। दानञ्च दैवाधीनमपि पुरुषप्रयत्नमपेक्षते। "न हि सुप्तस्य सिंहस्य प्रविशन्ति मुखे मृगाः"। अत्र तातेन कः कृतो यत्नः ? दैवमेव केवलमिमां सत्पात्रस्थामकरोत्। तदत्र तोष एव भविता तातस्य, न रोषः। ["अप्रयासेन" (रा-, वि-)—"अल्पायासेन" (म-)]।

NOTES

1. (a). तस्य—अनुक्ते कर्त्तरि षष्ठी by the rule "क्तस्य च वर्त्तमाने"। (b). अनुमतम्—अनु + मन + क्त कर्मणि वर्त्तमाने।

2. कथमिव—See *Ante*.

3. (a). गुणवते—गुणाः सन्ति अस्य इति गुण + मतुप् = गुणवान् qualified. तस्मै। Used substantively. "विशेषणमात्रप्रयोगो विशेष्यप्रतिपत्तौ" इति वामनः। (b). कृतार्थः—कृतः सिद्धः अर्थः प्रयोजनं यस्य having the purpose served. बहु—। (c). अप्रयासेन—प्र + यस + घञ् भावे = प्रयासः effort. न प्रयासः absence of effort. The नञ् here implies अभाव absence. "तत्-सादृश्यमभावश्च तदन्यत्वं तदल्पता। अप्राशस्त्यं विरोधश्च नञर्थाः षट् प्रकीर्त्तिताः॥"

प्रियंवदा (पुष्पभाजनं विलोक्य)—सहि अवइदाइं बलिकम्मपज्जत्ताइं कुसुमाइं [सखि, अवचितानि बलिकर्मपर्य्याप्तानि कुसुमानि]।

PRIYAMVADA(*Looking at the flower-basket*)—Friend, enough flowers have been gathered for the rite of *Bali* (offering).

अनसूया—णं पिअसहीए सउन्दलाए सोहग्गदेवआ अच्चणीआ [ननु प्रियसख्याः शकुन्तलायाः सौभाग्यदेवता अर्चनीया]।

ANASUYA—Should not the [*Or*—Verily the] god of success of our dear friend Sakuntala be worshipped? [*Or*—has to be worshipped.]

प्रियंवदा—जुज्जदि [युज्यते]। (तदेव कर्माभिनयतः)।

PRIYAMVADA—Right! (*They act the same act*).

(नेपथ्ये)—अयमहं भोः।

IN THE DRESSING ROOM—Here I am, Ho!

अनसूया (कर्णं दत्त्वा)—सहि अदिधीणं विअ णिवेदिदं [सखि अतिथीनामिव निवेदितम्]।

ANASUYA (*Listening*)—Friend, the call is like that of guests.

पुष्पे ति। 'पुष्पाणां भाजनं' पात्रं 'विलोक्य'। 'बलिकर्मणे' बलिक्रियार्थं 'पर्य्याप्तानि' प्रचुराणि 'पुष्पाणि अवचितानि' गृहीतानि। अधिकेनालम्।

नन्विति। 'ननु' प्रश्ने। 'सुभगा' भाग्यवती। तस्या भाव: 'सौभाग्यम्' [अत्र "हृद्भगसिन्ध्वन्ते पूर्वपदस्य च" इत्युभयपदवृद्धि:]। पतिगृहे सत्कार एव नारीणां सौभाग्यम्। तस्य 'देवता' तदधिष्ठात्री देवता इत्यर्थ:। प्रागेव अनसूया "इतिगतं स्मरति न वा" इति पतिगृहे अनादरं शङ्कितवती। प्रियंवदया च "विस्रब्धा भव" इत्युक्तम्। तथापि शङ्कमाना एव "ननु सौभाग्यदेवता अर्चनीया" इति पृच्छति। ननु प्रश्ने।

तदेवेति। 'तदेव' पुष्पचयनमेव 'अभिनयत:' नाट्येन दर्शयत:। ["अभिनयत:" (त-, न्या-)—"आरभेते" (रा-, वि-, म-)]।

सख्यौति। 'निवेदितं' निवेदनम् [भावे क्त:]। यथा 'अतिथीनां' निवेदितम् एतदपि तथैव श्रूयते। मन्ये कश्चिदतिथि: प्राप्त: इत्यर्थ:। ["अतिथीनाम्" (रा-, वि-)—"अतिथिना" (त-, न्या-, म-)]॥

NOTES

1. बलिकर्म &c.—परि + आप + क्त कर्मणि = पर्य्याप्तानि sufficient. बलि is पूजा। बलि: कर्म अनुष्ठानं बलिरेव कर्म इति वा बलिकर्म performance of worship, इतत्—; or, the act of worshipping, कर्मधा—। तस्मै पर्य्याप्तानि। सह्सुपेति समास:।

2. ननु—If प्रश्न, then the speech is a timid suggestion to worship *luck*, because अनसूया apprehends *slight* while प्रियंवदा is sure of *favour*. Or take ननु as आक्षेपे, *i. e.*, implying a bold contradiction of Priyamvada's statement that *enough* flower is already gathered. In either case, अनसूया *wants to gather more.*

3. (a). युज्यते—कर्त्तरि लट्। दिवादि:। प्रियंवदा admits the need of having more. (b). तदेव कर्म—The very same act, *i. e.*, कुसुमावचयन। (c). अभिनयत:—This seems to decide in favour of the reading कुसुमावचयमभिनयन्त्यौ instead of कुसुमावचयं नाटयन्त्यौ—*Ante.* (d). The reading आरभेते implies that कुसुमचयन is only begun for the *first time.* This is contradicted by तदेव, *i. e.*, यत् कर्म प्रकान्तं तदेव। Besides from the प्रकरण we know they were already at it for some time. Hence अभिनयत: has to be preferred.

4. भो:—In announcing one's self "भो: शब्दं कौत्स ये़दन्ते" ।

5. अतिथीनामिव &c.—With the reading अतिथिना &c. explain अतिथिना निवेदितमिव आत्मनिवेदनं कृतमिव । मन्ये कश्चिदतिथि: प्राप्त इत्यर्थ: । This too is a good reading.

प्रियंवदा—णं उडजे सण्णिहिदा सउन्दला [ननु उटजे सन्निहिता शकुन्तला] । (आत्मगतम्) अज्ज उण हिअएण असण्णिहिदा [अद्य पुन: हृदयेनासन्निहिता] ।

PRIYAMVADA—Well, Sakuntala is at hand in the cottage. (*Aside*) But not-at-hand at heart, to-day.

अनसूया—होदु, अलं एत्तिएहिं कुसुमेहिं [भवतु, अलमेतावद्भि: कुसुमै:] । (प्रस्थिते) ।

ANASUYA—Well, these flowers are enough. (*Begin to retire*).

नेपथ्ये—आ: अतिथिपरिभाविनि—

विचिन्तयन्ती यमनन्यमानसा
तपोधनं वेत्सि न मामुपस्थितम् ।
स्मरिष्यति त्वां न स बोधितोऽपि सन्
कथां प्रमत्त: प्रथमं कृतामिव ॥

IN THE DRESSING ROOM—Ah, you slighter of guests! He—thinking of whom with mind undiverted thou dost not notice me, rich in penance, standing near—shall not recognise you though reminded, as does a maniac the previously uttered speech.

नन्विति । 'ननु' अवधारणे । 'सन्निहिता' समीपवर्तिनी । सैव अतिथे: सत्कारं करिष्यति । अलमावयो: संभ्रमेण इत्यर्थ: । 'अद्य पुन:' दुष्यन्तस्य नगरप्रत्यावर्तनात् तद्गतचित्तया 'हृदयेन' मनसा [अभेदे कारणे तृतीया] 'असन्निहिता' उटजे नास्ति । देहेन सा तत्र, मनसा तु हस्तिनापुरे । तथाविधया तया अतिथिसत्क्रिया

ैव वा भवेत्। ["उटजे सन्निहिता" (त-, न्या-)—"उटजसन्निहिता" (रा-, वि-, म-) ॥

भवत्विति। 'एतावद्भिः' एतत्परिमितैः 'कुसुमैः', यानि चितानि तैः 'अलम्' कर्म सम्पत्स्यते। [अत्र सम्पादनक्रिया गम्यमाना। तां प्रति कुसुमानां करणत्वात् तृतीया]।

आः इति। 'अतिथिं परिभवति' अवमन्यते या तत्संबुद्धिः ["न भाभू—" इति णत्वनिषेधः]।

विचिन्तेति। अन्वयः—अनन्यमानसा यं विचिन्तयन्ती तपोधनं माम् उपस्थितं न वेत्सि, सः, प्रमत्तः प्रथमं कृतां कथामिव, बोधितोऽपि सन् त्वां न स्मरिष्यति। व्याख्या—अविद्यमानमन्यत् यस्य आलम्बनत्वेन तत् 'अनन्यं' तन्मयमित्यर्थः ["नञो-ऽस्त्यर्थानाम्—" इति बहुव्रीहिरुत्तरपदलोपश्च वैकल्पिकः]। तादृशं 'मानसं' मनो यस्याः [प्रज्ञाद्यण्]। तादृशी, तदेकचित्ता, सती 'यं' जनं दुष्यन्तमित्यर्थः 'विचिन्तयन्ती।' ध्यायन्ती त्वं 'तपोधनं' महत्तपसो निधिं 'मां' दुर्वाससम् 'उपस्थितं' समीपे वर्त्तमानमपि 'न वेत्सि' न बुध्यसे 'सः' ते मनोगतो जनः 'प्रमत्तः' प्रकृष्टं मत्तो जनः, उन्मत्त इत्यर्थः 'प्रथमम्' उन्मादृदशायाः पूर्वं 'कृतां' गदितां 'कथामिव बोधितोऽपि सन्' स्मारितः सन्नपि 'त्वां न स्मरिष्यति'। स्वयं तु नैव स्मरिष्यति, परं त्वया स्मारितोऽपि न स्मरिष्यति।

NOTES

1. (a). सन्निहिता—सम् + नि + धा + क्त कर्त्तरि। सम् + नि + धा is here अकर्मक। (b). हृदयेन—The fact is, the body is in the cottage, but हृदयम् असन्निहितम् the heart is away. But 'body' and 'mind' together make up the 'individual'. When the body is identified (अभेद) with the individual, we get सन्निहिता शकुन्तला; but identifying the mind, we have असन्निहिता शकुन्तला। Hence अभेदे करणे तृतीया।

2. अलम् &c.—This much of flowers will do. करणे तृतीया।

3. अतिथिपरि &c.—An अतिथि is सर्वदेवमय। Darest thou slight him? आः implies कोप। "आस्तु स्यात् कोपपीड़योः" इत्यमरः। The reading अतिथिपरिभाविणि with the cerebral ण sometimes occurs. But the rule "न भा भू पू कमि गमि प्यायि वेपाम्" prohibits the cerebral

in the case of न in a कृत् coming after भा, भू &c. I therefore prefer to read भतिथिपरिभाविनि with the dental न।

4. (a). अनन्य &c.— मन एव इति मनम्+अण्=मानसम् प्रज्ञादि। In the feminine this becomes मानसी with ङीप् by the rule "टित् ढ अण् —" &c. The same form is expected if मानस is final in a compound because तदन्तविधि is allowable in the case of a स्त्रीप्रत्यय, as is seen in कुम्भकारो। "अस्मात्र प्रकरणे तदन्तविधि:"—*Vrittikara*. Yet we have here मानसा owing to the prohibition "अनुपसर्जनात्" (when the final in a compound is अदन्त and an उपसर्जन, it will take टाप् as usual). (**b**). तपोधनम्, माम्—This shows the gravity of the offence. The slight is offered not to any ordinary passer-by, but to *me* दुर्वासस् (माम्), the very *repository of asceticism* (तपोधनम्)। (**c**). उपस्थितम्—Again, you offend me not as you meet me casually by the road-side, but even when uninvited I condescend to come to your door and *stand by you* (उपस्थित)। (**d**). त्वाम्—We do not get षष्ठी because there is no शेषविवक्षा। (**e**). अपि—For force see Tika. (**f**) कृताम्—Uttered. अनेकार्थत्वाद्धातूनां करोतिरत्र भाषणार्थ:।

प्रियंवदा—हद्धी हद्धी अप्पिअं एव्व संवुत्तं। कस्सिंपि पूआरिहे अवरद्धा सुण्णहिअआ सउन्दला [हा धिक्, हा धिक्, अप्रियमेव संवृत्तम्। कस्मिन्नपि पूजार्हे अपराद्धा शून्यहृदया शकुन्तला]। (पुरोऽवलोक्य) ण क्खु जस्सिं कस्सिंपि। एसो दुव्वासो सुलहकोवो महेसो तह सविअ अविरलपादतुवराए गदए पडिणिउत्तो [न खलु यस्मिन् कस्मिन्नपि। एष दुर्वासा: सुलभकोपो महर्षि: तथा शप्त्वा अविरलपादत्वरया गत्या प्रतिनिवृत्त:]। को अण्णो हुदवहादो दहिदुं पहवदि [कोऽन्य: हुतवहात् दग्धुं प्रभवति]।

PRIYAMVADA—Alas! Alas! The undesirable has indeed happened. Sakuntala with her heart a blank has sinned against some person deserving worship. (*Looking in advance*)

Indeed not against any ordinary person ! Here is the easily-excited great sage Durvasas, having cursed like that, coming back with a speed which is quick and short-stepped. Who else but fire is able to burn ?

हाधिगिति। 'हा' खेदे। 'धिक्' निन्दायाम्। दुःखेन आत्मनो भाग्यं निन्दति [आवेगे द्विरुक्तम्]। 'अप्रियमेव संवृत्तं' जातम्। "अद्य पुनः हृदयेन असन्निहिता" इति यन्मया शङ्कितं तदेव प्राप्तम् इत्येवकारार्थः। 'पूजार्हे' पूज्ये 'कस्मिन्नपि' जने। 'शून्यं' विविक्तम्। मनसो दुष्यन्तं प्रति गतत्वात् 'शून्यं हृदयं' हृत्पद्मसद्म यस्याः तथाविधा 'शकुन्तला अपराद्धा' पूजामदत्वा कृतापराधा [कर्त्तरि क्तः]। 'न खलु यस्मिन् कस्मिन् अपि' सुप्रसादे स्थले। 'एष सुलभः कोपो' यस्य तथाविधः, कोपनः इत्यर्थः, 'महर्षिर्दुर्वासाः' अत्रिपुत्रः 'तथा' तेन प्रकारेण, कठोरमित्यर्थः, 'शप्त्वा अविरलपादा' अदूरन्यस्तचरणा 'त्वरा' चिप्रता यस्यां तथाविधया 'गत्या प्रतिनिवृत्तः' उटजात् प्रत्यायातः। द्रुतपादक्षेपं निवर्त्तते इत्यर्थः। 'हुतवहात्' अग्नेः 'अन्यः' इतरः ["अन्यारात्—" इति पञ्चमी] 'कः दग्धुं प्रभवति' ईष्टे। यद्यन्यः स्यात् तथाभूतां शकुन्तलां दृष्ट्वा दयेत न शपेत् इत्यर्थः।

NOTES

1. (a). पूजार्हे—पूजामर्हति इति पूजा + अर्ह + अण् कर्त्तरि = पूजार्हः deserving worship. तस्मिन्। विषये सप्तमी। (b). अपराद्धा—अप + राध + क्त कर्त्तरि स्त्रियाम्। The root is अकर्मक and takes कर्त्तरि क्त by the rule "गत्यर्थाकर्मक—"। (c). शून्यहृदया—Her *mind* is with Dushyanta, hence the *heart* is a *blank* (शून्य)। She is unconscious of her surroundings.

2. (a). यस्मिन् कस्मिन्—This is an idiomatic combination of यद् and किम् to express an ordinary character. Compare "यानि कानि च मित्राणि कर्त्तव्यानि"—Friends have to be secured no matter who. Also in combination of तद् compare "येन तेन प्रकारेण कार्य्यसिद्धिः"—The work should be done by whatever means possible. (b). सुलभकोपः—सुखेन लभ्यते इति सु + लभ + खल् कर्मणि = सुलभः easily accessible. तादृशः कोपो यस्य whose anger is easily excited. (c). अविरल &c.—विरल "scanty" is "few and far between" as in "ग्रीष्म-

विरलपादपच्छायासु"—Act II, *Ante.* Hence न विरला: अविरला: *not* few and far between. अविरला: पादा: पदक्षेपा: यस्यां सा अविरलपादा in which the steps were not few and far between. बहु—। तादृशी त्वरा यस्यां सा in which there was haste with short and quick steps. बहु—।

3. क: अन्य: &c.—हुतस्य वह: हुतवह: । तस्मात् । The Bengali Recn. gives this and गच्छ पादयो: &c. together as one speech attributed to प्रियंवदा । I have followed Raghava in the allotment of speeches and actors here, though it seems there are reasons to prefer the arrangement of the Beng. Recn.

अनसूया—गच्छ पादेसु पणमिअ णिवत्तेहि णं, जाव अहं अग्घोदअं उपकप्पेमि [गच्छ, पादयो: प्रणम्य निवर्त्तय एनम्, यावदहम् अर्घोदकम् उपकल्पयामि] ।

ANASUYA—Go, bring him back by bowing at his feet, whilst I collect water and offerings of worship.

प्रियंवदा—तह [तथा] । (निष्क्रान्ता) ।

PRIYAMVADA—As you say. (*Exit*).

अनसूया (पदान्तरे स्खलितं निरूप्य)—अम्मो आवेअक्खलिदाए गईए पब्भट्टं मे अग्गहत्थादो पुप्फभाअनं [अम्मो आवेगस्खलितया गत्या प्रभ्रष्टं मे अग्रहस्तात् पुष्पभाजनम्] । (पुष्पोच्चयं रूपयति) ।

ANASUYA (*Acting slipping at the next step*)—Oh ! The flower basket has dropped from the tip of my hand [finger] my step having slipped through anxiety. (*Acts the gathering of flowers*).

गच्छेति । 'एनं' दुर्वाससं 'पादयो:' चरणयो: [अवच्छेदे सप्तमी । केशेषु गृहीत्वा चौरं ताड़यति इति यथा । राघवस्तु "द्वितीयार्थे सप्तमी" इत्याह । तद्प्रयोजनम्] 'प्रणम्य' आनादं नत्वा इत्यर्थ: 'निवर्त्तय' उटजं प्रत्यानय । 'यावत्' अवधौ । यावत् स प्रत्यागच्छति तावत् 'अहम् अर्घं' दूर्वाक्षतादिकं पूजाद्रव्यम् 'उदकं' जलञ्च समाहृत्य 'उपकल्पयामि' पूजोपहारं रचयामि ।

भग्नो इति। 'भग्नो' इत्यादेरो। 'आवेगेन' दुर्वासोवृत्तान्तात् जातेन सम्भ्रमेण 'स्खलितया गत्या' [हेतौ तृतीया] 'मे'। अग्रश्चासौ हस्तश्च 'अग्रहस्तः' हस्ताग्रम् अङ्गुल्य इत्यर्थः ["हस्ताग्राग्रहस्तादयो गुणगुणिनोर्भेदाभेदाभ्याम्" इति वामनः] तस्मात् 'पुष्पभाजनं प्रभ्रष्टं' पुष्पाणि च भूमौ पतितानि। दुर्निमित्तमेतत् अशुभ-सूचकम्। 'पुष्पाणां' भूपतितानाम् 'उच्चयं' संग्रहम् ["उच्चयस्य प्रतिषेधो वक्तव्यः" इति घञ्निषेधात् अच् भावे] 'रूपयति' अभिनयति।

NOTES

1. अर्घोदकम्—अर्घस्य उदकञ्च तयोः समाहारः। Or अर्घसहितम् उदकम्। शाकपार्थिवादि। "आपः क्षीरं कुशाग्रञ्च दधि सर्पिः सतण्डुलम्। यवः सिद्धार्थकश्चैव अष्टाङ्गोऽर्घः प्रकीर्त्तितः॥" सिद्धार्थकः श्वेतसर्षपः।

2. पदान्तरे—अन्यत् पदं पदान्तरम् next step. नित्यसमास of the मयूरव्यंसकादि class. तस्मिन्।

(प्रविश्य) प्रियंवदा—सहि पकिदिवक्को सो कस्स अणु-णअं पडिगेह्लदि। किं वि उण साणुक्कोसो किदो [सखि प्रकृतिवक्रः स कस्य अनुनयं प्रतिगृह्णाति। किमपि पुनः सानु-क्रोशः कृतः]।

PRIYAMVADA (*Entering*)—Friend, perverse by nature, whose entreaties does he accept ? Yet he was made somewhat relenting.

अनसूया (सस्मितम्)—तस्सिं बहु एदम्पि। कहेहि। [तस्मिन् बहु एतदपि। कथय]।

ANASUYA (*With a smile*)—In him, even this is much. Tell me.

प्रियंवदा—जदा णिवत्तिदुं ण इच्छदि तदा विण्णविदो मए—भअवं पढमंत्ति पेक्खिअ अविण्णादतवप्पहावस्स दुहि-दुजणस्स भअवदा एक्को अवराहो मरिसिदव्वोत्ति [यदा निव-र्त्तितुं नेच्छति तदा विज्ञापितो मया—भगवन् प्रथममिति

प्रेच्य अविज्ञाततप:प्रभावस्य दुहितृजनस्य भगवता एकोऽपराधो मर्षयितव्य इति]।

PRIYAMVADA—When he did not wish to return, he was solicited thus by me—O all-powerful one, seeing this is the first, this single offence of one, who is as thy daughter, and does not know the power of penance, has to be pardoned by thy mighty self.

सखीति। 'प्रकृत्या वक्र:' असरल: 'स कस्य अनुनयं' प्रसादनं 'प्रतिगृह्णाति'। दुष्प्रसाद: स:। 'किमपि पुन:' कियन्मात्रं तु 'सानुक्रोश:' सदय: 'कृत:'।

तस्मिन्निति। 'तस्मिन्' दुर्वाससि 'एतदपि' किमपि सानुक्रोश: कृत: इत्यपि 'बहु'। यो नैव प्रसीदति तस्य स्वल्पोऽपि प्रसाद: आदर्तव्य: इत्यर्थ:।

यदेति। 'यदा' स 'निवर्त्तितुं नेच्छति तदा मया इति' एवं 'विज्ञापित:' आवेदित: स:—हे 'भगवन् अविज्ञात:' अविदित: 'तप:प्रभावो' भवतस्तपोबलं यस्य तथाविधस्य 'दुहितृजनस्य' कन्यास्थानीयस्य 'एक: अपराध:' न द्वौ नापि त्रय: 'प्रथमं' नूतनम् 'इति प्रेत्य भगवता मर्षयितव्य:' क्षन्तव्य:।

NOTES

1. (a). प्रतिगृह्णाति—स्वीकरोति। "प्रतिग्रह: स्वीकरणे" इत्यादि मेदिनी। (b). सानुक्रोश:—अनु + क्रुश + घञ् भावे = अनुक्रोश: pity दया। "कृपा दयानुकम्पा स्यादनुक्रोश:" इत्यमर:। तेन सह। बहु—।

2. (a). इच्छति—This sort of लट् is idiomatic. Compare "यावत् खनति तावत्ताम्रमयी भूमि:"—*Panchatantra*. "न तावदेनां पश्यसि येनैवमवादी:"—Act II, &c. (b). प्रथमम्—सामान्ये नपुंसकम्। It does not qualify अपराध:।

अनसूया—तदो तदो [ततस्तत:]।

ANASUYA—Then, what then ?

प्रियंवदा—तदो—मे वअणं अण्णहा भविदुं णारिहदि, किन्दु अहिण्णाणाभरणदंसणेण सावो णिवत्तिस्सदि—त्ति मन्तअन्तो सअं अन्तरिहिदो [ततो—मे वचनमन्यथा भवितुं नार्हति

किन्तु अभिज्ञानाभरणदर्शनेन शापो निवर्त्तिष्यते—इति मन्त्रयमाणः स्वयमन्तर्हितः।

PRIYAMVADA—Then he bodily disappeared as he was saying this—My pronouncement does not deserve to be otherwise, but the curse shall leave at the sight of some ornament of identification.

अनसूया—सक्कं दाणिं अस्ससिदुं। अत्थि तेन राएसिणा सम्पत्थिदेण सणामहेअङ्किअं अङ्गुलीअअं सुमरणीअं त्ति सअं पिणद्धं। तस्सिं साहीणोवाआ सउन्दला भविस्सदि [शक्यमिदानीमाश्वसितुम्। अस्ति तेन राजर्षिणा सम्प्रस्थितेन स्वनामधेयाङ्कितम् अङ्गुलीयकं स्मरणीयमिति स्वयं पिनद्धम्। तस्मिन् स्वाधीनोपाया शकुन्तला भविष्यति]।

ANASUYA—It is now possible to cherish hope. There is the ring stamped with his name, fastened on as a memento by the royal sage himself when departing. In it [*Or*—With that] Sakuntala will be provided with a remedy at her own control.

तत इति। 'ततः इति' वक्ष्यमाणं 'मन्त्रयमाणः' भाषमाण एव 'स्वयम्' आत्मना 'अन्तर्हितः'। मन्त्रणमाह—'मे वचनम् अन्यथा भवितुं न अर्हति'। शकुन्तलां दुष्यन्तो विस्मरिष्यत्येव। 'किन्तु'। अभिज्ञायते येन तत् 'अभिज्ञानं' परिचायकम् [अङ् करणे] तादृशं यत् 'आभरणं' भूषणं, यत् किञ्चिदपि, तस्य 'दर्शनेन' [हेतौ तृतीया] 'शापो निवर्त्तिष्यते' निवृत्तो भविष्यति। प्रथमं विस्मृत्य पश्चात् अभिज्ञानं दृष्ट्वा स्मरिष्यति इति भावः।

शक्यमिति। 'इदानीम्' अधुना अनया वाचा 'आश्वसितुं शक्यं' कथञ्चित् आश्वस्ता भवामि। कारणमाह—'सम्प्रस्थितेन' प्रस्थातुमुद्युक्तेन 'तेन' राजर्षिणा स्मर्यतेऽनेन इति 'स्मरणीयम्' स्मरणसाधनमित्यर्थः ["कृत्यल्युटो बहुलम्" इति बहुलग्रहणात् अत करणे अनीयर्] 'इति' कृत्वा 'स्वयं पिनद्धम्' आसञ्जितम् 'स्वस्य नामधेयेन' नाम्ना 'अङ्कितं' मुद्रितम् 'अङ्गुलीयकम् अस्ति'। 'तस्मिन्' अङ्गुलीयके

सति 'शकुन्तला स्वाधीनः' स्वायत्तः 'उपायः' शापनिवर्त्तनोपायो यस्याः तादृशी 'भविष्यति'।

NOTES

1. (a). अभिज्ञान &c.—अभिज्ञानम् आभरणम् अभिज्ञानाभरणम् an ornament which is the means of identification, *i. e.*, which bears some marks by which it may be known that it belongs to the king. कर्मधा—। तस्य दर्शनम्। तेन। (b). निवर्त्तिष्यते—optionally निवर्त्स्यति। (c). अन्तर्हितः—अन्तर्+धा+क्त कर्त्तरि। गतिसमास by the rule "अन्तरपरिग्रहे"।

2. सम्प्रस्थितेन—सम्+प्र+स्था+क्त आदिकर्मणि कर्त्तरि=सम्प्रस्थितः about to depart. तेन।

3. (a). स्मरणीयम्—स्मरत्यनेन इति स्मृ+अनीयर् करणे बाहुलकात् (See Tika) that which reminds. The ring with the king's name engraved on it will remind Sakuntala of her royal spouse. (b). इति—See Tika. Or take it as हेतौ। He left the ring *because* (इति) it will remind. "इति हेतुप्रकरणप्रकर्षादिनिवृत्तिषु। एवमर्थे समाप्तौ च—" इति मेदिनी। (c). स्वाधीनोपाया—उपायते अनेन इति उप+अय+घञ् करणे=उपायः that by which one goes (अयते) near (उप), *i. e.*, attains the desired object, *i. e.*, *means*. स्वस्मिन् अधि इति स्व+अधि+ख स्वार्थे नित्यम् =स्वाधीनः under one's own control. सप्तमीतत्—by the rule "सप्तमी शौण्डैः" the अधि being of the शौण्डादि class. By the rule "अषडक्ष-आशितङ्गु-अलंकर्मन्-अलंपुरुष-अध्युत्तरपदात् खः", ख (ईन) is always added after compounds with अधि as final. Or thus—इनं स्वामिनम् अधिगतः अधीनः subject. प्रादितत्—। "अधीनो निघ्न आयत्तः" इत्यमरः। स्वस्मिन् अधीनः। In both the cases we say स्वस्मिन् and not स्वस्याम् in the feminine, because स्व in the sense 'self' (आत्मन्) is always masculine. "स्वो ज्ञातावात्मनि स्वं त्रिष्वात्मीये स्वोऽस्त्रियां धने" इत्यमरः। But the former derivation is preferable ; for, if the latter is allowed, it seems useless to read अधि as शौण्डादि and to direct "—अध्युत्तरपदात् खः"। स्वाधीनः उपायो यस्याः।

प्रियंवदा—सहि एहि देवकज्जं दाव से निव्वत्तेम्ह [सखि एहि देवकार्य्यं तावत् अस्या निर्वर्त्तयावः]। (परिक्रामतः)।

PRIYAMVADA—Come, friend, we go and perform her rites to the gods. (*They walk round*).

प्रियंवदा (अवलोक्य)—अणसूए, पेक्ख दाव वामहत्थोवहिदवअणा आलिहिदा विअ पिअसही भत्तुगदाए चिन्ताए। अत्ताणंवि ण एसा विभावेदि किं उण आअन्तुअं [अनसूए, प्रेचस्व तावत् वामहस्तोपहितवदना आलिखिता इव प्रियसखी भर्तृगतया चिन्तया। आत्मानमपि न एषा विभावयति किं पुनरागन्तुकम्]।

PRIYAMVADA (*Looking outside*)—See Anasuya, our dear friend, with her thought centered in her husband, her face placed on her left hand, looks like one painted. She is not aware of her own self even, what to speak of a stranger.

सखीति। 'एहि' आगच्छ 'अस्याः' शकुन्तलायाः 'देवकार्य्यं तावत् निर्वर्त्तयावः' कुर्वः। ["तावदस्याः" (त-, न्या-)—"तावत्" (रा- वि-, म-)]॥

अनसूयेति। 'प्रियसखी' शकुन्तला 'भर्त्तारं' पतिं दुष्यन्तं 'गतया' प्राप्तया, स्वामिसम्बन्धिन्या इत्यर्थः 'चिन्तया' [इत्थंभूते तृतीया] 'वामहस्ते उपस्थितं' स्थापितं 'वदनं' यस्याः तादृशी सती 'आलिखिता' चित्रन्यस्ता 'इव' लक्ष्यते। 'एषा' एतदवस्था इयम् 'आत्मानमपि न विभावयति' बुध्यते 'किं पुनरागन्तुकं' सम्प्राप्तमतिथिम्।

NOTES

1. *Reading*. तावदस्याः is better than तावत्, because **अस्याः** makes it clear that they mean to propitiate the **सौभाग्यदेवता** spoken of before.

2. (a). तावत्—This is **अवधारणे** emphasising **प्रेचस्व**। *Do* you see. (**b**). **आगन्तुकम्**—आगच्छति इति **आ** + गम् + तुन् कर्त्तरि (**औणादिक**) = **आगन्तुः** a guest **अतिथिः**। स एव इति कन् स्वार्थे। तम्। "**अतिथिः कुशपुत्रे** स्यात् पुमानागन्तुकेऽपि च" इति विश्वमेदिन्यौ।

अनसूया—पिअंवदे दुवेणं एव्व णो मुहे एसो वुत्तन्तो चिट्ठदु। रक्खिदव्वा क्खु पकिदिपेलवा पिअसही [प्रियंवदे

इयोरेव नौ मुखे एष वृत्तान्तस्तिष्ठतु। रक्षितव्या खलु प्रकृति-पेलवा प्रियसखी]।

ANASUYA—Priyamvada, let this story rest in the mouth of us two only. Our naturally delicate dear friend has indeed to be spared.

प्रियंवदा—को दाणिं उण्होदएण णोमालिअं सिञ्चेदि [क इदानीमुष्णोदकेन नवमालिकां सिञ्चति]। (उभे निष्क्रान्ते)।

PRIYAMVADA—Now, who sprinkles the Navamalika with hot water? (*Exeunt both*).

इति विष्कम्भकः। (*This much is Prelude*)

प्रियंवदे इति। 'एष वृत्तान्तः' शापवार्त्ता 'द्वयोरेव नौ मुखे तिष्ठतु' मुखात् बहिर्मा गच्छतु। कारणमाह—'प्रकृत्या पेलवा' सुकुमारी 'प्रियसखी' शकुन्तला 'रक्षितव्या' प्राणसन्देहात् रक्षणीया 'खलु'। शापं श्रुत्वा शकुन्तला भीता प्राणान् वा मुञ्चेत्, तत् एनां मा श्रावय।

क इति। 'कः इदानीं' कः पुनः [इदानीं वाक्यालङ्कारे। "इदानीं वाक्य-भूषायां सम्प्रत्यर्थे च दृश्यते" इति मेदिनी] तीव्रेण 'उष्णोदकेन' कोमलां 'नवमा-लिकां सिञ्चति'। न कोऽपि।

NOTES

1. (a). इदानीम्—Idiomatic वाक्यालङ्कारे। Compare इदानीम् in "न हीदानीमाचार्याः सूत्राणि कृत्वा निवर्त्तयन्ति"—*Bhashya*. (b). नवमालिकाम्—Sakuntala has already been compared to the नवमालिका in point of delicacy. Thus "नवमालिकाकुसुमपेलवाऽपि त्वम्"—Act I. Here however the reference is to the creeper and not the flower. As the delicate नवमालिका cannot bear the sprinkling of hot water, so Sakuntala will not be able to stand the shock of the news of the curse.

2. विष्कम्भकः—See beginning of Act III. This too is a शुद्ध-विष्कम्भक because the Patras are मध्यम।

(ततः प्रविशति सुप्तोत्थितः शिष्यः)। शिष्यः—वेलोपलक्षणार्थमादिष्टोऽस्मि तत्रभवता प्रवासादुपावृत्तेन काश्यपेन। प्रकाशं निर्गतस्तावदवलोकयामि कियदवशिष्टं रजन्या इति। (परिक्रम्यावलोक्य च) हन्त प्रभातम्। तथा हि—

यात्येकतोऽस्तशिखरं पतिरोषधीनाम्
आविष्कृतोऽरुणपुरःसर एकतोऽर्कः।
तेजोद्वयस्य युगपद्व्यसनोदयाभ्यां
लोको नियम्यत इवैष दशान्तरेषु॥

(*Enters a disciple who has just awoke from sleep*). DISCIPLE—I am ordered to watch the time by his reverence Kasyapa who has returned from his journey. Having gone out I will see how much of the night is left. (*Going round and looking about*) O! It is dawn! For, on the one side the lord of the herbs is reaching the summit of the setting-hill; at the other, the sun is exposed with *Aruna* as his fore-runner. By the simultaneous rise and fall of the two luminaries, people are steadied as it were at changes of their career.

तत इति। 'ततः' आदौ 'सुप्तः' पश्चात् 'उत्थितः' [पूर्वकालस्य उत्तरकालेन कर्मधारयः] 'शिष्यः प्रविशति'। वेलेति। 'प्रवासात्' प्रवासं कृत्वा [ल्यब्लोपे कर्मणि पञ्चमी] यद्वा—प्रवसत्यस्मिन् इति 'प्रवासः' परदेशः। तस्मात् [अपादाने पञ्चमी] 'उपावृत्तेन' प्रत्यागतेन 'तत्रभवता काश्यपेन वेलायाः' होमवेलायाः 'उपलक्षणार्थं' दर्शनार्थम् 'आदिष्टोऽस्मि'। तदादेशात् 'प्रकाशं निर्गतः' बहिर्गतः सन् 'रजन्याः कियत्' किम्परिमाणम् 'अवशिष्टम्' इति एतत् 'अवलोकयामि'। 'हन्त' इति सम्भ्रमे। 'प्रकृष्टं भातम्' आलोको यस्मिन् तत् प्रातम्।

यातीति। अन्वयः—एकतः ओषधीनां पतिः अस्तशिखरं याति। एकतः अरुणपुरःसरः अर्कः आविष्कृतः। एष लोकः तेजोद्वयस्य युगपद्व्यसनोदयाभ्यां दशान्तरेषु नियम्यते इव। व्याख्या—'एकतः' पश्चिमे गगने 'ओषधीनां' तृणज्यो-

तिषां 'पति:' चन्द्र: 'अस्तशिखरं याति'। 'एकत:' पूर्वस्मिन् गगने 'अरुण:' गरुड़ाग्रज: अनूरु: 'पुर:सरो' यस्य तादृश: 'अर्क:' सूर्य्य: 'आविष्कृत:' परिव्यक्त:। उदित: सूर्य्य: चन्द्रश्च अस्तं याति। 'एष लोक:' संसार: 'तेजसो:' द्वयं, तस्य चन्द्रसूर्य्यरूपस्य 'युगपत्' समकालं यत् 'व्यसनं' भ्रंश: चन्द्रस्य, यश्च 'उदय:' सूर्य्यस्य, ताभ्याम्। अन्या: दशा: 'दशान्तराणि' [मयूरव्यंसकादि] तेषु 'नियम्यते' शिक्ष्यते 'इव' इत्युत्प्रेक्षा। उदये मा मोदस्व पतनं भावि इति शिक्षा। व्यसने च अलं विषादेन भूयोऽप्युदयो भविता इति नियमनम्। [अत्र प्रथमं तावत्—गगनाग्र व्यतीतमात्रेऽपि अस्तं प्रति याति चन्द्र इति वक्तुं शक्यते। कृष्णाष्टमीत: आरभ्य तत्कालं सूर्य्यस्यापि दर्शनं शक्यम्। अत: पूर्वार्द्धं प्रभातोपलक्षणाय नालम्। अपरञ्च—ग्याविष्कृत एवार्क: "उपस्थितां होमवेलां गुरवे निवेदयामि" इत्यनन्तरोक्तं न सङ्गच्छते। "आविष्कृतारुण" इति समस्तपाठे पुन: व्यसनोदययोर्योगपद्यं दुष्यति। तन्मन्ये प्रक्षिप्तोऽयं श्लोक:। ["आविष्कृतोऽरुण—" (रा-, त-, वि-, न्या-)—"आविष्कृतारुण—" (वि· पा-, म-)॥ "इवैष" (त-, न्या-)—"इवात्म—" (रा-, वि-, म-)]॥

NOTES.

1. *Summary*. एवं वृत्ते विवाहे समाश्वास्य शकुन्तलां, दत्त्वा चास्यै स्मरणीयं स्वनामाङ्कितमङ्गुलीयकं स्वपुरं प्रत्यागतो राजा। सा च वियोगिनी तमेव ध्यायन्ती प्राप्तमतिथिं दुर्वाससमबुध्यमाना "बोधितोऽपि त्वां न दुष्यन्त: स्मरिष्यति" इति तेन शप्तमप्यात्मानं नाजानात्। शापस्तु पथि सख्या प्रसादितेन तेन अभिज्ञानदर्शनावसान: कृत:। ततो गच्छति काले अभिव्यञ्जितसत्त्वलक्षणा शकुन्तला राजधानीं न नीता कण्वश्च प्रवासान्निवृत्त:। अन्येद्युरथाग्निशरणं गताय अशरीरिणी वाक् तस्मै सुतां दुष्यन्तपरिणीतां ससत्त्वामकथयत्। स च तद्दिनमेव शिष्याभ्यां तां गौतमीसहितां सहर्षो हस्तिनापुरं प्राहिणोत्।

2. (a). वेलोप &c.—वेला time काल। "वेला काले च जलधेस्तीरनीरविकारयो:" इति विश्व:। (b). हन्त—An अव्यय implying surprise mixed with regret (विषाद)। He believed the night was not yet wholly ended; for he says कियदवशिष्टं रजन्या:। But he saw his mistake on going out. By a little twisting we may say this causes विषाद।

"हन्त हर्षेऽनुकम्पायां वाक्यारम्भविषादयोः" इत्यमरः। Or हन्त implies निश्चय—हन्त प्रभातम् it is *indeed* (निश्चय) dawn. "हन्तेति...दाननिश्चययोरपि"—*Ganakara.*

3. (a). एकतः—सप्तम्यर्थे तसिः। आद्यादिः। (b). अस्तशिखरम्—अस्तस्य अस्ताचलस्य शिखरं चूड़ाम्। (c). ओषधीनाम्—Raghava explains—Herbs avert danger; yet the moon, though the lord of herbs, cannot escape danger. Thus the inevitable is unavoidable, and this consideration should have a steadying influence in reverses. "अति-दुःसहमरणादिविपत्तिसहस्रविनाशिका ओषधयः। तासां पतिरपि अस्तशिखरं याति"—*Raghava.* (d). आविष्कृत—आविस्+कृ+क्त कर्मणि disclosed. याति gives कर्तृता to the moon; to preserve uniformity (प्रक्रम) it is necessary that the sun should also have कर्तृता, which आविष्कृत does not give to it. We believe the verse is an interpolation (see Tika). We cannot say we have here आदिकर्मणि क्त in the कर्तृवाच्य, for, the usual sign of such क्त—the उपसर्ग प्र—is here absent. True, the difficulty is avoided by reading आविष्कृतारुणपुरःसर एकतोऽर्कः and explaining आविष्कृतो यः अरुणः स पुरःसरो यस्य तादृशः अर्कः एकत आस्ते in which अर्क has कर्तृता। But this introduces a fresh difficulty; for, then the उदय becomes a *past* event and व्यसन is still *future*, and the two, व्यसनोदयौ, must no longer be spoken of as *simultaneous* (युगपत्) (See Tika). (e). अरुणपुरःसरः—पुरः अग्रे सरति गच्छति इति पुरस्+सृ+ट कर्तरि=पुरःसरः fore-runner. Now see Tika. अरुण is Garuda's elder brother. He was born before time and immature, being without the thighs (अनूरु)। He was about to die of chill and was placed by his father कश्यप in front of the sun on the chariot of that luminary, as his driver, to remove the chilliness. (f). अर्कः—अर्च्यते इति अर्च+घञ् कर्मणि। उदयवान् अर्च्यत एव इति ध्वनिः। (g). युगपद् &c.—वि+अस+ल्युट् भावे=व्यसनम् fall भ्रंशः। "व्यसनं विपदि भ्रंशे" इत्यमरः। व्यसनञ्च उदयश्च व्यसनोदयौ risê and fall. युगपत् (अव्यय) समकालौ यौ व्यसनोदयौ ताभ्याम्। कर्मधा—। (h). लोकः—The universe भुवनम्। "लोकस्तु भुवने जने" इत्यमरः। By transference of epithets it means here भुवनस्थजनसमुदायः।

3. *Remark.* The metre is वसन्ततिलका। The reading आत्म-

दशान्तरेषु has a superfluous word आत्मन्। दशान्तरेषु implies आत्म-दशान्तरेषु। The lesson conveyed is "चक्रवत् परिवर्त्तन्ते दुःखानि च सुखानि च"।

अपिच—

अन्तर्हिते शशिनि सैव कुमुद्वती मे
दृष्टिं न नन्दयति संस्मरणीयशोभा।
इष्टप्रवासजनितान्यबलाजनस्य
दुःखानि नूनमतिमात्रसुदुःसहानि॥

Moreover, the moon having disappeared, the same lily, with her beauty now to be recalled from memory, does not please my eye. Surely, to the weaker sex, the pangs caused by the absence of the favourite, are beyond measure very hard to bear.

अन्तरिति। अन्वयः—शशिनि अन्तर्हिते सैव कुमुद्वती संस्मरणीयशोभा (सती) मे दृष्टिं न नन्दयति। नूनम् अबलाजनस्य इष्टप्रवासजनितानि दुःखानि अतिमात्र-सुदुःसहानि। व्याख्या—'शशिनि' चन्द्रे 'अन्तर्हिते' दर्शनपथात् व्यतीते सति 'सा एव' पूर्वदृष्टा 'कुमुद्वती' कुमुदिनी ["कुमुदनडवेतसेभ्यो ड्मतुप्" इति ड्मतुप्] 'संस्मरणीया' स्मृतिप्राप्या न तु प्रत्यक्षा 'शोभा' यस्याः तादृशी सती 'मे दृष्टिं न नन्दयति' न मोदयति। 'नूनं' निश्चितम् 'अबलाजनस्य' दुर्बलस्य स्त्रीजनस्य सम्बन्धे 'इष्टस्य' अभिलषितस्य जनस्य 'प्रवासेन' देशान्तरस्थित्या 'जनितानि दुःखानि अति-मात्रं' यथा तथा 'सुदुःसहानि' भवन्ति। [श्लोकोऽयं कथमपि न प्रभातोपलक्षणार्थं भवितुमर्हति। अपि च पूर्वश्लोके चन्द्रः अस्तं याति इत्युक्तं न तु यातः इति। तत् कथमन्तर्हित इत्यतीतोक्तिः? अन्यच्च—"मे" इति "अन्यस्य नन्दयति" इत्युपक्षिपति, तच्चायुक्तम्। "संस्मरणीयशोभा" इत्यनुक्तमपि गम्यते एव, तत् किमनया स्फुटोक्त्या? "अतिमात्रसुदुःसहानि" इति सुदुरोः अतिमात्रस्य च एकत्र समावेशः कीदृशः इत्ये-तत् सहृदयैर्विभाव्यम्। पुनश्च—पूर्वार्द्धे दृष्टिनन्दनस्य अभावमुक्त्वा तत्समर्थनाय परार्द्धे दुःखस्य दुःसहत्वनिर्देशो न मनोरमः! तदयमपि प्रक्षिप्त एव श्लोकः]।

NOTES

1. अन्तर्हिते &c.—Raghava has "शशिनि चन्द्रे...यतः स शशयुक्तः कलङ्की अतस्तस्यान्तर्धानमुचितमिति भावः"। This is far-fetched. शशिन् in itself does not imply 'scandal (कलङ्क)'। Again, he says "अथ च कौ पृथिव्यां मुदती हर्षयुक्ता सैव पूर्वं दृष्टा शकुन्तला शशिनि इति दुष्यन्ते विषयनिगरणात् तद्वंशोद्भवत्वाद्वा अन्तर्हिते असन्निहिते इत्यादि पूर्वार्द्धं सर्वं योज्यम्"। This is fine imagination, and had undoubtedly influenced the interpolator (See Tika). But it overlooks the fatal objection that the love affair between Sakuntala and Dushyanta was unknown to all in the hermitage except Anasuya and Priyamvada. Just then even Kanva was not aware of it, so it could not have been referred to by the disciple.

2. *Remark*. The metre is वसन्ततिलका। The first half gives a specific instance to support the generalisation in the second half. Hence we have अर्थान्तरन्यास।

अपिच—

कर्कन्धूनामुपरि तुहिनं रञ्जयत्यग्रसन्ध्या
दार्भं मुञ्चत्युटजपटलं वीतनिद्रो मयूरः।
वेदिप्रान्तात् खुरविलिखितादुत्थितश्चैष सद्यः
पश्चादुच्चैर्भवति हरिणः स्वाङ्गमायच्छमानः॥

अपिच—

पादन्यासं क्षितिधरगुरोर्मूर्ध्नि कृत्वा सुमेरोः
क्रान्तं येन क्षयिततमसा मध्यमं धाम विष्णोः।
सोऽयं चन्द्रः पतति गगनादल्पशेषैर्मयूखैर्
अत्यारूढिर्भवति महतामप्यपभ्रंशनिष्ठा॥

Moreover, the moon is impurpling the dew-drops on the jujube trees ; the peacock with its sleep over, is leaving the

kusa thatch of the cottage ; and this antelope, got up from the edge of the mud-bank, is forthwith becoming high behind in order to stretch its limbs. Moreover, the moon—the very one by whom darkness being caused to disappear, the middle domain of Vishnu was reached after having placed his *Pada* on the head of *Sumeru* the lord of the mountains—is dropping from the sky with little of his rays left. Even of the great, the highest ascent becomes ended in a deep descent.

कर्कन्ध्विति। अन्वयः—अग्रसन्ध्या कर्कन्धूनाम् उपरि तुहिनं रञ्जयति। मयूरः वीतनिद्रो दार्भम् उटजपटलं मुञ्चति। एष हरिणश्च खुरविलिखितात् वेदिप्रान्तात् उत्थितः, स्वाङ्गमायच्छमानः, सद्यः पश्चादुच्चैर्भवति। व्याख्या—'अग्रसन्ध्या' प्रातःसन्ध्या 'कर्कन्धूनां' बदरीवृक्षाणाम् ["कर्कन्धूर्बदरी कोलिः" इत्यमरः] 'उपरि तुहिनं' हिमं 'रञ्जयति' अरुणरागेण योजयति। 'मयूरः' आश्रममयूरः 'वीता' विगता 'निद्रा' यस्य तथाभूतः सन् 'दार्भं' कुशनिर्मितम् 'उटजपटलं' पर्णशालाया आवरणं 'मुञ्चति' जहाति। 'एष हरिणश्च' आश्रममृगोऽपि 'खुरैः विलिखितात्' सुखशयनार्थं क्षुण्णात् [पशुधर्म एष यत् खुरोत्कीर्णे स्थाने धूलिषु ते शेरते] 'वेद्याः' वृक्षवेदिकायाः 'प्रान्तात् उत्थितः' सन्, निद्रान्ते 'स्वम् अङ्गम् आयच्छमानः' प्रसारयन् ["समुदाङ्भ्यो यमोऽग्रन्थे" इत्यात्मनेपदम्] 'सद्यः' तत्क्षणम् उत्थानक्षण एव 'पश्चात्' अपरकाये 'उच्चैः' उन्नतो 'भवति'। अतो ब्रवीमि प्रभातमिति।

पादेति। अन्वयः—क्षयिततमसा येन क्षितिधरगुरोः सुमेरोर्मूर्ध्नि पादन्यासं कृत्वा विष्णोर्मध्यमं धाम क्रान्तं सः अयं चन्द्रः अल्पशेषैर्मयूखैः गगनात् पतति। महतामपि अत्यारूढिः अपभ्रंशनिष्ठा भवति। व्याख्या—'क्षयितं' क्षयप्राप्तं 'तमो' यस्मात् तथाविधेन हतान्धकारेण [अनेन माहात्म्यम्] 'येन' चन्द्रेण 'क्षितिधराणां' पर्वतानाम् [शेषषष्ठ्या समासः] 'गुरोः' पत्युः 'सुमेरोः मूर्ध्नि' शिरसि 'पादानां' चरणानां किरणानाञ्च 'न्यासं' पातं 'कृत्वा' [सुमेरुशिरसोऽप्यूर्ध्वचारी चन्द्रः। तेन शिरसि किरणपातो युज्यते] 'विष्णोः' बलिच्छलने वामनरूपस्य तस्य 'मध्यमं धाम' द्वितीयचरणविन्यासस्थलम् आकाशमित्यर्थः 'क्रान्तम्' आरूढं, 'सः' एवंभूतो महिमान्वितः 'अयं चन्द्रः' एष दृश्यमानश्चन्द्रः 'अल्पशेषैः' अल्पावशिष्टैः 'मयूखैः' किरणैः उपलक्षितः

सन् [इत्थम्भूतलक्षणे तृतीया] 'गगनात् पतति' गगनाङ्गनं जहाति। अतो ब्रवीमि प्रभातमिति। 'महतामपि' किं पुनरितरेषाम् 'अत्यारूढिः' उच्चैः स्थितिः 'अपभ्रंशः' दूरपातः 'निष्ठा' अन्तो यस्याः तादृशी भवति। अत्युच्चारोहणात् परमेव अतिनीचं प्रति गमनं भवति॥ यथा प्राकृतः कश्चित् कुतश्चित् उच्चस्थाने पादं न्यस्य ततोऽप्युच्चं स्थानमारोहति, तथा महिम्ना महान् एष चन्द्रः गगनशिखरमारोढुमिच्छुः पर्वतानां गुरोरेव, न तु यस्य कस्यचित्, शिरसि पादमधात् आरुढश्च गगनम्। परन्तु अधुना दूरमधः पतति, न चिरं गगनाग्रे एव स्थितः। इति स्फुटार्थः। किरणैः सुमेरुशिखरं समुद्रास्य गगनमारूढः इत्यपि अर्थः।

NOTES

1. (a). तुहिनम्—frost, dew : "तुषारस्तुहिनं हिमम्" इत्यमरः। (b). अग्रसन्ध्या—। सम्यक् ध्यायन्त्यस्याम् इति सम्+ध्यै+अङ् अधिकरणे=सन्ध्या time for meditation. Or सम्+धा+अङ् भावे अधिकरणे वा=सन्धा junction सन्धिः, *i.e.*, the junction of day and night. अग्रा प्रथमा सन्ध्या। There are *two* junctions अग्रसन्ध्या or अग्रसन्धा=dawn, and अपरसन्ध्या or अपरसन्धा=dusk. "सन्ध्या पितृप्रसूः सन्धा" इति शब्दार्णवः। (c). उटजपटलम्—पटल thatch. "पटलं छदिः" इत्यमरः। "छदिर्गृहाच्छादनम् 'छानी' इति ख्यातम्" इत्यमरटीका। (d). आपृच्छमानः—We have आत्मनेपद because the action benefits the stag. Otherwise दरिद्रेभ्यो धनं संयच्छति। The sutra "आङो यमहनः" has no application here, because that refers to यम when अकर्मक, and here it is सकर्मक।

2. *Remark*. The metre is मन्दाक्रान्ता। स्वभावोक्ति or जाति is the figure. "नानावस्थं पदार्थानां रूपं साक्षाद्विवृण्वती। स्वभावोक्तिश्च जातिश्च—॥" इति दण्डी।

3. (a). क्षितिधर &c.—धरन्तीति धृ+अच् कर्तरि=धराः up-holders. क्षितेर्धराः क्षितिधराः the sustainers of the earth, *i. e.*, the mountains. Now see Tika. क्षितिं धरन्तीति gives अण् with a कर्मोपपद resulting in the form क्षितिधार। (b). चयित &c.—चयः सञ्जातः अस्येति चय+इतच्=चयितम्।

4. (a). अत्यारूढिः—अति+आ+रुह्+क्तिन् भावे high ascent. (b). अपभ्रंश &c.—नि+स्था+अङ् भावे=निष्ठा end अन्त। "निष्ठानिष्पत्तिनाशान्ताः"

इत्यमरः। अप+भ्रंश+घञ् भावे=अपभ्रंशः long slip दूरपातः। अपभ्रंशो निष्ठा यस्याः।

5. *Remark.* (a). Note the pun—पाद=किरण and चरण। मूर्द्धन्=अग्र and शिरस्। पतति=अवरोहति and भ्रश्यति। (b). The महत्त्व of चन्द्र is established by—(1) गिरिगुरुशिरसि चरणपातः, (2) तमोनाशः (3) विष्णुक्रान्तिक्रमणम्। (c). The metre is मन्दाक्रान्ता। अर्थान्तरन्यास is the figure.

(प्रविश्यापटीक्षेपेण) अनसूया—जइ वि णाम विसअपरम्मुहस्स जणस्स एदं ण विदिअं तहवि तेण रण्णा सउन्दलाए अणज्जं आअरिदं [यद्यपि नाम विषयपराङ्मुखस्य जनस्य एतत् न विदितं तथापि तेन राज्ञा शकुन्तलायामनार्य्यमाचरितम्]।

ANASUYA (*Entering without raising the curtain*)—Though this may not be known to a person who is averse from the world, still something ignoble has been done by that king towards Sakuntala.

शिष्यः—यावदुपस्थितां होमवेलां गुरवे निवेदयामि। (निष्क्रान्तः)।

DISCIPLE—I will report to the preceptor that the time for the offering of oblations is at hand. (*Exit*).

प्रविश्येति। 'पत्याः' पटस्य जवनिकायाः 'क्षेपः' निरसनं 'पटीक्षेपः' जवनिकापसारणम्। न पटीक्षेपः 'अपटीक्षेपः' तेन। जवनिकामनपसार्य्य एव प्रविष्टा अनसूया। यद्वा—'अपटी' जवनिका ["अपटी काण्डपटिका प्रतिसीरा जवनिका तिरस्करिणी" इति हलायुधः]। तस्याः 'क्षेपेण' तां निरस्य इत्यर्थः।

यद्यपीति। 'विषयेभ्यः' इन्द्रियग्राह्येभ्यः 'पराङ्मुखस्य' निवृत्तस्य 'जनस्य' [illegible] 'एतत् यद्यपि न नाम' [नाम इति सम्भाव्ये] 'विदितं' [illegible] 'तथापि', मादृशो [illegible] अत्र विषये प्रमाणं न इत्यभ्युपगतेऽपि 'तेन राज्ञा शकुन्तलायाम् अनार्य्यम्' [illegible] 'आचरितम्'। आस्तां तावत् अहं विषयिणां युक्तायुक्तं विचारयितुमनर्हा, किन्तु शकुन्तलायाम् असदाचरितम् इति नास्ति सन्देहः। रङ्गमञ्चस्थेन शिष्येण न श्रुतमेतत्।

["यद्यपि" (रा-, वि-)—"एवम्" (न-, न्या-, म-) ॥ "पराङ्मुखस्य" (न-, वि-, न्या-)—"पराङ्मुखस्यापि" (रा-, म-)] ॥

यावदिति। 'उपस्थितां' सम्प्राप्तां 'होमवेलां गुरवे निवेदयामि' विज्ञापयामि 'यावत्' [यावदवधारणे]।

NOTES

1. (a). विषयपराङ्मुखस्य—परा दूरे अञ्चति गच्छतीति परा+अञ्च+क्विन् कर्त्तरि=पराक् averted. पराक् मुखं यस्य स पराङ्मुखः one with face averted. तस्य। (b). जनस्य—"क्तस्य च वर्त्तमाने" इति अनुक्ते कर्त्तरि षष्ठी। (c). विदितम्—विद्+क्त कर्मणि वर्त्तमाने by the rule "मतिबुद्धिपूजार्थेभ्यश्च", विद् here being बुद्ध्यर्थक। (d). For यदि, अपि (twice), नाम, तथा see below.

2. (a). शकुन्तलायाम्—आधारे सप्तमी। Compare "अयमाचरत्यविनयं मुग्धासु तपस्विकन्यासु"—Act I. (b). अनार्य्यम्—अर्य्यते गम्यते अनुष्ठीयते इति यावत् इति ऋ+ण्यत् कर्मणि=आर्य्यम् that which is adopted by good people. न आर्य्यम् that which good people shun. नञ्तत्—।

3. *Remark.* The passage is obscure. My explanation, as given in the Tika, will be clear from the following analysis—(*a*) Anasuya wants to show that "तेन राज्ञा शकुन्तलायामनार्य्यमाचरितम्"। (*b*). A possible objection occurs to her—This is a love affair, and therefore a worldly matter. Anasuya, standing as she does aloof from the world (विषयपराङ्मुख), cannot presumably judge whether any वैषयिक matter is आर्य्य or अनार्य्य। This other side of the question (पक्षान्तर)—her ineligibility to judge—she introduces by यदि। "यदि इति पक्षान्तरे"—*Vardhamana.* She states the objection as a mere *possibility* (सम्भाव्य), not that people will *surely* urge it against her. The bare possibility is expressed by नाम। The objection she does not admit as valid. She mentions it with a sneer (गर्हा) expressed by अपि। "गर्हा समुच्चयप्रश्नशङ्कासम्भावनास्वपि" इत्यमरः। The second अपि is समुच्चये। Thus the reasoning is—Perhaps you will say I am outside the world and am no judge of आर्य्य and अनार्य्य in love affairs. Even then it cannot be denied that the king has behaved ill (अनार्य्य) towards Sakuntala.

4. गुरवे—"कर्मणा यमभिप्रैति स सम्प्रदानम्" इति सम्प्रदाने चतुर्थी।

"क्रियाग्रहणमपि कर्त्तव्यम्" is a Varttika meant for अकर्मक verbs. The भाष्यकार however rejects it, because, as he says, "क्रियापि कृत्रिमं कर्म" hence "कर्मणा यमभिप्रैति—" covers all cases.

अनसूया—पडिबुद्धावि किं करिस्सं। ण मे उइदेसु वि णिअकरणिज्जेसु हत्थपाआ पसरन्ति। कामो दाणिं सकामो होदु जेण असच्चसन्धे जने सुद्धहिअआ सही पदं कारिदा [प्रतिबुद्धापि किं करिष्यामि! न मे उचितेष्वपि निजकरणीयेषु हस्तपादं प्रसरति। काम इदानीं सकामो भवतु येन असत्यसन्धे जने शुद्धहृदया सखी पदं कारिता]। अहवा दुव्वाससो सावो एसो विआरेदि। अण्णहा कहं सो राएसि तारिसाणि मन्तिअ एत्तिअस्स कालस्स लेहमेत्तंवि ण विसज्जेदि [अथवा दुर्वाससः शाप एष विकारयति अन्यथा कथं स राजर्षिः तादृशानि मन्त्रयित्वा एतावतः कालस्य लेखमात्रमपि न विसर्जयति]। (विचिन्त्य) ता इदो अहिण्णाणं अङ्गुलीअअं से विसज्जेम। दुक्खसीले तपस्सिजणे को अब्भत्थीअदु। णं सहीगामी दोसो त्ति ववसिदा वि ण पारेमि पवासपडिणिउत्तस्स तादकस्सवस्स दुस्सन्दपरिणीदं आवण्णसत्तं सउन्दलं णिवेदिदुं। इत्थंगदे अम्हेहिं किं करणिज्जं [तत् इतः अभिज्ञानमङ्गुलीयकं तस्मै विसृजावः। दुःखशीले तपस्विजने कः अभ्यर्थ्यताम्। ननु सखीगामी दोष इति व्यवसितापि न पारयामि प्रवासप्रतिनिवृत्तस्य तातकाश्यपस्य दुष्यन्तपरिणीतामापन्नसत्त्वां शकुन्तलां निवेदयितुम्। इत्थंगते अस्माभिः किं करणीयम्]।

ANASUYA—What again shall I do when awake? My hands and feet do not proceed even towards my own duties.

Now be content Cupid by whom our pure-hearted friend is made to resort to a man who is false to his promise. Or, it is the curse of Durvasas that is causing perversion. Otherwise why that royal sage having talked in that strain, does not send a letter even for such a long time? *(Reflecting)* We shall then send him the identification-ring from here. The ascetics being constantly engaged with penance, who is to be requested? Nor indeed, to Father Kasyapa returned from travel, can I, even if I try, report Sakuntala as wedded by Dushyanta and with child, because the blame lies with my friend. Such being the case what can be done by us.

प्रतिबुद्धेति। प्रभाता रजनी प्रतिबोधनकालः प्राप्त इत्यालक्ष्य आह—'प्रतिबुद्धा' शयनादुत्थिता 'अपि किं करिष्यामि'? 'उचितेषु' अभ्यस्तेषु ["अभ्यस्तेऽप्युचितं न्याय्यम्" इति रघुटीकायां मल्लिनाथः] 'निजेषु' स्वकीयेषु 'करणीयेषु' प्रातःकृत्यादिषु 'अपि' किं पुनरन्यत्र 'मे हस्तौ च पादौ च' हस्तपादम् [प्राण्यङ्गत्वादेकवद्भावः] न 'प्रसरति' प्रवर्त्तते। 'कामः' कन्दर्पः 'इदानीं' ईदृशे वृत्ते 'सकामः' सिद्धमनोरथो 'भवतु'। कामिनां प्रतारणं कन्दर्पस्य धर्मः। सोऽधुना सिद्धः। 'येन' कामेन 'शुद्धम्' अकपटं 'हृदयं' यस्याः तादृशी 'सखी' शकुन्तला 'असत्या' मिथ्या 'सन्धा' प्रतिज्ञा यस्य तादृशे असरले इत्यर्थः, 'पदं' स्थानं 'कारिता' प्रापिता [सर्वधात्वर्थानुवादः करोतिना भवति। "हृक्रोरन्यतरस्याम्" इति अणिकर्त्तुः कर्मसंज्ञा। ततः अभिहिते कर्मणि सखी इति प्रथमा]। 'अथवा' न हि राज्ञो दोषः। 'एष दूर्वाससः शापः विकारयति' विकारम् अन्यथाभावं करोति ["तत्करोति—" इति णिच्]। 'अन्यथा' यदि नायं शापविकारः तदा 'स राजर्षिः तादृशानि' तथाविधानि मधुराणि सरलानि च 'मन्त्रयित्वा' भाषित्वा 'एतावतः' एतन्मात्रस्य सुदीर्घस्य 'कालस्य' [विवक्षया षष्ठी] 'लेखमात्रमपि' पत्रिकामपि, आस्तां नेतृजनप्रेरणम्, 'न विसर्जयति' प्रेरयति। तन्नूनं शापेन सर्वं तेन विस्मृतम्। 'तत्' तस्मात् शापनिवृत्त्यै 'इतः' अस्मात् तपोवनात् 'तस्मै' तं दुष्यन्तमभिप्रेत्य 'अभिज्ञानम्' स्मरणीयम् 'अङ्गुलीयकं विसृजाव' प्रेषयावः। किन्तु 'तपस्विजने दुःख'' व्रतोपवासादिकं 'शीलयति'

अभ्यस्यति य: तस्मिन् [कर्मोपपदे ण: अणोऽपवाद:] सति 'क:' को वा जन: तत्र- यनार्थम् 'अभ्यर्थ्यतां' प्रार्थ्यताम् ? तापसा: सदा तपसि एव रता: तपो विहाय ते न यास्यन्ति । एष 'दोष: सखीं' शकुन्तलां 'गामी' गन्ता [गमिगाम्यादीनामुपसंख्यानात् द्वितीयासमास:] 'इति' हेतो: 'प्रवासात् प्रतिनिवृत्तस्य तातकाश्यपस्य' [विवक्षया षष्ठी] 'निवेदयितुं व्यवसिता' उद्युक्ता 'अपि शकुन्तलां दुष्यन्तेन परिणीताम्' ऊढाम् 'सत्त्व'' जीवम् 'आपन्नां' प्राप्तां गर्भिणीम् इत्यर्थ: 'निवेदयितु'' विज्ञापयितुं 'न पार- यामि' शक्नोमि । शकुन्तला च अनवहिता दुर्वाससमकोपयत् । तदस्मिन् व्यतो- पाते दोषस्तस्या एव इति तातकण्वं न निवेदयामि । 'इत्थं गते' एवं सति 'अस्माभि:' सखीजनै: किं करणीयं न जानामि ।

NOTES

1. (a). प्रतिवृद्धापि—अपि समुच्चये । अप्रतिवृद्धा I cannot of course do any thing ; प्रतिवृद्धा too (अपि) I cannot. करणविषये प्रतिवृद्धाप्रति- वृद्धयो: समुच्चय: । (b). सखी पदं कारिता—Non-causal form, सखी पदं कृतवती । Causal form active, य: सखीं (or सख्या) पदं कारितवान् । Causal passive, येन सखी पदं कारिता or येन सख्या पदं कारितम् । सखी being the प्रयोज्यकर्म becomes उक्त by the कारिका—"अप्रधाने दुहादीनां प्रधाने नीहृकृष्वहाम् । बुद्धिभक्षार्थयो: शब्दकर्मणाञ्च निजेच्छया । प्रयोज्यकर्मण्य- न्येषां ण्यन्तानां लादयो मता: ॥"

2. विसर्जयति—स्वार्थे णिच् । Compare "गौतमीहस्ते विसर्जयिष्यामि" —Act III.

3. (a). तपस्विजने—तपस्विनां जन: लोक: समूह इत्यर्थ: (or तपस्वी चासौ जनश्च) तपस्विजन: । तस्मिन् । आधारे सप्तमी । (b). क: अभ्यर्थ्यताम्—"Who is to be requested" means by काकु "*no one* is to be requested." (c). आपन्नसत्त्वाम्—सत्त्वम् आपन्ना gives आपन्नसत्त्वा by the rule "प्राप्तापन्ने च द्वितीयया" । सत्त्वापन्ना is an optional form by the rule "द्वितीया श्रितातीतपतितगतात्यस्तप्राप्तापन्नै:" । आपन्नं सत्त्वं यया इति बहुव्रीहि: is also allowable. (d). अस्माभि: &c.—Here she does not know what to do to have Sakuntala recognised by Dushyanta. The diffi- culty is caused by a combination of circumstances. *First*,

Dushyanta has forgotten all about it owing to the curse. *Second*, the sight of the ring will awaken the king's memory but there is none to carry it to the city. *Third*, she cannot move Kanva to arrange for the despatch of the ring, because she apprehends the sage might get displeased with his daughter. For, he had left the hermitage leaving his daughter in charge to look after guests (*c. f.* दुहितरं शकुन्तलामतिथिसत्काराय सन्दिश्य —*Ante*) which she signally failed to do in respect of such an august personage as Durvasas.

(प्रविश्य) प्रियंवदा(सहर्षम्)—सहि, तुवर तुवर सउन्दलाए पत्थाणकोदुअं णिव्वत्तिदुं [सखि, त्वरस्व त्वरस्व शकुन्तलायाः प्रस्थानकौतुकं निर्वर्त्तयितुम्]।

(*Entering*) PRIYAMVADA (*with joy*)—Hasten, friend, hasten to perform the auspicious rites at Sakuntala's departure.

अनसूया—सहि कहं एदं [सखि कथमेतत्]।

ANASUYA—How is this, friend ?

प्रियंवदा—सुणाहि। दाणिं सुहसइदपुच्छिआ सउन्दलासआसं गद म्हि [शृणु। इदानीं सुखशयितप्रच्छिका शकुन्तलासकाशं गतास्मि]।

PRIYAMVADA—Listen, I just now went to Sakuntala as an inquirer of easy sleep.

सखीति। 'शकुन्तलायाः प्रस्थानस्य' गमनसमयस्य भर्त्तृभवनयात्रायाः 'कौतुकं' मङ्गलं 'निर्वर्त्तयितुं' कर्त्तुं 'त्वरस्व'। आवेगे द्विरुक्तम्।

शृण्विति। 'इदानीम्' अस्मिन्नेव क्षणे 'सुखशयितं' सुखशयनम् [भावे क्तः] पृच्छतीति 'सुखशयितप्रच्छिका' सुखं शयितं न वा इति जिज्ञासार्थम् [क्रियार्थायां क्रियायां ण्वुल् स्त्रियाम्] 'शकुन्तलायाः सकाशं' समीपं 'गतास्मि'। ["सुखशयितप्रच्छिका" (रा०, वि०)—"सुखसुप्तिकाप्रच्छननिमित्तम्" (त०, न्या०)—"सुखशयितं प्रष्टुम्" (म०)]।

NOTES

1. कौतुकम्—Customary auspicious ceremonies परम्परागतमङ्गलम्। "कौतुकं चाभिलाषे स्यादुत्सवे नर्महर्षयोः। परम्परागतायातमङ्गले च कुतूहले ॥" इति विश्वः।

2. सुखशयितप्रच्छिका—शी + क्त भावे = शयितम् lying down; hence *sleep*. सुखेन शयितम् सुखशयितम् sleep with ease, *i. e*, quiet sleep. सुप्सुपेति समासः। तत् पृच्छतीति सुखशयित + प्रच्छ + ण्वुल् कर्तरि स्त्रियाम्। Raghava reads पृच्छिका। But there is no reason for सम्प्रसारण।

अनसूया—तदो तदो [ततस्ततः]।

ANASUYA—Then? What then?

प्रियंवदा—दाव एणं लज्जावणदमुहिं परिस्सजिअ सअं तादकस्सवेण एव्वं अहिणन्दिदं—दिट्ठिआ धूमाउलिददिट्ठिणो वि जअमाणस्स पावए एव्व आहुदी पड़िदा। वच्छे सुसिस्सपरिदिण्णा विअ विज्जा असोअणिज्जासि संवुत्ता। अज्ज एव्व इसिपड़िरक्खिदं तुमं भत्तुणो सआसं विसज्जेमि—त्ति [तावत् एनां लज्जावनतमुखीं परिष्वज्य स्वयं तातकाश्यपेन एवमभिनन्दितम्—दिष्ट्या धूमाकुलितदृष्टेरपि यजमानस्य पावके एव आहुतिः पतिता। वत्से सुशिष्यपरिदत्ता इव विद्या अशोचनीयासि संवृत्ता। अद्यैव ऋषिप्रतिरक्षितां त्वां भर्तुः सकाशं विसर्जयामि—इति]।

PRIYAMVADA—Just then, by father Kasyapa himself, after having embraced her, congratulation was thus pronounced, as she stood with her face turned down through bashfulness—"O joy! the oblation of the sacrificer, though he had his sight disturbed by smoke, has fallen into fire indeed. My child, like knowledge made over to a deserving pupil, you have become one that can cause no regret. This very day I send you to your husband protected by anchorites.

तावदिति। 'तावत्' तत्कालम् [तावदवधौ] 'लज्जया अवनतमुखीम् एनां' शकुन्तलां 'परिष्वज्य' आलिङ्ग्य 'स्वयं तातकाश्यपेन एवम्' अनेन प्रकारेण 'अभिनन्दितम्' अभिनन्दनमुच्चारितम्। अभिनन्दनप्रकारं शृणु—'धूमेन आकुलिता' कलुषीकृता 'दृष्टिः' यस्य तथाविधस्य 'अपि यजमानस्य' याज्ञिकस्य [अनेन दर्शनव्याघातात् आहुतेः अन्यत्र पातशङ्कास्ति] 'आहुतिः दिष्ट्या' भाग्येन 'पावके एव' अग्नौ एव, यथास्थानमेव इत्यर्थः, पतिता, न तु अन्यत्र। त्वदर्थे योग्यं पात्रं नैव लब्धं मया, तथापि त्वं सत्पात्रे एव पतिता इत्यर्थः। हे 'वत्से सुशिष्याय परिदत्ता' यथाशास्त्रं दत्ता 'विद्या इव अशोचनीया संवृत्ता असि' इदानीं शोच्या न भवसि। 'अद्यैव त्वाम् ऋषिभिः प्रतिरक्षितां' गोपितां कृत्वा 'भर्त्तुः सकाशं' समीपं 'विसर्जयामि' प्रेषयामि [वर्त्तमानसामीप्ये भविष्यति लट्]—'इति' एवं तेन अभिनन्दितम्।

NOTES

1. (a). अभिनन्दितम्—अभि + नन्द + क्त भावे। There is no शेषविवक्षा, hence we have अनुक्ते कर्त्तरि तृतीया in तातकाश्यपेन। तातकाश्यपेन अभिनन्दितम् = congratulation was uttered by तातकाश्यप। (b). दिष्ट्या— An अव्यय expressing हर्ष joy. "दिष्ट्या हर्षे मङ्गले च" इति मेदिनी। (c). दिष्ट्या···पतिता—Implies "I did not see (आकुलितदृष्टि) that in Dushyanta there was a suitable husband for you. Yet chance has wedded you to him."

2. सुशिष्य &c.—It is a pity that knowledge should be imparted to a bad pupil. Sciences become अशोचनीय when their recipient is virtuous. *c. f.* "कुशिष्यमध्यापयतः कुतो यशः", also Manu— "विद्या ब्राह्मणमेत्याह सेवधिस्तेऽस्मि रक्ष माम्। असूयकाय मां मा दास्तथा स्यां वीर्यवत्तमा॥ यमेव तु शुचिं विद्या नियतं ब्रह्मचारिणम्। तस्मै मां ब्रूहि विप्राय निधिपायाप्रमादिने॥" Quoted by Vidyasagara.

अनसूया—अह केण सूइदो तादकस्सवस्स वुत्तन्तो [अथ केन सूचितस्तातकाश्यपस्य वृत्तान्तः]।

ANASUYA—But by whom was the matter revealed to father Kasyapa ?

प्रियंवदा—अग्गिसरणं पविट्ठस्स सरीरं विणा छन्दोमईए

वाणिभाए [अग्निशरणं प्रविष्टस्य शरीरं विना छन्दोमय्या वाण्या]।

PRIYAMVADA—By a metrical utterance without a body, when he entered the fire-house.

अनसूया (सविस्मयम्)—कहेहि [कथय]।

ANASUYA (*With wonder*)—Reproduce.

प्रियंवदा (संस्कृतमाश्रित्य)—

दुष्यन्तेनाहितं तेजो दधानां भूतये भुवः।
अवेहि तनयां ब्रह्मन्नग्निगर्भां शमीमिव॥

PRIYAMVADA (*Speaking in Sanskrit*)—O Brahman, consider thy daughter—who, for the glory of the world, is bearing the energy deposited by Dushyanta—as like the Sami tree that has fire within.

अथेति। 'अथ' प्रश्ने। 'केन तातकाश्यपस्य' तातकाश्यपाय इत्यर्थः [चतुर्थ्यर्थे षष्ठी] 'वृत्तान्तः' विवाहवृत्तान्तः 'सूचितः' ज्ञापितः।

अग्निशरणमिति। 'शरीरं' देहं 'विना छन्दोमय्या' पद्यात्मिकया 'वाण्या' वाचा, दैववाण्या इत्यर्थः 'अग्नीनां शरणं' गृहं त्रेताग्निसदनमित्यर्थः 'प्रविष्टस्य' तातकाश्यपस्य [चतुर्थ्यर्थे षष्ठी] वृत्तान्तः सूचितः। ["वाण्या" (रा-, वि-)—"वाचा" (त-, का-, म-)]॥

प्रियंवदेति। 'संस्कृतं' देवभाषाम् 'आश्रित्य' अवलम्ब्य। आभिः प्राकृतं वाच्यम्, इह तु दैववाण्या अनुकरणार्थं संस्कृतमाश्रितम्।

दुष्यन्तेति। अन्वयः—हे ब्रह्मन् दुष्यन्तेन आहितं तेजो भुवो भूतये दधानां तनयाम् अग्निगर्भां शमीमिव अवेहि। व्याख्या—हे 'ब्रह्मन्' वेदविदां वर काश्यप 'दुष्यन्तेन' राज्ञा 'आहितं' कृताधानं 'तेजः भुवो' जगतो 'भूतये' मङ्गलाय 'दधानां' धारयन्तीं 'तनयां' कन्यां शकुन्तलाम् 'अग्निर्गर्भे' यस्याः तथाविधाम् [गड्वादीनामाकृतिगणत्वात् सप्तम्याः परनिपातः] पूतामित्यर्थः, 'शमीमिव' शमीनाम्ना ख्यातं वृक्षविशेषमिव 'अवेहि' जानीहि।

NOTES

1. अग्निशरणम्—शरण is गृह here. "शरणं गृहरक्षित्रोः" इत्यमरः।

2. संस्कृतमाश्रित्य—Usually ascetic females speak प्राकृत। "योज्यं किंटूषकोन्मत्तबालतापसयोषिताम्···विद्वद्भिः प्राकृतं कार्यं कारणात् संस्कृतं क्वचित्॥" —मातृगुप्त quoted by Raghava.

3. (a). दुष्यन्तेन—नाममात्रग्रहणात् "किमप्याभिजात्यमौदार्यधैर्यविनयादि- व्यज्यते"—Raghava. (b). दधानाम्—Here the क्रियाफल is भुवो भूतिः which benefits भूः। So the परस्मैपद is expected. अकर्त्रभिप्रायेऽपि आत्मनेपदम्। (c). भूतये भुवः—This indicates भाविचक्रवर्त्तित्व of the child in the womb—*Raghava.* (d). अग्निगर्भाम्——तेजस् is compared with अग्नि by implication. Hence अस्माद्गर्भयोगात् पूता शकुन्तला जगत्पावनी च जाता इति ध्वनिः। The allusion is to Fire who bearing the energy of Siva entered first the अश्वत्थ and then the शमी to allay the heat which he was feeling within himself. Since then he has continued to reside inside the शमी tree.

अनसूया (प्रियंवदामाश्लिष्य)—सहि पिअं मे पिअं मे। किन्दु अज्ज एव्व सउन्दला णीअदि त्ति उक्कण्ठासाहारणं परितोसं अणुहोमि [सखि प्रियं मे, प्रियं मे। किन्तु अद्य एव शकुन्तला नीयते इति उत्कण्ठासाधारणं परितोषम् अनुभवामि]।

ANASUYA (*Embracing Priyamvada*)—Joy to me! friend, joy to me! But I feel pleasure co-extensive with regret, because Sakuntala is being taken away this very day.

प्रियंवदा—सहि वअं दाव उक्कण्ठं विणोदइस्सामो। सा तवस्सिणी णिव्वुदा होदु [सखि आवां तावदुत्कण्ठां विनोदयिष्यावः। सा तपस्विनी निर्वृता भवतु]।

PRIYAMVADA—Friend, we will allay our anxiety. Let that poor creature be hapyy.

अनसूयेति। 'आश्लिष्य' आलिङ्ग्य। हर्षात् इति भावः।

सखीति। एतत् 'मे प्रियम्'। सप्तमी विभक्तम्। 'किन्तु अद्यैव शकुन्तला नीयते

-इति' हेतोः 'उत्कण्ठया' खेदेन 'साधारणं' समानं 'परितोषम् अनुभवामि'। भर्त्रा संगंस्यते शकुन्तला इति परितोषः किन्तु अद्यैव याति इति खेदः।

सखीति। 'विनोदयिष्याव:' लघयिष्याव:। 'तपस्विनी' दीना शकुन्तला ["तपस्वी तापसे दीने" इति हैमः] 'निर्वृता' सुखिनी 'भवतु'।

NOTES

1. उत्कण्ठा &c.—For साधारण see under "साधारणोऽयं प्रणयः"—Act III. Or साधारण = समानाधिकरण having the same location, *i. e.*, co-extensive. उत्कण्ठनम् इति उद् + कण्ठ + अ भावे = उत्कण्ठा anxiety. "रागे त्वलब्धविषये वेदना महती तु या। संशोषणी तु गात्राणां तामुत्कण्ठां विदुर्बुधाः॥"

2. तपस्विनी—तपस् + विनि मत्वर्थे स्त्रियाम्। It means here अनुकम्पार्हा pitiable. "तपस्वी चानुकम्पार्हः" इत्यमरः।

अनसूया—तेन हि एदस्सिं चूदसाहावलम्बिदे णारिएरससमुग्गए एतण्णिमित्तं एव्व कालन्तरक्खमा णिक्खित्ता मए केसरमालिआ। ता इमं हत्थसण्णिहिदं करेहि। जाव अहंवि से मिअलोअणं तित्थमित्तिअं दुव्वाकिसलआणि त्ति मङ्गलसमालम्भणाणि विरएमि [तेन हि एतस्मिंश्चूतशाखावलम्बिते नारिकेरसमुद्गके एतन्निमित्तमेव कालान्तरक्षमा निक्षिप्ता मया केशरमालिका। तदिमां हस्तसन्निहितां कुरु। यावत् अहमपि मृगरोचनां तीर्थमृत्तिकां दुर्वाकिसलयानि इति मङ्गलसमालम्भनानि विरचयामि]।

ANASUYA—Well then, in this cocoa-nut basket suspended on the mango-twig, was placed by me, for this very purpose, a Vakula-garland suited to stand a lapse of time ; so make it near at hand, whilst I too prepare the auspicious decorations, viz, *Gorochana*, clay from holy places, and young shoots of the Durva grass.

तेनेति। 'तेन हि' तस्मादेव निमित्तात्। यतस्त्वरा कर्त्तव्या अतः। 'चूतशाखायाम्' आम्रशाखायाम् 'अवलम्बिते एतस्मिन् नारिकेरस्य' नारिकेलस्य 'समुद्गके' सम्पुटके 'एतन्निमित्तमेव' प्रस्थानकौतुकसम्पादनार्थमेव 'मया कालान्तरं' दिनात्ययं 'क्षमते' इति 'कालान्तरक्षमा' गतेऽपि काले अम्लाना 'केशरमालिका' वकुलमाला 'निक्षिप्ता' स्थापिता। 'तत्' तस्मात् यतः एतन्निमित्तं रक्षिता तस्मात् 'इमां' मालां 'हस्तयोः सन्निहितां' समीपस्थां 'कुरु'। ऊर्द्ध्वं आस्त्व, एनां भूमिं प्रापय इत्यर्थः। 'यावत्' अवधौ। 'अहमपि मृगरोचनां' गोरोचनाम् ["मृगः पशौ कुरङ्गे च" इति विश्वः] 'तीर्थस्य' तीर्थस्थानस्य 'मृत्तिकां दूर्वाणां किसलयानि' अङ्कुरान् 'इति' एतानि मङ्गलानि 'मङ्गलार्थानि 'समालम्भनानि' अलङ्करणानि ["समालम्भनमालेपे तिलकेऽलंकृतावपि" इति यादवः] 'विरचयामि'।

NOTES

1. इति मङ्गलसमा &c.—समालभ्यन्ते एभिः इति सम्+आ+लभ+ल्युट् करणे = समालम्भनानि decorations अलङ्करणानि। "लभेश्च" इति नुम्। Vidyasagara takes समालम्भन = आलेप unguent. The plural in समालम्भनानि seems to go against this sense. The Bengali Rec. however has the singular. The इति may also mean इत्यादीनि। Compare "मङ्गलसमालम्भनं विरचयावः"—*Infra*, "मे सर्व्वाङ्गीणमण्डनम्"—*Ibid*, "आश्रमसुलभैः प्रसाधनैः"—*Ibid*, which are all in favour of taking समालम्भन = अलङ्करण।

प्रियंवदा—तह करीअदु [तथा क्रियताम्]। (अनसूया निष्क्रान्ता। प्रियंवदा नाट्येन सुमनसो गृह्णाति)।

PRIYAMVADA—Be it so done. (*Exit Anasuya—Priyamvada acts the gathering of flowers*).

नेपथ्ये—गौतमि, आदिश्यन्तां शार्ङ्गरवमिश्राः शकुन्तलानयनाय।

IN THE DRESSING ROOM—Gautami, let Sarngarava and others be ordered to escort Sakuntala.

प्रियंवदा (कर्णं दत्त्वा)—अनसूए, तुवर तुवर। एदे क्खु

हत्थिणाउरगामिणो इसीओ सद्दावीअन्ति [अनसूये, त्वरस्व त्वरस्व । एते खलु हस्तिनापुरगामिनः ऋषयः शब्दाय्यन्ते] ।

PRIYAMVADA (*Listening*)—Hasten, Anasuya, hasten. The sages to go to Hastinapura are indeed being called.

(प्रविश्य समालम्भनहस्ता) अनसूया—सहि, एहि गच्छम्ह [सखि, एहि गच्छावः] । (परिक्रामतः) ।

ANASUYA—(*Entering with the decorations in hand*)—Come friend, we go. (*They walk round*).

अनसूयेति । 'सुमनसो गृह्णाति' पुष्पाणि चिनोति [मूलम् (रा०, वि०, म०)—"प्रियंवदा तथा करोति । अनसूया निष्क्रान्ता" (त०, न्या०) ॥ 'तथा करोति' नारिकेलसमुद्गकं वृक्षशाखाया अवतारयति] ॥

गौतमीति । 'शकुन्तलायाः नयनम्' इतो हस्तिनापुरप्रापणम् । तस्मै [तादर्थ्ये चतुर्थी] 'शार्ङ्गरवमिश्राः' शार्ङ्गरवप्रभृतयः 'आदिश्यन्ताम्' ।

अनसूये इति । 'हस्तिनापुरं गामिनः ऋषयः शब्दाय्यन्ते' शब्दं कार्यन्ते ["शब्दवैर—" इति क्यङ् । ततो णिच् । अणिकर्तुः कर्मसंज्ञा । उक्ते कर्मणि प्रथमा] । ["शब्दाय्यन्ते" (रा०, वि०, म०)—"शब्दायन्ते" (त०, न्या०)] ।

प्रविश्येति । समालम्भनानि मङ्गलालङ्करणानि 'हस्ते' यस्याः [गड्वादेराकृतिगणत्वात् सप्तम्याः परनिपातः] ।

NOTES

1. सुमनसः—Usually feminine plural in the sense of *flower*. "आपः सुमनसो वर्षा अप्सरःसिकताः समाः । एते स्त्रियां बहुत्वे स्युरेकत्वेऽप्युत्तरत्रयम् ॥"

2. शार्ङ्गरवमिश्राः—शार्ङ्गरवेण मिश्राः Sarngarava and others, इतत् —। Or, मिश्र is प्रशंसावचन when it occurs as final in a compound and then forms a नित्यसमास । Thus शार्ङ्गरवः प्रधानं येषां ते शार्ङ्गरवमिश्राः । "मतल्लिकोद्घमिश्राः स्युः प्रकाण्डस्थलभित्तयः" इति शब्दार्णवकोषः ।

3. (a). हस्तिनापुरगामिनः—इतत्— । गामिन् in the उत्तरपद is of the क्षुभ्नादि class and does not take the cerebral ण । This is in-

ferred from the rule "प्रशोऽयणामिनि" which has the dental न। (b). शब्दाय्यन्ते—are made to speak out, *i. e.*, they are called and they answer. With the reading शब्दायन्ते the sense is शब्दं कुर्वन्ति they shout (शब्द + क्यङ् करणे = शब्दाय), they make a noise. But no mere shouting is intended. They are made to respond. Hence we must have णिच्। Thus शब्दाय (नाम धातु) + णिच् = शब्दायि to cause to speak. शब्दायि + कर्मणि लट् अन्ते = शब्दाय्यन्ते। Now, शब्दाय is अकर्मक because the कर्म is included in the धात्वर्थ ("धात्वर्थेनोपसंग्रहात् ...कर्मणोऽकर्मिका क्रिया") । Hence ऋषयः (अणिकर्त्ता) शब्दायन्ते becomes with णिच् attached गौतमी ऋषीन् (अणिकर्तुः कर्मसंज्ञा) शब्दाययन्ति by the rule "गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामणिकर्त्ता स णौ"। In the कर्मवाच्य we get गौतम्या ऋषयः शब्दाय्यन्ते । Note that without णिच् the यक् will be in the भाववाच्य giving ऋषिभिः शब्दाय्यते।

प्रियंवदा (विलोक्य)—एसा सुज्जोदए एव्व सिहामज्जिदा पडिच्छिदणीवारहत्थाहिं सोत्थिवाअणिआहिं तावसीहिं अहिनन्दिअमाणा सउन्दला चिट्ठइ। उपसप्पन्ह णं [एषा सूर्योदये एव शिखामज्जिता प्रतीष्टनीवारहस्ताभिः स्वस्तिवाचनिकाभिः तापसीभिः अभिनन्द्यमाना शकुन्तला तिष्ठति। उपसर्पाव एनाम्]। (उपसर्पतः)।

Priyamvada (*Looking*)—There, at the very rise of the sun bathed with a plunge up to the crest, stands Sakuntala being congratulated by Tapasa-women who have come carrying picked wild-grain in their hands to pronounce benediction. Let us approach her. (*They approach her*).

(ततः प्रविशति यथोद्दिष्टव्यापारा आसनस्था शकुन्तला)। (शकुन्तलां प्रति) तापसीनामन्यतमा—जादे, भत्तुणो बहुमाणसूअअं महादेईसद्दं लहेहि [जाते, भर्तुर्बहुमानसूचकं महादेवीशब्दं लभस्व]।

(*Then enters on a seat Sakuntala engaged as described*).
ONE ASCETIC-WOMAN (*To Sakuntala*)—Child, may you acquire the title "Chief-Queen" indicative of thy husband's great esteem. (Monier-Williams).

एषेति। 'एषा शकुन्तला सूर्योदये एव शिखामज्जिता' शिखामज्जनपूर्वकं कृतावगाहा सती 'प्रतीष्टा' गृहीता, सत्कृत्य गृहीता इत्यर्थः, ये 'नीवाराः' ते 'हस्ते' यासां ताभिः 'स्वस्तिवाचनं' मङ्गलोच्चारणं कर्त्तुमागताभिः 'तापसीभिः अभिनन्द्यमाना तिष्ठति'। 'एनाम् उपसर्पावः' अस्याः समीपे गच्छावः [उपसर्गवशात् सकर्मकत्वम्]। ["प्रतीष्ट" (त॰, वि॰, न्या॰)—"प्रतिष्ठित" (रा॰, म॰)]।

तत इति। 'उद्दिष्टस्य' वर्णितस्य अनतिक्रमः 'यथोद्दिष्टम्'। तद्वान् 'यथोद्दिष्टः' [मत्वर्थीयोऽच्प्रत्ययः]। तादृशो 'व्यापारो' यस्याः सा। कृतस्नाना तापसीभिरभिनन्द्यमाना इत्यर्थः।

शकुन्तलामिति। 'तापसीनाम्' [निर्द्धारे षष्ठी] 'अन्यतमा' एका [अन्यतमेति अव्युत्पन्नं प्रातिपदिकम्]।

जाते इति। 'भर्त्तुः' पत्युः 'बहुमानस्य' पूजायाः 'सूचकम्' अभिव्यञ्जकं 'महादेवी' इति 'शब्दम्' आख्यां 'लभस्व'। भर्त्रा अर्चिता देवीषु श्रेष्ठा भव।

NOTES

1. (a). शिखा is चूडा crest. "शिखाग्रमात्रे चूडायाम्" इत्यादि हैमः। शिखामज्जिता—मस्ज + णिच् + क्त कर्मणि = मज्जिता caused to dive. शिखायां मज्जिता। Or मज्जनं मज्जः। भावे घञ्। शिखाया मज्जः। शिखामज्जः immersion of the crest. स सञ्जातः अस्या इति शिखामज्ज + इतच् स्त्रियाम्। (b). प्रतीष्ट &c.—प्रति + इष + क्त कर्मणि = प्रतीष्टाः carried. नितरां व्रियन्ते इति नि + वृ + घञ् कर्मणि = नीवाराः wild grain. नि becomes नी by the rule "उपसर्गस्य घञि अमनुष्ये बहुलम्"। प्रतीष्टा नीवाराः प्रतीष्टनीवाराः। ते हस्ते यासाम् ताभिः। The सप्तम्यन्त word हस्त is placed last as in गडुकण्ठ। Compare कमण्डलुपाणि, पत्रहस्ता, सशरचापहस्त &c. (c). स्वस्तिवाचनिकाभिः—वचनकर्मणि प्रेरणम् इति वच + णिच् + ल्युट् भावे = वाचनम्। स्वस्ति इत्यस्य वाचनं स्वस्तिवाचनम्। In auspicious ceremonies worthy Brahmanas have

to be approached with the request "Do you say blessings"(स्वस्ति भवन्तो ब्रुवन्तु). Thus urged the Brahmanas say "Let there be blessings unto thee" (स्वस्त्यस्तु) । This urging to say स्वस्ति is स्वस्तिवाचन । Those who urge are called स्वस्तिवाचनिक (see below). "संपूज्यगन्धमाल्याद्यैर्ब्राह्मणान् स्वस्तिवाचयेत् । धर्म्ये कर्मणि माङ्गल्ये संग्रामेऽद्भुतदर्शने ॥" Raghava explains "पारम्पर्येण स्वस्तिवाचनाधिकारिणीभिः" । Hence his derivation is स्वस्तिवाचने नियुक्ता अधिकृता इति स्वस्तिवाचन + ठक् = स्वस्तिवाचनिकाः by the rule "तत्र नियुक्तः" । This is open to two objections— *First*, ठक् requires ऐच् to come in after स in स्वस्ति by the rule "द्वारादीनाञ्च" स्वस्ति being of the द्वारादि class. The form then is सौवस्तिवाचनिक । *Second*, in the feminine, this gives सौवस्तिवाचनिकी । Nor can we say that the affix is ठन् and not ठक्,for, in this sense we can have ठन् *only* after compounds ending in अगार as देवागारिका, कोष्ठागारिका &c. Again स्वस्तिवाचनं प्रयोजनमासाम् gives स्वस्तिवाचना: by the Varttika "पुण्याहवाचनादिभ्यो लुक्", the भाष्यकार classing पुण्याहवाचन, शान्तिवाचन and स्वस्तिवाचन together. I therefore propose to derive thus—स्वस्ति वाचयन्ति इति स्वस्ति + वच + णिच् + ल्युट् कर्त्तरि बाहुलकात् = स्वस्तिवाचनाः । त एव स्वस्तिवाचनकाः with कन् स्वार्थे ; स्त्रियां स्वस्तिवाचनिकाः । ताभिः ।

2. प्रविशति—The stage direction is apparently anomalous. If शकुन्तला is आसनस्था she cannot be described as प्रविशति । Hence the direction indicates the existence of some sort of curtain behind the friends, which is now removed *'disclosing Sakuntala engaged as described.* प्रविशति then means दर्शकानां नेत्रपथं प्रविशति ।

3. अन्यतमा—अन्यतर and अन्यतम are not derived from अन्य with the affixes डतर and डतम । If they were, पाणिनि would not have specifically mentioned अन्यतर as a सर्वनाम, as he has done in the सर्वादि list, after having declared that डतर and डतम affixes produce सर्वनाम words. अन्यतम does not appear in the सर्वादि list ; it is not therefore a सर्वनाम । See note on अन्यतरा, Act III.

4. (a). बहुमानसूचकम्—मन + घञ् भावे = मानः esteem. बहुः मानः great esteem. तं सूचयतीति or तस्य सूचकम् । (b). महादेवी &c.—महती देवी महादेवी the great queen, *i. e.*, chief queen. देवी has

a technical sense. It means the queen that joins the king at *coronation*. (अभिषेक)। "देवी कृताभिषेकायामितरासु च भट्टिनी" इत्यमरः। Thus शकुन्तला was not even entitled to be called a देवी। If then she came to be called महादेवी, it would only indicate her husband's great esteem (बहुमान)।

द्वितीया—वच्छे, वीरप्पसविणी होहि [वत्से, वीरप्रसविनी भव]।

SECOND—Child, may you give birth to a hero.

तृतीया—वच्छे, भत्तुणो बहुमदा होहि [वत्से, भर्त्तुर्बहुमता भव]। (आशिषो दत्त्वा गौतमीवर्ज्जं निष्क्रान्ताः)।

THIRD—Child, may you be greatly esteemed by your husband. (*Exeunt all except Gautami after bestowing blessings*).

सख्यौ (उपसृत्य)—सहि. सुहमज्जणं दे होदु [सखि, सुखमज्जनं ते भवतु]।

FRIENDS (*Approaching*)—Friend, may this be a happy bath to you.

शकुन्तला—साअदं मे सहीणं। इदो णिसीदह [स्वागतं मे सखीभ्याम्। इतो निषीदतम्]।

SAKUNTALA—Welcome to my friends. Sit down here.

उभे (मङ्गलपात्राण्यादाय उपविश्य)—हला सज्जा होहि जाव मङ्गलसमालम्भणं विरएम [हला सज्जा भव यावन्मङ्गलसमालम्भनं विरचयाव:]।

BOTH (*Taking up the pots of auspicious things and sitting down*)—Get ready, dear, we will perform your auspicious decorations.

द्वितीयेति। वीरमपत्यं प्रसूते इति 'वीरप्रसविनी' वीरसूः 'भव'। एष ते गर्भो वीरं जनयतु।

तृतीयेति। 'भर्तुः' पत्युः 'बहुमता' प्रिया 'भव'। नेयं प्रथमाया आशिषः पुनरुक्तिः। या हि अर्चिता सैव प्रिया इति नास्ति नियमः। "अर्चिता तस्य कौसल्या प्रिया केकयवंशजा" इत्यादिषु भेददर्शनात्।

आश्रिष इति। 'गौतमीं वर्जयित्वा' [अपरोक्षायामपि द्वितीयोपपदाण्णमुल्] 'निष्क्रान्ताः'।

सखीति। सुखयतीति 'सुखं' सुखकरम् [पचाद्यच्] 'मज्जनम्' अवगाहः 'ते भवतु'। शापफलं शङ्कमानयोः सख्योरियमिष्टाशंसा।

शकुन्तलेति। 'स्वागतं' शुभागमनं 'मे सखीभ्यां' भवतु। 'इतः' अत्र मत्समीपे 'निषीदतम्' उपविशतम्।

उभे इति। 'मङ्गलानां' मङ्गलद्रव्याणां 'पात्राणि' भाजनानि 'आदाय' गृहीत्वा 'उपविश्य' आहतुः। 'मज्जा' उद्युक्ता 'भव'। 'यावत्' [अवधारणे] 'मङ्गलार्थं समालम्भनम्' अलङ्करणं 'विरचयावः'।

NOTES

1. वीरप्रसविनी—वीर + प्र + सू + इन कर्त्तरि ताच्छील्ये साधुकारिणि वा।

2. (a). भर्त्तुः—"क्तस्य च वर्त्तमाने" इति अनुक्ते कर्त्तरि षष्ठी। (b). बहुमता—मन + क्त कर्मणि स्त्रियाम् = मता desired ईप्सिता। बहु मता बहुमता greatly desired, *i. e.*, loved. "मतिरिच्छा"—*Vrittikara.* The first तापसी wishes her *honour* (बहुमान) from her husband ; this one desires that she may enjoy his *love.* Thus one is not a repetition of the other.

3. गौतमीवर्जम्—गौतमी + वर्जि + णमुल्। By the rule "द्वितीयायाञ्च" we may have णमुल् with a द्वितीयान्त उपपद if the compound implies haste (परीप्सा)। Here no haste is implied, yet we have णमुल्। In another place the poet writes "अन्वितः पतिवात्सल्याद्गृहवर्जमयोध्यया"। Haradatta thinks परीप्सा (haste) may be absent in some cases (प्रायिकम्)। "द्वितीयायाञ्च इति णमुल्। तत्र हि परीप्सायामिति प्रायिकम्"। Panini himself compounds एकवर्जम् without परीप्सा in "अनुदात्तं पदमेकवर्जम्"।

4. (a). सखीभ्याम्—स्वागत like गन्ध, पुष्प, धूप, दीप &c. is a पूजोपचार। Compare "आसनं स्वागतं पाद्यमर्घ्यमाचमनीयकम्। मधुपर्काचमस्नानवसनाभरणानि च। गन्धपुष्पे धूपदीपौ नैवेद्यं वन्दनं तथा। प्रयोजयेदर्चनायामुपचारांस्तु षोडश॥" It is usual to have चतुर्थी when स्वागत is an उपचार। Thus "यस्य दर्शनमिच्छन्ति देवाः स्वाभीष्टसिद्धये। तस्मै ते परमेशाय स्वागतं स्वाग-

तस्य मे"। "स्वागतं···युगवाहुभ्यः प्रातेभ्य.", "कल्पिताघ्यांय तस्मै···स्वागतं व्याज-हार।" Some read सखीभ्यः। शेषे षष्ठी। (b). निषीदतम्—सद becomes षद by the rule "सदिरप्रते."। Hence निषीदतम्, निसीदतम् &c. but witness प्रतिसीदतम्।

5. सज्जा—सज्जते इति सस्ज+अच् कर्त्तरि स्त्रियाम्।

शकुन्तला—इदंवि वहु मन्तव्वं। दुल्लहं दाणिं मे सहीमण्डणं भविस्सदि [इदमपि वहुमन्तव्यम्। दुर्लभमिदानीं मे सखीमण्डणं भविष्यति]। (वाष्पं विसृजति)।

SAKUNTALA—This too has to be highly esteemed. Decoration by my friends will now be rare for me. (*Sheds tears*).

उभे—सहि उइदं ण दे मङ्गलकाले रोइदुं [सखि उचितं न ते मङ्गलकाले रोदितुम्]। (अश्रूणि प्रमृज्य नाट्येन प्रसाधयतः)।

BOTH—Friend, it is not proper for you to weep at an auspicious moment. (*Wiping away her tears, they act decorating*).

प्रियंवदा—आहरणोइदं रूवं अस्समसुलहेहिं पसाहणेहिं विप्पआरीअदि [आभरणोचितं रूपम् आश्रमसुलभैः प्रसाधनैर्विप्रकार्य्यते]।

PRIYAMVADA—The beauty that deserves jewellery is insulted by decorations available in a hermitage.

शकुन्तलेति। 'इदमपि' सखीभ्याम् अलङ्करणमपि 'मे' वहुमन्तव्यम्' आदर्त्तव्यम्। कुत इत्याह—'इदानीं' दूरस्थायां मयि 'सखीभ्यां मण्डनं' प्रसाधनं 'मे' मम सम्बन्धे [शेषे षष्ठी। "न लोकेति—" कर्त्तृषष्ठ्या निषेधात्] 'दुर्लभं भविष्यति'। 'वाष्पं विसृजति' मुञ्चति, रोदितीति इत्यर्थः। दुर्निमित्तमेतत् भाविनो महतो व्यसनस्य सूचकम्।

उभे इति। 'मङ्गलस्य काले' समये, प्रसाधनक्षणे इत्यर्थः 'ते रोदितुं न उचितम्' नार्हम्। अशुभमेतद्रोदनं तस्मा रोदीः। 'अश्रूणि' शकुन्तलाया नेत्रजलानि 'प्रमृज्य' शोधयित्वा 'नाट्येन' अभिनयकर्मणा 'प्रसाधयतः' प्रसाधनम् अलङ्करणं नाटयतः इत्यर्थः।

प्रियंवदेति। 'आभरणानां' रत्नाद्यलङ्काराणाम् 'उचितं' योग्य' 'रूपं' कान्तिः आश्रमे सुलभैः सुखप्राप्यैः 'प्रसाधनैः' मञ्जरीनवपल्लवादिभिरलंकरणैः 'विप्रकार्य्यते' प्रदूष्यते। एभिस्ते मण्डनं धर्षणा एव।

NOTES

1. दुर्लभम्—दुःखेन लभ्यते इति दुर्+लभ+खल् कर्मणि। लभ does not become लम्भ owing to the prohibition "न सुदुर्भ्यां केवलाभ्याम्"—लभ will not have नुम् in खल् and घञ् unless some other उपसर्ग is coupled with सु or दुर्। Thus दुर्लभ, सुलभ, सुदुर्लभ &c.—but दुरालम्भ, सुप्रलम्भ &c.—दुरालभा is a संज्ञाशब्द and therefore स्वप्रमाण।

2. रोदितुम्—रुद्+तुमुन् भावे by the maxim "अव्ययकृतो भावे"। The sense is रोदनम्। Hence the construction is clear—मङ्गलकाले रोदितुम् रोदनम् ते तव सम्बन्धे उचितं युक्तं न। उचितम् qualifies रोदितुम्। ते goes with उचितम् and not with रोदितुम्, for then we shall have तव instead of ते owing to the prohibition "न लोकाव्ययनिष्ठाखलर्थतृनाम्" because रोदितुम् is अव्यय।

3. (a). प्रसाधनैः—प्रसाध्यते एभिः इति प्र+साध+णिच्+ल्युट् करणे=प्रसाधनानि decorations. Refers to the मङ्गलसमालम्भनानि spoken of above. (b). विप्रकार्य्यते—वि+प्र+कृ+णिच्+लट् ते कर्मणि। The णिच् is स्वार्थे because विप्रकृ without णिच् means 'to insult.' Thus "विप्रकृतोऽपि रोषणतया मा स्म प्रतीपं गमः"—*Infra* ; "विप्रकृतः पन्नगः फणं कुरुते"—*Infra* ; "विप्रकृताः तारकेण दिवौकसः"—*Kumara* ; &c. Or thus—वि+प्र+कृ+घञ् भावे=विप्रकारः insult, or perversion अन्यथाकरणम्। विप्रकारेण दूषयति इति विप्रकार+णिच्+लट् ति=विप्रकारयति mars by alteration. This sort of णिच् is seen in cases like असिना हन्ति असयति, दात्रेण लुनाति दात्रयति &c. and is allowed by the गणसूत्र "कर्तृकरणाद्धात्वर्थे"—The instrument (करण) of the agent (कर्त्ता) takes णिच् and then becomes a धातु। Now in the कर्तृवाच्य we have प्रसाधनानि रूपं विप्रकारयन्ति the decorations mar the beauty by alteration. कर्मणि it becomes प्रसाधनैः रूपं विप्रकार्य्यते।

(प्रविश्य उपायनहस्तौ) ऋषिकुमारकौ—इदमलङ्करणम्। अलङ्क्रियतामत्रभवती। (सर्वा विलोक्य विस्मिताः)।

TWO HERMIT-LADS (*Entering with presents in hand*)—Here is jewellery, let her honoured self be decorated. (*All are amazed on seeing this*).

गौतमी—वच्छ, णारअ कुदो पदं [वत्स नारद, कुत एतत्] ।

GAUTAMI—Child, Narada, whence is this ?

प्रथमः—तातकाश्यपप्रभावात् ।

FIRST—Through Father Kasyapa's majesty.

गौतमी—किं माणसी सिद्धी [किं मानसी सिद्धिः] ।

GAUTAMI—What ! A mental creation ?

प्रविश्येति । उपेयते एभिरित्युपायनानि उपहारद्रव्याणि [करणे ल्युट्] 'हस्ते' ययोः तौ [गड्वादीनामाकृतिगणत्वात् सप्तम्याः परनिपातः] । 'सर्वा' आभरणानि 'विलोक्य विस्मिताः' । महार्हत्वात् अतर्कितोपस्थित्या च विस्मयः ।

गौतमीति । 'कुतः' कुतो लब्धम् 'एतत्' ।

प्रथमेति । 'तातकाश्यपस्य प्रकृष्टात् भावात्' एतत् प्राप्तम् । तातस्य माहात्म्यात् ।

गौतमीति । 'किं' मनस इयं 'मानसी सिद्धिः' कृतिः ? किमेतत् तपःप्रभावात् मनसा कृतं तत्रभवता ?

NOTE

1. तातकाश्यपप्रभावात्—भू+घञ् भावे=भावः । प्रकृष्टो भावः प्रभावः majesty. प्रादितत्—। प्र+भू does not take घञ् because of the prohibition अनुपसर्गे in the rule "श्रिणीभुवोऽनुपसर्गे" ।

द्वितीयः—न खलु । श्रूयताम् । तत्रभवता वयमाज्ञप्ता शकुन्तलाहेतोर्वनस्पतिभ्यः कुसुमान्याहरतेति । तत इदानीम्—

क्षौमं केनचिदिन्दुपाण्डु तरुणा माङ्गल्यमाविष्कृतं
निष्ठ्यूतश्चरणोपरागसुभगो लाक्षारसः केनचित् ।
अन्येभ्यो वनदेवताकरतलैरापर्वभागोत्थितैर्
दत्तान्याभरणानि नः किसलयोद्भेदप्रतिद्वन्द्विभिः ॥

SECOND—Certainly not. Listen. By his reverence we were thus commanded—"Collect flowers from the trees for Sakuntala." Now, then, unto us, by a certain tree was exhibited an auspicious silk-garment white like the moon; by a certain one was poured liquid lac, nice for dying the feet; from others were delivered ornaments by the palms of wood-nymphs protruded up to the wrist and vying with the show of fresh twigs.

द्वितीय इति। 'न खलु' नैव मानसी सिद्धिः। 'श्रूयतां' तत्त्वतः आकर्ण्यताम्। 'शकुन्तला' एव 'हेतुः' कारणं 'शकुन्तलाहेतुः' तस्मात् [हेतौ पञ्चमी] तस्य वा [शेषे षष्ठी] 'कुसुमानि वनस्पतिभ्यः' वृक्षेभ्यः ["वनस्पतिर्ना द्रुमात्रे" इति मेदिनी। पारस्करादिः] 'आहरत' आनयत यूयम् 'इति वयमाज्ञप्ता तत्रभवता काश्यपेन'।

क्षौममिति। अन्वयः—तत इदानीं नः केनचित् तरुणा इन्दुपाण्डु माङ्गल्यं क्षौममाविष्कृतम्। केनचित् चरणोपरागसुभगो लाक्षारसो निष्ठ्यूतः। अन्येभ्यः आपर्वभागोत्थितैः किसलयोद्भेदप्रतिद्वन्द्विभिः वनदेवताकरतलैः आभरणानि दत्तानि।

व्याख्या—'ततः' प्रस्थितेषु अस्मासु 'इदानीम्' अधुना 'नः' अस्मभ्यम् ["कर्मणा यमभिप्रैति स सम्प्रदानम्" इति चतुर्थी] 'केनचित् तरुणा इन्दुः' चन्द्र इव 'पाण्डु' धवलम् अतएव 'माङ्गल्यं मङ्गलकर्मयोग्यं 'क्षौमं' दुकूलयुगलम् 'आविष्कृतं' प्रकाशितम्। 'केनचित्' तरुणा 'चरणयोः उपरागे' रञ्जनकर्मणि 'सुभगः' उदारः, साधुः इत्यर्थः 'लाक्षारसः' अलक्तकः 'निष्ठ्यूतः' उद्गीर्णः। 'अन्येभ्यः' तरुभ्यः 'पर्वणः' सन्धेः 'भागः' प्रदेशः, मणिबन्ध इत्यर्थः। तस्मात् 'आ' तत्पर्यन्तम् 'उत्थितैः' अतएव 'किसलयानां' नवपल्लवानाम् 'उद्भेदाः' विकाशाः' उद्भिन्नानि किसलयानि इत्यर्थः, तेषां 'प्रतिद्वन्द्विभिः' तत्सदृशैः 'वनदेवतानां करतलैः' उत्तानैः आलोहितैः हस्तैः करणैः 'आभरणानि' रत्नादीनि भूषणानि 'दत्तानि'। तातकाश्यपप्रभावात् वनस्पतयः कुत्र वा स्वयं, कुत्र वा वनदेवताः प्रतिनिधीकृत्य, नः संवर्द्धयामासुः। ["चरणोपरागसुभगो" (त-, वि-, व्या-)—"चरणोपभोगसुलभो" (रा-, म-) ॥ "नः

क्लिसु—" (त-, न्या-)—"तत्क्लिसु—" (रा-, वि-, म-) ॥ "किसलयोद्भेद-प्रतिद्वन्द्विभिः" (रा-, वि-, म-)—"किसलयच्छायापरिस्पर्द्धिभिः" (त-, न्या-)]।

NOTES

1. (a). शकुन्तलाहेतोः—Here the rule "षष्ठी हेतुप्रयोगे" does not apply. For this rule does not regulate the षष्ठी in हेतुशब्द but that in the word of which the हेतुत्व is *implied* (द्योत्य)। Hence it would be cited only if the word शकुन्तला had appeared with the षष्ठीविभक्ति attached to it. Besides, the विभक्ति to explain here is that in the Pratipadika शकुन्तलाहेतु। This प्रातिपदिक arises out of the वाक्य—शकुन्तला एव हेतुः। But this *directly states* the हेतुत्व of शकुन्तला and does not leave it to be *inferred* (द्योतित)। This is another reason why the rule does not apply. Hence explain शकुन्तलाहेतोः as पञ्चमी or शेषे षष्ठी। The पञ्चमी is available by the Varttika "निमित्तकारणहेतुषु सर्वासां प्रायदर्शनम्"—when निमित्त, कारण, हेतु &c. are used *all* (सर्वासाम्) the Vibhaktis are as a rule allowable. (b). वनस्पतिभ्यः—वनस्पति often means trees that do not show flowers. It also means *any* tree (See Tika). अपादाने पञ्चमी। There is अपाय when the flowers are plucked and वनस्पति is ध्रुव।

2. (a). क्षौमम्—क्षुमा is a sort of fibre. "क्षौमं शाणं वा ब्राह्मणस्य" quoted by Vachaspati makes a difference between क्षुमा and शण (flax). क्षुमाया विकारः। (b). इन्दुपाण्डु—उपमानकर्मधा—। White as the moon. See Tika. (c). माङ्गल्यम्—Auspicious. Ordinarily this is derived as मङ्गलाय हितम्। This refers to the sutra "तस्मै हितम्"। But this sutra directs the affix छ giving मङ्गलीय and not माङ्गल्य। Again मङ्गले साधु gives मङ्गल्यम् which is in common use. *c. f.* "अमङ्गल्यं शीलं तव भवतु नामैवमखिलम्", "सर्वमङ्गलमङ्गल्ये" &c. The following derivations may be suggested—(1) मङ्गलम् a blessing, also any thing *promoting* a blessing, *i. e.*, auspicious. मङ्गलमेव इति मङ्गल + ष्यञ् स्वार्थे = माङ्गल्यम् like चतुर्वर्णमेव चातुर्वर्ण्यम्, त्रिलोकी एव त्रैलोक्यम् &c. चतुर्वर्णादि। (2) Or मङ्गलमेव माङ्गलम् blessing, प्रज्ञादि। तत्र साधु इति माङ्गल + यत् = माङ्गल्यम् auspicious. (3) Or again मङ्गले साधु इति मङ्गल + यत् मङ्गल्यम् auspicious. तदेव इति अण् स्वार्थे, प्रज्ञादिः। (d). निष्ठ्यूत—

नि + ष्ठिव + क्त कर्मणि। Literally it means "spat" which is vulgar (ग्राम्य)। Here secondarily (गौणवृत्ति) 'poured' which avoids ग्राम्यता। "निष्ठ्यूतोद्गीर्णवान्तादि गौणवृत्तिव्यपाश्रयम्। अतिसुन्दरमन्यत्र ग्राम्यकक्षा विगाहते॥"—*Dandin*. (**e**). अन्येभ्यः—अपादाने पञ्चमी। The context is अन्येभ्य उत्थितैः which implies अपाय। Hence "ध्रुवमपाये—" इत्यपादानता। (**f**). वनदेवता &c.—Raghava takes this as करणे तृतीया the कर्तृता resting with the वनस्पति। The trees having no hands of their own do the work with the hands of the nymphs residing in them. (**g**). आपर्व &c.—पर्वन् is joint. Here *wrist*. पर्वणो भागः प्रदेशः पर्वभागः। तत्पर्यन्तम् आपर्वभागम् up to the wrist. अव्ययी—। आपर्वभागम् उत्थिताः। सहसुपेति समासः। तैः। (**h**). किसलय &c.—By निपातन in the rule "द्वन्द्वं रहस्यमर्यादा—" द्वन्द्व is got from द्वि repeated. Thus द्वि द्वि = द्वम् द्व = द्वन्द्वम् in the neuter. "द्विशब्दस्य द्विर्वचनं पूर्वपदस्य अम्भावः अत्वं चोत्तरपदस्य निपात्यते"—Vrittikara. "द्वन्द्वं कलहयुग्मयोः" इत्यमरः। Here the sense is कलह। प्रतिकृतं द्वन्द्वं प्रतिद्वन्द्वम् rivalry. तदस्त्येषाम् इति प्रतिद्वन्द्व + इनि मत्वर्थे = प्रतिद्वन्द्वीनि rivals. किसलयोद्भेदाः = उद्भिन्नानि किसलयानि by the maxim "भावानयने द्रव्यानयनं भविष्यति"। किसलयोद्भेदानां प्रतिद्वन्द्वीनि rivals of the fresh leaves, *i. e.*, the hands thus put out resembled the bunches of fresh leaves that were in the trees. The well-shaped and delicately tinged (ताम्रतल) palms resembled clusters of new leaves.

2. *Readings*. (**a**). It is difficult to see why Raghava reads चरणोपभोगसुलभः unless it is for the alliteration of लकार in सुलभो लाक्षा। But the reading adopted by us has रकार and गकार both repeated. (**b**). तत्किसलय &c. is the Devanagari reading and is adopted by Raghava, Vidyasagara, and Monier-Williams. But तत् seems redundant. The sense is clear without तत्। On the other hand नः of the Bengali Recension implies that all this was a special favour unto *us*—अस्माभ्यम् आविष्कृतम्, अस्मभ्यं निष्ठ्यूतः, अस्मभ्यं दत्तानि—because *done on seeing us*. They do not do this for any body and every body. Hence प्रियंवदा takes this as an अभ्युपपत्ति (favour) indicating luck (See below). (**c**). किसलयच्छायापरिस्पर्द्धिभिः is vague.

प्रियंवदा (शकुन्तलां विलोक्य)—हला इमाए अब्भुववत्तीए सूइदा दे भत्तुणो गेहे अणुहोदव्वा रामलच्छि [हला अनया अभ्युपपत्त्या सूचिता ते भर्त्तुर्गेहे अनुभवितव्या राजलक्ष्मीः]। (शकुन्तला व्रीड़ां रूपयति)।

PRIYAMVADA (*Looking at Sakuntala*)—By this condescension is indicated, the royal fortune which is to be enjoyed by you in the house of your husband. (*Sakuntala acts bashfulness*).

प्रथमः—गौतम, एह्येहि अभिषेकोत्तीर्णाय काश्यपाय वनस्पतिसेवां निवेदयावः।

FIRST LAD—Come, Come, Gautama, we report this service of the trees to Kasyapa who has come up from his plunge into the water.

द्वितीयः—तथा (निष्क्रान्तौ)

SECOND—Just so. (*Exeunt*).

सख्यौ—अए अणुवहुत्तभूसणो अअं जणो। चित्तकम्मपरिअएण अङ्गेसु दे आहरणविणिओअं करेम्ह [अये अनुपभुक्तभूषणोऽयं जनः। चित्रकर्मपरिचयेन अङ्गेषु ते आभरणविनियोगं कुर्वः]।

FRIENDS—Well, we have never worn jewellery. We place the ornaments on your limbs by our knowledge of painting.

हलेति। 'अनया अभ्युपपत्त्या' अनुग्रहेण, वनस्पतिकृतेन 'भर्त्तुर्गेहे ते' ["कृत्यानां कर्त्तरि वा" इति पाक्षिकी षष्ठी] 'अनुभवितव्या' भोक्तव्या 'राजलक्ष्मीः' राजश्रीः 'सूचिता' ज्ञापिता। ["राजलक्ष्मीः" (ता-, वि-, न्या)—"राजलक्ष्मीरिति" (रा-, म-)]॥

शकुन्तलेति। 'व्रीड़ां' लज्जां 'रूपयति' अभिनयति।

प्रथम इति। 'एहि' आगच्छ 'अभिषेकात्' अवगाहनस्नानात् 'उत्तीर्णाय' तीरं प्राप्ताय 'काश्यपाय' ["कर्मणा यमभिप्रैति—" इति सम्प्रदाने चतुर्थी] 'वनस्पतीनां सेवां' दुकूलादिदानेन परिचर्य्यां 'निवेदयावः'।

अये इति। 'अये' इति सम्भ्रमे। 'अयं जनः' अस्मद्विधो जनः 'अनुपभुक्तानि' असेवितानि 'भूषणानि' येन तादृशः। कुत्र किं परिधेयं न जानीवहे। 'चित्रकर्मणः' आलेख्यलेखनस्य 'परिचयेन' अभ्यासेन [करणे तृतीया] 'ते अङ्गेषु आभरणानां विनियोगं' निवेशं 'कुर्वः'। चित्राणि दृष्टानि लिखितानि च। तेन ज्ञानेन त्वां भूषयावः।

NOTES

1. (a). अभ्युपपत्त्या—अभ्युपपत्ति is अनुग्रह favour. "अभ्युपपत्तिरनुग्रहः" इत्यमरः।

2. अभिषेकोत्तीर्णाय + उद् + तॄ + क्त कर्त्तरि = उत्तीर्णः got up. अभिषेकात् अभिषेकं समाप्य उत्तीर्णः। सहसुपेति समासः the पञ्चमी being ल्यब्लोपे कर्मणि।

3. (a). अये—The jewellery came unexpectedly. Never having worn them and not having thought how to wear them, they found themselves in a fix. Hence the सम्भ्रम। "अये क्रोधे विषादे च सम्भ्रमे स्मरणेऽपि च" इति विश्वः। (b). चित्रकर्मपरिचयेन—परि + चि + अच् भावे = परिचयः skill acquired by practice अभ्यास। For this sense compare "परिचयं चललक्ष्यनिपातने...करोति"—*Raghu*. चित्रस्य कर्म अनुष्ठानं चित्रकर्म the act of painting. तस्मिन् तस्य वा परिचयः skill in the act of painting. तेन। करणे तृतीया।

शकुन्तला—जाणे वो णेउणं [जाने वां नैपुणम्]। (उभे नाट्येनालङ्कुरुतः)।

SAKUNTALA—I know your cleverness. (*Both act dressing her*).

(ततः प्रविशति स्नानोत्तीर्णः काश्यपः)। काश्यपः—

यास्यत्यद्य शकुन्तलेति हृदयं संस्पृष्टमुत्कण्ठया।
कण्ठः स्तम्भितबाष्पवृत्तिकलुषश्चिन्ताजडं दर्शनम्।
वैक्लव्यं मम तावदीदृशमहो स्नेहादरण्यौकसः
पीड्यन्ते गृहिणः कथं नु तनयाविश्लेषदुःखैर्नवैः।

(परिक्रामति)।

(*Then enters Kasyapa having come up from his plunge*)
KASYAPA—Because Sakuntala will go to-day, my heart is smitten with anguish, my throat is troubled with the checked flow of tears, and my senses are paralysed with anxiety. Such through affection is the helplessness of me living in the forest ; how, alas ! are the house-holders afflicted by the grief of first parting with their daughters ! (*Goes round the stage*).

शकुन्तलेति। 'वां' युवयोः 'नैपुणं' निपुणतां चित्रलेखनपटुतामित्यर्थः। [अवैमि] 'जाने' यद्वा—'नैपुणं' निपुणता चतुरता। येन अज्ञातमपि ज्ञानगोचरं कृत्वा प्रसाधयसि। 'नाट्येन' अभिनयेन 'अलङ्कृतः' अलङ्करणं नाटयतः इत्यर्थः।

'स्नानात् उत्तीर्णः' तीरं प्राप्तः कृतस्नानः इत्यर्थः।

यास्यतीति। अन्वयः—अद्य शकुन्तला यास्यति इति हृदयम् उत्कण्ठया संस्पृष्टं, कण्ठः स्तम्भितवाष्पवृत्तिकलुषः, दर्शनं चिन्ताजड़म्। अरण्यौकसो मम तावत् स्नेहादीदृशं वैक्लव्यम्, अहो गृहिणः नवैः तनयाविश्लेषदुःखैः कथं नु पीड्यते। व्याख्या—'अद्य शकुन्तला' पतिगृहं 'यास्यति इति' हेतोर्मम 'हृदयं' चेतः 'उत्कण्ठया' आवेगेन 'संस्पृष्टं' सम्यगाक्रान्तम्। भाविना अपि, न तु भूतेन भवता वा, विरहेण कातरं मे मनः। 'कण्ठः स्तम्भिता' धैर्य्येण वारिता या 'वाष्पवृत्तिः' अश्रुप्रसरः, तया 'कलुषः' विकृतः। नाहं रोदिमि किन्तु स्वरभङ्गो मे जातः। दृश्यते ज्ञायते अनेन इति 'दर्शनं' तत्तदिन्द्रियं [करणे ल्युट्। दृशिरत्र ज्ञानमात्रे न तु केवलं चाक्षुषे] 'चिन्तया' शकुन्तलागमनानुध्यानेन 'जड़ं' विह्वलम्। दर्शनश्रवणादिकं भवति किन्तु विषयग्रहणं नास्ति। 'अरण्यम् ओकः' आश्रयो यस्य तथाविधस्य ["ओकः सद्मनि चाश्रये" इति विश्वः], वनवासिनो, निर्ममस्य 'मम तावत्' ममैव [तावदवधारणे] 'स्नेहात्' ममतया 'ईदृशं वैक्लव्यं' ईदृशी विकलता, 'अहो' हा [अहो इति करुणार्थम्। "अहो धिगर्थे शोके च करुणार्थविषादयोः" इति मेदिनी] 'गृहिणः' ममत्ववन्तो गृहस्थाः 'नवैः' नूतनैः प्रथमानुभूतैः 'तनयाभिः' यो 'विश्लेषः' वियोजनं तज्जातैः 'दुःखैः कथं' कीदृशं 'नु पीड्यन्ते' [दुःखस्य प्रतिव्यक्ति भिन्नत्वात् बहुत्वम्]। निर्ममस्य ममापि यत् असह्यप्रायं, मन्ये वराका विषयिणस्तेन निर्जीवा एव भवन्ति इत्यभिप्रायः। ["कण्ठः···कलुषः" (रा-, वि-, म-)—"स्तम्भितबाष्प-

अवोपरोधि गदितम्" (त-, न्या-) ॥ "ईदृशमहो" (वि-)—"ईदृशमिदम्" (रा-)—"ईदृशमपि" (त-, न्या-, म-) ॥ "कथं नु" (वि-, म-)—"कथं न" (रा-, त-, न्या-)] ।

NOTES

1. नैपुणम्—निपुण is पटु skilful. तस्य भाव: इति निपुण + अण् = नैपुणम् skill. The word निपुण is ब्राह्मणादि and also युवादि । Hence निपुणस्य भाव: gives नैपुण्य (ब्राह्मणादित्वात् ष्यञ्) as well as नैपुण (युवादित्वादण्) ।

2. स्नानोत्तीर्ण:—See अभिषेकोत्तीर्णाय—*Ante.*

3. (a). यास्यति—Note the *future.* The departure neither has happened nor is happening. But the thought that it *will* happen affects me. This shows the unbearableness of the separation. (b). इति—Indicates हेतु । (c). संस्पृष्टम्—सम् is intensive. सम्यक् स्पृष्टम् । (d). स्तम्भित &c.—स्तम्भ + णिच् + क्त कर्मणि = स्तम्भिता checked. बाष्पस्य वृत्ति: the flow of tears. स्तम्भिता बाष्पवृत्ति: । कर्मधा— । तया कलुष: । (e). अहो—आश्चर्ये । His emotion surprises him. He thought he was above such feelings. Also see *Tika* (f). नु—प्रश्ने । He fails to estimate the grief of house-holders and wants to know how much it affects them. Of course thereby he implies that the shock to them is tremendous.

3. *Readings.* (a). It seems natural to mention कण्ठ after हृदय । So the Devanagari reading is preferable. (b). As explained above; अहो and नु are necessary to bring out the sense.

सख्यौ—हला सउन्दले, अवसिदमण्डणा सि । परिहेहि संपदं खोमजुअलं [हला शकुन्तले, अवसितमण्डनासि । परिधेहि साम्प्रतं क्षौमयुगलम्] । (शकुन्तला उत्थाय परिधत्ते) ।

FRIENDS—Dear Sakuntala, you have your decoration finished. Now put on this pair of silk robes. (*Sakuntala rises and puts them on*).

गोतमी—जादे एसो दे आणन्दपरिवाहिणा चक्खुणा परिस्सजन्तो विअ गुरु उवट्ठिदो । आआरं दाव पडिवज्ज [जाते,

एष ते आनन्दपरिवाहिणा चक्षुषा परिष्वजमान इव गुरुः उपस्थितः। आचारं तावत् प्रतिपद्यस्व]।

GAUTAMI—My child, here, your father has arrived embracing you as it were with eyes that are pouring joy. Observe the custom.

शकुन्तला (सव्रीडम्)—ताद वन्दामि [तात वन्दे]।

SAKUNTALA (*with an ashamed air*)—Father, I salute thee.

इतीति। 'अवसितं' समाप्तं 'मण्डनम्' अलङ्करणं यस्याः तथाविधा 'असि'। 'साम्प्रतम्' अधुना ["साम्प्रतं तूचितेऽधुना" इति हैमः] 'क्षौमयुगलं परिधेहि'।

जाते इति। 'आनन्दं' हर्षं 'परितो वाहयति' प्रेरयति यत् तथाविधेन 'चक्षुषा परिष्वजमानः' त्वामालिङ्गन्निव, अत्यादरेण पश्यन्नित्यर्थः 'गुरुः' तातस्ते 'उपस्थितः' समीपे स्थितः। 'आचारं' सत्क्रियां वन्दनरूपां 'प्रतिपद्यस्व' आचर 'तावत्'।

शकुन्तलेति। 'व्रीडया' लज्जया 'सह'। समीपं स्थितेऽपि ताते अनवधाना वन्दनमन्यरा आचारं वारितास्मि इति व्रीडा।

NOTES

1. (a). अवसितमण्डना—अव + सो + क्त कर्त्तरि = अवसितम् ended. अव + सो is अकर्मक as is seen from the णिच् in "औत्सुक्यमात्रमवसाययति प्रतिष्ठा"—Act V. Hence we get कर्त्तरि क्त by the rule"गत्यर्थाकर्मक—". Now see Tika. (b). क्षौमयुगलम्—युगमस्त्यस्मिन् इति युग + लच् मत्वर्थे = युगलम्। Or युज + कलच् औणादिक कर्त्तरि = युगलम्, or again युगं लाति इति युग + ला + क कर्त्तरि। क्षौमयोः युगलम्।

2. (a). जाते—See under"जाते अपि लघुसन्तापानि" &c.—Act III. (b). आनन्द &c.—आ + नन्दि + घञ् भावे = आनन्दः joy. तं साधु परिवाहयति इति आनन्द + परि + वाहि + णिनि साधुकारिणि कर्त्तरि = आनन्दपरिवाहि। तेन। (c). चक्षुषा—जातावेकवचनम्। (d). आचारम्—आ + चर + घञ् कर्मणि = आचारः custom. तम्। The custom is to do obeisance to superiors. Hence Gautami orders her to *salute* Kanva. (e). तावत्—is emphatic (अवधारणे)।

3. सव्रीडम्—व्रीड + अ भावे = व्रीडा and व्रीड + घञ् भावे = व्रीडः as in "व्रीडमावहति मे स सम्प्रति"—*Raghu*. व्रीडया व्रीडेन वा सह यथा तथा।

काश्यपः—

यथातेरिव शर्मिष्ठा भर्त्तुर्बहुमता भव ।
सुतं त्वमपि सम्राजं सेव पूरुमवाप्नुहि ॥

KASYAPA—My child, as Sarmistha was of Yayati, be thou the husband's favourite; as she got Puru, do thou too get an emperor as son.

गौतमी—भअवं, वरो क्खु एसो ण आसिसा [भगवन्, वरः खल्वेष न आशीः] ।

GAUTAMI—Mighty Sir, this is indeed a boon and not a mere benediction.

काश्यपः—वत्से इतः सद्योहुतानग्नीन् प्रदक्षिणीकुरुष्व । (सर्वे परिक्रामन्ति) ।

KASYAPA—My child, this way, keeping to the right, do thou go round the fires to which oblation has just been offered. (*All go round*).

ययातेरिति । अन्वयः—वत्से (त्वं) शर्मिष्ठा ययातेरिव भर्त्तुः बहुमता भव । त्वमपि सा पूरुमिव सम्राजं सुतम् अवाप्नुहि । व्याख्या—हे 'वत्से' शकुन्तले त्वं 'शर्मिष्ठा' असुरस्य वृषपर्वणः कन्या 'ययातेः' नहुषतनयस्य 'इव भर्त्तुः' पत्युः 'बहुमता' प्रिया 'भव' । 'त्वमपि सा' शर्मिष्ठा 'पूरु'' चन्द्रवंशस्य कर्त्तारम् 'इव सम्राजं' चक्रवर्त्तिनं 'सुतं' पुत्रम् 'अवाप्नुहि' लभस्व । पत्या पुत्रेण च सुखिनी भव इति भावः ।

भगवन्निति । भवादृशैर्ब्रह्मर्षिभिरुक्तं देवोक्तमिव अवश्यं फलति । तत् 'एष वरः खलु' ["देवाद्वृते वरः" इत्यमरः] । अन्याभिरुक्तं तु 'आशीः' हितैषणामात्रम् ["आशीर्हितैषणा" इति हैमः] फलति वा न वा । इयन्तु भवदुक्तिः 'न आशीः' ।

वत्से इति । 'इतः' अस्यां दिशि 'सद्यः' समाने अहनि अस्मिन्नेव क्षणे ["सद्यःपरुत्—" इति समानस्य सभावो द्यश्चप्रत्ययो निपात्यते] 'हुतान्' तर्पितान् 'अग्नीन्' त्रेताग्नीन् 'अप्रदक्षिणान्' प्रदक्षिणान् सम्पद्यमानान् 'कुरुष्व' [प्रादिसमास-:ततश्च्विः । यद्वा—अव्ययीभावस्तिष्ठद्गुवादि । ततश्च्विः] । ["सद्योहुतानग्नीन्" (त-, वि-, का-)—"सद्योहुताग्नीन्" (रा-, म-)] ॥

सर्वे इति । 'परिक्रामन्ति' रङ्गमञ्चपरिक्रमणेन अभ्यग्निगमनमभिनयन्ति ।

NOTES

1. ययाते: &c. Yayati was one of the founders of the Lunar race. He had two wives, देवयानी the daughter of शुक्राचार्य the preceptor of the Danavas, and शर्मिष्ठा the daughter of वृषपर्वन् the Danava king. The latter was the favourite. Hence शुक्र cursed him. पूरु his youngest son by शर्मिष्ठा took upon himself the consequences of the curse and relieved his father. As a reward of his devotion he obtained universal sovereignty (साम्राज्य) । For details see Mahabharata Adiparvan.

2. आशी:—आशास्ते एताम् इति आ+शास इच्छायाम्+क्विप् कर्मणि = आशिस् of which the nom. sing, is आशी: । We may have here क्विप् भावे also.

3. (a). अग्नीन्—Refers to the *three* fires of the साग्निक । (b). प्रदक्षिणीकुरुष्व—प्रदक्षिण + च्वि + कृ + लोट् स्व कर्त्रभिप्राये क्रियाफले । No समास owing to the prohibition "उपपदमतिङ्" । If प्रदक्षिण be derived as an अव्ययीभाव (see on प्रदक्षिणं करोति—*Ante*) of the तिष्ठद्गु class, further compounding is barred by the च in the rule "तिष्ठद्गुप्रभृतीनि च" । "किमर्थश्चकार: ? एवकारार्थ: । तिष्ठद्गुप्रभृतीन्येव । क मा भूत् ? परमं तिष्ठद्गु"—*Bhashyam*. On this Kaiyyata remarks "तिष्ठद्गुप्रभृतीन्येव एकार्थीभावविषयाणि भवन्ति न तु शब्दान्तरेण एकार्थीभावं प्रतिपद्यन्ते इत्यर्थ:" । To defend further compounding which is now and then seen we observe that Bhoja takes the Bhashya in a different sense. According to him the Bhashyakara wants to say that तिष्ठद्गु &c. cannot *follow* but may *lead* in a compound. Thus परमतिष्ठद्गु is in-correct but तिष्ठद्गुप्रिय: is allowable. Hence samasa with च्वि leading is justifiable. We may also say in defence of such समास that the leading word is (not प्रदक्षिण but प्रदक्षिणी which is) quite different, and is not of the तिष्ठद्गु class. A word of any गण ceases to belong to the गण when altered by the addition of some affix. Thus मनस् is प्रज्ञादि but मनस्विन् is not प्रज्ञादि । Hence, even accepting Kaiyyata's interpretation, we see no bar to having प्रदक्षिणीकृत्य &c. But प्रदक्षिणीकुरुष्व being तिङन्त is not a compound.

काश्यपः—वत्से—

अमी वेदिं परितः क्लृप्तधिष्ण्याः समिद्वन्तः प्रान्तसंस्तीर्णदर्भाः ।
अपघ्नन्तो दुरितं हव्यगन्धैर्वैतानास्त्वां वह्नयः पावयन्तु ॥

(शकुन्तला प्रदक्षिणं करोति) ।

प्रतिष्ठस्वेदानीम् । (सदृष्टिक्षेपम्) क्व ते शार्ङ्गरवमिश्राः ।

KASYAPA—My child, let yonder sacrificial fires, that are furnished with sacred fuel, that have their places allotted round the altar, that have Kusa-grass strewn at the edge, purify thee, removing sin with the smell of the oblations. (*Sakuntala goes round the fires*). Now proceed. (*Looking round*). Where are Sarngarava and others ?

(प्रविश्य) शिष्यः—भगवन् इमे स्मः ।

DISCIPLE (*Entering*)—Here we are, your reverence.

काश्यप इति । ["वत्से" (त-, व्या-)—"स्वक्छन्दसाशासे" (रा-, वि-,म-)] ।

अमी इति । अन्वयः—अमी समिद्वन्तः, वेदिं परितः क्लृप्तधिष्ण्याः, प्रान्तसंस्तीर्णदर्भाः, वैताना वह्नयः, हव्यगन्धैः दुरितम् अपघ्नन्तः, त्वां पावयन्तु । व्याख्या—'अमी' दृश्यमानाः 'समिधो' यज्ञकाष्ठानि सन्ति येषां तादृशाः, समिद्भिरिद्धा इत्यर्थः, 'वेदिं' यज्ञवेदिकां 'परितः' तस्याः समन्तात्, [तसन्तेन परिणा योगे द्वितीया] 'क्लृप्तानि' विहितानि धिष्ण्यानि' स्थानानि येषां तथाविधाः ["धिष्ण्यं स्थाने गृहे" इत्यमरः] 'प्रान्तेषु' पार्श्वेषु 'संस्तीर्णाः' आस्तृता 'दर्भाः' कुशा येषां तथाविधाः [एभिर्विशेषणैर्यज्ञिया इमे इति लभ्यते], 'वितानस्य' यज्ञस्य इमे 'वैतानाः' यज्ञियाः ["वितानं क्रदके यज्ञे" इति हैमः] 'वह्नयः' अग्नयः 'हव्यस्य' आहुतेः 'गन्धैः' पुनः पुनः प्राप्तैः गन्धैः [अनकृदागतत्वात् बहुत्वम्] 'दुरितं' पापम् 'अपघ्नन्तः' नाशयन्तः सन्तः 'त्वां पावयन्तु' शोधयन्तु ।

शकुन्तलेति । 'प्रकृष्टत्वं दक्षिणस्या' दिशः । यद्वा—'प्रकृष्टत्व' दक्षिणस्य' भागस्य इति 'प्रदक्षिणम्' ["तिष्ठद्गुप्रभृतीनि च" इति अव्ययीभावः] । तत् 'करोति' । यद्वा—'दक्षिणं प्रगतः' यः तथाविधम् [प्रादितत्—] 'करोति' । यावत् काश्यपः

श्लोकं पठति तावत् शकुन्तला प्रदक्षिणं करोति इति भाव:। [मूलम् (त-, न्या)— (रा-, वि-, म- एतत् न पठन्ति)]।

प्रतीति। 'इदानीं प्रतिष्ठस्व' प्रस्थानं प्रतिपद्यस्व ["समवप्रविभ्य: स्थ:" इत्यात्मनेपदम्] 'दृष्टे:' दर्शनस्य 'क्षेप:' पातनं तेन 'सह'। परितो विलोक्य इत्यर्थ:।

NOTES

1. (a). क्लृप्तधिष्ण्या:—धिष्ण्य is a rare word in later Sanskrit. The fires गार्हपत्य, आहवनीय and दक्षिण have allotted places round the altar. (b). समिद्वन्त:—समिध: सन्ति एषाम् इति समिध्+मतुप्। ध् becomes द् by the rule "झलां जशोऽन्ते"। (c). "वेदिं परित:...दर्भा:" serve to show that the fire is sacrificial (वैतान)। On the efficacy of हव्यगन्ध compare "पुनानं पवनोद्धूतैर्धूमैराहुतिगन्धिभि:", "धूमाग्रं घ्रात्वा हविर्गन्धि रजोविमुक्त: समश्नुते मे लघिमानमात्मा" &c.

2. *Reading*. The words "ऋक्छन्दसाशास्ते" are out of place here. A stage direction should not be a *mere explanation* of what an actor says. Yet ऋक्छन्दसा only explains the metre of the sloka following, and आशास्ते gives its sense. These by no means help the actor who is none the worse by their omission.

3. प्रदक्षिणम्—The act is thus defined "प्रसार्य दक्षिणं हस्तं स्वयं नम्रशिरा: पुन:। दर्शयेद्दक्षिणं पार्श्वं मनसापि च दक्षिण:। त्रिधा च वेष्टयेत् सम्यक् देवताया: प्रदक्षिणम्॥"—*Tantrasara* quoted by Vachaspati.

4. *Remark*—Prof. Monier-Williams thinks Kalidasa tried here to imitate Vedic metres but failed. Such slokas however abound in the Mahabharata. They seem to mark the period of *transition* and are no fruitless attempts at imitation.

5. शार्ङ्गरवमिश्रा:—See आदिश्यन्तां शार्ङ्गरवमिश्रा: &c. above.

काश्यप:—भगिन्यास्ते मार्गमादेशय।

KASYAPA—Show your sister the way.

शार्ङ्गरव:—इत इतो भवती। (सर्वे परिक्रामन्ति)।

SARNGARAVA—This way, you go this way. (*All go round*).

काश्यपः—भो भोः सन्निहितास्तपोवनतरवः—

पातुं न प्रथमं व्यवस्यति जलं युष्मास्वपीतेषु या
नादत्ते प्रियमण्डनाऽपि भवतां स्नेहेन या पल्लवम् ।
आद्ये वः कुसुमप्रसूतिसमये यस्या भवत्युत्सवः
सेयं याति शकुन्तला पतिगृहं सर्वैरनुज्ञायताम् ॥

(कोकिलरवं सूचयित्वा)

अनुमतगमना शकुन्तला तरुभिरियं वनवासबन्धुभिः ।
परभृतविरुतं कलं यतः प्रतिवचनीकृतमेभिरात्मनः ॥

KASYAPA—Ho ! Ho ! trees of the hermitage that are near, she who does not attempt to drink water first in the day, you remaining unwatered ; she who, though fond of decorations, does not pluck your new leaves through affection for you ; she to whom it is a festivity at the time of your first show of flowers ; she, Sakuntala, is here going to her husband's house. Be it approved by you all. *(Making signs, as if he heard the note of a Kokila).* Sakuntala has her departure approved by the trees, her companions during her stay in the forest. For, by these, the sweet note of the cuckoo is made into their response.

भगिन्या इति । 'आदिश्य' दृष्ट्वा [अनेकार्थत्वात् दर्शनार्थे वर्त्तमानात् दिशेः णिच्] ।

भो इति । 'भोः' इति संबोधने । हे 'सन्निहिताः' समीपस्थाः 'तपोवनतरवः' आश्रमद्रुमाः युष्माभिः सर्वैरनुज्ञायताम् इत्युत्तरेण संबन्धः ।

पातुमिति । अन्वयः—युष्मासु अपीतेषु या प्रथमं जलं पातुं न व्यवस्यति, भवतां स्नेहेन या प्रियमण्डनापि पल्लवं न आदत्ते, वः आद्ये कुसुमप्रसूतिसमये यस्याः उत्सवो भवति, सा इयं शकुन्तला पतिगृहं याति । सर्वैरनुज्ञायताम् । व्याख्या—पीता इति लक्षणया पीतजला इत्यर्थे प्रयुक्तम् । यद्वा—पीतं पानम् [नपुंसके भावे

क:]। तदस्त्येषाम् इति पीता: पीतजला: [अच् मत्वर्थीय:]। 'युष्मासु अपीतेषु' अपीतजलेषु असिक्तेषु इत्यर्थ:, सतसु [भावे सप्तमी] 'या' शकुन्तला 'प्रथमं' तद्दिने प्रथमं 'जलं पातुं न व्यवस्यति' यतते। प्रतिदिनं यस्या: प्रथमजलपानं जलसेचनात् परमेव भवति कदापि न पूर्वम्। 'भवतां' सम्बन्धे 'स्नेहेन' प्रणयाः [हेतौ] 'या' शकुन्तला 'प्रियं मण्डनं' भूषणं यस्या: तथाविधा 'अपि' अलङ्करणप्रिया अपि ["वा प्रियस्य" इति प्रियशब्दस्य वैकल्पिक: पूर्वनिपात:] 'पल्लवं' नवपल्लवं 'न आदत्ते' न गृह्णाति [कर्त्रभिप्राये आत्मनेपदम्] 'व:' युष्माकम् 'आद्ये' प्रथमे 'कुसुमप्रसूत्या:' पुष्पप्रसवस्य प्रसूनोद्गमस्य, 'समये' काले 'यस्या:' शकुन्तलाया: 'उत्सव:' हर्षातिशयो 'भवति'। 'सा' भवदनुरागिणी 'इयं शकुन्तला पतिगृहं' भर्तृभवनं 'याति' युष्मान् विहाय प्रतिष्ठते। 'सर्वै:' युष्माभि: 'अनुज्ञायतां' गमनमनुमन्यताम्। ["अपीतेषु" (रा-, वि-, म-)—"असिक्तेषु" (त-, न्या-)॥ "आद्ये" (रा-, वि-, म-)—"आदौ" (त-, न्या-)॥ "प्रसूति" (रा-, वि-, म-) —"प्रवृत्ति" (त-, न्या-)]॥ 'कोकिलस्य रवं सूचयित्वा' लक्षणेन विज्ञाप्य। आकारेङ्गिताभ्यां कोकिलरवश्रवणमभिनीय इत्यर्थ:॥

अनुमतेति। अन्वय:—इयं शकुन्तला वनवासबन्धुभि: तरुभि: अनुमतगमना। यत: एभि: कलं परभृतविरुतम् आत्मन: प्रतिवचनीकृतम्। व्याख्या—'इयम्' एषा प्रस्थानोन्मुखी 'शकुन्तला वनवासस्य' आश्रमावस्थानस्य 'बन्धुभि:' स्निग्धजनै: 'तरुभि:' वृक्षै: 'अनुमतम्' अनुज्ञातं 'गमनं' पतिगृहयात्रा यस्या: तथाविधा जाता। कथमेवं ज्ञायते इत्याह—'यत्' यस्मात् 'एभि:' तरुभि: 'कलं' मधुरं 'परभृतस्य' अन्यपुष्टस्य कोकिलस्य 'विरुतं' मञ्जुकूजितम् 'आत्मन:' स्वस्य [जातावेकवचनम्] 'प्रतिवचनं' प्रत्युत्तरम्। अतत् तत् सम्पद्यमानं 'कृतम्'। यद्यनभिमतं स्यात्, गृध्रवायसादीनां कटुरटितेन प्रत्युत्तरं स्यात्। कोकिलकलकूजितेन तु गमनमनुमन्यते॥ ["यत:" (त-, न्या-)—"यथा" (रा-, वि-, म-)॥ "आत्मन:" (त-, न्या-)—"इदृशम्" (रा-, वि-, म-)]।

NOTES

1. सन्निहिता:—He addresses those that are सन्निहित (near) be-

cause they alone can hear him. But his speech is intended for all.

2. (a). अपीतेषु—पा means to drink. Trees may be said to *drink* water when they are watered. पीत = watered. But पीतं usually means *that which is drunk* as in पीतं मधु, पीताः पेयाः, &c.—Here, after the Bhashyakara, we say पीत = पीतजल that which has taken its fill of water (this is by उपचार—transference of epithets). Or, on the same authority, पा + क्त भावे = पीत पानम् a draught. पीतमस्ति एषाम् इति पीत + अच् मत्वर्थे = पीताः। If we are allowed to take पा here as अकर्मक (notwithstanding that जल is directly mentioned as कर्म) we may say पा + क्त कर्त्तरि = पीताः those that have drunk water. (b). आदत्ते—आ + दा + लट् ते कर्त्रभिप्राये। "आङो दो—" does not apply, because that rule is to meet cases where the result does not benefit the agent. "अकर्त्रभिप्रायार्थोऽयमारम्भः"—*Vrittikara.* Here आत्ममण्डनाभिप्रायम् आदानम्।

3. Remark. The figure is समासोक्ति (See under वातेरित &c.—Act I). The watering of the trees is likened to offering water by a sister to her brothers to drink. First show of flowers is indirectly compared to safe first delivery of a sister.

4. (a). अनुमतगमना—अनु + मन + क्त कर्मणि = अनुमतम् approved. Note that the क्त here is, as usual, in the अतीतकाल and not वर्त्तमाने। The rule "मतिबुद्धिपूजार्थेभ्यश्च" is permissive only (विधिः) and not restrictive (नियमः). In other words it does not bar what is available (अतीते), but provides for what is not available. अप्राप्तस्य विधिरेव न हि प्राप्तस्य प्रतिषेधः। वर्त्तमाने एव इति नायं नियमः। (b). तरुभिः—Since the क्त in अनुमत is *not* वर्त्तमाने, the rule "क्तस्य च वर्त्तमाने" does not apply, and the nominative of अनुमत does not take षष्ठी। अनुक्ते कर्त्तरि तृतीया। Compare "पूजितो यः सुरासुरैः", "तनुमतोऽनुमतः सचिवैर्ययौ" &c.

(आकाशे)—

रम्यान्तरः कमलिनीहरितैः सरोभि-
श्छायाद्रुमैर्नियमितार्कमरीचितापः।

भूयात् कुशेशयरजोमृदुरेणुरस्याः
शान्तानुकूलपवनश्च शिवश्च पन्थाः ॥
(सर्वे सविस्मयमाकर्णयन्ति) ।

IN THE AIR—May her path—with its stages made pleasant by tanks that are green with lotus-beds—with the heat of the sun's rays allayed by shady trees—become one with the dust soft as the pollens of lotuses, one with a mild and favourable breeze, and one that is safe. (*All listen with wonder*).

रम्यान्तर इति । अन्वयः—कमलिनीहरितैः सरोभिः रम्यान्तरः, छायाद्रुमैर्नियमितार्कमरीचितापः, अस्याः पन्थाः कुशेशयरजोमृदुरेणुः शान्तानुकूलपवनश्च शिवश्च भूयात् । व्याख्या—'कमलिनीभिः' पद्मिनीभिः, कमलवनैः 'हरितैः' श्यामलैः 'सरोभिः' जलाशयैः 'रम्याणि' श्यामलसंबन्धात् मनोहराणि 'अन्तराणि' अवकाशाः यस्मिन् तथाविधः, 'छायाप्रधानैः द्रुमैः' वृक्षैः [शाकपार्थिवादिः] 'नियमितः' निवारितः 'अर्कमरीचेः' रविकरस्य 'तापो' यस्मिन् तथाविधः, 'अस्याः' शकुन्तलायाः 'पन्थाः' मार्गः 'कुशे' जले शेते इति 'कुशेशयं' पद्मम् ["शयवासवासिष्वकालात्" इति सप्तम्या अलुक] । तस्य 'रजांसि' परागा इव 'मृदवः' कोमलाः 'रेणवो' धूलयो यस्मिन् तथाविधः ["उपमानानि सामान्यवचनैः" इति समासः । 'ततो बहुव्रीहिः'], 'शान्तः' अप्रचण्डश्च 'अनुकूलः' सहयायी च 'पवनो' वातो यस्मिन् तथाविधः, 'च शिवश्च' मङ्गलकरश्च, यद्वा—निरुद्वेगश्च 'भूयात्' इति इष्टाशंसा । अस्याः वर्त्म मनोहरं सच्छायञ्च । आशंसामहे सुखप्रचारमपि अस्या भूयात् गमने वातोऽनुकूलो ऽतिचण्डश्च अस्तु कल्याणञ्च सर्वाङ्गीनं भवतु । ["अर्कमरीचि" (त-, न्या)— "अर्कमयूख" (रा-, वि-, म)] ॥ 'आकर्णयन्ति' शृण्वन्ति ["तत्करोति तदाचष्टे" इति णिच्] । आकाशवाणी इति विस्मयः ।

NOTES

2. आकाशे—Note the distinction between this आकाशे and आकाशे in विष्कम्भक, Act III. Here the *speaker*, there the *addressee*, is unseen. Hence the usual "किं ब्रवीषि" &c.—are here absent. "किं ब्रवीष्येवमित्यादि विना पात्रं ब्रवीति यत् । श्रुत्वेवानुक्तमप्येकस्तत् स्यादाकाशभाषितम् ॥"

3. (a) भूयात्—आशंसायां लिङ् may it become. (b). I have differed from commentators in explaining the आशंसा in the sloka. It is usual to take all the five attributives as entering into the आशंसा। Thus—रम्यान्तरो भूयात्, नियमिततापो भूयात्, मृदुरेणुर्भूयात, शान्तानुकूलपवनश्च भूयात्, शिवश्च भूयात्। But the tanks and the trees are there already on the road. Hence रम्यान्तरत्व and नियमिततापत्व are *accomplished facts*. As such, they cannot be part of आशंसा which is "अप्राप्तस्य इष्टार्थस्य प्राप्तिमिच्छा"। Besides, if all the five were intended, the च would have been repeated four times, and not twice only as is necessary when there is समुच्चय of two things with a third (कुशेशयरजोमृदुरेणुः)।

गौतमी—जादे, ञादिजणसिणिद्धाहिं अणुसादगमणासि तवोवणदेवदाहिं। पणम भअवदीओ [जाते, ज्ञातिजनस्निग्धाभिः अनुमतगमनासि तपोवनदेवताभिः। प्रणम भगवतीः]।

GAUTAMI—My child, you have your start approved by the deities of the hermitage who are as affectionate as kinsmen. Bow to their majesties.

शकुन्तला (सप्रणामं परिक्रम्य। जनान्तिकम्)—हला पिअंवदे, णं अज्जउत्तदंसणुस्सुआए वि अस्समपदं परिच्चअन्तीए दुक्खेण मे चलणा पुरदो पवट्टन्ति [हला प्रियंवदे, ननु आर्यपुत्रदर्शनोत्सुकाया अपि आश्रमपदं परित्यजन्त्या दुःखेन मे चरणौ पुरतः प्रवर्त्तेते]।

SAKUNTALA (*Bowing and going round—Aside*)—Dear Priyamvada, though I am anxious for a sight of my husband, my feet indeed move sorrowfully forward as I am leaving the site of the hermitage.

जाते इति। 'ज्ञातिजन' इव ज्ञातय इव 'स्निग्धाभिः' सस्नेहाभिः 'तपोवनस्य देवताभिः अनुमतगमना असि'। 'भगवतीः' एताः वनदेवताः 'प्रणम'।

इतीति। 'आर्य्यपुत्रस्य दर्शनेन उत्सुकायाः' अयाया :'अपि आश्रमपदं परित्यजन्त्याः मे चरणौ ननु दुःखेन' दुःखेनैव 'पुरतः' अग्रतः 'प्रवर्त्तेते' गच्छतः। आत्मगतस्य दुःखस्य चरणयोरुपचारः।

NOTES.

1. (**a**). ज्ञातिजन &c.—ज्ञाति with क्तिच् is masculine. ज्ञातिजन इव स्निग्धाः। "उपमानानि सामान्यवचनैः" इति समासः। (**b**). तपोवन &c.—कण्व says अनुमतगमना तरुभिः, and गौतमी has अनुमतगमना देवताभिः, *i. e.*, the male actor refers to the male and the female to the female for sanction.

2. (**a**). ननु—Indicates अवधारण। See *Tika*. (**b**). आर्य्यपुत्र &c.—By the rule "प्रसितोत्सुकाभ्यां तृतीया च" we may have आर्य्यपुत्रदर्शनेन or आर्य्यपुत्रदर्शने उत्सुका। सप्तमीति समासः।

प्रियंवदा—ण केवलं तवोवणविरहकादरा सही एव्व। तुए उवट्टिदविओअस्स तवोवणस्स वि अवत्थं पेक्ख दाव [न केवलं तपोवनविरहकातरा सखी एव। त्वया उपस्थितवियोगस्य तपोवनस्यापि अवस्थां प्रेक्षस्व तावत्]।

उग्गलिअदब्भकवला मिई परिच्चत्तणच्चणा मोरी।
ओसरिअपण्डुपत्ता मुअन्ति अस्सू विअ लदाओ॥
[उद्गलितदर्भकवला मृगी परित्यक्तनर्त्तना मयूरी।
अपसृतपाण्डुपत्रा मुञ्चन्त्यश्रूणीव लताः॥]

PRIYAMVADA—It is not merely that our friend is distressed by separation from the hermitage. But look at the plight of the hermitage too which has at hand its separation from you. The deer have thrown up their mouthful of kusa-grass; the peacocks have renounced their dance; twigs, from which brown leaves are cast, are as if shedding tears.

नेति। 'सखी' त्वं 'तपोवनविरहेण' आश्रमवियोगेन 'कातरा'—'न केवलम्' इति 'एव'। किन्तु 'त्वया उपस्थितवियोगस्य' आसन्नविरहस्य, उपस्थितत्वद्विरहस्य

इत्यर्थः [सापेक्षत्वेऽपि गमकत्वात् समासः] 'आत्मनस्यापि अवस्थां' दशां तावत् 'प्रेक्षस्व'। तामेवावस्थां वर्णयति।

उद्गलितेति। अन्वयः—मृगी उद्गलितदर्भकवला, मयूरी परित्यक्तनर्तना, लता अपसृतपाण्डुपत्रा अश्रूणि मुञ्चन्तीव। व्याख्या—'मृगी' मृगवधूः 'उद्गलितः' मुखात् भ्रष्टः 'दर्भकवलः' कुशग्रासो यस्याः तादृशी ऊर्ध्वमुखी आस्ते। 'मयूरी' मयूरवधूः 'परित्यक्तं' परिहृतं 'नर्तनं' नृत्यं यया तादृशी तिष्ठति। 'लताः' व्रतत्यः 'अपसृतानि' असकृत् च्युतानि 'पाण्डुपत्राणि' जीर्णपर्णानि याभ्यः तथाभूताः सत्यः 'अश्रूणि' नेत्रजलानि 'मुञ्चन्ति' त्यजन्ति 'इव' लक्ष्यन्ते। ["मृगी"...मयूरी" (त-, न्या-)—"मृगा...मयूराः" (रा-, वि-, म-)]।

NOTES

1. (a). त्वया—तृतीया owing to the word वियोग which is ऊनार्थ। तृतीया in connection with ऊनार्थ words is indicated (ज्ञापित) by the rule "पूर्वसदृशसमोनार्थकलहनिपुणमिश्रश्लक्ष्णैः" which enjoins तृतीया तत्—with ऊनार्थ words. त्वया and वियोगः are परस्परसापेक्ष। Yet वियोग is compounded and त्वया left uncompounded, because the construction is obvious (गमक) in spite of the समास। See *Tika.* (b). अवस्थाम्—अव + स्था + अङ् भावे = अवस्था plight. The rule "स्था गा पा पचो भावे" attaches क्तिन् to स्था in the भाववाच्य and thus bars अङ्। Yet अवस्था is allowable because पाणिनि writes "व्यवस्थायामसंज्ञायाम्" with अङ् to स्था in the भाववाच्य।

2. (a). Compare "नृत्तं मयूराः कुसमानि वृक्षा दर्भानुपात्तान् विजहुर्हरिण्यः"—Raghu, XIV. (b). मृगी मयूरी लता are all in the feminine. This is natural, the speaker being a woman. See preceding page.

शकुन्तला (स्मृत्वा)—ताद, लदाबहिणिअं वणजोसिणिं दाव आमन्तइस्सं [तात, लताभगिनीं वनज्योत्स्नां तावदामन्त्रयिष्ये]।

SAKUNTALA (*Recollecting*)—Father, I will bid adieu to my creeper-sister Vanajyotsna.

काश्यपः—अवैमि ते तस्यां सोदर्य्यास्नेहम्। इयं तावत् दक्षिणेन।

KASYAPA—I know thy sisterly affection for it. Here, it is to the right.

शकुन्तला (उपेत्य लतामालिङ्ग्य)—वणजोसिणि, चूदसङ्गता वि मं पच्चालिङ्ग इदोगदाहिं साहाबाहाहिं। अज्जप्पहुदि दूरपरिवट्टिणी दे क्खु भविस्सं [वनज्योत्स्ने, चूतसङ्गतापि मां प्रत्यालिङ्ग इतोगताभिः शाखाबाहाभिः। अद्यप्रभृति दूरपरिवर्त्तिनी ते खलु भविष्यामि]।

SAKUNTALA *(Approaching and embracing the creeper)*—Vanajyotsna, though joined to the mango-tree, embrace me back with thy arms of twigs that proceed this way. From today I shall indeed be roaming far from thee.

शकुन्तलेति। 'स्मृत्वा' प्रियंवदया "लता" शब्दोच्चारणात् स्मृतिः। 'लतारूपा भगिनीं' [शाकपार्थिवादि] 'आमन्त्रयिष्ये' सम्भाष्य गमिष्यामि।

अवैमीति। 'तस्यां' वनज्योत्स्नायां 'ते सोदर्य्यायाः' समानोदरे शयितायाः भगिन्याः यः 'स्नेहः' ["समानोदरे शयितः"—"सोदराद् यः" इति यप्रत्ययः। स्त्रियां टाप्] तम् 'अवैमि' जानामि। भगिन्यामिव वनज्योत्स्नायां ते स्नेहः इति मे विदितम्। 'इयं तावत् दक्षिणेन' अदूरे दक्षिणभागे वर्त्तते। [सप्तम्यर्थे एनप]। ["सोदर्य्यास्नेहम्" (वि-)—"सोदर्य्यस्नेहम्" (रा-, म-)—"सौहार्द्दम्" (त-, न्या-)]॥

शकुन्तलेति। ["उपेत्य लतामालिङ्ग्य" (त-, न्या-)—"लतामुपेत्य" (रा-, वि-, म-)]॥

वनज्योत्स्नेति। 'चूतेन सङ्गता अपि' मिलिता अपि [भर्त्तृसंसर्गसुखेन अन्यविस्मृतिः शङ्किता अपिना] 'इतोगताभिः' लम्बिताभिः 'शाखारूपाभिः बाहाभिः' बाहुभिः 'मां प्रत्यालिङ्ग' मयालिङ्गिता प्रत्यालिङ्गनं कुरु। कारणमाह—'अद्य' अस्मिन् अहनि 'प्रभृतिः' (प्रभृति वा) आदिर्यस्मिन् कर्मणि तत् यथा तथा 'ते दूरे परिवर्त्तते' विहरति या तादृशी 'खलु भविष्यामि'। अतः परं दुर्लभदर्शनां मां प्रत्यालिङ्ग।

NOTES

1. तावत्—Indicates अवधारण।

2. सोदर्य्यास्नेहम्—समानोदरे शयिता इति समानोदर+य=सोदर्य्या lit. born of the same womb. Here a *sister*. समान becomes स *optionally* when य is to be attached and उदर follows. The rule is "विभाषोदरे"। Hence the forms सोदर्य्या and समानोदर्य्या। तस्याः स्नेहः। With the reading सोदर्य्यस्नेह derive समानोदरे शयितं सोदर्य्यम्। सामान्ये नपुंसकम्। तस्य स्नेहः। The Beng. reading सौहार्द्दम् improves the style.

2. अद्यप्रभृति—प्रभृति is usually (though not necessarily) an अव्यय implying limit (अवधि) or beginning (आदि)। In the 1st. case, it enjoins पञ्चमी as in कार्त्तिक्याः प्रभृति। In the 2nd case सप्तमी is the विभक्ति, as here.

काश्यपः—

सङ्कल्पितं प्रथममेव मया तवार्थे
भर्त्तारमात्मसदृशं सुकृतैर्गता त्वम्।
चूतेन संश्रितवती नवमालिकेय-
मस्यामहं त्वयि च सम्प्रति वीतचिन्तः॥

इतः पन्थानं प्रतिपद्यस्व।

KASYAPA—Through good deeds you have resorted to, as indeed previously contemplated by me for your sake, a husband equal to yourself; this Navamalika has her union with the mango-tree. Now I am relieved of my anxiety for it and for you. This way go back to the road.

शकुन्तला (सख्यौ प्रति)—हला एसा दुवेणं वो हत्थे णिक्खेवो [हला एषा द्वयोर्युवयोर्हस्ते निक्षेपः]।

SAKUNTALA (*To her friends*)—Dear, this creeper is a trust into the hands of both of you.

उभे—अअं जणो कस्स हत्थे समप्पिदो [अयं जनः कस्य हस्ते समर्पितः]। (वाष्पं विहरतः)।

BOTH—Into whose hands are ourselves placed? (*Shed tears*).

सङ्कल्पितमिति। अन्वयः—मया तवार्थे प्रथममेव सङ्कल्पितम् आत्मसदृशं भर्त्तारं त्वं सुकृतैर्गता। इयं नवमालिका चूतेन संश्रितवती। सम्प्रति अहम् अस्यां त्वयि च वीतचिन्तः। व्याख्या—'मया तवार्थे' त्वन्निमित्तं 'प्रथममेव' दुष्यन्तस्य तपोवनागमनात् प्रागेव 'सङ्कल्पितं' मनसा अभीप्सितम् 'आत्मनः' तव 'सदृशं' योग्यं 'भर्त्तारं' पतिं 'त्वं सुकृतैः' निजपुण्यैः मत्प्रयासं विनैव 'गता' प्राप्ता। 'इयं' पुरोवर्त्तिनी 'नवमालिका' वनज्योत्स्ना 'चूतेन संश्रितं' संश्रयः [भावे क्तः] अस्ति यस्याः तादृशी जाता [संश्रितशब्दान्मतुप्]। इत्थं 'सम्प्रति' अधुना 'अहम् अस्यां' नवमालिकायां 'त्वयि च' विषये 'वीता' विगता 'चिन्ता' उत्कण्ठा यस्य तथाविधः संवृत्तः। हे कन्ये मे त्वञ्च वनज्योत्स्ना च। द्वे अपि पात्रस्थे। तन्निश्चिन्तोऽहम्। [मूलम् (रा-, वि-, म-)—"त्वदर्थे...स्वगुणैर्गतासि। अस्यास्तु सम्प्रति वरं त्वयि वीतचिन्तः कान्तं समीपसहकारमिमं करिष्ये॥" (त-, न्या-)]॥

इत इति। 'इतः' अस्यां दिशि 'पन्थान'' गन्तव्यं मार्गं 'प्रतिपद्यस्व' प्रतिगच्छ।

हलेति। 'एषा' वनज्योत्स्ना 'युवयोर्ह्रस्ते निक्षेपः' न्यासः।

अयमिति। 'अयं जनः' एष सखीजनः। आवां हे इत्यर्थः। ('वाष्पम्' अश्रु 'विहरतः' मुञ्चतः)।

NOTES

1. (a). अर्थे—An अव्यय similar to कृते in meaning. (b). संश्रितवती—Do not derive with क्तवतु because the root being सकर्मक we shall then have चूतम् (कर्मणि द्वितीया) instead of चूतेन। (c). वीतचिन्तः—वि (विशेषेण) + इ + क्त कर्त्तरि = वीता gone. (d). The Beng. reading is evidently vicious. वनज्योत्स्ना is already married (See चूतसङ्गता above, also see Act I).

2. विहरतः—हृ means प्रापण। विशेषेण हरतः बहिः प्रापयतः विहरतः।

काश्यपः—अनसूये अलं रुदित्वा। ननु भवतीभ्यामेव स्थिरीकर्त्तव्या शकुन्तला। (सर्वे परिक्रामन्ति)।

KASYAPA—No weeping, Anasuya. Sakuntala has to be steadied indeed by you two. *(They all go round).*

शकुन्तला—ताद, एसा उडअपज्जन्तचारिणी गब्भमन्थरा मिअवहू जदा अणघप्पसवा होइ तदा मे कंवि पिअणिवेदइत्तिअं विसज्जइस्सह [तात, एषा उटजपर्य्यन्तचारिणी गर्भमन्थरा मृगवधूः यदा अनघप्रसवा भवति तदा मे कमपि प्रियनिवेदयितारं विसर्जयिष्यथ]।

SAKUNTALA—Father, when this doe, slow because of the fœtus and roaming near the cottage, becomes safely delivered,. you will send to me some one as reporter of the good news.

काश्यपः—नेदं विस्मरिष्यामः ।

KASYAPA—I shall not forget this.

शकुन्तला (गतिभङ्गं रूपयित्वा)—को णु क्खु एसो णिवसणे मे सज्जइ [को नु खल्वेष निवसने मे सज्जते]। (परावर्त्तते)।

SAKUNTALA (*Acting obstruction of motion*)—Who indeed is this that clings to my robe ? (*Turns round*).

अनसूये इति । 'रुदित्वा अलम्' [अलं-योगात् क्त्वा]। 'ननु' कुत्सने । 'भवतीभ्यामेव' नान्येन 'शकुन्तला स्थिरीकर्त्तव्या' रोदनात् वारयितव्या। रोदननिषेधे नियुक्ता स्वयं रोदिषि इति कुत्सितमेतत् ।

तातेति । 'एषा गर्भेण' गर्भभारेण 'मन्थरा' मन्दगतिः अतएव 'उटजस्य' पर्णशालायाः 'पर्य्यन्तेषु' प्रान्तभूमिषु 'चरति' या तथाविधा, आसन्नप्रसवा इत्यर्थः 'मृगवधूः यदा अनघः' अव्यसनः सुख इत्यर्थः 'प्रसवो' यस्याः तादृशी 'भवति तदा मे कमपि प्रियनिवेदयितारं' शुभवार्त्ताहरं 'विसर्जयिष्यथ'। सुखेन प्रसूता इति वार्त्ता मे प्रेरयितव्या।

शकुन्तलेति । 'गते'र्गमनस्य भङ्गं बाधां 'रूपयित्वा' अभिनीय । 'निवसने' वस्त्रे

'सज्जते' लगति ["यदभिप्रायेषु सज्जते" इति भाष्यप्रयोगादात्मनेपदम्]। 'परावर्त्तते' वलितकन्धरा पश्चात् अवलोकयति। ["सज्जते" (रा-, त-)—"सज्जति" (म-)—"सजति" (वि-, न्या-)]।

NOTES

1. (a). अलं रुदित्वा—Optionally अलं रोदनेन by the rule "अलं खल्वोः प्रतिषेधयोः प्राचां क्त्वा"—अलम् and खलु implying prohibition **give** क्त्वा optionally. (b). ननु implies *censure.* The censure is—**You** have to comfort her, but you are weeping !

2. (a). उटज &c.—उटजपर्य्यन्त + चर + णिनि कर्त्तरि ताच्छील्ये। It cannot travel far *because* गर्भमन्थरा। (b). अनघ &c.—"अघं व्यसनपापयोः"। अघ is here व्यसन calamity. अविद्यमानमघम् अस्मिन् अनघः safe &c. (c). प्रिय &c.—प्रियं साधु निवेदयति इति प्रिय + नि + विद + णिच् + तृन् कर्त्तरि साधुकारिणि।

3. इदम्—कर्मविवक्षायां द्वितीया। षष्ठी is attached when there is शेषविवक्षा।

4. सज्जते—सञ्ज + लट् ते। The root is उभयपदी, "यदभिप्रायेषु सज्जते" इति भाष्यप्रयोगात्।

काश्यपः—वत्से—

यस्य त्वया व्रणविरोपणमिङ्गुदीनां
तैलं न्यषिच्यत मुखे कुशसूचिविद्धे।
श्यामाकमुष्टिपरिवर्द्धितको जहाति
सोऽयं न पुत्रकृतकः पदवीं मृगस्ते॥

KASYAPA—My child, that adopted child of yours, the **fawn, on** whose mouth, pricked by *kusa* points, the healing **oil of** Inguli was poured by you, and who was reared by you **with** handfuls of Syamaka grains, does not leave your track.

शकुन्तला—वच्छ, किं सहवासपरिच्चाइणिं मं अणुसरसि।

अचिरप्पसूदाए जणणोए विणा विवड्ढिदो एव्व। दाणिंपि मए विरहिदं तुमं तादो चिन्तइस्सदि। णिवत्तेहि दाव [वत्स, किं सहवासपरित्यागिनीं मामनुसरसि। अचिरप्रसूतया जनन्या विना विवर्द्धित एव। इदानीमपि मया विरहितं त्वां तातश्चिन्तयिष्यति। निवर्त्तस्व तावत्]। (रुदती प्रस्थिता)।

SAKUNTALA—My child, why do you follow me who is leaving your company? Without the mother that was just delivered of you, you were indeed reared. Now too, forsaken as you are by me, father will look after you. Do then go back. (*Proceeds weeping*).

यस्येति। अन्वयः—यस्य कुशसूचिविद्धे मुखे त्वया व्रणविरोपणम् इङ्गुदीनां तैलं न्यषिच्यत, सः अयं श्यामाकमुष्टिपरिवर्द्धितकः पुत्रकृतको मृगः ते पदवीं न जहाति। व्याख्या—'यस्य कुशानां सूचिभिः' सूचितीक्ष्णाग्रैः अग्रैः 'विद्धे' क्षते 'मुखे त्वया व्रणानां विरोपणं' शोधकं, क्षतशोषणम् 'इङ्गुदीनां तैलं न्यषिच्यत' निषिक्तम् 'सः अयं श्यामाकानां' धान्यविशेषाणां 'मुष्टिभिः' त्वद्दत्ताभिः 'परिवर्द्धितकः' अनुकम्पया पोषितः [अनुकम्पायां कः] क्षतेन मुखेन अतृणमसमर्थो वराको मुष्टिशः श्यामाकं मुखे दत्त्वा वर्द्धितः, 'कृतकः' कृत्रिमः 'पुत्रः' [मयूरव्यंसकादिः] 'मृगः ते पदवीं' पन्थानं 'न जहाति' न मुञ्चति। यत्र त्वं यासि सोऽपि स्नेहात् तत्रैव याति।

वत्सेति। 'सहवासं' संसर्गं 'परित्यजति' या तथाविधां 'मां किमनुसरसि'। 'अचिरं प्रसूता' या 'जननी' निजमाता मृगी, तया 'विना विवर्द्धित एव' न च मृतः। 'इदानीमपि मया' कृत्रिमया जनन्या 'विरहितं त्वां तातश्चिन्तयिष्यति'। सद्योजातोऽपि मात्रा त्यक्तो न मृतः, अधुना वर्द्धितस्य, उपमात्रा त्यक्तस्य, मातामहेन च चिन्तितस्य का ते क्षतिः? 'रुदती' नेत्रजलं मुञ्चन्ती एव 'प्रस्थिता' चलिता।

NOTES

1. (a). व्रणविरोपणम्—वि + रुह + णिच् + ल्युट् करणे = विरोपणम् or विरोहणम् healing. (b). न्यषिच्यत—नि + सिच् + लङ् त कर्मणि। In लङ् this becomes नि + असिच् &c.—Thus अ intervences between इ and

स, yet we have ष by the rule "प्राक्सितादड्व्यवायेऽपि" which applies to roots सुनोति सुवति &c.—up to सेव (Pan. 8, III, 65—70). This includes सिच। (c). कुशसूचिविद्धे—This explains the necessity of feeding. With the mouth sore (विद्ध) it was unable to eat, so had to be nursed. (d). पुत्र &c.—कृतक is कृत्रिम (कृत एव) false. Compare "सकृतककोपम्" Canto I.—Beng. Rec. कृतकः पुत्रः gives पुत्रकृतकः instead of कृतकपुत्रः (see Tika). Or पुत्रश्चासौ कृतकश्च पुत्रकृतकः कर्मधा—।

2. सहवास &c.—सह is *similar* सदृश। सहवासः similar life, *i. e.*, एकत्रावस्थानम्, संसर्गः। कर्मधा—। त साधु परित्यजतीति सहवास + परि + त्यज + णिनुण् साधुकारिणि कर्त्तरि। ताम्।

3. (a). विवर्द्धित एव—The force is—There was every likelihood of your dying, but you *grew*. (b). चिन्तयिष्यति—Your *own* mother left you when you were too young to help yourself. You are now grown up, and only your *adoptive* mother is leaving you; besides, there is your grand-father to look after you. So take heart.

काश्यपः—वत्से, अलं रुदितेन। स्थिरा भव। इतः पन्थानमालोकय।

उत्पक्ष्मणोर्नयनयोरुपरुद्धवृत्तिं
वाष्पं कुरु स्थिरतया विरतानुबन्धम्।
अस्मिन्नलक्षितनतोन्नतभूमिभागे
मार्गे पदानि खलु ते विषमीभवन्ति॥

Kasyapa—My child, weeping is useless. Be steady. Watch the track here. By firmness, have the flow of tears stopped—tears that have obstructed the operation of your eyes of which the eyelashes are turned up. Your steps are indeed getting irregular on this ground where you have not noticed the high and low places.

काश्यप इति। 'रुदितेन' रोदनेन [भावे क्तः]। 'इतः' अस्मिन् देशे 'पन्थानमालोकय' मार्गं प्रति सावधाना भव। कारणमाह—

उत्पक्ष्मणोरिति। अन्वयः—उत्पक्ष्मणोर्नयनयोरुपरुद्धवृत्तिं वाष्पं स्थिरतया विरतानुबन्धं कुरु। अलक्षितनतोन्नतभूमिभागे अस्मिन् मार्गे ते पदानि विषमीभवन्ति खलु। व्याख्या—'उद्गतानि पक्ष्माणि' लोमानि ययोः तादृशयोः 'नयनयोः' सम्बन्धे 'उपरुद्धा' व्याहता 'वृत्तिः' व्यापारो नेत्रव्यापार इत्यर्थः, येन तादृशं 'वाष्पं' नेत्रजलं 'स्थिरतया' धीरतया 'विरतः' निवृत्तः 'अनुबन्धः' प्रवाहो यस्य तथाविधं 'कुरु'। धैर्यमवलम्ब्य नेत्रजलं निवर्त्तय। 'अलक्षितः' अदृष्टः 'नतः' निम्नः 'उन्नतः' उच्चश्च 'भूमिभागः' यस्मिन् तादृशे 'अस्मिन् मार्गे' वर्त्मनि 'ते पदानि' पादपातानि अविषमाणि 'विषमाणि' सम्पद्यमानानि 'भवन्ति खलु' तन्मया निश्चीयते [खलु निषेधे। "निषेधवाक्यालङ्कारजिज्ञासानुनये खलु" इत्यमरः]। निर्गतमपि जलं पक्ष्मसु स्थितं सत् दृष्टिं रुणद्धि। भूमिश्च नतोन्नता। तेन गतिर्व्याहन्यते। तत् स्थिरा भव नेत्रजलं संहर पन्थानमालोकय इति पूर्वेण सम्बन्धः। ["विरतानुबन्धं" (वि·, म·)—"विहतानुबन्धं" (रा·)—"शिथिलानुबन्धं" (त·, न्या·)]॥

NOTES

1. (a). उत्पक्ष्मणोः—Up-turned eyelashes are considered as enhancing beauty. (b). अलक्षित &c.—Tears prevent proper watching of the road. (c). पदानि विषमीभवन्ति—Hence watch the road (पन्थानमालोकय)। (d). खलु—अवधारणे or निषेधे।

2. *Reading*—The reading शिथिलानुबन्धम् as occurs in the Beng. Rec. is supported by भोज in the सरस्वतीकण्ठाभरण।

शार्ङ्गरवः—भगवन्नोदकान्तं स्निग्धो जनोऽनुगन्तव्य इति श्रूयते। तदिदं सरस्तीरम्, अत्र सन्दिश्य प्रतिगन्तुमर्हसि।

SARNGARAVA—Venerable Father, it is enjoined that an affectionate person has to be followed up to the water's edge. Well, this is the edge of a lake. It behoves thee to return, having advised us here.

काश्यपः—तेन हि इमां क्षीरवृक्षच्छायामाश्रयामः। (सर्वे परिक्रम्य स्थिताः)।

KASYAPA—Then we resort to this shade of the fig tree. (*All go round and stop*).

काश्यपः (आत्मगतम्)—किं नु खलु तत्रभवतो दुष्यन्तस्य युक्तरूपमस्माभिः सन्देष्टव्यम्। (चिन्तयति)।

KASYAPA (*Aside*)—What message most suitable for his honour Dushyanta can indeed be sent by me ? (*Meditates*).

भगवन्निति। उदकस्य अन्तः सीमा 'उदकान्तः' जलप्रान्तः। आ उदकान्तात् 'ओदकान्तम्' जलप्रान्तपर्यन्तम् [अव्ययीभावः] 'स्निग्धः' वत्सलो 'जनः अनुगन्तव्यः इति श्रूयते' एतद्धि शास्त्रम्। 'तत्' तस्मात् 'इदं सरसः तीरं' तटं जलप्रान्त इत्यर्थः। अतः परं भगवता न गन्तव्यम्। 'अत्र सन्दिश्य' सन्देशमुच्चार्य्य 'प्रतिगन्तुमर्हसि' ["ओदकान्तम्" (त-, व्या-)—"ओदकान्तात्" (म-)—"उदकान्तम्" (रा-, वि-)]॥

तेनेति। क्षीरप्रदो वृक्षः 'क्षीरवृक्षः' वटभेदः [शाकपार्थिवादिः] तस्य 'छायाम् आश्रयामः' आश्रित्य सन्दिशाम इत्यर्थः। 'सर्वे' अभिनेतारो जनाः 'परिक्रम्य' रङ्गमञ्चं परितो भ्रान्त्वा 'स्थिताः' गमनाद्विरताः।

किमिति। 'दुष्यन्तस्य युक्तरूपं' योग्यम् 'अस्माभिः' मादृशैर्जनैः 'किं नु खलु सन्देष्टव्यम्'। वक्ता अहं काश्यपसगोत्रः, श्रोता पुरुकुलधुरन्धरो राजा दुष्यन्तः। तत् किञ्च उक्तं युक्तं स्यात्। ('चिन्तयति' ध्यायति युक्तायुक्तं विचारयति)।

NOTES

1. (a). ओदकान्तम्—The अव्ययीभाव is optional by the rule "आङ् मर्य्यादाभिविध्योः"। Here the sense is मर्य्यादा (exclusion) Hence the forms ओदकान्तम् (compounded, द्वितीयान्त, क्रि' वि) and ओदकान्तात् (uncompounded). The सन्धि is allowable because by the rule "निपात एकाजनाङ्" आङ् is not a प्रगृह्य। Also आ meaning मर्य्यादा or अभिविधि is really आङ् from which ङ् has disappeared (ङित्)। Compare—"ईषदर्थे क्रियायोगे मर्य्यादाभिविधौ च यः। एतमातं ङितं विद्याद्वाक्यस्मरणयोरङित्॥"—*Bhashya.* (b). Monier-Williams reads ओदकान्तात् uncompounded. "ओदकान्तं स्निग्धो जनोऽनुगन्तव्यः" seems

to be an old saying. The Bhashya perhaps refers to it when it says "आ उदकान्तात् ओदकान्तात्"। This to a certain extent favours M. W. But all others have the मकारान्त reading.

2. युक्तरूपम्—अतिशयेन युक्तम् इति युक्त + रूपप् प्रशंसायाम्। Construe दुष्यन्तस्य युक्तरूपम् or दुष्यन्तस्य सन्देष्टव्यम्।

शकुन्तला (जनान्तिकम्)—हला पेक्ख। णलिणीपत्तन्तरिदं वि सहअरं अदेक्खन्ती आदुरा चक्कवाई आरडदि। दुक्करं अहं करोमि [हला प्रेक्षस्व। नलिनीपत्रान्तरितमपि सहचरमपश्यन्ती आतुरा चक्रवाकी आरटति। दुष्करमहं करोमि]।

SAKUNTALA (*Aside*)—Dear, see. The female *Chakravaka* shrieks distressd when not seeing her mate even hidden by lotus-leaves. I am doing what is difficult to do.

अनसूया—सहि, मा एव्वं मन्तेहि [सखि, मा एवं मन्त्रयस्व]।

एसा वि पिएण विणा गमेइ रअणिं विसाअदीहअरं।
गरुअं वि विरहदुक्खं आसाबन्धो सहावेदि॥
[एषापि प्रियेण विना गमयति रजनीं विषाददीर्घतराम्।
गुर्वपि विरहदुःखमाशाबन्धः साहयति॥]

ANASUYA—Friend, do not say so. She too, without her beloved, passes the night which becomes excessively long through grief. The tie of hope causes to support the sorrow of separation though heavy.

हलेति। 'नलिनीपत्रैः' कमलदलैः 'अन्तरितं' व्यवहितम् 'अपि सहचरं' चक्रवाकम् 'अपश्यन्ती', न तु प्रनष्टमपश्यन्ती 'आतुरा' आर्त्ता 'चक्रवाकी आरटति' विरौति। 'अहं दुष्करम्' अति कठोरं 'करोमि'। चक्रवाकी प्रियस्य पत्रान्तरमपि न सहते, अहन्तु वनगिर्य्यादीनामपि व्यवधानं न गणयामि प्रियस्य। का एवमन्या कुर्य्यात्। एतत् दुष्करकारत्वं 'प्रेक्षस्व'

अनसूयेति। 'मा एवं मन्त्रयस्व' भाषस्व [मा शब्दोऽयं माङ्शब्दात् भिन्नः। तेन न लुङ्]।

एषेति। अन्वयः—एषापि प्रियेण विना विषाददीर्घतरां रजनीं गमयति। आशाबन्धः गुरु अपि विरहदुःखं साहयति। व्याख्या—'एषा' चक्रवाकी 'अपि प्रियेण' चक्रवाकेण 'विना' तद्वियोगजेन 'विषादेन दीर्घतरां' पूर्वतो दीर्घत्वेन अनुमिताम् [वृद्धिस्थां पूर्वावस्थामपेक्ष्य अतिशयः। तेन तरप्] 'रजनीं गमयति' यापयति [निशि वियुक्तौ चक्रवाकौ तिष्ठत इति प्रसिद्धिः]। एषा अपि दुष्करं करोति न त्वमेव केवलम्। अत्र कारणम्—'आशारूपो' यो 'बन्धः' बन्धनं स 'गुरु' दुर्वहम् 'अपि विरहस्य दुःखं' पीड़ां, वियोगव्यथां 'साहयति' विरहिभिर्वाहयति। [हेतुमण्णिच्। विरही विरहदुःखं सहते—आशाबन्धो विरहिणा विरहदुःखं साहयति इति] यथा गुरु किञ्चित् वस्तु दुर्वहं नागदन्तकादिषु बद्धं सुवहं भवति आशया बद्धो विरहभारोऽपि तथा।

NOTES

1. प्रेक्षस्व—ईक्षण is not necessarily to *see.* It may mean seeing, or considering, or noting &c.—as in समीक्ष्यकारिन्, परीक्षण, &c.—The object of प्रेक्षस्व is the whole fact—One does not tolerate the intervention of even a leaf, the other minds not forests and hills. Or, no comparison is intended ; ईक्षण is *seeing* ; the कर्म is the आरटन of the चक्रवाकी।

2. (a). रजनीम्—रजनी गच्छति इति रजनीं गमयति। अणिकर्त्तः कर्मसंज्ञा by the rule "गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामणिकर्त्ता स णौ"। (b). साहयति—The nominative is विरहिणा understood. See *Tika.* (c). The words गुरु (heavy) and बन्ध (knot) suggest that विरहदुःख is a *weight.* This is उत्प्रेक्षा। गुरु is श्लिष्ट, meaning दुःसह when दुःख is considered by itself, and दुर्वह if thought of as a *weight.* Thus रूपक and श्लेष here help the उत्प्रेक्षा। There is अर्थान्तरन्यास also.

काश्यपः—शार्ङ्गरव, इति त्वया मद्वचनात् स राजा शकुन्तलां पुरस्कृत्य वक्तव्यः।

KASYAPA—Sarngarava, the king has to be told by you this, in my words, having placed Sakuntala in front.

शार्ङ्गरवः—आज्ञापयतु भवान् ।

SARNGARAVA—Let your reverence command.

काश्यपः—

अस्मान् साधु विचिन्त्य संयमधनानुच्चैः कुलञ्चात्मनस्
त्वय्यस्याः कथमप्यबान्धवकृतां स्नेहप्रवृत्तिञ्च ताम् ।
सामान्यप्रतिपत्तिपूर्वकमियं दारेषु दृश्या त्वया
भाग्यायत्तमतः परं न खलु तद्वाच्यं वधूबन्धुभिः ॥

KASYAPA—Having well thought of us whose wealth is self-restraint, of the high family of yourself too, and of that flow of affection of her towards you by no means brought about by relatives, she is to be ranked by you with equal honour among your wives. More than this depends on luck. That should not indeed be expressed by the wife's relatives.

काश्यप इति । 'त्वया मद्वचनात्' मद्वचनमवलम्ब्य [ल्यब्लोपे कर्मणि पञ्चमी] 'स राजा शकुन्तलां पुरस्कृत्य' अग्रतो निधाय 'इति वक्तव्यः' एवम् अभिधातव्यः ।

अस्मानिति । अन्वयः—संयमधनान् अस्मान्, आत्मनः उच्चैः कुलञ्च, त्वयि अस्याः कथमपि अबान्धवकृतां तां स्नेहप्रवृत्तिञ्च साधु विचिन्त्य त्वया इयं दारेषु सामान्यप्रतिपत्तिपूर्वकं दृश्या । अतः परं भाग्यायत्तम् । तत् खलु वधूबन्धुभिर्न वाच्यम् । व्याख्या—'संयमः' आत्मदमनमेव 'धनं' येषां तथाविधान् 'अस्मान्' मद्विधान् तापसान् ['अस्मान्' माम् इति पक्षे तु "सविशेषणानां प्रतिषेधः" इति प्राप्नोति । अस्मान् संयमधनान् विचिन्त्य इति विधेयत्वेन व्याख्याय तत् परिहार्य्यम्] 'आत्मनः' स्वस्य 'उच्चैः कुलञ्च' पौरवं वंशञ्च, 'त्वयि' भवद्विषये 'अस्याः' शकुन्तलायाः 'कथमपि अबान्धवकृतां' सर्वथा बन्धुजनप्रयासं विनैव घटितां 'ताम्' अतिशयिनीं 'स्नेहप्रवृत्तिञ्च' भावानुबन्धञ्च 'साधु' सम्यक् 'विचिन्त्य' अनुध्याय 'त्वया इयं' शकुन्तला 'दारेषु' पत्नीषु [दारशब्दः पुंसि बहुत्वे । अधिकरणे सप्तमी] 'सामान्या' साधारणी तुल्या इत्यर्थः या 'प्रतिपत्तिः' गौरवम् ["प्रतिपत्तिस्तु गौरवे । प्राप्तौ प्रवृत्तौ प्रागल्भ्ये बोधे" इति

हैमः:] तत्-'पूर्वकम्' अगौरवभेदेन इत्यर्थः 'इयत्ता' सम्भाव्या । तथा कृते मम संयमस्य, तव वंशोन्नतेः, अस्याः स्नेहप्रकर्षस्य च सदृशं भवति । 'अतः' अस्मात् अगौरवभेदेन दर्शनात् 'परम्' अधिकं गौरवाधिक्येन दर्शनमित्यर्थः, 'भाग्यायत्त' भाग्याधीनम् । 'तत् खलु' गौरवाधिक्येन दर्शनं किल 'वधू बन्धुभिः' पित्रादिभिः 'न वाच्यं' न शंसनीयम् ।

NOTE

1. (a). अस्मान्—Refers to ascetics in general ; hence plural. If taken to refer to कण्व alone, then the construction must be अस्मान् संयमधनान् विचिन्त्य—considering me as rich in self-restraint ; and not संयमधनान् अस्मान् विचिन्त्य—thinking of me who is rich in self-restraint. The reason is अस्मद् will not take the plural when referring to *one* object only, if there is a विशेषणपद in the वाक्य ["सविशेषणानां प्रतिषेधः"] । Hence for the plural, संयमधन has to be predicated (विधेय) of अस्मद् । (b). अस्याः—शेषे षष्ठी । Not कृद्योगे कर्मणि षष्ठी । The कृत् in प्रवृत्ति gives षष्ठी to स्नेह which is then compounded. (c). ताम्—That flow of affection. प्रसिद्धार्थ । Hence no यच्छब्द is necessary. Compare "तं केशपाशं प्रसमीक्ष्य कुर्य्युर्बालप्रियत्वं शिथिलं चमर्य्यः" —*Kumara.* (d). सामान्य &c.—सामान्या प्रतिपत्तिः । कर्मधा— । सा पूर्वा यस्मिन् कर्मणि तत् सामान्यप्रतिपत्तिपूर्वम् । तदेव इति स्वार्थे कन् । The समासान्त कप् will not give ह्रस्व in पूर्वा because of the prohibition "न कपि" । (e). भाग्यायत्तम्—आ+यम+क्त कर्मणि=आयत्तम् restricted. भाग्ये आयत्तम् । सुप्सुपेति समासः ।

शार्ङ्गरवः—गृहीतः सन्देशः ।

SARNGARAVA—The message is received.

काश्यपः—वत्से, त्वमिदानीमनुशासनीयासि । वनौकसोऽपि सन्तो लौकिकज्ञा वयम् ।

KASYAPA—My child, you have to be instructed now. Though dwellers of the forest, we are acquainted with worldly matters.

शार्ङ्गरवः—न खलु धीमतां कश्चिदविषयो नाम ।

SARNGARAVA—Nothing indeed can possibly be unknown to the intelligent.

शार्ङ्गरव इति। 'सन्देशो' वाचिकं 'गृहीतः' मनसि कृतः।

काश्यप इति। 'इदानीम्' अधुना भर्तृभवनप्रवेशकाले 'त्वम् अनुशासनीया' उपदेष्टव्या 'असि'। 'वनम् ओकः' भवनं येषां तथाविधा जनाः। 'लौकिकज्ञाः' लोकवृत्तान्ताभिज्ञाः अतः उपदेशनसमर्थाः।

शार्ङ्गरव इति। 'न खलु' न नूनं 'धीमतां' प्राज्ञानां 'कश्चित् अविषयः' अज्ञेयो 'नाम' [नाम इति सम्भाव्ये]। प्राज्ञैः सर्वमेव ज्ञायते।

NOTE

1. (a). इदानीम्—Now, *i.e.*, on the occasion of your entering a new life. (b). अनुशासनीया—The अनुशासन will relate to married life. (c). लौकिकज्ञाः—लोके विदितम् इति लोक + ठञ् = लौकिकम् worldly. तत् जानन्ति इति लौकिक + ज्ञा + क कर्त्तरि। (d). वयम्—For the plural take the whole of वनौकसोऽपि सन्तो लौकिकज्ञाः as the predicate ; otherwise the Varttika "सविशेषणानां प्रतिषेधः" will interfere.

काश्यपः—सा त्वमितः पतिकुलं प्राप्य—

शुश्रूषस्व गुरून् कुरु प्रियसखीवृत्तिं सपत्नीजने
भर्त्तुर्विप्रकृतापि रोषणतया मास्म प्रतीपं गमः।
भूयिष्ठं भव दक्षिणा परिजने भोगेष्वनुत्सेकिनी
यान्त्येवं गृहिणीपदं युवतयो वामाः कुलस्याधयः॥

कथं वा गौतमी मन्यते ?

KASYAPA—(Instructed by me) and having reached thy husband's residence from hence, thou shouldst always wait upon thy superiors ; shouldst adopt the behaviour of a loving friend towards the group of thy co-wives ; shouldst not through peevishness go against thy husband even if insulted ; shouldst be extremely courteous towards thy attendants ; shouldst be without arrogance in enjoyments. Thus do young females

reach the status of matrons. The perverse are the banes of their family. How does Gautami think.

गोतमी—एत्तिओ वहूजणस्स उवदेसो। जादे, एदं क्खु सव्वं ओधारेहि [एतावान् वधूजनस्योपदेशः। जाते, एतत् खलु सर्वमवधारय]।

GAUTAMI—This much is the lesson for one who is a bride. My child, remember all this.

काश्यप इति। 'सा' मया उपदिष्टा 'त्वम् इतः' अस्मात् स्थानात् 'पत्युः कुलं' गृहं, भर्तृभवनम् ["कुलं जनपदे गृहे" इति विश्वः] 'प्राप्य'—

शुश्रूषस्वेति। अन्वयः—गुरून् शुश्रूषस्व, सपत्नीजने प्रियसखीवृत्तिं कुरु, विप्रकृतापि रोषणतया भर्त्तुः प्रतीपं मास्म गमः, परिजने भूयिष्ठं दक्षिणा भव, भोगेषु अनुत्सेकिनी भव। एवं युवतयो गृहिणीपदं यान्ति। वामाः कुलस्य आधयः॥ यद्वा—युवतयो वामाः एवं कुलस्य आधयः (सत्यः) गृहिणीपदं यान्ति॥ व्याख्या—'गुरून्' श्वश्रूप्रभृतीन् 'शुश्रूषस्व' परिचर ["शुश्रूषा परिचर्य्या च" इति त्रिकाण्ड-शेषः। "ज्ञाश्रुस्मृदृशां सनः" इत्यात्मनेपदं नित्यम्]। 'सपत्नीनां जने' समूहे 'प्रियसख्या वृत्तिं' व्यापारं 'कुरु'। सपत्नीषु प्रियसखीव वर्त्तस्व। 'विप्रकृता' पत्या अवमानिता 'अपि रोषणतया' क्रोधनतया क्रुद्धभावेन इत्यर्थः 'भर्त्तुः' पत्युः 'प्रतीपं' प्रतिकूलं 'मास्म गमः' मा गाः। 'परिजने' सेवकेषु 'भूयिष्ठं' बाहुल्येन 'दक्षिणा' उदारा 'भव', 'भोगेषु' सम्पत्सु 'अनुत्सेकिनी' अगर्विता भव। 'एवम्' अनेन प्रकारेण 'युवतयः' तरुण्यः 'गृहिणीपदं' गृहकर्त्री अधिकारं 'यान्ति' लभन्ते। 'वामाः' प्रतिकूलाः विपरीतचारिण्यो वध्वः 'कुलस्य' गृहस्य 'आधयः' मनः-पीडास्वरूपाः; ["आधिर्मानसपीड़ायां प्रत्याशायाञ्च बन्धके। व्यसने चाप्यधिष्ठाने" इति विश्वः]॥ यद्वा—'युवतयो' नवे वयसि वर्त्तमानाः 'वामाः' स्त्रियः ["विद्या-वामामपि स्त्रियाम्" इति विश्वः] 'एवम्' अनेन प्रकारेण 'कुलस्य' गृहस्य 'आधयः' अधिष्ठानानि, कुलावलम्बनभूताः सत्यः ["आधि···अधिष्ठाने" इति प्रागुक्तो विश्वः] 'गृहिण्याः पदम्' अधिकारं 'यान्ति' गृहावलम्बनत्वात् अन्वर्थेन गृहिणीशब्देन अभि-धीयन्ते इति भावः। ["भोगेषु" (भो-, त-, त्या-)—"भाग्येषु" (रा-, वि-,

कथमिति। 'गौतमी वा' [वा इति विकल्पे] 'कथं' केन प्रकारेण 'मन्यते' अवधारयति। मदुक्तं युक्तं न वा गौतमी वदतु। स्वयं जानन्नपि दाक्षिण्यात् गौतम्या अभिमतं जिज्ञासते।

गौतमीति। 'वधूजनस्य एतावान्' एतस्मात् 'उपदेशः' नातः परं ज्ञातव्यं किमप्यस्ति तासाम्। 'अवधारय' हृदये कुरुष्व।

NOTES

1. (a). शुश्रूषस्व—श्रु + सन् + लोट् स्व। The आत्मनेपद is due to the rule "ज्ञाश्रुस्मृदृशां सनः" which bars the rule "पूर्ववत् सनः"। Thus though श्रु is उभयपदी, the सन्नन्त root is always आत्मनेपदी। (b). सपत्नीजने—समानः पतिः आसाम् gives समान + पत्न् by the rule "नित्यं सपत्न्यादिषु"। Next we get ङीप् in the feminine because the word has become नकारान्त। This gives समानपत्नी। समान now becomes स by निपातन in the rule quoted. "समानादिषु इति वक्तव्ये समानस्य सभावार्थं वचनम्"—*Vritti*. (c). प्रतीपम्—प्रतिकूलमपाम् इति प्रति + अप् + अ (समासान्त) by the rule "ऋक्पूरब्धूःपथामानक्षे"। This gives प्रति + अप। Now by the rule "द्व्यन्तरुपसर्गेभ्योऽप ईत्" we get प्रति + ईप = प्रतीपम् against. (d). भोगेषु—This is the Bengali reading. Bhoja has the same. This ought to be enough to reject भाग्येषु। Besides भाग्येषु, *i. e.*, अदृष्टेषु is hardly intelligible. (e). युवतयः—By the rule "यूनस्तिः" we get युवन् + ति = युवतिः in the feminine. This bars the form यूनी with ङीप्। The rule "पुंयोगादाख्यायाम्" does not apply, so ङीष् is not available. युवती is a *different* word meaning *one having a husband*, and is not at all related to युवन्। We are thus left with only one feminine form of युवन्, *viz*, युवति।

काश्यपः—वत्से परिष्वजस्व मां सखीजनञ्च।

KASYAPA—My child, embrace me and the friends.

शकुन्तला—ताद इदो एव्व किं पिअंवदामिस्साओ सहीओ णिवत्तिस्सन्ति [तात इत एव किं प्रियंवदामिश्राः सख्यो निवर्त्तिष्यन्ते]।

SAKUNTALA—Father, will Priyamvada and other friends turn back from here ?

काश्यपः—वत्से इमे अपि प्रदेये। न युक्तमनयोस्तत्र गन्तुम्। त्वया सह गौतमी यास्यति।

KASYAPA—They too, my child, have to be given away in marriage. It is not fit for them to go there. Gautami will go with thee.

शकुन्तला (पितरमाश्लिष्य)—कहं दाणिं तादस्स अङ्कादो परिब्भट्टा मलअतटोम्मूलिआ चन्दणलदा विअ देसन्तरे जीविअं धारइस्सं [कथमिदानीं तातस्य अङ्कात् परिभ्रष्टा मलयतटोन्मूलिता चन्दनलतेव देशान्तरे जीवितं धारयिष्यामि]।

SAKUNTALA—Removed from my father's lap like a sandal-sapling uprooted from the side of the Malaya, how shall I now support life in another soil?

वत्से इति। 'मां सखीजनञ्च परित्यजन्त्य' आलिङ्ग। आलिङ्ग्य अस्मान् निवर्त्तय इत्यर्थः।

शकुन्तलेति। 'प्रियंवदया मिश्राः' युक्ताः, प्रियंवदाप्रभृतयः।

काश्यप इति। 'प्रदेये' प्रदातव्ये, अनुरूपाय वराय इत्यर्थः।

शकुन्तलेति। 'इदानीं तातस्य अङ्कात्' क्रोड़ात् 'परिभ्रष्टा' च्युता अहं 'मलयस्य' तदाख्यस्य पर्वतस्य 'तटात्' प्रान्तभूमेः 'उन्मूलिता' उत्खाता 'चन्दनस्य' चन्दनवृक्षस्य 'लता इव' शाखा इव नवोद्गतचन्दनवृक्षक इव इत्यर्थः ["लता ज्योतिष्मती-दूर्वा-शाखा-वल्ली-प्रियङ्गुषु" इति हैमः] 'कथं' केन प्रकारेण 'जीवितं धारयिष्यामि'।

NOTES

4 (a). प्रियंवदामिश्राः—If मिश्र is taken as प्रशंसावचन then say प्रियंवदामण्डिताः honoured by the company of प्रियंवदा। (b). निवर्त्तिष्यन्ते—निवर्त्स्यन्ति is an optional form.

2. गन्तुम्—By the maxim "अव्ययकृतो भावे" we have गन्तुम् = गमनम्। Hence construe तत्र गन्तुं गमनम् अनयोः सम्बन्धे न युक्तम्। Do not say अनयोः गन्तुं गमनम् &c.—For, the षष्ठी in अनयोः is barred by the rule "न लोकाव्ययनिष्ठाखलर्थतृनाम्"। This is after the

भाष्यकार। According to the सूत्रकार we have "शकधृष—" इति चर्थे उपपदे तुमुन्।

3. (a). The reading मलयतरून्मूलिता—does not commend itself. A twig cut off from a tree (तरु) cannot with propriety be called उन्मूलित। Again if मलयतरु is चन्दन, then the second reference to चन्दन in चन्दनलता is superfluous. (b). चन्दनलता—A very young tree is not improperly called a लता। लता cannot be taken here as शाखा। It is a sapling—लता इव इति लता by transference of epithets. Indeed when one wants to naturalise a foreign tree, one does not think of cutting off branches from the tree, but looks for saplings. On the whole तट seems preferable.

4. देशान्तरे—अन्तर means भिन्न, अन्य। अन्यो देशः देशान्तरम्। मयूरव्यंसकादितत्पुरुषः। A नित्यसमास of देश and अन्तर। Neuter owing to the rule "परवल्लिङ्गं द्वन्द्वतत्पुरुषयोः"।

काश्यपः—वत्से, किमेवं कातरासि—

अभिजनवतो भर्त्तुः श्लाघ्ये स्थिता गृहिणीपदे
विभवगुरुभिः कृत्यैस्तस्य प्रतिक्षणमाकुला।
तनयमचिरात् प्राचीवार्कं प्रसूय च पावनं
मम विरहजां न त्वं वत्से शुचं गणयिष्यसि॥

(शकुन्तला पितुः पादयोः पतति)।

KASYAPA—Why art thou so distressed, my child? Placed in the proud position of the chief-wife of thy husband of distinguished anscestry ; busy with his affairs that are momentous through exuberance of wealth ; and having soon brought forth a holy son as the East does the sun ; thou shalt not, my child, mind the sorrow caused by separation from me. *(Sakuntala falls at her father's feet).*

काश्यपः—यदिच्छामि ते तदस्तु।

KASYAPA—Let that befall you what I wish.

काश्यप इति। हे 'वत्से किं' किं निमित्तम् 'एवं कातरा' आर्त्ता 'असि'। अकारणमेतत्। अभिजनेति। अन्वयः—वत्से त्वम् अभिजनवतो भर्तुः श्लाघ्ये गृहिणीपदे स्थिता (सती), तस्य विभवगुरुभिः कृत्यैः प्रतिक्षणम् आकुला (सती), अचिरात् प्राचीवार्कं पावनं तनयं प्रसूय च, मम विरहजां शुचं न गणयिष्यसि। व्याख्या—हे 'वत्से, त्वम्'। प्रशस्तः 'अभिजनः' कुलं यस्यास्ति तस्य, महाकुलीनस्य इत्यर्थः ["कुलेऽप्यभिजनो जन्मभूम्यामपि" इत्यमरः] 'भर्तुः' पत्युः 'श्लाघ्ये' संशब्दनार्हे 'गृहिणीपदे' गृहिणीस्थाने 'स्थिता' भर्त्तृस्नेहभागिनी तद्गतहृदया सती, 'तस्य' भर्तुः 'विभवेन' समृद्ध्या 'गुरुभिः' महद्भिः 'कृत्यैः' कार्य्यैः 'प्रतिक्षणं' निरन्तरम् 'आकुला' व्यग्रा गुर्व्यो कार्य्यचिन्तया व्यासक्तहृदया सती, 'अचिरात्' शीघ्रं 'प्राची' पूता पूर्वा दिक् 'अर्कं' पूज्यं सूर्य्यम् 'इव पावनं' पुण्यं 'तनयं' पुत्रं 'प्रसूय च' पुत्रस्नेहेन आकृष्टहृदया च सती 'मम विरहजां' वियोगजनितां 'शुचं' शोकम् ["मन्युशोकौ तु शुक् स्त्रियाम्" इत्यमरः] 'न गणयिष्यसि' न चिन्तयिष्यसि। अनुभूतामपि शुचं व्यासक्ततया न गुर्वीं सम्भावयिष्यसि।

काश्यप इति। 'ते' तव सम्बन्धे 'यत् इच्छामि' यत् अकथितमधुना मे मनसि वर्त्तते 'तत् अस्तु' फलतु। इति वस्तुनिगूहनम्। शापकारणं प्रत्याख्यानं दिव्येन चक्षुषा पश्यन् मेनकानुकम्पामीहमान आह "यदिच्छामि ते तदस्तु", मयि दूरे मेनका त्वां रक्षतु, इति भावः।

NOTES

1. (a). अभिजनवतः—अभिजन्यते अस्मिन् इति अभि+जन+घञ् अधिकरणे संज्ञायाम् = अभिजनः race. No वृद्धि because of the prohibition "अनिवध्योश्च"। अभिजन+मतुप् प्रशंसायाम्। (b). Kanva here refers to the diversions which will distract her attention from the separation—(1) The love of the husband ; (2) the numerous engagements ; (3) affection for child. She will certainly feel the absence of her father when at ease. But these will leave her no time to think of it.

2. यदिच्छामि—Here he is anticipating future events. See Tika.

शकुन्तला (सख्यावुपेत्य)—हला दुवे वि मं समं एव्व परिस्सजह [हला द्वे अपि मां सममेव परिष्वजेथाम्]।

SAKUNTALA (*Approaching the friends*)—Dear, embrace me both of you simultaneously.

सख्यौ (तथा कृत्वा)—सहि, जइ णाम सो राआ पच्चहिण्णाणमन्थरो भवे तदो से इमं अत्तणामहेअङ्किअं अङ्गुलीअअं दंसेहि [सखि, यदि नाम स राजा प्रत्यभिज्ञानमन्थरो भवेत्, ततः तस्मै इदम् आत्मनामधेयाङ्कितमङ्गुलीयकं दर्शय]।

FRIENDS (*Doing the same*)—Friend, if perchance that king becomes slow at recognition, then show him this ring stamped with his own name.

शकुन्तला—इमिणा संदेहेण वो आकम्पिद म्हि [अनेन सन्देहेन वामाकम्पितास्मि]।

SAKUNTALA—I am startled by this suspicion of yours.

हलेति। 'सख्यौ उपेत्य' तयोः समीपं गत्वा उभयोस्तुल्यादरा इति हेतोः आह 'समं' युगपत् एव परिष्वजेथाम्' आलिङ्गतम्।

सखीति। 'यदि नाम' यदि सम्भाव्यमेतत् यत 'स राजा प्रत्यभिज्ञाने' संस्मृतौ, ऊढपूर्वेयं मया इति ज्ञाने 'मन्थरः' शिथिलः, अलसः, विमुख इति यावत् 'भवेत्, ततः अस्मै इदम् आत्मनः' तस्यैव राज्ञः 'नामधेयेन' नाम्ना 'अङ्कितं' मुद्रितम् 'अङ्गुलीयकं दर्शय'।

शकुन्तलेति। 'अनेन सन्देहेन' शङ्कया स्मृतिलोपशङ्कया 'आकम्पिता' भीता 'अस्मि'। ["सन्देहेन" (रा-, म-)—"सन्देशेन" (त-, वि-, न्या-)]॥

NOTES

1. तस्मै—"कर्मणा यमभिप्रैति—" इति सम्प्रदाने चतुर्थी।

2. सन्देहेन—The reading सन्देशेन also suits the context. सम् + दिश + घञ् कर्मणि = सन्देशः instruction. सन्देह is शङ्का suspicion "यदि

भवेत्" in the speech above is शङ्का। Besides the speech following also refers to शङ्का (स्नेहः पापशङ्की)। I therefore prefer सन्देहेन।

सख्यौ—मा भाआहि। सिणेहो पावसङ्की [मा बिभीहि। स्नेहः पापशङ्की]।

FRIENDS—Be not alarmed. Affection suspects evil.

शार्ङ्गरवः—युगान्तरमारूढः सविता। त्वरतामत्रभवती।

SARNGARAVA—The sun has ascended another stage. Let her ladyship hasten.

शकुन्तला (आश्रमाभिमुखी स्थित्वा)—ताद कदा णु भूओ तवोवणं पेक्खिस्सं [तात कदा नु भूयस्तपोवनं प्रेक्षिष्ये]।

SAKUNTALA (*standing with her face towards the hermitage*) —Father, when shall I again see the hermitage ?

काश्यपः—श्रूयताम्—

भूत्वा चिराय चतुरन्तमहीसपत्नी
दौष्यन्तिमप्रतिरथं तनयं निवेश्य।
भर्त्रा तदर्पितकुटुम्बभरेण सार्धं
शान्ते करिष्यसि पदं पुनराश्रमेऽस्मिन्।

KASYAPA—Listen. Having long continued as co-wife of the vast four-sided Earth, having settled Daushyanti without a rival, you will again take residence in this tranquil hermitage with thy husband by whom the burden of relatives shall have been placed on him (Daushyanti).

सख्याविति। 'मा बिभीहि' मा भैषीः [यस्मिन् यो मा-शब्दः तद्योगे न लुङ्]। 'स्नेहः पापम्' अनिष्टम् 'शङ्कते'। स्नेहादनिष्टं शङ्कावहे न हि वस्तुतस्तस्य मूलमस्ति।

शार्ङ्गरवेति। 'सविता' सूर्यः अन्यत् युगं, भागयुगलं, प्रहरमित्यर्थः ["युगं कृतादौ

युगले" इति विश्व:] 'आरूढ:' प्राप्त:। दिनमानस्य प्रथमं प्रहरमतीत्य द्वितीयं प्रविष्ट: इत्यर्थ:। 'भगवती' मान्या शकुन्तला 'त्वरताम्' सत्वरा भवतु। ["युगान्तरमारूढ:" (रा-, वि-, म-)—"दूरमधिरूढ:" (त-, न्या-)]॥

शकुन्तलेति। 'आश्रमस्य अभिमुखी' सती 'स्थित्वा' गमनात् निवृत्य।

भूत्वेति। अन्वय:—चिराय चतुरन्तमहीसपत्नी भूत्वा, अप्रतिरथं तनयं दौष्यन्तिं निवेश्य, तदर्पितकुटुम्बभरेण भर्त्रा सार्द्धं शान्ते अस्मिन् आश्रमे पुन: पदं करिष्यसि। व्याख्या—'चिराय' चिरम् [अव्ययमेतच्चिरार्थकम्] 'चत्वारोऽन्ता:' प्रान्तभागा यस्या: तथाविधाया: समग्राया इत्यर्थ: 'मह्या:' विपुलाया धरित्र्या: 'सपत्नी भूत्वा', 'अविद्यमान: प्रतिरथो' विपक्षो यस्य तथाविधं 'तनयं दौष्यन्तिं' दुष्यन्तात्मजम् [अजातत्वात् नाम विना सामान्येन दौष्यन्तिशब्देन व्यपदेश:] 'निवेश्य' राज्ये स्थापयित्वा, 'तस्मिन्' दौष्यन्तौ 'अर्पित:' निक्षिप्त: 'कुटुम्बानां' बान्धवानां 'भर:' भार: पोषणकर्म येन तथाविधेन 'भर्त्रा सार्द्धं' पत्या सह 'शान्ते' शमप्रधाने, विषयचिन्तारहिते 'अस्मिन् आश्रमे पुन:' भूयोऽपि 'पदं करिष्यसि' स्थानं लप्स्यसे ["पदं स्थाने विभक्त्यन्ते" इति हैम:]। परिणते वयसि पुत्राय राज्यं दत्त्वा भर्त्रा सह इहैव आरण्यकं व्रतं चरिष्यसि इत्यर्थ:। [मूलम् (रा-, वि-, म-)—"भूत्वा चिराय सदिगन्तमहीसपत्नी दौष्यन्तिमप्रतिरथं तनयं प्रसूय। तत्सन्निवेशितधरेण सहैव भर्त्रा शान्त्यै करिष्यसि पदं पुनराश्रमेऽस्मिन्॥" (त-, न्या-)।

NOTES

1. बिभीहि—भी + लोट् हि। "माङि लुङ्" does not apply here. The मा here is different from माङ्, and gives लोट् as in "मा कुरु धनजनयौवनगर्वम्"।

2. युगान्तर &c.— युग is *two*. It is usual to divide the daytime into 8 equal parts and attach a specific virtue to each. Two of these here probably make a युग। Then from sun-rise to about 9 A. M. is the 1st युग ; the second extends from about 9 A. M. to 12 noon ; and so on. अन्यत् युगं युगान्तरम् another युग, *i. e.*, the 1st युग is already over and the 2nd has commenced.

3. (a). चतुरन्त &c.—मही the *vast* one is the सपत्नी ; she again

not in part, but taken in her entirety. (b). दौष्यन्तिम्—दुष्यन्तस्य अपत्यं पुमान् इति दुष्यन्त + इञ् = दौष्यन्तिः by the rule "अत इञ्" । तम् । (c). अप्रति &c.—प्रतिगतो रथः अस्य इति प्रतिरथः an antagonist. अविद्यमानः प्रतिरथो यस्य तम् । (d). निवेश्य—नि + विश + णिच् + ल्यप् having settled. राज्याभिषेचन is *settling*. In this sense निविश् occurs in "स निवेश्य कुशावत्यां रिपुनागाङ्कुशं कुशम्"—Raghu, xv, 97. Again विवाह is also *settling*. निविश् has this sense in "निवेश्य सनाभौ यथाहं कन्यामुपलभ्य—*Mahabh.*; also "भवान् निवेश्यः प्रथमं ततोऽयं भीमः" —*Ibid.* (e). तदर्पित &c.—Having left the kinsmen in his care, *i. e.*, You two only will come. If निवेश्य means विवाह्य then this epithet mentions, by implication, the coronation of the son. For, unless he is the king, he cannot support the kinsmen. But coronation is an important ceremony and should not be left to be inferred from a relatively insignificant affair which is honoured by direct mention. It seems better therefore to take निवेश्य = राज्ये अभिषिच्य ।

गौतमी—जादे, परिहीयदि गमणवेला । णिवत्तेहि पिदरं । अहवा चिरेण वि पुणो पुणो एसा एव्वं मन्तइस्सदि । णिवत्तेदु भवं [जाते परिहीयते गमनवेला । निवर्त्तय पितरम् । अथवा चिरेणापि पुनः पुनः एषा एवं मन्त्रयिष्यते । निवर्त्ततां भवान्] ।

GAUTAMI—My child, the time for starting is being spent. Send back your father. Or, even for long she will talk thus again and again. Let your reverence return.

काश्यपः—वत्से उपरुध्यते तपोऽनुष्ठानम् ।

KASYAPA—My child, the practice of penance is being obstructed.

शकुन्तला (भूयः पितरमाश्लिष्य)—तवश्चरणाकिसं तादसरीरं । ता मा अदिमेत्तं मम किदे उक्कण्ठदु [तपश्चरणकृशं तातशरीरम् । तस्मा अतिमात्रं मम कृते उत्कण्ठस्व] ।

SAKUNTALA (*Again embracing her father*)—Father's frame is emaciated by practice of penance. So do not pine for me excessively.

गौतमीति। 'गमनस्य वेला' समयः 'परिहीयते' क्षीयते। प्रातरेव गमनस्य युक्तत्वात्। 'पितरं निवर्त्तय' आश्रमं प्रति प्रेषय। इत्युक्ते काश्यपं संबोध्य आह— 'अथवा' पक्षान्तरे 'एषा' शकुन्तला 'चिरेणापि' कालेन न विरता भविष्यति 'एवम्' ईदृशमेव 'पुनः पुनर्मन्त्रयिष्यते'। तत् 'भवान् निवर्त्तताम्' आत्मना एव प्रतिगच्छतु।

काश्यप इति। 'तपसः अनुष्ठानम्' आचरणम् 'उपरुध्यते' विघ्नितं भवति। तत् प्रतियामि।

शकुन्तलेति। 'तातस्य शरीरं तपश्चरणेन कृशं' जातम्। 'तत् मम कृते' मदर्थे [कृते इत्यव्ययम्] 'अतिमात्रम्' अत्यर्थं 'मा उत्कण्ठस्व' मा उत्सुको भव ["उत्कण्ठस्व" [म-]—"उत्कण्ठितुम्" (रा-, वि-)]॥

NOTES

1. परिहीयते—परि + हा + लट् ते कर्मकर्त्तरि। The cool morning is passing.

2. उत्कण्ठस्व—The reading उत्कण्ठितुम् seems bad in grammar.

काश्यपः (सनिःश्वासम्)—

शममेष्यति मम शोकः कथं नु वत्से त्वया रचितपूर्वम्।
उटजद्वारि विरूढं नीवारबलिं विलोकयतः॥

गच्छ। शिवास्ते पन्थानः सन्तु। (निष्क्रान्ता शकुन्तला सहयायिनश्च)।

KASYAPA (*With a sigh*)—My child, how possibly will my grief abate beholding the offering of *Nivara* previously made by thee, sprouted at the door of the cottage? Go, may the stages of thy journey be safe. (*Exeunt Sakuntala and the attendants*).

सख्यौ (शकुन्तलां विलोक्य)—हद्धी, हद्धी, अन्तरिदा सउन्दला वणराईए। [हा धिक्, हा धिक्, अन्तरिता शकुन्तला वनराज्या]।

FRIENDS (*Watching Sakuntala*)—Alas ! Alas ! Sakuntala is hidden by the line of forests.

काश्यप इति। 'निश्वासेन' दुःखनिश्वासेन 'सह' आह। शममिति। अन्वयः—हे वत्से त्वया रचितपूर्वम् उटजद्वारि विरूढं नीवारबलिं विलोकयतः मम शोकः कथं नु शममेष्यति। व्याख्या—हे 'वत्से त्वया पूर्वम्' इतः प्राक् 'रचितं' विहितम् ["भूतपूर्वे चरट्" इति निर्देशात् पूर्वशब्दस्य परनिपातः] 'उटजस्य' पर्णशालायाः 'द्वारि' प्रवेशे एव 'विरूढम्' अङ्कुरितम् [अतः सदैव दर्शनपथे स्थित्वा स्मारकम्] 'नीवारमयं बलिं' पूजोपहारं 'विलोकयतः' पश्यतो 'मम शोकः' तापः 'कथं नु' कथमपि न [इति काकुः] 'शमं' शान्तिम् 'एष्यति' गमिष्यति। इयद्दिनं या मम बलिकर्मणि साहाय्ये स्थितासीत् सा गता, इत्यनिशं स्मारितः कथं शोकं शमयेयम्। ["द्वारि विरूढम्" (वि-)—"द्वारविरूढम्" (रा-, त-, न्या-, म-)]।

गच्छे ति। 'ते पन्थानः' दिने दिने गन्तव्याः अध्वानः [प्रतिदिनं भिन्नः, पन्थाः इति बहुवचनम्। अविवक्षिते भिन्नत्वे तु एकवचनमेव। "शान्तानुकूलपवनश्च शिवश्च पन्थाः" इति यथा]॥ ('शकुन्तला निष्क्रान्ता सहयायिनश्च' अनुचराश्च निष्क्रान्ताः इति लिङ्गवचनविपरिणामेन योजनीयः)॥

सख्याविति। 'हा धिक्' इति आत्मनोर्भाग्यं निन्दतः। 'वनराज्या' काननश्रेण्या 'अन्तरिता' व्यवहिता अदर्शनीया जाता। ["अन्तरिता" (त-, न्या-)—"अन्तर्हिता" (रा-, वि-, म-)]।

NOTES

1. उटजद्वारि—The force is that the grains have sprouted at the very threshold of the hut. Whenever I enter, they remind me of you. So how can I cease to be sorry ? Thus द्वार् requires emphasis. It should not therefore be in the middle of a compound as in the reading उटजद्वारविरूढम्। It does not lose prominence when it is last in a तत्पुरुष, because "उत्तरपदार्थप्रधानस्तत्पुरुषः"—a तत्पुरुष has its last member prominent.

2. गच्छ—Yo go, I will manage my grief somehow. Indicates deep emotion.

3. अन्तरिता—अन्तर here means अन्तर्द्धि screen. अन्तरं सञ्जातमस्य इति अन्तर+इतच् screened.

काश्यपः (सनिश्वासम्)—अनसूये गतवती वां सहधर्मचारिणी। निगृह्य शोकमनुगच्छ माम्। (सर्वे प्रस्थिताः)।

KASYAPA (*With a sigh*)—Anasuya, your fellow-worker in religion has left. Having checked your grief, follow me. (*All start to go*).

उभे—ताद, सउन्दलाविरहिदं सुस्सं विश्व तवोवणं पविसामो [तात, शकुन्तलाविरहितं शून्यमिव तपोवनं प्रविशामः]।

BOTH—Father, without Sakuntala we are entering as it were a vacant hermitage.

काश्यप इति। 'सह' एकत्र 'धर्मं चरति' या सा गतवती। 'शोकं निगृह्य' नियम्य 'मामनुगच्छ'। चिरमेव वयमत्र स्थिताः। तदेहि आश्रमं यामः। 'प्रस्थितः' प्रस्थातुमारब्धः चलितः [आदिकर्मणि क्तः] ["अनुगच्छ माम्" (वि-)—"मामनुगच्छतम्" (त-, न्या-)—"अनुगच्छतं मां प्रस्थितम्" (रा-, म-)]॥

उभे इति। 'शकुन्तलया विरहितं' वियुक्तं 'तपोवनं शून्यमिव' जनहीनमिव 'प्रविशामः' ["तपोवनम्" (त-, वि-, न्या-)—"तपोवनं कथम्" (रा, म-)]॥

NOTES

1. (a). गतवती—The emotion here reaches its climax. (b). सहधर्म &c.—धर्मं चरति इति धर्म+चर+णिनि ताच्छील्ये=धर्मचारिणी। सह धर्मचारिणी। सहसुपेति समासः। Refers to शकुन्तला। (c). अनुगच्छ—Kasyapa generally ignores प्रियंवदा। Compare अनसूये अलं रुदित्वा, *Ante.* Also see Introduction.

काश्यपः—स्नेहप्रवृत्तिरेवंदर्शिनी। (सविमर्शं परिक्रम्य) हन्त भोः शकुन्तलां पतिकुलं विसृज्य लब्धमिदानीं स्वास्थ्यम्। कुतः—

अर्थो हि कन्या परकीय एव तामद्य सम्प्रेष्य परिग्रहीतुः।
जातो ममायं विशदः प्रकामं प्रत्यर्पितन्यास इवान्तरात्मा॥

(निष्क्रान्ताः सर्वे)।

KASYAPA—The flow of affection shows it thus. (*Going round thoughtfully*) Heigh Ho ! Ease has now been attained by me after having sent Sakuntala to her husband's abode. (You ask) why ? Because a daughter is indeed another's property. To-day having sent her to her husband, this inner self of mine has become perfectly serene like one who has restored a deposit. (*Exeunt all*).

काश्यप इति। 'स्नेहस्य प्रवृत्तिः' प्रवाहः 'एवं दर्शयति' या तथाविधा (एवन्ताद्दर्शिनि:]। 'विमर्शेन' चिन्तया 'सह परिक्रम्य' आह। 'हन्त' हर्षे 'भोः' इत्याभिमुख्ये। 'शकुन्तलां पतिकुलं' पतिगृहं 'विसृज्य' संप्रेष्य 'इदानीं स्वास्थ्यं' स्वभावो 'लब्धम्'। इयन्तं कालं नाहं प्रकृतौ स्थितः अधुना तु प्रकृतिमापन्नः।

अर्थ इति। अन्वयः—हि कन्या परकीय एव अर्थः। अयं मम अन्तरात्मा अद्य तां परिग्रहीतुः संप्रेष्य प्रत्यर्पितन्यास इव प्रकामं विशदो जातः। व्याख्या—'हि' यतः 'कन्या' दुहिता 'परकीय एव' परस्य अन्यस्य एव ["कुगजनस्य परस्य च" इति छे कुक्] 'अर्थः' धनम्। कन्या हि परस्य निक्षेपः। 'अयम्' एष 'मम अन्तरात्मा' आभ्यन्तरं स्वरूपम् 'अद्य तां' न्यासरूपां कन्यां 'परिग्रहीतुः' परिणेतुः सकाशे 'संप्रेष्य' विसृज्य 'प्रत्यर्पितः' निर्यातितः 'न्यासः' निक्षेपो येन तथाविधः 'इव प्रकामम्' अत्यर्थं 'विशदः' प्रसन्नो 'जातः'। परधनरक्षणचिन्तया इयद्दिनमप्रसन्नं चेतः अद्य प्रसन्नं जातम्। [मूलम् (रा-, वि-, म-)—"जातोऽस्मि सद्यो विशदान्तरात्मा चिरस्य निक्षेपमिवार्पयित्वा" (त-, न्या-)]॥

निष्क्रान्ता इति। 'सर्वे' अभिनेतारो जनाः 'निष्क्रान्ताः'।

NOTES

1. (**a**). स्नेह &c.—स्नेहस्य प्रवृत्तिः your affection for Sakuntala. (**b**). एवंदर्शिनी—एवम् + दृश + णिच् + णिनि कर्त्तरि = exhibits in this light. There are people, plants, and every thing as before in the hermitage ; Sakuntala alone has left. Yet you see it vacant. Your affection for the departed makes it so to you.

2. (**a**). हि—Expresses हेतु। My mind is at ease because I have restored trust property.

चतुर्थोऽङ्कः—FOURTH ACT.

पञ्चमोऽङ्कः



(ततः प्रविशत्यासनस्थो राजा विदूषकश्च)। विदूषकः (कर्णं दत्त्वा)—भो वअस्स, सङ्गीदसालन्तरे अवहाणं देहि, कलविसुद्धाए गीदीए सरसंजोओ सुणीअदि। जाणे तत्तहोदी हंसवदिआ वण्णपरिअअं करेदि त्ति [भो वयस्य, सङ्गीतशालान्तरे अवधानं देहि, कलविशुद्धाया गीतेः स्वरसंयोगः श्रूयते। जाने तत्रभवती हंसपदिका वर्णपरिचयं करोतीति]।

(*Then enter the king and Vidushaka on seats*). VIDUSAKA (*Listening*)—O Friend, direct your attention to the interior of the music-hall. Vocal performance of sweet and chaste song is being heard. I think that her Highness Hamsapadika is cultivating the acquaintance of melodies.

राजा—तूष्णीं भव यावदाकर्णयामि।

KING—Keep quiet while I listen.

विदूषक इति। 'कर्णं दत्त्वा' श्रवणमभिनीय। 'सङ्गीतशालायाः' तौर्य्यत्रिकभवनस्य 'अन्तरे' मध्ये 'अवधानं देहि' मनः प्रेरय। 'कला' मधुरा च 'विशुद्धा' अनवद्या च या 'गीतिः' तस्याः 'स्वरेण' कण्ठध्वनिना 'संयोगः' मधुरा विशुद्धा च गीतिः कण्ठेन गीयमाना 'श्रूयते'। 'जाने' मन्ये 'तत्रभवती हंसपदिका' तदाख्या राज्ञी 'वर्णस्य' गानक्रियायाः 'परिचयम्' अभ्यासं 'करोति'।

राजेति। 'यावत्' यत्कालम् 'अहम् आकर्णयामि' गीतिं शृणोमि तावत् 'तूष्णीं भव' मौनमवलम्बस्व।

NOTES

Summary—अथैकदा कार्य्यचिन्तया श्रान्तो दुष्यन्त एकान्ते विदूषकेण सह

स्थित: सङ्गीतशालायां उच्चरन्ती कामपि कलगीतिकामशृणोत्। स च गायिकार्थं विदूषकं प्रेषितवान् शकुन्तलया च सह कण्वपरिजना: प्राप्ता:। तैरावेदितवृत्तोऽपि राजा शापोपहतचेता: शकुन्तलावृत्तान्तं नास्मरत्। सा तु अभिज्ञानेनाङ्गुलीयकेन स्मारयामि इति यावत् हस्तं परामृशति तावत् शून्या दृष्टा अङ्गुलि:। तत: सा तं बोधयितुं रहस्यं किञ्चित् तयोर्वृत्तं समवर्णयत्। तदप्यसौ शापमहिम्ना अपूर्वमिव मेने। एवं हन्त तत्रैव तां परित्यज्य आश्रमवासिनो निवृत्ता: सापि रुदती आप्रसवं परिरक्षणाय पुरोहिताय समर्पिता राज्ञा। राजभवनात् सह पुरोधसा निर्गतान्तु तां कापि ज्योतिर्मयी स्त्रीमूर्त्ति: उत्क्षिप्य विहायसा जगाम।

2. वर्णपरिचयम्—वर्ण is गीतक्रम melody. "वर्ण: स्वर्णे व्रते" इति प्रस्तुत्य "भेदे गीतक्रमे चित्रे" इत्यादि हैम:।

3. (a). यावत् अवधौ। See Tika. Or अवधारणे। आकर्णयाम्येव इत्यर्थ:;
(b). आकर्णयामि—आ सम्यक् कर्णेन गृह्णामि इति आ + कर्ण + णिच् + लट् मिप् = आ + कर्णि (नाम धातु) + लट् मिप् = आकर्णयामि। This is by the Varttika "प्रातिपदिकात् धात्वर्थे बहुलम् इष्ठवच्च" as in अश्वेन गमयति अश्वयति।

आकाशे (गीयते)—

अहिणवमहुलोलुवो तुमं तह परिचुम्बिअ चुअमञ्जरिं।
कमलवसइमेत्तणिव्वुदो महुअर विसुमरिदोसि णं कहं॥
[अभिनवमधुलोलुपस्त्वं तथा परिचुम्ब्य चूतमञ्जरीम्।
कमलवसतिमात्रनिर्वृतो मधुकर विस्मृतोऽस्येनां कथम्॥]

IN THE AIR (*Song*)—Ever longing after fresh honey, O Bee, having kissed the mango-blossom like that, how have you forgotten her, being satisfied with a mere sojourn inside the lotus?

राजा—अहो रागपरिवाहिणी गीति:।

KING—O how overflowing with emotion is the song!

विदूषक:—किं दाव गीदीए अवगदो अक्खरत्थो [किं तावत् गीत्या अवगत: अक्षरार्थ:]।

VIDUSHAKA—Has the meaning of the words of the song been really grasped by you?

अभिनवेति। अन्वयः—हे मधुकर, अभिनवमधुलोलुपस्त्वं चूतमञ्जरीं तथा परिचुम्ब्य कमलवसतिमात्रनिर्वृतः सन् कथमेनां विस्मृतोऽसि। व्याख्या—हे 'मधुकर' भ्रमर [भो राजन् दुष्यन्त इति व्यङ्ग्यम्] 'अभिनवस्य' नूतनस्य, अनास्वादितरसस्य इत्यर्थः 'मधुनः' पुष्परसस्य [प्रणयरसस्य इति व्यङ्ग्यम्] 'लोलुपः' अभिलाषी 'त्वं चूतस्य' सहकारस्य 'मञ्जरीं' नवजातम् अनास्वादितरसं मुकुलम् [नवयौवनां माम् इति व्यङ्ग्यम्] 'तथा' तेन प्रकारेण भावप्रकर्षपूर्वकमित्यर्थः 'परिचुम्ब्य' उपभुज्य 'कमले' प्रफुल्ले पद्मे [गतप्रायर्यौवनायां देव्यां वसुमत्याम् इति व्यङ्ग्यम्] 'वसतिमात्रेण' वासमात्रेण [देवीसाहचर्य्यमात्रेण इति व्यङ्ग्यम्। मयूरव्यंसकादिः। "नानेन समासः। अयमन्यसमस्यते एव" इति भोजोक्तरीत्या समासः] 'निर्वृतः' सुखितः सन् 'कथं' किमर्थम् 'एनां' चूतमञ्जरीम् [माम् इति व्यङ्ग्यम्] 'विस्मृतोऽसि' न स्मरसि [गौण्यावृत्त्या गत्यर्थत्वात् कर्त्तरि क्तः]।

रागेति। 'रागस्य' प्रीतेः 'परिवाहः' निर्गमनम् अस्ति यस्या तादृशी, 'राग' प्रीतिं 'परिवाहयति' समन्तात् निःसारयति या तादृशी वा, 'गीतिः'। अत्र गायिकाया भावः स्पष्टमुपलभ्यते इत्यर्थः।

विदूषक इति। 'अक्षराणाम् अर्थः' गूढोऽभिसन्धिः 'अवगतः' ज्ञातः 'किम्'?

NOTES

1. (a). अभिनव &c.— गर्हितं लुम्पति इति लुप्+यङ्+अच् कर्त्तरि = लोलुपः greedy. अभिनवं मधु fresh honey. कर्मधा—। तस्य लोलुपः। (b). तथा—तेन प्रकारेण, *i.e.*, with such ardour. (c). कमल &c.— कमल is a *full-blown* lotus. It suggests dearth of honey. कमले वसतिः कमलवसतिः sojourn in a lotus. सहसुपेति समासः। सा एव कमलवसतिमात्रम् mere sojourn &c. नित्यसमासः मयूरव्यंसकादिः। तेन निर्वृतः। ३तत्—। According to Bhoja, words of the तिष्ठद्गु and मयूरव्यंसक class may *lead* in a compound. "भोजस्तु न चानेन समास इति वचनात् अयमन्येन सह समस्यत एव इत्याह मयूरव्यंसकप्रिय इति"—*Vardhamana* in the *Ganaratnamahodadhi*. (d). विस्मृतः—वि+स्मृ+क्त कर्त्तरि वर्त्तमाने। स्मरणम् is मनसा गमनम्। Hence गत्यर्थत्वात् कर्त्तरि क्तः।

राजा (स्मितं कृत्वा)—सकृत्कृतप्रणयोऽयं जनः। तदस्या

देवीं वसुमतीमन्तरेण महदुपालम्भनं गतोऽस्मि। सखे माधव्य, मद्वचनादुच्यतां हंसपदिका निपुणमुपालब्धोऽस्मीति।

KING (*With a smile*)—This person is one to whom love was made only once. Hence I have received her sharp rebuke with reference to queen Vasumati. Friend Madhavya, let Hamsapadika be told in my words that I am cleverly censured.

विदूषकः—जं भवं आणवेदि [यत् भवान् आज्ञापयति]। (उत्थाय) भो वअस्स गहीदस्स ताए परकीएहिं हत्थेहिं सिहण्डए ताड़ीअमाणस्स अच्छराए वीदराअस्स विअ णत्थि दाणिं मे मोक्खो [भो वयस्य, गृहीतस्य तया परकीयैर्हस्तैः शिखण्डके, ताड्यमानस्य,अप्सरसा वीतरागस्येव, नास्ति इदानीं मे मोक्षः]।

VIDUSHAKA—What your Highness commands. (*Rising*) For me, O friend, held by her by the hair with other's grip, and being beaten, there is no escape now, as of a passionless person held by a nymph.

राजा—गच्छ, नागरिकवृत्त्या संज्ञापयैनाम्।

KING—Go tell her after the fashion of a jolly person.

राजेति। 'अयं जनः' एषा गायिका 'सकृत्' एकवारं 'कृतः' मया दर्शितः 'प्रणयो' यस्मिन् तथाविधः। 'तत्' तस्मात् प्रथमप्रणयात् परं विस्मृतत्वात् 'देवीं वसुमतीम् अन्तरेण' वसुमतीमभिलक्ष्य 'अस्याः' हंसपदिकायाः [कर्त्तरि षष्ठी] 'महत्' कठोरम् 'उपालम्भनं' तिरस्कारं 'गतोऽस्मि' प्राप्तोऽस्मि। 'निपुणम्' अतिवैदग्ध्येन 'उपालब्धोऽस्मि इति मद्वचनात्' मद्वचनमवलम्ब्य [ल्यब्लोपे कर्मणि पञ्चमी] 'उच्यतां हंसपदिका'।

विदूषक इति। 'तया' हंसपदिकया 'परकीयैः' सखीप्रभृतीनां 'हस्तैः शिखण्डके' चूडायां 'गृहीतस्य' धृतस्य ततः 'ताड्यमानस्य मे इदानीम् अप्सरसा' [भाषाप्रयोगात् एकत्वेऽपि] गृहीतस्य 'वीतरागस्य' अनासक्तस्य, प्रशान्तस्य इत्यर्थः 'इव मोक्षो' मुक्तिः,

कुलात् संसाराच्च निष्कृतिः 'नास्ति'। यथा अप्सरसा गृहीतो योगी विपद्यते तथा अहमपि तथा इत्यर्थः।

राजेति। 'नागरिकस्य' नगरवासिनो जनस्य 'वृत्त्या' व्यवहारेण, विदग्धाचारेण, सरसवाक्प्रयोगेण इत्यर्थः 'एनां संज्ञापय'। मधुरया वाचा अनुकूलिता एषा न कुप्येत्।

NOTES

1. (a). स्मितम्—Vidushaka's simplicity, as evinced by the question, brought the smile. (b). सकृत् &c.—सकृत् is an अव्यय meaning एकवारम् once. प्रणय is याच्ञा, *i. e.*, love. (c). देवीम्—This is the form of speech for a कृताभिषेका queen. "देवी कृताभिषेकायाम् इतरासु च भट्टिनी।"—*Darpana.* "अन्तरान्तरेण युक्ते" इति द्वितीया। (d). अन्तरेण—An अव्यय meaning "with reference to" as in ' 'भवन्तमन्तरेण कीदृशोऽस्या दृष्टिरागः"—Act II.

2. (a). गृहीतस्य—गृहीत is seized, also *ensnared* (in the case of वीतराग). The ग्रहण is by attendants. By उपचार this is attributed to हंसपदिका herself. Hence there is no णिच्। Compare "पञ्चभिर्हलैः कर्षति ग्रामं ग्रामणीः" where कर्षण though done by others is attributed to the ग्रामणी and there is no णिच्। (b). शिखण्डके—The construction is शिखण्डके गृहीतस्य not शिखण्डके ताड्यमानस्य। (c). अप्सरसा—अप्सरस् is usually feminine plural; but singular is also used. "आपः सुमनसो वर्षा अप्सरस् सिकताः समाः। एते स्त्रियां बहुत्वे स्युरेकत्वेऽप्युत्तरत्रयम्।" एका अप्सरा, एका सिकता are seen in the Bhashya. (d). वीतरागस्य—वीतः विगतः रागः विषयवासना यस्य तस्य। (e). मोक्षः—मोक्ष+णिच् स्वार्थे (चुरादि)+अच् or घञ् भावे=मोक्षः *release*, also *emancipation* (in the case of वीतराग)।

3. नागरिक &c.—नगरे भव इति नगर+ठक्=नागरिकः a citizen. Here the word implies "cleverness" प्रावीण्यम्। The proper affix is then वुञ् by the rule "नगरात् कुत्सनप्रावीण्ययोः"। That would give नागरक। But all editions read नागरिक। Raghava seems to avoid the difficulty by taking नागरिकवृत्तिः as पारिभाषिक for a peculiar gesture in which the wrist is made to drop, the index and middle finger are bent, and the hand is shaken in ridicule. Thus "नागरिकवृत्त्येति त्रिपताकस्य मध्यमातर्जनीभ्यां वक्रा-

श्यामधोमुखं कम्पिताभ्याम् इत्यर्थः"। This may save the grammar but it sacrifices the sense.

विदूषकः—का गई [का गतिः]।

VIDUSHAKA—No help.

राजा (आत्मगतम्) किं नु खलु गीतार्थमाकर्ण्य इष्टजन-विरहादृतेऽपि बलवदुत्कण्ठितोऽस्मि। अथवा—

रम्याणि वीक्ष्य मधुरांश्च निशम्य शब्दान्
पर्य्युत्सुको भवति यत् सुखितोऽपि जन्तुः।
तच्चेतसा स्मरति नूनमबोधपूर्वं
भावस्थिराणि जननान्तरसौहृदानि॥

(पर्य्याकुलस्तिष्ठति)।

KING (*Aside*)—Why indeed even without separation from any desired person, am I so powerfully moved on hearing what is sung? Or, that a creature, though happy, becomes agitated on beholding the beautiful, or hearing sweet sounds, is nothing but that it unconsciously recalls with its mind likings of previous births that are permanent through association (*Vasana*). (*Continues agitated*).

राजेति। 'किं' प्रश्ने। 'नु' वितर्के। 'खलु' अवधारणे। वितर्कगर्भः प्रश्नः। उत्कण्ठांशे अवधारणम्। 'गीतम् अर्थं' वस्तु 'गीतस्य' गानस्य 'अर्थं' वस्तु वा 'आकर्ण्य इष्टजनेन' प्रियजनेन 'विरहात्' वियोगात् 'ऋतेऽपि' विनैव 'किं नु खलु बलवत्' अत्यर्थम् 'उत्कण्ठितोऽस्मि' विचलितोऽस्मि। उत्कण्ठांशे निश्चयः। तत्कारणं प्रति वितर्कगर्भः प्रश्नः। शापेन विस्मृतशकुन्तलावृत्तान्त आह "इष्टजनविरहादृतेऽपि" इति। एतद्धि वक्ष्यमाणश्लोकोक्तम् "अबोधपूर्वं" शकुन्तलास्मरणम्।

रम्याणीति। अन्वयः—जन्तुः सुखितोऽपि रम्याणि वीक्ष्य मधुरान् शब्दान् निशम्य च पर्य्युत्सुको भवति इति यत्, तत् नूनं भावस्थिराणि जननान्तरसौहृदानि अबोधपूर्वं चेतसा स्मरति। व्याख्या—'जन्तुः' यः कश्चित् जीवः 'सुखितोऽपि' सञ्जातसुखोऽपि,

सुखमनुभवन्नपि [तारकादित्वादितच् प्रत्ययः], 'रम्याणि' मनोहराणि वस्तूनि [विशेषण-मात्रप्रयोगो विशेष्यप्रतिपत्तौ] 'मधुरान्' हृद्यान् 'शब्दान्' निशम्य च' श्रुत्वा च 'पर्युत्सुकः' उन्मना 'भवति' इति 'यत् तत् नूनं' निश्चितं 'भावेन' संस्कारेण, वासनया इत्यर्थः 'स्थिराणि' अपरिहार्य्याणि। यद्वा—'भावे' हृदये 'स्थिराणि' बद्धमूलानि 'जननान्तरस्य' पूर्वजन्मनः, सुहृदयस्य भावाः 'सौहृदानि' प्रियाणि [अणि हृद्भावः। आदिवृद्धिः॥ अनणि हृद्भावे तु उभयवृद्धा सौहार्द्दानि॥ आद्ये "अणि परतो हृद्भावः", द्वितीये "सिद्धे हृद्भावे अण्" इति विवेकः॥ सुहृत्सुहृदयशब्दौ द्वावपि युवादिषु पठ्येते] 'अबोधपूर्वम्' अज्ञानपूर्वं यथा तथा 'चेतसा' मनसा 'स्मरति', अजानन् 'स्मरति'। स्मृतिमात्रं भवति स्मृतेर्विषयस्य तु बोधो न जायते। मन्ये पूर्वजन्मनि मया गीतानुयायि किञ्चिदनुभूतं नाधुना तत्स्वरूपमुपलभ्यते। स्मृतिविषय-मबुद्धाहमेवमुत्कण्ठितः॥ वस्तुतस्तु शकुन्तलाग्रया प्रीतिस्तेन स्मृता, शापान्न च शकुन्तला॥ ["पर्य्युत्सुको भवति" (त-, न्या-)—"पर्य्युत्सुकीभवति" (रा-, वि-, म-)]॥ 'पर्य्याकुलः' उन्मना 'तिष्ठति'।

NOTES

1. (a). आकर्ण्य—आ सम्यक् कर्णेन गृहीत्वा इति आ + कर्ण + णिच् + ल्यप्। कर्णेन गृह्णाति कर्णयति is like अश्वेन गमयति अश्वयति &c.—See *Ante.* (b). इष्टजन &c.—This उत्कण्ठा is exactly like what one feels under इष्टजनविरह। But दुष्यन्त does not recollect इष्टजनविरह in the present life. Hence the explanation is sought in incidents of prior life, in the verse following. Compare—"वासना-श्रमपदं ततः परं पावनं श्रुतमृषेर्विलोक्य सः। उन्मनाः प्रथमजन्मचेष्टितान्यस्मरन्नपि बभूव राघवः॥"—*Raghu.*

2. (a). चेतसा—All स्मरण is चेतसा। Wh ʌthen mention चेतसा? Is देहेन स्मृति possible? The poet seems to mean—तस्य चित्तं स्मरति, स तु न स्मरति। (b). जननान्तर &c.—सुहृदयस्य भावाः इति सुहृदय + अण्। Here when we attach अण् we do not get हृत् preceding. Hence the rule "हृद्भगसिन्ध्वन्ते पूर्वपदस्य च" does not apply. The अण् gives आदिवृद्धि and हृदय changes into हृत् by the rule "हृदयस्य हृत् लेखयदण्लासेषु"। If, however, we say सुहृदो भावाः we have सुहृत् + अण् in which अण् comes *after* हृत्। This will give

उभयपदवृद्धि resulting in सौहार्द। The first differs from this in the fact that there हृत् appears *after* अण् has come in. Both सुहृदय and सुहृत् are of the युवादि class and अण् is available in the sense भाव or कर्म by the rule "हायनान्तयुवादिभ्यः अण्"। अन्यत् जननं जननान्तरम् मयूरव्यंसकादि। तस्य सौहृदानि। तानि। Words of the मयूरव्यंसकादि class may lead in a कर्मधा—according to भोज supported by वर्द्धमान (see *Ante*). Hence जननान्तर may be compounded with सौहृद। But the भाष्य uses the compound अनर्थान्तर in which अर्थान्तर *does not lead.* This seems to raise doubts as to whether समास with अन्तर should be treated as falling under मयूरव्यंसकादि।

3. *Reading.* The reading पर्य्युत्सुकीभवति implies अभूततद्भाव by च्वि। But the person who is सुखित is undoubtedly अपर्य्युत्सुक। Hence सुखित gives all the meaning of च्वि and something more, च्वि is therefore not available—वाक्येन अर्थस्य उक्तत्वात् अभावः प्रत्ययस्य। पर्य्युत्सुको भवति is better.

(ततः प्रविशति कञ्चुकी)। कञ्चुकी—अहो नु खलु ईदृशीमवस्थां प्रतिपन्नोऽस्मि।

आचार इत्यधिकृतेन मया गृहीता
या वेत्रयष्टिरवरोधगृहेषु राज्ञः।
काले गते बहुतिथे मम सैव जाता
प्रस्थानविक्लवगतेरवलम्बनार्था॥

भोः, कामं धर्मकार्य्यमनतिपात्यं देवस्य। तथापि इदानी-मेव धर्मासनादुत्थिताय पुनरुपरोधकारि कण्वशिष्यागमनमस्मै नोत्सहे निवेदयितुम्। अथवा अविश्रमोऽयं लोकतन्त्राधिकारः।

भानुः सकृद्युक्ततुरङ्ग एव रात्रिन्दिवं गन्धवहः प्रयाति।
शेषः सदैवाहितभूमिभारः षष्ठांशवृत्तेरपि धर्म एषः॥

यावन्नियोगमनुतिष्ठामि। (परिक्रम्यावलोक्य च) एष देवः—

प्रजाः प्रजाः स्वा इव तन्त्रयित्वा निषेवते श्रान्तमना विविक्तम् ।
यूथानि सञ्चार्य्य रविप्रतप्तः शीतं दिवा स्थानमिव द्विपेन्द्रः ॥

(उपगम्य) जयतु जयतु देवः । एते खलु हिमगिरेरुपत्यकारण्यवासिनः काश्यपसन्देशमादाय सस्त्रीकास्तपस्विनः संप्राप्ताः । श्रुत्वा देवः प्रमाणम् ।

(*Then enter the Chamberlain*). CHAMBERLAIN—Alas ! Am I indeed reduced to such a state ? Employed in the inner apartments of the king, that very cane-wand which was taken up by me as custom, has, a long time having elapsed, become useful for the support of me whose gait is unsteady when walking. Well, it is true religious matters must not be delayed by his majesty. But still I dare not report to him, who has just now left the judgement-seat, the arrival of Kanva's disciples which is sure to cause fresh bother. Or, ceaseless is the task of protecting the world. The sun has his steeds yoked but once. Night and day courses the wind. Sesha indeed has the burden of the world placed always on him. Of the enjoyer of the sixth part too this is the characteristic. Well, I do my duty. (*Walking round and beholding*) Here is sire enjoying solitude with his mind fatigued after having guarded his subjects as his own children, like a majestic elephant enjoying a cool place, heated by the sun after having led his herds in the day-time. (*Approaching*) Prosper, O Sire, Prosper ! Here indeed have arrived, with ladies, ascetics living in forests in the valley of mount Himalaya, bearing Kasyapa's message. Having heard, Sire will decide.

कञ्चुकीति । अन्तःपुररक्षासु नियुक्तो वृद्धो ब्राह्मणः कञ्चुकीति कथ्यते । 'अहो' खेदे 'ईदृशोमवस्थां' एवंविधां दशां 'प्रतिपन्नोऽस्मि' प्राप्तोऽस्मि । जराग्रस्त इति खेदः ।

आचार इति । अन्वयः—राज्ञः अवरोधगृहेषु अधिकृतेन मया आचार इति यः वेत्रयष्टिर्गृहीता, सा एव बहुतिथे काले गते प्रस्थानविक्लवगतेर्मम अवलम्बनार्था

जाता। व्याख्या—'राज्ञः' पौरवस्य नृपतेः 'अवरोधगृहेषु' अन्तःपुरमन्दिरेषु 'अधिक्रतेन' नियुक्तेन 'मया आचार इति' अधिकारचिह्नमिति हेतोः [इति हेतौ] 'या वेत्रयष्टिः' वेतसदण्डः 'गृहीता' स्वीकृता, रक्षाकर्मणि नियुक्तो जनो दण्डं गृह्णीयात् इति हेतोः यो दण्डो मया गृहीतः 'सा एव' आचारगृहीता यष्टिः, बहूनां पूरणं 'बहुतिथे' [पूरणे डट्। तिथुगागमश्च] 'काले गते' अतीते सति अद्य जरया 'प्रस्थाने' गमने 'विक्लवा' विह्वला 'गतिः' पादन्यासो यस्य तथाविधस्य 'मम अवलम्बनं' धारणं, पतननिवारणमित्यर्थः, 'अर्थः' प्रयोजनं यस्याः तथाविधा 'जाता'। प्राक् आचारार्था, अद्य तु अवलम्बनार्था इत्याशयः। ["अधिकृतेन" (त-, व्या-)—"अवहितेन" (रा-, वि-, म-) ॥ "अवलम्बनार्था" (रा-, वि-)—"अवलम्बनार्थम्" (म-)—"अवलम्बनाय" (त-, व्या-)]॥ भो इति। 'भो' इति लक्ष्यहीनं संबोधनम्। 'धर्मकार्यं देवस्य' राज्ञः [शेषे षष्ठी] अतिपातेन कालक्षेपेण योजयितुमशक्यम् 'अनतिपात्यं कामम्' इत्यभ्युपगन्तव्यम्। राज्ञः सम्बन्धे धर्मकार्यं विलम्बं न सहते इति सत्यम्। 'तथापि' अनतिपात्यत्वेऽपि 'इदानीमेव' अचिरमेव 'धर्मासनात्' विचारासनात् 'उत्थिताय अस्मै पुनः उपरोधकारि' पीड़ाकरं कण्वशिष्यागमनं निवेदयितुं न 'उत्सहे' न शक्नोमि। 'अथवा' पक्षान्तरे 'अयं लोकस्य' भुवनस्य 'तन्त्रं' धारणं, रक्षा इत्यर्थः [तत्रि कुटुम्बधारणे इति चुरादिषु] स एव 'अधिकारः' नियोगः, सः 'अविद्यमानो विश्रमो' निर्व्यापारस्थितिः यस्मिन् तथाविधो भवति ["नोदात्तोपदेशस्य मान्तस्यानाचमेः" इति अमेः घञि वृद्ध्यभावः]। ["अविश्रमः" (रा-, वि-)—"अविश्रामः" (म-)—"कुतो विश्रामो लोकपालानाम्" (त-, व्या-)]॥

भानुरिति। अन्वयः—भानुः सकृद्युक्ततुरङ्ग एव। गन्धवहः रात्रिन्दिवं प्रयाति। शेषः सदैवाहितभूमिभारः। षष्ठांशवृत्तेरपि एष धर्मः। व्याख्या—'भानुः' दिवाकरः 'सकृत्' एकवारं 'युक्ताः' रथे व्यापारिताः 'तुरङ्गाः' अश्वा यस्य तादृश 'एव' भवति। सततं रथस्थ एव लोकान् प्रभाभिर्भासयति क्षणमपि न विश्राम्यति। 'गन्धवहः' वायुः 'रात्रौ च दिवा च' ["अचतुरविचतुर—" इति निपातः] अविश्रान्तं 'प्रयाति' प्रवहति। 'शेषः' नागराजः 'सदैव' अविरतमेव 'आहितः' स्थापितो 'भूमेः' पृथिव्या 'भारो' यस्मिन् तादृशो भवति। 'षष्ठांशः' षष्ठो भागः 'वृत्तिः' जीवनोपायो यस्य तस्य राज्ञः 'अपि एषः' अनन्तरोक्तः शेषस्य धर्म एव 'धर्मः'। राजापि "सदैवाहितभूमिभारः" इत्यर्थः। [अत्र

गन्धवहशब्देन वायोः, षष्ठांशवृत्तिशब्देन च राज्ञो निर्देशः अकिञ्चित्करः। गन्धवह इति कथञ्चिल्लोकोपकारप्रतीतिः स्याद्वा। षष्ठांशवृत्तिरिति तु आत्मापकारः स्फुट एव। तच्च लोकतन्त्राधिकारप्रस्तावे अप्राकरणिकम्। प्रक्षिप्तोऽन्वयं श्लोकः ?] 'नियोगम्' आत्मकर्म कण्वशिष्यागमननिवेदनम् इत्यर्थः 'यावदनुतिष्ठामि' करोम्येव [यावदवधारणे]।

प्रजा इति। अन्वयः—एष देवः स्वाः प्रजाः इव प्रजाः तन्त्रयित्वा शान्तमनाः, द्विपेन्द्रः दिवा यूथानि सञ्चार्य रविप्रतप्तः शीतं स्थानमिव विविक्तं निषेवते। व्याख्या— 'एष देवः' इतआयं स्वामी 'स्वाः प्रजा इव' निजानीव अपत्यानि 'प्रजाः' प्रकृतीः 'तन्त्रयित्वा' धारयित्वा, विवादशमनादिभिः संरक्ष्य 'शान्तमनाः' क्लान्तचेनाः सन् 'द्विपेन्द्रः' गजराजः 'दिवा' दिवसे [सप्तम्यर्थप्रधानमव्ययम्] 'यूथानि' गजगणान् 'सञ्चार्य' वत्यर्थमितस्ततश्चारयित्वा 'रविणा' हेतुना 'प्रतप्तः' अतिपीडितः सन् 'शीतं' प्रच्छायशीतलं स्थानमिव 'विविक्तं' विजनं देशं 'निषेवते' भजते। ["शान्तमनाः" (त-, वि-, म-, व्या-) —"प्रशान्तमनाः" (रा-) ॥ "दिवा" (रा-, वि-, म-)—"गुहा" (त-, व्या-)]॥

जयन्त्विति। 'जयन्तु' प्रकर्षं लभताम् [अप्रयुक्तकर्मकः]। 'एते' इति असन्निहितेऽपि द्रव्ये कालसान्निध्ये प्रयुक्तः अचिरप्राप्तिं व्यनक्ति। हिमप्रधानो गिरिः 'हिमगिरिः' [शाकपार्थिवादिः] तस्य हिमालयस्य 'उपत्यकायाम्' आसन्नभूमौ ["उपत्यकाद्रेरासन्ना भूमिरूर्ध्वमधित्यका" इत्यमरः] यत् 'अरण्यं' तद्-'वासिनः तपस्विनः काश्यपस्य सन्देशं' वाचिकम् 'आदाय' गृहीत्वा 'सस्त्रीकाः' स्त्रीसमेताः 'संप्राप्ताः' आगताः। 'श्रुत्वा' एतां विज्ञप्तिमाकर्ण्य 'देवः प्रमाणं' कर्त्तव्यनिर्णेता। ["हिमगिरेः" (रा-, त-, व्या-)— "हिमवतो गिरेः" (वि-, म-)]॥

NOTES

1. (a). कञ्चुकी—कञ्चुकः वस्त्रमस्य अस्ति अतिशयेन इति कञ्चुक + इनि अतिशयार्थे। It seems a कञ्चुकिन् had to wear extremely loose-fitting garments (अतिशय). So much so that in the रत्नावली a dwarf hides himself in the ample folds of the Kanchukin's garments —"अन्तः कञ्चुकिकञ्चुकस्य विशति त्रासादयं वामनः"। "अन्तःपुरचरो वृद्धो विप्रो गुणगणान्वितः। सर्वकार्यार्थकुशलः कञ्चुकीत्यभिधीयते॥" Also "ये नित्यं सत्त्वसम्पन्नाः कामदोषविवर्जिताः। ज्ञानविज्ञानकुशलाः कञ्चुकीयास्तु ते स्मृताः॥" (b). अहो—Indicates खेद, तु a प्रश्न (to himself) and खलु अवधारण। अवस्थाविषये अवधारणम्।

2. (a). आचार—Compare "तां सैव वेत्रग्रहणे नियुक्ता"—*Raghu.* (b). अधिकृतेन—अधि + कृ + क्त कर्मणि = अधिकृत: employed. अधिकारित्वेन नियुक्तः। His अधिकार (jurisdiction) being अवरोधगृह। Hence the latter has सप्तमी। Compare "नैवाध्यक्षारिष्वपि वेदहस्ते", (Bhatti II) "प्रज्ञा तु मन्त्रेऽधिकृता न शौर्यम्" (Bhatti XII) &c. (c). अवलम्बनार्था—Raghava takes it as meaning अवलम्बनाय। नित्यसमास by the Varttika "अर्थेन सह नित्यसमासः सर्वलिङ्गता च वक्तव्या"। But that does not properly bring out the *helplessness*. It is better to say the only object (अर्थ—प्रयोजन) is to save the fall (अवलम्बन)। (d). *Reading*—अधिकृतेन is preferable, because the आचार is for the अधिकृत only. Also the सप्तमी in अवरोधगृहेषु is better explained with अधिकृत। For the readings अवलम्बनाय and अवलम्बनार्थम् see note (*c*) above.

3. (a). अनतिपात्यम्—अति + पत + ण्यत् कर्मणि = अतिपात्यम् fit to be delayed. न अतिपात्यम्। (b). कामम् तथापि—I admit religious duties brook no delay, yet &c.

4. अविश्रमः—On the reading अविश्राम, see notes on विश्रामम्, Act II. It should be noted that the Vrittikara does not recognise वृद्धि in the case of श्रम। He says—"सूर्यविश्रामा भूमिः इत्येवमादिकं प्रयोगम् अन्याय्यमेव मन्यन्ते"।

5. (a). सकृद् &c.—तुरेण वेगेन गच्छति इति तुर + गम + खच् कर्तरि = तुरङ्गः or तुरङ्गमः by the Varttika "खच् च वा डित् वक्तव्यः"। (b). रात्रिन्दिवम्—A द्वन्द्व is of words in the प्रथमाविभक्ति। Here the वाक्य has सप्तमी। Hence, and also to change रात्रि into रात्रिम्, the necessity of निपातन।

6. *Remark*—In the Tika, I have commented adversely on षष्ठांशवृत्ति। This is on the supposition that the अलङ्कार is प्रतिवस्तूपमा (see under शुद्धान्तदुर्लभम् &c. Act I) as stated by Raghava. A defence, however, can be given if we reject Raghava's interpretation. Thus we have 1st the general statement, "अविश्रमोऽयं लोकतन्त्राधिकारः"। This is established (साधन) by examples—(i) the case of भानु, (ii) that of गन्धवह, (iii) that of शेष। Next comes the application of the general proposition to the case of षष्ठांशवृत्ति। Every अधिकार has a वृत्ति attached to it. लोकतन्त्राधिकार has षष्ठांश

for the वृत्ति। So room is made for the application of the general proposition. Thus—(*a*). यस्य यस्य लोकतन्त्राधिकारः तस्य तस्य अविश्रमः। (*b*). यथा—भानोः, गन्धवहस्य, शेषस्य। (*c*). षष्ठांशवृत्तेः लोकतन्त्राधिकारः। (*d*). षष्ठांशवृत्तेः अविश्रमः। If this is allowed, then in the *Tika* for "अनन्तरोक्तः शेषस्य धर्मः" read "अविश्रमः" and omit "राजापि...इत्यर्थः"। The proposition षष्ठांशवृत्तेः अविश्रमः of course leads to the conclusion दुष्यन्तस्य अविश्रमः which is not stated. As the matter is explained now, the अलङ्कार is अर्थान्तरन्यास। (See आ परितोषात् &c. Act I).

7. (a). निषेवते—"परिनिविश्यः सेवस्ति—"इति षत्वम्। (b). शान्तमनाः—This is more expressive that the reading अशान्तमनाः। (c). दिवा—In the day time. This is necessary, for, in night-feeding, रविप्रतप्तः becomes out of place. Elephants graze usually at night.

8. (a). एते—"सन्निहिततरमिदमो विषयः समीपतरवर्ति चैतदो रूपम्। अदसस्तु विप्रकृष्टं तदिति परोक्षे विजानीयात्॥" Here एतद् expresses कालसामीप्य, and thus shows that the visitors have just come. Compare "इदानीमेव—" above. (b). प्रमाणम्—Always neuter singular. *c. f.* "वेदाः प्रमाणम्"।

राजा (सविस्मयम्)—किं काश्यपसन्देशहारिणः सस्त्रीकास्तपस्विनः?

KING (*Surprised*)—What! Ascetics with women! Bearing Kasyapa's message?

कञ्चुकी—अथ किम्?

CHAMBERLAIN—Yes.

राजा—तेन हि मद्वचनाद्विज्ञाप्यतामुपाध्यायः सोमरातः अमूनाश्रमवासिनः श्रौतेन विधिना सत्कृत्य स्वयमेव प्रवेशयितुमर्हतीति। अहमप्यत्र तपस्विदर्शनोचिते प्रदेशे स्थितः प्रतिपालयामि।

KING—Well then let Professor Somarata be informed in

my name that it behoves him personally to introduce those dwellers of the hermitage after having honoured them with *Srauta* rites. I too go to a spot here fit for the visit of ascetics, and wait.

कञ्चुकी – यदाज्ञापयति देवः। (निष्क्रान्तः)।

CHAMBERLAIN—What Sire commands. (*Exit*).

राजा (उत्थाय) – वेत्रवति, अग्निशरणमार्गमादेशय।

KING (*Rising*)—Vetravati, show me the way to the fire-room.

राजेति। 'विस्मयेन सह'। सस्त्रीका इति विस्मयः। 'काश्यपस्य सन्देशं' मायु 'हरन्ति' वहन्ति ये तादृशाः [साधुकारिणि णिनिः]। ["सविस्मयम्" (त-, न्या-)— "सादरम्" (रा-, वि-, म-)॥ "काश्यपसन्देश" (रा-, वि-, म-)—"कण्वसन्देश" (त-, न्या-)॥ "सस्त्रीकास्तपस्विनः" (त-, न्या-)—मद्रादिभिरपठितमेतत्]॥

राजेति। 'तेन हि' यतः सस्त्रीकाः ततः 'मद्वचनात् उपाध्यायः' आचार्य्यः 'सोमरातः विज्ञाप्यताम्' आवेद्यताम्। किं विज्ञाप्यताम् इत्याह—'अमून्' [विप्रकृष्टे अदस्-शब्दप्रयोगः] 'आश्रमवासिनः' सस्त्रीकास्तपस्विनः [स्त्रीमाहचर्यात् आश्रमवासिन इत्युक्तम् अन्यथा तपस्विन इत्येव ब्रूयात्] 'श्रौतेन' श्रुतिसम्मतेन 'विधिना' वेदविधिना 'सत्कृत्य' संपूज्य 'स्वयमेव' न तु प्रतीहारीद्वारा 'प्रवेशयितुमर्हति इति' विज्ञाप्यताम्। 'तपस्विनां दर्शनस्य उचिते' योग्ये 'प्रदेशे' पवित्रे स्थले 'स्थितः' सन् 'प्रतिपालयामि' तान् प्रतीक्षे।

राजेति। 'वेत्रवती' इति प्रतीहारीनाम। 'अग्निशरणस्य' वेताग्निगृहस्य ["शरणं गृहरक्षित्रोः" इत्यमरः] 'मार्गं' वर्त्म 'आदेशय' अग्रतो गत्वा मे दर्शय।

NOTES

1. काश्यप &c.—This is more respectful than "कण्वसन्देश—"।

2. (a). मद्वचनात्—मद्वचनम् अवलम्ब्य इति ल्यब्लोपे कर्मणि पञ्चमी।
(b). उपाध्यायः—उपेत्य अधीयते अस्मात् इति उप+अधि+इङ्+घञ् अपादाने by the rule "इङश्च" which bars अच्। The feminine is उपाध्याया, उपाध्यायी, उपाध्यायानी।

3. अग्निशरण &c.—The three sacred fires have to be kept constantly fed by householders of the first three classes. "दक्षिणाग्निर्गार्हपत्याहवनीयौ त्रयोऽग्नयः" इत्यमरः ।

प्रतीहारी—इदो इदो देवो [इत इतो देवः] ।

WARDER—This way, Sire, this way.

राजा (परिक्रामति । अधिकारखेदं विरूप्य)—सर्वः प्रार्थितमर्थमधिगम्य सुखी सम्पद्यते जन्तुः । राज्ञान्तु चरितार्थता दुःखोत्तरैव ।

औत्सुक्यमात्रमवसाययति प्रतिष्ठा
क्लिश्नाति लब्धपरिपालनवृत्तिरेव ।
नाति श्रमापनयनाय यथा श्रमाय
राज्यं स्वहस्तधृतदण्डमिवातपत्रम् ॥

KING (*Goes round. Acting the break-down from overwork*)—Every one becomes happy having attained the desired object. But the achievement of the King's end is mainly for trouble. Success removes anxiety merely. The effort to guard what is acquired indeed worries. A kingdom, like an umbrella, is not so much for the removal of fatigue as for fatigue when the *Danda* is held in one's own hand.

राजेति । 'परिक्रामति' रङ्गमञ्चं परितो भ्रमति । [मन्ये अपपाठोऽयम् । परिक्रम्य इति ल्यपा निर्देशः साधीयान् । राजरूपस्य पात्रस्य अभिनेतव्यक्रियायाः तदा अनिवृत्तेः ॥] 'अधिकारस्य' आत्मनियोगस्य राजकार्यस्य इत्यर्थः यः 'खेदः' क्लान्तिः तम्, अधिकाराजातकर्मकरणखेदं 'विरूप्य' अभिनीय ॥ 'सर्वो जन्तुः प्रार्थितम् अर्थं' वस्तु 'अधिगम्य' प्राप्य 'सुखी सम्पद्यते' । 'राज्ञान्तु' किन्तु भूपालानां 'चरितार्थता' इष्टलाभः, राज्यप्राप्तिरिति यावत् 'दुःखम् उत्तरं' प्रधानं यस्यां तथाविधा दुःखबहुला 'एव' । अत्र मम सुखं दुःखमेव भूरि इत्यर्थः ।

औत्सुक्येति। अन्वयः—(राज्ञां तु) प्रतिष्ठा औत्सुक्यमात्रम् अवसाययति। लब्धपरिपालनवृत्तिः क्लिश्नात्येव। राज्यम् आतपत्रमिव स्वहस्तधृतदण्डं श्रमापनयनाय न अति यथा श्रमाय। व्याख्या—'राज्ञां तु' [इति पूर्वोक्तं सम्बध्यते] 'प्रतिष्ठा' प्रतिष्ठितत्वं, राज्यलाभ इत्यर्थः 'औत्सुक्यमेव' [मयूरव्यंसकादिः। नित्यश्च समासः] 'अवसाययति' खण्डयति अन्तयति [षो अन्तकर्मणि दिवादिः। आत्वम्। णिच्। युक् च] औत्सुक्यावसानमात्रं करोति इत्यर्थः। 'लब्धस्य' प्राप्तस्य राज्यस्य 'परिपालन-वृत्तिः' रक्षाव्यापारः 'क्लिश्नात्येव' नूनं क्लेशं जनयति। यावदलब्धं तावत् कदा मे राज्यं स्यात् इत्युत्कण्ठा। लब्धमात्रे सा उत्कण्ठा निवर्त्तते। ततः परं पालन-क्लेशः। तदाह—'राज्यं' राजत्वम्, आतपात् त्रायते इति 'आतपत्रमिव' [सुपीति योगविभागात् कः] छत्रमिव 'स्वहस्ते धृतः' रचितः 'दण्डः' व्यवहाराधिकारो यस्मिन् स्वयं कृतविचारम् इत्यर्थः। छत्रपक्षे 'स्वहस्तेन धृतः दण्डो' यस्य तथाविधं सत् 'श्रमापनयनाय' खेदनोदनाय 'न अति' न प्रशस्यः 'यथा श्रमाय' खेदकरणाय। प्रशंसायामतिः ["अतिशब्दः प्रशंसायां प्रकर्षे लङ्घनेऽपि च" इति विश्वमेदिन्यौ]। लब्धे राज्ये यदि मन्त्रिषु रक्षाभारो निधीयते तदैव सुखं नान्यथा। अत्र दण्डशब्दो द्व्यर्थः। राज्यपक्षे दण्डो दमनं दुष्टदमनम्। आतपत्रपक्षे दण्डः प्रकाण्डः ["दण्डो दमने सैन्ये" इति हलायुधः। "दण्डोऽस्त्री लगुडे पुमान्। व्यूहभेदे प्रकाण्डेऽश्वे" इति मेदिनी] ["अवसाययति" (रा-, वि-)—"अवसादयति" (त-, म-, न्या-)॥ "क्लिश्नात्येव" (त- वि-, म-, न्या-)—"क्लिश्नात्येनत्" (रा-)॥ "यथा श्रमाय" (त- वि-, न्या-)—"न च श्रमाय" (रा-, म-)]॥

NOTES

1. चरितार्थता—चरितः कृतः अर्थः प्रयोजनं येन स चरितार्थः one who has attained his object. तस्य भावः।

2. (a). औत्सुक्यमात्रम्—This refers to the anxiety caused by the eagerness of expectation *before* one becomes a king. (b). प्रतिष्ठा—प्रति + स्था + अङ् भावे = प्रतिष्ठा, attainment of success. This refers to the candidate's establishment on the throne. Raghava takes प्रतिष्ठा = गौरव। (c). अति—Raghava compounds it. Others

follow him. Thus "अत्यन्तं यः श्रमः तदपनयनाय"—*Raghava.* (d). दण्ड—Note the double sense. Both राज्य and आतपत्र are स्वहस्तधृतदण्ड। With the former, दण्ड = distribution of justice ; and with आतपत्र it means the *handle.* A राज्य brings ease when the ministers look to the government (परहस्तधृतदण्ड), and an umbrella is comfortable when another man holds it over you.

(नेपथ्ये) वैतालिकौ—विजयतां देवः।

(*In the Dressing-room*)—Two Bards—Let Sire prosper (be victorious).

प्रथमः—

स्वसुखनिरभिलाषः खिद्यसे लोकहेतोः
प्रतिदिनमथवा ते वृत्तिरेवंविधैव।
अनुभवति हि मूर्ध्ना पादपस्तीव्रमुष्णं
शमयति परितापं छायया संश्रितानाम्॥

First—Thou toilest for the world every day, thoughtless of thy own comfort. Or, such is thy way indeed. Verily the tree feels with its head the fierce solar rays and relieves with the shade the agony of its refugees.

स्वसुखेति। स्वसुखनिरभिलाषः प्रतिदिनं लोकहेतोः, खिद्यसे। अथवा एवंविधैव ते वृत्तिः। पादपो हि मूर्ध्ना तीव्रमुष्णमनुभवति, छायया संश्रितानां परितापं शमयति। व्याख्या—'स्वस्य' आत्मनः 'सुखे निरभिलाषः' निःस्पृहः त्वं 'प्रतिदिनं लोकस्य' भुवनस्य 'हेतोः' लोकार्थमित्यर्थः 'खिद्यसे' खेदमनुभवसि [दैवादिकात् कर्त्तरि लट्]। 'अथवा' पक्षान्तरे 'एवंविधा' ईदृशी 'एव ते वृत्तिः' व्यापारः। 'पादपो हि' वृक्षः किल 'मूर्ध्ना' स्वशिरसा 'तीव्रं' कठोरम् 'उष्णम्' आतपम् ["उष्णः स्यादातपे ग्रीष्मे" इति विश्वः] 'अनुभवति' तदनुभवकाले एव 'छायया संश्रितानां' सम्यक् श्रितानाम् आश्रितानामित्यर्थः 'परितापं' परिगतं तापम् आतपखेदं 'शमयति' लघयति [घटादित्वात् ह्रस्वः]। इति राज्ञः अधिकारखेदं प्रति प्रोत्साहनोक्तिः।

NOTES

1. वैतालिकौ—विविधास्ताला: विताला: various measures of music. वितालगानं शिल्पमनयो: इति विताल + ठक् = वैतालिकौ। Here विताल stands for वितालगान (लक्षणा) just as मृदङ्ग stands for मृदङ्गवादन in the compound मार्दङ्गिक। "मृदङ्गवादने वर्त्तमानो मृदङ्गशब्द: प्रत्ययमुत्पादयति। शिल्पं तद्धितवृत्तावन्तर्भवति"—*Vritti.* Bhanuji has "विविधेन तालेन शब्देन चरति इति ठक्, स प्रयोजनमस्य इति ठक् वा"। But in the sutra referred to, चरति means "to eat" or "to wander." "चरतिर्भक्षणे गतौ च वर्त्तते"—*Vritti.* In the other alternative the ठक् is a slip for ठञ्। The word here means bards in general, though Amara restricts वैतालिक to those only who rouse the king in the morning. "वैतालिका बोधकरा:" इत्यमर:।

2. (a). खिद्यसे—खिद् (दिवादि) + लट् से कर्त्तरि। Raghava takes it कर्मकर्त्तरि। This is after Vamana"खिद्यते इति च प्रयोगो दृश्यते सोऽपि कर्मकर्त्तर्येव द्रष्टव्य:, न कर्त्तरि। अदैवादिकत्वात् खिदे:"—*Kavyalamkara.* So the reason for taking it कर्मकर्त्तरि is that खिद् he believes is not दिवादि। But Madhava has it in the दिवादि list. Kalapa, Mugdhabodha &c. also read it there. It is therefore better taken as कर्त्तरि। (b). लोकहेतो:—लोककारणात्—*Raghava*. Compare शकुन्तलाहेतो:, *Ante.* (c). अथवा—This introduces आक्षेप of the thought preceding. It is a pity "thou toilest." Or (अथवा) why pity (आक्षेप), such is your duty or nature. The अलङ्कार is defined by दण्डिन् as "प्रतिषेधोक्तिराक्षेप:"। (d). अनुभवति &c.—Here the वृत्ति of दुष्यन्त is explained by an example (दृष्टान्त)। The example ends in establishing resemblance of दुष्यन्त and पादप (उपमापर्य्यवसान)। Hence, as Dandin does not recognise दृष्टान्त as an अलङ्कार, his followers have to class this under उपमा (See प्रतिवस्तूपमा under गूढान्तर्दुर्लभम् &c.)।

द्वितीय:—

नियमयसि विमार्गप्रस्थितानात्तदण्ड:
प्रशमयसि विवादं कल्पसे रक्षणाय।

अतनुषु विभवेषु ज्ञातयः सन्तु नाम
त्वयि तु परिसमाप्तं बन्धुकृत्यं प्रजानाम् ॥

SECOND—Wielding justice, thou curbest those that have gone astray, allayest strife, and becomest capable for protection. Be there kinsmen when means are not meagre, but in thee are fully found the friendly services with regard to the subjects.

राजा—एते क्लान्तमनसः पुनर्नवीकृताः स्मः । (परिक्रामति)

KING—Here, wearied in mind as we were, we are become refreshed. (*Goes round the stage*).

नियमयसीति । अन्वयः—आत्तदण्डः विमार्गप्रस्थितान् नियमयसि, विवादं प्रशमयसि, रक्षणाय कल्पसे । प्रजानां ज्ञातयो विभवेषु अतनुषु सन्तु नाम, बन्धुकृत्यं तु त्वयि परिसमाप्तम् । व्याख्या—'आत्तः' गृहीतः 'दण्डः' दुष्टदमनव्यापारः येन तथाविधः सन् ["अच उपसर्गात् तः" इति ददातेस्तः] 'विपरीतेन मार्गेण' वर्त्मना 'प्रस्थितान्' चलितान्, विपथगामिनो जनान् 'नियमयसि' निरुध्य भूयोऽपि पथि स्थापयसि, 'विवादम्' अर्थिप्रत्यर्थिनोर्वादप्रतिवादं 'प्रशमयसि' निवारयसि, 'रक्षणाय' रक्षितुं पालयितुं ["तुमर्थाच्च भाववचनात्" इति चतुर्थी] 'कल्पसे' प्रभवसि । 'प्रजानां' जनानां 'ज्ञातयः' बान्धवाः 'विभवेषु' सम्पत्सु 'अतनुषु' अक्षीणेषु प्रभूतेषु सत्सु 'सन्तु' तिष्ठन्तु 'नाम' कुत्सितं किन्तु तत् [नाम कुत्सायाम् । "नाम प्राकाश्यसम्भाव्यक्रोधोपगमकुत्सने" इत्यमरः] 'बन्धूनां कृत्य" कर्म 'तु' बान्धवकार्य्यं पुनः 'त्वयि' भवति 'परितः' सर्वतः 'सम्यक् आप्तम्' अधिगतम् । हे नरनाथ स्वहस्ते दण्डं धारयित्वा श्राम्यसि सत्यं, किन्तु भूरि तस्य फलम् । पश्य, प्रजा विनीयन्ते, शमेन वर्त्तन्ते, पालिताश्च भवन्ति । किं बहुना सर्वं बान्धवकार्य्यं ताः त्वयि एव प्राप्नुवन्ति । तदेवं मा विषीदतु, लोकोपकारकं खेदं बहुमन्यतां भवान् इति भावः ।

राजेति । 'क्लान्तमनसः' कार्य्यचर्य्याभिः खिद्यमाना वयम् [बहुत्वविवक्षया बहुवचनम् । एकत्वे तु "सविशेषणानां प्रतिषेधः" इति न प्राप्नोति] 'पुनर्नवीकृताः' एतेन उत्साहवाक्येन श्रमरहिताः कृताः ।

NOTES

1. (a). नियमयति—We have यमि instead of यामि in connection with णिच् by the rule "मितां ह्रस्वः"। (b). विमार्ग &c.—विपरीतो विरुद्धो वा मार्गः विमार्गः wrong course, प्रादितत्—। तेन प्रस्थिताः। तान्। (c). प्रशमयसि—See नियमयसि। The प्र is emphatic. It implies *thoroughness* (प्रकर्ष) of the शमनक्रिया। (d). नाम—Implies कुत्सा। How disgusting (कुत्सा) that kinsmen crowd round one in affluence. (e). परिसमाप्तम्—परि means सर्वतः। सम् means सम्यक्। You render the services of a friend in every way (परि) and thoroughly (सम्)! (f). बन्धुकृत्यम्—The services of a friend. These are well summarised in the sloka—"उत्सवे व्यसने चैव दुर्भिक्षे शत्रुनिग्रहे। राजद्वारे श्मशाने च यस्तिष्ठति स बान्धवः॥"

2. क्लान्तमनसः—Here the king speaks of himself. The plural is inadmissible. The rule "अस्मदो द्वयोश्च" is barred by the Varttika "सविशेषणानां प्रतिषेधः"। We have to say either that the poet does not recognise the Varttika, or that for some reason or other Dushyanta speaks of himself in the plural.

प्रतीहारी—एसो अहिणवसम्मज्जणसस्सिरीओ सण्णिहिद-होमधेणू अग्गिसरणालिन्दो। आरुहदु देवो [एषः अभिनव-सम्मार्जनसश्रीकः सन्निहितहोमधेनुः अग्निशरणालिन्दः। आरोहतु देवः]।

WARDER—Here is the outer-gate of the fire-house beautiful with recent brushing, having the sacrifice-promoting cow close by. Let Sire ascend.

राजा (आरुह्य परिजनांसावलम्बी तिष्ठन्)—वेत्रवति, किमुद्दिश्य भगवता काश्यपेन मत्सकाशमृषयः प्रेषिताः स्युः ?

किं तावद्व्रतिनामुपोढतपसां विघ्नैस्तपो दूषितं
धर्मारण्यचरेषु केनचिदुत प्राणिष्वसच्चेष्टितम्।

आहो स्वित् प्रसवो ममापचरितैर्विष्टम्भितो वीरुधाम्
इत्यारूढबहुप्रतर्कमपरिच्छेदाकुलं मे मनः ॥

KING (*Ascending, and standing supported by the shoulder of the attendant*)—Vetravati, with what object could the ascetics be sent to me by venerable Kasyapa ? Is it indeed, that the penance of those who have taken some vow and commenced austerities, has been defiled by obstructors ? Or is some evil attempted by some one on animals grazing in the holy forest ? Or is the produce of the creepers stopped by my misconduct ? Having thus entered several conjectures, my mind remains perplexed through in-conclusion.

प्रतीहारीति। 'अभिनवेन' अचिरन्तनेन 'सम्मार्जनेन' मार्जनव्यापारेण 'सश्रीकः' शोभनः ["शेषाद्विभाषा" इति कप्] 'सन्निहिता' आसन्ना 'होमार्था धेनुः' यस्य तथाविधः 'अग्निशरणस्य' त्रेताग्निगृहस्य 'अलिन्दः' बहिर्द्वारप्रकोष्ठः ["प्रघाणप्रघणालिन्दा बहिर्द्वारप्रकोष्ठके" इत्यमरः]। 'आरोहतु' सोपानमार्गेण अध्यास्य तिष्ठतु 'देवः'।

राजेति। 'परिजनस्य' वेत्रवत्याः 'अंसं' स्कन्धम् 'अवलम्ब्य तिष्ठन्' न तु उपविशन्। ऋषीणां सस्त्रीकागमनात् विस्मितः तदेव ध्यायन् निर्णेतुमसमर्थः वेत्रवतीं पृच्छति 'किमुद्दिश्य प्रेषिताः स्युः' इति [संप्रश्ने लिङ्]।

किमिति। अन्वयः—किं तावत् व्रतिनाम् उपोढतपसां तपः विघ्नैः दूषितम्। उत धर्मारण्यचरेषु प्राणिषु केनचित् असत् चेष्टितम्। आहो स्वित् वीरुधां प्रसवः मम अपचरितैः विष्टम्भितः। इति आरूढबहुप्रतर्कं मे मनः अपरिच्छेदाकुलम्। व्याख्या—'किं' प्रश्ने, 'तावत्' परिच्छेदे, मिलिते द्वे अपरिच्छेदं गमयित्वा प्रतर्कमात्रमुत्थापयतः। 'व्रतं' सङ्कल्पः येषामस्ति तेषां 'व्रतिनाम्' अतएव 'उपोढं' धृतं 'तपः' व्रतसाधनयोग्यं कृच्छ्रं यैः तेषां 'तपः विघ्नैः' व्रतविघातकैः राक्षसादिभिः 'दूषितं' विघ्नितम्। 'उत' अथवा 'धर्मारण्ये' तपोवने 'चरन्ति' ये तेषु 'प्राणिषु' हरिणादिषु जीवेषु [विषये सप्तमी] 'केनचित्' जनेन 'असत्' असाधु 'चेष्टितम्' आचरितम्। 'आहो' विकल्पे। 'स्वित्' प्रश्ने। अथवा किं 'वीरुधां' लतानाम् ["नहिवृति—" इति क्विपि दीर्घः] 'प्रसवः' पुष्पफलोद्गमः 'मम' राज्ञः अपचरितैः अन्यायाचरणैः

[भावे क्तः] 'विद्दम्भितः' निरुद्धः अर्गलित इत्यर्थः ["स्तम्भः" इति पाठम्]। 'इति' अनेन प्रकारेण 'आरूढाः' अधिगताः 'बहवः प्रतर्काः' ऊहा यैन तथाविधं 'मे मनः अपरिच्छेदेन' अनिर्णयेन 'आकुलं' चञ्चलं जातम्। चाञ्चल्याधिक्यात् पृच्छायाः पात्रापात्रमविचार्य्यैव प्रतीहार्य्यां प्रश्नः।

NOTES

1. स्युः—The king deliberates and *cannot decide.* Hence संप्रश्न लिङ्।

2. (a). व्रतिनाम्—व्रत is सङ्कल्प vow—The making up of the mind to do a particular thing—say to perform अग्निष्टोम or ज्योतिष्टोम। व्रत + इनि मत्वर्थे = व्रतिनः। (b). उपोढतपसाम्—उप + वह + क्त कर्मणि = उपोढम् commenced प्रारब्धम्। Raghava explains उपोढ as अधिक excessive. But compare "उपोढशब्दा न रथाङ्गनेमयः." (Act VII) where उपोढ = प्रारब्ध। The तपस् here is *not* penance *in general* as Raghava understands, but those particular observances that go to qualify the ascetic for the व्रत he has *then* in view. (c). अपचरितैः—अप + चर + क्त भावे = अपचरितानि failings. The king's misdeeds are supposed to affect the produce of the soil &c. "राज्ञोऽपचारात् पृथिवी स्वल्पशस्या भवेत् किल"—*Raghava.* (d). अपरिच्छेद &c. —परि + छिद + घञ् भावे = परिच्छेदः Separation of a part from the whole : hence, decision.

प्रतीहारी—सुअरिदणन्दिणो इसीओ देवं सभाजइदुं आअदेत्ति तक्केमि। [सुचरितनन्दिन ऋषयो देवं सभाजयितुमागता इति तर्कयामि]।

WARDER—I guess that the sages who rejoice in good deeds, have come to congratulate Sire.

(ततः प्रविशन्ति गौतमीसहितौ शकुन्तलां पुरस्कृत्य कण्वशिष्यौ पुरश्चैषां कञ्चुकी पुरोहितश्च)। कञ्चुकी—इत इतो भवन्तः।

(*Then enter the two disciples of Kanva with Gautami placing Sakuntala in front, preceding them the Chamberlain and the family-priest*). CHAMBERLAIN—This way, this way, your honours.

प्रतीहारीति। 'सुचरितेन' मत्कार्य्येण 'नन्दन्ति' प्रीयन्ते ये तादृशा 'ऋषयः' भवतः मत्कार्य्यपरम्परया प्रीताः सन्तः 'इव' समाजयितुम्' अभिनन्दितुम् 'आगताः इति तर्कयामि' ऊहे।

तत इति। ["प्रविशन्ति" (रा-, वि-, म-)—"प्रविशतः" (त-, न्या-)॥ "गौतमीसहितौ" (त-, न्या-)—"गौतमीसहिताः" (रा-, वि-, म-)॥ "शकुन्तलां पुरस्कृत्य" (रा-, वि-, म-)—"शकुन्तलामादाय" (त-, न्या-)॥ "कण्वशिष्यौ" (त-, न्या-)—"मुनयः" (रा-, वि-, म-)]॥

'शकुन्तलां पुरस्कृत्य' अग्रे स्थापयित्वा 'गौतमीसहितौ' कण्वशिष्यौ, एषां चतुर्णां 'पुरः' अग्रतः 'कञ्चुकी पुरोहितश्च' इति षट् 'प्रविशन्ति'। प्रथमं कञ्चुकी, ततः पुरोहितः, ततश्च शकुन्तला, तदनु शिष्यौ, पश्चात् गौतमी इत्येष प्रवेशक्रमः "अवगुण्ठनवती मध्ये तपोधनानाम्" इत्यनन्तरोक्तेरनुमीयते।

NOTES

1. सुचरित &c.—चर + क्त भावे = चरितानि deeds. शोभनानि चरितानि सुचरितानि good deeds. तैः साधु नन्दन्ति इति सुचरित + नन्द् + णिनि साधुकारिणि कर्त्तरि = सुचरितनन्दिनः। Those who rejoice at good deeds. The सुचरित is the king's. This is antithetic to अपचरित—misdeed of the sloka preceding. The king apprehends condemnation for misdeeds (अपचरित), the warder suggests commendation for good deeds (सुचरित)। (b). समाजयितुम्—समाज चुरादि + णिच् स्वार्थे + तुमुन्।

2. Note the order of entry—कञ्चुकी, पुरोहित, शकुन्तला, शार्ङ्गरव, शारद्वत, गौतमी। See Tika.

शार्ङ्गरवः—शारद्वत,

महाभागः कामं नरपतिरभिन्नस्थितिरसौ
न कश्चिद्वर्णानामपथमपकृष्टोऽपि भजते।

तथापीदं शश्वत् परिचितविविक्तेन मनसा
जनाकीर्णं मन्ये हुतवहपरीतं गृहमिव ।

SARNGARAVA—Saradvata, it is true that this king, who has never trangressed social limits, is supremely gifted ; that not even the meanest of any of the classes follows an evil course. Yet, with my mind ever accustomed to solitude, I deem this place, teeming with men, like a house enveloped in flames.

महाभागेति । अन्वयः—अभिन्नस्थितिः असौ नरपतिः महाभागः, वर्णानामपकृष्टोऽपि कश्चित् अपथं न भजते, कामम् । तथापि जनाकीर्णमिदं शश्वत् परिचितविविक्तेन मनसा हुतवहपरीतं गृहमिव मन्ये । व्याख्या—'अभिन्ना स्थितिः' मर्यादा येन तथाविधः स्थितेरभेत्ता 'असौ नरपतिः' राजा दुष्यन्तः 'महाभागः' अप्राकृतस्वरूपः ; 'वर्णानां' ब्राह्मणादीनां चतुर्णाम् [शेषे षष्ठी] 'अपकृष्टोऽपि' हीनोऽपि 'कश्चित्' जनः 'अपथं' विमार्गम् ["नञस्तत्पुरुषात्" इति निषेधे "पथो विभाषा" इति अप्रत्ययः समासान्तो वा । "परवल्लिङ्गं द्वन्द्वतत्पुरुषयोः" इति पुंस्त्वे प्राप्ते "अपथं नपुंसकम्"] 'न भजते' न गच्छति 'कामं' सर्वमेतत् अनुमन्ये, सत्यमेवैतत् । 'तथापि' एवमपि, राजा च अप्राकृतः प्रजाश्च सद्वृत्ताः इति स्थितेऽपि [गर्हायामपिः] 'जनैः' मानवैः 'आकीर्णं' व्याप्तम् 'इदं' दृश्यमानमेतन्नगरम् ["इदम्" इति हस्ताभिनयेन दर्शनम्] 'शश्वत्' सर्वदा 'परिचितं' दृष्टं 'विविक्तं' निर्जनं येन तथाविधेन 'मनसा' करणेन 'हुतवहेन' अग्निना 'परीतं' व्याप्तं 'गृहमिव' सद्यस्त्याज्यं 'मन्ये' सम्भावयामि । ["स्थितिरसौ" (त-, व्या-, म-)—"स्थितिरहो" (रा, वि-)] ॥

NOTES.

1. (a). महाभागः—महान् भागः औदार्यादिगुणसमुदायो यस्य सः । This is inferred because the king is अभिन्नस्थितिः । स्थिति is the apportionment of dues according to merit. The king was supernaturally endowed (महाभाग), so he never erred in (अभिन्न) estimating the merits of the men under him. (b). कामम्—This indicates *admission.* कामं नरपतिः महाभागः—I admit the king is

supernaturally endowed. Raghava explains कामम् अतिशयेन महाभागः। (c). अपथम्—पथिन् is मार्ग track, course ; *i. e.*, the *right* course. न पथ्याः &c.—see *Tika.* (d). इदम्—This. Here the speaker points at the city with his finger (अङ्गुलिनिर्देशः)। (e). शश्वत्—Always. Qual. परिचित। Not necessarily compounded. (f). मनसा—करणे तृतीया। करण of मननक्रिया (मन्य)। (g). हुतवहपरीतम्—Note the propriety of an ascetic calling fire by the name हुतवह in preference to अग्नि, दहन, &c.

2. *Remark.* Sarngarava deems the place like a house in flames which has to be forth-with shunned. He gives two strong reasons *against* such a thought—(i) The king is an extraordinary personage which should create a liking for the place ; (ii) The people are *all* very well behaved which is a great attraction. Yet the thought overpowers him, because (i) His mind is परिचितविविक्त, and (ii) The place is जनाकीर्ण।

शारद्वतः—स्थाने भवान् पुरप्रवेशादित्थम्भूतः संवृत्तः। अहमपि—

अभ्यक्तमिव स्नातः शुचिरशुचिमिव प्रबुद्ध इव सुप्तम्।
बद्धमिव स्वैरगतिर्जनमिह सुखसङ्गिनमवैमि ॥

SARNGARAVA—Rightly art thou become like that through entering the town. I too deem the pleasure-seeking people here as the bathed deem the anointed, the pure deem the impure, the awake deem the asleep, one with free motion deems the fettered.

शकुन्तला (निमित्तं सूचयित्वा)—अम्महे किं मे वामेदरं णअणं विप्फुरदि [अहो किं मे वामेतर नयनं विस्फुरति]।

SAKUNTALA—(*Acting the feeling of an omen*)—Oh ! Why does my right eye quiver ?

स्थाने इति। 'पुरप्रवेशात्' [हेतौ पञ्चमी] 'भवान् इत्थम्भूतः' एवमवस्थः 'संवृत्तः' जातः इति 'स्थाने' युक्तम् ["युक्ते द्वे साम्प्रतं स्थाने" इत्यमरः]। ["स्थाने" (त-, व्या-, म-)—"जाने" (रा-, वि-)]॥ "अहमपि" (रा-, वि-, म-)—"अहं तु" (त-, व्या-)]॥

अभ्यक्तमिति। अन्वयः—अहमपि इह सुखसङ्गिनं जनं स्नातः अभ्यक्तमिव, शुचिरशुचिमिव, प्रबुद्धः सुप्तमिव, स्वैरगतिः बद्धमिव, अवैमि। व्याख्या—'अहमपि इह' नगरे 'सुखेन सजति' मिलति य स्तं 'सुखसङ्गिनं' भोगासक्तं 'जनं स्नातः' स्नानेन क्षालितदेहमलः 'अभ्यक्तमिव' तैलमर्दनेन सम्पादितदेहमलमिव, 'शुचिः' अन्तःशुद्धो जनः 'अशुचिमिव' कलुषात्मानं पापिनमिव, 'प्रबुद्धः' जागरितः, जाततत्त्वावबोधः 'सुप्तमिव' निद्रितमिव मोहनिद्राप्राप्तमिव, 'स्वैरा' स्वाधीना ["स्वादीरेरिणोः" इति वृद्धिः] 'गतिः' यस्य तादृशः, स्वच्छन्दचारी वशी 'जनः' 'बद्धमिव' यन्त्रितमिव 'अवैमि' जानामि। अत हि जना बहवो देहेन अशुद्धाः, शुद्धदेहाश्च केचिदन्तरशुद्धाः, स्वल्पा एव कायमनःशुद्धाः अपि अप्रबुद्धा, प्रबुद्धोऽपि यदि कश्चिदस्ति स ननमवशः सुखसङ्गेन। मम तु क्रमेण देहशुद्धिः, अन्तःशुद्धिः, प्रबोधः, वशित्वञ्च जातम्। तत् सदृशजनाभावात् ममाप्यतावस्थानं न रुचये। अहमपि सत्यमाज्यमिवेदं मन्ये। 'अहं तु' इति पाठे "तवेदं भयस्थानं मम तु एभिर्वराकैराकीर्णं करुणास्थानम्" इत्येवं व्याख्येयम्।

शकुन्तलेति। 'निमित्तं' दक्षिणाक्षिस्पन्दनं 'सूचयित्वा' अभिनीय, आकारेङ्गितैः दक्षिणाक्षि स्पन्दते इति दर्शयित्वा 'वामम् इतरत्' यस्मात् तत्, दक्षिणमित्यर्थः ["न बहुव्रीहौ" इति सर्वनामसंज्ञानिषेधः। तत्पुरुषे तु सर्वनामता अस्ति, परं तदापि भाष्यमते वामेतरम् इत्येव भवति] 'विस्फुरति' स्पन्दते। स्त्रीणां दक्षिणाक्षिस्पन्दनमशुभम्।

NOTES

1. इत्थम्भूतः—इत्थम् अनेन प्रकारेण भूतः विपरिणतः thus affected. सहसुपेति समासः। Saradvata sympathises with Sarngarava—You are anxious to quit the place so am I (ममापि); but for a slightly different reason.

2. (a). अभ्यक्तम् &c.—अभि + अञ्ज + क्त कर्मणि = अभ्यक्तः anointed with oil. This refers to देहशुद्धि। (b). शुचि &c.—The reference

is to मनःशुद्धि। (c). प्रवृत्त &c.--Refers to तत्त्वज्ञान। (d). बहुमिव &c.—Refers to वशित्व। see Tika.

गौतमी—जादे पडिहदं अमङ्गलं। सुहाइं दे भत्तुकुलदेवदाओ वितरन्दु [जाते, प्रतिहतममङ्गलम्। सुखानि ते भर्त्तृकुलदेवता वितरन्तु]। (परिक्रामति)।

GAUTAMI—My child, the evil is averted. May the deities of your husband's family grant you joy. (*Walks round*).

पुरोहितः (राजानं निर्दिश्य)—भो भोस्तपस्विनः, असावत्र भवान् वर्णाश्रमाणां रक्षिता प्रागेव मुक्तासनो वः प्रतिपालयति। पश्यतैनम्।

THE PRIEST (*Pointing to the king*)—O ye ascetics, There, His Highness, the protector of the castes and classes, having even before-hand quitted his seat, is awaiting you. Behold him.

शार्ङ्गरवः—भो महाब्राह्मण, काममेतदभिनन्दनीयं, तथापि वयमत्र मध्यस्थाः। कुतः—

भवन्ति नम्रास्तरवः फलागमैर्नवाम्बुभिर्दूरविलम्बिनो घनाः।
अनुद्धताः सत्पुरुषाः समृद्धिभिः स्वभाव एवैष परोपकारिणाम्॥

SARNGARAVA—O great Brahmana, this is certainly praiseworthy, yet in this matter we are indifferent. (You ask) why ? —Trees become bent by the advent of fruits ; clouds hang far down by new rain ; good men become the reverse of haughty by riches. Such indeed is the nature of the benefactors of others.

गौतमीति। 'अमङ्गलम्' अशुभं, यस्य अशुभस्य एतत् ते दक्षिणाक्षिस्पन्दनं सूचकं तत्, 'प्रतिहतं' निराकृतं जानीहि। इदञ्च मातामहाश्च दुर्निमित्ते जाते सुहृद्भिर्वाच्यम्। न हि वस्तुतस्तदमङ्गलं प्रतिहतम्।

पुरोहित इति। दूरस्थं 'राजानं निर्दिश्य' तपस्विभ्यः प्रदर्श्य आह 'असौ अत्रभवान् वर्णानां' ब्राह्मणादीनां चतुर्णाम् 'आश्रमाणां' गृहस्थादीनाञ्च चतुर्णां 'रक्षिता' अतएव महाभागो दुष्मन्तः, तपस्विगौरवात् 'प्रागेव' भवतां प्रवेशात् पूर्वमेव 'मुक्तासनः' आसनं परित्यज्य स्थित एव 'वः प्रतिपालयति' अपेक्षते। पुण्यमीदृशस्य दर्शनं तत् 'एनं पश्यत'।

शार्ङ्गरवेति। 'भो महान् ब्राह्मणः', तत्सम्बोधने हे द्विजवर राजपुरोहित [किञ्चिदिव सोल्लुण्ठनमेतत्] 'एतत्' राज्ञा अनुष्ठितमिदम् 'अभिनन्दनीयं' स्तुत्यं 'कामं' सत्यम्। 'तथापि अत्र' अस्मिन् विषये 'वयम्' ["अस्मदो द्वयोश्च" इति बहुवचनम्] 'मध्यस्थाः' उदासीनाः। वयन्तु मन्यामहे नात्र काचित् स्तुतिः न वा निन्दा। 'कुतः' किं कारणमिति पृच्छसि चेत् शृणु।

भवन्तीति। अन्वयः—तरवः फलागमैर्नम्रा भवन्ति। घना नवाम्बुभिर्दूरविलम्बिनो (भवन्ति)। सत्पुरुषाः समृद्धिभिरनुद्धता (भवन्ति)। परोपकारिणां स्वभाव एव एषः। व्याख्या—'तरवो' वृक्षाः 'फलागमैः' प्रसवोद्गमैः हेतुभिः 'नम्रा' आनता 'भवन्ति' येन पथिकाः फलानि सुखेन गृहीत्वा तृप्ता भवेयुः। 'घना' मेघाः 'नवाम्बुभिः' प्रथमजलागमैः वर्षारम्भे इत्यर्थः 'दूरं' गगनाग्रात् दूरे भूतलसमीपे 'विलम्बिनो' लम्बमाना भवन्ति, येन वर्षणात् निदाघतताम्लाना भवेयुः। 'सत्पुरुषाः' सुजनाः समृद्धिभिः ऐश्वर्योत्कर्षैः 'अनुद्धताः' उद्धतप्रतिद्वन्द्विनः अभिगम्या इत्यर्थः [विरोधार्थे नञ्] भवन्ति, येन अर्थिन आगत्य प्रार्थितं लब्ध्वा तृप्ता भवेयुः। 'परोपकारिणां' परार्थघटकानां 'स्वभाव एव एष' यत् ते सुखेन लभ्या भवन्ति। प्रकृत्या यत् कृतं तत्र का स्तुतिर्दुष्मन्तस्य इति भावः।

NOTES

1. प्रतिहतम् &c.—The quiver of the right eye portends evil. This frightens Sakuntala. Gautami comforts her. The evil won't come, it is averted already (प्रतिहतम्); and, over and above that, you may expect good instead (सुखानि वितरन्तु) । वितरन्तु इति आशिषि लोट् ।

2. (a). वर्णाश्रमाणाम्—शेषे षष्ठी। (b). रक्षिता—रक्ष् धातु रक्षति इति रक्ष

+तृन् साधुकारिणि कर्त्तरि। Hence वर्णाश्रमाणाम् cannot have कर्तृकर्मणि षष्ठी because "न लोकाव्ययनिष्ठाखलर्थतृनाम्" prohibits such षष्ठी with तृन्।

3. (a). महाब्राह्मण—महान् ब्राह्मणः—a great Brahman—is slightly taunting. You have not got much of a Brahman in you! You see things in one light, we in another. We are indifferent (मध्यस्थ) to this humility of the king, though you take it as a great merit. (b). मध्यस्थाः—मध्ये वादिप्रतिवादिनोर्मध्ये तिष्ठन्तीति मध्य+स्था +क कर्त्तरि Lit. an arbitrator; hence उदासीन indifferent. वयं न स्तुमः न वा निन्दामः।

4. (a). फलागमैः, नवाम्बुभिः, समृद्धिभिः—हेतौ तृतीया। (b). दूर &c. —दूरं साधु विलम्बन्ते इति दूर+वि+लम्ब+णिनि साधुकारिणि कर्त्तरि=दूरविलम्बिनः hanging low down, *i. e.*, near the horizon.

5. (a). अनुद्धताः—ऊर्द्ध्वं गता इति उद्+हन गतौ+क्त कर्त्तरि=उद्धताः puffed up. न उद्धताः not puffed up, *i. e.*, they come low. (b). एषः —This, *i. e.*, accessibility. (c). परोपकारिणाम्—परेषामुपकारः परोपकारः। तमवश्यं कुर्वन्ति इति परोपकार+कृ+णिनि आवश्यके=परोपकारिणः those who are destined to come to the use of others.

6. *Remark.* The verse is a piece of condensed reasoning. Thus—(Sarngarava) दुष्यन्त is अनुद्धत। (Purohita) Why so? (S). Because दुष्यन्त is a सत्पुरुष, and अनुद्धताः सत्पुरुषाः समृद्धिभिः। (P). Is not this to the credit of a सत्पुरुष? (S). Not so, because he is *forced* to this by स्वभाव *nature.* If he could avoid it and yet did it of *choice*, that would be some credit. (P). That is a bold statement. What proofs? (S). Look at the trees—भवन्ति नम्रास्तरवः फलागमैः। They are *forced* to this by nature. (P). But trees have *life.* This may be as much a case of *choice* with them. (S). Take then the clouds—नवाम्बुभिर्दूरविलम्बिनो घनाः। There can be no question of *choice* here. No, they are powerless. It is *nature* (स्वभाव) that rules them. स्वभाव एवैष परोपकारिणाम्। These, and every thing else that is destined by nature to come to the use of others, are *bound* to be accessible. Otherwise nature's design will be frustrated. The figure is, therefore, अर्थान्तरन्यास।

Again भवन्ति has to be taken with all except the last line to complete the sense. So we have क्रियादीपक also. "जातिक्रियागुणद्रव्य-वाचिनैकत्रवर्त्तिना। सर्ववाक्योपकारश्चेत् तमाहुर्दीपकम्—॥"—*Dandin.*

प्रतीहारी—देव पसण्णमुहवण्णा दीसन्ति। जाणामि विस्सद्धकज्जाओ इसीओ [देव, प्रसन्नमुखवर्णा दृश्यन्ते। जानामि विश्रब्धकार्य्या ऋषयः]।

WARDER—Sire, pleased expressions of face are visible. I believe, the sages have business of an assuring character.

राजा (शकुन्तलां दृष्ट्वा)—अथात्रभवती—

केयमवगुण्ठनवती नातिपरिस्फुटशरीरलावण्या।
मध्ये तपोधनानां किसलयमिव पाण्डुपत्राणाम्॥

KING (*Gazing at Sakuntala*)—Well, among the hermits, who could be this noble lady veiled, with the charm of her person not much disclosed, like a fresh bud among brown leaves?

प्रतीहारीति। 'प्रसन्नाः' प्रीता 'मुखवर्णा' मुखाकारा 'दृश्यन्ते'। 'विश्रब्ध' विश्वासयुक्तं 'कार्य्यं' येषां तथाविधाः। यस्मायोक्तं सुचरितनन्दिनः सभाजयितुमागता ऋषय इति नूनं तदेव।

केति। अन्वयः—अथ तपोधनानां मध्ये, पाण्डुपत्राणां मध्ये किसलयमिव, अवगुण्ठनवती नातिपरिस्फुटशरीरलावण्या अत्रभवती इयं का। व्याख्या—'अथ' संशये। शकुन्तलां दृष्ट्वा संशयः ["अथाथो संशये स्याताम्" इति मेदिनी] 'तपोधनानां' तापसानां 'मध्ये' अग्रतः पुरोहितः पश्चात् शार्ङ्गरवशारद्वतौ तन्मध्ये इत्यर्थः 'पाण्डूनां पत्राणां' शीर्णपर्णानां मध्ये 'किसलयमिव' नवपल्लवमिव 'अवगुण्ठनवती' शिरोवस्त्रावरणवती अतएव 'नातिपरिस्फुटम्' अनतिप्रकटम् [नञर्थेन न शब्देन "सह सुपा" इति समासः] 'शरीरलावण्यं' देहशोभा यस्याः तथाविधा 'अत्रभवती' मान्या 'इयं' दृश्यमाना 'का' इति संशयः। ["केयम्" (त-, न्या-)—"का स्वित्" (रा-, वि-, म-)]।

NOTES

1. (a). प्रसन्नमुखवर्णाः—वर्ण is रूप appearance. "वर्णः स्याद्रूपभेदयोः" इति शाश्वतः। मुखानां वर्णाः expressions of their faces. प्रसन्ना मुखवर्णाः pleased expressions &c. कर्मधा—। Here *pleasure* in the individual is attributed to the *expression* of his face. Or प्रसन्नानां मुखवर्णाः expressions of face as are seen in pleased persons. (b). विश्रब्धकार्य्याः—वि + श्रम्भ + क्त कर्त्तरि = विश्रब्धम् assuring विश्वासकरम्, *i. e.*, अनुद्वेगकरम्। तादृशं कार्य्यं येषाम् whose business is not of a disturbing character. They do not come to report anything unpleasant. Both विश्रब्ध and विस्रब्ध are correct.

2. केयम्—The verse has to be construed with अथावभवती preceding. The reading का स्वित् thus introduces a difficulty. स्वित् implies 'deliberation' or 'question.' "स्वित् प्रश्नवितर्कयोः" इति हैमः। But प्रश्न is already expressed by का and वितर्क by अथ। One of the three अथ, का, स्वित् becomes redundant. Again अवभवती seems to require इयम् for specification (निर्देश)। I think स्वित् must make room for केयम्।

प्रतीहारी—देव, कुतूहलगब्भो पहिदो ण मे तक्को पसरदि। णं दंसणीआ उण से आकिदी लक्खीअदि [देव, कुतूहलगर्भः प्रहितो न मे तर्कः प्रसरति। ननु दर्शनीया पुनरस्या आकृतिर्लक्ष्यते]।

WARDER—Sire, my deliberation directed with curiosity does not advance. But her person indeed appears worth looking at.

राजा—भवतु। अनिर्वर्णनीयं परकलत्रम्।

KING—Well, another's wife is not to be scrutinised.

शकुन्तला (हस्तमुरसि कृत्वा आत्मगतम्)—हिअअ किं एव्वं वेवसि। अज्जउत्तस्स भावं ओधारिअ धीरं दाव होहि

[हृदय किमेवं वेपसे। आर्यपुत्रस्य भावमवधार्य धीरं तावद्भव]।

SAKUNTALA (*Laying her hand on her chest, aside*)—O Heart, why dost thou throb so? Be calm considering the affection of my husband.

प्रतीहारीति। 'कुतूहलं' कौतुकं 'गर्भे' अभ्यन्तरे यस्य तथाविधः ["सप्तमी-विशेषणे—" इति पूर्वनिपाते प्राप्ते गड्वादेराकृतिगणत्वात् परनिपातः] 'मे तर्कः' ऊहः 'प्रहितः' प्रेरितः केयमिति निश्चयकर्मणि नियोजितः 'न प्रसरति' नोपसर्पति। निश्चेतुम-समर्थोऽहम्। 'अस्या आकृतिः पुनः' आकृतिस्तु 'दर्शनीया ननु' सुदर्शना एव 'लक्ष्यते'। ["प्रहितः" (वि-)—"प्रतिहतः" (त-, न्या-)—"प्रतिहितः" (म-)—"उपहितः" (रा-)॥ "ननु दर्शनीया" (रा-, म-)—"दर्शनीया" (त-, वि-, न्या-)]॥

राजेति। 'परकलत्रं' परस्त्री ["कलत्रं श्रोणिभार्ययोः" इत्यमरः] 'अभि-वर्णनीयं' निर्वर्णनं निपुणदर्शनं न अर्हति। ["अनिर्वर्णनीयम्" (रा-, वि-, म-)—"अनिर्वर्ण्यम्" (त-, न्या-)]॥

शकुन्तलेति। 'उरसि कृत्वा' वक्षसि निधाय [सर्वधात्वर्थानुवादः करोतिना भवति]। 'वेपसे' कम्पसे। 'भाव' प्रीतिम् 'अवधार्य' निश्चित्य 'धीरं तावत् भव'। तादृशी प्रीतिर्न विकल्पते, तत् का ते चिन्ता।

NOTES

1. (a). प्रहितः—The readings प्रतिहतः, प्रतिहितः, उपहितः do not give good sense. (b). ननु—Implies अवधारण। (c). पुनः—Implies भेद। I can not say *who* (का) she (इयम्) is, but (पुनर्) this much I can say with certainty (ननु) that she has a fair presence.

2. भवतु—An अव्यय। Implies disapproval (निषेध)। "अस्तु इति निषेधासूयाङ्गीकारयोः। भवतु इत्यस्तुवत्"—*Ganakara.*

पुरोहितः (पुरो गत्वा)—एते विधिवदर्चितास्तपस्विनः। कश्चिदेषामुपाध्यायसन्देशस्तं देवः श्रोतुमर्हति।

PRIEST—(*Advancing*)—Here are the ascetics duly honoured.

(There is) some message from their preceptor. Please Sire to here it.

राजा—अवहितोऽस्मि ।

KING—I am attending.

ऋषयः (हस्तमुद्यम्य)—विजयस्व राजन् ।

SAGES (*Raising their hand*)—Do you prosper, O King.

राजा—सर्वानभिवादये ।

KING—I salute you all.

ऋषयः—इष्टेन युज्यस्व ।

SAGES—Be provided with the wished-for.

राजा—अपि निर्विघ्नतपसो मुनयः ।

KING—Have the ascetics their penance unobstructed ?

ऋषयः—

कुतो धर्मक्रियाविघ्नः सतां रक्षितरि त्वयि ।
तमस्तपति घर्मांशौ कथमाविर्भविष्यति ॥

SAGES—You protecting, whence is obstruction of the religious rites of the good ? The sun shining, how will darkness appear ?

पुरोहित इति । 'एते' उपस्थिता इमे 'विधिवदर्चितास्तपस्विनः' । 'उपाध्यायस्य' आचार्यस्य कण्वस्य 'सन्देशो' विज्ञप्तिः 'कश्चित्' अस्ति ।

ऋषय इति । 'विजयस्व' जययुक्तो भव, वर्द्धस्व । [अकर्मकोऽयं जयतिः प्रकर्षप्राप्तौ वर्त्तते । "विपराभ्यां जेः" इत्यात्मनेपदम्] ।

इष्टेनेति । 'इष्टेन' प्रार्थितेन सह 'युज्यस्व' युक्तो भव [दैवादिकात् कर्त्तरि लट्] ।

राजेति । 'निर्गता विघ्नाः' येभ्यः तथाविधानि 'तपांसि' येषां तथाविधाः किं 'मुनयः' । अपि प्रश्ने ।

कुत इति। अन्वयः—त्वयि रक्षितरि सतां धर्मक्रियाविघ्नः कुतः। घर्मांशौ तपति तमः कथमाविर्भविष्यति। व्याख्या—'त्वयि' भवति पौरवे 'रक्षितरि' साधु रक्षाकर्म कुर्वति सति [साधुकारिणि तृन्] 'सतां' साधूनां 'धर्मक्रियासु' तपोऽनुष्ठानेषु 'विघ्नः' अन्तरायः 'कुतः' कस्माद्वा स्यात्। पक्ष—'घर्मांशौ' तीव्रतापे रवौ [तीव्रत्वात् तमोरूपस्य शत्रोर्भयम्] 'तपति' तापेन पीड़यति सति [पीडितत्वात् शत्रोः पलायनम्] 'तमः' ध्वान्तरूपः शत्रुः 'कथं' केन प्रकारेण 'आविर्भविष्यति' प्रकाशं गमिष्यति। न कथमपि।

NOTES

1. (a). सताम्—Construe with धर्मक्रिया, not with रक्षितरि, because that would imply the existence of असत् also. But the spirit of the sloka seems to be that Dushyanta being रक्षिता, *all* in the kingdom was सत्, the सत् again *all* did धर्मक्रिया, and *all* धर्मक्रिया was free from molestations. Not that विघ्न was removed, but none *appeared* even (कुतो विघ्नः ?)। The दृष्टान्त makes this clear. (b). तपति—He does not say घर्मांशौ स्थिते but तपति। By his उदयाचलस्थिति the sun *removes* the darkness that *was*. But when he is तपति darkness does not appear at all (कथमाविर्भविष्यति ?)। The अलङ्कार is दृष्टान्त according to the moderners, but दण्डिन् calls it प्रतिवस्तूपमा।

राजा—अर्थवान् खलु मे राजशब्दः। अथ भगवान् लोकानुग्रहाय कुशली काश्यपः।

KING—Verily my title Rajan has now become significant. Is his Reverence Kasyapa enjoying health to favour the world ?

शार्ङ्गरवः—स्वाधीनकुशलाः सिद्धिमन्तः। स भवन्तमनामयप्रश्नपूर्वकमिदमाह।

SARNGARAVA—The possessors of spiritual power have health at their command. He, with the preliminary enquiry after the welfare, says this to thee.

राजा—किमाज्ञापयति भगवान्।

KING—What does His Reverence command?

राजेति। 'राजशब्दः' राजा इति संज्ञा। 'अर्थवान्' अन्वर्थः। राजते शोभते सुष्ठु राजकर्मकरणात् इति राजा। अहञ्च तथा। अथवा "राजा प्रकृतिरञ्जनात्" इति रञ्जितेषु तापसेषु यथार्थमेवाहं राजा। 'लोकानामनुग्रहाय' भुवि स्थित्वा लोकानुग्रहकरणाय 'कुशली' कल्याणवान् ["ब्राह्मणं कुशलं पृच्छेत्" इति कुशलप्रश्नः]। 'अथ' प्रश्ने।

शार्ङ्गरव इति। 'सिद्धिमन्तः' अणिमादिसिद्धिसमन्विता योगीश्वराः 'स्वाधीनं' स्वायत्तं 'कुशलं' येषां तथाविधा भवन्ति। तदसौ कुशली किमु वक्तव्यम्। 'अनामयस्य' अरोगस्य 'प्रश्नपूर्वकं' प्रथममनामयप्रश्नं कृत्वा ["क्षत्रबन्धुमनामयम्" इति अनामयप्रश्नः]।

NOTES

1. (a). अर्थवान् &c.—From your description, I find, I am doing my work well, hence rightly am I called "राजन्"। (b). लोकानुग्रहाय—लोकानुग्रहं कर्तुम् इति "क्रियार्थोपपदस्य च कर्मणि स्थानिनः" इति चतुर्थी। This is in courtesy. Elsewhere the poet says—"तथा हि सर्वे तस्यासन् परार्थैकफला गुणाः", "वसु तस्य विभोर्न केवलं गुणवत्तापि परप्रयोजना", "विदितं वो यथास्वार्था न मे काश्चित् प्रवृत्तयः", &c.

2. आज्ञापयति—आ ज्ञा+णिच्+लट् ति commands. Note the humility of the king. He expects आज्ञा।

शार्ङ्गरवः—यन्मिथः समयादिमां मदीयां दुहितरं भवानुपायंस्त तन्मया प्रीतिमता युवयोरनुज्ञातम्। कुतः—

त्वमर्हतां प्राग्रसरः स्मृतोऽसि नः
शकुन्तला मूर्त्तिमती च सत्क्रिया।
समानयंस्तुल्यगुणं वधूवरं
चिरस्य वाच्यं न गतः प्रजापतिः।

तदिदानीमापन्नसत्त्वा प्रतिगृह्यतां सहधर्मचरणायेति।

SARNGARAVA—Through mutual agreement you married this daughter of mine. That act of you two is approved by me with pleasure. (You ask) Why ?—Thou art reckoned by us as moving at the fore of the worthy, and Sakuntala is Worship embodied. Bringing together a bride and a bridegroom of equal excellence, Prajapati has after a long time avoided censure. So let her, now quick with child, be accepted for the practice of virtue together. This (is what he says).

यन्मिथ इति। 'मिथ:' अन्योऽन्यं 'समयात्' शपथाचारात्, ["समया: शपथाचारकालसिद्धान्तसंविद:" इत्यमर:] गान्धर्वेण विवाहेन इत्यर्थ: ["गान्धर्व: समयान्मिथ:" इति याज्ञवल्क्य:] 'भवान् मदीयां दुहितरम् उपायंस्त' उदवोढ़ ["उपायम: स्वकरणे" इत्यात्मनेपदम्] इति 'यत् युवयोस्तत्' मिथ: समयकरणं 'प्रीतिमता मया अनुज्ञातम्'।

त्वमिति। अन्वय:—त्वं न: अर्हतां प्राग्रसर: स्मृतोऽसि। शकुन्तला च मूर्त्तिमती सत्क्रिया। प्रजापति: तुल्यगुणं वधूवरं समानयन् चिरस्य वाच्यं न गत:। व्याख्या—'त्वं न:' ["क्तस्य च वर्त्तमाने" इत्यनुक्ते कर्त्तरि षष्ठी] 'अर्हतां' प्रशस्यानां पात्राणाम् [प्रशंसायां शतृ] 'प्रकर्षेण अग्रसर:' पुरोगामी 'स्मृतोऽसि' वयं त्वां सत्पात्राणामग्रणीं मन्यामहे। 'शकुन्तला च मूर्त्तिमती' धृतदेहा 'सत्क्रिया' सत्कार:, अर्चना न: स्मृता। 'प्रजापति:' ब्रह्मा 'तुल्या गुणा' यस्य तादृशं वधूश्च वरश्च 'वधूवरं' वरवध्वौ ["सर्वो द्वन्द्वो विभाषया एकवद्भवतीति वाच्यम्" इत्येकत्वम्। यद्वा—भाव्यमानं समाहारमाश्रित्य एकत्वम्] 'समानयन्' समाहरन्, एकत्र कुर्वन् 'चिरस्य' बहो: कालात् ["चिराय चिररात्राय चिरस्य त चिरार्थका:" इत्यव्ययगणे अमर:] 'वाच्यं' निन्दां 'न गत:' न प्राप्त:। उत्कृष्टया अपकृष्ट: पुमान्, उत्तमेन च अधमा स्त्री मिलति इत्येवं निन्दा विधेर्व्यवस्था। अद्य तु युवां मेलयित्वा विधिरनिन्द्य इति भाव:। तदिति। यतोऽहमनुमन्ये 'तत्' तस्मात् 'सत्त्व'' प्राणिनं गर्भमित्यर्थ: 'आपन्ना' प्राप्ता, गर्भिणीति यावत् "प्राप्तापन्ने च द्वितीयया" इति समास:। बहुव्रीहिर्वा] इयं 'सह' एकत्र 'धर्मचरणाय' [तादर्थ्ये चतुर्थी] 'प्रतिगृह्यताम् इति' स भगवान् आह। युक्तमेव यत् अर्हते सत्क्रिया। तत् अर्हन् भवान् सत्क्रिया शकुन्तलां गृह्णातु।

NOTES

1. (a). अर्हताम्—अर्ह + शतृ प्रशंसायाम् = अर्हन्: the deserving तेषाम्।

निर्द्धारे षष्ठी। (b). प्रागसरः—अग्रे पुरः सरति गच्छति इति अग्र+सृ+ट कर्त्तरि =अग्रसरः leader. प्रकर्षेण अग्रसरः the very first. प्रादितत्—। (c). अर्हितः—अर्ह is पूजार्थ। Hence अर्ह+क्त कर्त्तरि वर्त्तमाने=अर्हितः। (d). नः—कर्त्तरि षष्ठी। See *Tika.* (e). सत्क्रिया—सत्+कृ+श भावे honour आदरकरणम्। सत् is a गति in this sense by the rule "आदरानादरयोः सदसती"। 'Honour' (सत्क्रिया) is done to the 'deserving' (अर्हत्)। You are the best of the 'deserving' and शकुन्तला is 'Honour' personified. Hence, I approve of your union. (f). प्रजापतिः—All credit (वाच्यं न गतः) is due to प्रजापति। Because, though प्रजापति presides over *all* matches, he employs relatives of the parties as instruments. In this case, I did absolutely nothing, प्रजापति alone brought about the union.

2. सहधर्मचरणाय—धर्मस्य चरणम्। सह धर्मचरणम्। सुप्सुपा। "सस्त्रीको धर्ममाचरेत्" इति वचनात्। तस्मै।

गोतमी—अज्ज किं वि वत्तुकाम म्हि। ण मे वअणावसरो अत्थि। कहं त्ति [आर्य्य किमपि वक्तुकामास्मि। न मे वचनावसरोऽस्ति। कथमिति]।

GAUTAMI—Honoured Sir, I wish to say something. There is no scope for my say. (Do you ask) How?—

णावेक्खिदो गुरुअणो इमाए ण तुए वि पुच्छिदो बन्धु।
एक्कक्कस्स च चरिए भणादु किं एक्क एक्कस्सिं।
[नापेक्षितो गुरुजनः अनया न त्वयापि पृष्टो बन्धुः।
एकैकस्य च चरिते भणतु किमेक एकस्मिन्॥]   *

Superiors were not regarded by her; nor by you too were her kinsmen consulted. In a matter done singly by each, what should another say to either?

शकुन्तला (आत्मगतम्)—किं णु क्खु अज्जउत्तो भणादि [किं नु खलु आर्य्यपुत्रो भणति]।

SAKUNTALA (*Aside*)—What indeed would my lord reply ?

राजा—किमिदमुपन्यस्तम् ।

KING—What is this presented ?

गौतमीति । 'किमपि' यत् किञ्चित् 'वक्तुकामा' भाषणाभिलाषिणी 'अस्मि' । 'मे वचनस्य अवसरः' प्रसङ्गो 'नास्ति' । अहमत्र तृतीयः पक्षः, तत् को वचनस्यावकाशः । 'कथम्' अप्रसङ्ग 'इति' चेत् शृणु ।

नेति । अन्वयः—अनया गुरुजनो नापेक्षितः, त्वया अपि बन्धुर्न पृष्टः । एकैकस्य च चरिते एकः एकस्मिन् किं भणतु । व्याख्या—'अनया' शकुन्तलया 'गुरुजनः' कण्वप्रमुखः 'न अपेक्षितः' गुरुजनापेक्षा न कृता, स्वयमेव कर्त्तव्यं निर्णीतम् । 'त्वया अपि बन्धुः' वधूबान्धवजनः 'न पृष्टः' शकुन्तलार्थं न याचितः । इत्थम् इतरनिरपेक्षस्य 'एकैकस्य च' एकस्य एकस्य एव 'चरिते' कृते कर्मणि, तादृशं कर्म अधिकृत्य 'एकः' अन्यः मादृशस्तृतीयो जनः ["एके मुख्यान्यकेवलाः" इत्यमरः) 'एकस्मिन्' प्रधानयोर्द्वयोरन्यतरस्मिन् 'किं भणतु' किं कथयतु । न किमपि । "अस्मिन् जने मे मनः स्निह्यति तत् योजयतु भवाननेन माम्" इति न शकुन्तलया गुरुजनः नापि त्वया अस्या बन्धुजनो याचितः । अपि तु द्वावपि भवन्तौ तृतीयमनावेद्य कर्म कृतवन्तौ । तदधुना तृतीयस्य कथाया नास्त्यवकाशः । [मूलम् (त-, न्या-)—"...न खलु पृष्टश्च... परस्परस्मिन्नेव चरिते भणामि किमेकैकम्" (रा-)—"...एकैकमेवं चरिते किं भणत्वेक एकस्य" (म-)—"...त्वया पृष्टो बन्धुः । एकैकमेव चरिते भणामि किमेकमेकस्मै" (वि-)] ॥

शकुन्तलेति । न जाने भर्त्ता मे किमुत्तरं दद्यात् इति शङ्कासन्देहसङ्कुरः ।

राजेति । 'उपन्यस्त' समीपे निक्षिप्तम् उपस्थापितम् । शापेन नष्टस्मृतिः सर्वमिदं दुरवबोधं मन्यते ।

NOTES

1. वक्तुकामा—See वक्तुकामः, *Ante.*

2. (a). एकैकस्य—एकस्य एकस्य implies वीप्सा । The whole is treated as a बहुव्रीहि by the rule "एकं बहुव्रीहिवत् । The word is सर्वनाम because the prohibition "न बहुव्रीहौ" applies to बहुव्रीहि only,.

and not also to those that are बहुव्रीहिवत्। "एकैकम् । न बहुव्रीहौ इति प्रतिषेधो न भवति"—*Vritti.* (b). *Remark.* In the other readings एकैकम्=एकम् एकम् अक्षाणि in Raghava. In Monier-Williams &c. it is क्रियाविशेषण qualifying चरित which in hardly defensible.

शकुन्तला (आत्मगतम्)—पावओ क्खु वअणोवण्णासो [पावकः खलु वचनोपन्यासः]।

SAKUNTALA (*Aside*)—The presentation of the words is fire indeed.

शार्ङ्गरवः—कथमिदं नाम। भवन्त एव सुतरां लोकवृत्तान्तनिष्णाताः।

सतीमपि ज्ञातिकुलैकसंश्रयां जनोऽन्यथा भर्तृमतीं विशङ्कते।
अतः समीपे परिणेतुरिष्यते प्रियाप्रिया वा प्रमदा स्वबन्धुभिः॥

SARNGARAVA—How is this? You are surely very well versed in the ways of the world. Though chaste, people deem otherwise one who, having the husband living, has one's kinsmen's house as the only resort. Hence, favourite or no favourite, a woman is wanted by her relatives to be near her husband.

शकुन्तलेति। 'वचनस्य' किमिदमुपन्यस्तमिति वाक्यस्य 'उपन्यासः' उपस्थापनम् उपस्थितमेतद्वाक्यमित्यर्थः 'पावकः खलु' अग्निरिव मां दहत्येव।

शार्ङ्गरव इति। 'इदम्' एष विस्मयप्रकाशः 'कथं नाम'। इति क्रोधोपगमे कुत्सने वा ["नाम प्राकाश्यसम्भाव्यक्रोधोपगमकुत्सने" इत्यमरः]। 'भवन्त एव' भवादृशा जना एव, न तु मादृशः 'सुतराम्' अतिशयेन 'लोकवृत्तान्ते' जनचरिते 'निष्णाताः' कुशलाः। कस्मिन् विषये लोकः किं वदति, भवन्त एव जानन्ति। तथापि अजानता इव कथमुच्यते किमिदमुपन्यस्तमिति।

सतीमिति। अन्वयः—ज्ञातिकुलैकसंश्रयां भर्तृमतीं सतीमपि जनः अन्यथा विशङ्कते। अतः स्वबन्धुभिः प्रमदा प्रिया अप्रिया वा परिणेतुः समीपे इष्यते।

व्याख्या—'ज्ञातीनां' बान्धवानां 'कुलं' गृहम् ["कुलं जनपदे गृहे" इति विश्वः] 'एकः' केवलः 'संश्रयः' आश्रयस्थानं यस्याः तथाविधां 'भर्तृमतीं' सधवाम् ["विशेषण-मात्रप्रयोगो विशेष्यप्रतिपत्तौ" इति वामनः] 'सतीमपि' साध्वीमपि 'जनः' लोकः 'अन्यथा' अन्यप्रकारेण असतीत्वेन 'विशङ्कते' सम्भावयति, असतीयमिति मन्यते। अयं लोकवृत्तान्तो विदितस्ते। 'अतो' हेतोः, लोकवादभयात् 'स्वस्य बन्धुभिः' स्वया ज्ञातिभिः 'प्रमदा' तरुणी स्त्री 'प्रिया' भर्तुरभिमता वा 'अप्रिया' अनभिमता 'वा परिणेतुः' वोढुः 'समीपे इष्यते' प्रार्थ्यते। शकुन्तला तव प्रिया वा अप्रिया वा, तवैव समीपे तिष्ठतु। अन्यथा लोकापवादः स्यात्। त्वमपि एतज्जानासि। तथापि किमात्थ "किमिदमुपन्यस्त"-मिति। ["प्रियाप्रिया वा" (रा-, त-, न्या-)—"तदप्रियापि" (वि-, म-)] ॥

NOTES

1. वचनोपन्यासः—उपन्यस्तं वचनमित्यर्थः। भावानयने द्रव्यानयनम्। पावको वचनोपन्यासः—The *utterance of words* is fire, *i. e.*, *words uttered* burn me like fire.

2. लोकवृत्तान्त &c.—नि + स्ना + क्त कर्त्तरि = निष्णातः or निस्नातः। The former implies कौशल and takes षत्व by the rule "निनदीभ्यां स्नातेः कौशले"। The latter means कृताभिषेक and has the dental स। लोकानां वृत्तान्तः। तस्मिन् निष्णातः।

3. (a). ज्ञाति &c.—ज्ञा + क्तिच् कर्त्तरि = ज्ञातिः kinsman (masculine). (b). प्रियाप्रिया वा—The reading तदप्रियापि has तद् superfluous. अप्रियापि implies परिणेतुः अप्रियापि। प्रियाप्रिया वा occurs in the Sahitya-darpana also.

राजा—किमत्रभवती मया परिणीतपूर्वा।

KING—On the other hand has this lady been married by me previously ?

शकुन्तला (सविषादमात्मगतम्)—हिअअ सम्पदं दे आसङ्का [हृदय साम्प्रतं ते आशङ्का]।

SAKUNTALA—O Heart, your apprehension is justified.

शाङ्गरवः-

किं कृतकार्य्यद्वेषाद्धर्मं प्रति विमुखतोचिता राज्ञः ।

SARNGARAVA—Is disinclination towards duty, through dislike for a deed done, proper for a king?

राजा—कुतोऽयमसत्कल्पनाप्रसङ्गः ।

KING—Whence is the occasion for this unfair assumption?

शाङ्गरवः—

मूर्च्छन्त्यमी विकाराः प्रायेणैश्वर्य्यमत्तेषु ॥

SARNGARAVA—These perversities usually appear in those that are giddy with power.

राजेति । 'च' पक्षान्तरे ["च पादपूरणे पक्षान्तरे हेतौ विनिश्चये" इति त्रिकाण्ड-शेषः] । पूर्वं परिणीता 'परिणीतपूर्वा' ["भूतपूर्वे चरट्" इति ज्ञापकात् पूर्वशब्दस्य परनिपातः] 'किम्' ?

शकुन्तलेति । 'ते आशङ्का' किं वा स्यात् इति सन्देहः 'साम्प्रतं' युक्ता ["युक्ते द्वे साम्प्रतं स्थाने" इत्यमरः] ।

शार्ङ्गरव इति । अन्वयः—कृतकार्य्यद्वेषात् धर्मं प्रति विमुखता राज्ञः उचिता किम् । व्याख्या—'कृतं' प्रथममनुष्ठितं यत् 'कार्य्यं' तस्मिन् 'द्वेषात्' अरुचिवशात् 'धर्मं प्रति' कर्त्तव्यं प्रति 'विमुखता' अरुचिः 'राज्ञः' सम्बन्धे, लोकशिक्षकस्य इत्यर्थः 'उचिता किम्' । यद्भवान् गूढ़मूढ़वान् इमां तत्र नास्ति सन्देहः । अधुना च भवानस्यां वितृष्णः । तथापि अस्या ग्रहणं ते धर्मः । यदि राजा सन् इमां त्यक्त्वा स्वयमधर्मं चरसि, धर्मविप्लवः प्राप्तः । [मूलम् (त-, वि-, न्या-, म-)—"किं कृतकार्य्यद्वेषो धर्मं प्रति विमुखता कृतावज्ञा" (रा-)] ॥

राजेति । 'असती' असाध्वी असदृशी या 'कल्पना', कार्य्यं कृतं, द्वेषश्च, विमुखता च, इत्येवंरूपा, तस्याः 'प्रसङ्गः' प्रस्तावः 'कुतः' । केन प्रसङ्गेन भवत एतदनुमानम् ।

शार्ङ्गरव इति । अन्वयः—ऐश्वर्य्यमत्तेषु प्रायेण अमी विकारा मूर्च्छन्ति । व्याख्या—'ऐश्वर्य्येण' प्रभुत्वेन 'मत्तेषु' सदसद्विवेकविहीनेषु 'प्रायेण अमी विकाराः'. चेतोविकृतयः,

अनार्थ्यकार्य्येष्वपि आर्य्यचरिताभिमानरूपा: 'मूर्च्छन्ति' प्रसरन्ति। ["मर्त्येषु" (रा-, वि-, म-)—"मर्त्यानाम्" (त-, न्या-) ॥

NOTES

1. असत्कल्पना &c.—The unfair assumption is that Sarngarava supposes (कल्पना) (i) that the king *did* marry Sakuntala (कृतकार्य्य), (ii) that he now dislikes (द्वेष) her, (iii) and is therefore unwilling (विमुख) to recognise her. With the reading असत्कल्पनाप्रश्न explain असत्कल्पनामूलक: प्रश्न: a question (*i. e.*, किं कृतकार्य्य &c.) based upon wrong assumptions.

2. अमी विकारा—Refers to *perversities* (विकार)—"feigning surprise when reminded" and such like. In the present instance we have a secret marriage, its repudiation, feigning surprise when told of it, and so forth. In a word विकार here is living a wicked life and yet professing piety.

राजा—विशेषेणाधिक्षिप्तोऽस्मि।

KING—I am seriously insulted.

गौतमी (शकुन्तलां प्रति)—जादे मुहुत्तअं मा लज्ज। अवणइस्सं दाव दे ओउण्ठणं। तदो तुमं भट्टा अहिजाणिस्सदि [जाते मुहूर्त्तकं मा लज्जस्व। अपनेष्यामि ते अवगुण्ठनम्। ततस्त्वां भर्त्ता अभिज्ञास्यति]। (तथा करोति)।

GAUTAMI (*Towards Sakuntala*)—Child, for a moment, discard bashfulness. I will remove your veil, your lord will then recognise you. (*Does the same*).

राजा (शकुन्तलां निर्वर्ण्य आत्मगतम्)—

इदमुपनतमेवं रूपमक्लिष्टकान्ति
प्रथमपरिगृहीतं स्यान्नवेत्यव्यवस्यन्।

भ्रमर इव विभाते कुन्दमन्तस्तुषारं
न खलु सपदि भोक्तुं नापि शक्नोमि मोक्तुम् ॥
(विचारयन् स्थितः) ।

KING (*Having gazed at Sakuntala—Aside*)—Not coming to a decision whether previously accepted or not, I am indeed unable at once to enjoy or again to renounce this beauty thus arrived with its charms unfaded, like a bee the Kunda at dawn with dew inside. (*Remains deliberating*).

राजेति । 'विशेषेण' सुतराम् 'अधिचित्रः' भर्त्सितः ["अधिचित्रौ निन्दितभर्त्सितौ" इति हैमः] ।

गौतमीति । 'अवगुण्ठनं वक्त्रावरणम् । 'अभिज्ञास्यति' स्मरिष्यति । ('तथा' तद्वत्, अपनीतावगुण्ठनामित्यर्थः 'करोति') ["शकुन्तलां प्रति" (त-, न्या-)—राघवादय एतन्न पठन्ति] ॥

राजेति । 'निर्वर्ण्य' निपुणं दृष्ट्वा ।

इदमिति । अन्वयः—प्रथमपरिगृहीतं स्यान्न वा इति अव्यवस्यत् (अहम्), एवम् उपनतम् इदम् अक्लिष्टकान्ति रूपं विभाते भ्रमरः अन्तस्तुषारं कुन्दमिव, सपदि खलु न भोक्तुं नापि मोक्तुं शक्नोमि । व्याख्या—'प्रथमं' पूर्वं 'परिगृहीतं' पत्नीत्वेन स्वीकृतं [पत्नी परिजनादानमूलशापाः परिग्रहाः" इत्यमरः] 'स्यात् न वा' स्यात् 'इति' एतत् 'अव्यवस्यन्' अन्यतरपक्षत्वेन निश्चयम् अभजमानः अहम् 'एवम्' अनेन प्रकारेण, अन्तरपत्न्यावस्थया [सुखेन इति प्राञ्चः] 'उपनतम्' उपस्थितम् 'इदम् अक्लिष्टकान्ति' अम्लानलावण्यं 'रूपं' सौन्दर्यं, 'विभाते' प्रभाते अनुदिते भास्करे 'भ्रमरः अन्तस्तुषारं' नीहारगर्भं 'कुन्दमिव' निशि विकाशि पुष्पभेदमिव 'सपदि खलु' तत्क्षणमेव, प्राप्तिमात्रमित्यर्थः, 'न भोक्तुं' स्वीकर्तुम् [राजपक्षे सगर्भायाः प्राक्परिग्रहनिश्चयाभावात्—भ्रमरपक्षे अन्तस्तुषारसद्भावात्] 'नापि भोक्तुं' [उभयत्र अक्लिष्टकान्तित्वेन लोभात्] 'शक्नोमि' पारयामि । ["चेत्यव्यवस्यन्" (म-)—"वेत्यध्यवस्यन्" (त-, न्या-)—"वेति व्यवस्यन्" (रा-, वि-) ॥ "विभाते" (रा-, वि-, म-)—"निशान्ते" (त-, न्या-) ॥ "न खलु सपदि भोक्तुं नापि शक्नोमि मोक्तुम्" (त-, न्या-)—"न च खलु परिभोक्तुं नैव शक्नोमि हातुम्" (रा-, वि-)—"न खलु च" इत्यादि (म-)] ॥

NOTES

1. विशेषेण—वि + शिष + घञ् कर्मणि = विशेष: that which is singled out, special. तेन। Specially, *i. e.*, severely. Qual. अधिच्छित:। तृतीया करणे। "क्रियाविशेषणानां फलभावनां प्रति करणत्वम्"।

2. (a). एवम्—Thus, in this state, *i. e.*, with child. This is necessary for the comparison with अन्तस्तुषारम्। Raghava explains एवमुपनतम् अयत्नप्राप्तम्। But that the king is thinking of the child in the womb in clear from his reply "कथमिमाम् अभिव्यक्तसत्वलक्षणां...प्रतिपत्स्ये"—(See next page). She has come *thus* (एवम्, *i. e.*, सगर्भा) hence the supreme necessity of deciding प्रथमपरिगृहीतं स्यान्न वा। If प्रथमपरिगृहीतम्, there can be no question that I own her. If *not* (न) I become a क्षेत्रिय by accepting hor (See next page). This difficulty would not have appeared and I could have accepted her if she were not एवम् उपनतम्। (b). अध्यवस्यन्—वि + अव + सो + शतृ = व्यवस्यन् making up the mind, *i.e.*, deciding. न व्यवस्यन्।

3. (a). विभाते—In the morning. That is the only time when अन्तस्तुषारकुन्द can be found. Also, later in the day, कुन्द becomes क्लिष्टकान्ति by the sun. (b). अन्तस्तुषारम्—अन्त: मध्ये तुषारो यस्य तत् having dew inside. बहु—। Or अन्तर्गत: तुषारो यस्य। तत्। कुन्द referring to the *flower* (प्रसव) is neuter. (c). भोक्तुम्—Cannot enjoy because there is dew in the कुन्द and foetus in the रूप। (f). मोक्तुम्—cannot abandon because of the अक्लिष्टकान्तित्व।

4. *Remark*—(a). With the reading व्यवस्यन् explain इति व्यवस्यन् विचारयन्—Thus deliberating. (b). "न च खलु परिभोक्तुं, नैव शक्नोमि हातुम्" has च, खलु, एव which are not easily explained.

प्रतीहारी (स्वगतम्)—अहो धम्मावेक्खिदा भट्टिणो। ईदिसं णाम सुहोवणदं रूवं देक्खिअ को अण्णो विआरेदि [अहो धर्मावेक्षिता भर्तु:। ईदृशं नाम सुखोपनतं रूपं दृष्ट्वा क: अन्यो विचारयति]।

WARDER (*Aside*)—Oh! our lord's regard for virtue! Who else indeed hesitates having noticed such beauty easily arrived?

शार्ङ्गरवः—भो राजन्, किमिति जोषमास्यते ।

SARNGARAVA—O King, why are you keeping silent thus ?

राजा—भोस्तपोधनाः, चिन्तयन्नपि न खलु स्वीकरणमत्र-भवत्याः स्मरामि । तत् कथमिमामभिव्यक्तसत्त्वलक्षणां प्रत्यात्मानं क्षेत्रियमाशङ्कमानः प्रतिपत्स्ये ।

KING—O sages, even though searching my memory, I do not recollect the wedding of this lady. How then can I accept her suspecting myself to be an adulterer as she bears manifest signs of being with child ?

प्रतिहारीति । 'अलम्' आश्चर्यं । 'धर्ममवेक्षते' पाल्यत्वेन अनुसरति इति 'धर्मावेक्षी' तस्य भावः, धर्मपरत्वम् इत्यर्थः । 'ईदृशं सुखेन' अनायासेन 'उपनतं' प्राप्तं 'रूपं दृष्ट्वा को नाम अन्यः' कः खलु अपरः 'विचारयति' । यः कश्चिदन्यः पूर्वमूढमनूढं वा इत्यविचारयन्नेव आददीत ।

शार्ङ्गरव इति । 'किमिति' कथं 'जोषं' तूष्णीम् [अव्ययम् । "तूष्णीमर्थे सुखे जोषम्" इत्यमरः] 'आस्यते' स्थीयते भवता ।

राजेति । "चिन्तयन्नपि' बहु ध्यायन्नपि 'अत्रभवत्याः स्वीकरणम्' उपयमनं 'न स्मरामि' । 'तत् अभिव्यक्त'' प्रकटं 'सत्त्वलक्षणं' गर्भचिह्नं 'यस्याः तथाविधाम्' अतएव परपरिगृहीतां 'प्रति' [इत्थम्भूताख्याने कर्मप्रवचनीयत्वाद्द्वितीया] 'आत्मानं' मां 'क्षेत्रियं' परदारप्रसक्तम् ["क्षेत्रियच् परक्षेत्रे चिकित्स्यः" इति घच् प्रत्ययः परशब्दलोपश्च निपात्यते] 'आशङ्कमानः' मन्यमानः 'कथमिमां प्रतिपत्स्ये' ग्रहीष्यामि । मया ऊढा इति नास्ति निश्चयः, अथ च गर्भिणीयम् । एवमस्या ग्रहणे परस्त्रीस्पर्शशङ्का अस्ति, अतो न गृह्णामि इत्यर्थः । ["क्षेत्रियम्" (पि-)—"क्षैत्रिणम्" (रा-, वि-, म-)—"अक्षत्रियम्" (त-, न्या-) ॥ "आशङ्कमानः" (रा-, वि-, म-)—"मन्यमानः" (त-, न्या-)] ॥

NOTES

1. **(a). चिन्तयन्नपि...स्मरामि—So she is not my wife. (b). अभि-**

व्यक्तसत्त्वलक्षणा—And as she is *enciente*, she is another's wife. Had she not been with child, I could have assumed her to be a maiden, and accepted her even though the story of marriage seemed suspicious. But now it is a different thing. (c). क्षेत्रियम् = क्षेत्र is कलत्र wife. "क्षेत्रं कलत्रे केदारे" इति कोष:। परस्य क्षेत्रं परक्षेत्रम् another's wife. तत्र चिकित्स्य: दण्डादिना निग्रहीतव्य इति परक्षेत्र + घच् = क्षेत्रिय: One deserving chastisement in the matter of another's wife. The word पर disappears by निपातन। "घच् प्रत्यय: परशब्दलोपश्च निपात्यते"—*Vritti.*

2. *Reading*—क्षेत्रिय is the Bengali reading as given by Pischel. The Devanagari reading is क्षेत्रिणम् though Raghava recognises the variant क्षेत्रियम्। Raghava's explanation of क्षेत्रिणम् is "क्षेत्रं पत्नी यस्य तं क्षेत्रिणम्। 'क्षेत्रं पत्नी शरीरयो:' इत्यमर:। यत इयं गर्भिणी, मया चेदधुना प्रतिगृह्येत, अहं क्षेत्री स्यां न तु बीजी। अत: तज्जातापत्यं न औरसम् अपि तु क्षेत्रजम्। तच्च औरसात् हीनम् इति शङ्का"। The reasoning is not worthy of Dushyanta. It supposes शकुन्तला to be his wife, seeking recognition after having publicly come with a child in the womb by another person, and Dushyanta hesitating whether to accept her or not !! The poet who wrote Sita's exile could not have penned this line. Besides, in the first part of the speech the king openly *repudiates marriage.* The idea of becoming a क्षेत्रिन् cannot therefore occur to him. There now remains the other alternative, viz, Sakuntala is another's wife, but wants to be accepted by him. क्षेत्रिय suits this case admirably.

शकुन्तला (अपवार्य)—अज्जस्स परिणए एव्व सन्देहो। कुदो दाणिं मे दूराहिरोहिणी आसा [आर्यस्य परिणये एव सन्देह:। कुत इदानीं मे दूराधिरोहिणी आशा]।

SAKUNTALA (*Aside*)—Even in the marriage the noble sir has his doubts. Where now is my high-soaring hope?

शार्ङ्गरव—मा तावत्।

कृताभिमर्शामनुमन्यमानः सुतां त्वया नाम मुनिर्विमान्यः।
मुष्टं प्रतिग्राहयता स्वमर्थं पात्रीकृतो दस्युरिवासि येन ॥

SARNGARAVA—Indeed don't do so. Approving the daughter unto whom dishonour was done (*i. e.*, approving the dishonour done unto his daughter) the sage really deserves to be insulted —the sage by whom, urging to accept his own property that was stolen, you are, like a robber, converted into a worthy recipient.

शकुन्तलेति। 'आर्य्यस्य' मान्यस्य अस्य 'परिणये एव सन्देहः'। [अतएव 'आर्य्यस्य' इत्याह न च 'आर्य्यपुत्रस्य' इति]। 'दूरम्' अत्युच्चम् 'अधिरोहति' या तादृशी 'मे आशा' भर्त्तुर्गृहिणी भविष्यामि, चक्रवर्त्तिनं पुत्रं निवेश्य अनेन सह वनं प्रत्यागमिष्यामि, इत्येवंविधा 'कुतः' कुत्र गता।

शार्ङ्गरव इति। 'मा तावत्' प्रतिपद्यस्व। इयमप्रतिपत्तिः सदृशी एव ते। अन्वयः—कृताभिमर्शां सुतामनुमन्यमानो मुनिः त्वया विमान्यो नाम, येन मुष्टं स्वमर्थं प्रतिग्राहयता दस्युरिव पात्रीकृतोऽसि। व्याख्या—'कृतः अभिमर्शः' आमर्शनं धर्षणमित्यर्थः यस्याः तादृशीं 'सुतां' शकुन्तलाम् [सुतामिति कोपकारणोपन्यासः] 'अनुमन्यमानः' अनुमोदमानः, कृतं सुताभिमर्शमनुमन्यमान इत्यर्थः 'मुनिः' कण्वः, महत्यपि कोपकारणे न केवलमकुप्यन्, अपि च तदेव कोपस्थानं प्रशंसन् अतिसदुरसौ 'त्वया' धृष्टेन 'विमान्यो नाम' अवज्ञेय एव। 'येन' मुनिना 'मुष्टं' चोरितं 'स्वं' निजम् 'अर्थं' वित्तं कन्यारूपं 'प्रतिग्राहयता' प्रतिग्राह्यत्वेन स्वीकार्य्यत्वेन बोधयता सता 'दस्युरिव' चौर इव त्वम् अपात्रं पात्रं सम्पद्यमानः कृतः 'असि'। यद्यधुना शकुन्तलां प्रतिपद्य मुनिं सम्भावयास तदा "सदुर्भवत्यवज्ञातः" इति शास्त्रं मिथ्या भवति। तन्मा तावत् प्रतिपद्यस्व इत्यतिवक्रा कोपकलुषोक्तिः। ["अभिमर्शाम्" (म-)—"अभिमर्षाम्" (रा-, वि)—"अवमर्षाम्" (त-, न्या-)] ॥

NOTES

1. (a). आर्य्यस्य—She does not say आर्य्यपुत्रस्य because the

marriage is doubted. (b). कुतः—किम् + सप्तम्यास्तम् स्वार्थे। आद्यादिः। (c). दूराधिरोहिणी—दूर + अधि + रुह + णिनि कर्त्तरि साधुकारिणि।

2. मा तावत्—This is in answer to the king's "कथं प्रतिपत्स्ये" (How can I accept ?) above. Forsooth (तावत्) don't (मा) accept. This looks like approval. But it is ironical, and is really a strong condemnation of the king's non-acceptance. The irony continues throughout the verse following. See Tika on the verse.

3. (a). कृताभिमर्शाम्—अभि + मृश + घञ् भावे = अभिमर्शः outrage. *c. f.* "पराभिमर्शो न तवास्ति"—*Kumara.* Now see *Tika.* Avoid अभिमर्ष with a cerebral. (b). नाम—Implies अभ्युपगम approval. "नाम प्राकाश्यसम्भाव्यक्रोधाभ्युपगमेषु च" इति विश्वः। The "approval" is ironical, and becomes *disapproval* here. (c). विमान्यः—वि + मान + णिच् + यत् कर्मणि deserving insult. त्वया विमान्यो नाम is exactly like युक्तं नाम ते later on. त्वया (by *thee*) is significant. This is just like *you* (त्वया)। By so doing you have proved yourself true to your character (धृष्ट as you are).

4. (a). प्रतिग्राहयता—त्वं मुष्टं प्रतिगृह्णासि = मुनिः त्वां or त्वया मुष्टं प्रतिग्राहयति। The अणिकर्त्ता takes तृतीया because ग्राहि is not included in the rule "गतिबुद्धिप्रत्यवसानार्थ—"। Or अणिकर्त्ता as कर्म takes द्वितीया supposing ग्राहि to mean "बोधन" (बुद्ध्यर्थ)। (b). येन does not require the mention of तच्छब्द। "उत्तरवाक्यगतत्वेनोपादानात् तच्छब्दस्य आर्थत्वम्"।

5. *Remark*—This is ironical. "You are a robber; you have stolen the sage's property. He takes no offence; but on the contrary makes you a present of it. He deserves contempt, and you have served him right by refusing to accept his gift."

शारद्वतः—शार्ङ्गरव, विरम त्वमिदानीम्। शकुन्तले, वक्तव्यमुक्तमस्माभिः। सोऽयमत्रभवानेवमाह। दीयतामस्मै प्रत्ययप्रतिवचनम्।

SARADVATA—Sarngarava, do you stop now. Sakuntala,

what we had to say, has been said by us. This his respected self, here, says thus. Give him a reply of recognition.

शकुन्तला (अपवार्य्य)—इमं अवत्थन्तरं गदे तारिसे अणुराए किंवा सुमराविदेण। अत्ता दाणिं मे सोहणीओ त्ति ववसिदं एदं [इदमवस्थान्तरं गते तादृशेऽनुरागे किं वा स्मारितेन। आत्मा इदानीं मे शोधनीय इति व्यवसितमेतत्]। (प्रकाशम्) अज्जउत्त—[आर्य्यपुत्र—] (अर्द्धोक्ते) संसइदे परिणए ण एसो समुदाआरो। पोरव, जुत्तं णाम दे तह पुरा अस्समपदे सहावुत्ताणहिअअं इमं जणं समअपुव्वं पदारिअ ईदिसेहिं अक्खरेहिं पच्चाक्खादुं [संशयिते परिणये न एष समुदाचारः। पौरव, युक्तं नाम ते तथा पुरा आश्रमपदे स्वभावोत्तानहृदयम् इमं जनं समयपूर्वं प्रतार्य्य ईदृशैरक्षरैः प्रत्याख्यातुम्]।

SAKUNTALA (*Aside*)—Such a love having reached so different a state, what possibly (can be gained) by reminding? The attempt is made because my own self has to be cleared. (*Aloud*) My husband—(*Having half uttered*) Marriage being doubted, this is not the proper form. Paurava, it is (*Or*—is it) indeed proper for you, after having previously deceived this naturally open-hearted person with oaths in the hermitage, to disown her with such words.

शारद्वत इति। 'विरम' निवृत्तो भव, नातः परं ते वक्तव्यमस्ति ["व्याङ्परिभ्यो रमः" इति परस्मैपदम्]। 'वक्तव्य'' यत् काण्वेन वक्तुम् उपदिष्टा वयं तत्। 'सः' अस्मद्वचनविषयः 'अयमत्र भवान्' मान्यो राजा 'एवमाह' अस्मदुक्तौ विप्रतिपन्नः परिणयमेव अपलपति। 'प्रत्युत्तरं' प्रत्यभिज्ञासाधनं 'प्रतिवचनं' प्रत्युत्तरम् 'अस्मै दीयताम्'।

शकुन्तलेति। 'तादृशे' अतिशयिते 'अनुरागे इदम्' एतत् 'अवस्थान्तरं' अन्याम-वस्थां, रूपविपर्य्ययम् [अन्तरशब्दो भिन्नवाची। नित्यसमासो मयूरव्यंसकादित्वादन्तर-शब्दस्य च परनिपातः] 'गते' प्राप्ते सति 'स्मारितेन' स्मारणेन [भावे क्तः] 'वा किम्' न किमपि फलम्। तथापि 'इदानीम् आत्मा' निजस्वरूपं 'मे शोधनीयः' कलङ्कात् मोचनीय 'इति' हेतोः 'एतत् व्यवसितम्' आरब्धं मया, एष मे उद्यमः। 'आर्य्यपुत्र' इति परिणेतुरेव सम्बोधनम्। 'परिणये संशयिते' जातसन्देहे सति ["तदस्य सञ्जातम् —" इति इतच्] 'एष समुदाचारः' सम्यगाचारः 'न' न हि युक्तमेतत् सम्बोधनम्। 'पुरा' पूर्वम् 'आश्रमपदे स्वभावेन' प्रकृत्या 'उत्तानम्' अगभीरम् अकपटमित्यर्थः 'हृदयं' यस्य तथाविधं निसर्गसरलाशयम् 'इमं जनं' मद्रूपं 'समयपूर्वकं' शपथैः ["समयः शपथाचारकालसिद्धान्तसंविदः" इत्यमरः] 'तथा प्रतार्य्य' वञ्चयित्वा अधुना 'ईदृशैः अक्षरैः' विश्रृतिन्याजवचनैः 'प्रत्याख्यातुं' निराकर्त्तुम् [अर्हार्थोपपदे तुमुन्] 'युक्तं नाम' युक्तमेव। यद्वा—'युक्तं नाम' युक्तं किम्? प्रतारको व्याजमवलम्ब्य प्रत्याचक्षीत इत्येव युज्यते। ["शोधनीयः" (त-, न्या-)—"शोचनीयः" (रा-, म-)—"मोचनीयः" (वि-) ॥ "युक्तम्" (त-, वि-, न्या-)—"न युक्तम्" (रा-, म-)]॥

NOTES

1. (a). अस्मै—सम्प्रदाने चतुर्थी as in "खण्डिकोपाध्यायस्तस्मै चपेटां ददाति"—*Bhashyam.* (b). प्रत्यय &c.—शाकपार्थिवादि। See *Tika.*

2. (a). इदम्—Implies the immensity of the change. (b). तादृशे—Refers to the intensity of the love.

3. शोधनीयः &c.—The treatment is so mean that it is beneath my dignity to take any notice of it at all. But a slur is cast on my character, and I condescend to say some thing in reply (प्रत्ययप्रतिवचनम्) only to clear my own self, not because I now care for the acceptance of me by such a wretch.

4. युक्तं नाम &c.—An irony exactly like Sarngarava's कृताभिमर्शाम् &c.—*Ante.* She means this—' You are a deceiver. Your professions of love were false. I was a simpleton to be taken

in. The disclaimer now is quite in keeping with (युक्तं नाम) the previous duplicity. Your apprehension of my being another's wife is a myth.

राजा (कर्णौ पिधाय)—शान्तं पापम् ।
व्यपदेशमाविलयितुं किमीहसे जनमिमञ्च पातयितुम् ।
कूलङ्कषेव सिन्धुः प्रसन्नमम्भस्तटतरुञ्च ॥

KING (*Covering his ears*)—Let sin stop. Why dost thou seek to sully your family and degrade this person too, as a stream, that rends its banks, does of her pure water and of the tree on the bank ?

शकुन्तला—होदु, जइ परमत्थदो परपरिग्गहसङ्किणा तुए एव्वं पउत्तं ता अहिण्णाणेण इमिणा तुह आसङ्कं अवणइस्सं [भवतु यदि परमार्थतः परपरिग्रहशङ्किना त्वया एवं प्रवृत्तं तदभिज्ञानेन अनेन तव आशङ्कामपनेष्यामि]।

SAKUNTALA—Well, if really deeming me as another's wife such a course is adopted by you, then I will remove your suspicion with this token of recognition.

राजेति । 'कर्णौ पिधाय' हस्ताभ्यामावृत्य ["वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोः" इति अकारलोपः । पक्षे अपिधाय] । पापश्रवणनिवारणार्थेवम् । [राघवादिभिरपठितमेतत्] । 'पापं' दुष्कृतम्, लक्षणया पापोक्तिः 'शान्तं' निवृत्तं भवतु । मैवं वद इत्यर्थः । अन्वयः—किं, कूलङ्कषा सिन्धुः प्रसन्नमम्भः तटतरुञ्च इव, व्यपदेशमाविलयितुम् इमं जनं पातयितुञ्च ईहसे । व्याख्या—'किं' किमर्थं 'कूलं' तटं 'कषति' भिनत्ति या तादृशी [कूलोपपदात् कषेः खच्] तटप्रपातिनी 'सिन्धुः' नदी 'प्रसन्नम्' अनाविलम् 'अम्भः' प्रवाहं यथा आविलयति 'तटतरुञ्च इव' तीरस्थं वृक्षञ्च यथा पातयति तथा 'व्यपदेशं' कुलम् [करणे घञ्] 'आविलयितुं' कलुषयितुं 'इमं' मद्रूपं 'जनं पातयितुञ्च' धर्मात् पतितं कर्तुंञ्च 'ईहसे' चेष्टसे । पापा इयं चेष्टा शान्ता भवतु । ["किमीहसे

जनमिमञ्च पातयितुम्" (रा-, वि-, म-)—"समीदृशी माञ्च नाम पातयितुम्" (त-, न्या-) ॥ "अम्भ:" (रा-, वि-, म-)—"ओघम्" (त-, न्या-)] ॥

शकुन्तलेति । 'भवतु' अस्तु तावत् प्रतारणा ते नाभिप्रेता । 'यदि परमार्थत:' यथार्थमेव 'परपरिग्रहम्' अन्यकलत्रं 'शङ्कते' यस्तथाविधेन 'त्वया एवं प्रवृत्तम्' भावे क्त:] परदारशङ्कया एव तेऽद्य ईदृशी वृत्तिर्मयि, न च वञ्चनबुद्ध्या 'तत्' तदा 'अनेन' मदङ्गुलिस्थेन 'अभिज्ञानेन' अङ्गुलीयकरूपेण 'तव आशङ्काम् अपनेष्यामि' । ["प्रवृत्तम्" (त-, वि-, न्या-, म-)—"वक्तुं प्रवृत्तम्" (रा-) ॥ "अभिज्ञानेन अनेन" (रा-, म-)—"अभिज्ञानेन केनापि" (त-, न्या-)] ॥

NOTES

1. शान्तम्—शम + णिच् + क्त कर्मणि = शान्तम् or शमितम् ।

2. (a). व्यपदेशम्—व्यपदिश्यते अनेन इति वि + अप + दिश + घञ् करणे = व्यपदेश: designation, race. तम् । (b). आविलयितुम्—आविल is कलुष stained (for कुल) muddy (for अम्भम्) । आविलं कर्त्तुम् इति आविल + णिच् + तुमुन् = आविलि (नामधातु) + तुमुन् = आविलयितुम् to sully. (c). पातयितुम—to degrade (जन), to cause to fall (तट) । (d). कूलङ्कषा—कूल + कष + खच् कर्त्तरि स्त्रियाम् by the rule "सर्वकूलाभ्रकरीषेषु कष:" । (e). अम्भ:—The Beng. Rec reads ओघम् which agrees better with व्यपदेशम्—in the masculine.

3. (a). भवतु—See भवतु अनिर्वचनीयम् &c. *Ante.* Here it means असूयाङ्गीकार reluctant admission, admission for argument's sake.

राजा—उदार: कल्प: ।

KING—A good proposal.

शकुन्तला (मुद्रास्थानं परामृश्य)—हद्धी, हद्धी, अङ्गुलीअअसुण्णा मे अङ्गुली [हा धिक्, हा धिक्, अङ्गुलीयकशून्या मे अङ्गुलि:] । (सविषादं गौतमीमुखमीक्षते) ।

SAKUNTALA (*Feeling at the place of the ring*)—Alas ! Alas ! My finger is void of the ring. (*Sorrowfully stares at Gautami's face*).

गौतमी—णूणं दे सक्कावदारब्भन्तरे सचीतीत्थसलिलं वन्द-माणाए पब्भट्टं अङ्गुलीअअं [नूनं ते शक्रावताराभ्यन्तरे शचीतीर्थसलिलं वन्दमानायाः प्रभ्रष्टमङ्गुलीयकम्]।

GAUTAMI—Your ring must have slipped as you were doing obeisance to the waters af Sachi Tirtha in Sakravatara.

राजा (सस्मितम्)—इदं तत् प्रत्युत्पन्नमति स्त्रैणमिति यदुच्यते।

KING (*Smiling*)—Here it is what is called "Women are ready-witted".

राजेति। 'उदारः कल्पो' मुख्यो न्यायः ["कल्पः स्यात् प्रलये न्याये" इति विश्वः] इति राघवः। यद्वा—'उदारो' महान् उत्तम इत्यर्थः 'कल्पः' सङ्कल्पः। साधुरेष प्रस्तावः, यदभिज्ञानेन शङ्काम् अपनेष्यामि।

शकुन्तलेति। मुद्र्यते अनया इति 'मुद्रा' उत्कीर्णवर्णमङ्गुलीयकम् [करणे अप्रत्ययः स्त्रियाम्]। तस्याः 'स्थानम्' अङ्गुलिमूलं 'परामृश्य' स्पृष्ट्वा। ["गौतमीमुखमीक्षते" (त-, व्या-)—"गौतमीमवेक्षते" (रा-, वि-, म-)]॥

गौतमीति। अवतरणम् 'अवतारः' [प्रायानुवृत्तेरसंज्ञायामपि घञ् भावे]। शक्रस्य अवतारः 'शक्रावतारः' लक्षणया तदुपलक्षितो देशः। तस्य 'अभ्यन्तरे' मध्ये 'शचीतीर्थस्य सलिलं वन्दमानायाः' तव अञ्जलिं ददत्याः [हेतौ शानच्] 'ते अङ्गुलीयकं प्रभ्रष्टं' करात् च्युतम्। अञ्जलिदानं प्रभ्रंशहेतुः।

राजेति। 'स्त्रैणं' स्त्रीसमूहः, स्त्रीजातिरित्यर्थः 'प्रत्युत्पन्ना' तत्क्षणलब्धा 'मतिः' यस्य तथाविधं भवति 'इति यत् उच्यते' पण्डितैरित्यर्थः 'तत् इदम्'। ["तात्कालिकी तु प्रतिभा प्रत्युत्पन्नमतिः स्मृता" इति राघवभट्टधृतसुधाकरवचनम्]। स्त्रीजातिः प्रत्युत्पन्नमतिः इति गौतमीवचनात् प्रत्यक्षं ज्ञायतेऽस्माभिः इति सोल्लुण्ठनोक्तिः।

NOTES

1. (a). स्त्रैणम्—स्त्रीणां समूह इति स्त्री+नञ्=स्त्रैणम् स्त्रीसमूहः, *i. e.*,

स्त्रीजाति: the womankind. (b). इदं तत् &c.—This is an instance of the saying "women are ready-witted." This is a fling at Gautami. By your ready explanation, you furnish an illustration of the saying.

शकुन्तला—एत्थ दाव विहिणा दंसिदं पहुत्तणं। अवरं दे कहिस्सं [अत्र तावद्विधिना दर्शितं प्रभुत्वम्। अपरं ते कथयिष्यामि]।

SAKUNTALA—Verily, predominance has been shown by Fate here. Another (token of recognition) I will relate to you.

राजा—श्रोतव्यमिदानीं संवृत्तम्।

KING—Now has come (the turn of) what is to be *heard.*

शकुन्तला—णं एकस्सिं दिअहे वेदसलदामण्डवे णलिणीपत्तभाअणगदं उअअं तुह हत्थे सण्णिहिदं आसि [ननु एकस्मिन् दिवसे वेतसलतामण्डपे नलिनीपत्रभाजनगतमुदकं तव हस्ते सन्निहितम् आसीत्]।

SAKUNTALA—One day, in the cane-bower, water placed in a cup of lotus-leaf was taken up in your hand.

राजा—शृणुमस्तावत्।

KING—We are listening indeed.

शकुन्तलेति। 'अत्र' अस्मिन् अङ्गुरीयाभिज्ञानप्रदर्शनविषये 'विधिना प्रभुत्वं' बलं 'तावत् दर्शितम्'। विधिर्बलवान् इति एतदभिज्ञानं मे अपगतम्। 'अपरम्' अभिज्ञानं 'ते कथयिष्यामि'।

राजेति। 'इदानीं श्रोतव्यं संवृत्तम्' पूर्वं तु द्रष्टव्यमासीत् अभिज्ञानम्। इत्युपहास:। वस्तुतस्तु सर्वं मिथ्या, नास्त्येव किञ्चिदप्यभिज्ञानम् इति राज्ञोऽभिप्राय:।

शकुन्तलेति। 'ननु' वाक्यारम्भे ["नन्वाक्षेपे परिप्रश्ने प्रत्युक्तावनधारणे। वाक्या-

रभ्यै ऽप्यनुनयामन्त्रणानुज्ञयोरपि ॥" इति हैमः] 'नलिनीपत्रनिर्मितं भाजनं' पात्रं 'गतम्' तवस्थमित्यर्थः 'उदकं तव हस्ते सन्निहितं' सम्यक् निहितम् 'आसीत्'। पानार्थं त्वं हस्ते कृतवान्। ["वेतसलतामण्डपे" (त-, न्या-)—"नवमालिकामण्डपे" (रा-, वि-, म-)]॥

NOTES

1. श्रोतव्यम्—The proof could be *seen* at first ; it is now *to be heard*. Presently it will vanish altogether ! The whole story is false ; hence it can leave no sort of proof behind, द्रष्टव्य or श्रोतव्य।

2. वेतसलता &c.—Refers to the bower (वेतसपरिक्षिप्ते लतामण्डपे) spoken of in Act III. This is the bower where the lovers used to meet. Compare "लतावलय...आमन्त्रये त्वां भूयोऽपि परिभोगाय"—Act III. So reject नवमालिकामण्डपे।

3. श्रुणुमस्तावत्—The king's mind is a perfect blank owing to the शाप। He is naturally surprised at the opening words of the story, and exclaims "Ah ! what a fine story !! We are listening indeed !! How can we not listen ? It is so interesting !!!"

शकुन्तला—तक्खणं सो मे पुत्तकिदओ दीहापङ्गो णाम मिअपोदओ उवट्ठिदो [तत्क्षणं स मे पुत्रकृतको दीर्घापाङ्गो नाम मृगपोतक उपस्थितः]। तुए अअं दाव पढमं पिअदु त्ति अणुअम्पिणा उवच्छन्दिदो उदएण, ण उण दे अपरिचआदो हत्थब्भासं उवगदो [त्वया अयं तावत् प्रथमं पिबतु इत्यनुकम्पिना उपच्छन्दित उदकेन, न पुनस्ते अपरिचयात् हस्ताभ्यासम् उपगतः]। पच्छा तस्सिं एव्व मए गहिदे सलिले णेण किदो पणओ। [पश्चात्तस्मिन्नेव मया गृहीते सलिले अनेन कृतः प्रणयः]। तदा तुमं इत्थं पहसिदोसि सव्वो

सगन्धेसु विस्ससदि दुवे वि तुम्हे आरण्णआ त्ति [तदा त्वमित्थं प्रहसितोऽसि—सर्वः सगन्धेषु विश्वसिति, द्वावपि युवाम् आरण्यकौ इति]।

SAKUNTALA—At that instant, my adopted child, the little fawn named Dirghapanga, approached. (He was) entreated with water by thee pitying and saying "let him drink first", but through unfamiliarity he did not venture near your hand. Afterwards the same water being taken up by me approach was made by him. Then you taunted thus—All confide in relatives, both of you are foresters.

शकुन्तलेति। 'तत्क्षणं' तस्मिन् क्षणे 'मे पुत्रकृतकः' कृत्रिमः पुत्रः [व्याख्यातं प्राक्] 'दीर्घापाङ्गो नाम मृगपोतकः' हरिणशिशुः 'उपस्थितः' तत्रागतः। 'अयं तावत्' एष मृगशिशुरेव 'प्रथमं पिबतु इति' अनेन प्रकारेण 'अनुकम्पिना' दयमानेन 'त्वया उपच्छन्दितः' अभिलाषानुरूपं प्रार्थितः। जलार्थमागतः सः, जलमेव त्वम् अदाः इति छन्दानुवर्त्तनम्। 'अपरिचयात्' परिचयाभावात् अज्ञातत्वात् 'न पुनस्ते हस्ताभ्यासं' हस्तसमीपम् 'उपगतः' प्राप्तः। 'पश्चात्' अनन्तरं 'तस्मिन्नेव सलिले मया गृहीते' सति 'अनेन मृगशिशुना 'प्रणयः' याच्ञा 'कृतः'। 'तदा त्वम् इत्थम्' अनेन प्रकारेण 'प्रहसितोऽसि' प्रहासं कृतवानसि [अकर्मकत्वात् कर्त्तरि क्तः]—'सर्वः सगन्धेषु' समानगन्धेषु [योगविभागात् समानस्य स-भावः] तुल्यसम्बन्धेषु ["गन्धः सम्बन्धलेशयोः" इति हैमः] आत्मीयेषु इत्यर्थः 'विश्वसिति'। 'द्वावपि युवाम् आरण्यकौ' अरण्यसम्बन्धेन तुल्यसम्बन्धौ [शकुन्तलापक्षे "अरण्यान्मनुष्ये" इति वुञ्। मृगपक्षे शैषिके अणि आरण्यः। ततः स्वार्थे अनुकम्पायां वा कन्]। ["द्वावपि युवाम्" (त-, न्या-)—"द्वावप्यत्र" (रा-, वि-, म-)]॥

NOTES

1. (a). तत्क्षणम्—This is कर्म of उपस्थितः though स्था is अकर्मक। "देशकालाध्वगन्तव्याः कर्मसंज्ञा ह्यकर्मणाम्"। (b). उपच्छन्दितः—उपच्छन्दन is प्रार्थना solicitation. Compare "तस्मादुपच्छन्दयति प्रयोज्यं मयि त्वया न प्रतिषेधरौक्ष्यम्'—*Raghu.* (c). प्रहसितः—हस is अकर्मक here. Hence

प्र+हस+क्त कर्त्तरि। (d). सगन्धेषु—गन्ध is सम्बन्ध relation. समानः गन्धः एषाम् इति सगन्धाः equally related, *i. e.*, both related to अरण्य। Here समान becomes स by योगविभाग in the rule "समानस्य छन्दस्यमूर्द्धप्रभृत्युदर्केषु"। "समानस्य इति योगविभागः इष्टप्रसिद्ध्यर्थः क्रियते"—*Vritti.* The commentator *Haradatta* prefers to derive such cases from सह in the sense सदृश and gives अस्वपदविग्रह। Thus, समानः गन्धः अस्य is the वाक्य of a समास between सह and गन्ध giving the forms सहगन्धः and सगन्धः। "समाना जातिरस्य। वोपसर्जनस्य इति सभावः। समानशब्दस्य तु समानजातीय इत्यादि भवति। योगविभागे तु तस्य नित्यत्वात्, नैतत् सिध्यति। अतएव भाष्यवार्त्तिकयोर्योगविभागस्य नोपन्यासः"—*Padamanjari.* (e). आरण्यकौ—अरण्यस्य अयं जनः इति अरण्य+वुञ्=आरण्यकः refers to शकुन्तला। Also अरण्यस्य अयं मृगः इति अरण्य+अण्=आरण्यः। स एव इति आरण्य+कन् स्वार्थे=आरण्यकः (See Tika). आरण्यकश्च आरण्यकश्च आरण्यकौ two souls (जनौ) belonging to the forest. एकशेषः। विधेय of जनौ understood.

2. *Reading.* युवाम्—स च त्वञ्च युवाम् you two. Qualifies जनौ understood. The Dev-Nag. reading अत्र avoids a grammatical difficulty. The reference being to मृग and शकुन्तला the common attributives should be in the neuter (सामान्ये नपुंसकम्) giving द्वे and आरण्यके। But युवाम् has the merit of referring pointedly to शकुन्तला at whom the joke is directed. The grammar is safe too if जनौ be understood. With अत्र (here, or in this matter) also we require जनौ।

राजा—एवमादिभिरात्मकार्य्यनिर्वर्त्तिनीनां मधुराभिरनृतवाग्भिराकृष्यन्ते विषयिणः।

KING—By such sweet false words of women bent upon achieving their own end, are sensual people attracted.

गौतमी—महाभाअ, णारिहसि एव्वं मन्तिदुं। तवोवणसंवड्ढिदो अणभिण्णो अअं जणो कइदवस्स [महाभाग, नार्हसि

एवं मन्त्रयितुम्। तपोवनसंवर्द्धितः अनभिज्ञः अयं जनः कैतवस्य]।

GAUTAMI—Great Sir, it behoves not thee to say so. Reared in a hermitage, this person is ignorant of deceit.

राजा—तापसवृद्धे,

स्त्रीणामशिक्षितपटुत्वममानुषीणां
सन्दृश्यते किमुत याः प्रतिबोधवत्यः।
प्रागन्तरिक्षगमनात् स्वमपत्यजातम्
अन्यैर्द्विजैः परभृताः किल पोषयन्ति ॥

KING—Pious Matron, untaught skill is seen (even) of females other than human, what then of those that possess knowledge. The female cuckoo is known to get her offspring reared by other birds before flight in the air.

राजेति। 'आत्मकार्य्यं' स्वकार्य्यम् अवश्यं 'निर्वर्त्तयन्ति' साधयन्ति यास्तासाम् [आवश्यके णिनिः]। 'एवमादिभिः' ईदृशीभिः 'मधुराभिः अनृतवाग्भिः' मिथ्यावचनैः 'विषयिणः' इन्द्रियपरायणा जना 'आकृष्यन्ते' विमार्गं नीयन्ते। ["मधुराभिरनृतवाग्भिः" (त-, न्या-)—"अनृतमयवाङ्मधुभिः" (रा-, वि-, म-)] ॥

गौतमीति। 'तपोवने संवर्द्धितः अयं' शकुन्तलारूपः 'जनः' 'कैतवस्य' वञ्चनाया 'अनभिज्ञः'।

राजेति। वृद्धा तापसी 'तापसवृद्धा' वृद्धतापसी वा ["कडाराः कर्मधारये" इति विशेषणस्य परनिपातो वा]। तत्सम्बुद्धौ। अन्वयः—अमानुषीणाम् अपि स्त्रीणाम् अशिक्षितपटुत्वम् सन्दृश्यते, याः प्रतिबोधवत्यः किमुत। परभृताः स्वम् अपत्यजातम् अन्तरिक्षगमनात् प्राक् अन्यैः द्विजैः पोषयन्ति किल। व्याख्या—'अमानुषीणां' मानुषव्यतिरिक्तानामपि 'स्त्रीणाम् अशिक्षितेषु' अनुपदिष्टेषु विषयेषु 'पटुत्वं' नैपुण्यम्—यद्वा—'अनुपदिष्टं पटुत्वं सन्दृश्यते' लक्ष्यते। 'याः' स्त्रियः 'प्रतिबोधवत्यः' विवेकवत्यः तासां 'किमुत' किं वक्तव्यम्। 'परैः' काकादिभिः 'भृताः' पुष्टाः 'परभृताः' कोकिलाः 'स्वम्

अपत्यजातम्' अर्भकसमूहम् 'अन्तरीक्षगमनात् प्राक्' [अन्यारादितरर्त्तेदिक्शब्दाञ्चूत्तरपदाजाहियुक्ते इत्यनेन अञ्चूत्तरपदयोगे पञ्चमी] यावदाकाशगमनं न शक्यते तावत् 'अन्यैः' कोकिलाभिन्नैः, 'द्विजैः' पक्षिभिः काकैरित्यर्थः [प्रथममण्डरूपेण ततोऽर्भकरूपेण जन्म, तेन च पक्षिणां द्विजत्वम्]। 'पोषयन्ति किल' वर्द्धयन्त्येव। यद्येवं तर्हि आश्रमवर्द्धितापि इयं कैतवं जानाति इति किमत्र चित्रम्। ["अमानुषीणाम्" (त-, न्या-)—"अमानुषीषु" (रा-, वि-, म-)॥ "किल" (त-, न्या-)—"खलु (रा-, वि-, म-)]॥

NOTES

1 *Reading.*—अनृतमयवाङ्मधुभिः means "honey of speech full of lies." This requires विषयिन् to be taken as भ्रमर। But then आत्मकार्यनिर्वर्त्तिनी remains disjoined. The metaphor becomes faulty. This reading is therefore avoided.

2. (a). अमानुषीणाम्—मनोरपत्यानि जातिः इति मनु+अञ् स्त्रियाम्= मानुष्यः women. The ष comes here by the rule "मनोर्जातावञ्यतौ षुक् च" giving two forms मानुष (अञ्) and मनुष्य (यत्)। न मानुष्यः अमानुष्यः। तासाम्। Qual. स्त्रीणाम्। (b). प्रतिबोधवतः—प्रतिबुध्यते अनेन इति प्रति+बुध+घञ् करणे = प्रतिबोधः intellect. स अस्यासाम् इति प्रतिबोध +मतुप् स्त्रियाम्। Those who are endowed with intellect, *i. e.*, the females of Man.

3. *Reading.* अमानुषीषु will have आधारे सप्तमी। अमानुषीषु मध्ये याः स्त्रियः तासाम् is then the sense. But *all* are स्त्री among the अमानुषी।. Hence the statement is meaningless. अमानुषेषु might do, but अमानुषीषु will *not.* अमानुषीणाम्—qualifying स्त्रीणाम्—is much better.

4. (a). अन्तरिक्ष &c.—The usual form, is अन्तरीक्ष। अन्तः द्यावापृथिव्योर्मध्ये ईक्ष्यते इति अन्तर्+ईक्ष+घञ् कर्मणि=अन्तरीक्षम्। Or अन्तर्मध्ये ऋक्षाणि नक्षत्राणि अस्य इति अन्तर् ऋक्ष = अन्तरिक्षम् (पृषोदरादि)। (b). द्विजैः —द्विर्जाताः इति द्वि+जन+ड कर्त्तरि=द्विजाः birds (see Tika). (c). परभृताः—The word is परभृता in the feminine. (d). किल—ऐतिह्ये such is the story.

5. *Remark*—Here अमानुषी may mean अप्सरस्। द्विज also

means ब्राह्मण। परभृता: is परे: पुरुषै: विषयिभिरित्यर्थ: भृता: पालिता: maintained by others, *i. e.*, गणिका: who are often mistresses of the rich. किल refers to tradition. Thus Sakuntala might take it as a grossly rude reference to her own birth-story. मेनका is अमानुषी and a परभृता। शकुन्तला is her स्वमपत्यम्। On leaving विश्वामित्र and before going back to her celestial abode (प्रागन्तरिक्षगमनात्) she left her अपत्य for पोषण with a द्विज Kanva who was अन्य (विश्वामित्रव्यतिरिक्त), *i. e.*, पर to her. This is the story (किल)। Also, herself a परभृता the mother makes a परभृता of her अपत्य too, might be taken as a broad hint at the suspected unchastity of शकुन्तला।

शकुन्तला (सरोषम्)—अणज्ज, अत्तणो हिअआणुमाणेण पेक्खसि। को दाणिं अण्णो धम्मकञ्चुअप्पवेसिणो तिणच्छण्णकूवोवमस्स तुह अणुकिदिं पड़िवज्जिस्सदि [अनार्य्य, आत्मनो हृदयानुमानेन प्रेक्षसे। क इदानीम् अन्यो धर्मकञ्चुकप्रवेशिनस्तृणच्छन्नकूपोपमस्य तव अनुकृतिं प्रतिपत्स्यते]।

SAKUNTALA (*Angrily*)—Ignoble man, judgest thou by the measure of thy own heart? Who else will undertake to imitate thee, that, wearing the cloak of virtue, resemblest a well covered up with grass.

शकुन्तलेति। हे 'अनार्य्य' आर्य्याचारविवर्जित 'आत्मनो हृदयम् अनु' हृदयानुरूपं यत् 'मानं' मिति: तेन 'प्रेक्षसे' जानासि [ईक्षणमत्र ज्ञानमात्रे]। यथा ते हृदयं तथा सर्वस्य मन्यसे। 'क इदानीमन्य:' त्वद्व्यतिरिक्तो जन: [इदानीमिति वाक्यालङ्कारे] 'धर्मस्य कञ्चुकं' प्रावरणं 'प्रवेष्टु' शीलं यस्य तथाविधस्य, अतएव 'तृणै: छन्न:' छादित: [इड्विकल्प:। अनिट्पक्षे णिलुक्] य: 'कूप:' तेन सह: 'उपमा' तोलनं यस्य तादृशस्य 'तव अनुकृतिम्' अनुकरणं 'प्रतिपत्स्यते' करिष्यति। यथा गभीरोऽपि कूप: तृणैराच्छादितमुख: समतल इव लक्ष्यते, तथा पापात्मा त्वं धर्मकञ्चुकं प्रविष्ट: धार्मिक इव लक्ष्यसे। नाहमीदृशी। किं बहुना, भवानिव शठो द्वितीयो नास्त्येव।

NOTES

1. हृदयानुमानेन—अनुगतं मानम् अनुमानम् similar measure. प्राद्दि-तत्— । हृदयस्य अनुमानं तेन with the standard of your own heart.

राजा (आत्मगतम्)—वनवासादविभ्रमः पुनरत्रभवत्याः कोपो लक्ष्यते । तथाहि—

न तिर्य्यगवलोकितं भवति चक्षुरालोहितं
वचोऽपि परुषाक्षरं न च पदेषु संसज्जते ।
हिमार्त्त इव वेपते सकल एष बिम्बाधरः
स्वभावविनते भ्रुवौ युगपदेव भेदं गते ॥

सन्दिग्धबुद्धिं मां कुर्वन् अकैतव इवास्याः कोपो लक्ष्यते । तथा ह्यनया—

मय्येव विस्मरणदारुणचित्तवृत्तौ
वृत्तं रहः प्रणयमप्रतिपद्यमाने ।
भेदाद्भ्रुवोः कुटिलयोरतिलोहिताक्ष्या
भग्नं शरासनमिवातिरुषा स्मरस्य ॥

(प्रकाशम्) आर्य्ये प्रथितं दुष्यन्तस्य चरितम् । प्रजास्वपीदं न दृश्यते ।

KING (*Aside*)—The anger of this lady seems unfeigned, but through residence in the forest. Thus, there is no side-look; the eyes become deep-red; the speech too has very harsh words, and does not falter in the periods; the whole of this Bimba-like lower lip quivers like one frost-bitten; the eye-brows naturally arched have become crooked even simultaneously. Her anger, making me undecided in mind, seems like unfeigned. Thus it is as if I, in fact, with a terrible attitude of

mind from the loss of recollection, not acknowledging the love that happened in secret, by her, mightily incensed and excessively red in the eyes, Cupid's bow is snapped through the contraction of her bent eye-brows. (*Aloud*) Noble lady, Dushyanta's deeds are public. Such a thing is not seen even among the subjects.

राजेति। 'भवभवत्याः' शकुन्तलायाः 'कोपः वनवासात्' तपोवने स्थितत्वात्, नागरिकवृत्तेरनभिज्ञानात् इत्यर्थः 'अविभ्रमः' विलासवर्जितः, तात्त्विको 'लक्ष्यते'। पापा इयमिति कोपकारणमस्या नास्ति, तथापीयमधुना परमार्थतः कुपितेव यल्लक्ष्यते, तत्र कारणं कृत्रिमकोपः कथमभिनेयस्तदेषा न जानातीति।

अन्वयः—अवलोकितं तिर्यक् न। चक्षुः आलोहितं भवति। वचोऽतिपरुषाक्षरं, पदेषु न संसज्जते च। सकल एव बिम्बाधरः हिमार्त्त इव वेपते। स्वभावविनते भ्रुवौ युगपदेव भेदं गते। व्याख्या—'अवलोकितं' अवलोकनम् दृष्टिः [भावे क्तः] तिरः वक्रम् अञ्चतीति 'तिर्य्यक्' वक्रम् [अञ्चतेः कर्त्तरि क्विन्] 'न'। ऋज्वी मदभिमुखी दृष्टिरस्याः, कृतककोपे तु दृष्टिर्व्यावृत्ता भवति। 'चक्षुः आ' सम्यक् 'लोहितं' रक्तं 'भवति' कृतककोपे नैवं विशदमेव तिष्ठति। 'वचः' मां प्रति प्रयुक्ता वाक् 'अतिपरुषाणि' अतिरूक्षाणि 'अक्षराणि' यस्मिन् तादृशं 'पदेषु' वाक्यघटकेषु शब्देषु 'न संसज्जते च' नापि स्खलितं भवति। मिथ्याकोपे तु रूक्षभाषणे वाक् प्रतिहता भवति। 'सकलः' समग्र 'एष' लोभनीयो 'बिम्बाकारः अधरः' [शाकपार्थिवादिः] 'हिमार्त्तः' शीतपीड़ित 'इव वेपते' कम्पते। कृत्रिमकोपे अधरकम्पो नैव वा भवेत्, कृचित् कोपकर्त्तुः निपुणतया मध्ये वा कोणमात्रे वा स्यात्। 'स्वभावेन' प्रकृत्या 'विनते' वक्रे 'भ्रुवौ युगपदेव' समकालमेव 'भेदं गते' भग्ने। अत्र तु यौगपद्ये कृतककोपात् भेदं सूचयत्येवकारः। एवं तात्त्विकलक्षणलक्षितोऽपि कोपो मिथ्या एव, लक्षणानि तु वनवासात् उपस्थितानि। ["अतिपरुषाक्षरम्" (व्या·)—"अपि परुषाक्षरम्" (त-, पि-)॥ "संसज्जते" (पि-)—"संगच्छते" (त-, व्या-)॥ "सकल एषः" (पि-) —"सकल एव" (त-, व्या-)॥ "स्वभावविनते" (पि-)—"प्रकामविनते" (त-, व्या-)॥ श्लोकोऽयं राघवादिभिरपठितः]।

सन्दिग्धेति। 'मां सन्दिग्धा' संशयिता, अहं वा विस्मृतः इयं वा मिथ्यावादिनी इति जातसंशया 'बुद्धिः' यस्य तथाविधं 'कुर्वन् अस्याः कोपः' अविद्यमानं 'कैतवं' शाठ्यं यस्मिन् तथाविध 'इव लक्ष्यते'। [पूर्वोक्तविरुद्धमेतत्। अकैतवत्वे तव वनवासो हेतुरुक्तः। तदयुक्तः सन्देहः। वस्तुतस्तु इदं वा पूर्वं वा प्रक्षिप्तम्। पूर्वमेव प्रामाणिकं प्रतिभाति।]

अन्वयः—विस्मरणदारुणचित्तवृत्तौ मयि एव रहो वृत्तं प्रणयमप्रतिपद्यमाने, अतिरुषा अतिलोहिताक्ष्या अनया भ्रुवोर्भेदात् स्मरस्य शरासनं भग्नमिव। व्याख्या—'विस्मरणेन' विस्मृत्या स्मृतिलोपात् इत्यर्थः 'दारुणा' अतिकर्कशा 'चित्तवृत्तिः' यस्य तस्मिन् 'मयि एव रहः' विजने 'वृत्तं' निष्पन्नं 'प्रणयं' स्नेहम् 'अप्रतिपद्यमाने' अस्वीकुर्वति अनङ्गीकुर्वति सति 'अतिरुषा' प्रबलेन कोपेन 'अतिलोहिताक्ष्या' आरक्तलोचनया 'अनया भ्रुवोर्भेदात्' भङ्गात्, भेदं विधाय इत्यर्थः [ल्यबलोपे कर्मणि पञ्चमी] 'स्मरस्य शरासनं' धनुः 'भग्नमिव'। मन्ये इयमेव सत्यं वदति अहमेव प्रणयं विस्मृतः। तेन कोपादनया न हि भ्रूयुगम् अपि तु कामस्यैव धनुर्भग्नम्। मन्मथस्य स्नेहस्य जलाञ्जलिर्दत्तः इत्यर्थः। ["मय्येव विस्मरण" (रा-, वि-, म-)—"मय्येवमस्मरण" (त-, न्या-)]॥

प्रकाशमिति। 'प्रकाशं' स्पष्टमाह—'दुष्यन्तस्य चरितं' वृत्तं 'प्रथितं' सर्वत्र प्रकाशं, रहस्यं तव किञ्चिदपि नास्ति। अतस्तृणच्छन्नकूपस्येव तस्य वृत्तिर्न वा इति लोको वदतु मया तव किमुच्यताम्। परन्तु 'इदं' तृणच्छन्नकूपवृत्तं 'प्रजास्वपि' किं पुनः प्रजापालके 'न दृश्यते'। ["प्रजास्वपीदं न दृश्यते" (त-, न्या-)—"तथापीदं न लक्ष्यं" (रा-, वि-, म-)]॥

NOTES

1. *Remark*—This page is very obscure. The second verse plainly states that the king is almost convinced of Sakuntala's innocence and the truth of the story told by her. If so, it is difficult to explain what follows from आर्ये प्रथितम् &c. to दारपरित्यागः।

Again "अकैतव इवास्याः कोपो लक्ष्यते। तथाहि" is a poor paraphrase of "अविस्मृतः पुनरवभवत्याः कोपो लक्ष्यते। तथाहि" with words

repeated exactly in the same order. The same person, with any pretentions as a writer, would not have probably written *both*. Lastly, the plain अस्याः as a substitute for अत्र भवत्याः seems to be a breach of decorum even though आत्मगत। This coupled with the incongruity of the verse, seems to raise grave suspicions about the authenticity of the text, from सन्दिग्धबुद्धिम् to स्मरस्य, notwithstanding that Bhoja quotes the verse मय्येव &c. in the *Kanthabharana*.

On the other hand, note how minutely and faithfully the workings of anger are painted in the first verse, how skilfully the metre is handled, how dignified the diction, and last though not least how happily संसज्जते appears in the आत्मनेपद as is usual with Kalidasa, Vyasa and Valmiki. (It is significant that an attempt has been made to alter संसज्जते into संगच्छते)। *This verse* (न तिर्य्यक् &c.) *cannot be spurious.*

If then सन्दिग्धबुद्धिम्...स्मरस्य be omitted, the passage left has to be explained differently from what appears in the *Tika*. Thus—विभ्रम is हाव or शोभा। "अथ विभ्रमः। शोभायां संशये हावे" इति हैमः। अविभ्रमः un-adorned, *i. e.*, plain, natural, without the softening features which society and etiquette impart. She makes no attempt to control or conceal her anger. This is due to forest-life ; she has not seen society. "पापा इयम्...जानातीति" in the Tika has to be omitted. Also omit "एवं तात्त्विक...उपस्थितानि"। The king believes that she is really offended ; but this does not lend colour to her story. She is angry not because she has been disbelieved, but owing to the unkind remark "स्त्रीणामशिक्षित—"।

शकुन्तला—सुट्ठु दाव अत्त सच्छन्दचारिणी किदम्हि जा अहं इमस्स पुरुवंसप्पच्चएण मुहमहुणो हिअअविसस्स हत्थब्भासं उवगदा [सुष्ठु तावत् अत्र स्वच्छन्दचारिणी कृतास्मि,

या इमस्य पुरुवंशप्रत्ययेन मुखमधोर्हृदयविषस्य हस्ताभ्यास-मुपगता]। (पटान्तेन मुखमावृत्य रोदिति)।

SAKUNTALA—Well am I here represented as a harlot—I, who, through confidence in Puru's line, had got into the clutches of this person with honey in the mouth and poison in the heart. (*Hides her face with her skirt and weeps*).

शार्ङ्गरवः—इत्थमात्मकृतमप्रतिहतं चापलं दहति ।
अतः परीक्ष्य कर्त्तव्यं विशेषात् सङ्गतं रहः ।
अज्ञातहृदयेष्वेवं वैरीभवति सौहृदम् ॥

SARNGARAVA—Thus does unchecked rashness of one's self burn. Hence secret union has to be made after having specially tested (each other). Friendship does thus become enmity in those whose hearts are unknown (to each other).

शकुन्तलेति। 'अत्र' इह देशे 'सुष्ठु' अतिशयेन 'स्वच्छन्देन' आत्ममत्या 'चरति' या तादृशी, यथेच्छविहारिणी 'कृतास्मि' प्रतिपन्ना भवामि 'या अहम्' [उत्तरवाक्यगत-त्वेनोपादानात् न तच्छब्दस्यपेक्षा] 'पुरुवंशे' यः 'प्रत्ययः' विश्वासः तेन 'मुखे मधु' यस्य तादृशस्य 'हृदये विषं' यस्य तादृशस्य च ["सप्तमीविशेषणे—" इति ज्ञापकात् व्यधि-करणपदो बहुव्रीहिः] 'अस्य' जनस्य 'हस्ताभ्यासं' करसमीपम् 'उपगता' प्राप्ता। पौरवोऽयं पापं न कुर्य्यात् इत्येनं गता, सम्प्रति शोच्याहमित्यर्थः। ["हृदयविषस्य" (त-, न्या-)—"हृदयस्थितविषस्य" (रा-, वि-, म-)]॥

'पटस्य' वसनस्य 'अन्तेन' प्रान्तेन 'मुखमावृत्य रोदिति'।

शार्ङ्गेति। 'अप्रतिहतम्' अनियन्त्रितम् 'आत्मकृतं' निजानुष्ठितं 'चापलं' चपलता 'इत्थम्' अनेन प्रकारेण 'दहति' परितापयति। अविमृश्यकारिता त्वया कृता, तत्फल-मधुना भुङ्क्ष्व। अन्वयः—अतः रहः सङ्गतं विशेषात् परीक्ष्य कर्त्तव्यम्। अज्ञात-हृदयेषु सौहृदम् एवं वैरीभवति। व्याख्या—'अतः' अस्मात् हेतोः, यतश्चापलं दहति अतः 'रहः' विजने यत् 'सङ्गतं' समागमः, तत् 'विशेषात्' विशेषाश्रयणेन न तु सामान्य-

दृष्ट्वा [विशेषमवलम्ब्य इति ल्यब्लोपे कर्मणि पञ्चमी] 'परीक्ष्य' विमृश्य 'कर्त्तव्यम्'। अन्यथा अनिष्टमाह—'अज्ञातं हृदयं' मनो येषां तेषु जनेषु सुहृदयस्य भाव: 'सौहृदं' मैत्री [सुहृदयशब्दात् युवाद्यण्। हृद्भाव:। आदिवृद्धि:] 'एवम्' अनेन प्रकारेण शकुन्तलादुष्यन्तगतरीत्या अवैरं वैरं सम्पद्यमानं भवति इति 'वैरीभवति' शत्रुता सम्पद्यते। सामान्यत: पौरवोऽयम् इति न पर्य्याप्तम्, विशेषत आत्मना पुनरयं कीदृश इत्यपि ते चिन्तनीयमासीत् इति भाव:। ["इत्थमात्मकृतम्" (रा-, वि-, म-)—"इत्थम्" (त-, न्या-)॥ "अप्रतिहतम्" (त-, न्या-, म-)—"परिहतम्" (रा-, वि-)]॥

NOTES

1. हृदयविषय—In हृदयस्थितविषय the word स्थित is superfluous. Besides the compound does not harmonise with मुखमधो:।

2. इत्थम् &c.—Raghava reads परिहतम् and explains "आत्मकृतं चापलं कदाचित् दैवानुकूल्येन सम्यक्तया परिणमति (sometimes succeeds by chance), परिहतं केनचित् कटु सत् दहति (but, obstructed, as it usually is, it brings remorse).

3. अत: &c.—Raghava construes "संगतं परीक्ष्य कर्त्तव्यम् (Union should be made after test) ; रह: (संगतम्) विशेषात् (secret union should be after special tests)".

4. (a). एवम्—अनेन प्रकारेण, *i. e.*, as it has become in the case of दुष्यन्त and शकुन्तला। (b). सौहृदम्—See under जननान्तरसौहृदानि।

राजा—अयि भो: किमत्रभवतीप्रत्ययादेवास्मान् संयुत-दोषाक्षरै: क्षिणुथ।

King—O why do you, merely through trust in this lady, goad me with words implying a host of sins.

शार्ङ्गरव: (सासूयम्)—श्रुतं भवद्भिरधरोत्तरम्।

आजन्मन: शाठ्यमशिक्षितो यस्तस्याप्रमाणं वचनं जनस्य।
परातिसन्धानमधीयते यैर्विद्येति ते सन्तु किलाप्तवाच:॥

Sarngarava (*With scorn*)—Did you notice the preposterous suggestion ? The statement of a person, who from birth

has not practised deceit, is no authority ; and of credible testimony, forsooth, be those by whom the cheating of others is studied as a science !

राजेति। 'अत्रभवत्यां' शकुन्तलायां यः 'प्रत्ययः' श्रद्धा, तस्मात् 'एव' तन्मात्रमवलम्ब्य 'किमस्मान् संयुताः' सम्मिलिता 'दोषाः' येषु तैः 'संयुतदोषैः' बहुदोषारोपकैः 'अक्षरैः क्षिणुथ' पीड़यथ। कैतवेन अस्या विश्वासोत्पादनमेको दोषः, ततस्तदपलापो द्वितीयः। द्वयमपि अस्या एव वादप्रामाण्यात् मयि आरोपितम्। अस्या वाद एव आदेयः प्रतिवादो मे हेय इत्युक्तं वः।

शार्ङ्गेति। 'असूयया' दोषोद्घाटनेन सह, सकोपमित्यर्थः। 'अधरम्' अनूर्द्धम् ["अनूर्द्धे हीनेऽधरोऽन्यवत्" इति विश्वः]। 'उत्तरम्' ऊर्ध्वम् ["उत्तरं प्रवणोर्ध्वयोः" इति हैमः]। यदेव अधरं तदेव उत्तरम् 'अधरोत्तरम्' अधःस्थायिनः ऊर्ध्वस्थितिः। ततश्च गौण्यावृत्त्या—विपर्य्यासः। 'अधरोत्तरं' विपर्य्यासः 'श्रुतं' किम् ? इति काकुः।

तदेव स्पष्टयति। अन्वयः—यः आजन्मनः शाठ्यम् अशिक्षितः तस्य जनस्य वचनमप्रमाणम्। यैः परातिसन्धानं विद्येति अधीयते ते किल आप्तवाचः सन्तु। व्याख्या—'यः' शकुन्तलारूपो जनः 'आ जन्मनः' भवात् प्रभृति अद्य यावत् 'शाठ्यं' कैतवम् 'अशिक्षितः' शिक्षितुं न आरब्धवान् [आदिकर्मणि कर्त्तरि क्तः] 'तस्य जनस्य वचनम् अप्रमाणं' प्रमाणं न, प्रत्ययानर्हम् इति राज्ञोक्तं श्रुतं भवद्भिः। 'परेषाम्' अन्येषाम् 'अतिसन्धानं' वञ्चनं 'विद्या इति' मत्वा यैः दुष्यन्तादिभिः 'अधीयते' नियमपूर्वकं गुरुसकाशात् गृह्यते 'ते किल'। किल इत्यरुचौ। 'आप्ता' प्रत्ययिता 'वाक्' येषां तादृशाः प्रत्ययितवचनाः 'सन्तु' इत्यपि च तेनैवोक्तं श्रुतम्। विश्वासयोग्ये अप्रत्ययम्, अविश्वसनीये च प्रत्ययम्, आकाङ्क्षता अनेन अधरोत्तरमुपस्थापितम्।

NOTES

1. संयुत &c.—सम् is एकत्र together. संयुत is सम्मिलित concurrent. Hence it means—A speech that charges me with more than one offence. See Tika. Raghava has सम् सम्यक् thoroughly. "सम्यक् न तु ईषत्, युतः सम्पृक्तः न तु स्पृष्टः"। He makes it mean—A speech directly accusing me with an offence.

2. अधरोत्तरम्—Anything preposterous. See Tika. Or thus —अधर is *low*. उत्तर is *high*. अधरञ्च उत्तरञ्च अधरोत्तरम् or अधरोत्तरे high and low द्वन्द्वः। The एकत्व is optional by the rule "विभाषा वृक्ष मृग तृण धान्य व्यञ्जन पशुशकुन्यश्ववडवपूर्वापराधरोत्तराणाम्"। Here *mark the low* means mark how what ought to be high is now *low*. Similarly *high* becomes noteworthy when what should be low is placed *high*. Hence Sarngarava wants the audience to note how the *undeserving* (दुष्यन्त) appears *deserving* and the *deserving* (शकुन्तला) as *undeserving*.

3. किल—Implies *disapproval*. ते आप्तवाचः किल = That they are truthful is ridiculous. Raghava has सम्भावनायां किल।

राजा—भोः सत्यवादिन्, अभ्युपगतं तावदस्माभिरेवम्। किं पुनरिमामतिसन्धाय लभ्यते।

King—O Truth-teller, all this is indeed admitted by us. But what is gained by deceiving this person?

शार्ङ्गरवः—विनिपातः।

Sarngarava—Down-fall.

राजा—विनिपातः पौरवैः प्रार्थ्यते इति न श्रद्धेयमेतत्।

King—It is not an acceptable statement that down-fall is desired by the Pauravas.

शारद्वतः—शार्ङ्गरव किमुत्तरेण। अनुष्ठितो गुरुनियोगः। प्रतिनिवर्त्तामहे वयम्। (राजानं प्रति)

तदेषा भवतः पत्नी त्यज वैनां गृहाण वा।
उपपन्ना हि दारेषु प्रभुता सर्वतोमुखी॥

गौतमि, गच्छाग्रतः। (प्रस्थिताः)।

Saradvata—Sarngarava, no use replying. The precep-

tor's order is executed. We go back. (*To the King*) Well then—This is your wife. Abandon her or accept. Authority over wives is indeed allowed to be all-embracing. Gautami, go you in front. (*They start*).

राजेति। भवतु भवन्त एव सत्यवादिन: न पुनर्मादृशा: इति 'एवं तावत् अस्माभि: अभ्युपगतं' स्वीकृतम्। किन्तु न हि निष्प्रयोजना लोके काचित् प्रवृत्ति:। ब्रूहि "पुनरिमाम् अतिसन्धाय' वञ्चयित्वा 'किं लभ्यते' किं प्रयोजनं सिध्यति न:।

शार्ङ्गेति। 'विनिपात:' नरके पतनमेतेन लभ्यते।

राजेति। 'विनिपात:' नरके पतनं 'पौरवै:' राजभि: 'प्रार्थ्यते' इष्यते 'इति एतत् न श्रद्धेयं' न आदरणीयम्।

शारद्वत इति। 'उत्तरेण' प्रतिवचनेन किम्। राज्ञा सह वादप्रतिवादेन अलम्। 'गुरो: नियोग:' शासनम् 'अनुष्ठित:' शकुन्तला राजसकाशमानीता। वादाय नादिष्टा वयम्। सम्प्रति 'वयं प्रतिनिवर्त्तामहे' आश्रमं प्रतिगच्छाम:। अन्वय:—तत् एषा भवत: पत्नी। एनां त्यज वा गृहाण वा। हि दारेषु सर्वतोमुखी प्रभुता उपपन्ना। व्याख्या—'तत्' इत्युपसंहारे इति राघवभट्ट:। वितण्डामुपसंहरति। 'एषा' इयं शकुन्तला 'भवत: पत्नी' यथाशास्त्रं परिणीता दारा:। 'एनाम्' [अन्वादेशे एनादेश:] 'त्यज वा' त्यक्तुमिच्छसि चेत् त्यज, 'गृहाण वा' गृहीतुं यदि वाञ्छसि गृहाण। 'हि' यत: 'दारेषु' कलत्रे विषये [दारशब्दो बहुत्वं स्त्रियाम्] 'सर्वत:' सर्वासु दिक्षु 'मुखं' लक्षणया प्रवृत्ति: यस्या: तादृशी सर्वाकारा इत्यर्थ: 'प्रभुता' स्वतन्त्रता 'उपपन्ना' युक्ता। भर्त्तृतन्त्रं पत्न्या ग्रहणमग्रहणञ्च, तत् यथेच्छमस्यां वर्त्तस्व। ["पत्नी" (त-, न्या-)— "कान्ता" (रा-, वि-, म-)॥ "उपपन्ना" (रा-, वि-, म-)—"उपयन्तु:" (त-, न्या-)॥ "सर्वतोमुखी" (रा-, वि-, म-)—"विश्वतोमुखी" (त-, न्या-)]॥

NOTES

1. विनिपात: &c.—"किं लभ्यते" (what is the reward) is the king's query. Sarngarava retorts "विनिपात:". (Ruin is your reward). The king rejoins—As "Ruin" cannot be an object of desire, so "I cheat her with a view to gain ruin" is ridiculous.

2. (a). पत्नी—Duly wedded wife. "पत्युर्नो यज्ञसंयोगे" इति पत्न्‌भावे "ऋन्नेभ्यो ङीप्" इति ङीप्। कान्ता is प्रिया a darling. The epithet is unsuitable here, because the king has not shown any evidence of his affection towards her. (b). दारेषु—दारयन्ति भेदयन्ति भ्रातॄन् इति दृ+णिच्+घञ् कर्त्तरि। घञ् is not available in the कर्तृवाच्य। But this case has been specially provided by the *Varttika* "दार-जारौ कर्त्तरि णिलुक् च"। (c). प्रभुता—The प्रभुता is conferred by the sacrifice performed during marriage. It exists in the case of a पत्नी and not of that of a mere कान्ता।

शकुन्तला—कहं इमिणा किदवेण विप्पलद्धम्हि तुम्हे वि मं परिच्चअह [कथमनेन कितवेन विप्रलब्धास्मि यूयमपि मां परित्यजथ]। (अनुप्रतिष्ठते)।

SAKUNTALA—How is this? I have been cheated by this deceiver and you too forsake me? (*Follows*).

गौतमी (स्थित्वा)—वच्छ सङ्गरव, अणुगच्छदि णो करुण-परिदेविणी सउन्दला। पच्चादेसपरुसे भत्तुणि किं वा मे पुत्तिआ करेदु [वत्स शार्ङ्गरव, अनुगच्छति नः करुणपरिदेविनी शकु-न्तला। प्रत्यादेशपरुषे भर्त्तरि किं वा मे पुत्रिका करोतु]।

GAUTAMI (*stopping*)—My son Sarngarava, Sakuntala is following us with piteous wails. What else could my poor child do, the husband becoming cruel by forsaking her?

शकुन्तलेति। 'अनेन कितवेन' शठेन 'विप्रलब्धा' वञ्चिता 'अस्मि, यूयमपि मां परित्यजथ' इति 'कथम्' एतत्। 'अनुप्रतिष्ठते' पश्चात् गच्छति ["समवप्रविभ्यः स्थः" इत्यात्मनेपदम्]।

गौतमीति। 'स्थित्वा' गमनाद्विरता भूत्वा। 'करुणम्' आर्त्तं यथा तथा 'परि-देवयते' विलपति या तादृशी सती ["विलापः परिदेवनम्" इत्यमरः] 'नः' अस्मान् 'अनुगच्छति'। 'भर्त्तरि प्रत्यादेशेन' निराकरणेन 'परुषे' रूक्षे कठोरे सति इत्यर्थः

'किं वा' अन्यत् 'मे पुत्रिका' अनुकम्पिता दुहिता 'करोतु'। अस्मदनुगमनं विना किमन्यदस्याः शरणम् ? तदस्यै मा कुप्य।

NOTES

1. करुण &c.—करुण + परि + देव + णिनि साधुकारिणि कर्त्तरि।

शार्ङ्गरवः (सरोषं निवृत्य)—किं पुरोभागे, स्वातन्त्र्यमवलम्बसे। (शकुन्तला भीता वेपते)।

SARNGARAVA (*Turning back angrily*)—What ! O wicked one, assumest thou independence ? (*Sakuntala is frightened and trembles*).

शार्ङ्गरवः—शकुन्तले—

यदि यथा वदति क्षितिपस्तथा
त्वमसि किं पितुरुत्कुलया त्वया।
अथ तु वेत्सि शुचि व्रतमात्मनः
पतिकुले तव दास्यमपि क्षमम्॥

तिष्ठ साधयामो वयम्।

SARNGARAVA—Sakuntala, if thou art as the lord of the earth says, what has thy father to do with thee that transgressed the family-tie ? But if thou knowest thy vow as pure, even servitude suits thee in the house of thy husband.

शार्ङ्गेति। आः 'पुरोभागे' दोषैकदृक् ["दोषैकदृक् पुरोभागी" इत्यमरः] दोषमात्रदर्शिनि, गुणविमुखी 'स्वातन्त्र्यं' स्वेच्छाचारम् 'अवलम्बसे किम्' इति काकुः। पुनः पुनर्दोषमेव त्वं भजसे। पूर्वं बन्धुजनमनावेद्य इमं गता इत्येको दोषः, अधुना च स्वीभूत्वा कामचारं प्रवर्त्तसे इति द्वितीयः। 'वेपते' कम्पते। अन्वयः—क्षितिपो यथा वदति यदि त्वं तथा असि, उत्कुलया त्वया पितुः किम् ? अथ तु आत्मनो व्रतं शुचि वेत्सि, पतिकुले दास्यमपि तव क्षमम्। व्याख्या—'क्षितिपो' भूपतिर्दुष्यन्तः 'यथा

वदति' यादृशं भाषते 'यदि त्वं तथा' तादृशी 'असि' यदि त्वं तत्तत एव अनूढा समभां, तदा 'उत्क्रान्ता कुलं' या तथाविधया [प्रादितत्पुरुषः] कुलटया 'त्वया पितुः' कण्वस्य 'किं' प्रयोजनं सिध्येत्, न किमपि। तत् प्रत्यावर्त्तनमयुक्तम्। 'अथ तु' पक्षान्तरे यदि 'आत्मनो व्रतं' स्वधर्मं, पातिव्रत्यमित्यर्थः 'शुचि' अनघम् अस्खलितं 'वेत्सि' मनसा जानासि तदा 'पतिकुले' भर्त्तृगृहे 'दास्यमपि' दासीभावोऽपि 'तव क्षमम्' उचितम्। ततश्च अयुक्तं प्रतिगमनम्। एवं पक्षद्वयेऽपि प्रतिप्रयाणे अयुक्ते सति 'तिष्ठ' इहैव आस्व 'वयं साधयामो' गच्छामः ["प्रायेण ण्यन्तकः साधिर्गमेः स्थाने प्रयुज्यते" इति दर्पणः]।

NOTES

1. (a). पुरोभागी—पुरस् is पूर्व first. In a search after दोष and गुण in this world, we meet with दोष almost at very step. So few are the instances of गुण, that these are found out *last*, after those of दोष have been singled out. Thus दोष is पूर्व and गुण is पर। Hence पुरः पूर्वः दोषपक्ष इत्यर्थः भागो यस्याः सा पुरोभागा one who always chooses the *first* (*i. e.,* दोष)। तत्सम्बुद्धौ। (b). स्वातन्त्र्यम्—तन्त्र is प्रधान prominent. "तन्त्रं प्रधाने सिद्धान्ते सूत्रवाये परिच्छदे" इत्यमरः। स्वः आत्मा तन्त्रं प्रधानं यस्य तत् स्वतन्त्रम्। तस्य भावः। "न स्त्री स्वातन्त्र्यमर्हति" इति मनुः।

2. (a). उत्कुलया—उत्क्रान्ता कुलम् or उत्क्रान्ता कुलात्। प्रादितत्—। (b). *Remarks*—(1) Two alternatives occur—(i) What the king says is true, (ii) You are speaking the truth. In the first case, *you must not go back to your father*, wherever else you like you may go. In the second case, *you must not leave the hearth of your husband.* In either case *it is useless to follow us.* (2) In the first half we have क्षितिपः instead of पतिः and in the second half पतिकुले occurs and not क्षितिपकुले। This is as it should be. The first half assumes the truth of the king's statement, so he cannot be referred to as the पतिः of Sakuntala. The second half assumes that Sakuntala is speaking the truth; hence the क्षितिपकुल becomes her पतिकुल।

राजा—भोस्तपस्विन्, किमत्रभवतीं विप्रलभसे ।
कुमुदान्येव शशाङ्कः सविता बोधयति पङ्कजान्येव ।
वशिनां हि परपरिग्रहसंश्लेषपराङ्मुखी वृत्तिः ॥

KING—O hermit, why do you delude this lady ? The moon opens lilies only, the sun lotuses alone ; the disposition of the self-restrained is indeed averse to contact with another's wife.

शार्ङ्गरवः—राजन्, अथ पूर्ववृत्तं व्यासङ्गाद्विस्मृतं भवेत् तदा कथमधर्मभीरोर्दारपरित्यागः ।

SARNGARAVA—King, if it be that] what happened before is now forgotten through diverted attention, then apprehensive of sin as thou art, how is this renunciation of wife.

राजेति । 'किं' किमर्थं 'विप्रलभसे' छलयसि । अन्वयः—शशाङ्कः कुमुदान्येव, सविता पङ्कजान्येव बोधयति । वशिनां वृत्तिः परपरिग्रहसंश्लेषपराङ्मुखी हि । व्याख्या —'शशाङ्कः' चन्द्रः 'कुमुदान्येव' न पुनः पङ्कजानि, 'सविता' सूर्य्यः 'पङ्कजान्येव' पद्मान्येव न तु कुमुदानि 'बोधयति' विकाशयति । दृष्टान्ताभ्यां जानीहि 'वशिनां' जितेन्द्रियाणां 'वृत्तिः' व्यापारः 'परेषाम्' अन्येषां 'परिग्रहाः' भार्य्याः ["पत्नीपरिजनादानमूलशापाः परिग्रहाः" इत्यमरः] तासां 'संश्लेषः' संस्पर्शः [कर्त्तरि कर्मणि वा कृद्योगे षष्ठी] तत्र 'पराङ्मुखी हि' अलसा एव । वशिषु मामपि गणय, तन्नाहमेनां युष्माभिरत्र त्यक्तामपि गृहीत्वा अधर्मं चरिष्यामि ।

शार्ङ्गेति । 'अथ' पक्षान्तरे 'पूर्वम्' इतः पूर्वम् आश्रमे यत् 'वृत्तं' जातं तत् 'व्यासङ्गात्' विषयान्तरव्यापृतत्वात् 'विस्मृतं' त्वया इति यदि 'भवेत्' तदा 'अधर्मभीरोः' तव सम्प्रति शकुन्तलायाः प्रत्यादेशात् 'दारपरित्यागः' प्राप्तः । एतत् 'कथं' कीदृशं कथय । अत्र यदत्र वृत्तं तत्र भवान् मन्यते "उत्कुला शकुन्तला" इति, एषा च मन्यते "कितवो भवान्" इति । परन्तु "ऊढ़ा शकुन्तला पूर्वं व्यासङ्गाद्विस्मृताऽधुना" इति

तृतीयोऽपि पक्षः सम्भवति। यदि स एव तात्त्विकस्तृतीयः पक्षः, तदा सम्प्रति दारत्यागेन धर्मात् च्युतोऽसि इति शार्ङ्गरवानुयोगतात्पर्य्यम्।

NOTES

1. (a). परपरिग्रह &c.—Raghava takes सम् with पराङ्मुख। Thus सम्यक् स्वपराङ्मुखी संस्वपराङ्मुखी। (b). The अलङ्कार is अर्थान्तरन्यास, The general statement "वशिनां हि &c."—is supported (साधन) by specific instances कुमुदान्येव &c. and सविता &c. Lastly the general statement "वशिनां हि &c." is applied to his own case by implication.

2. राजन् &c.—Sarngarava suggests that it is possible that Sakuntala was indeed married by the king; but the king has now forgotten all about the marriage. In that case, the repudiation becomes a sin. This places the king in a fix and he refers to the Purohita in bewilderment.

राजा—भवन्तमेवात्र गुरुलाघवं पृच्छामि।
मूढः स्यामहमेषा वा वदेन्मिथ्येति संशये।
दारत्यागी भवाम्याहो परस्त्रीस्पर्शपांशुलः॥

KING—In this matter, to you I ask the greatness and lightness. Might I be dazed, or could this lady be telling a lie—such being the doubt, am I to be the renouncer of my wife or the sinner through the touch of another's wife?

पुरोहितः (विचार्य्य) –यदि तावत् एवं क्रियताम्।

PRIEST—(*Reflecting*) Well, let it be managed thus.

राजा—अनुशास्तु मां भवान्।

KING—Let your reverence command me.

पुरोहितः—अत्रभवती तावदाप्रसवादस्मद्गृहे तिष्ठतु।

PRIEST—Let her ladyship stay in our house until delivery.

राजा—कुत इदम् ।

KING—Why this ?

राजेति । पुरोहितं प्रत्येतत् । 'अत्र' अस्मिन् विषये 'भवन्तमेव' गुरु च लघु च 'गुरुलघु' ["विप्रतिषिद्धञ्चानधिकरणवाचि" इति एकत्वविकल्पः] गुरुलघुनो भावः 'गुरुलाघवम्' [पूर्वपदवृद्धौ प्राप्तायां भाष्यप्रयोगप्रामाण्यात् उत्तरपदवृद्धिः] को वा गुरुः को वा लघुः पक्षः इति 'पृच्छामि'। पक्षद्वयमाह—अन्वयः—"अहं मूढः स्याम्" वा "एषा मिथ्या वदेत्" इति संशये, दारत्यागी भवामि, आहो परस्त्रीस्पर्शपांशुलो भवामि। व्याख्या— अहं मूढः' पूर्ववृत्तस्मरणमन्थरः 'स्याम् वा' अथवा 'एषा' शकुन्तला 'मिथ्या वदेत्' [संप्रश्न लिङ्] 'इति' एवंविधे 'संशये' संप्रश्ने जाते, निजमूढत्वे एनां ताम्रा 'दारत्यागी भवामि, आहो' अथवा अस्या मिथ्यावादित्वे एनां गृहीत्वा 'परस्त्रीस्पर्शेन पांशुलः' कलङ्की भवामि इत्यत्र निर्णयं भवान् वदतु ।

पुरोहितेति । 'यदि तावत्' । तावदिति वाक्यालङ्कारे । 'एवं क्रियतां इत्थं विधीयताम् ।

राजेति । 'भवान् माम् अनुशास्तु' कर्त्तव्यम् उपदिशतु ।

पुरोहित इति । 'अत्रभवती तावत्' । तावदितऽवधारणे । 'आ प्रसवात्' प्रसवपर्य्यन्तम् ["पञ्चम्यपाङ्परिभिः" इति पञ्चमी] 'अस्मदगृहे' मद्भवने 'तिष्ठतु' ।

NOTES

1. गुरुलाघवम्—An irregular form, because अण् should cause आदिवृद्धि resulting in गुरुलघु + अण् = गौरुलघवम् । But गुरुलाघव is common with the older writers such as वाल्मीकि, व्यास, मनु &c. But the form is not inadmissible. In the Vritti we find "कात्स्न्र्येन गुरुलाघवम्"; the Bhashya has "पर्य्यायशब्दानां गुरुलाघवचिन्ता नास्ति" । Some suppose गुरु = गौरव by transfernce of epithets (लक्षणा), and then गुरु च लाघवञ्च, द्वन्द्व which is optionally singular. Such defences are quite uncalled for, the adoption of the form by the भाष्यकार being defence enough.

2. (a). मूढः स्यामहम्—This is Sarngarava's suggestion. (b). एषा वा वदेन्मिथ्या—This is his own impression.

पुरोहितः—त्वं साधुभिरुद्दिष्टः प्रथममेव चक्रवर्त्तिनं पुत्रं जनयिष्यसीति। स चेन्मुनिदौहित्रस्तल्लक्षणोपपन्नो भविष्यति, ततः अभिनन्द्य शुद्धान्तमेनां प्रवेशयिष्यसि। विपर्य्यये तु पितुरस्याः समीपनयनमवस्थितमेव।

PRIEST—You were declared by the sages that the very first you will beget will be a son who will lord it over the circle. If that son of the Muni's daughter be endowed with those signs, then, having congratulated, you will cause her to enter the royal apartments. The reverse happening, taking her to her father is of course understood.

राजा—यथा गुरुभ्यो रोचते।

KING—As pleases my preceptor.

पुरोहितः—वत्से, अनुगच्छ माम्।

PRIEST—My child, follow me.

शकुन्तला—भअवदि वसुहे, देहि मे विवरं [भगवति वसुधे, देहि मे विवरम्]। (रुदती प्रस्थिता। निष्क्रान्ता सह पुरोधसा तपस्विभिश्च। राजा शापव्यवहितस्मृतिः शकुन्तलागतमेव चिन्तयति)।

SAKUNTALA—O mighty Earth, allow me a hole. *(Proceeds weeping. Exit with the Priest and the ascetics. The king, with his recollection barred by the curse, continues musing about Sakuntala.)*

पुरोहित इति। 'प्रथममेव त्वं' 'चक्रे' राजमण्डले अवश्यं वर्त्स्यति इति 'चक्रवर्त्तिनं' भाविसम्भाजं 'पुत्रं जनयिष्यसि' उत्पादयिष्यसि 'इति साधुभिः' सत्पुरुषैः 'उद्दिष्टः' अभिहितोऽसि। प्रथममपत्यं ते पुत्रो भविता स च सप्तसमुद्रमुद्रितमहीधरः इति अमोघा साधूक्तिरस्ति। 'सः' अस्या जनिष्यमाणो 'मुनेर्दौहित्रः चेत्' यदि 'तस्य लक्षणैः'

चक्रवर्त्तिचिह्नैः 'उपपन्नः' युक्तो 'भविष्यति ततः अभिनन्द्य' सादरं सत्कृत्य 'एनां शुद्धान्तम्' अवरोधं 'प्रवेशयिष्यसि'। 'विपर्य्यये तु' अन्यथा पुनः, यद्येषा पुत्रं न जनयति, पुत्रं वा चक्रवर्त्तिलक्षणहीनं, तदा 'अस्याः पितुः समीपनयनम् अवस्थितं' निर्द्धारितम् 'एव'।

शकुन्तलेति। 'भगवति वसुधे' एवं भर्त्रा शङ्किता कथं लोकलोचनगोचरा भवेयं, तत् 'मे' मह्यं 'विवरं' विलं 'देहि' तदैवान्तर्हिता वसेयम्। 'रुदती' रोदनपरा 'प्रस्थिता' प्रस्थातुमारब्धा [आदिकर्मणि क्तः]। "रुदती निष्क्रान्ता सह पुरोधसा" इत्यादि नोक्तम्। उक्ते तु सहशब्देन किं पुरोहितादयोऽपि रुरुदुः इति सन्देहः स्यात्॥ 'राजा शापेन' दुर्वासःशापेन 'व्यवहिता' तिरोधापिता 'स्मृतिः' यस्य तादृशः सन् 'शकुन्तलां गतं' तद्विषयम् 'एव चिन्तयति'।

NOTES

1. (a). चक्रवर्त्तिनम्—चक्रे अवश्यं वर्त्तते इति चक्र+वृत+णिनि आवश्यके।
(b). तल्लक्षण &c.—Compare कथं चक्रवर्त्तिलक्षणम् &c. Act VII.

2. गुरुभ्यः—"रुच्यर्थानां प्रीयमाणः" इति सम्प्रदाने चतुर्थी।

नेपथ्ये—आश्चर्य्यमाश्चर्य्यम्।

IN THE DRESSING ROOM—Strange ! Strange !!

राजा (आकर्ण्य)—किं नु खलु स्यात्।

KING (*Hearing*)—What indeed could have happened ?

(प्रविश्य) पुरोहितः (सविस्मयम्)—देव, अद्भुतं खलु संवृत्तम्।

(Entering) PRIEST (*With wonder*)—Sire a strange thing has indeed happened.

राजा—किमिव।

KING—Ay, what ?

पुरोहितः—देव, परावृत्तेषु कण्वशिष्येषु—
सा निन्दन्ती स्वानि भाग्यानि बाला।
बाहूत्क्षेपं क्रन्दितुञ्च प्रवृत्ता॥

Priest—Sire, Kanva's disciples having turned back, she too, blaming her luck, began to wail by tossing up her arms—

राजा—किञ्च।

King—And what ?

पुरोहितः—
स्त्रीसंस्थानञ्चाप्सरस्तीर्थमाराद्
उत्क्षिप्यैनां ज्योतिरेकं जगाम।
(सर्वे विस्मयं रूपयन्ति)।

Priest—And a light too in the shape of a woman, having lifted her up from afar, went towards the Apsarastirtha.

(*All act wonder*).

नेपथ्ये इति। 'आश्चर्यम्' अद्भुतं वृत्तम् ["आश्चर्यमनित्ये" इति निपातः। सम्भ्रमे विवक्षितम्]।

राजेति। 'किं नु' इति वितर्कगर्भः प्रश्नः। 'खलु' इति अवधारणे। वृत्तमेव किञ्चित् किं वा तत् ?

किमिति। किं प्रश्ने। इव इत्यनिश्चये। मिलितम् अज्ञातजिज्ञासायाम्। "किमिव हि मधुराणां मण्डनं नाकृतीनाम्" इत्यादिषु यथा।

पुरोहित इति। अन्वयः—हे देव कण्वशिष्येषु परावृत्तेषु सा बाला स्वानि भाग्यानि निन्दन्ती बाहूत्क्षेपं क्रन्दितुं प्रवृत्ता च—

पुरोहित इति। अन्वयसमाप्तिः—स्त्रीसंस्थानम् एकं ज्योतिः आरात् एनामुत्क्षिप्य अप्सरस्तीर्थं जगाम च। व्याख्या—हे 'देव' राजन् 'कण्वशिष्येषु' शार्ङ्गरवप्रभृतिषु 'परावृत्तेषु' आश्रमं प्रति प्रयातेषु 'सा बाला' अप्रगल्भा शकुन्तला 'स्वानि

भाग्यानि' निजानि भागधेयानि 'निन्दन्ती' सती 'बाहू उत्क्षिप्य' ऊर्द्धं क्षिप्त्वा इति 'बाहूत्क्षेपं' ["स्वाङ्गेऽध्रुवे" इति णमुल्] 'क्रन्दितुम्' उच्चैर्विलपितुं 'प्रवृत्ता च' प्रवृत्त-मात्रा तत्क्षणमेव 'स्त्रियाः संस्थानम्' आकृतिरिव संस्थानं यस्य तथाविधम् 'एकं ज्योतिः' किञ्चित् तेजःस्वरूपम् 'आरात्' दूरात् ["आराद्दूरसमीपयोः" इति दूरार्थे अव्ययम्] 'एनां' बालाम् 'उत्क्षिप्य' उत्तोल्य 'अप्सरस्तीर्थं' तदभिमुखमित्यर्थः 'जगाम च'। 'सर्वे' अभिनेतारः 'विस्मयं रूपयन्ति' नाटयन्ति। विस्मिता इव तिष्ठन्ति।

NOTES

1. (a) बाहूत्क्षेपम्—बाहू उत्क्षिप्य इति बाहु+उद्+क्षिप+णमुल् भावे =बाहूत्क्षेपम् having thrown up her arms. The rule is "स्वाङ्गेऽध्रुवे" —णमुल् is attached to roots with a द्वितीयान्त word as उपपद that means a limb the loss of which does not necessarily cost life. "यस्मिन्नङ्गे छिन्नेऽपि प्राणी न म्रियते तत् अध्रुवम्"—*Kasika*. (b). स्त्रीसंस्थानम् —संस्थीयते अनेन इति सम्+स्था+ल्युट् करणे=संस्थानम् shape आकृतिः। "संस्थानमाकृतौ मृत्यौ" इति विश्वः। स्त्रियाः संस्थानं स्त्रीसंस्थानम्। स्त्रीसंस्थान-मिव संस्थानं यस्य तत्। "सप्तम्युपमानपूर्वपदस्योत्तरपदलोपश्च वक्तव्यः" इति बहु—। (c). आरात्—She was lifted up from a *distance* (आरात्), hence the lifter could not be seen clearly but was noticed merely as mass of light in female form. (d). जगाम—Went towards the अप्सरस्तीर्थ। The अप्सरस्तीर्थ was near Dushyanta's capital (see *Ante*).

राजा—भगवन्, प्रागपि सोऽस्माभिरर्थः प्रत्यादिष्ट एव। किं वृथा तर्केणान्विष्यते। विश्राम्यतु भवान्।

KING—Mighty Sir, even before, that thing was indeed discarded by us. Why is it being uselessly pursued with conjectures? Do thou rest thyself.

पुरोहितः (विलोक्य)—विजयस्व। (निष्क्रान्तः)।

PRIEST (*Staring*)—Do thou prosper. (*Exit*).

राजा—वेत्रवति, पर्य्याकुलोऽस्मि । शयनभूमिमार्गमादेशय ।

KING—Vetravati, I am perplexed. Show me the way to the bed-chamber.

प्रतीहारी—इदो इदो देवो [इत इतो देवः]। (प्रस्थिता)।

WARDER—This way, this way let Sire proceed. (*Moves on*).

राजेति। 'प्रागपि' इतः पूर्वमपि, यदासौ सुलभ आसीत् तदापि 'स अर्थः' कन्यारूपेण मत्सकाशमागतं किमपि मायामयं तदस्तु 'अस्माभिः प्रत्यादिष्ट एव' निराकृतः खलु। अधुना प्रनष्टः स 'तर्केण' किं वासीत् तत्, कुतो वा गतम्, इत्येवंविधेन विमर्शेन 'किमन्विष्यते'। यातु तत्, अलं तच्चिन्तया श्रान्तो 'भवान् विश्राम्यतु'।

पुरोहित इति। 'विलोक्य' एतेन अलौकिकेन गाम्भीर्य्येण विस्मितो राज्ञो मुखं दृष्ट्वा आह 'विजयस्व' जयोऽस्तु ते ["विपराभ्यां जेः" इत्यात्मनेपदम्]।

राजेति। 'पर्य्याकुलः' उन्मना 'अस्मि'। 'शयनस्य भूमिः' स्थानं शय्यागृहमित्यर्थः तस्य 'मार्गं' पन्थानम् 'आदेशय' दर्शय मे विश्राम्यामि।

NOTE

1. विलोक्य—The king's indifferent reply surprises the पुरोहित and he *stares* (विलोक्य) at him.

राजा (परिक्रम्य स्वगतम्) —

कामं प्रत्यादिष्टां स्मरामि न परिग्रहं मुनेस्तनयाम् ।
बलवत्तु दूयमानं प्रत्याययतीव मां हृदयम् ॥

(निष्क्रान्ताः सर्वे) ।

KING (*Going round, Aside*)—True, the discarded daughter of the sage I do not remember as wife. But my intensely aching heart as it were convinces me. (*Exeunt all*).

पञ्चमोऽङ्कः । —— FIFTH ACT.

[काममिति अन्वयः—प्रत्यादिष्टां मुनेस्तनयां परिग्रहं न स्मरामि कामम्। हृदयं

नु बलवत् दूयमानं (सत्) मां प्रत्याययतीव। व्याख्या—'प्रत्यादिष्टां' निराकृतां 'मुने-स्तनयां' कण्वस्य कन्यकां 'परिग्रहं' पत्नीं 'न स्मरामि कामम्' अभ्युपगच्छाम्येतत् यत् पूर्वं परिणीता पत्नी इयं मे इति मया न स्मर्यते [अभ्युपगमे काममित्यव्ययम्]। पक्षान्तरे 'हृदयं तु' चेतः पुनः 'बलवत्' अत्यर्थं 'दूयमानं' सत् 'मां प्रत्याययतीव' पत्नीत्वे जात-प्रत्ययं करोतीव [इणो णिच्। बोधनार्थत्वात् "णौ गमिरबोधने" इति न गमिभावः] सत्यमिमां विवाहितां न स्मरामि, किन्तु गुर्वीं हृदयवेदनां ज्ञात्वा मन्ये पत्नी एव क्रूरेण मया प्रत्यादिष्टा। ["माम्" (त-, न्या-, म-)—"मे" (ग-, वि-)]।

NOTES

1. (**a**). कामम्—Implies *admission with disapprobation* (अनिच्छाङ्गीकार)। "काममिति स्वाच्छन्देऽनिच्छाङ्गीकारे च" इति गणकारः। True I do not remember (अङ्गीकार) but that does not matter (अनिच्छा)। (**b**). परिग्रहम्—परिगृह्यते इति परि + ग्रह + अप् कर्मणि = परिग्रहः wife. तम्। I do not remember her *as* wife. (**c**). प्रत्याययति—प्रति + इ + णिच् + लट् ति। The sense is बोधन to convince ; hence इ does not become गम (see Tika). (**d**). माम्—अणिकर्त्तुः कर्मसंज्ञा by the rule "गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामणिकर्त्ता स णौ"। इ is बुद्ध्यर्थ here, thus the rule applies. अहं प्रत्येमि (अणिचि) = हृदय मां प्रत्याययति (णिचि)। (**e**). हृदयम्—My *heart* convinces me. The *heart* remembers what I have forgotten. This is like "चेतसा स्मरति नूनमबोधपूर्वम्"—*Ante.*

षष्ठोऽङ्कः ।

प्रवेशकः ।

(ततः प्रविशति नागरिकः श्यालः पश्चाद्बद्धं पुरुषमादाय रक्षिणौ च)। रक्षिणौ (पुरुषं ताड़यित्वा)—अले कुम्भीलआ, कहेहि कहिं तुए एशे महामणिभाशुले उक्किस्णणामक्खले लाअकीए अङ्गुलीअए शमाशादिए [अरे कुम्भीरक, कथय कुत्र त्वया एतत् महामणिभासुरम् उत्कीर्णनामाक्षरं राजकीय-मङ्गुलीयकं समासादितम्] ।

(*Then enter the Superintendent of the City Police—the king's brother-in-law—and behind him two guards leading a man bound*). GUARD (*Striking the man*)—Ah ! You thief, answer where was intercepted by thee this royal ring shining with great gems and having the name engraved on.

पुरुषः (भीतिनाटितकेन)—पशीदन्ते भावमिश्शे ण हगे ईदिशकम्मकाली [प्रसीदन्तु भावमिश्राः । नाहमीदृश-कर्मकारी] ।

MAN (*With the actin· of fright*)—Please your honours, I did no such act.

तत इति । नगरे नियुक्तः रक्षाविधानार्थम् इति 'नागरिकः' । कोष्टपाल इति राघवभट्टः । 'श्यालः' राज्ञः श्यालः ।

अरे इति । 'कुम्भीरक' चौर ["कुम्भीरको गण्डपदस्तस्करश्च मलिम्लुचः" इति भट्टधृता नाममाला] । 'महता' अनर्घेण 'मणिना भासुरम्' उज्ज्वलम्, 'उत्कीर्णं' खोदितं 'नामाक्षरं' राजनाम यस्मिन्, अतएव 'राजकीयमङ्गुलीयकं समासादितं' प्राप्तम्

रविणोर्मागधी भाषा। ["कुम्भीरक" (रा-)—"कुम्भिलक" (त-, न्या-, वि-, म-)] ॥

पुरुष इति। 'भीते'र्भयस्य 'नाटितम्' अभिनयः [भावे क्तः]। तदेव 'भीतिनाटितकम्' [स्वार्थे कन्]। तेन सह। 'भावमिश्राः' मान्या भवन्तः 'प्रसीदन्तु'। 'ईदृशं कर्म' चौर्य्यं करोति यः सः, चौर इत्यर्थः। पुरुषस्यापि मागधी।

NOTES

1. *Summary*—ततो गच्छति काले शकुन्तलाहस्तच्युतं तदङ्गुरीयकं रोहितमत्स्योदरे केनचित् धीवरेण आसादितं राजसकाशञ्च प्रापितं राजपुरुषैः। तद्दर्शनात् तत्क्षणमेव राज्ञो निवृत्तः शापः, स्मृतिरुपजाता, अदह्यत चासौ महता अनुतापेन। गुरुणा तु अनुशयदुःखेन विषयेषु विरक्तः प्रनष्टप्रियजनस्य ध्यानेन आलेखनेन कथाभिश्च कथञ्चित् कालमनैषीत्। अथैकदा शकुन्तलाप्रसङ्गेन आत्मनः अनपत्यतया दूयमानं तं मातलिरागत्य दिवौकसामसुरोपप्लवमावेद्य दानवजयाय देवेन्द्रभवनं निनाय।

2. नागरिकः—नगरं रक्षति or नगरे नियुक्त इति नगर + ठक्।

3. कुम्भीरक—कुम्भो अस्य स्तः इति कुम्भ + इनि मत्वर्थे = कुम्भी an elephant. कुम्भिनम् ईरयति इति कुम्भिन् + ईर + अण् कर्त्तरि = कुम्भीरः an alligator. Elephants avoid drinking places in which alligators abound. कुम्भीर एव इति कुम्भीर + कन् स्वार्थे = कुम्भीरकः। By transference of epithets this means a *thief*. तत्सम्बुद्धौ। The reading कुम्भिलक means the same. "कुम्भिलः श्यालके चोरे श्लोकच्छायाहरे भषे" इति विश्वः। स्वार्थे क। (b). महामणि &c.—भास + घुरच् कर्त्तरि = भासुरम् resplendent. महान् मणिः महामणिः brilliant gem. तेन भासुरम्। उतत्—। (c). उत्कीर्ण &c.—नाम्नः अक्षराणि नामाक्षराणि। उत्कीर्णानि नामाक्षराणि यस्मिन्। (d). राजकीयम्—राज्ञ इदम् इति राजन् + क = राजक + ईय = राजकीयम् royal. Here राजन् becomes राजक by the rule "राज्ञः क च"। It is known to be *royal* because उत्कीर्णनामाक्षरम्।

4. भावमिश्राः—भाव is बुध a sage. "भावः सत्तास्वभावाभिप्रायचेष्टात्मजन्मसु। क्रियालीलापदार्थेषु विभूतिबुधजन्तुषु॥" इति मेदिनी। भावाश्च ते मिश्राश्च &c. See आर्य्यमिश्र, Act I.

प्रथमः—किं क्खु शोहणे बह्मणेत्ति कलिअ रज्ञा पडिग्गहे दिण्णे [किं खलु शोभनो ब्राह्मण इति कृत्वा राज्ञा प्रतिग्रहो दत्तः]।

FIRST—Was it indeed a gift bestowed by the king taking thee for an auspicious Brahman ?

पुरुषः—शुणुध दाणिं । हगे शक्कावदालवाशी धीवले [शृणुत इदानीम् । अहं शक्रावतारवासी धीवरः] ।

MAN—Now listen. I am a fisherman living at Sakravatara.

द्वितीयः—पाडच्चला, किं अम्हेहिं जादी पुच्छिदा [पाटच्चर, किमस्माभिर्जातिः पृष्टा] ।

SECOND—Thief, was thy profession enquired into by us ?

श्यालः—सूअअ, कहेदु सव्वं अणुक्कमेण । मा णं अन्तरा पडिबन्धह [सूचक, कथयतु सर्वमनुक्रमेण । मा एनमन्तरा प्रतिबधान] ।

SUPERINTENDENT—Suchaka, let him tell all in order. Do not interrupt him in the middle.

प्रथम इति । 'शोभनः' सन् 'ब्राह्मणः' सत्पात्रमिति यावत् 'इति कृत्वा' त्वां सत्पात्रं मत्वा इत्यर्थः 'राज्ञा' स्वयं दुष्यन्तेन 'प्रतिग्रहः खलु' दानमेव 'दत्तः किम्' ; यदि नैतत् चोरितं त्वया, मन्ये राज्ञा एव सत्पात्राय दत्तं ते, इत्युपहासः ।

पुरुष इति । 'इदानीम्' इति वाक्यभूषायाम् । 'शक्रावतारे' तदाख्ये प्रदेशे 'वसति' यस्तादृशो 'धीवरः' मत्स्याजीवः । ["शक्रावतार" (त-, न्या-)—"शक्रावताराभ्यन्तर" (रा-, वि-, म-)] ॥

द्वितीय इति । रे 'पाटच्चर' चौर ["चौरैकागारिक" इति प्रस्तुत्य "पाटच्चर-मलिम्लुचाः" इत्यमरः] 'अस्माभिः' त्वदीया 'जातिः पृष्टा किं' नैव पृष्टा । तत् किं जातिं कथयसि ।

श्याल इति । 'सूचक' इति द्वितीयस्य नाम । 'अनुक्रमेण' यथाक्रमं 'सर्वं कथयतु' एषः । 'एनम् अन्तरा' मध्ये, कथामध्ये इत्यर्थः 'मा प्रतिबधान' मा रुन्धि [मा शब्दोऽयं न माङ् । तेन न लुङ्] । अस्य तु भाषा विदूषकादीनामिव शौरसेनी ।

NOTES

1. (a). शोभनः—शोभते इति शुभ + युच् कर्त्तरि। Worthy. (b). कृत्वा—An अव्यय। Or कृत्वा = मत्वा because कृ can take the meaning of all roots. सर्वधात्वर्थानुवादः करोतिर्भा भवति। (d). प्रतिग्रहः—प्रतिगृह्यते इति प्रति + ग्रह + अप् कर्मणि A gift.

2. शक्रावतार &c.—अवतरति अस्मिन् इति अव + तॄ + घञ् अधिकरणे = अवतारः a sacred place तीर्थम्। "अवतारस्तु नद्यादितीर्थेऽवतरणेऽपि च" इति हैमः। अप् is barred by the rule "अवे तृस्त्रोर्घञ्"। शक्रस्य अवतारः। A नित्यसमास because शक्रावतार is a संज्ञा। It has no विग्रहवाक्य। न हि वाक्येन संज्ञा गम्यते।

3. पाटच्चर—पाटयन् चरति व्यवहरति इति पाटयत् + चर + अच् कर्त्तरि should give पाटयच्चरः but we get पाटच्चरः (यलोप)। पृषोदरादि।

उभौ—जं आवुत्ते आणवेदि। कहेहि। [यदावुत्त आज्ञापयति। कथय]।

BOTH—As brother-in-law commands. Go on.

पुरुषः—अहके जालुग्गालादीहिं मच्छबन्धणोवाएहिं कुडुम्बभलणं कलेमि [अहं जालोद्गालादिभिर्मत्स्यबन्धनोपायैः कुटुम्बभरणं करोमि]।

MAN—With nets, hooks and other means of catching fish I achieve the maintenance of my family.

श्यालः (विहस्य)—विसुद्धो दाणिं आजीवो [विशुद्ध इदानीमाजीवः]।

SUPERINTENDENT (*Laughing*)—A pure livelihood indeed !

पुरुषः—भट्टा, मा एव्वं भण [भर्त्तः, मा एवं भण]।

सहजे किल जे विणिन्दिए ण हु दे कम्म विवज्जणीअए।
पशुमालणकम्मदालुणे अणुकम्पामिदुए वि शोत्तिए॥

[सहजं किल यद्विनिन्दितं न हि तत् कर्म विवर्जनीयम्।
पशुमारणकर्मदारुणोऽनुकम्पामृदुरपि श्रोत्रियः॥]

MAN—Say not so, master. The despised occupation which is indeed born with one, is surely not to be discarded. The practiser of Vedic rites, though tender with pity, has to be heartless in the act of killing animals.

उभाविति। 'आवुत्त:' भगिनीपतिर्भवान् [प्रसादनोक्तिरेषा। नासौ वस्तुत एव तयोर्भगिनीपति:। "भगिनीपतिरावुत्त:" इत्यमर:] 'यदाज्ञापयति' तदेव कुर्व:। नात: परं मध्ये प्रतिबध्नीव:। 'कथय' यथारुचि वद इति पुरुषं प्रति।

पुरुष इति। उद्गिलति एतमिति 'उद्गाल:' वड़िशम् [गृ इत्येतस्य घञि रूपम्। पक्षे उद्गार:]। 'जालम् उद्गालश्च आदि' येषां तै: 'उपायै:' कुटुम्बानाम् आत्मीयानां 'भरणं' वर्त्तनं 'करोमि'।

श्याल इति। 'इदानीं' वाक्यभूषायाम्। 'विशुद्ध:' हिंसादिदोषवर्जित: 'आजीव:' जीवनोपाय:। उपहास एष:। हिंसादिभिर्दुष्ट आजीव इत्यभिप्राय:।

पुरुष इति। हे 'भर्त्त:' स्वामिन् नगरपाल 'एवं मा भण' कथय। आजीवं मा निन्द। अन्वय:—यत् किल विनिन्दितं कर्म सहजं, तत् न हि विवर्जनीयम्। श्रोत्रिय: अनुकम्पामृदुरपि पशुमारणकर्मदारुण:। व्याख्या—'यत् किल विनिन्दितं' गर्ह्यं 'कर्म सहजं' जन्मना सह जातं, जातिनिष्ठमित्यर्थ: 'तत् न हि' नैव 'विवर्जनीयं' त्याज्यम्। 'श्रोत्रियो' वैदिक:, वेदोक्तकर्मनिरतो ब्राह्मण इत्यर्थ: 'अनुकम्पया' करुणया 'मृदुरपि' कोमलोऽपि सन् 'पशूनां प्राणिनां यत् 'मारणं' घात:, यज्ञे वध:, तेन 'कर्मणा' तदनुष्ठानेन 'दारुण:' घोरो भवति। यथा श्रोत्रियेण जातिगता पशुहत्या निन्दितापि न त्यज्यते तथा मयापि मत्स्यबन्धनम्। एतेन नाप्यसौ निन्द्य: न पापम्। ["मृदुरपि" (त-, वि-, व्या-)—"मृदुरेव" (रा-, म-)]॥

NOTES

1. जालोद्गाल &c.—उद्+गॄ+घञ् कर्मणि=उद्गाल: or उद्गार:, a hook, अप् is barred by the rule "उन्न्योर्ग्र:"। र becomes ल optionally by the rule "अचि विभाषा"। जालानि च उद्गालाश्च जालोद्गालम् nets and hooks, इन्द्वैकत्वम् by the rule "जातिरप्राणिनाम्"। जालोद्गालम् आदिर्येषां तै:।

2. (a). सहजम्—सह एकत्र जातम् इति सह+जन+ड कर्त्तरि in-born.

(b). श्रोत्रियः—श्रोत्रियन् is obtained as a substitute for the वाक्य "छन्दः अधीते" by निपातन in the rule "'श्रोत्रियंश्छन्दोऽधीते"। No प्रत्यय is needed. Some, however, interpret the rule as directing छन्दस् to be replaced by श्रोत and घन् attached to it. Thus छन्दस्+घन् =श्रोत+घन्=श्रोत्रियः by the निपातन above. "छन्दसो वा श्रोतभावः तदधीते इति घ'श्च प्रत्ययः"—*Vritti.* (c). *Remark*—The sloka is a defence of Vedic rites against the attacks of Buddhism. The Buddhists denounce (विनिन्दित) sacrifices as horrid (पशुमारण-कर्मदारुण)। But whatever they are, they must not be abandoned (विवर्जनीय) because this is the work allotted to them (श्रोत्रिय) by nature (सहज)। Had it not been so, the practise of such rites would have been heartless. Such however is not the fact. A श्रोत्रिय is the kindest of kind beings living (अनुकम्पामृदु)।

श्यालः—तदो तदो [ततस्ततः]।

SUPERINTENDENT—Then, what then ?

पुरुषः—एक्कस्सिं दिअसे खण्डसो लोहिअमच्छे मए कप्पिदे [एकस्मिन् दिवसे खण्डशो रोहितमत्स्यो मया कल्पितः]। जाव तस्स उदलब्भन्तले पेक्खामि दाव एसे महालअणभासुले अङ्गुलीअए पेक्खिदे [यावत् तस्य उदराभ्यन्तरे प्रेक्षे तावत् एतत् महारत्नभासुरमङ्गुलीयकं प्रेक्षितम्]। पच्छा अहके से विक्कआअ दंसअन्ते गहिदे भावमिस्सेहिं [पश्चादहम् अस्य विक्रयार्थं दर्शयन् गृहीतो भावमिश्रैः]। मालेध वा कुट्टेध वा अअं से आअमवुत्तन्ते [मारयत वा कुट्टयत वा अयमस्य आगमवृत्तान्तः]।

MAN—One day I cut up a Rohita fish to pieces. No sooner I looked into the inside of its belly than was seen this ring

glittering with bright gems. Afterwards showing it for sale I was arrested by your honoured selves. Kill me or cut me up, this is the story of its acquisition.

एकस्मिन्निति। 'मया रोहितमत्स्यः खण्डशः' खण्ड' खण्डम् [खण्डस्य एकत्वमाश्रित्य वीप्सायां शस्] 'कल्पितः' सम्पादितः। 'यावत्' यत्काले 'तस्य उदरस्य अभ्यन्तरे' मध्ये 'प्रेक्षे' पश्यामि [यावद्योगे वर्त्तमानम्] 'तावत्' तत्कालम् 'एतत् महारत्नेन' रत्नोत्तमेन 'भासुरं' दीप्तिमत् 'अङ्गुरीयकं प्रेक्षितं' दृष्टम्। 'पश्चात्' अनन्तरम् 'विक्रयार्थं' विनिमयार्थम् 'अस्य' अङ्गुरीयकस्य [गम्यमानगुणाद्यपेक्षया षष्ठी] 'दर्शयन्' पश्यत अङ्गुरीयकसौन्दर्य्यं, चिन्तयत रत्नस्यैतस्य अनर्घत्वं, विभावयत रत्नसंस्थापननैपुण्यम्, इत्येवं वर्णयन् 'भावमिश्रैः' मान्यैर्भवद्भिरहं 'गृहीतः' बद्धः। 'मारयत' प्राणैर्वियोजयत 'वा कुट्टयत' प्राणविमुक्तेः परं खण्डशो 'वा' कुरुत सर्वमगणयित्वा ब्रवीमि 'अयमस्य' अङ्गुरीयकस्य 'आगमः' प्राप्तिः तस्य 'वृत्तान्तः' वार्त्ता। ["प्रेक्षे तावत्"—इत्यादिमूलम् (त-, न्या-)—"एतद्रत्नभासुरमङ्गुलीयकं दृष्टम्" (रा-, वि-, म-) ॥ "कुट्टयत" (त-, न्या-)—"मुञ्चत" (रा-, वि-, म-)] ॥

NOTES

1. ततः ततः—The repitition shows the impatience of the superintendent to avoid the awkward retort, which is too much for his wit to meet.

2. अस्य—The construction is अस्य दर्शयन् which is elliptic for अस्य गुणान् दर्शयन्। see *Tika.* Or construe अस्य विक्रयार्थम् एतत् दर्शयन् showing it (एतत्) for its (अस्य) sale.

श्यालः—जाणुअ, विस्सगन्धी गोहादी मच्छबन्धी एव्व णिस्संसअं। अङ्गुलीअअदंसणं से विमरिसिदव्वं। राअउलं एव्व गच्छामो [जानुक, विस्रगन्धी गोधादी मत्स्यबन्ध एव निःसंशयम्। अङ्गुलीयकदर्शनमस्य विमर्ष्टव्यम्। राजकुलमेव गच्छामः]।

SUPERINTENDENT—Januka, this fellow smelling of raw meat, is surely a Godha-eating fish-catcher. His coming by of the ring has to investigated. We will go to the king's residence.

स्यात् इति। 'विस्रम्' आममांसस्य गन्धः अस्ति यस्मिन् तथाविधः एष 'निःसंशयं' नूनं गोधामत्ति खादति यः स 'गोधादी' गोधाभोजनशीलः 'मत्स्यं' बध्नाति' यः स 'एव' धीवर एव। अन्यथा कथमस्य मांसगन्धः। तदयं जात्यंशे सत्यमेवाह। 'अस्य अङ्गुरीयकदर्शनं विमर्ष्टव्यं' विचारणीयम् तदपि सत्यं न वा इत्यालोचनीयम्। 'राजकुलमेव' राजभवनमेव 'गच्छामः'। स्वामिने निवेदयामि स एव विमृशतु सत्यं न वेति।

NOTES

1. (a). विस्रगन्धी—विस्र is आमगन्धि, *i. e.*, anything smelling like raw meat. "विस्रं स्यादामगन्धि यत्" इत्यमरः। तस्य गन्धः विस्रगन्धः, *i. e.*, आमगन्धः। सः अस्य अस्तीति विस्रगन्ध + इनि मत्वर्थे। This is round-about in sense. आमगन्धी expresses the idea more simply. Perhaps in the days of Kalidasa विस्र meant आम, and in time, by transference of epithets, came to mean आमगन्धि when Amara lived. (b). गोधादी—गोधा is the iguana. गोधाम् अत्तुं शीलमस्य इति गोधा + अद् + णिनि कर्त्तरि ताच्छील्ये। विट् is barred by णिनि when *habit* (ताच्छील्य) is implied. Hence we do not get गोधात् like क्रव्यात्। But there is another difficulty. The rule for णिनि is "सुप्यजातौ णिनिस्ताच्छील्ये"। So we must not have a जातिवाचक word for उपपद with णिनि implying ताच्छील्य। Yet here there is णिनि with गोधा (जातिवाचक) as उपपद। (c). मत्स्यबन्धः—मत्स्यान् बध्नाति इति मत्स्य + बन्ध + अण् कर्त्तरि। (d). विमर्ष्टव्यम्—वि + मृश + तव्य कर्मणि = विमर्ष्टव्यम् or विम्रष्टव्यम्। अम् comes in optionally by the rule "अनुदात्तस्य च ऋदुपधस्यान्यतरस्याम्"। (e). *Remark*—The gist is this—This fellow has spoken the truth about his profession. He is indeed a fisher-man who is an inveterate Godha-eater as is evident from the stench he is giving out. One part of his statement having turned out to be true, I cannot summarily reject the other part. It has to be scrutinised. But I shall leave the scrutiny with better hands than mine. I must see the king about it.

रक्खिणौ—तह। गच्छ अले गण्ठिभेदअ [तथा। गच्छ अरे ग्रन्थिभेदक]। (सर्वे परिक्रामन्ति)।

GUARDS—As you say. Proceed you knot-cutter. (*All go round the stage*).

श्यालः—सूअअ, इध पुरदुआरे अप्पमत्ता पड़िवालेह मं जाव इमं अङ्गुलीअअं जहागमणं भट्टिणो णिवेदिअ तदो सासणं पड़िच्छिअ णिक्कमामि [शूचक, इह पुरद्वारे अप्रमत्तौ प्रतिपालयतं मां यावदिदम् अङ्गुलीयकं यथागमनं भर्त्रे निवेद्य ततः शासनं प्रतीष्य निष्क्रामामि]।

SUPERINTENDENT—Suchaka, here at the city-gate you two wait for me without carelessness, until I come out having reported to Sire this ring exactly as it has come to us, and having obtained orders from him.

उभौ—पविशदु आवुत्ते शामिपशादश्श [प्रविशतु आवुत्तः स्वामिप्रसादाय]। (निष्क्रान्तः श्यालः)।

BOTH—Let, Brother-in-law enter to receive Sire's favours. (*Exit Superintendent*).

सूचकः—जाणुअ, चिलाअदि क्खु आवुत्ते [जानुक, चिरायते खलु आवुत्तः]।

SUCHAKA—Januka, Brother-in-law is indeed delaying.

रक्खिणाविति। 'ग्रन्थेः' वस्त्रग्रन्थेः 'भेदकः' छेदकः। कस्यचिदेतत् वसनाञ्चले बद्धमासीत्, बन्धनं छित्वापहृतं त्वया इत्यभिप्रायः।

श्याल इति। 'यावत्' यत्कालम् 'इदम् अङ्गुलीयकम्' आगमनस्य आगमनवृत्तान्तस्य अनतिक्रमो 'यथागमनम्' [अव्ययीभावः]। तदस्ति यस्मिन् कर्मणि तत् यथा तथा [मत्वर्थीयः अच्। निवेदनक्रियाविशेषणम्] 'भर्त्रे' स्वामिने दुष्यन्ताय 'निवेद्य, ततः'

भर्त्तुः 'शासनम्' भाज्ञां 'प्रतीष्य' गृहीत्वा 'निष्क्रामामि' तावत् 'इह पुरद्वारे भप्रमत्तौ' अवहितौ भूत्वा 'मां प्रतिपालयत' प्रतीक्षेथाम् ।

उभाविति । 'स्वामिनः प्रसादः' अनुग्रहः तस्मै ["क्रियार्थोपपदस्य च कर्मणि स्थानिनः" इति चतुर्थी] 'प्रविशतु' ।

सूचक इति । 'चिरायते' विलम्बते । [चिर इति प्रातिपदिकं कालविप्रकर्षे वर्त्तते । उपचारात् चिरयुक्तोऽपि चिरः, अर्श आद्यच् वा । स इव आचरति इति क्यङ्]। ["चिरायते" (रा-, वि-)—"चिरायति" (म-)—"चिरयति" (त-, न्या-)] ॥

NOTES

1. ग्रन्थिभेदक—A cut-purse. See Tika.

2. (a). अप्रमत्तौ—प्र + मद + क्त कर्त्तरि = प्रमत्तौ careless. The rule "न ध्या ख्या पॄ मूर्च्छि मदाम्" prohibits the form प्रमन्न । न प्रमत्तौ not careless, *i. e.*, watchful. (b). प्रतिपालयतम्—प्रतिपालि is सकर्मक and means प्रतीक्षा 'to wait'. (c). भर्त्रे—"कर्मणा यमभिप्रैति स सम्प्रदानम्" इति सम्प्रदाने चतुर्थी । Here अङ्गुलीयकेन (कर्मणा) भर्त्तारम् अभिप्रैति । Hence the rule applies. The वृत्ति here resticts the rule to दा धातु । But the भाष्य is opposed to it. The वृत्ति must not be allowed to over-rule the भाष्य । (d). प्रतीष्य—प्रति + इष means ग्रहण । Compare "प्रतीष्टनीवारहस्ताभिः"—Act IV. (e). निष्क्रामामि—निस् + क्रम + लट् मिप् = निष्क्राम्यामि निष्क्रामामि । क्रम becomes क्राम in the परस्मैपद ।

3. स्वामि &c.—The sense is स्वामिप्रसादं लब्धुं प्रविशतु । Hence "क्रियार्थोप—" इति चतुर्थी । Sire will be pleased to see this rare gem restored to him by your efforts, and will certainly reward you.

4. चिरायते—चिर is a long time. चिरम् अस्त्यस्य इति चिर + अच् मत्वर्थे = चिरः one who makes delay. Or, by transferance of epithets, चिर means चिरयुक्त । चिर इव आचरति इति चिर + क्यङ् + लट् ते । The reading चिरायति seems bad in grammar. चिरयति may be defended by तत्करोति णिच् ।

जानुकः—णं अवसलोवसप्पणीया लाआणो [ननु अवसरोपसर्पणीया राजानः] ।

JANUKA—Well, Kings are to be approached at opportunities.

सूचकः—फुरन्ति मे हत्था इमश्श वहश्श शुमणो पिणद्धुं [स्फुरतो मे हस्तौ अस्य वधस्य सुमनसः पिनद्धुम्]। (पुरुषं निर्दिशति)।

SUCHAKA—My hands quiver to tie the garland for his death. (*Points to the fisherman*).

पुरुषः—णालिहदि भावे अआलणमालणे भविदुं [नार्हति भावः अकारणमारणो भवितुम्]।

MAN—It behoves not your honour to become a slaughterer without reason.

जानुकः (विलोक्य)—एशे अम्हाणं शामी पत्तहत्थे लाअशाशणं पड़िच्छिअ इदोमुहे देक्खोअदि। गिद्धबली हुविश्शशि शुणो मुहं वा देक्खिश्शशि [एषः अस्माकं स्वामी पत्रहस्तः राजशासनं प्रतीष्य इतोमुखो दृश्यते। गृध्रबलिर्भविष्यसि शुनोमुखं वा द्रक्ष्यसि]।

JANUKA (*Looking*)—Here our master, having obtained the royal orders, appears facing this way with a letter in his hand. Thou wilt become an offering to the vultures or wilt see the jaws of a dog.

जानुक इति। 'ननु' आक्षेपे। 'अवसरे' काले, योग्ये इत्यर्थः 'उपसर्पणीया' उपगन्तव्याः। आज्ञां लब्ध्वा राजानं पश्यति जनः, न हि यथारुचि। अतो विलम्बः।

सूचक इति। 'अस्य' यो 'वधः' हननं, तस्य 'सुमनसः' पुष्प' पुष्पमाल्यमित्यर्थः ["आपः सुमनसो वर्षा अप्सरस्सिकताः समाः। एते स्त्रियां बहुत्वे स्युरेकत्वेऽप्युत्तरत्रयम् ॥"] 'पिनद्धुं' बन्धुं ["वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोः" इत्यल्लोपः। पक्षे अपिनद्धुम्] 'मे हस्तौ स्फुरतः' स्पन्देते।

पुरुष इति। 'भावः' मान्यो भवान् 'अकारणं' कारणाभावे 'मारणः' हन्ता 'भवितुं न अर्हति'।

जानुक इति। 'अस्माकं स्वामी' नगरपालः 'पत्र' हस्ते' यस्य तादृशः सन् 'राजशासनं' राज्ञः शासनम् आज्ञां 'प्रतीक्ष्य' गृहीत्वा 'इतः' अस्यां दिशि 'मुखं' यस्य तादृशो 'दृश्यते'। मन्ये त्वं 'गृध्रेभ्यो बलिः' उपहारो 'भविष्यसि' गृध्रा ते मांसं भक्षयिष्यन्ति, 'वा' अथवा 'शुनः' कुक्कुरस्य 'मुखं' दंशनार्थं व्यात्तं मुखं 'द्रक्ष्यसि'। राजाज्ञया शूलस्थं मृतं वा त्वां गृध्राः, आकण्ठं भुवि निखातं जीवितं वा कुक्कुराः खादिष्यन्ति।

NOTES

1. सुमनसः—सुमनस् is usually plural. The Medini sanctions the singular also. "सुमनाः पुष्पमालत्योः स्त्रियां ना धीरदेवयोः" इति मेदिनी। ताः। The custom in those days was to garland with करवीर and other flowers the victim condemned to death. Compare "रक्तकरवीरदामा"—*Mrichhakatika*.

2. अकारण &c.—अविद्यमानं कारणं यस्मिन् तत् अकारणम् causeless. मारयति इति मृ + णिच् + ल्युट् कर्त्तरि बाहुलकात् = मारणः destroyer. Now see Tika.

3. पत्रहस्तः—The सप्तम्यन्त word हस्त does not lead. This is like गडुकण्ठ, कमण्डलुपाणि &c.

4. (a). गृध्रबलिः—गृध्रेभ्यो बलिः a चतुर्थीतत्—by the rule "चतुर्थी तदर्थार्थबलिहितसुखरक्षितैः"। This refers to death by the stake (शूल)। (b). द्रक्ष्यसि—Will see. Refers to execution in which the condemned man is buried up to the neck under ground and dogs are then let loose to tear him up. The victim can see (द्रक्ष्यसि) the dogs coming because he is not dead yet. But in the other case death is instantaneous and the dead man forthwith becomes meat for the vultures (गृध्रबलि)।

(प्रविश्य) श्यालः—सूअअ, मुच्चेदु एसो जालोवजीवी। उववण्णो क्खु अङ्गुलीअअस्स आअमो [सूचकः, मुच्यतामेष जालोपजीवी। उपपन्नः खलु अङ्गुलीयकस्य आगमः]।

(*Entering*) SUPERINTENDENT—Suchaka, let this fisherman be released. The acquistion of the ring is indeed consistent.

सूचकः—जह आवुत्ते भणादि [यथा आवुत्तो भणति]। एशे जमशदणं प्रविशिअ पड़िणिउत्ते [एष यमसदनं प्रविश्य प्रतिनिवृत्तः]। (पुरुषं मुक्तबन्धनं करोति)।

SUCHAKA—As brother-in-law directs. This fellow has come back after having entered the abode of death. (*Releases the man*).

पुरुषः (श्यालं प्रणम्य)—भट्टा, अह कीलिशे मे आजीवे [भर्त्तः, अथ कीदृशो मे आजीवः]।

MAN (*Bowing to the Superintendent*)—Now, master, how is to be my livelihood (to-day) ?

श्याल इति। जालेन उपजीवति जीविकां वर्त्तयति इति 'जालोपजीवी' धीवरः 'मुच्यताम्'। 'उपपन्नः' युक्तः। 'आगमः' प्राप्तिः।

सूचक इति। 'यमस्य सदनं' गृहम्। 'प्रतिनिवृत्तः' प्रत्यागतः। मृतः पुनर्जीवित इवायम् इत्यर्थः। 'मुक्तानि' अपनीतानि 'बन्धनानि' यस्य तथाविधं 'करोति'।

पुरुष इति। हे 'भर्त्तः' स्वामिन् 'अथ' पृच्छामि 'मे आजीवः' अद्य जीवनं 'कीदृशः' किंविधः। गतो मत्स्यो गतश्चाङ्गुरीयकं तदद्य केनोपायेन जीविकां करोमि इति विद्यासागरपादाः।

NOTE

1. कीदृशः—What shall I eat to-day? The fish is gone, and I have lost the ring too. I do not know how to maintain myself to-day. Some take this as a sarcastic retort to the Super-in-tendent's "विशुद्ध इदानीमाजीवः." This is not consistent with the reply of the श्याल following. Nor can such a taunt to the head of the Police be expected from simple folks like the fisherman.

श्यालः—एसा भट्टिणा अङ्गुलीअअमुल्लसम्मिदो पसादो बि दाबिदो [एष भर्त्रा अङ्गुलीयकमूल्यसंमितः प्रसादोऽपि दापितः]। (पुरुषाय स्वं प्रयच्छति)।

SUPERINTENDENT—Here, a gift too commensurate to the value of the ring, is caused to be given by Sire. (*Gives money to the man).*

पुरुषः (सप्रणामं प्रतिगृह्य)—भट्टा अणुग्गहिद म्हि [भर्त्तः अनुगृहीतोऽस्मि]।

MAN *(Accepting with a bow)*—Master, I am favoured.

सूचकः—एसो णाम अणुग्गहे जे शूलादो अवदालिअ हत्थि-क्खन्धे पड़िट्ठाविदे [एष नाम अनुग्रहः यत् शूलादवतार्य्य हस्ति-स्कन्धे प्रतिष्ठापितः]।

SUCHAKA—Such indeed is the favour that, taken down from the stake, you are seated on the neck of the elephant.

जानुकः—आवुत्ते, पालिदोसिए कधेदि महालिहलदणेण तेण अङ्गुलीअएण शामिणो बहुमदेण होदव्वं त्ति [आवुत्त, पारितोषिकः कथयति महार्हरत्नेन तेन अङ्गुलीयकेन स्वामिनो बहुमतेन भवितव्यमिति]।

JANUKA—Brother-in-law, the gift shows that the ring with its priceless gems must be very acceptable to Sire.

श्याल इति। 'अङ्गुलीयस्य मूल्येन संमितः' तुल्यः 'प्रसादः' प्रीतिदानम्।

सूचक इति। मरणं ते ध्रुवमासीत् किन्तु राजानुग्रहेण न केवलं प्राणैरवियुक्तः अपि तु अर्थेन पूजितः। तस्मान्य शूलाग्रं गन्ता जनः हस्तिस्कन्धे आरोपितः।

जानुक इति। 'महार्हं महामूल्यं 'रत्नं' यस्मिन् तथाविधेन 'तेन अङ्गुलीयकेन स्वामिनो बहुमतेन' सम्मतेन 'भवितव्यम्'। रत्नं दृष्ट्वा भर्त्ता अङ्गुलीयकम् आदृतवान् इति पारितोषिकः' पुरस्कारः 'कथयति'। पुरस्कारेणाहमेवं मन्ये।

NOTES

1. (a). अङ्गुलीयक &c.—६तत् and ३तत्—। See Tika. मूल्येन

आनाय्यम् शेषीकरणीयम् इति मूल + यत् = मूल्यम् that from which the cost (मूल) is to be deducted to calculate the profit, *i. e.*, the price. (b). प्रसाद:—प्र + सद + घञ् भावे = प्रसाद: or प्रासाद: । The former means *pleasure* (प्रीति) and the latter *a royal mansion.* The gift is *not* pleasure (प्रीति) but only the *sign* of pleasure. By transference of epithets प्रसाद (प्रीति) is here used for प्रीतिदान । (c). दापित:—दा + णिच् + क्त कर्मणि ।

2. प्रतिष्ठापित:—प्रति + स्था + णिच् + क्त कर्मणि । We have षत्व by the rule "उपसर्गात् सुनोति सुवति स्यति स्तौति स्तोभति स्था सेनय सेध सिच सञ्ज स्वञ्जाम्" ।

3. पारितोषिक:—परितोष: प्रयोजनमस्य इति परितोष + ठञ् reward.

श्याल:—ण तस्सिं महारुहं रदणं भट्टिणो बहुमदं त्ति तक्केमि । तस्स दंसणेण भट्टिणो अभिमदो जणो सुमराविदो । मुहुत्तअं पकिदिगम्भीरो वि पज्जस्सुणअणो आसि [न तस्मिन् महार्हं रत्नं भर्त्तुः बहुमतमिति तर्कयामि । तस्य दर्शनेन भर्त्तुरभिमतो जन: स्मारित: । मुहूर्त्तं प्रकृतिगम्भीरोऽपि पर्य्यश्रुनयन: आसीत्] ।

Superintendent—I guess (it is) not the invaluable gems in it that are acceptable to Sire ; some person dear to Sire was reminded by its sight. Though naturally self-possessed, for a moment he remained with tearful eyes.

सूचक:—सेविदं णाम आवुत्तेण [सेवितं नाम आवुत्तेन]।

Suchaka—Service indeed has been rendered by Brother-in-law.

जानुक:—णं भणाहि इमस्स कए मच्छअत्तुणो त्ति [ननु भण अस्य कृते मत्स्यभर्तुरिति । (पुरुषमसूयया पश्यति) ।

Januka—Well, say that for the sake of this fish-killer. *(Eyes the man with envy).*

श्याल इति । 'तस्मिन्' अङ्गुलीये स्थितं 'महार्हं रत्नं' भर्त्तुः न बहुमतम् इति 'तर्कयामि' मन्ये । किन्तु 'तस्य' अङ्गुरीयकस्य 'दर्शनेन अभिमतः' प्रियो 'जनः स्मारितः' । अतः पारितोषिकः । प्रियजनस्मरणचिह्नमपि शृणु—'प्रकृत्या' स्वभावेन 'गम्भीरोऽपि' गूढ़भावोऽपि 'पर्य्यश्रुणी' सवाष्पे 'नयने' यस्य तथाविधो 'मुहूर्त्तम् आसीत्' ।

सूचक इति । 'आवुत्तेन सेवितं नाम' यथार्थमेव भर्त्तृसेवा कृता ।

जानुक इति । 'ननु' आक्षेपे । 'अस्य मत्स्यानां शत्रोः' धीवरस्य 'कृते' तदर्थम् [कृते इत्यव्ययं निमित्तार्थे] सेवितमावुत्तेन इति 'भण' । सेवालब्धं धीवरस्य जातं तत् केयं सेवा इति 'पुरुषं' धीवरम् 'असूयया' दोषाविष्करणेन सह 'पश्यति' ।

NOTES

1. (a). दर्शनेन—प्रयोजककर्त्तृ । Thus अभिमतो जनः स्मृतः (non-causative) = दर्शनेन अभिमतो जनः स्मारितः (causative). (b). भर्त्तुः—भर्त्ता is the कर्त्ता of मननक्रिया in अभिमत । "क्तस्य च वर्त्तमाने" इति अनुक्ते कर्त्तरि षष्ठी । (c). अभिमतः—अभि + मन + क्त कर्मणि वर्त्तमाने by the rule "मतिबुद्धिपूजार्थेभ्यश्च" । (d). स्मारितः—स्मृ + णिच् + क्त कर्मणि । स्मृ + णिच् gives स्मारि or स्मरि । The latter means "anxious recollection" (आध्यान) । (e). पर्य्यश्रु &c.—परिगतानि अश्रूणि ययोः ते पर्य्यश्रुणी । See Tika.

2. मत्स्यशत्रोः—With the reading मात्स्यिकभर्त्तुः, expound मत्स्यान् हन्ति इति मत्स्य + ठक् = मात्स्यिकाः fish-killers, *i. e.*, fisher-men. तेषां भर्त्ता स्वामी । Raghava explains "मत्स्येन जीवन्तीति मात्स्यिकाः तेषां भर्त्तुः" । But the sense "जीवति" goes with words of the वेतनादि class and a few others only (Pan. 4. 4. 12—14). मत्स्य is not included therein. Besides, for the word मत्स्य special provision is made by the rule "पक्षिमत्स्यमृगान् हन्ति" (Pan. 4. 4. 35). Raghava's explanation is therefore suspicious.

पुरुषः—भट्टालके, इदो अद्धं तुम्हाणं सुमणोमुल्लं होदु [भट्टारक, इतः अर्द्धं युष्माकं सुमनोमूल्यं भवतु] ।

MAN—Master, let half of this be as price of flowers for you.

जानुकः—एत्तके जुज्जइ [एतावद्युज्यते] ।

JANUKA—This much is proper.

श्यालः—धीवर, महत्तरो तुमं पिअवअस्सओ दाणिं मे संवुत्तो। कादम्बरीसक्खिअं अम्हाणं पढमसोहिदं इच्छीअदि। ता सोण्डिआवणं एव्व गच्छामो [धीवर, महत्तरस्त्वं प्रियवयस्यक इदानीं मे संवृत्तः। कादम्बरीसाक्षिकमस्माकं प्रथमसौहृदमिष्यते। तत् शौण्डिकापणमेव गच्छामः]। (निष्क्रान्ताः सर्वे)।

SUPERINTENDENT—Fisher-man you are noble and have become a dear friend to me. Our friendship is desired to have liquour for witness. So to a wine-seller's shop we go. (*Exeunt all*).

पुरुष इति। हे 'भट्टारक' स्वामिन् 'इतः' प्रसादप्राप्तात् अर्थात् 'अङ्ग' युष्माकं सुमनसाम्' अर्चनायोग्यानां पुष्पाणां 'मूल्यं भवतु'। अद्य प्राणप्रदा भवन्तः अर्चनीया मे। न चात्र सन्निहितानि अर्चनपुष्पाणि। तत् पुष्पमूल्यमिदं मया वो दीयते। सामूयं दृष्टस्य भीतस्येयं प्रसादनोक्तिः।

जानुक इति। 'एतावद्युज्यते' युक्तमेवैतत्।

श्याल इति। 'महत्तरः' अतिशयेन महान् [इतरापेक्षया अतिशयः] 'त्वम् इदानीं मे' प्रियवयस्य एव 'प्रियवयस्यकः' [स्वार्थे कन्] 'संवृत्तः'। 'अस्माकं प्रथमं सौहृदं' सौहृदारम्भः, मैत्रीस्थापनमित्यर्थः [अणि हृदयस्य हृद्। आदिवृद्धिः। अनणि हृद्भावे तु सौहार्द्दमित्युभयपदवृद्धिः स्यात्] 'कादम्बरी' मदिरा 'साक्षिणी' प्रत्यक्षदर्शिनी यस्मिन् तथाविधम् ["साक्षाद्द्रष्टरि संज्ञायाम्" इति इनिः] 'इष्यते' प्रार्थ्यते मया। 'शुण्डा' मदिरा पण्यं यस्य तस्य 'आपणं' पण्यशालां 'गच्छामः'।

प्रवेशयति इति। 'प्रवेशकः' नीचपात्रप्रयुक्तः भाविभूतार्थसूचकः अङ्कसन्धिविशेषः।

NOTES

1. भट्टारक—This is complimentary. The epithet applies to the king. "राजा भट्टारको देवः"—*Darpana*.

2. (a). महत्तरः—There is mental comparison with other dear friends; hence the comparative degree. Or the com-

parison need not be with friends only (See Tika). In that case this is an attributive and प्रियवयस्यक is predicative. The meaning is—Noble as you are I do not hesitate to call you a friend though your origin is low ; you deserve my friendship by the large-heartedness so uncommon among people of your class. (b). कादम्बरी &c.—अम्बर is वस्त्र garment. कुत्सितमम्बरमस्य इति कदम्बरः a mame of बलराम who wore *blue* garments (नीलाम्बर)। तस्य इयम् इति कदम्बर+अण्+ङीप् स्त्रियाम्=कादम्बरी wine मदिरा। "गन्धोत्तमाप्रसन्नेराकादम्बर्य्यः परिस्रुता। मदिरा—" इत्यमरः। सा साक्षिणी यस्मिन्। बहु—। In the बहु—the form should have been कादम्बरसाक्षिणीकम् because कादम्बरी should have पुंवद्भाव and पुंवद्भाव of साक्षिणी is not available. The difficulty may be avoided supposing साक्षिन् to be in the neuter (सामान्ये नपुंसकम्)। Thus कादम्बरी साक्षि यस्मिन् तत्। स्वार्थे कन्। (c). प्रथम &c.—for सौहृद see जननान्तरसौहृदानि, Act V. (d). शौण्डिकापणम्—शुण्डा सुरा पण्यमस्य इति शुण्डा+ठक्=शौण्डिकः wine-seller. आ सम्यक् पणन्ते व्यवहरन्ति अस्मिन् इति आ+पण व्यवहारे+घ अधिकरणे संज्ञायाम=आपणः a shop. Now see *Tika*.

3. प्रवेशकः—प्रवेशयति इति प्र+विश+णिच्+ण्वुल् कर्त्तरि। This differs from a विष्कम्भक in as much as it is acted by inferior characters only. "अन्नीचैः केवलं पात्रैर्भाविभूतार्थसूचनम्। अङ्कयोरुभयोर्मध्ये स विज्ञेयः प्रवेशकः॥"—*Sudhakara* quoted by *Raghava*.

प्रवेशकः—PRELUDE.

(ततः प्रविशत्याकाशयानेन सानुमती नामाप्सराः)। सानुमती—णिव्वत्तिदं मए पज्जाअणिव्वत्तणिज्जं अच्छरातित्थसण्णिज्झं जाव साहुजणस्स अभिसेअकालो, त्ति संपदं इमस्स राएसिणो उदन्तं पच्चक्खीकरिस्सं [निर्वर्त्तितं मया पर्य्यायनिर्वर्त्तनीयम् अप्सरस्तीर्थसान्निध्यं यावत् साधुजनस्याभिषेक-

कालः, इति साम्प्रतमस्य राजर्षेः उदन्तं प्रत्यक्षीकरिष्यामि]। मेणआसम्बन्धेण सरीरभूदा मे शउन्दला। ताए अ दुहिदुणिमित्तं आदिट्ठपुव्वम्हि [मेनकासम्बन्धेन शरीरभूता मे शकुन्तला। तया च दुहितृनिमित्तम् आदिष्टपूर्वास्मि]। (समन्तादवलोक्य) किं णु क्खु उदुच्छवे वि णिरुच्छवारम्भं विअ राअउलं दीसइ। अत्थि मे विहवो पणिधाणेण सव्वं परिण्णादुं। किन्दु सहीए आदरो मए माणइदव्वो [किं नु खलु ऋतूत्सवेऽपि निरुत्सवारम्भमिव राजकुलं दृश्यते। अस्ति मे विभवः प्रणिधानेन सर्वं परिज्ञातुम्। किन्तु सख्या आदरो मया मानयितव्यः]। होदु इमाणं एव्व उज्जाणपालिआणं तिरक्खरिणीपडिच्छण्णा पस्सपरिवत्तिणी भविअ उवलहिस्सं [भवतु अनयोरेव उद्यानपालिकयोः तिरस्करिणीप्रतिच्छन्ना पार्श्वपरिवर्त्तिनी भूत्वा उपलप्स्ये]। (नाट्येनावतीर्य्य स्थिता)।

(*Then enters by aerial flight a nymph named Sanumati*).

SANUMATI—Presence at Apsarstirtha which has to be observed by turns while it is bathing-time for the sages, has been observed by me ; so I shall witness with my own eyes the facts of this royal sage. Through her connection with Menaka, Sakuntala has become like my own self. By her too, for the sake of her daughter, I was previously requested. (*Looking all round*) Why indeed, even in the Spring-festival, does the royal household appear as if without the commencement of festivities? I have the power to know all by meditiation. But my affection for my friend has to be respected by me. Well, shrouded in the veil of disappearance, I will ascertain, having become a constant mover by the sides of these very keepers of the garden.

(*Stands having acted descent*).

'ततः आकाशेन' यत् 'यानं' गमनं तेन [भावे ल्युट् । आप्यप्रयोगात् 'अप्सराः' इत्येकत्वेऽपि]।

साम्प्रतीति। 'यावत्' यत्कालं 'साधुजनस्य' सत्पुरुषाणाम् 'अभिषेककालः' स्नानसमयः तावत् 'पर्य्यायेण' यथाक्रमेण 'निर्वर्त्तनीयं' करणीयम् 'अप्सरस्तीर्थे' हस्तिनापुरसमीपस्थे तीर्थविशेषे यत् 'सान्निध्यम्' उपस्थितिः तत् 'मया निर्वर्त्तितं' कृतं, 'इति' अस्मात् हेतोः 'साम्प्रतम्' अधुना अस्य राजर्षेः 'उदन्तं' वृत्तान्तम् ["वार्त्ता प्रवृत्तिर्वृत्तान्त उदन्तः स्यात्" इत्यमरः] 'प्रत्यक्षीकरिष्यामि' [अव्ययीभावे टच् समासान्तः। ततः अच् मत्वर्थीयः। ततश्व्विः]। 'मेनकया' यः 'सम्बन्धः' शकुन्तलायाः तेन 'शकुन्तला मे शरीरभूता' अशरीरं शरीरं 'भूता' जाता [श्रेण्यादिषु शरीरमित्यपठितमपि कविना दृश्यते]। तदस्ति दुष्यन्तचरितपर्य्यवेक्षणे मदीयः स्वार्थः। न केवलं स्वार्थ एव—'तया' मेनकया 'च दुहिता' शकुन्तला 'निमित्तं' प्रयोजनं यस्मिन् कर्मणि तत् यथा तथा 'पूर्वम् आदिष्टा' ["भूतपूर्वे चरट्" इति ज्ञापकात् पूर्वशब्दस्य परनिपातः] 'अस्मि'—इति मेनकाया आदेशोऽपि अत्र कारणम्। 'समन्तात्' सर्वासु दिक्षु 'अवलोक्य'। 'किं' प्रश्ने 'नु' वितर्के। मिलिते वितर्कगर्भे प्रश्ने। 'खलु' अवधारणे। ऋतुः प्रधानतया वसन्तः। 'ऋतुप्राप्तो' य 'उत्सवः' तस्मिन् [शाकपार्थिवादिः] समागतेऽपि [भावे सप्तमी] 'राजकुलं' भूपतिभवनं 'निर्गतः उत्सवारम्भो' यस्मात् तादृशं 'दृश्यते' [उत्सवारम्भाभावे निश्चयः। तत्कारणं प्रति वितर्कगर्भः प्रश्नः]। 'प्रणिधानेन' 'सर्वं परिज्ञातुं मे विभवः' सामर्थ्यम् 'अस्ति'। अत्र स्थिता एव तत्रत्यं सर्वं ज्ञातुं शक्यते मया 'किन्तु सख्याः' शकुन्तलायाः सम्बन्धे यो मे 'आदरः' स्नेहः स 'मया मानयितव्यः' पूजयितव्यः स्नेहात् प्रत्यक्षं ज्ञातुमुचितं मे। ध्यानेन ज्ञाते तु स्नेहस्य सदृशं न स्यात्। 'भवतु' इति तत्क्षणकृते सङ्कल्पे अव्ययम्। 'तिरस्करिण्या' अदर्शनविद्यया 'प्रतिच्छन्ना' गूढविग्रहा सती 'अनयोः दृश्यमानयोः' 'उद्यानपालिकयोः' प्रमदवनरक्षिण्योः 'पार्श्वे' समीपे 'परिवर्त्तिनी सञ्चारिणी 'भूत्वा' तयोः संलापात् 'उपलप्स्ये' ज्ञास्यामि सर्वम्। 'नाट्येन अवतीर्य्य' भूतलावतरणं नाटयित्वा इत्यर्थः 'स्थिता' उद्यानपालिकयोः पार्श्वे स्थिता।

NOTES

1. (a). साधुजनस्य—जातावेकवचनम्। Or जन means समूह and gives the plural idea. (b). इति—This expresses हेतु। Because (इति) I have done my duty, and have leisure now, I will watch &c. (c). प्रत्यक्षी &c.—अक्ष्णोः प्रति = प्रति + अक्षि + टच् समासान्त by the गणसूत्र "प्रतिपर (?) समनुभ्योऽक्ष्णः" = प्रत्यक्षम् direct vision. अव्ययी— । तत् अस्ति अस्य इति प्रत्यक्ष + अच् मत्वर्थे = प्रत्यक्षः that which is seen. Refers to उदन्त। अप्रत्यक्षं प्रत्यक्षं करिष्यामि इति प्रत्यक्ष + च्वि + कृ + लृट् स्यामि। (d). शरीरभूता—By the rule "श्रेण्यादयः कृतादिभिः" here शरीर is compounded with भूत and gives the sense of च्वि to the compound, *i. e.*, expresses अभूततद्भाव। "श्रेण्यादिषु च्व्यर्थवचनम्"—*Katyayana.* But though भूत is of the कृतादि class, शरीर is not श्रेण्यादि। The samasa is therefore not available. The sense may be got by taking भूत = सम। Thus शरीरेण भूता तुल्या शरीरभूता as dear to me as my own body. There are however instances in which this mode of procedure does not apply. Witness निवासभूता in "सा देवकी सर्वजगन्निवासनिवासभूता नितरां न रेजे"—*Bhagavata.* I think the more reasonable way of dealing with such compounds is to treat them as सुप्सुपा or शिष्टप्रयोग। (e). *Remark*—Two reasons are here given for going to the palace—(i) Love for Sakuntala (शरीरभूता शकुन्तला), (ii) Menaka's command (तया आदिष्टपूर्वा)।

2. (a). किं न खलु—We have here प्रश्न (किम्), वितर्क (नु), and निश्चय (खलु)। निश्चय is about the absence of festivities, and the वितर्कगर्भप्रश्न relates to the cause for the absence. (b). सख्याः—This is ambiguous. The षष्ठी may be शेषे or कर्त्तरि कृद्योगा। See next. Note that the सखी i. e. शकुन्तला *not* मेनका। Comp. "जाने सखी भवती मे वर्त्तते", "यो यः प्रदेशः सख्या मे अभिमतः" &c. *infra* (c). आदरः—आ + दृ + अप् भावे। सख्या आदरः = Esteem for my friend (शेषे षष्ठी), or Friend's request (कर्त्तरि षष्ठी)। The former is preferable, because she mentions only *two* reasons for going to the palace. If Sakuntala had requested her, she would have referred to that too. (d). तिरस्करिणी &c.—तिरस्करोति इति तिरस् = कृ + णिनि कर्त्तरि स्त्रियाम् = तिरस्करिणी। We do not get तिर-

स्मारिणी because as Bhanuji remarks "निपातनाद्वृद्ध्यभावः । संज्ञापूर्वकत्वाद्वा" । I have not been able to verify the निपातन । By संज्ञापूर्वक &c. he refers to the परिभाषा—"संज्ञापूर्वको विधिरनित्यः" । Now वृद्धि is a संज्ञा, hence rules prescribing वृद्धि have violations. This is an instance of such violation. Again by the rule "तिरसोऽन्यतरस्याम्" we get विसर्ग optionally giving the alternative form तिरःकरिणी । प्रति + छद + णिच् + क्त कर्मणि + प्रतिच्छन्ना veiled, *i. e.*, rendered invisible. Now see *Tika.*

(ततः प्रविशति चूताङ्कुरमवलोकयन्ती चेटी । अपरा च पृष्ठतस्तस्याः) । प्रथमा—

आतम्रहरिअपण्डुर वसन्तमासस्स जीअसव्वस्स ।
दिट्ठोसि चूअकोरअ उदुमङ्गल तुमं पसाएमि ॥
[आताम्रहरितपाण्डुर वसन्तमासस्य जीवसर्वस्व ।
दृष्टोऽसि चूतकोरक ऋतुमङ्गल त्वां प्रसादयामि ॥]

(*Then enters a maid-servant gazing at the mango blossom, and another behind her*). FIRST—Copper-coloured, green and pale, each in a slight measure, the all in all of the life of the first spring month, O Mango-blossom, the auspicious opener of the season, thou art seen. I propitiate thee.

द्वितीया—परहुदिए, किं एआइणी मन्तेसि [परभृतिके, किमेकाकिनी मन्त्रयसे] ।

SECOND—Parabhritika, why art thou muttering alone ?

प्रथमा—महुअरिए, चूअकलिअं देक्खिअ उम्मत्तिआ परहुदिआ होदि [मधुकरिके, चूतकलिकां दृष्ट्वा उन्मत्ता परभृतिका भवति] ।

FIRST—Madhukarika, Parabhritika becomes mad on seeing the mango-blossom.

'चूताङ्कुरम् अवलोकयन्ती' नवोद्गतत्वात् सादरं पश्यन्ती। 'चेटी' परिचारिका। 'पृष्ठत:' पश्चात्। द्वी चेट्यौ प्रविशत:। एते एव उद्यानपालिके।

आताम्रे ति। अन्वय:—हे आताम्रहरितपाण्डुर वसन्तमासस्य जीवसर्वस्व ऋतु-मङ्गल चूतकोरक, दृष्टोऽसि, त्वां प्रसादयामि। व्याख्या—हे 'आ' ईषत् 'ताम्र' ताम्रवर्ण 'हरित' श्यामल 'पाण्डुर' शुभ्र, त्रिभिरपि वर्णैः किञ्चित् मिश्र इत्यर्थ: वसन्तमासस्य' प्रथमस्य वासन्तिकमासस्य फाल्गुनस्य 'जीवस्य' जीवनस्य 'सर्वस्व' सारभूत 'ऋतो:' वसन्तस्य 'मङ्गल' प्रथमसूचकत्वात् मङ्गलारम्भभूत 'चूतकोरक' आम्रमुकुल त्वं 'दृष्टोऽसि'। अतएव 'त्वां प्रसादयामि'। प्रसन्नो भव यथा अस्मिन् वसन्तेऽहं सुखं वसेयम्।

द्वितीयेति। हे 'परभृतिके' [परभृतिका इति प्रथमाया नाम] 'किं' कथम् 'एकाकिनी' असहाया 'मन्त्रयसे' जल्पसि।

प्रथमेति। हे 'मधुकरिके' [मधुकरिका इति द्वितीयाया नाम] 'चूतकलिकां' आम्रमुकुलं 'दृष्ट्वा परभृतिका' कोकिला 'उन्मत्ता भवति'। उन्मत्ता एकाकिनी मन्त्रयेत एव, तव कारणं न प्रष्टव्यम्। प्रथमां प्रति द्वितीयाया ऋजु: प्रश्न:। कौतुकप्रिया प्रथमा तु परभृतिका इति श्लेषमालम्ब्य कोकिलापक्षे नीतवती।

NOTES

1. आताम्र &c.—पाण्डु + र अस्त्यर्थे = पाण्डुर: grey. ताम्र: गुण: अस्य अस्ति इति ताम्र + मतुप् = ताम्र: Copper-coloured. मतुप् disappears by the Varttika "गुणवचनेभ्यो मतुपो लुगिष्ट:"। Similarly हरित + मतुप् = हरित: green. हरितश्चासौ पाण्डुरश्च हरितपाण्डुर:। कर्मधा—। ताम्रश्चासौ हरित-पाण्डुरश्च ताम्रहरितपाण्डुर:। कर्मधा—। We compound by parts to avoid a त्रिपदतत्पुरुष which is not usually allowable. आ ईषत् ताम्र-हरितपाण्डुर:। सहसुपेति समास:।

2. परभृतिके—परैर्भृत: परभृत: a cuckoo. स एव इति परभृत + कन् स्वार्थे = परभृतक:। स्त्रियाम् परभृतिका = a female cuckoo. Here, it is the proper name of the maid.

3. मधुकरिके—कन् स्वार्थे तत: स्त्रियां टाप् as in परभृतिका। मधुकरिका is a female bee. This is the name of the second maid.

4. *Remark*—The first maid puns on her own name. She

pretends not to have understood the question as meant for her, but as addressed to female cuckoos in the garden. The reply is then evident—the cuckoo is *mad* with joy on seeing the tree in blossom. The luntic talks to himself, who ever asks him the reason ?

द्वितीया (सहर्षं त्वरया उपगम्य)—कहं उवट्ठिदो महुमासो [कथमुपस्थितो मधुमासः] ।

SECOND (*Hastily approaching with joy*)—How so, has the spring-month come ?

प्रथमा—महुअरिए, तव दाणिं कालो एसो मदविब्भमगीदाणं [मधुकरिके, तव इदानीं काल एष मदविभ्रमगीतानाम्] ।

FIRST—Madhukarika, yours now is the time for amorous songs through intoxication [*Or*—intoxication and amorous songs].

द्वितीया—सहि, अवलम्ब मं जाव अग्गपादट्ठिआ भविअ चूअकलिअं गेह्णिअ कामदेवच्चणं करेमि [सखि, अवलम्बस्व मां यावदग्रपादस्थिता भूत्वा चूतकलिकां गृहीत्वा कामदेवार्चनं करोमि] ।

SECOND—Friend, support me while balanced on the fore-part of the foot having plucked the mango-blossom I perform the worship of Kamadeva.

द्वितीयेति । 'हर्षेण सह त्वरया' द्रुतर्षं 'उपगम्य' प्रथमायाः समीपस्था भूत्वा । 'कथम्' इति आश्चर्य्ये । 'मधोः' वसन्तस्य [मधुशब्दो वसन्ते पुंसि] 'मासः' कालः 'उपस्थितः' प्राप्तः किम् ?

प्रथमेति । हे 'मधुकरिके' [भ्रमरि इति श्लेषः] 'एष इदानीं तव' भ्रमरकामिन्याः 'मदेन' मत्ततया यानि 'विभ्रमगीतानि' विलासगानानि तेषां 'कालः' समयः आगतः । वसन्ते कुसुमितासु वनराजिषु त्वं गायसि, स एष समयस्ते प्राप्तः ।

द्वितीयेति। हे 'सखि यावत्' यत्कालम् 'अग्रयोः पादयोः स्थित्वा' गुल्फे स्थितया दुरापत्वात् अङ्गुलिषु स्थिता सती ["हस्ताग्रग्रहस्तादयो गुणगुणिनोर्भेदाभेदाभ्याम्" इति वामनः] प्रांशुलभ्यां 'चूतकलिकां गृहीत्वा कामदेवस्य अर्चनं करोमि तावत् 'माम् अवलम्बस्व' धारय।

NOTES

1. मधुकरिके &c.—Another pun. Note the poet's choice of contrary characters. The maids are of *different* temperament—one simple and the other full of fun. His 'disciples' (Sarngarava and Saradvata), his 'friends' (Anasuya and Priyamvada) are chosen on the same basis. (b). मद &c.—विभ्रम is विलास grace. विभ्रमयुक्तानि गीतानि विभ्रमगीतानि। शाकपार्थिवादि। मदजानि विभ्रमगीतानि। शाकपार्थिवादि। तेषाम्।

2. अग्रपादस्थिता—The foot is here mentally divided into three portions अग्र, मध्य, पश्चात्। अग्रौ च तौ पादौ च अग्रपादौ the forepart of the feet, *i. e.*, tne toes. कर्मधा—। पादाग्र means the same, but is a षष्ठीतत्—। See Tika. तयोः स्थिता।

प्रथमा—जइ मम वि क्खु अर्द्धं अच्चणफलस्स [यदि ममापि खलु अर्धम् अर्चनफलस्य]।

FIRST—Provided mine too is assuredly half the fruit of the worship.

द्वितीया—अकहिदे वि एदं संवज्जइ। जदो एक्कं एव्व णो जीविदं दुधाट्ठिदं सरीरं [अकथितेऽपि एतत् संपद्यते। यत एकमेव नौ जीवितं द्विधास्थितं शरीरम्]। (सखीमवलम्ब्य चूतप्रसवं गृहीत्वा) अए अप्पबुद्धोऽवि चूअप्पसवो बन्धणभङ्गसुरभी होदि [अये अप्रबुद्धोऽपि चूतप्रसवो बन्धनभङ्गसुरभिर्भवति]। (कपोतहस्तकं कृत्वा)।

अरिहसि मे चूअङ्कुर दिस्रो कामस्स गहीअधनुअस्स ।
पहिअजणजुअइलक्खो पञ्चब्भहिओ सरो होदुं ॥
[अर्हसि मे चूताङ्कुर दत्तः कामस्य गृहीतधनुषः ।
पथिकजनयुवतिलक्ष्यः पञ्चाभ्यधिकः शरो भवितुम् ॥]

(चूताङ्कुरं क्षिपति) ।

SECOND—That is secured without being said; for, our life is but one, body stands in two places. (*Having leant on the friend and plucked the mango-blossom*) Ah! though not full-blown the mango-blossom becomes fragrant by the severing of the stalk. (*Joining the palms*) Offered by me, O mango-blossom, it behoves thee to become, with the young mistresses of the travelling folk for your aim, the most excellent arrow of the five of Kama who has taken up his bow. (*Tosses the mango-blossom*).

प्रथमेति । 'यदि खलु' निश्चितं 'ममापि अर्धनफलस्य अर्द्धं' भवति तदा अवलम्बे, नान्यथा ।

द्वितीयेति । 'अकथिते' त्वया मया वा अनुक्ते 'अपि एतत्' अर्द्धलाभः 'सम्पद्यते' सिध्यति । कारणमाह—'यतो' यस्मात् 'नौ शरीरं द्विधा स्थितं जीवितं' प्राणाः 'एकमेव' । 'अये' इत्याश्चर्य्ये 'चूतप्रसवः' आम्रकलिका 'अप्रबुद्धोऽपि' अविकसितोऽपि 'बन्धनभङ्गेन' वृन्तच्छेदेन 'सुरभिः' घ्राणतर्पणो 'भवति' । 'कपोतहस्तः' इति संज्ञाशब्दः करतलयोः सर्वाङ्गसंश्लेषे वर्त्तते । तमेव [स्वार्थे कन्] 'कृत्वा' अञ्जलिं बद्धा इत्यर्थः । अन्वयः—हे चूताङ्कुर मे दत्तः (सन्) गृहीतधनुषः कामस्य पथिकजनयुवतिलक्ष्यः पञ्चाभ्यधिकः शरो भवितुमर्हसि । व्याख्या—हे 'चूताङ्कुर' सहकारप्रसव 'मे' मया [अव्ययमेतत्] 'दत्तः' सन् 'गृहीतं धनु'र्येन तस्य ["धनुषश्च" इति नित्योऽप्यनङ् कविविवक्षया अकृतः । यद्वा—"गृहीतधनुकस्य" इत्येव पाठः । तत्र धनुशब्दो न सकारान्तः किन्तु उकारान्तः । [स्वार्थे कन्] 'कामस्य पथिकजनानां' पान्थानां या 'युवतयः' तरुण्यो

भार्य्याः, प्रोषितपतिका या रमण्यः ता एव 'लक्ष्य' शरव्यं यस्य तथाविधः 'पञ्चसु' प्रसिद्धेषु शरेषु 'अभ्यधिकः' श्रेष्ठः [निर्द्धारणाभावात् षष्ठीसमासो वा] 'शरो भवितुमर्हसि' युज्यसे। इत्युक्त्वा कन्दर्पमुद्दिश्य 'चूताङ्कुरं' भूमौ 'क्षिपति'।

NOTES

1. (**a**). अप्रबुद्धः—प्र + बुध + क्त कर्त्तरि = प्रबुद्धः lit. one who has awaked from his sleep. The opening of the petals of a flower is likened to the opening of the eyes at the cessation of sleep. Hence प्रबुद्ध means here विकसित full-blown. न प्रबुद्धः। (**b**). बन्धन &c.—बन्धन is वृन्त the stalk. तस्य भङ्गः। तेन सुरभिः।

2. कपोतहस्तकम्—This is the technical name of the usual salute by joining the palms. "कपोतोऽसौ करौ यत्र श्लिष्टमूलाग्रपार्श्वकौ। प्रणामे गुरुसम्भाषे—" *Sangita-ratnakara* quoted by *Raghava*.

3. (**a**). अर्हसि मे—Raghava reads त्वमसि मया;—also कामाय &c. —for कामस्य &c. and भव for भवितुम्। The construction is—हे चूताङ्कुर त्वं मया गृहीतधनुषे कामाय दत्तः असि। पथिकजनयुवतिलक्ष्यः पञ्चाभ्यधिकशरो भव। (**b**). कामस्य—The construction is not कामस्य दत्तः but कामस्य शरः। See *Tika*. (**c**). गृहीतधनुषः—गृहीतधन्वनः is expected with the अनङ् attached. But धनुस् frequently appears without it. Compare "स्वलावण्याशंसा धृतधनुषमङ्गाय तृणवत्", "धृतधनुषं रघुनन्दनं स्मरामि" &c. Or the Prakrita गहीअधनुअस्स = गृहीतधनुकस्य which is perfectly legitimate. In this धनु is उकारान्त meaning "bow." "धनुश्चन्दः पियालद्रौ राशिभेदे धनुष्यपि" इति हैमः। Compare "धनुर्वंशविशुद्धोऽपि निर्गुणः किं करिष्यति"। (**d**). पञ्चाभ्यधिकः—The five arrows of cupid are "अरविन्दमशोकञ्च चूतञ्च नवमल्लिका नीलोत्पलञ्च पञ्चैते पञ्चबाणस्य सायकाः॥" तेषु or तेषाम् अभ्यधिकः। There is no necessity for avoiding the षष्ठीतत्—, because according to Kaiyyata there is no निर्द्धारण here. निर्द्धारण is possible only when the object singled out, the class from which the selection is made, and the attribute which is the basis of selection are present. This is not the case here. Hence we may have पञ्चानाम् अभ्यधिकः the prohibition "न निर्द्धारणे" being inapplicable. Or expounding पञ्चानामभ्यधिकः call it a सुप्सुपा।

(प्रविश्यापटीक्षेपेण कुपितः) कञ्चुकी—मा तावदनात्मज्ञे । देवेन प्रतिषिद्धेऽपि मधूत्सवे चूतकलिकाभङ्गमारभसे ।

(*Entering without removing the curtain, the enraged*) CHAMBERLAIN—That must not be, O thou that knowest not thyself. Commencest thou plucking mango-blossoms even though the spring-festival is prohibited by Sire ?

उभे (भीते)—पसीदतु अज्जो । अग्गहीदत्थाओ वअं [प्रसीदतु आर्यः । अगृहीतार्थे आवाम्] ।

BOTH (*Frightened*)—Let noble sir be pleased, we are uninformed of it.

प्रविश्येति । 'अपटीक्षेपेण' नेपथ्यरङ्गमञ्चयोरन्तराले दत्तं पटम् अपसार्य इति प्राक् व्याख्यातम् । आत्मानं न जानाति या तत्सम्बुद्धौ हे 'अनात्मज्ञे' अविमृश्यकारिणि इत्यर्थः 'मा तावत्' एवं कार्षीः । 'देवेन' दुष्यन्तेन 'मधूत्सवे' वसन्तोत्सवे 'प्रतिषिद्धेऽपि' सति 'चूतकलिकाया भङ्गम् आरभसे' प्रक्रमसे । अधुनैव दण्ड्यासे मया ।

उभे इति । 'आर्यः' मान्यो भवान् 'प्रसीदतु' प्रसन्नो भवतु, कोपं त्यजतु । 'न गृहीतः ज्ञातः 'अर्थः' उत्सवप्रतिषेधरूपं वस्तु याभ्यां तथाविधे 'आवाम्' । अज्ञानादपराद्धं क्षम्यतामावयोरित्यर्थः ।

NOTES

1. (a). अपटी &c.—Explained in Act IV. (b). अनात्मज्ञे—One that does not know himself (*i. e.*, his position) is अनात्मज्ञ । One in the position of a servant cannot act against the orders of the king himself. If he does, he is अनात्मज्ञ—he does not know what he is.

कञ्चुकी—न किल श्रुतं युवाभ्यां यद्वासन्तिकैस्तरुभिरपि देवस्य शासनं प्रमाणीकृतं तदाश्रयिभिः पत्रिभिश्च । तथाहि—

चूतानां चिरनिर्गतापि कलिका बध्नाति न स्वं रजः
सन्नद्धं यदपि स्थितं कुरबकं तत् कोरकावस्थया ।
कण्ठेषु स्खलितं गतेऽपि शिशिरे पुंस्कोकिलानां रुतं
शङ्के संहरति स्मरोऽपि चकितस्तूणार्धकृष्टं शरम् ॥

CHAMBERLAIN—No ! By you two (alone) has not indeed been heard Sire's command which has been obeyed even by the vernal trees and the birds that resort to them ! Thus—The blossom of the mangoes, though issued long ago, does not show its own pollen ; the Kuravaka, even that which is arrayed, stands in the state of the bud ; the note of the male Cuckoo, though the winter has passed, falters in the throat. Methinks, even Smara, startled, replaces the arrow half-drawn from the quiver.

कञ्चुकीति। 'यत् शासनम्' आज्ञा 'वासन्तिकैः' वसन्तकाले पुष्पाद्भिः [कालात् ठञ्] 'तरुभिरपि' पादपैरपि 'तान्' तरून् 'आश्रयन्ते' ये तैः 'पत्रिभिश्च' पक्षिभिश्च 'प्रमाणीकृतं' पालितं, तत् शासनं 'युवाभ्यां न किल श्रुतम्'। किल इत्यरुचौ। नाहं श्रद्दधे अश्रुतं शासनमिति। तरुपक्षिभिः प्रमाणीकरणं प्रपञ्चयति। ;'तथाहि' इति—

अन्वयः—चूतानां कलिका चिरनिर्गतापि स्वं रजो न बध्नाति। कुरवकं यदपि सन्नद्धं तत् कोरकावस्थया स्थितम्। पुंस्कोकिलानां रुतं शिशिरे गतेपि कण्ठेषु स्खलितम्।—शङ्के स्मरोऽपि चकितः तूणार्द्धकृष्टं शरं संहरति। व्याख्या—'चूतानां कलिका' आम्रमञ्जरी [जातावेकवचनम्] 'चिरं निर्गता' प्रकटिता 'अपि स्वम्' आत्मीयं 'रजः' परागं 'न बध्नाति' धत्ते। 'कुरवकं' कुरवककुसुमं 'यदपि' यच्च 'सन्नद्धं' विकाशं प्रति सज्जीभूतं 'तत् कोरकस्य अवस्थया' मुकुलरूपेणैव 'स्थितम्'। 'पुंसां कोकिलानां' कोकिलयूनाम् [संयोगान्तलोपः। रुत्वसत्वे। अनुनासिकत्वे पुंस्कोकिलानाम् इत्यपि] 'रुतं' रवः 'शिशिरे' हिमे 'गतेऽपि' हिमावसानेऽपि 'कण्ठेषु स्खलितं' प्रतिहतं कण्ठ-पर्य्यन्तमायातं न तु बहिर्निःसृतं सत् श्रुतम्। शिशिरात्ययेऽपि, इत्थमप्रबुद्धे चूतकोरके, अप्रफुल्ले कुरवके, संयते च कोकिलालापे 'शङ्के' मन्ये 'स्मरोऽपि' भगवान् मन्मथोऽपि, किं पुनः पक्षिणः पादपा वा, 'चकितः' देवाज्ञया विचलितः सन् 'तूणात् अर्द्धं कृष्टं' शासनघोषणात् प्राक् निष्काशितप्रायं 'शरं संहरति' शुतादेशस्तूणं प्रतिप्रवेशयति ॥ प्रहर्त्तुमना एवासीत् स्मरः। कथमन्यथा निर्गता चूतकलिका, सन्नद्धं कुरवकं, रुत-निरतश्च कोकिलः। परन्तु देवादेशात् न प्रहरति। तादृशोऽप्यादेशो युवाभ्यां न श्रुतः। युज्यते एवैतत् इति वक्रोक्तिः ["कुरवकम्" (रा-)—"कुरुवकम्" (त-,वि-,का-,म-)] ॥

NOTES

1. (a). वासन्तिकं—वसन्ते पुष्यन्ति इति वसन्त+ठञ् वासन्तिकाः those that flower in the spring. This is a वैदिक usage. In भाषा the proper affix is अण् by the rule "सन्धिवेलादि-ऋतु-नक्षत्रेभ्यः अण्" which bars ठञ्। The ठञ् comes in as a प्रतिप्रसव in the Vedas only by the rule "वसन्ताच्च" on which the Vritti remarks "छन्दसि इत्येव। वसन्तशब्दात् छन्दसि विषये ठञ प्रत्ययो भवति शैषिकः"—*Kasika.*

2. (a). कलिका, कुरवकम्, कृतम्—जातावेकवचनम्। (b). स्वम्—Their *own.* Hence what is natural, and therefore expected, has not taken place. (c). सन्नद्धं यदपि &c.—As a rule they are not सन्नद्ध। Even (अपि) those that (यत्) are सन्नद्ध show no further development. (d). *Remark*—The अलङ्कार is उत्प्रेक्षा as indicated by शङ्के। It concerns three facts—(i) स्मरेण शरस्य अर्धकर्षणम्; (ii) ततः शर-संहारः। The bases of the उत्प्रेक्षा are—(*a*) चूतकलिकानिर्गमः, कुरवक-सन्नाहः, पुंस्कोकिलरवः which lead to the surmise (i). (*b*) The second surmise also arises because चिरनिर्गतापि रजो न बध्नाति, सन्नद्धमपि कोरकावस्थया स्थितम्, गतेऽपि शिशिरे कण्ठेषु स्खलितम्। Facts (i) and (ii) being established, a third surmise follows, viz., (iii) देवादेशात् स्मरस्य चकितत्वम्। Raghava has स्वभावोक्ति and विशेषोक्ति in the first three lines. The विशेषोक्ति is according to the modern view. "सति हेतौ फलाभावे विशेषोक्तिः"—*Darpana.* चिरनिर्गम &c. are हेतु and रजोबन्धन &c. are the फल which is here absent. Dandin, however, would not allow the विशेषोक्ति। He defines—"गुणजातिक्रियादीनां यत्तु वैकल्यदर्शनम्। विशेषदर्शनायैव सा विशेषोक्तिरिष्यते॥" Here वैकल्य is फलं प्रति विकलता। Hence his definition applies to those cases only where the फल *is* there, but the *usual* हेतु is insufficient (विकल), the फल being brought about by *something special* (विशेष)। In our case रजसामबन्धनम् &c. are the फल we see, but without any हेतुवैकल्य। Thus this is no case of विशेषोक्ति as Dandin defines it. (e). *Reading*—The reading कुरवक is here preferred, because though commentators of Amara recognise the variant कुरबक, the poet writes कुरवक in "कुरवका रवकारणतां ययुः"—*Raghu.*

सानुमती—णत्थि सन्देहो महाप्पहावो राएसी [नास्ति सन्देहः। महाप्रभावो राजर्षिः]।

SANUMATI—There is no doubt. The royal sage is of great prowess.

प्रथमा—अज्ज कति दिअहाइं अम्हाणं मित्तावसुणा रट्टिएण भट्टिणो पाअमूलं पेसिदाणं [आर्य्ये कति दिवसानि आवयोर्मित्रावसुना राष्ट्रियेण भर्त्तुः पादमूलं प्रेषितयोः]। एत्थ अ णो पमदवणस्स पालनकम्म समप्पिदं। ता आअन्तुअदाए अस्सुदपुव्वो अम्हेहिं एसो वुत्तन्तो [अत्र च नौ प्रमदवनस्य पालनकर्म समर्पितम्। तदागन्तुकतया अश्रुतपूर्व आवाभ्यामेष वृत्तान्तः]।

FIRST—Noble sir, a few days only have passed unto us sent near the feet of Sire by Mitravasu the king's brother-in-law. And here the work of keeping the pleasure gardens was placed with us. Thus through our being strangers, this matter was not heard by us before.

सानुमतीति। स्मरोऽपि चकित इत्यादि यत् शङ्क्यते तत्र 'सन्देहो नास्ति'। 'राजर्षिः' दुष्यन्तः 'महाप्रभावः' प्रबलप्रतापः। तत् चकित एव स्मरः शासनलङ्घनशङ्कया। [मूलम्। (त-, न्या-)—राघवादीनान्तु उद्यानपालिकयोरियमुक्तिः]॥

प्रथमेति। हे 'आर्य्ये राष्ट्रियेण' नगरपालेन राजश्यालेन 'मित्रावसुना भर्त्तुः' स्वामिनः 'पादमूलं' चरणसमीपं 'प्रेषितयोः आवयोः कति' स्वल्पानि 'दिवसानि' [पुंस्त्वेवास्य भूरिप्रयोगः] गतानि। 'अत्र च' इह नगरे च 'नौ प्रमदं' मदजननम् [ण्यन्तादच् कर्त्तरि] 'वनं' तस्य, विहारवनिकाया इत्यर्थः 'पालनकर्म समर्पितम्'। 'तत्' 'तस्मात्' 'आगन्तुकतया' अचिरागमनेन हेतुना 'एष वृत्तान्तः' वसन्तोत्सवप्रतिषेधः 'आवाभ्याम् अश्रुतपूर्वं' इतः पूर्वं न श्रुतः।

NOTES

1. नास्ति सन्देहः &c.—Raghava ascribes this to the maids. But then they would not have referred to the king as राजर्षि। Besides the tone is not that of frightened people, as they presumably were. Moreover, one of them (प्रथमा) continuing to speak, it seems queer that the other should cease. What purpose is served by the two beginning the speech together and one alone finishing it ?

2. (a). कति—किम् + डति। (b). दिवसानि—दिवस is अर्द्धर्चादि, hence both masculine and neuter. (c). राष्ट्रियेण—राष्ट्र is राज्य। राष्ट्रे अधिकृत इति राष्ट्र + घ = राष्ट्रियः the guardian of the peace of the kingdom, the head of the police. The kings brother-in-law is usually appointed to the office. "राजश्यालस्तु राष्ट्रियः" इत्यमरः। (d). आगन्तुकतया—आ + गम + तुन् कर्त्तरि (औणा) = आगन्तुः a guest, a new-comer. "स्युरावेशिक आगन्तुरतिथिर्ना गृहागते" इत्यमरः। आगन्तुरेव इति कन् स्वार्थे। The gist is—We are new-comers here. Only the other day the Super-in-tendent of Police procured us from the mofussil and made a present of us to Sire who kindly employed us to look after this garden.

कञ्चुकी—भवतु, न पुनरेवं प्रवर्त्तितव्यम्।

CHAMBERLAIN—Well, this must not be done again.

उभे—अज्ज कोदूहलं णो, जइ इमिणा जणेण सोदव्वं, कहेदु अज्जो किं णिमित्तं भट्टिणा वसन्तुस्सवो पडिसिद्धो [आर्य कौतूहलं नौ, यदि अनेन जनेन श्रोतव्यं कथयतु आर्यः किं निमित्तं भर्त्रा वसन्तोत्सवः प्रतिसिद्धः]।

BOTH—Noble Sir, our curiosity (is excited) ; if it may be heard by people like us, let your honour tell us for what reason is the vernal festival prohibited by Sire.

सानुमती—उस्सवप्पिआ क्खु मणुस्सा । गुरुणा कारणेण होदव्वं [उत्सवप्रियाः खलु मनुष्याः । गुरुणा कारणेन भवितव्यम्] ।

SANUMATI—Men are indeed fond of festivities. The reason has to be grave.

कञ्चुकी—बहुलीभूतमेतत् किं न कथ्यते । किमत्र भवत्योः कर्णपथं नायातं शकुन्तलाप्रत्यादेशकौलीनम् ।

CHAMBERLAIN—It has thoroughly spread, why not told ? Has not the scandal of Sakuntala's renunciation reached your ears here ?

कञ्चुकी । 'भवतु' यातु तत् । 'पुनः' भूयोऽपि 'एवं न प्रवर्तितव्यं' चूतकलिकाभङ्गादिभिरुत्सवारम्भो न कर्त्तव्यः ।

उभे इति । 'नौ' आवयोः 'कौतूहलं' कुतुकम् 'अस्ति' अस्मिन् विषये । 'यदि अनेन जनेन' चेटीजनेन 'श्रोतव्यं' श्रवणयोग्यं तदा 'किं निमित्तं' केन हेतुना 'भर्त्रा वसन्तोत्सवः प्रतिषिद्धः' तत् 'आर्य्यः कथयतु' ।

सानुमतीति । 'मनुष्याः उत्सवप्रियाः' प्रियोत्सवाः 'खलु' । तथापि उत्सवः प्रतिषिद्धः । तत् मन्ये 'गुरुणा कारणेन भवितव्यम्' ।

कञ्चुकीति । 'बहुलीभूतं' बहुकर्णगतम् 'एतत्' उत्सवप्रतिषेधनिमित्तं 'किं न कथ्यते' । यत् सर्वैः श्रुतं तस्य श्रवणे को दोषः । 'अत्र' अस्मिन् नगरे इहागमनात् परमित्यर्थः 'शकुन्तलायाः प्रत्यादेशात्' निराकरणात् यत् 'कौलीनं' राज्ञो लोकवादः ["स्यात् कौलीनं लोकवादे" इत्यमरः] तत् 'किं भवत्योः कर्णपथं न आयातम्' भवतीभ्यां न श्रुतम् ?

NOTES

1. किं निमित्तम्—Almost all the विभक्तिs are allowable in connection with निमित्त, कारण, हेतु &c. Hence किं निमित्तम्, केन निमित्तेन, कस्मिन् निमित्ते &c. are correct.

2. उत्सवप्रियाः—प्रियः उत्सवो येषां ते। The पूर्वनिपात of प्रिय is optional by the rule "वा प्रियस्य"। Hence प्रियोत्सवाः is also correct.

3. (a). बहुलीभूतम्—अबहुलं बहुलं भूतम् इति बहुल+च्वि+भू+क्त कर्त्तरि has become many, *i. e.*, has spread. गति तत्-। *c. f.* "पौरेषु सोऽहं बहुलीभवत्सम्"। (c). शकुन्तला &c.—कुले भवः इति कुल+ख=कुलीनः noble. तस्य भावः इति कुलीन+अण्=कौलीनम् primarily कुलीनत्वम्, secondarily—That which has to be concealed (गुह्य), *i. e.*, a scandal. "कौलीनं स्यात् कुलीनत्वे गुह्ये—" इति विश्वः। Now see *Tika*.

उभे—सुदं रट्ठिअमुहादो जाव अङ्गुलीअअदंसणं [श्रुतं राष्ट्रियमुखात् यावदङ्गुलीयकदर्शनम्]।

Both—Heard from the mouth of the Governor up to the seeing of the ring.

कञ्चुकी—तेन हि अल्पं कथयितव्यम्। यदैव अङ्गुलीयकदर्शनादनुस्मृतं देवेन सत्यमूढपूर्वा मे तत्रभवती रहसि शकुन्तला मोहात् प्रत्यादिष्टेति तदाप्रभृत्येव पश्चात्तापमुपगतो देवः। तथाहि—

रम्यं द्वेष्टि यथा पुरा प्रकृतिभिर्न प्रत्यहं सेव्यते
शय्याप्रान्तविवर्त्तनैर्विगमयत्युन्निद्र एव क्षपाः।
दाक्षिण्येन ददाति वाचमुचितामन्तःपुरेभ्यो यदा
गोत्रेषु स्खलितस्तदा भवति च व्रीडाविलक्षश्चिरम्॥

Chamberlain—Then indeed little has to be told. When, at the sight of the ring, it was remembered by Sire that her ladyship Sakuntala was really married previously in secret and discarded through delusion, since that very moment Sire has been feeling remorse. Thus—He shuns the delightful; he is

not attended by ministers daily as before. He passes the nights even without a wink by tossing about at the edge of the bed. And, when, through affability, he gives a suitable reply to the inmates of the harem, then, making slips in the names, he remains long perplexed through shame.

उभे इति। 'अङ्गुलीयकस्य दर्शनं यावत्' तत्पर्य्यन्तं सर्वं 'राष्ट्रियस्य मुखात्' [अपादाने पञ्चमी] 'श्रुतम्'।

कञ्चुकीति। 'यदैव अङ्गुलीयकस्य दर्शनात्'—'तत्रभवती' मान्या 'शकुन्तला सत्य'' तत्त्वत एव 'मे' मया [अव्ययमेतत्] 'रहसि' विजने 'पूर्वम् ऊढ़ा' विवाहिता 'मोहात्' मतिभ्रमात् 'प्रत्यादिष्टा' निराकृता—'इति देवेन अनुस्मृतम्' अभिज्ञातं 'तदा' तत्काले 'प्रभृतिः' आदिर्यस्मिन् कर्म्मणि तत् यथा तथा [यदा प्रभृति इत्यव्ययम्] 'देवः पश्चात्तापम् उपगतः' प्राप्तः। अन्वयः—रम्यं द्वेष्टि। यथा पुरा प्रकृतिभिः प्रत्यहं न सेव्यते। उन्निद्र एव शय्याप्रान्तविवर्त्तनैः चपाः विगमयति। यदा दाक्षिण्येन अन्तःपुरेभ्यः उचितां वाचं ददाति, तदा गोत्रेषु स्खलितः (सन्) चिरं व्रीड़ाविलक्षो भवति च। व्याख्या—'रम्य'' काम्यं वस्तु, यदितः पूर्वं प्रीतिकरमासीत् तत् सर्वमित्यर्थः 'द्वेष्टि' अप्रीतिकरमिति त्यजति। रसेषु विरसो देवः। 'यथा पुरा' प्रागिव 'प्रकृतिभिः' अमात्यैः 'प्रत्यहं' प्रतिदिनं 'न सेव्यते'। सम्प्रति कदाचित् प्रकृतिभिः सेवामनुमोदते न प्रत्यहम्। 'उत्क्रान्ता निद्रा' यस्य तादृश 'एव' जाग्रदेव 'शय्यायाः प्रान्तयोः' यानि 'विवर्त्तनानि' दक्षिणे पार्श्वे शयितः चणं दक्षिणप्रान्ते, ततश्च विरक्तः वामपार्श्वपरिवर्त्तनमिच्छन् वामप्रान्ते, भूयश्च दक्षिणप्रान्ते, ततोऽपि पुनर्वामप्रान्ते, इत्येवं क्रमेण यानि परिवर्त्तनानि तैः 'चपाः' निशाः [निशि निशि एवं हृत्त्वात् बहुवचनम्] 'विगमयति' अतिवाहयति। एवं विवर्णमपरो महिषीभिः प्रार्थितः 'यदा दाक्षिण्येन' उदारतया, न तु कामितया 'अन्तःपुरेभ्यो' महिषीभ्यो: [उपचारात् अन्तःपुर इति अन्तःपुरस्थवाचि] 'उचितां' प्रार्थनानुरूपां 'वाचं ददाति, तदा गोत्रेषु' नामसु 'स्खलितः' भ्रष्टः सन् शकुन्तलामयहृदयः शकुन्तलाशब्दमेव उच्चारयन् 'चिरं' दीर्घकालं 'व्रीड़या' लज्जया 'विगतं लक्ष'' लक्ष्यं यस्य तथाविधो विह्वल इत्यर्थः 'भवति च' तिष्ठत्यपि। ["शय्याप्रान्त—" "व्रीड़ाविलक्षः" (रा-, वि-, म-)—"शय्योपान्त" "व्रीड़ावनम्रः" (त-, न्या-)]॥

NOTES

1. तदा प्रभृति—प्रभृति as अवधिवाची gives पञ्चमी as in शैशवात् प्रभृति ; if आरम्भवाची it gives सप्तमी as here.

2. चपाः—अणिकर्त्तुः कर्मसंज्ञा, because वि+गम is अकर्मक ।

3. स्खलितः—स्खल+क्त कर्त्तरि having made a slip.

4. *Readings*—(**a**). शय्यांपान्त means practically the same as शय्याप्रान्त । (**b**). व्रीड़ावनमः is व्रीड़या अवनमः । But अवनम applies better to one *standing* than to a person *lying down*. व्रीड़ाविलक्षः is better.

सानुमती—पिअं मे [प्रियं मे] ।

SANUMATI—Joy to me !

कञ्चुकी—अस्मात् प्रभवतो वैमनस्यादुत्सवः प्रत्याख्यातः ।

CHAMBERLAIN—From this overpowering distraction the festival is prohibited.

उभे—जुज्जइ [युज्यते] ।

BOTH—Quite proper.

नेपथ्ये—एदु एदु भवं [एतु एतु भवान्] ।

IN THE DRESSING ROOM—Proceed, let Your Majesty proceed.

कञ्चुकी (कर्णं दत्त्वा)—अये इत एवाभिवर्त्तते देवः । स्वकर्मानुष्ठीयताम् ।

CHAMBERLAIN (*Listening*)—Ah ! Sire is coming this very way. Let your own work be attended to.

उभे—तह [तथा] । (निष्क्रान्ते) ।

BOTH—As you say, Sir. (*Exeunt*).

अस्मादिति । प्रकर्षेण भवतः 'प्रभवतः' प्रबलात् 'अस्मात्' विमनसः अभिभूतस्य भावः 'वैमनस्यं' मनस्तापः तस्मात् 'उत्सवः प्रत्याख्यातः' ।

अये इति। 'इत एव' अस्यामेव दिशि [सप्तम्यास्तसिः। आद्यादिः] 'अभिवर्त्तते' आगच्छति। 'स्वकर्म' आत्मकार्य्यम् उद्यानरक्षाकर्म 'अनुष्ठीयतां' भवतीभ्याम्।

(ततः प्रविशति पश्चात्तापसदृशवेषो राजा विदूषकः प्रतीहारी च)। कञ्चुकी (राजानमवलोक्य)—अहो सर्वास्ववस्थासु रामणीयकमाकृतिविशेषाणाम्। एवमुत्सुकोऽपि प्रियदर्शनो देवः। तथाहि—

प्रत्यादिष्टविशेषमण्डनविधिर्वामप्रकोष्ठार्पितं
बिभ्रत् काञ्चनमेकमेव वलयं श्वासोपरक्ताधरः।
चिन्ताजागरणप्रतान्तनयनस्तेजोगुणादात्मनः
संस्कारोल्लिखितो महामणिरिव क्षीणोऽपि नालक्ष्यते॥

(*Then enter the King, dressed as in remorse, the Vidushaka and the Warder*).

CHAMBERLAIN (*Beholding the king*)—Oh ! the loveliness of excellent features under all circumstances. Though pining thus, Sire is of pleasing appearance. Thus, with special decorations discarded, wearing only one golden bracelet placed on his left forearm, with the lower lip parched by sighs, with the eyes extremely distressed through care and vigil, he, though wasted, is not noticed as such owing to the virtue of his own lustre, like a great gem scratched by the polisher's file.

तत इति। 'पश्चात्तापस्य सदृशः वेषः सज्जा यस्य तथाविधः।

कञ्चुकीति। 'अहो' विस्मये। 'आकृतेर्विशेषः' अतिशयः। उपचारात् तद्वान्। 'आकृतिविशेषाणां' विशिष्टाकृतीनां 'सर्वासु अवस्थासु रामणीयकं' रमणीयत्वम् [योपधलक्षणो वुञ्]। ["रामणीयकम्" (त-, न्या-)—"रमणीयत्वम्" (रा-, वि-, म-)]॥ 'एवम्' इत्थम् 'उत्सुकोऽपि' उन्मना अपि 'प्रियदर्शनो देवः'। अन्वयः—प्रत्यादिष्टविशेषमण्डनविधिः वामप्रकोष्ठार्पितम् एकमेव काञ्चनं वलयं बिभ्रत्, श्वासोपरक्ताधरः,

चिन्ताजागरणप्रतान्तनयनः (देवः) क्षीणोऽपि संस्कारोल्लिखितो महामणिरिव आत्म-नस्तेजोगुणात् न आलक्ष्यते। व्याख्या—'प्रत्यादिष्टः' परित्यक्तः 'विशेषेण मण्डनस्य' हार-केयूरकुण्डलादिभिरलङ्करणस्य 'विधिः' अनुष्ठानं येन तादृशः अतएव 'वामे प्रकोष्ठे' मणि-बन्धादूर्ध्वप्रदेशे 'अर्पितं' दत्तम् 'एकमेव काञ्चनं' सौवर्णं 'वलयं विभ्रत्' धारयन्, निरा-भरणत्वे दोषं पश्यन् एकमात्रं वलयं दधत् इत्यर्थः, 'श्वासेन' शोकोष्णेन निःश्वासवायुना 'उपरक्तः' अतिरक्ततामापन्नः 'अधरो' यस्य तादृशः, 'चिन्तया' शकुन्तलागतया यत् 'जागरणं' रात्रौ अनिद्रा, तेन 'प्रतान्ते' अतिखिन्ने [कर्त्तरि क्तः] 'नयने' यस्य तथा-विधो देवः एवं प्रजागरादिभिः 'क्षीणोऽपि' 'संस्काराय' अङ्गरागाय 'उल्लिखितः' उत्-कीर्णः अतएव शाणघर्षणकृशः 'महामणिरिव' मणिराज इव, हीरक इव इत्यर्थः 'आत्मनः' स्वस्य 'तेजसो गुणात्' प्रभावात् तेजस्वितया इत्यर्थः 'न आलक्ष्यते' क्षीणतया परिज्ञायते। ["प्रकोष्ठार्पितं" (रा-, वि-, म-)—"प्रकोष्ठे श्लथं" (त-, न्या-) ॥ "श्वासोपरक्तः" (रा-, त-, न्या-)—"श्वासापरक्तः" (वि-, म-) ॥ "प्रतान्त" (रा-, वि-)—"प्रताम्र" (त-, न्या, म-) ॥ "तेजोगुणात्" (रा-, वि-, म-)—"तेजोगुणैः" (त-, न्या-)] ॥

NOTES

1. पश्चात्ताप—&c.—पश्चात् means पश्चाज्जातः। तादृशः तापो यस्य स पश्चात्तापः penitent. Or पश्चात् तापः पश्चात्तापः, कर्मधा—। तस्य सदृशः। तादृशो वेषो यस्य।

2. रामणीयकम्—रम+अनीयर् कर्त्तरि बाहुलकात्=रमणीयः lovely. अनीयर् is usually attached in the कर्म or भाववाच्य। Here by the rule "कृत्यल्युटो बहुलम्" we have it कर्त्तरि। रमणीयस्य भावः इति रमणीय+वुञ्।

3. (a). प्रत्यादिष्ट &c.—विशेषेण मण्डनं विशेषमण्डनम्। तस्य विधिः &c. see *Tika.* (b). वाम &c.—वामः प्रकोष्ठः। तत्र अर्पितः। It is difficult to see why वाम and not दक्षिण। (c). एकम्—Sakuntala too wears only *one* bracelet when love-sick (Act III). (d). श्वासोप &c.—उपरक्त is deep-red. अपरक्त means colourless. But hot breath is likely to *deepen* the colour. उपरक्त therefore seems better. (e). चिन्ता &c.— प्र+तम ग्लानौ+क्त कर्त्तरि=प्रतान्त distressed. प्रताम्र is *deeply* copper-coloured. *Slightly* copper-coloured eyes are a महापुरुषलक्षण। *c.f.* "रक्ताक्षो दुन्दुभिस्वनः—" *Ramayana.*

सानुमती (राजानं विलोक्य)—ठाणे क्खु पच्चादेसविमाणिदा वि इमस्स किदे सउन्दला किलम्मदि [स्थाने खलु प्रत्यादेशविमानितापि अस्य कृते शकुन्तला क्लाम्यति]।

SANUMATI (*Beholding the King*)—Rightly indeed does Sakuntala, though disgraced by rejection, pine for this person.

राजा (ध्यानमन्दं परिक्रम्य)—
प्रथमं सारङ्गाक्ष्या प्रियया प्रतिबोध्यमानमपि सुप्तम्।
अनुशयदुःखायेदं हतहृदयं सम्प्रति विबुद्धम्॥

KING (*Going round the stage slowly in deep meditation*)—Previously asleep though being roused by my fawn-eyed darling, for remorse has this wretched heart now awaken.

सानुमतीति। 'प्रत्यादेशेन' प्रत्याख्यानेन 'विमानिता' अवमानिता 'अपि शकुन्तला अस्य' दुष्यन्तस्य 'कृते' दुष्यन्तार्थम् इत्यर्थः [कृते इत्यव्ययम्] 'क्लाम्यति' तप्यते इति 'स्थाने खलु' युक्तमेव ["युक्ते द्वे साम्प्रतं स्थाने" इत्यमरः]। अहो रूपम् इति भावः।

राजेति। 'ध्यानेन' चिन्तया 'मन्दं' मन्थरं यथा तथा 'परिक्रम्य'। अन्वयः—प्रथमं सारङ्गाक्ष्या प्रियया प्रतिबोध्यमानमपि सुप्तम् इदं हतहृदयं सम्प्रति अनुशयदुःखाय विबुद्धम्॥ व्याख्या—'प्रथमं' पूर्वं प्रत्यादेशकाले 'सारङ्गस्य' मृगस्य इव 'अक्षिणी' नयने यस्या तथाविधया मृगलोचनया ["सप्तम्युपमान—" इति बहुव्रीहिः। स्वाङ्गात् षच्। षित्वात् ङीष्] 'प्रियया' शकुन्तलया 'प्रतिबोध्यमानमपि' जागर्य्यमाणमपि 'सुप्तं' निद्रितम् 'इदं' मे 'हतं' निन्दितं 'हृदयं' मानसं 'सम्प्रति' अधुना 'अनुशयस्य' पश्चात्तापस्य ["भवेदनुशयो द्वेषे पश्चात्तापानुबन्धयोः" इति मेदिनी] यत् 'दुःखं' तदर्थं 'विबुद्धं' जागरितम्। कर्त्तव्ये जागरणे नैव जागरितम्, अकर्त्तव्ये तस्मिन् जागरितम् इति दुष्टता हृदयस्य। तदाह हतहृदयमिति।

NOTES

1. (a). सारङ्गाक्ष्या—With such eyes, she was incapable of guile. Hence प्रतिबोध उचित आसीत्। (b). प्रियया—She was my

darling अत: स्वापोऽनुचित:। (c). प्रतिबोध्यमानम्—Slept though aroused. प्रिया सा तथापि सुप्तम्। सुप्तञ्च स्वयमप्रबुद्धम्, प्रतिबोधितमपि न विबुद्धम्। This is what happened in the first (प्रथमम्) instance. But the wretched thing does not continue to sleep. *Now* (सम्प्रति) it is विबुद्धम्, and for what? अनुशयदु:खाय। This is the climax of perversity (हतहृदयम्)।

सानुमती—णं ईदिसाणि तवस्सिणिए भाअहेआणि [ननु ईदृशानि तपस्विन्या भागधेयानि]।

SANUMATI—Well, such is her destiny, poor thing.

विदूषक: (अपवार्य्य)—लङ्घिदो एसो भूओ वि सउन्दलावाहिणा। ण आणे कहं चिकिच्छिदव्वो भविस्सदि त्ति [लङ्घित एष भूयोऽपि शकुन्तलाव्याधिना। न जाने कथं चिकित्सितव्वो भविष्यतीति]।

VIDUSHAKA (*Aside*)—Yet again he is over-come by the Sakuntala-sickness. I do not know how he is to be treated.

कञ्चुकी (उपसृत्य)—जयतु जयतु देव:। देव प्रत्यवेक्षिता: प्रमदवनभूमय:। यथाकाममध्यास्तां विनोदस्थानानि देव:।

CHAMBERLAIN (*Advancing*)—Prosper, let Sire prosper! Sire, the grounds of the pleasure-garden have been inspected. Let Sire occupy the sites of recreation at pleasure.

सानुमतीति। 'तपस्विन्या' दीनाया: अनुकम्प्याया वा शकुन्तलाया: ["तपस्वी तापसे दीने" इति हैम:। "अनुकम्प्यस्तपस्वी स्यात्" इति त्रिकाण्डशेष:] 'भागधेयानि' भाग्यानि 'ईदृशानि ननु'। दीनां प्रति वामे विधौ एवमसदृशमभूत् इत्यर्थ:।

विदूषक इति। 'एष: भूयोऽपि शकुन्तलाजनितेन शकुन्तलानिमित्तेन' वा 'व्याधिना' रोगेण [शाकपार्थिवादि:] 'लङ्घित:' अभिभूत:। 'कथं' केनोपायेन 'चिकित्सितव्य:' प्रतिकर्त्तव्य: 'भविष्यति इति न जाने' [कित इत्यस्मात् व्याधिप्रतीकारार्थे स्थितात् स्वार्थे सन्]।

कञ्चुकीति। 'प्रमदवनस्य भूमयः' ते ते प्रदेशाः 'प्रत्यवेक्षिताः' निपुणदर्शनेन मनीषितापसारणात् शोधिताः ["कारयेद्दनविशोधनमादौ" इत्युक्तेः] 'विनोदस्थानानि' रम्यास्तास्ता भूमयः 'यथाकामं' स्वेच्छया, निर्भयम् इत्यर्थः 'अध्यास्ताम्' अधितिष्ठतु 'देवः' ["अधिशीङ्स्थासां कर्म" इत्याधारस्य कर्मता]।

NOTE

1. चिकित्सितव्यः—कित व्याधिप्रतीकारे + सन् स्वार्थे + तव्य कर्मणि। The सन् is attached स्वार्थे not इच्छार्थे by the rule "गुप्तिज्किद्भ्यः सन्" on which the Vritti remarks "निन्दाक्षमाव्याधिप्रतीकारेषु सन्निष्यते, अन्यत्र यथाप्राप्तं प्रत्यया भवन्ति"। Hence when कित means 'to remedy a disease' (व्याधिप्रतीकार) it takes सन् other-wise not. Here Bhattoji differs slightly and gives a few other senses also.

राजा—वेत्रवति, मद्वचनादमात्यमार्य्यपिशुनं ब्रूहि—चिरप्रबोधात् न सम्भावितमस्माभिरद्य धर्मासनमध्यासितुम्। यत् प्रत्यवेक्षितं पौरकार्य्यमार्य्येण तत् पत्रमारोप्यदीयतामिति।

KING—Vetravati, tell my minister, the noble Pisuna, in my words, this—"Through late rising it is not possible for me to occupy the judgment-seat to-day. Let the affairs of the citizens that have been examined by his noble self be forwarded after they have been put on paper."

प्रतीहारी—जं देवो आणवेदि [यत् देव आज्ञापयति]। (निष्क्रान्ता)।

WARDER—What Sire commands. (*Exit*).

राजा—वातायन, त्वमपि स्वं नियोगमशून्यं कुरु।

KING—Vatayana, you too do not vacate your place.

कञ्चुकी—यदाज्ञापयति देवः। (निष्क्रान्तः)।

CHAMBERLAIN—As Sire commands. (*Exit*).

राजेति। 'मद्वचनात्' मद्वचनमवलम्ब्य [ल्यब्लोपे पञ्चमी] 'आर्यं' मान्य "पिशुनं' तदाख्यम् 'अमात्यं' मन्त्रिणं 'ब्रूहि'—'चिरेण' दीर्घकालेन 'प्रबोधात्' जागरणात्, वेलातिक्रमादित्यर्थः 'अद्य अस्माभिः धर्मासनं' विचारासनम् 'अध्यासितुम्' आरोढुं, 'न सम्भावितं' धर्मासनारोहणमसम्भवमित्यर्थः [अलमर्थयोगात् तुमुन्]। 'पत्रमारोप्य' पत्रस्थं कृत्वा [अणिकर्त्तुः कर्मसंज्ञा]।

वातायनेति। 'स्वं नियोगम्' आत्माधिकारम्, अन्तःपुररक्षाकर्म इत्यर्थः 'अशून्यं कुरु' स्वोपस्थित्या पूर्णं विधेहि।

NOTES

1. (a). सम्भावितम्—सम्+भू+णिच्+क्त कर्मणि। Primarily it means पूजित ; thence युक्त, समर्थ, &c. (b). अध्यासितुम्—तुमुन् in connection with सम्भावित which is अर्हार्थ or अलमर्थ। Or, after the भावकार, by the maxim 'अव्ययकृतो भावे' we have अध्यासितुम्=अध्यासनम् and धर्मासनम् अध्यासितुम्=धर्मासनस्य अध्यासनम्। The construction then is अस्माभिः धर्मासनस्य अध्यासनम् न सम्भावितम्।

2. वातायन &c.—Vatayana is the name of the कञ्चुकिन्। त्वमपि &c. occurs also in Act II.

विदूषकः—किदं भवदा निम्मच्छिअं। सम्पदं सिसिरातवच्छेअरमणीए इमस्सिं पमदवणुद्देसे अत्ताणं रमइस्ससि [कृतं भवता निर्मक्षिकम्। साम्प्रतं शिशिरातपच्छेदरमणीये अस्मिन् प्रमदवनोद्देशे आत्मानं रमयिष्यसि]।

VIDUSHAKA—You have rendered the place free of flies even. You will now soothe thyself in this region of the pleasure-garden which is lovely in the interval between winter and summer.

राजा (निश्वस्य)—वयस्य यदुच्यते रन्ध्रोपनिपातिनोऽनर्था इति तदव्यभिचारि वचः। पश्य—

मुनिसुताप्रणयस्मृतिरोधिना मम च मुक्तमिदं तमसा मनः।
मनसिजेन सखे प्रहरिष्यता धनुषि चूतशरश्च निवेशितः॥

KING (*Sighing*)—Friend, that is an unfailing statement which is expressed by 'Unwelcome things crowd at loop-holes.' Behold—O friend, this mind of mine too is left by the gloom that obstructed the recollection of the wooing of the sage's daughter, the shaft of the mango-blossom too is placed on the bow by Cupid about to strike.

विदूषक इति। 'भवता निर्मक्षिकं कृतम्' इति व्याख्यातं प्राक्। इतरे जनाः त्वया अपसारिता इत्यर्थः। 'साम्प्रतम्' अधुना ["साम्प्रतन्त्वचितेऽधुना" इति हैमः] 'शिशिरः' शीतः, आतपो ग्रीष्मः, इति द्वौ ऋतू। तयोः 'छेदः' अन्तरालं वसन्त इति यावत। तस्मिन् 'रमणीये' पुष्पपल्लवोद्गममनोहरे। यद्वा 'शिशिरस्य आतपस्य च छेदात्' अभावात् 'रमणीये' मनोहरे 'अस्मिन् प्रमदवनस्य उद्देशे' प्रदेशे 'आत्मानं रमयिष्यसि'। रम्याणि कुसुमानि रम्याणि च पल्लवानि दृष्ट्वा विनोदं लप्स्यसे इत्यर्थः।

राजेति। 'अनर्थाः' अनिष्टानि 'रन्ध्रे', छिद्रे दुःसमये इत्यर्थः 'उपनिपतन्ति' समीपस्था भवन्ति 'इति यदुच्यते' लोकैः 'तत् वचः' वाक्यम् 'अविद्यमानो व्यभिचारः' अनित्यता यस्मिन् तादृशम्। सदैव सत्यं तद्वचनम्। अन्वयः—हे सखे पश्य मुनिसुता-प्रणयस्मृति तिरोधिना तमसा मम इदं मनो मुक्तञ्च, प्रहरिष्यता मनसिजेन धनुषि चूतशरो निवेशितश्च। व्याख्या—हे 'सखे पश्य' तस्य वचसो नित्यतामालोकय। 'मुनेः' कण्वस्य 'सुतायां' शकुन्तलायां यः 'प्रणयः' अभिलाषः तद्विषयिणी या प्रार्थना इत्यर्थः, तस्य या 'स्मृतिः' तां 'रुणद्धि' यत् तेन स्मृतिलोपिना 'तमसा' मोहेन 'मम इदं मनो मुक्तञ्च' त्यक्तञ्च, इत्येकोऽनर्थः, तत्क्षणमेव 'प्रहरिष्यता' प्रहर्त्तुमिच्छुना 'मनसिजेन' आत्मभुवा कामेन [बहुलग्रहणात् अलुकि मनसिजः। क्वचिल्लुकि मनोज इत्यपि] 'धनुषि चूतशरः' आम्रमुकुलाख्यः पञ्चाभ्यधिको बाणः 'निवेशितश्च' स्थापितश्च। द्वौ चकारौ यौगपद्यं गमयतः। यदि मूढ एव तिष्ठेयं कोऽप्यनर्थो न स्यात्। प्रबुद्धोऽधुना दुःखमनुभवामि इत्येकोऽनर्थः। तदैव दुःखं वर्द्धयन् प्राप्तो वसन्त इति द्वितीयस्तत्रानर्थः। तद्ब्रवीमि अव्यभिचारि वच इति।

NOTES

1. (a). कृतं भवता &c.—See Act II. (b). शिशिर &c.—We take

छेद = interval. Raghava explains "नात्यन्तं शिशिरं नात्यातपः" taking छेद = cessation.

2. रन्ध्र &c.—Compare "छिद्रेष्वनर्था बहुलीभवन्ति"।

3. मुनिसुता &c.—मुनेः सुता। तस्यां प्रणयः। तस्य स्मृतिः। तां साधुकारिणि इति साधुकारिणि शिनिः।

विदूषकः—चिट्ठ दाव जाव इमिणा दण्डकट्ठेण कन्दप्पबाणं णासेमि [तिष्ठ तावत् यावदनेन दण्डकाष्ठेन कन्दर्पबाणं नाशयामि]। (दण्डकाष्ठमुद्यम्य चूताङ्कुरं पातयितुमिच्छति)।

VIDUSHAKA—Well, wait till I destroy Cupid's arrow with this staff. (*Raising his staff wishes to bring down mango-blossoms*).

राजा (सस्मितम्)—भवतु, दृष्टं ब्रह्मवर्चसम्। सखे क्वोपविष्टः प्रियायाः किञ्चिदनुकारिणीषु लतासु दृष्टिं विलोभयामि।

KING (*With a smile*)—Very well, the Brahmanical prowess is seen. Friend, where seated shall I regale my sight among the creepers that slightly imitate my darling?

विदूषकः—णं आसण्णपरिआरिआ भवदा संदिट्ठा माहवीमण्डवे इमं वेलं अदिवाहिस्सं, तहिं मे चित्तफलअगदं सहत्थलिहिदं तत्तहोदीए सउन्दलाए पडिकिदिं आणेहि त्ति [ननु आसन्नपरिचारिका चतुरिका भवता संदिष्टा—माधवीमण्डपे इमां वेलाम् अतिवाहयिष्ये, तत्र मे चित्रफलकगतां स्वहस्तलिखितां तत्रभवत्याः शकुन्तलायाः प्रतिकृतिम् आनय—इति]।

VIDUSHAKA—Well, you have told your maid-at-hand Chaturika, this—I will pass this part of the day in the Madhavi bower; bring there the portrait of her ladyship Sakuntala which is on the painting-board drawn with my own hand.

विदूषक इति। 'यावत्' यत्कालम् 'अहमनेन दण्डस्य' मदीयाया यष्टेः 'काष्ठेन कन्दर्पस्य बाणं' चूतकलिकां 'नाशयामि तावत्' तत्कालं 'तिष्ठ' स्थिरो भव।

राजेति। 'ब्रह्मणो' ब्राह्मणस्य 'वर्चः' तेजः ["तेजः पुरीषयोर्वर्चः" इत्यमरः] 'ब्रह्मवर्चस' ब्रह्मतेजः [अच् समासान्तः] तत् 'दृष्ट' विदितं मे, तत्ख्यापनेनालम् इत्युपहासः। 'सखे क्व' कुत्र 'उपविष्टः' सन् 'प्रियायाः किञ्चित्' ईषत् न सम्यक् 'अनुकारिणीषु' तत्सदृशीषु [ताच्छील्ये णिनिः] 'लतासु दृष्टिं विलोभयामि' विमोहयामि दर्शनसुखमनुभवामि। दर्शनात् स्मृतिः ततः सुखमिति द्रष्टव्यम्।

विदूषक इति। 'ननु' आक्षेपे। 'आसन्ना' समीपचारिणी 'परिचारिका' चेटी। 'चतुरिका' इति परिचारिकानाम। 'इमां वेलां' प्रातःकालम् 'अतिवाहयिष्ये'। 'चित्रस्य फलकः' पट्टः, चित्रलेखनपट्ट इत्यर्थः तं 'गतां' चित्रफलकस्थां 'स्वहस्तेन लिखितास्' । सादृश्यदर्शनं लतासु, प्रतिकृतिदर्शनं फलके, इति परमं विरहरमणं माधवीमण्डपे भविता इति भावः।

NOTES

1. (a). यावत् तावत्—These here refer to the *instant* when the arrow is destroyed. Hence being असत्त्ववचन they are अव्यय। (b). नाशयामि—Present for the future by the rule "यावत्पुरा निपातयोर्लट्"।

2. ब्रह्मवर्चसम्—The अच् as a समासान्त is guided here by the rule "ब्रह्महस्तिभ्यां वर्चसः" giving ब्रह्मवर्चस instead of ब्रह्मवर्चस्। (c). विलोभयामि—वि + लुभ विमोहने + णिच् + लट् मिप्। विमोहन is आकुलीकरण to disturb. Sight (दृष्टि), being *disturbed*, will be deceived by the resemblance with Sakuntala and feel the pleasure of actually seeing her.

राजा—ईदृशं हृदयविनोदस्थानम्। तत्तमेव मार्गमादेशय।

KING—Such now are the means of my heart's diversion. So show me that very way.

विदूषकः—इदो इदो भवं [इत इतो भवान्]।

VIDUSHAKA—This way your Highness, this way.

(उभौ परिक्रामतः—सानुमत्यनुगच्छति)। विदूषकः—एसो मणिसिलापट्टअसनाहो माहवीमण्डवो उवहाररमणिज्जदाए अ साअदेण विअ पडिच्छदि तुमं। ता पविसिअ णिसीददु भवं [एष मणिशिलापट्टकसनाथो माधवीमण्डप उपहाररमणीयतया च स्वागतेन इव प्रतीच्छति त्वाम्। तत् प्रविश्य निषीदतु भवान्]। (उभौ प्रविश्योपविष्टौ)।

(*The two go round the stage—Sanumati follows*).

VIDUSHAKA—Here, the Madhavi-bower, provided with a rock-crystal-slab, and owing to the loveliness of its offerings, receives you with welcome as it were. So, having entered, you sit down. (*Both enter and are seated*).

राजेति। 'ईदृशं' सादृश्यप्रतिकृतिदर्शनात्मकम्। 'हृदयस्य' तत्तहृदयस्य 'विनोदस्थानं' खेदोपशमोपायः। 'तमेवमार्ग'' माधवीमण्डपमार्गम्।

विदूषक इति। 'एष माधव्या' लतायाः 'मण्डप. मणिशिलायाः' मणिमयशिलायाः 'पट्टकेन' फलकेन 'सनाथः' युक्तः सन् 'उपहारस्य' उपायनीकृतस्य आत्मनः कुसुमराशेः 'रमणीयतया च' माधुर्य्येण च हेतुना 'स्वागतेन' शोभनमागमनं ते, इत आस्यताम्, अत्र कुसुमसौरभमनुभूयताम्, इति स्फुटेन वचसा 'त्वां प्रतीच्छति इव' प्रत्युद्गमनेन सम्भावयति इव। 'तत्' तस्मात् 'प्रविश्य निषीदतु' उपविशतु भवान्।

NOTES

1. ईदृशम्—The original (शकुन्तला) is lost, and I have to divert myself with her resemblance in creepers and her image in the canvas. In such (ईदृशम्) now lies my solace.

2. (a). मणिशिला &c.—पट्ट एव पट्टकः। मणिमयी शिला मणिशिला। नाथेन सह सनाथः provided with a protector. The secondary sense is युक्त provided with. मणिशिलायाः पट्टकः। तेन सनाथः। (b). उपहार &c.—The creeper is in blossoms. The blossoms are supposed to be so many *bouquets* presented (उपहार) to the king by the bower.

3. (a). स्वागतेन इव—The words "स्वागतं ते" are of course not heard, but from the nice presents and the inviting crystal-slab, the bower seems as if it has actually pronounced them. (b). प्रतीच्छति—प्रति + इष means here "to receive."

सानुमती—लदासंस्सिदा देक्खिस्सं दाव सहीए पडिकिदिं । तदो से भत्तुणो बहुमुहं अनुराअं णिवेदयिस्सं [लतासंश्रिता द्रक्ष्यामि तावत् सख्याः प्रतिकृतिम् । ततस्तस्यै भर्त्तुर्बहुमुख-मनुरागं निवेदयिष्यामि] । (तथा कृत्वा स्थिता) ।

SANUMATI—Betaking to this creeper I will see my friend's picture. I will then report to her her husband's overflowing affection. (*Stands having done as described*).

राजा—सखे, सर्वमिदानीं स्मरामि शकुन्तलायाः प्रथम-वृत्तान्तम् । कथितवानस्मि भवते च । स भवान् प्रत्यादेश-समये मत्समीपगतो नासीत् । किन्तु पूर्वमपि न त्वया कदाचित् सङ्कीर्त्तितं तत्रभवत्या नाम । कच्चिदहमिव विस्मृत-वानसि त्वम् ।

KING—Friend, I now remember the whole early history of Sakuntala. I related it to you also. That self of thine was not present with me at the time of her repudiation. But, even before, her ladyship's name was never mentioned by you. Could it be, that, like me, you forgot it ?

सानुमतीति । 'लतां संश्रिता' आश्रिता लतालीना भूत्वा । 'बहूनि मुखानि' यस्य तादृशं, शतधारं स्रवन्तमित्यर्थः ।

राजेति । 'शकुन्तलायाः प्रथमवृत्तान्तम्' आश्रमे परिचयादिकम् । 'सः' विदित-सर्ववृत्तान्तो 'भवान् प्रत्यादेशस्य' परित्यागस्य 'समये' हंसपदिकासकाशं प्रेषितः 'मत्-समीपगतो नासीत्' । समीपं यदि भवानभविष्यः नूनं नामस्मारयिष्यः ॥ 'किन्तु

पूर्वमपि' प्रत्यादेशात् प्रागपि 'त्वया कदाचित् तत्रभवत्याः' शकुन्तलाया 'नाम न संकीर्त्तितं' संशब्दितम् उच्चारितम्। 'कच्चित्' इह प्रश्नमात्रे। त्वमपि विस्मृतवान् किम् अन्यथा कथं तद्विषये ईदृशं मौनम्।

NOTE

1. मज्झमोप &c.—Vidusaka was sent to Hamsapadika (see Act V).

विदूषकः—ण विसुमरामि। किन्दु सव्वं कहिअ अवसाणे उण तुए भणिदं परिहासविअप्पओ एसो ण भूदत्थो त्ति। मए वि मिप्पिण्डबुद्धिणा तह एव्व गहिदं। अहदा भविदव्वदा क्खु बलवदी [न विस्मरामि। किन्तु सर्वं कथयित्वा अवसाने पुनस्त्वया भणितं परिहासविजल्प एष न भूतार्थ इति। मया अपि मृत्पिण्डबुद्धिना तथा एव गृहीतम्। अथवा भवितव्यता खलु बलवती]।

VIDUSHAKA—I do not forget. But having told all, it was again remarked by you, at the end, that this was a story in joke, not truth, and by me, with an intellect like a lump ot clay, it was indeed taken as such. Or, verily, destiny is powerful.

सानुमती—एव्वं णेदं [एवं नु एतत्]।

SANUMATI—So it is indeed.

राजा—(ध्यात्वा) सखे त्रायस्व माम्।

KING (*Meditating*)—Friend, save me !

विदूषक इति। 'अवसाने' वाक्यशेषे। 'परिहासेन परिहासस्य वा विजल्पः' विविधो जल्पः मिथ्यारचना 'एष न भूतः' सत्यः 'अर्थः' "परिहासविजल्पितं सखे परमार्थेन न गृह्यतां वचः" 'इति भणितं' कथितम्। 'मृदां पिण्डः' चयः इव

तत्त्वदर्शनविमूढ़ा 'बुद्धिः' यस्य तथाविधेन जड़मतिना 'मया अपि तथैव' परिहास-विजल्परूपेणैव 'गृहीतं' ज्ञातम्। 'अथवा' पक्षान्तरे किमनया पर्य्यालोचनया। अत्र विषये 'भवितव्यता' अवश्यम्भावरूपदार्थस्य शक्तिः 'बलवती खलु'। एवमेव भवितव्य-मित्येवं भूतम्।

सानुमतीति। 'एतत्' अवालोच्यं वस्तु 'एवं नु' ईदृशमेव, भवितव्यतानिबन्धनमेव।

NOTE

1. भवितव्यता—भू+तव्य भावे=भवितव्यम् sure happening. तस्य भावः inevitability. "कृदभिहितो भावो द्रव्यवत् प्रकाशते"; hence भवितव्य is द्रव्यवत् and as such, there is no incongruity in attaching a भावतद्धित to it. This thing was predestined to happen, and it has happened.

विदूषकः—भो किं एदं। अणुववण्णं क्खु ईदिसं तुइ। कदापि सप्पुरिसा सोअवत्तव्वा ण होन्ति। णं पवादे वि णिक्कम्पा गिरीओ [भोः किमेतत्। अनुपपन्नं खलु ईदृशं त्वयि। कदापि सत्पुरुषाः शोकवास्तव्या न भवन्ति। ननु प्रवातेऽपि निष्कम्पा गिरयः]।

VIDUSHAKA—Hollo! What is this? Such is really unbecoming in thee. Good (Wise) men never become the abode of grief Mountains are certainly quiverless even in a high gale.

राजा—वयस्य, निराकरणविक्लवायाः प्रियायास्तामवस्था-मनुस्मृत्य बलवदशरणोऽस्मि। सा हि—

Trans. इतः प्रत्यादेशात् स्वजनमनुगन्तुं व्यवसिता *
स्थिता तिष्ठेत्युच्चैर्वदति गुरुशिष्ये गुरुसमे।
पुनर्दृष्टिं वाष्पप्रसरकलुषामर्पितवती
मयि क्रूरे यत्तत् सविषमिवशल्यं दहति माम्॥

KING—Friend, recollecting that state of my darling distressed by repudiation, I have become utterly helpless.

Through disowning from hence, she indeed attempted to follow her own people, but stopped on her father's disciple, who was her father's equal, loudly calling out "Stay", and again cast on my cruel self her look disturbed by the flow of tears—It is all this that burns me like a poisoned shaft.

विदूषक इति। 'ईदृशं' एवं प्रकारकं वस्तु, कातरभावः इत्यर्थः 'त्वयि अनुपपन्नं खलु' अयुक्तमेव। 'सत्पुरुषाः' साधवः 'कदापि' महत्यपि व्यसने इति यावत् 'शोकस्य वास्तव्याः' वासस्थानानि [वाहुलकादधिकरणे तव्यत्। आदिवृद्धिः] 'न भवन्ति'। 'प्रवातेऽपि' प्रकृष्टेऽपि वाते 'गिरयो निष्कम्पा ननु'।

राजेति। 'निराकरणेन' प्रत्याख्यानेन 'विक्लवायाः' विह्वलायाः 'प्रियायाः' शकुन्तलायाः 'ताम्' अतिदीनाम् इत्यर्थः 'अवस्थाम् अनुस्मृत्य' ध्यायन् 'बलवत्' अत्यर्थम् 'अशरणः' निरालम्बः 'अस्मि'। अन्वयः—इतः प्रत्यादेशात् हि सा स्वजनमनुगन्तुं व्यवसिता, गुरुसमे गुरुशिष्ये तिष्ठ इति उच्चैः वदति स्थिता, वाष्पप्रसरकलुषां दृष्टिं पुनः क्रूरे मयि अर्पितवती—(इति) यत् तत् सविषं शल्यमिव मां दहति। व्याख्या—'इतः' अस्मात् जनात्, मत्त इत्यर्थः प्राप्तः यः 'प्रत्यादेशः' निराकरणं तस्मात् 'हि सा स्वजनं' शार्ङ्गरवादिकम् 'अनुगन्तुम्' अनुयातुं 'व्यवसिता' उद्युक्ता। ततः 'गुरुणा' पित्रा कण्वेन 'समे' तुल्ये 'गुरोः शिष्ये' :क्रावे शार्ङ्गरवे 'तिष्ठ' विरम अनुगमनात् 'इति उच्चैः' गभीरं 'वदति' सति 'स्थिता' गमनात् विरता। ततश्च 'वाष्पाणां' नेत्रजलानां 'प्रसरः' प्रवृत्तिः, तेन 'कलुषाम्' आविलां 'दृष्टिं पुनः' भूयोऽपि 'क्रूरे' निष्ठुरे 'मयि अर्पितवती' मामशरणां प्रति सानुक्रोशो वाधुना इति जिज्ञासया दत्तवती। 'इति' एतत् सर्वं 'यत् तत् सविषं' विषदिग्धं 'शल्यं' शङ्कुः 'इव मां दहति' सन्तापयति। मत्तस्त्राता स्वान् गता, तैरपि त्यक्ता पुनर्मामेव प्राप्ता सा, क्रूरस्त्वहं तथापि विमुख एवासम्। अद्य पुनस्तत्सर्वं स्मृत्वा अशरणोऽहम् इत्याशयः।

["प्रत्यादेशात्" (रा·, वि·, म·)—"प्रत्यादिष्टा" (त·, न्या·)॥ "स्थिता" (त·, न्या·)—"मुहुः" (रा·, वि·, म·) ॥ "प्रसर" (रा·, वि·)—"प्रकर" (त·, न्या·, म·)]॥

NOTES

1. शोकवास्तव्याः—उष्यते एषु इति वस+तव्यत् अधिकरणे बाहुलकात्=वास्तव्याः abode. We note that वास्तव्य is allowed in the कर्तृवाच्य only by the Varttika "वसेस्तव्यत् कर्त्तरि णिच्च"—वस may take तव्यत् in the कर्त्तृवाच्य and then it will act as if it had dropped णु, *i. e.*, it will cause आदिवृद्धि। But then वास्तव्य will mean that which resides, *i. e.*, resident. It thus becomes a विशेषण of शोक and if we make a बहुव्रीहि with the वाक्य—शोको वास्तव्यो येषु—the compound will be वास्तव्यशोक instead of शोकवास्तव्य। It seem better to appeal to the rule "कृत्यल्युटो बहुलम्" by which a form which is sanctioned in any given वाच्य with a कृत्य or ल्युट् may be used in any other वाच्य in accordance with शिष्टप्रयोग। "कृत्यसंज्ञकाः प्रत्यया ल्युट् च बहुलमर्थेषु भवन्ति, यत्र विहितास्ततोऽन्यत्रापि भवन्ति"—*Vritti.* We may then have वास्तव्य in the अधिकरणवाच्य। शोकस्य वास्तव्याः। Raghava reads शोकवक्तव्याः and explains "शोके जाते अन्येन वक्तव्या न भवन्ति" which is hardly satisfactory.

2. (a). इतः—अपादाने पञ्चमी। पञ्चम्यास्तस्। (b). प्रत्यादेशात्—हेतौ पञ्चमी। The reading—प्रत्यादिष्टा requires इतः to have तसि in तृतीया। इतः अनेन जनेन मया इत्यर्थः प्रत्यादिष्टा निराकृता। तसि in तृतीया may be defended by classing इतः with आद्यादि words. But इतः already occurs in the list with तसि in the सप्तमी as in "प्रयुक्तमप्यस्त्रमितो वृथा स्यात्"। We may have it in तृतीया *or* सप्तमी but *not* with *both.* This is why प्रत्यादिष्टा is rejected, though otherwise it is an excellent reading that gives a perfect picture of the "अवस्था" in order of time. Thus first प्रत्यादिष्टा then व्यवसिता, next स्थिता and lastly अर्पितवती। (c). व्यवसिता—वि+अव+सो+क्त कर्त्तरि attempted. (d). स्थिता—मुहुः is not perhaps a happy reading. For गुरुसमे implies obedience and immediate attention to his commands. But मुहुः seems to indicate that his command had to be repeated several times before it was obeyed. The two are not consistent.

3. बाष्प &c.—प्रकार for प्रसर is sanctioned by Bhoja. प्रकारणम्

इति प्र+कॄ+अप् भावे=प्रकरः scattering, collection ; hence, समूहः। वाष्पाणां प्रकरः a flood of tears. &c.

सानुमती—अम्महे ईदिसी सकज्जपरदा। ईमस्स संदावेण अहं रमामि [अम्महे ईदृशी स्वकार्य्यपरता। अस्य सन्तापेन अहं रमे]।

SANUMATI—Ah ! such is devotion to self-interest ! I am pleased by his affliction.

विदूषकः—भो अत्थि मे तक्को केण वि तत्तहोदो आआसचारिणा णीदेत्ति [भोः. अस्ति मे तर्कः केनापि तत्रभवती आकाशचारिणा नीतेति]।

VIDUSHAKA—Well, I have a guess that her ladyship was carried off by some aeronaut.

सानुमतीति। 'स्वकार्य्यपरता' स्वार्थनिष्ठता 'ईदृशी' एतादृशी भवति। तदेव दर्शयति—'अस्य' राजर्षेः 'सन्तापेन' दुःखेन 'अहं रमे' सुखमनुभवामि। शकुन्तलाकृते अस्य दुःखमेव मे तोषाय। 'अम्महे' इत्याश्चर्य्ये। यदेकस्य दुःखं तदेवान्यस्य सुखमित्याश्चर्य्यम्।

विदूषक इति। 'केनापि आकाशचारिणा' व्योमविहारिणा देवयोनिना 'तत्रभवती' शकुन्तला 'नीता—इति मे तर्कः' अनुमानम् 'अस्ति' इत्यहं तर्कयामि।

NOTE

1. केनापि &c.—This is intended as a consolation. She is not dead, so you may hope for reunion. He is more explicit below "यद्येवम् &c."

राजा—कः पतिदेवतामन्यः परामष्टुमुत्सहेत। मेनका किल सख्यास्ते जन्मप्रतिष्ठा इति श्रुतवानस्मि। तत्सहचारिणीभिः सखी ते हृतेति मे हृदयमाशङ्कते।

KING—Who else could dare touch one to whom the husband is a god? I have heard that Menaka is your friend's place of birth. My heart suspects that your friend was carried off by her companions.

सानुमती—सम्मोहो क्खु विम्हअणिज्जो ण पड़िबोहो [सम्मोहः खलु विस्मयनीयः न प्रतिबोधः]।

SANUMATI—The delusion indeed is to be wondered at, not the awakening.

विदूषकः—जइ एव्वं अत्थि क्खु समाअमो कालेण तत्तहोदीए [यद्येवम् अस्ति खलु समागमः कालेन तत्रभवत्या]।

VIDUSHAKA—If so, there is indeed union with her ladyship in time.

राजा—कथमिव।

KING—How so?

राजेति। 'मेनका किल' [किल इत्यैतिह्ये] 'ते सख्याः' शकुन्तलायाः 'जन्मप्रतिष्ठा' जन्मस्थानम् ["प्रतिष्ठा स्थानमात्रके" इति विश्वः] 'इति' सखीमुखात् 'श्रुतवानस्मि'। 'तस्याः' मेनकायाः 'सहचारिणीभिः' सखीभिः अप्सरोभिः 'ते सखी हृता इति मे हृदयम् आशङ्कते'। 'अन्यः कः पतिदेवता' यस्याः तथाविधां पतिव्रतां 'परामष्टुं' स्पर्शेन दूषयितुम् 'उत्सहेत' यतेत [शक्ति लिङ्]।

सानुमतीति। ईदृशस्य सप्रतिभस्य जनस्य 'सम्मोहः खलु' मतिभ्रम एव 'विस्मयनीयः' विस्मययोग्यः 'न प्रतिबोधः'। प्रबुद्ध एवायं सदा, तदस्य ईदृशे यथार्थे बोधे को विस्मयः? किन्तु पुरायमप्रबुद्ध आसीत् इति विस्मयकरम् इति भावः।

NOTES

1. (a). पतिदेवताम्—It is supposed that by devotion to the husband a woman acquires a majesty that repels evil-doers. (b). जन्मप्रतिष्ठा—प्रति + स्था + अङ् अधिकरणे = प्रतिष्ठा seat स्थानम्। जन्मनः प्रतिष्ठा।

2. कालेन—अपवर्गे तृतीया।

विदूषकः—ण क्खु मादापितरा भत्तुवियोगदुक्खिदं दुहिदरं चिरं देक्खिदुं पारेन्ति [न खलु मातापितरौ भर्त्तृवियोगदुःखितां दुहितरं चिरं द्रष्टुं पारयतः]।

VIDUSHAKA—Certainly the father and the mother are unable long to see their daughter grieved by separation from her husband.

राजा—वयस्य,

स्वप्नो नु माया नु मतिभ्रमो नु क्लिष्टं नु तावत्फलमेव पुण्यम्।
असन्निवृत्त्यै तदतीतमेते मनोरथानामतटप्रपाताः॥

KING—Friend, that thing which has passed never to come back was a dream, or a spell of magic, or a hallucination, or again merit worn out with only that much of reward. These are the precipices for my wishes to drop from.

विदूषक इति। 'माता' च 'पिता' च 'भर्त्रा' पत्या 'वियोगेन' विरहेण 'दुःखितां दुहितरं चिरं द्रष्टुं न खलु पारयतः' तन्मन्ये मेनका स्वयमेव उभयोः युवयोर्योगं विधास्यति।

राजेति। अन्वयः—असन्निवृत्त्यै अतीतं तत् स्वप्नो नु, माया नु, मतिभ्रमो नु, तावत्फलमेव क्लिष्टं पुण्यं नु। हे वयस्य एते मनोरथानाम् अतटप्रपाताः। व्याख्या—'न सन्निवृत्तिः' पुनरागमनम् 'असन्निवृत्तिः'। तस्यै, अपुनरावृत्तये 'अतीतं' गतं 'तत्' पूर्वानुभूतं शकुन्तलासमागमरूपं वस्तु 'स्वप्नो नु' स्वप्नो वा [नु इति विकल्पे]। अथवा नाहं तदा सुप्तः कुतः स्वप्नः? तत् मन्ये 'माया नु' केनचित् रिपुणा मयि प्रयुक्ताम् इन्द्रजालं वा। किन्तु सर्वजनप्रियोऽहं नास्ति मे शत्रुः, तत् नेयं माया। भवतु तर्हि 'मतिभ्रमो नु' बुद्धिविकारो वा, तेन अतत्त्वे शकुन्तलाख्ये पदार्थे तत्त्वभ्रान्तिर्मे जाता। तथा चेत् स्यात् अधुना प्रसन्नायां मतौ मिथ्यारूपेण बोधो जायेत, न च पुनर्जायते। तत् अस्तु 'तावत्' तत्परिमाणं 'फलं' यस्य तादृशमेव अतएव 'क्लिष्टं' सम्प्रति क्षीणं 'पुण्यं नु'। तेनाहं तदा सत्यमेव शकुन्तलया मिलितः इदानीं प्रक्षीणे पुण्ये तथा वियुक्तः। एते

चतुर्ष्वपि पक्षेषु तया पुनः समागमोऽसम्भवः। अतएव हि 'वयस्य एते' :चत्वारः पक्षाः 'मनोरथानाम्' अभिलाषाणां, पुनःसमागमाभिलाषाणामित्यर्थः 'अतटरूपाः' तुङ्गशैलाग्रूपाः 'प्रपाताः' अधःपतनस्थानानि। स्वप्नमायामतिभ्रमैः कृतानां मिथ्यात्वात् तेषां पुनःप्राप्तिः असम्भवा। पुण्यस्य च क्लिष्टत्वात् तथैव। तत् यथा शैलाग्रात् पतितो न प्रत्यावर्त्तते, तथैव ममाप्ययं पुनःसमागमाभिलाषो न सम्पत्स्यते। ["क्लिष्टम्" (रा-, वि-, म-)—"क्लृप्तम्" (त-, न्या-) ॥ "पुण्यम्" (रा-, वि-, म-)—"पुण्यैः" (त-, न्या-) ॥ "तदतीतमिति" (रा-, वि-)—"तदतीव मन्ये" (त-, न्या-)—"तदतीतमेव" (म-) ॥ "—प्रपाताः" (रा-, वि-)—"—प्रपातम्" (त-, न्या-)—"—प्रपातः" (म-)] ॥

NOTES

1. मातापितरौ—माता च पिता च। द्वन्द्वः। मातृ becomes माता by the rule "आनङ् ऋतो द्वन्द्वे"—In a द्वन्द्व compound of ऋकारान्त words the पूर्वपद becomes आकारान्त when the words imply विद्यासम्बन्ध or योनिसम्बन्ध। Again there are optional forms (i) मातरपितरौ by निपातन in the rule "मातरपितरावुदीचाम्", (ii) पितरौ by एकशेष by the rule "पुमान् स्त्रिया"।

2. (a). *Remark*—Here are *four* hypotheses, each replacing the previous one. (i) *The Sakuntala affair was a dream.* No, it could not be a dream, because I was not asleep at the time ; besides, a dream leaves no impression of reality when the sleeper is awake. (ii) *Possibly it was a spell of magic.* But who was the magician to direct it against me ? I have no enemies. It was not magic. (iii) *I suppose it was a delusion, a hallucination of my mind.* Well then, my mind being clear now it would not have produced in me the idea of actual experience. What was it then ? (iv) *I must have really enjoyed her company, but the luck, that procured me the felicity, having worn out, the thing has vanished.* Whichever of these be true, I can not hope to see her again. Raghava construes differently

thus—तत् असन्निवृत्त्यै अतीतम् (What thing has gone never to come back). स्वप्नो नु, मतिभ्रमो नु, तावत्फलमेव क्लिष्टं पुण्यं नु (Was it a dream, or some magic, or a delusion, or merit exhausted bearing only that much of fruit ?). एते मनोरथा नाम तटप्रपाताः (These are the wishes like erosions of river-banks). I leave it to the reader to make sense out of it. (b). क्लिष्टं नु &c.—I did some good work in a prior birth, and through the merit thus accquired, I was rewarded with the company of Sakuntala. But the merit is now exhausted (क्लिष्टम्)। एव emphasises the quantity. Only to that much of reward, and no more, was my wretched self entitled. (c). असन्निवृत्त्यै—सम् + नि + वृत + क्तिन् भावे = सन्निवृत्तिः return. न सन्निवृत्तिः। तस्यै। तादर्थ्ये चतुर्थी। (d). एते—Refers to the *four*—स्वप्न &c. Raghava has एते मनोरथाः। (e). मनोरथानाम्—रथा इव रथाः like chariots (लक्षणा)। मनसो रथा मनोरथाः wishes. Wish is the chariot on which the mind travels. तेषाम्। Raghava breaks up the last line into मनोरथा नाम तटप्रपाताः and remarks "नाम इत्यलीके, अलीका मनोरथा इत्यर्थः"। (f). अतटप्रपाताः—अतट is भृगु a precipice. प्रपतन्ति एभ्यः इति प्र + पत + घञ् अपादाने = प्रपाताः stations to leap from. When one leaps from a precipice one is killed. These *four* are so many precipices for my hopes to leap from, *i. e.*, they leave no room for hope to revive.

विदूषकः—मा एव्वं। णं अङ्गुलीअअं एव्व णिदंसणं अवस्सम्भावी अचिन्तणिज्जसमागमो होदित्ति [मा एवम्। ननु अङ्गुलीयकमेव निदर्शनम् अवश्यम्भावी अचिन्तनीयसमागमो भवतीति]।

VIDUSHAKA—Do not think so. Why, the ring itself is an instance that what is sure to happen may be of inconceivable access [*Or*—that of which the access in inconceivable, happens if destined to happen].

राजा (अङ्गुलीयकं विलोक्य)—अये इदं तावदसुलभ-स्थानभ्रंशि शोचनीयम् ।

तव सुचरितमङ्गुलीय नूनं प्रतनु ममेव विभाव्यते फलेन ।
अरुणनखमनोरमासु तस्याश्च्युतमसि लब्धपदं यदङ्गुलीषु ॥

KING (*Looking at the ring*)—Ah ! fallen from a not-easily-accessible place, this has indeed to be pitied. Surely, by your reward, O Ring, your merit too is inferred to be very small ; for with a footing secured on her fingers, beautiful on account of the ruddy nails, you have become dislodged.

विदूषकः । 'एवं मा' भण । 'ननु' इति परमताक्षेपे । 'अवश्यम्भावी' अवश्यमेव भविता पदार्थः 'अचिन्तनीयः' अप्रतर्क्यः 'समागमो' लाभो यस्य तादृशो 'भवति इति' अस्मिन् विषये 'अङ्गुरीयकमेव निदर्शनं' दृष्टान्तः । यद्वा—'अचिन्तनीयसमागमः अवश्यम्भावी' पदार्थः 'भवति' घटते 'इति' अत्र विषये 'अङ्गुरीयकमेव निदर्शनम्' । जले पतितस्य मत्स्येन च गिलितस्य अङ्गुलीयस्य पुनः प्राप्तिः अचिन्तनीया । किन्तु अवश्यम्भाविनी सा घटिता एव । तेन मन्ये शकुन्तलापि लब्धव्या ते ।

राजेति । 'अये' इति स्मृतौ । विदूषकेण अङ्गुलीयकशब्दे उच्चारिते स्मृतिः । 'असुलभं' दुष्प्रापं यत् 'स्थानं' शाकुन्तलाङ्गुलिः, तस्मात् 'भ्रश्यति' यत् तादृशम् 'इदम्' अङ्गुलीयं 'शोचनीयं तावत्' शोच्यमेव । अन्वयः—हे अङ्गुलीय, फलेन विभाव्यते, तव सुचरितं नूनं मम इव प्रतनु । यत् अरुणनखमनोरमासु तस्याः अङ्गुलीषु लब्धपदं च्युतमसि । व्याख्या—हे 'अङ्गुलीय फलेन' त्वया अनुभूतेन फलेन 'विभाव्यते' अनुमीयते—'तव सुचरितं' पुण्यं 'नूनं' निश्चितं 'मम इव प्रतनु' अत्यल्पम् । कुत एवमनुमानम् इत्याह—'यत्' यस्मात् 'अरुणैः' आरक्तैः 'नखैः मनोरमासु' मनोहरासु 'तस्याः' शकुन्तलायाः 'अङ्गुलीषु' [प्रथममनामिकायां निवेशितमासीद्राज्ञा । ततो दिनेषु गच्छत्सु विरहकृशया तया क्रमात् मध्यमां तर्जनीञ्च नीतम् । इति बहुवचनमङ्गुलीष्विति] 'लब्धं' प्राप्तं 'पदं' स्थानं येन तथाविधं सत् 'च्युतमसि' भ्रष्टमसि । पुण्यमासीत् ते चरितं, तेन तत्र पदमधाः । परन्तु स्वल्पं तत् पुण्यं, ततश्च्युतमसि । अहमपि पुण्येन

अङ्गुलतया निलितः, किन्तु चोणि पुण्ये त्वमिवाधुना तया हीनः शोच्यः। ["ममैव... मनोरमासु" (रा-, वि-, म-)—"क्रमेन...मनोहरासु" (त-, न्या-) ॥

NOTES

1. (a). निदर्शनम्—निदर्श्यते अनेन इति नि+दृश्+णिच् +ल्युट् करणे an instance. (b). अवश्यम्भावी—अवश्यम् is a मान्त अव्यय meaning inevitable, inevitably &c. according to the context. अवश्यम् भवतीति अवश्यम्+भू+णिनि कर्त्तरि आवश्यके that which inevitably happens, i. e., the inevitable. (c). अचिन्तनीय &c.—सम्+आ+गम+अप् भावे= समागमः meeting, access. (d). भवति—is. That which is अवश्यम्भावी is (भवति) अचिन्तनीयसमागम। Or भवति=Happens. That which is अचिन्तनीयसमागम, and अवश्यम्भावी too, does happen (भवति), i. e., if a thing is अवश्यम्भावी, it surely happens notwithstanding that it is अचिन्त्यनीयमागम।

2. तव सुचरितम् &c.—Here Raghava quotes from the सामुद्र—"नातिह्रस्वा नातिदीर्घा न स्थूला न कृशा अपि। अवक्राः सरला रक्तनखा। रक्ता अपि॥ कोमलाः सितविन्द्वाढ्या अङ्कुरा दीप्तिमन्नखाः। [illegible] सा भवेद्राजवल्लभा॥"

सानुमती—जइ अण्णहत्थगदं भवे सच्चं एव्व सोअणिज्जं भवे [यदि अन्यहस्तगतं भवेत् सत्यमेव शोचनीयं भवेत्]।

SANUMATI—Had it become lodged in another's hand, really it would have been miserable.

विदूषकः—भो इमं णाममुद्दा केण उद्देसेण तत्तहोदिए हत्थब्भासं पाविदा [भोः इयं नाममुद्रा केन उद्देशेन तत्रभवत्या हस्ताभ्यासं प्रापिता]।

VIDUSHAKA—Well, with what object was this signet ring placed within the reach of that noble lady ?

सानुमती—मम वि कोदूहलेण आआरिदो एसो [ममापि कौतूहलेन आकारित एषः]।

SANUMATI—This person too has been urged by my curiosity.

सानुमतीति। यथा शकुन्तला रमणीषु रूपेण, तथा दुष्यन्तोऽपि पुरुषेषु। तन्मन्ये दुष्यन्तस्य अङ्गुलौ स्थितमङ्गुलीयकमधुनापि सुचरितफलं भुञ्जानम् अशोच्यम् इति भाव:।

विदूषक इति। मुद्र्यते अनया इति 'मुद्रा' [अङ् करणे]। 'नाम्नो: मुद्रा' उत्कीर्णनामाक्षरमङ्गुरीयकं 'केन उद्देशेन' किमुद्दिश्य [कर्मणि घञ्] 'तत्रभवत्या: हस्तस्य अभ्यासं' समीपम् ["अभ्यासोऽभ्यसनेऽन्तिके" इति विश्व:] 'प्रापिता' नीता। केन प्रयोजनेन तस्यै एतदङ्गुरीयकं दत्तम् इत्यर्थ:।

सानुमतीति। 'एष' विदूषकोऽपि 'मम कौतूहलेन आकारित:' प्रेरित:। अहमपि अङ्गुलीयकदानस्य कारणं ज्ञातुमिच्छामि इत्यर्थ:।

NOTES

1. (a). नाममुद्रा—मुद्र्यते अनया इति मुद्र + अङ् करणे = मुद्रा seal. (b). उद्देशेन—हेतौ तृतीया।

2. (a). ममापि—अपि goes with एष:। (b). आकारित:—आ + कारि means "to urge" प्रेरण। Comp. "आकारय भोजनाय", "आकारय वरदानाय" &c.

राजा—श्रूयताम्। स्वनगराय प्रस्थितं मां प्रिया सबाष्पमाह कियच्चिरेणार्य्यपुत्र: प्रतिपत्तिं दास्यतीति।

King—Listen. This, with tears, my darling asked me as I was about to start for my capital—"After what length of time, will my husband send me news"?

विदूषक:—तदो तदा [ततस्तत:]।

Vidushaka—Then, what then?

राजा—पश्चादिमां मुद्रां तदङ्गुलौ निवेशयता मया प्रत्यभिहिता—

एकैकमत्र दिवसे दिवसे मदीयं
नामाक्षरं गणय गच्छसि यावदन्तम्।
तावत् प्रिये मदवरोधगृहप्रवेशं
नेता जनस्तवसमीपमुपैष्यतीति॥

तच्च दारुणात्मना मया मोहान्नानुष्ठितम्।

KING—Then, as this signet ring was being placed by me on her finger, she was answered thus—Darling, do you count the letters of my name here, day by day, one at a time. By the time you reach the end, the person that will lead you to the entrance of my inner apartments will appear near you—And through delusion that was not done by this cruel-hearted self of mine.

राजेति। 'स्वनगराय' स्वनगरं हस्तिनापुरम् [पाक्षिकी चतुर्थी। पक्षे द्वितीया] 'प्रस्थितं मां प्रिया सबाष्प'' सजललोचनम् 'आह' उवाच [आह इत्युवाचार्थे अव्ययम्]। किमाह ?—कियत् किंपरिमाणं चिरं 'कियच्चिरं' तेन [अपवर्गे तृतीया] 'आर्यपुत्रः प्रतिपत्तिं' प्रवृत्तिं वार्त्तामित्यर्थः ["प्रतिपत्तिः प्रवृत्तौ च" इति मेदिनी] 'दास्यति' प्रेषयिष्यति 'इति' आह।

राजेति। 'पश्चात्' तदुक्तेः परम् 'इमां मुद्रां तस्या अङ्गुली निवेशयता' स्थापयता 'मया' सा 'प्रत्यभिहिता, प्रत्युक्ता। अन्वयः—हे प्रिये अत्र दिवसे दिवसे एकैकं मदीयं नामाक्षरं गणय। यावत् अन्तं गच्छसि तावत् मदवरोधगृहप्रवेशं नेता जनस्तव समीपम् उपैष्यति इति। व्याख्या—हे 'प्रिये' शकुन्तले 'अत्र' अस्मिन् अङ्गुरीये 'दिवसे दिवसे' प्रतिदिनम् [वीप्सायां द्विर्वचनम्] 'एकम् एकम्' एकमेव न द्वे त्रीणि वा [स्वार्थे अवधार्यमाणे द्विर्वचनम्। बहुव्रीहिवद्भावः] 'नाम्नः अक्षरं गणय'। 'यावत्' यत्कालम् 'अन्तम्' अक्षराणामवसानं 'गच्छसि' गमिष्यसि [यावता लट्] 'तावत्' तत्कालं 'मम अवरोधगृहस्य' अन्तःपुरभवनस्य 'प्रवेशं' द्वारं 'नेता' प्रापको 'जनः' [ताच्छील्ये तृण्। "न लोक—" इति षष्ठीनिषेधः] 'तव समीपम्' अन्तिकम् 'उपैष्यति' अभिगमिष्यति 'इति' एतत् मयाभिहिता इति पूर्वेण सम्बन्धः। झटित्येव वार्त्तां लप्स्यसे इति भावः। ["गच्छसि" (त-, वि-, न्या-, म-)—"गच्छति" (रा-)]॥ "गृहप्रवेशम्" (रा-, वि-, म-)—"निदेशवर्त्ती" (त-, न्या-)]॥ 'तच्च' नेतृप्रेरणं 'दारुणात्मना' क्रूरहृदयेन 'मया मोहात् न अनुष्ठितम्'।

NOTE

1. (a) एकैकम्—The sense is एकमेव प्रतिदिनम्। Hence there

is वीप्सा in दिवस but not in एक। The rule "नित्यवीप्सयोः" applies to दिवस but not to एक। We refer to the Varttika "साकाङ्क्षमवधार्यमाणे एकस्मिन् द्वे भवत इति वक्तव्यम्"—repitition may be allowed even when speaking of one thing, if the meaning of the word repeated is emphasised. (b). गच्छसि—"यावत् पुरा निपातयोर्लट्" इति लट् in a future sense. (c). अवरोध &c—अवरुध्यन्ते अस्मिन् इति अव+रुध+घञ् अधिकरणे=अवरोधः harem. प्रविशत्यनेन इति प्र+विश+घञ् करणे=प्रवेशः entrance. अवरोधस्य गृहम्। तस्य प्रवेशः। तम्।

सानुमती—रमणीओ क्खु अवही विहिणा विसंवादिदो [रमणीयः खलु अवधिः विधिना विसंवादितः]।

SANUMATI—An appointment, charming indeed, was, by the Ordainer, caused to clash.

विदूषकः—कहं धीवलकप्पिअस्स लोहिअमच्छस्स उदलब्भन्तले आसि [कथं धीवरकल्पितस्य रोहितमत्स्यस्य उदराभ्यन्तरे आसीत्]।

VIDUSHAKA—How did it get inside the belly of the Rohita fish cut up by the fisher-man ?

राजा—शचीतीर्थं वन्दमानायाः सख्यास्ते हस्ताद्गङ्गास्रोतसि परिभ्रष्टम्।

KING—It slipped into the current of the Ganges from the hand of your friend as she was doing obeisance to the Sachi-Tirtha.

विदूषकः—जुज्जइ [युज्यते]।

VIDUSHAKA—Quite possible.

सानुमती—अदो एव्व तवस्सिणीए सउन्दलाए अधम्मभीरुणो इमस्स राएसिणो परिणए संदेहो आसि। अहवा ईदिसो अणुराओ अहिण्णाणं अवेक्खदि कहं विअ एदं [अत

एव तपस्विन्याः शकुन्तलाया अधर्मभीरोरस्य राजर्षेः परिणये सन्देह आसीत्। अथवा ईदृशः अनुरागः अभिज्ञानमपेक्षते कथमिवैतत्]।

SANUMATI—Hence indeed arose the doubt of this sin-fearing royal sage about the marriage of poor Sakuntala. Or how is this that such an affection awaits a token?

सानुमतीति। 'रमणीयः' प्रतिदिनम् इष्टजननामकीर्त्तने व्यापृतत्वात् मनोरमः 'खलु अवधिः' विरहस्य अवधिः सीमा 'विधिना' दैवेन 'विसंवादितः' विसंवादी विहितः। नामाक्षराणाम् अन्तः, नेतुरागमनम्, इत्यविसंवादः—अत्र पुनः अन्तः प्राप्तः नेता तु नागतः इति विसंवादः।

विदूषक इति। 'धीवरेण कल्पितस्य' खण्डशः कृतस्य इति विद्यासागरपादाः।

सानुमतीति। 'अतएव' अङ्गुलीयकप्रणाशादेव। 'अधर्मात्' पापात् 'भीरोः' तेन परस्त्रीस्पर्शशङ्किनः 'परिणये सन्देह आसीत्'। नैतदलं सन्देहाय इति मत्वा अनुध्यन्ती आह—'अथवा' पक्षान्तरे 'ईदृशः' सार्वभौमः 'अनुरागः अभिज्ञानं' परिचायकमङ्गुरीयादिकम् 'अपेक्षते' काङ्क्षति 'एतत् कथमिव' कीदृशम्? उत्कटोऽनुरागः असत्यभिज्ञाने नश्यति इति न बुध्यते मया।

NOTE

1. (a). विसंवादितः—वि + सम् + वद + णिच् + क्त कर्मणि caused to disagree. Or वि + सम् + वद + घञ् भावे = विसंवादः disagreement. विसंवादेन योजितः इति विसंवाद + णिच् + क्त कर्मणि by the Varttika "प्रातिपदिकाद्धात्वर्थे बहुलमिष्ठवच्च"। (b). अवधिः—अव + धा + कि भावे। A limit सीमा।

राजा—उपालप्स्ये तावदिदमङ्गुलीयकम्।

KING—I will surely rebuke this ring.

विदूषकः (आत्मगतम्)—गहीदो णेण पन्था उम्मत्ताणं [गृहीतोऽनेन पन्था उन्मत्तानाम्]।

VIDUSHAKA (*To himself*)—The course of the mad is now adopted by him.

राजा—

कथं नु तं बन्धुरकोमलाङ्गुलिं करं विहायासि निमग्नमम्भसि ।

अथवा—

अचेतनं नाम गुणं न लक्षयेन्मयैव कस्मादवधीरिता प्रिया ॥

KING—Why did you get immersed into water having left that hand with soft and beautiful fingers? Or, it is possible, the inanimate cannot recognise merit. Why even by myself was my darling slighted?

राजेति । 'इदमङ्गुलीयकमुपालप्स्ये' भर्त्सयिष्ये 'तावत्' । अङ्गुरीयकमेव अनर्थबीजम् । यद्येतत् नाभ्रंशिष्यत् शकुन्तला मे नानशिष्यत्, तदिदं तिरस्कारमर्हति । इत्यस्मादलक्षणम् ।

विदूषक इति । 'अनेन उन्मत्तानां पन्था गृहीतः' उन्मत्तपदवीमारूढोऽयम् । ततो मरणं भविता ।

राजेति । अन्वयः—बन्धुरकोमलाङ्गुलिं तं करं विहाय कथं नु अम्भसि निमग्नमसि । अथवा अचेतनं गुणं नाम न लक्षयेत् । मया एव कस्मात् प्रिया अवधीरिता । व्याख्या—'बन्धुरा' उन्नतानता पर्वसु नताः तन्मध्ये उदरे उन्नता इत्यर्थः 'कोमला' अकर्कशाश्च 'अङ्गुलयो' यस्मिन् अतएव सुलक्षणं 'तम्' अनुभूतस्पर्शं 'करं विहाय' त्यक्त्वा 'कथं नु' पृच्छामि भोः केन निमित्तेन 'अम्भसि' जले 'निमग्नमसि' आत्मानं मज्जयसि स्म [लोकोक्तिरियम् । सर्वथा विरक्ता हि आत्मनि अनादरा जले मज्जन्ति] । अकारणमयुक्तमाचरितं ते । 'अथवा' पक्षान्तरे 'अचेतनं' चेतनाहीनं वस्तु 'गुणम्' उत्कर्षं 'नाम' इति सम्भावनायाम् 'न लक्षयेत्' द्रष्टुं न शक्नुयात् [शकि लिङ्] । इत्यचेतनस्य विवेकविमूढता न ते दोषः । सर्वथा वृथा मे त्वयि तिरस्कारः । 'मया एव' चेतनेन 'कस्मात्' किं कारणं 'प्रिया' दयिता 'अवधीरिता' अवज्ञाय प्रत्याख्याता [अवधीर इति अवज्ञायां चुरादिषु] । चेतने यदसम्भवं तद्धि मया आचरितम् । ["बन्धुरकोमल" (रा-, वि-, म-)—"कोमलबन्धुर" (त-, न्या-) ॥ "लक्षयेत्" (रा-, वि-, म-)—"वीक्षते" (त-, न्या-)] ॥

NOTES

1. उन्मत्तानाम्—Perhaps there is reference here to the stages of love-sickness. "चक्षूरागस्तदनु मनसः सङ्गतिर्भावना च व्यावृत्तिः स्यात् तदनु विषयग्रामतश्चेतसोऽपि। निद्राच्छेदस्तदनु तनुता निस्त्रपत्वं ततोऽनून्मादो मूर्च्छा तदनु मरणं स्युर्दशाः प्रक्रमेण ॥" The king has reached the stage of उन्माद। Vidushaka has been watching the development with apprehension and says this with a shudder as he knows what will follow next.

2. (a). बन्धुर &c.—बन्धुर is उन्नतानत। A well-developed finger is, on the *in*-side slightly bulged between the joints ; the joints are slightly depressed. कोमल soft—because *not* bony. When once lodged in such a finger, it is not easy to dislodge the ring. बन्धुराः कोमलाः अङ्गुलयो यस्मिन्। विपदबहुव्रीहि। Yet it had slipped, and dropped into water. How is that ? (कथं नु)। This is the purely *physical* side of the question. Again, बन्धुर is सुन्दर beautiful. "बन्धुरं सुन्दरे रम्ये" इति विश्वः। Refers to the *shape*. कोमल *soft*, suggests *agreeable sensation of touch* which is *mental*. (b). निमग्नम्—निमज्जन through weight (gravity) is taken as *wilful drowning*. This raises the उपमा that the slipping of the firmly lodged ring resembles the suicide by drowning of a person who with all enjoyments at hand becomes all of a sudden unaccountably (कथं नु) disgusted with life. Hence the अलङ्कार is समासोक्ति based to a certain extent upon श्लेष। (c). अवधीरिता—Slighted. Even the *slighting* is heinous not to speak of *discarding*. (d). प्रिया—The ring, which is अचेतन, slighted the कर only. I. a चेतन, slighted even *the possessor of the* कर who was at the same time प्रिया to me. How then उपालभ्यं अङ्गुलीयकम् ? It is myself that is महदुपालम्भपात्रम्।

विदूषकः (आत्मगतम्)—कहं बुभुक्खाए खादिदव्वोम्हि [कथं बुभुक्षया खादितव्योऽस्मि]।

VIDUSHAKA—How so ! I am to be eaten up by hunger !

राजा—अकारणपरित्यक्ते, अनुशयतप्तहृदयस्तावदनुकम्पय-तामयं जनः पुनर्दर्शनेन।

KING—O, Wantonly-discarded-one, let this person, with his heart parched by remorse, be favoured by your sight again.

(प्रविश्यापटीक्षेपेण चित्रफलकहस्ता) चतुरिका—इअं चित्तगदा भट्टिणी [इयं चित्रगता भट्टिणी]।

(चित्रफलकं दर्शयति)।

(Entering without raising the curtain with the picture-board in her hand) CHATURIKA—Here is mistress in the drawing.

(Points to the picture-board).

विदूषक इति। 'बुभुक्षया' क्षुधा 'खादितव्योऽस्मि'। अतिपीड़ितोऽहं क्षुधा। मन्ये सैव मां खादिष्यति।

राजेति। 'अकारणे' कारणाभावे 'परित्यक्ता' या तत्संबुद्धिः हे 'अकारण-परित्यक्ते' [एतेन कोपकारणम्] 'अनुशयेन' अनुतापेन 'तप्तं' 'हृदयं' यस्य तादृशः [एतेन क्षमायोग्यता] 'अयं जनः' अहमित्यर्थः 'पुनर्दर्शनेन' [करणे तृतीया] 'अनुकम्पतां' करुणया योज्यताम्। परित्यागात् सापराधोऽहं त्वयि। अधुना तु तापेन दग्धं मां करुणार्हं मन्यसे चेत् दर्शनं देहि, तेन यदि जीवेयम् इति भावः।

प्रविश्येति। 'चित्रस्य' शकुन्तलाप्रतिकृतेः 'फलकं' पट्टं 'हस्ते' यस्याः सा 'अपट्याः' जवनिकायाः 'क्षेपेण' अपसारणेन—यद्वा 'पट्याः' जवनिकायाः 'क्षेपम्' अपसारणम् अकृत्वा—'प्रविश्य'।

चतुरिकेति। भट्टिन्याः पुनर्दर्शनं वाञ्छति भवान्। 'इयं चित्रगता' आलिखिता भट्टिनी [अनभिषिक्ता राजदारा भट्टिनीति कथ्यन्ते] आस्ते। अतैव तस्याः पुनर्दर्शनं भवतु ते। इति अङ्गुल्या 'चित्रफलकं' तत्रस्थां शकुन्तलामूर्त्तिमित्यर्थः 'दर्शयति' निर्दिशति।

NOTES

1. बुभुक्षया&c.—The king is mad (*c. f.* गृहीतोऽनेन &c. above).

I cannot leave him. I cannot therefore get anything to eat. Hunger wants something to eat, and, nothing else being available, it will eat *me*.

2. अकारण &c.—Addressed to the absent Sakuntala.

3. (a). अपटोक्षेपेण &c.—See Act IV, *Ante*. (b). इयं चित्रगता &c.—The king prays for a meeting. He is forthwith favoured, and sees her, though on canvas only. This is a happy augury and indicates speedy re-union.

विदूषकः (विलोक्य)—साहु वअस्स, महुरावत्थाणदंसणिज्जो भावाणुप्पवेसो। खलदि विअ मे दिट्टी णिण्णुण्णदप्पदेसेसु। किं बहुणा, सत्ताणुप्पवेससङ्काए आलवणकोदूहलं मे जणअदि [साधु वयस्य, मधुरावस्थानदर्शनीयो भावानुप्रवेशः। स्खलति इव मे दृष्टिर्निम्नोन्नतप्रदेशेषु। किं बहुना, सत्त्वानुप्रवेशशङ्कया आलपनकौतूहलं मे जनयति]।

VIDUSHAKA (*Seeing*)—Excellent, my friend! The accession of emotion is visible [*Or*—charming] through exquisite delineation [*Or*—beautiful posture]. My sight as if stumbles in the high and low places. Not to say much, it creates my eageness for conversation with the impression of the infusion of life.

विदूषक इति। 'भावो' मानसो भावः, भयादिकृता चेतोविकृतिः। तस्य यः 'अनुप्रवेशः' पात्रे आविर्भावः सः अत्र चित्रे 'मधुरेण' मनोरमेण 'अवस्थानेन' विन्यासेन, कुशलालेखनेन इति यावत् 'दर्शनीयः' सुस्पष्टमालक्ष्यः। दृष्टेव ज्ञायते एका भीता अपरे कौतुकवत्यौ इति। यद्वा—'भावानुप्रवेशः' भयादीनामाविर्भावः 'मधुरेण अवस्थानेन' स्थित्या 'दर्शनीयो' मनोहरो जातः। आसाम् अङ्गानां विन्यासविशेषेण अतिसुन्दरं भयादीनां चित्रमालिखितं भवता। न केवलं मानसमासां निपुणमालिखितम्, अपि तु कायोऽपि, इत्याह 'निम्नेषु' नीचेषु 'उन्नतेषु' उच्चेषु च 'प्रदेशेषु' शरीरांशेषु 'मे दृष्टिः स्खलति इव' अङ्गादङ्गं चलिता दृष्टिः उच्चेषु प्रतिहता निम्नेषु च अधःपतितेव भवति।

'बहुना' उक्तेन 'किं' संक्षेपतो ब्रवीमि चित्रमेतत् 'सत्त्वस्य' प्राणानां यः 'अनुप्रवेशः' आविर्भावः तस्य 'शङ्कया' सजीवमेतच्चित्रमिति मे मतिमुत्पाद्य इत्यर्थः 'आलपनस्य' सम्भाषणस्य 'कौतूहलम्' आकाङ्क्षां 'जनयति'। ["निर्वोन्नत" (रा-, वि-, म-)— "निम्नत" (त-, न्या-)॥ "किं बहुना" इत्यादिमूलम् (रा-, त-, न्या-)— अन्येषामेतन्नास्ति]॥

NOTES

1. (a). मधुरा &c.—अव + स्था + ल्युट् भावे = अवस्थानम् fixing, *i. e.*, delineation. Or अवस्थीयते अनेन इति अव + स्था + ल्युट् करणे = अवस्थानम् posture. Raghava makes it आकृति। मधुरमवस्थानम् exquisite delineation (ल्युट् भावे), or beautiful posture (ल्युट् करणे)। Raghava takes it = fine features. दर्शनीयः is द्रष्टुं शक्यः visible (ल्युट् भावे); or मनोहरः charming (ल्युट् करणे)। (b). भावानु &c.—भवत्यनेन इति भू + घञ् करणे or भवतीति भू + ण कर्त्तरि = भावः emotion. तस्य अनुप्रवेशः, *i. e.*, अनुप्रविष्टो भावः the emotion that has gained accession. भावानयने द्रव्यानयनम्। (c). The sense is—(i) Your wonderful skill has rendered the emotion plainly visible (ल्युट् भावे). Or—(ii) Owing to the beautiful posture, the picture of emotion is charming (ल्युट् करणे). Or—(iii) The accession of emotion has become doubly charming owing to their (*i. e.*, of the ladies) fine features (ल्युट् करणे—Raghava). "सुन्दराकारतया भावाविर्भावो रम्यतर इत्यर्थः"—*Raghava.* I do not think much of Raghava's meaning. It puts the artist's skill to the back-ground. (d). सत्त्वानु &c.—सत्त्व is प्राण life. शङ्का is *Surmise*, *Impression.* इत्थं तृतीया।

सानुमती—अम्मो एसा राएसिणो णिउणदा। जाणे सही अग्गदो मे वट्टदि त्ति [अम्मो एषा राजर्षेर्निपुणता। जाने सखी अग्रतो मे वर्त्तते इति]।

SANUMATI—Ha ! Such is the royal sage's skill ! Methinks my friend is standing before me.

राजा—

तद्यत् साधु न चित्रे स्यात् क्रियते तत्तदन्यथा।
तथापि तस्या लावण्यं रेखया किञ्चिदन्वितम्॥

KING—Whatever may not be right in the picture all that is being altered. Yet her loveliness is but faintly imitated by the drawing.

सानुमती—सरिसं एदं पच्छादावगरुणो सिणेहस्स अणव-लेवस्स अ [सदृशमेतत् पश्चात्तापगुरोः स्नेहस्य अनवलेपस्य च]।

SANUMATI—This befits his love, so deep through remorse, and his absence of boasting.

सानुमतीति। 'अम्मो' इत्याश्चर्य्ये। 'एषा' ईदृशी 'निपुणता' महती निपुणता इति भावः।

राजेति। अन्वयः—चित्रे यत् यत् साधु न स्यात् तत् तत् अन्यथा क्रियते। तथापि रेखया तस्या लावण्यं किञ्चित् अन्वितम्। व्याख्या—'चित्रे' मत्कृते आलेख्ये 'यत् यत्' यद्देवाङ्गमवस्थानं वा 'साधु' सम्यक्, प्रकृतानुयायि इत्यर्थः 'न स्यात्' चित्रितं न भवेत् [सम्भावनायां लिङ्] 'तत् तत्' तद्देव, तत्सर्वमित्यर्थः, 'अन्यथा' अन्य-प्रकारेण, विशोध्य इति यावत् 'क्रियते' विन्यस्यते [सर्वधात्वर्थानुवादः करोतिना भवति]। किन्तु अद्भुतं शकुन्तलाया लावण्यं मनसाप्यचिन्तनीयं किं पुनश्चित्रे करणीयम्। तत् 'तथापि' कृतेपि महति श्रमे 'रेखया' आलेख्येन 'तस्या लावण्यं' कमनीयता 'किञ्चित्' ईषत्, न तु बाहुल्येन अन्वितम्। या स्वयं "विधिना चित्रे निवेश्य परि-कल्पितसत्वयोगा मनसा वा रूपोच्चयेन कृता" सा कथमशक्तेन मया मानुषेण सम्यगा-लिख्यते। तत् त्वयोक्तं ते "साधु वयस्य" इत्यादि इति भावः। ["रेखया" (रा-, वि-, म-)—"लेखया" (त-, व्या-)]॥

सानुमतीति। 'पश्चात्तापेन' अनुतापेन 'गुरोः' प्रबलस्य 'स्नेहस्य' प्रेम्णः 'अनवलेपस्य च' गर्वाभावस्य च 'एतत्' एषा राजोक्तिः 'सदृशं' योग्यम्। पश्चात्तापेनास्य शकुन्तलायां निरतिशयः स्नेहो जातः? स्नेहाच्च प्रबलमात्मज्ञानम्। ततः "सर्वः

कान्तमात्मीयं पश्यति" इत्ययं शकुन्तलाया लावण्यम् अचिन्तनीयं मन्यते। किञ्चिदन्वितं न सम्यक् इत्यपि गर्वाभावात् विनयोक्तिमात्रम्।

NOTES

1. रेखया—रेखा is taken by Raghava in the sense of general harmony of the parts of the body. "शिरोनेत्रकरादीनामङ्गानां मेलने सति। कायस्थितिर्यतो नेत्रहरा रेखा प्रकीर्त्तिता॥"—*Sangita-ratnakara* quoted by Raghava. But रेखा and लेखा may be taken as identical by the maxim रलयोरभेदः। And लेखा is the same as आलेख्य portrait. This is the sense Raghava prefers—"रेखया चित्रार्थं तूलिकाविहितया" (depicted by the touches of the brush).

2. सदृशम् &c.—The king says that his drawing does not approach the original. Sanumati explains—The king's admiration of Sakuntala is so vastly enhanced by remorse that he now thinks too highly of her beauty. The canvas is an exact reproduction, and Sakuntala is not more beautiful than she is painted here. Besides, the modesty of the king makes him speak deprecatingly of his own skill. Raghava has अनवलेपस्य निर्दोषस्य स्वाभाविकस्य इत्यर्थः and construes एतत् पश्चात्तापगुरोः अनवलेपस्य च स्नेहस्य सदृशम्—This befits his spontaneous (अनवलेपस्य) affection for her which has now enhanced by remorse.

विदूषकः—भो दाणिं तिस्सि तत्तहोदीओ दीसन्ति। सव्वाओ अ दंसणीआओ। कदमा एत्थ तत्तहोदी सउन्दला [भो इदानीं तिस्रस्तत्रभवत्यो दृश्यन्ते। सर्वाश्च दर्शनीयाः। कतमा अत्र तत्रभवती शकुन्तला]।

VIDUSHAKA—Well, now, three ladies are here. All are worth seeing too. Which here is her ladyship Sakuntala ?

सानुमती—अणभिण्णो क्खु ईदिसस्स रूवस्स मोहदिट्ठी अअं जणो [अनभिज्ञः खलु ईदृशस्य रूपस्य मोघदृष्टिरयं जनः]।

SANUMATI—Without experience of such beauty this person has his sight baffled.

राजा—त्वं तावत् कतमां तर्कयसि ।

KING—Which of these indeed do you guess ?

विदूषकः (निर्वर्ण्य)—तक्केमि जा एसा सिढिलबन्धणुव्वन्तकुसुमेण केसन्तेण, उब्भिस्सेअविन्दुणा वअणेण, विसेसतो ओसरिआहिं बाहाहिं, अवसेअसिणिद्धतरुणपल्लवस्स चूअपाअवस्स पासे ईसिपरिस्सन्ता विअ आलिहिदा सा सउन्दला. इदराओ सहीओ त्ति [तर्कयामि या एषा शिथिलबन्धनोद्वान्तकुसुमेन केशान्तेन, उद्भिन्नस्वेदविन्दुना, वदनेन, विशेषतः अपसृताभ्यां बाहुभ्याम्, अवसेकस्निग्धतरुणपल्लवस्य चूतपादपस्य पार्श्वे ईषत्परिश्रान्ता इव आलिखिता सा शकुन्तला, इतरे सख्यौ इति]। ✓

VIDUSHAKA (*Scrutinising*)—I guess that she who, by the side of the mango-tree, of which the fresh leaves are glossy through watering, is painted, as if slightly fatigued, with the tips of her hair having the knot loosened and the flowers dropping, with the face having drops of perspiration formed on it, and with the arms drooping very much, that is Sakuntala, the other two are her friends.

विदूषक इति । 'इदानीं' वाक्यालङ्कारे ।

सानुमतीति । 'ईदृशस्य' एवंविधस्य 'रूपस्य अनभिज्ञः' अज्ञातस्वरूपः 'अयं जनः' एष विदूषकः 'मोघदृष्टिः' विफलदर्शनप्रयासो जातः । अनुपमं सर्वासामेव कन्याश्रमकन्यकानां रूपम् । तत्र पुनर्विशेषनिरूपणं निपुणैः रूपाभिज्ञैरेव शक्यम् । विदूषकस्तु अनभिज्ञः सर्वा अपि समाः पश्यति इत्याशयः ।

विदूषक इति । 'निर्वर्ण्य' निपुणं दृष्ट्वा । 'या एषा अवसेकेन' सेचनेन 'स्निग्धाः' मसृणाः 'तरुणपल्लवाः' नवपत्राणि यस्य तादृशस्य 'चूतपादपस्य' आम्रवृक्षस्य 'पार्श्वे शिथिलं' श्लथं 'बन्धनं' यस्य, अतएव 'उद्वान्तानि' च्युतानि 'कुसुमानि' यस्मात् तादृशेन 'केशान्तेन'

[इत्थम्भूतलक्षणे तृतीया], 'उद्भिन्नाः' सञ्जाताः 'स्वेदबिन्दवः' श्रमजलजालानि यस्मिन् तादृशेन 'वदनेन' [इत्थम्भूतेति तृतीया] 'विशेषतो' बाहुल्येन 'अपसृताभ्याम्' आनताभ्यां, 'बाहुभ्याम्' [इत्थम्भूतेति तृतीया] 'ईषत्परिश्रान्ता इव' किञ्चिदिव जातश्रमा [केशबन्ध-शैथिल्यं, स्वेदोद्गमः, भुजापसरणम् इति त्रीणि श्रमोपलक्षणानि] 'आलिखिता सा शकुन्तला इतरे सख्यौ इति तर्कयामि' ऊहे। ["शिथिलबन्धन—" (त-, का-)— "शिथिलकेशबन्धन" (रा-, म-)—"शिथिलकेशबन्ध" (वि-)] ॥

NOTES

1. मोघदृष्टिः—मोघा विवेकमूढाः दृष्टिर्यस्य सः। Refers to Vidushaka, because he is unable to distinguish between the three, and deems them all *equally* beautiful. The difference is plain to the expert.

2. शिथिल—In the reading शिथिलकेशबन्धन the word केश is redundant.

राजा—निपुणो भवान्। अस्त्यत्र मे भावचिह्नम्।

स्विन्नाङ्गुलिविनिवेशो रेखाप्रान्तेषु दृश्यते मलिनः।
अश्रु च कपोलपतितं दृश्यमिदं वर्णकोच्छ्रासात्॥

चतुरिके, अर्द्धलिखितमेतद्विनोदस्थानम्। गच्छ वर्त्तिकां तावदानय।

KING—You are clever. There is here indication of my emotion. At the edges of the drawing is visible the dark imprint of my perspiring finger, and here my tear that dropped on her cheek is noticeable from the puff (bloatedness?) of paint. Chaturika, this source of my solace is half-drawn. Go, and fetch me the brush.

राजेति। 'भवान् निपुणः' अभिज्ञः, विशेषवित् इत्यर्थः। 'अत्र' शकुन्तला-प्रतिकृतौ 'मे भावचिह्नम्' अनुरागलक्षणम् 'अस्ति'। अन्वयः—रेखाप्रान्तेषु मलिनः स्विन्नाङ्गुलिविनिवेशो दृश्यते। इदञ्च कपोलपतितम् अश्रु वर्णकोच्छ्रासात् दृश्यम्॥

व्याख्या—'रेखायाः' तूलिकाङ्कस्य 'प्रान्तेषु' पार्श्वदेशेषु 'मलिनः' कलुषः 'खिन्नायाः' भावोदयात् सस्वेदायाः 'अङ्गुल्या विनिवेशः' संस्थापनं विन्यासः 'दृश्यते' लक्ष्यते। भावात् स्वेदः, स्वेदान्मलिनोऽङ्कः। अतएव अङ्कस्य मालिन्यात् भावोदयानुमानम्। 'इदञ्च कपोले' गण्डे, चित्रस्थायाः शकुन्तलाया गण्डे इत्यर्थः 'पतितम् अश्रु' मदीयं नेत्रजलं 'वर्णकस्य' चित्रोपयोगिकौसुम्भादिरागस्य 'उच्छ्रासात्' उच्छूनतया 'दृश्य' द्रष्टुं शक्यम्। वर्णकोच्छ्रासात् जलसम्पर्कः। जलञ्च मन्नेत्रात् पतितम्। तेनापि भावोदयानुमानम्। ["वर्णक—" (त-, व्या-)—"वर्णिक—" (वि-, म-)—"वर्त्तिक—" (रा-)]॥

एतत् 'इदं, विनोदः' तन्मद्हृदयस्य समाश्वासनम्, तस्य 'स्थानम्' उपायभूतम्, एतच्चित्रमित्यर्थः 'अर्द्धं लिखितम्' असमाप्तमित्यर्थः। अतो 'गच्छ वर्त्तिकां' तूलिकाम् { "पटलेपे पत्त्रिभेदे तूलिकायाञ्च वर्त्तिका" इति राघवधृतमजयवचनम्] 'आनय तावत्'। तावदित्यवधारणे।

NOTES

1. भावचिह्नम्—These are two—(i) खिन्नाङ्गुलिविनिवेशः (भावोदयात् खेदः। *c. f.* "सखेदरोमाञ्चितकम्पिताङ्गी जाता प्रियस्पर्शसुखेन वत्सा"), (ii) अश्रु (भावादेव अश्रु)।

2. वर्णकोच्छ्रासात्—वर्णिकोच्छ्रासात् requires वर्णिका in the feminine. Raghava reads वर्त्तिकोच्छ्रासात् and explains "वर्त्तिका चित्रपटे लेपविशेषः"।

चतुरिका—अज्ज माढव्व, अवलम्ब चित्तफलअं जाव आअच्छामि [आर्य्य माधव्य, अवलम्बस्व चित्रफलकं यावदागच्छामि]।

CHATURIKA—Noble Madhavya, hold the picture-board till I return.

राजा—अहमेवैतदवलम्बे।

(यथोक्तं करोति। निष्क्रान्ता चेटी)।

KING—I hold it myself.

(*Does as said. Exit the maid servant*).

राजा—

साक्षात् प्रियामुपगतामपहाय पूर्वं
चित्रार्पितामहमिमां बहु मन्यमानः ।
स्रोतोवहां पथि निकामजलामतीत्य
जातः सखे प्रणयवान् मृगतृष्णिकायाम् ॥

KING—Having previously abandoned my darling when she personally came near, and greatly esteeming her as transferred to the picture, I have become, O friend, solicitous of the mirage after having passed on my way a river with plenty of water.

चतुरिकेति । 'यावदागच्छामि' [यावद्योगे लट्] तावत् 'अवलम्बस्व' धारय । यावदवधौ ["यावत्तावदिवावधौ" इति हैमः] ।

राजेति । अन्वयः—हे सखे पूर्वं साक्षात् उपगताम् इमां प्रियाम् अपहाय चित्रार्पितां बहु मन्यमानः अहं निकामजलां स्रोतोवहां पथि अतीत्य मृगतृष्णिकायां प्रणयवान् जातः । व्याख्या—हे 'सखे पूर्वं' प्रथमं 'साक्षात्' स्वयम् 'उपगतां' समीपं प्राप्ताम् 'इमां प्रियां' वल्लभाम् 'अपहाय' उपेक्षया अतिक्रम्य, पश्चात् 'चित्रे अर्पिताम्' आलेख्ये लिखितां 'बहु मन्यमानः' तस्यां श्रद्दधत् 'अहं निकामजलां' भूरिसलिलां 'स्रोतोवहां' नदीं 'पथि' वर्त्मनि 'अतीत्य' अतिक्रम्य, मार्गवशादेव अनायासेन प्राप्तामुपेत्य, 'मृगाणां' पशूनां या 'तृष्णा' लोभः सा अस्ति यस्यां तस्यां 'मृगतृष्णिकायां' मरीचिकायाम् [षष्ठीसमासः । अर्श-आद्यच् । स्वार्थे कन् ॥ "मृगतृष्णा मरीचिका" इत्यमरः] 'प्रणयवान्' साकाङ्क्षो 'जातः' । वर्त्मन्येव प्राप्तां स्वादूदकां नदीं त्यक्त्वा मरीचिकानुसरणं यथा हासकरं, स्वयमागतां शकुन्तलां विहाय काल्पनिके तच्चित्रे समादरोऽपि तथैव इति भावः । ["राजा" (वि-)—"राजा (निश्वस्य)" (त-, व्या-)—"राजा । अहं हि" (रा-, म-) ॥ "अहमिमाम्" (त-, वि-, व्या-)—"पुनरिमाम्" (रा-)—"मुहुरिमाम्" (म-)] ॥

NOTES

1. (a) बहु मन्यमानः—बहु is not compounded. (b). अहमिमाम्—

Raghava reads पुनरिमाम्। पुनर् signifies भेद (difference). भेद is possible when something having been predicated, a second predication is made to modify it. Thus साक्षादुपगता अपहीना, चित्रार्पिता पुनर्बहु मता। The first predication is here absent. ल्यप् does not complete a predication. In fact ल्यप् here serves the purpose of पुनर्। Compare स्वयम् अपि आकुलीकृत्य अश्रुकारणं पृच्छसि which is fully equivalent to अपि आकुलीकृतवानसि अश्रुकारणं पुनः पृच्छसि। Raghava's reading is therefore defective.

2. (a). स्रोतोवहाम्—वहतीति वह + अच् कर्त्तरि स्त्रियाम् = वहा bearer. स्रोतसां वहा, ताम्। (b). निकामजलाम्—निश्चतः कामः अस्मात् अनेन वा निकामम् plenty. निकामं जलं यस्यां ताम्। (c). प्रणयवान्—प्रणीयते अनेन इति प्र + नी + अच् करणे = प्रणयः solicitation. सः अस्ति अस्य इति प्रणय + मतुप्। This is a Vedic usage. In भाषा the usual form is प्रणयी because प्रणय is of the सुखादि class and hence takes इनि *exclusively* in the sense of मतुप् by the rule "सुखादिभ्यश्च"। Both प्रणयिन् and प्रणयवत् however occur in the writings of Kalidasa. *c. f.* "सा हि प्रणयवत्यासीत्"—*Raghu*, "प्रणयिनीव नखक्षतमण्डनम्"—*Ibid.* (d). मृग &c.—मृगाणां तृष्णा मृगतृष्णा। सा अस्ति अस्मिन् इति मृगतृष्णा + अच् मत्वर्थे स्त्रियाम् = मृगतृष्णा। सा एव इति मृगतृष्णा + क स्त्रियाम् = मृगतृष्णका or मृगतृष्णिका because मृगतृष्णा is not भाषितपुंस्क and, in such cases, इकार is optional by the rule "अभाषितपुंस्काच्च"। (e). *Remark*—The अलङ्कार is निदर्शना (see under इदं किलाव्याजमनोहरं वपुः, Act I).

विदूषकः (आत्मगतम्)—एसो अत्तभवं णदिं अदिक्कमिअ मिअतिह्णिआए संकन्तो [एष अत्रभवान् नदीमतिक्रम्य मृगतृष्णिकया संक्रान्तः]। (प्रकाशम्) भो अवरं किं एत्थ लिहिदव्वं [भोः, अपरं किमत्र लेखितव्यम्]।

VIDUSHAKA (*Within himself*)—His Highness has indeed met with a mirage after having crossed the river. (***Aloud***) **Well, what else has to be painted here?**

सानुमती—जो जो पदेसो सहीए मे अहिरूवो तं तं आलिहिदुकामो भवे [यो यः प्रदेशः सख्या मे अभिरूपस्तं तमालेखितुकामो भवेत्] ।

SANUMATI—Possibly he has the desire to paint all those places that are favourites of my friend.

विदूषक इति । सत्यमेव उक्तमत्रभवता । 'एषः अत्रभवान् मदीं' शकुन्तलारूपाम् 'अतिक्रम्य मृगतृष्णिकया' चित्ररूपया 'संक्रान्तः' मग्नः । एतत् तु राज्ञा श्रुतं अत तस्य तापो वर्द्धत इत्यात्मगतमुक्तम् । ["लेखितव्यम्" (वि-)—"लिखितव्यम्" (रा-, म-)—"आलिखितव्यम्" (त-, न्या-)] ॥

सानुमतीति । 'यो यः प्रदेशः' स्थानं 'मे सख्याः' शकुन्तलायाः 'अभिरूपः' रम्यः ["अभिरूपो बुधे रम्ये" इति विश्वमेदिन्यौ] 'तम् आलेखितुं' चित्रयितुं 'कामः' अभिलाषो यस्य तथाविधः ["कर्त्तरि कृत" इत्यनुसर्गात् समानाधिकरणपदो बहुव्रीहिः । "अव्ययकृतो भावे" इति पक्षे तु व्यधिकरणपदः । "तुङ्कामममसोरपि" इति मकार-लोपः] 'भवेत्' [सम्भावनायां लिङ्] ।

NOTES

1. लेखितव्यम्—Raghava reads लिखितव्यम् । There seems to be no reason why लिख should not take गुण with तव्य । We cannot say लिख is of the कुटादि class, for then लेखन becomes inadmissible. But आलेखन is used by पाणिनि himself in the rule "अपाच्चतुष्पाच्छकुनिष्वालेखने" । I think लिखितव्यम् is not defensible.

2. आलेखितुं &c.—आ + लिख + तुमुन् कर्त्तरि = आलेखितुम् painter, take this as qualifying कामः । आलेखितुं कामो यस्य सः । The म् of आलेखितुम् disappears by the कारिका—"लुम्पेदवश्यमः कृत्ये तुङ्काममनसो-रपि । समो वा तत्हितयोर्मांसस्य पचियुड्घञोः ॥" This is after the सूत्रकार (Panini). The भाष्यकार has "अव्ययकृतो भावे", *i. e.*, a कृत् affix producing an अव्यय is attached in the भाववाच्य । तुमुन् is thus in the भाववाच्य । Hence आलेखितुम् means आलेखनम् painting. आलेखितुं कामो यस्य means आलेखने कामो यस्य and the बहुव्रीहि is व्यधिकरणपद । Here again Raghava reads आलिखितुकामः । See लेखितव्यम् above.

राजा—श्रूयताम्,

कार्य्या सैकतलीनहंसमिथुना स्रोतोवहा मालिनी
पादास्तामभितो निषण्णहरिणा गौरीगुरोः पावनाः।
शाखालम्बितवल्कलस्य च तरोर्निर्मातुमिच्छाम्यधः
शृङ्गे कृष्णमृगस्य वामनयनं कण्डूयमानां मृगीम्॥

KING—Listen. The stream Malini has to be shown with pairs of swans resting on its sandy banks, on both sides of it the holy hillocks of the father of Gauri (Himalaya) with antelopes reclining on them. Also I wish to represent a doe scratching her left eye on the horn of a black buck under a tree on the boughs of which are suspended bark-garments.

राजेति। अन्वयः—सैकतलीनहंसमिथुना स्रोतोवहा मालिनी कार्य्या। तामभितः निषण्णहरिणा गौरीगुरोः पावनाः पादाः (कार्य्याः)। शाखालम्बितवल्कलस्य तरोः अधः कृष्णमृगस्य शृङ्गे वामनयनं कण्डूयमानां मृगीञ्च निर्मातुमिच्छामि। व्याख्या—'सैकते' पुलिने 'लीनं' सुखासीनं 'हंसमिथुनं' मरालयुगलं यस्याः तादृशी 'स्रोतोवहा' नदी 'मालिनी कार्य्या' लिखितव्या। 'तां' मालिनीम् 'अभितः' पार्श्वतः [अभितोयोगे द्वितीया] 'निषण्णाः' उपविष्टा 'हरिणा' येषु तथाविधा 'गौर्य्याः' शिवायाः 'गुरोः' पितुः [जगन्मातुः पिता इति पावनास्तत्पादाः] 'पावनाः' पवित्राः 'पादाः' प्रत्यन्तपर्वताः कार्य्याः इति लिङ्गवचनविपरिणामः। 'शाखासु लम्बितानि' अवसक्तानि 'वल्कलानि' यस्य तादृशस्य कस्यचित् 'तरोः' वृक्षस्य 'अधः' तले [असिप्रत्ययः। अतसर्थत्वात् षष्ठी] 'कृष्णमृगस्य' कृष्णसारस्य 'शृङ्गे' आत्मनो 'वामनयनं' वामाक्षि 'कण्डूयमानां' निकषन्तीं 'मृगीञ्च निर्मातु' कर्त्तुम् 'इच्छामि' ["निषण्णहरिणाः" (रा-, वि-, म-)—"निषण्णचमराः" (त-, न्या-)]॥

NOTES

1. (a). सैकत &c.—सिकताः सन्त्यस्मिन् इति सिकता+अण् मत्वर्थे=सैकतम्। सिकता is usually in the feminine plural. "आपः सुमनसो वर्षा अप्सरस् सिकताः समाः। एते स्त्रियां बहुत्वे स्युरेकत्वेऽप्युत्तरत्रयम्॥" (b). स्रोतो-

बद्धा—See above. (c). निषण्ण &c.—नि + सद् + क्त कर्त्तरि = नि + सन् + न by the rule "रदाभ्यां निष्ठातो नः पूर्वस्य च दः"। This gives निषन् न by the rule "सदिरप्रतेः"। Next we get निषण् न by the rule "रषाभ्यां नो णः समानपदे"। Lastly निषण् ण by the rule "ष्टुना ष्टुः", *i. e.*, तवर्ग becomes टवर्ग when joined to टवर्ग। हरिण here are other than कृष्णमृग। (d). *Remark*—The king's object to so to paint the background as to at once declare the place as a hermitage. लीन and निषण्ण are significant. They suggest that the swans and antelopes were at *ease* in presence of the girls. *They are not so when people from town are near.* The hills, are corroborative. The bark garment and black antelopes are decisive.

विदूषकः (आत्मगतम्)—जह अहं देक्खामि, पूरिदव्वं णेण चित्तफलअं लम्बकुच्चाणं तावसाणं कदम्बेहिं [यथा अहं पश्यामि, पूरयितव्यमनेन चित्रफलकं लम्बकूर्चानां तापसानां कदम्बैः]।

VIDUSHAKA (*Aside*)—As I see, the picture-board is going to be filled up by him with multitudes of long-bearded ascetics.

राजा—वयस्य अन्यच्च। शकुन्तलायाः प्रसाधनमभिप्रेतमत्र विस्मृतमस्माभिः।

KING—Yet another thing, my friend. Sakuntala's favourite [*Or*—intended] decoration is here forgotten by me.

विदूषकः—किं विअ [किमिव]।

VIDUSHAKA—What can it be ?

सानुमती—वणवासस्स सोउमारस्स अ जं सरिसं भविस्सदि [वनवासस्य सौकुमार्यस्य च यत् सदृशं भविष्यति]।

SANUMATI—What will be appropriate to forest-residence and tenderness

विदूषक इति। 'यथा अहं पश्यामि' मया एवमनुमीयते ["यथाशब्दस्तु निर्द्दिष्ट-स्तुल्ययोगानुमानयोः" इति विश्वः। अत्र अनुमाने]—'अनेन' राज्ञा 'लम्बकूर्चानां' दीर्घश्मश्रूणाम् ["कूर्चमस्त्री भ्रुवोर्मध्ये श्मश्रुकैतवयोरपि" इति त्रिकाण्डशेषः] 'तापसानां कदम्बैः' समूहैः चित्रफलकं पूरयितव्यम्'। अयमेतैश्चित्रफलकं पूरयिष्यति इत्यहं मन्ये।

राजेति। हे 'वयस्य अन्यच्च' अपरमपि लेखितव्यमस्ति। 'शकुन्तलायाः अभि-प्रेतं' प्रियं मया उद्दिष्ट' वा 'प्रसाधनम्' अलङ्करणम् 'अत' अस्मिन् चित्रे 'अस्माभिः विस्मृतं' विस्मरणात् अकृतम् अधुना तु कर्त्तव्यम्।

विदूषक इति। 'किमिव' तत् अभिप्रेतं प्रसाधनं विस्मृतं भवता। ["इव इति ईषदर्थोपमोत्प्रेक्षावाक्यालङ्कारेषु" इति वर्द्धमानः। अत वाक्यालङ्कारे]।

सानुमतीति। 'यत्' वस्तु शकुन्तलाया यो 'वने वासः' स्थितिः तस्य, यच्च तस्याः यत् 'सौकुमार्य्यं' मार्दवम् [भावे ष्यञ्] तस्य 'च सदृशं' योग्य' 'भवेत्' तदेव विस्मृतम् अभिप्रेतं प्रसाधनम् अद्य कर्त्तुमना अयम्। वनवासिभिः सुलभम् अतिकोमलञ्च तत् इत्यर्थः। विदूषककृतप्रश्नस्य उत्तरमेतत्।

NOTES

Remark—After सौकुमार्य्यस्य Raghava reads अविनयस्य। I do not see the propriety.

राजा—

कृतं न कर्णार्पितबन्धनं सखे शिरीषमागण्डविलम्बिकेशरम्।
न वा शरच्चन्द्रमरीचिकोमलं मृणालसूत्रं रचितं स्तनान्तरे॥

King—Friend, neither is the Sirisha flower shown with its stalk attached to the ear and the filaments reaching down to the cheek, nor again is drawn between of the breast the garland of lotus-shoots delicate like the antumnal moonshine.

विदूषकः—भो किंणु तत्तहोदी रत्तकुवलअसोहिणा अग्ग-हत्थेण मुहं आवारिअ चइदचइदा विअ ट्ठिदा [भोः किं नु तत्रभवती रक्तकुवलयशोभिना अग्रहस्तेन मुखमावार्य्य चकित-

चकिता इव स्थिता]। (सावधानं निरूप्य) आ एसो दासीए पुत्तो कुसुमरसपाडच्चरो तत्तहोदीए वअणकमलं अहिलङ्घदि महुअरो [आः एष दास्याःपुत्रः कुसुमरसपाटच्चरस्तत्रभवत्या वदनकमलमभिलङ्घते मधुकरः]।

VIDUSHAKA—Well, why has her ladyship stood as if very much frightened having caused her face to be covered by her hand which looks like a red lotus? (*Looking closely*) Oh! this son of a slave—a bee—the stealer of the honey of flowers, is rushing at her ladyship's lotus-face.

राजेति। अन्वयः—हे सखे कर्णार्पितबन्धनम् आगण्डविलम्बिकेशरं शिरीषं न कृतं, स्तनान्तरे शरच्चन्द्रमरीचिकोमलं मृणालसूत्रं न रचितं वा। व्याख्या—हे 'सखे' शकुन्तलायाः 'कर्णे' [जातावेकवचनम्] 'अर्पितं' निवेशितं 'बन्धनं' वृन्तं यस्य तत् अतएव 'आगण्डं' गण्डपर्य्यन्तं 'विलम्बिनो' लम्बमानाः 'केशराः' किञ्जल्काः यस्य तत् 'शिरीषं' शिरीषकुसुमम् [जातावेकवचनम्] 'न कृतं' न विहितम्। चित्रे अभूषितः कर्णो गण्डश्च अद्य शिरीषेण भूषयितव्यौ, तच्च तस्याः प्रियम्। 'स्तनयोः अन्तरे' अवकाशे 'शरच्चन्द्रस्य मरीचिः' ज्योत्स्ना इव 'कोमलं' स्निग्धं शुभ्रञ्च 'मृणालसूत्रं' विसमालिका 'न रचितं वा' नालिखितमपि [वा इति कर्णभूषणस्तनालङ्करणक्रिययोः समुच्चयः]।

विदूषक इति। 'भोः' इति संबोधने। किं प्रश्ने। नु वितर्के। सवितर्कः प्रश्नः। ब्रूहि पृच्छामि किमर्थं 'तत्रभवती' शकुन्तला 'रक्तकुवलयमिव' रक्तोत्पलमिव 'शोभते' यः तेन [रक्तकुवलयं लक्षणया तत्सदृशे वर्त्तते। साधुकारिणि णिनिः] 'अग्रहस्तेन' हस्ताग्रेण मणिबन्धात् अङ्गुल्यग्रपर्य्यन्तं यो बाह्वोरंशः तेन ["हस्ताग्राग्रहस्तादयो गुणगुणिनोर्भेदाभेदाभ्याम्" इति वामनः। अत्र अभेदविवक्षायां कर्मधारयः। प्रयोज्ये कर्त्तरि तृतीया] 'मुखम् आवार्य' आच्छाद्य [णौ ल्यप्] 'चकितात्' भीतादपि 'चकिता' भीता, अतिभीता इत्यर्थः 'इव स्थिता' [अत्र इवेन प्रकारस्य उक्तत्वात् द्विर्वचनम् अतिशयमात्रस्य वाचकम्]। ["रक्तकुवलयशोभिना" (त-, न्या-)—"रक्तकुवलयपल्लवशोभिना" (रा-, वि-, म-)]॥ 'सावधानं' निपुणं 'निरूप्य' दृष्ट्वा।

'षा:' क्रोधे। 'दास्या:पुत्र:' दुर्विनीत: [आक्रोशे षष्ठ्या अलुक्] 'कुसुमरसस्य' मधुन: 'पाटच्चर:' चौर: 'मधुकर:' भ्रमर: 'तत्रभवत्या: वदनं कमलमिव' [उपमितसमास: । कमलधर्मेण भ्रमराकर्षणम्] 'अभिलङ्घते' अभिलक्ष्य धावति [लघिर्गत्यर्थ: आत्मनेपदी] । ["अभिलङ्घते" (वि-)—"अभिलङ्घति" (रा-, म-)—"अभिलषति" (त-, न्या-)] ॥

NOTES

1. (a). आगण्ड &c.—आ is here *exclusive* (मर्य्यादायाम्) । आ गण्डात् आगण्डम् । अव्ययी— । आगण्डं साधु विलम्बन्ते इति आगण्ड + वि + लम्ब + णिनि कर्त्तरि साधुकारिणि = आगण्डविलम्बिन: । तादृशा: केशा यस्य तत् । (b). वा—Here वा implies समुच्चय । "वा स्याद्विकल्पोपमयोरेवार्थेऽपि समुच्चये" इति विश्व: ।

2. (a). रक्त &c.—The reading रक्तकुवलयपल्लवशोभिना is rejected because the पल्लव is not *red*. (b). आवार्य्य—अग्रहस्त: मुखम् आवृणोति (अणिचि) = इयम् अग्रहस्तेन मुखम् आवारयति (णिचि) । (c). चकितचकिता—Here the rule "प्रकारे गुणवचनस्य" does not apply because प्रकार means सादृश्य and the सादृश्य is expressed already by इव । Hence we explain चकितं भीतम् । सामान्ये नपुंसकम् । चकितात् चकिता चकितचकिता frightened of the frightened, *i. e.*, greatly frightened. सहसुपेति समास: । Magha's "भीतभीत इव शीतमयूख:" is similar.

3. (a). दास्या:पुत्र:—A compound. षष्ठी is retained *optionally* with पुत्र as उत्तरपद when abuse is implied. ["षष्ठ्या आक्रोशे" (Pan 6. 3, 21), "पुत्रेऽन्यतरस्याम्" (6. 3. 22)]. (b). *Remark*—Here Vidushaka is misled by the painting ; he forgets that it is a mere picture, and takes it for real.

राजा—ननु वार्य्यतामेष धृष्ट: ।

KING—Pray, let this impudent fellow be stopped.

विदूषक:—भवं एव्व अविणीदाणं सासिदा इमस्स वारणे पहविस्सदि [भवानेव अविनीतानां शासिता अस्य वारणे प्रभविष्यति] ।

VIDUSHAKA—Thyself alone, the restrainer of the undisciplined, will succeed in checking him.

राजा - युज्यते। अयि भोः कुसुमलताप्रियातिथे, किमत्र परिपतनखेदमनुभवसि।

एषा कुसुमनिषण्णा तृषितापि सती भवन्तमनुरक्ता।
प्रतिपालयति मधुकरी न खलु मधु विना त्वया पिबति॥

KING—Right. Heigh! Ho! The favourite-guest-of-creepers-in-flower, why dost thou undergo the fatigue of flying about here? Here, thy devoted mate, though thirsty, is waiting for thee, seated on the flower. She does not indeed drink honey without thee.

राजेति। 'ननु' अनुनये। 'धृष्ट एष' मधुकरः त्वया 'वार्य्यतां' प्रतिषिध्यताम्। विदूषक इति। विकलाङ्गेन ब्राह्मणेन मया कथमेष शिष्यते। 'अविनीतानां' दुर्वृत्तानां 'शासिता' विनेता 'भवानेव अस्य वारणे प्रभविष्यति' शक्तो भविष्यति नान्यः कोऽपि मादृशः।

राजेति। एतत् 'युज्यते' युक्तमेव। अहमेव एनं वारयिष्ये। 'अयि' इति कोमलामन्त्रणे। 'भोः कुसुमसमेतायाः लतायाः प्रिय अतिथे' भ्रमर 'अत्र' अस्मिन् शकुन्तलामुखे 'किं' कथं वृथा 'परिपतनस्य' उड्डीय उपवेशनस्य 'खेदं' श्रमम् 'अनुभवसि'। दृष्ट्वैव त्वां भीतेयं, न त्वमस्याः प्रियः। या तु त्वया तुष्यति तामेव कुसुमलतामनुसर। चित्रलिखितां कुसुमस्थां भ्रमरीं निर्दिश्याह—अन्वयः—अनुरक्ता एषा मधुकरी तृषिता कुसुमनिषण्णा सत्यपि भवन्तं प्रतिपालयति, त्वया विना न खलु मधु पिबति। व्याख्या—'अनुरक्ता' भवति प्रेमवती 'एषा' इयं पुरोगता 'मधुकरी' भवत्पत्नी 'तृषिता' पिपासिता अतएव 'कुसुमे निषण्णा' उपविष्टा 'सत्यपि' [तदानीं प्रतीक्षा दुष्करा इत्यपेरर्थः] 'भवन्तं' प्रतिपालयति' त्वामपेक्षते। कारणमाह—'त्वया विना' त्वां विहाय 'न खलु' न नूनं 'मधु पिबति'। अस्याः त्वं हि त्वया मानयितव्यः, तत् तत्रैव गच्छ; तेन रक्ता भार्य्या च तुष्यति, कुसुमिता लता च प्रियेणातिथिना भवता प्रीयते इत्याशयः।

NOTES

1. अविनीतानाम् &c.—Compare "कः पौरवे वसुमतीं शासति शासितरि

दुर्विनीतानाम्"—Act I. This is a simple truth uttered in all sincerity. Vidushaka's delusion continues in the next two pages also (see प्रहस्य आत्मगतम् &c. below). Raghava takes it as a taunt. "विदूषकस्तु चित्रगतस्य वारयितुमशक्यत्वात् सोल्लुण्ठमाह"—*Raghava.*

2. (a). कुसुम &c.—कुसुमसमेता लता कुसुमलता। शाकपार्थिवादि। प्रिय: अतिथि: प्रियातिथि: esteemed guest. कुसुमलताया: प्रियातिथि:। तत्सम्बुद्धौ। (b). परिपतन &c.—पत means 'to go', परि means सर्वत:। परिपतन is "hovering about". Raghava has परिपतनरूप: खेद:।

3. (a). कुसुम &c.—Sitting on the flower because *thirsty.* Raghava says thirsty because कुसुमनिषण्णा। "तृषितत्वं कुसुमोपरि उपवेशनादेव"। He explains "कुसुमनिषण्णा इति तव अयत्नसाध्यं स्थानम् इति भाव:"—You have a footing there secured to you without effort on your part. (b). सती—कुसुमनिषण्णा सती अपि is the construction. Raghava takes सती as पतिव्रता। (c). *Remark*—Here the female bee is only *painted.* Hence she was not sipping honey, but merely sitting still. The king considers the whole scene as a reality. Hence he is under the influence of मोह। Thus the अलङ्कार according to Dandin is मोहोपमा because the *sitting still* resembles *waiting* (see *Kavyadarsa*, II. 25). If, however, we suppose that the delusion of the king extends only so far as to the *motive* of the female bee, then the sitting still, though only *like* waiting, is *deliberately taken* by the king *as the waiting itself.* The figure is then समासोक्ति (See under वातेरितपल्लवाङ्गुलीभि: &c.—Act I).

सानुमती—अज्ज, अभिजादं क्खु एसो वारिदो [आर्य, अभिजातं खल्वेष वारित:]।

SANUMATI—Noble Sir, he is very well stopped !

विदूषक:—पडिसिद्धा वि वामा एसा जादी [प्रतिषिद्धापि वामा एषा जाति:]।

VIDUSHAKA—This is a class that remains perverse though prohibited.

राजा—एवं भो न मे शासने तिष्ठसि। श्रूयतां तर्हि सम्प्रति—

अक्लिष्टबालतरुपल्लवलोभनीयं
पीतं मया सदयमेव रतोत्सवेषु।
बिम्बाधरं स्पृशसि चेद्भ्रमर प्रियाया-
स्त्वां कारयामि कमलोदरबन्धनस्थम्॥

KING—So! You do not attend to my injunction! Then be it known now—O Bee, if thou touchest the Bimba-like lower-lip of my darling, attractive like the unfaded young leaf of a tree, drunk by me tenderly indeed in "love's banquets", I will have thee placed in bondage inside a lotus.

सानुमतीति। हे 'आर्य्य एष:' भ्रमर: 'अभिजातं खलु' न्याय्यं यथा तथैव ["न्याय्ये कुलीनबुधयोरभिजातपदं विदु:" इति शाश्वत:] 'वारित:' प्रतिषिद्ध:। आर्य्यो भवान् आर्य्येण यथा वार्य्यं तथैवैनं वारयति, न तु अनार्य्य इव कठोरं दण्डयति। इति वारण-प्रकारं प्रति कटाक्ष:।

विदूषक इति। 'एषा जाति:' तिर्य्यग्जाति: सुतराम् अनार्य्या 'प्रतिषिद्धापि' वारितापि 'वामा' प्रतिकूला। नेयं वारणं गणयति ["वाम: प्रतिकूलेऽपि प्रोक्त:" इति हलायुध:]।

राजेति। 'एवम्' अनेन विधिना शकुन्तलामुखाभिमुखमेव धावन् 'मे शासने' निर्देशे 'न तिष्ठसि' न वर्त्तसे। तेन आज्ञालङ्घनेनापि दण्डनीयोऽसि। 'तर्हि सम्प्रति श्रूयताम्'—अन्वय:—हे भ्रमर अक्लिष्टबालतरुपल्लवलोभनीयं मया रतोत्सवेषु सदयमेव पीतं प्रियाया बिम्बाधरं स्पृशसि चेत् त्वां कमलोदरबन्धनस्थं कारयामि। व्याख्या—हे 'भ्रमर' मधुकर कामुक इति च 'अक्लिष्ट:' अमर्दित: अशुष्क इति वा यो 'बाल:' नूतन: 'तरुपल्लव:' वृक्षपत्रं तद्विव 'लोभनीयं' चित्ताकर्षकं 'मया रतोत्सवेषु सदयमेव पीतं प्रियाया बिम्बाकारम् अधरम्' [शाकपार्थिवादि:] 'स्पृशसि चेत्' यदि दशसि तदा 'त्वाम्' अपराधिनं 'कमलस्य' कस्यचित् पद्मस्य 'उदररूपं बन्धनं' कारागृहं तत्र

'तिष्ठति' यस्मादहं 'कारयामि'। राजाहं त्वां परदारधर्षणापराधेन निरुणध्मि। अनेन तमसा घोरमवातसञ्चारं पद्मोदरञ्च ते कारा भविष्यति इति भावः।

NOTE

1. बिम्बाधरम्—Avoid अधरः बिम्बमिव। That would give अधरबिम्बम्।

विदूषकः—एव्वं तिक्खणदण्डस्स किं ण भाइस्सदि [एवं तीक्ष्णदण्डस्य किं न भेष्यति]। (प्रहस्य आत्मगतम्) एसो दाव उम्मत्तो। अहं वि एदस्स सङ्गेण ईदिसवण्णो विअ संवुत्तो [एष तावत् उन्मत्तः। अहमपि एतस्य सङ्गेन ईदृशवर्ण इव संवृत्तः]। (प्रकाशम्)—भो चित्तं क्खु एदं [भोः चित्रं खल्वेतत्]।

VIDUSHAKA—Would he not be afraid of such a strict disciplinarian! (*Laughing—Within himself*) He is indeed mad. I too, through his companionship, have become as if of a similar complexion. (*Aloud*)—Ho (friend), it is only a picture.

विदूषक इति। 'एवं तीक्ष्णः' कठोरः 'दण्डो' यस्य तस्य उग्रशासनस्य [शेष-विवक्षया षष्ठी] 'किं न भेष्यति'। 'प्रहस्य' उपहासं कृत्वा 'आत्मगतमाह'। श्राममन्तु राज्ञा श्रुत एव। 'एष' राजा उन्मत्तस्तावत् उन्मत्त एव [तावदवधारणे]। 'अहमपि एतस्य' उन्मत्तस्य 'सङ्गेन' संसर्गात् 'ईदृशो वर्णो' रूपं यस्य तथाविधः ["वर्णः स्याद्रूप-भेदयोः" इति शाश्वतः] 'संवृत्तो' जात 'इव'। "संसर्गजा दोषगुणा भवन्ति" इति मन्ये अहमपि उन्मत्तसङ्गादुन्मत्तो जातः इत्यर्थः।

NOTE

1. (a). एवं तीक्ष्ण &c.—This is a taunt uttered under the impression that the king has lost the power of discrimination because he is temporarily insane. Just then Vidushaka realises that the subject under discussion is but a picture. But, simple-minded as he is, he does not see that his own momentary spell was due to the king's supreme skill as a painter. On the

contrary he believes that the king's malady is catching and he too was about to lose reason through keeping company with an insane person. The thought of an insane taunting an insane brings on the laugh (प्रहस्य)। The प्र intensifies the हास। The laugh is of course aloud ; only the speech following is आत्मगत।

राजा—कथं चित्रम्।

KING—How so ! A picture ?

सानुमती—अहं वि दाणिं अवगदत्था, किं उण जहलिहिदाणुभावी एसो [अहमपि इदानीमवगतार्था, किं पुनर्यथालिखितानुभावी एषः]।

SANUMATI—I too have now realised the fact ; what to say of this person who feels as he painted it !

राजा—वयस्य, किमिदमनुष्ठितं पौरोभाग्यम्।
दर्शनसुखमनुभवतः साक्षादिव तन्मयेन हृदयेन।
स्मृतिकारिणा त्वया मे पुनरपि चित्रीकृता कान्ता॥
(बाष्पं विहरति)।

KING—Why is this mischief done, friend ? To me, with the heart full of her, enjoying the rapture of beholding her as if personally present, my darling is yet again turned into a picture by you recalling my memory. (*Sheds tears*).

सानुमतीति। 'अहमपि इदानीम्' अस्मिन्नेव क्षणे 'अवगतः' ज्ञातः 'अर्थः' वस्तु, चित्रत्वमित्यर्थः, यया तादृशी सञ्जाता, 'किं पुनर्यथालिखितं' लिखितानुरूपम् 'अनुभवति' ध्यायति यस्मात्तादृशः 'एष' राजा। मयापि ज्ञातं सखीमिव पुरः पश्यामीति, शकुन्तलामयहृदय एष राजा चित्रस्थामिमां स्वयमुपस्थितां मंस्यते इति न चित्रम्। ["यथालिखितानुभावी" (रा०, वि०, म०)—"यथालिखितानुसारी" (त०, न्या०)]॥

राजेति। हे 'वयस्य किं' किमर्थम् 'इदं पुरोभागित्वं' दुष्कर्मनिरतस्य ["दोषैक-

इक् पुरोभागी" इत्यमरः] कार्य्यम्, अकार्य्यमित्यर्थः 'अनुष्ठितम्' आचरितम्। कुतो दुष्कर्म इति चेत् शृणु—अन्वयः—स्मृतिकारिणा त्वया तन्मयेन हृदयेन साक्षादिव दर्शनसुखमनुभवतो मे कान्ता पुनरपि चित्रीकृता। व्याख्या—'स्मृतिं' स्मरणं प्रकृतस्मरणं 'करोति कारयति' वा यस्तथाविधेन 'त्वया तन्मयेन' शकुन्तलामयेन 'हृदयेन' चेतसा 'साक्षादिव' प्रत्यक्षमिव ["साक्षात् प्रत्यक्षतुल्ययोः" इति कोषः] 'दर्शनस्य' प्रत्यक्षदृष्टेः 'सुखम् अनुभवतः' उपलभमानस्य 'मे कान्ता' शकुन्तला 'पुनरपि' भूयोऽपि 'चित्रीकृता' चित्ररूपेण परिणामिता। पूर्वं मया चित्रीकृता कान्ता अद्य तन्मयत्वात् पुनः प्राप्ता। सा भूयोऽपि त्वया चित्रीकृता॥ 'वाष्प' नेत्रजलं 'विहरति' मुञ्चति। प्राक् नष्टा पुनः प्राप्ता भूयोऽपि नष्टा इति रोदनकारणम्।

NOTES

1. यथालिखित &c.—लिखितस्य अनतिक्रमः यथालिखितम् agreement with what is painted. अर्शआद्य—। तत् अस्त्यस्मिन् इति यथालिखित+अच् मत्वर्थे=यथालिखितम् that which agrees with &c.—Now see Tika.

2. स्मृतिकारिणा—स्मृति is स्मरण recollection. तां करोति जनयति इति स्मृति+कृ+णिनि साधुकारिणि कर्त्तरि=स्मृतिकारी one who promotes recollection. तेन। Or we may derive from कृ+णिच्।

सानुमती—पुव्वावरविरोही अपुव्वो एसो विरहमग्गो [पूर्वापरविरोधी अपूर्व एष विरहमार्गः]।

SANUMATI—Strange is the course of this love-sickness with a contradictory start and sequel.

राजा—वयस्य, कथमेवमविश्रान्तं दुःखमनुभवामि—

प्रजागरात् खिलीभूतस्तस्याः स्वप्ने समागमः।
वाष्पस्तु न ददात्येनां द्रष्टुं चित्रगतामपि॥

KING—Friend, how can I undergo such ceaseless torture? Through wakefulness is barred her vision in sleep; and tears do not suffer me to see her drawn in a picture too.

सानुमतीति। 'एष विरहस्य' इष्टवियोगशोकस्य 'मार्गः' पन्थाः, रीतिरित्यर्थः

'पूर्वस्य' प्रथमावस्थायाः 'अपरस्य' अन्यस्य, उत्तरावस्थायाश्च यो 'विरोधः' परस्परप्रतिषेधः तद्वान्, अतएव 'अपूर्वः' अदृष्टपूर्वः, नूतन इत्यर्थः। चित्रस्य प्रथमं चित्रत्वेन ज्ञानं ततः सत्यत्वं न पुनश्च चित्रत्वेन इति पूर्वापरविरोधः इति राघवः।

राजेति। ["अविश्रान्तं दुःखम्" (वि-)—"अविश्रामं दुःखम्" (त-, स्या-)—"अविश्रान्तदुःखम्" (रा-, म-)]। अन्वयः—प्रजागरात् तस्याः स्वप्ने समागमः खिलीभूतः। बाष्पस्तु चित्रगतामपि एनां द्रष्टुं न ददाति। व्याख्या—'प्रजागरात्' रात्रिजागरणात् 'तस्याः' शकुन्तलायाः [कर्त्तरि कृद्योगा षष्ठी] 'स्वप्ने' निद्रायां 'समागमः' मत्समीपागमनं 'खिलीभूतः' निरुद्धः ["द्वे खिलाप्रहते समे" इति कोषः। "अप्रहत" एव उपचारात् "निरुद्ध" इति]। प्रनष्टा सा जाग्रता मया नैव दृश्यते। स्वप्ने पश्येयं यदि निद्रां लभेय, न च लभे। तत् तस्याः चित्रे दर्शनं विना न मे शरणमन्यत्। तत्र 'बाष्पस्तु' तां तां पूर्वावस्थां स्मरतो मे दुःखात् जातं नेत्रजलं पुनः 'चित्रगतामपि' आलेख्ये लिखिताञ्च [अपिः समुच्चये] 'द्रष्टुं न ददाति' [भिन्नेऽपि कर्त्तरि कविविवक्षया तुमुन्]। इत्थं त्रिविधेऽपि विनोदनोपाये विहते कथय वयस्य कथमविश्रान्तं दुःखमनुभवामि। अधुना तु मया आत्मविस्मृतिवशात् चतुर्थोऽपि तस्या दर्शनोपायो लब्धोऽभूत्। त्वं पुनस्तत्र पौरोभाग्यमाचरन् मे स्मृतिं कृतवानसि ["स्वप्ने समा—" (रा-, वि-, म-)—"स्वप्नसमा—" (त-, स्या-)]॥

NOTES

1. अपूर्वः—पूर्व is पूर्वदृष्ट by transference of epithets. न पूर्वः। नञ्तत—।

2. अविश्रान्तम्—वि + श्रम + क्त कर्त्तरि = विश्रान्तम्। न विश्रान्तम्। नञ्-तत्—। The emphasis is on the *ceaselessness* of the torture. Hence अविश्रान्त should not be compounded. Besides the presence of एवम् is also a bar to समास।

3. (a). प्रजागरात्—See प्रजागरकृशः, Act III. (b). स्वप्ने—The compound स्वप्नसमागमः is avoided because स्वप्न is emphasised. (c). *Remark*—The verse explains *how* the दुःख is अविश्रान्त। The दुःख is—I cannot see her. When awake, she is not seen *bodily* because lost to me. She cannot be seen on the canvas too for

I am weeping (*c. f.* वाष्प' विहरति, above). The only chance of seeing her is in a dream. But I cannot sleep (प्रजागर), so that chance too is lost. Just now, through my temporary delusion, I was neither awake nor asleep and was enjoying her company. My दुःख ceased, but you have wickedly aroused me and brought me back to ceaseless (अविश्रान्त) misery (दुःख) । How (कथम्) can I bear it (अनुभवामि) ।

सानुमती—सव्वहा पमज्जिदं तुए पच्चादेसदुक्खं सउन्दलाए [सर्व्वथा प्रमृष्टं त्वया प्रत्यादेशदुःखं शकुन्तलायाः] ।

SANUMATI—Sakuntala's sorrow for repudiation is thoroughly wiped off by you.

(प्रविश्य) चतुरिका—जेदु जेदु भट्टा । वट्टिआकरण्डअं गेण्हिअ इदोमुहं पत्थिअ म्हि [जयतु जयतु भर्त्ता । वर्त्तिकाकरण्डकं गृहीत्वा इतोमुखं प्रस्थितास्मि—] ।

CHATURIKA (*Entering*)—Prosper, O Sire, prosper. I was proceeding this way having taken up the casket of brushes—

राजा—किं च ।

KING—What then ?

चतुरिका—सो मे हत्थादो अन्दरा तरलिआदुदिआए देवीए वसुमदीए अहं एव्व अज्जउत्तस्स उवणइस्सं त्ति सवलक्कारं गहीदो [स मे हस्तादन्तरा तरलिकाद्वितीयया देव्या वसुमत्या अहमेवार्य्यपुत्रस्योपनेष्यामि इति सबलात्कारं गृहीतः] ।

CHATURIKA—On my way it was forcibly taken away from my hand by Queen Vasumati with Taralika as her second, saying "I will myself carry it to my husband."

सानुमतीति । 'प्रत्यादेशात्' निराकरणात् जातं यत् तस्या 'दुःखं' तत् 'त्वया

-सर्वथा' सर्वप्रकारेण 'प्रमृष्टं' चालितम्। एतत् श्रुत्वा अणु अपि दुःखं तस्या न स्यात्।

चतुरिकेति। 'वर्त्तिकायाः' तूलिकायाः 'करण्डकं' भाजनं 'गृहीत्वा इतोमुखं' भवदभिमुखं 'प्रस्थितास्मि' आगन्तुमारब्धास्मि [आदिकर्मणि कर्तरि क्तः]।

राजेति। प्रस्थितासि 'किं च' जातं ततः कथय।

चतुरिकेति। 'अन्तरा' मध्ये, वर्त्मनि इत्यर्थः 'तरलिकया तदाख्यया' परिचारिकया -या 'द्वितीया' तथाविधया 'देव्या वसुमत्या' परिचारिकासहायया तया इत्यर्थः—'अहमेव आर्य्यपुत्रस्य उपनेष्यामि' समीपे प्रापयिष्यामि 'इति' एतदुक्त्वा 'बलात्कारेण' हठकारि-तया 'सह' [बलादिति हठार्थेऽव्ययम्] 'स' वर्त्तिकाकरण्डकः 'मे हस्तात् गृहीतः'।

NOTES

1. (a). वर्त्तिका &c.—वर्त्तते इति वृत+ण्वुल् कर्त्तरि स्त्रियाम्=वर्त्तिका paint, *or* वर्त्तका a duck. (b). इतोमुखम्—इतः अस्यां दिशि मुखं यस्मिन् कर्मणि तत् यथा यथा। Qualifies प्रस्थानक्रिया।

2. (a). तरलिका &c.—तरलिका द्वितीया यया or यस्याः supposing द्वितीय to mean सहाय। बहु—। Or again इतत्—(See Tika). (b). आर्य्यपुत्रस्य—शेषे षष्ठी। Related to उप uncompounded, or उपनेष्यामि।

विदूषकः—दिट्ठिआ तुमं मुक्का [दिष्ट्या त्वं मुक्ता]

VIDUSHAKA—Luckily you are let off!

चतुरिका—जाव देवीए विडवलग्गं उत्तरीअं तरलिआ मोचेदि दाव मए णिव्वाहिदो अत्ता [यावत् देव्या विटपलग्न-मुत्तरीयं तरलिका मोचयति तावन्मया निर्वाहित आत्मा]।

CHATURIKA—While Taralika was disengaging the queen's mantle which was caught in a twig, my person was carried off by me.

राजा—वयस्य, उपस्थिता देवी बहुमानगर्विता च। भवान् इमां प्रतिकृतिं रक्षतु।

KING—Friend, the Queen is at hand and she is sensitive through much attention (on my part). Do thou save this picture.

यावदिति। 'विटपे' वृक्षशाखायां 'लग्न'' संसक्तं 'देव्या उत्तरीयं' पूर्वकायांशुकं "यावत्' यत्कालं 'तरलिका मोचयति' [यावद्योगे लट्] 'तावत्' तत्कालम्, उभयोस्तयोर्-व्यासक्ततया तस्मिन्नवसरे 'मया आत्मा' स्वदेहः ["आत्मा देहमनोब्रह्मस्वभावधृति-बुद्धिषु" इति विश्वः] 'निर्वाहितः' दूरे नीतः। तेनैवाहं मुक्तो न हि स्वेच्छया तयोः।

राज्ञेति। 'देवी उपस्थिता' आगतप्राया। सा 'च बहुमानेन' इयद्दिनं मदीयेन आदरेण 'गर्विता' जातगर्वा, जातबहुमानगर्वा इत्यर्थः। अहमेवार्य्यपुत्रस्य बहुमता इत्यभिमानवती देवी यदि प्रयत्नलिखितां मे शकुन्तलामूर्त्तिं पश्येत् नूनम् ईर्ष्यया एनां नाशयेत्। तत् 'भवानिमां प्रतिकृतिं रक्षतु' एतां गृहीत्वा अपयातु।

NOTES

1. (a). यावत् &c.—This is in reply to Vidushaka. I was not let off through kindness, but managed to run away while they were busy. (b). उत्तरीयम्—उत्तरस्मिन् देहे भवम् इति उत्तर+छ—A loose garment worn on the upper part of the body, A wrapper. (c). निर्वाहितः—निर्+वह to lead+णिच्+क्त कर्मणि। Led off. For a similar use compare "यदा तु निर्वाहयतिस्म मे प्रियम्"—*Buddhacharita.*

विदूषकः—अत्ताणंत्ति भणाहि [आत्मानमिति भण]। (चित्रफलकमादायोत्थाय च) जइ भवं अन्तेउरकूडवागुरादो मुच्चीअदि तदो मं मेहप्पडिच्छन्दे पासादे सद्दावेहि [यदि भवानन्तःपुरकूटवागुरातो मुच्यते ततो मां मेघप्रतिच्छन्दे प्रासादे शब्दाययतु]। (द्रुतपदं निष्क्रान्तः)।

VIDUSHAKA—Say "Save thyself" ! (*Taking the picture board and getting up*). If thou art released from the noose of perfidy of the harem, then shout for me at the house named Megha-pratichhanda. (*Exit in quick steps*).

सानुमती—अण्णसंकन्तहिअओ वि पढमसंभावणं अवेक्खदि सिढिलसोहदो दाणिं एसो [अन्यसंक्रान्तहृदयोऽपि प्रथम-सम्भावनामपेक्षते शिथिलसौहृद इदानीमेषः]।

SANUMATI—This person, with his affection less ardent, respects his first love though his heart is transferred to another.

विदूषक इति। किं मन्यसे प्रतिकृतिमात्रं नाशयेत्, मामपि हन्यात् यदि पश्येत्। तत् 'भण आत्मानं' रक्षतु भवान् 'इति'। 'अन्तःपुरस्य' लक्षणया तत्रस्थाया देव्या या 'कूटवागुरा' मायारूपं जालम् ["मायानिश्चलयन्त्रेषु" इति प्रस्तुत्य "सीराङ्गे कूटमस्त्रियाम्" इति, "वागुरा मृगबन्धनी" इति चामरः] तस्मात् 'यदि मुच्यते' मुक्तो भवति [कर्मकर्त्तरि लट्] 'ततो मां मेघप्रतिच्छन्दे' तदाख्ये 'प्रासादे शब्दाययतु' शब्दं कारयतु, तत्र भवदाह्वानं श्रुत्वा अहं शब्दं करिष्यामि ["शब्दवैर—" इति क्यङ् करणे। ततो णिच्। अणिकर्त्तुः कर्मसंज्ञा]। 'द्रुतानि' सत्वराणि 'पदानि यस्मिन् तत् यथा तथा 'निष्क्रान्तः' ["—कूटवागुरा—" (त-, न्या-)—"कालकूट" (रा-, वि-, म-)॥ "शब्दायस्व" (वि-)—"शब्दापय" (रा-)—"शब्दय" (म-) —"शब्दायिष्यते" (त-, न्या-)]॥

सानुमतीति। 'इदानीं शिथिलं' सन्तं 'सौहृदं' मैत्री यस्य तथाविध [सौहृदमिति अणि हृद्भावः इत्यादि व्याख्यातं प्राक्] 'एष' राजा 'अन्यस्यां' शकुन्तलायां संक्रान्तं सक्तं 'हृदयं' यस्य तादृशोऽपि 'प्रथमा' प्राक्कृता या 'सम्भावना' सत्क्रिया, पूर्वप्रदर्शिता या वसुमत्यां प्रीतिः इत्यर्थः, ताम् 'अपेक्षते' मानयति। सर्वेश्वरोऽपि सन् यदर्थं देव्या वसुमत्याः शकुन्तलाप्रतिकृतिं निगूहति, तत्र कारणं प्रथमप्रदर्शितप्रणयगौरव न तु वसुमतीप्रेम।

NOTES

1. आत्मानम्—The meaning is—Instead of saying "भवान् प्रतिकृतिं रक्षतु" you should say "भवान् आत्मानं रक्षतु"। चतुरिका has escaped somehow, but she will not let me off so easily. We two have been helping you in this matter, but my offence is greater in her eyes.

2. (a). कूटवागुरा -This seems to suit मुच्यते better than कालकूट। (b). शब्दाययतु—शब्दं कुर्वन्तं प्रेरयतु इति शब्द+क्यङ्+णिच्+लोट् तु= शब्दाय (नाम धातु) +णिच्+तु=शब्दाययतु। Here शब्दाय is अकर्मक because the कर्म, *i. e.*, शब्द is included in the धात्वर्थ (धात्वर्थेनोपसंग्रहात्)। Thus अहं शब्दाये (अणिचि)=भवान् मां शब्दाययतु the अणिकर्त्ता becoming कर्म by the rule "गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामणिकर्त्ता

स णौ"। The भाष्यकार however directs तृतीया in the अणिकर्त्ता of शब्दाय। Thus "शब्दायते देवदत्तः। शब्दाययति देवदत्तेन"—*Bhashya*, 1, 4, 52. The poet disregards the Bhashya in Act IV. (*c. f.* "हस्तिनापुरगामिनः ऋषयः शब्दाय्यन्ते")। We may note that there the Beng. Ed. reads शब्दायन्ते and here Vidyasagara's reading is शब्दायस्व। If these are adopted the grammatical difficulty in Act IV is overcome. There ऋषयः शब्दायन्ते means the sages are talking. But मां शब्दायस्व raises fresh difficulty, because शब्दाय being अकर्मक, it cannot govern माम्। "शब्दनचणस्यात कर्मणः अन्तर्भावात् कर्मान्तरायोगाच्च अकर्मकत्वात्"—*Kaiyata*. *Haradatta* and *Bhattoji* are to the same effect. Nagesa differs. He believes that like पुत्रमाह्वयति we may have पुत्रं शब्दायते ("वहिर्भूतपुत्रादि कर्म"—*Sabdendusekhara*). On the whole, it seems better to suppose that Kalidasa does not strictly follow the Bhashya and has attached णिच् to शब्दाय। Nor is this the only instance of his disregard of Panini's teaching.

(प्रविश्य पत्रहस्ता) प्रतीहारी—जेदु जेदु देवो [जयतु जयतु देवः]।

(*Entering with a letter in hand*) THE WARDER—Prosper, let Sire prosper.

राजा—वेत्रवति, न खल्वन्तरा दृष्टा त्वया देवी।

KING—Vetravati, was not the Queen noticed by you midway ?

प्रतीहारी—अह इं। पत्तहत्थं मं देक्खिअ पडिणिउत्ता [अथ किम्। पत्रहस्तां मां दृष्ट्वा प्रतिनिवृत्ता]।

WARDER—Yes. Seeing me with a letter in hand she has gone back.

राजा—कार्य्यज्ञा कार्य्योपरोधं मे परिहरति।

KING—Knowing what is proper, she avoids interrupting my state-affairs.

प्रतीहारी—देव, अमच्चो विस्सवेदि अत्थजादस्स गणणा-बहुलदाए एक्कं एव्व पारकज्जं अवेक्खिदं तं देवो पत्तारूढं पच्चक्खोकरेदुत्ति [देव अमात्यो विज्ञापयति—अर्थजातस्य गणनाबहुलतया एकमेव पौरकार्य्यमवेक्षितम्। तद्देव: पत्रारूढं प्रत्यक्षीकरोतु इति]।

WARDER—Sire, the minister reports that owing to the length of the counting of the several receipts, only one case of the citizens has been investigated. Let Sire see the same put on paper.

राजेति। 'देवी' वसुमती 'त्वया अन्तरा' मध्ये, वर्त्मनि इत्यर्थ: 'न खलु दृष्टा' न किं दृष्टा [खलु जिज्ञासायाम्। "निषेधवाक्यालङ्कारजिज्ञासानुनये खलु" इत्यमर:]।

कार्य्यज्ञेति। 'कार्य्यं' करणीयं जानाति या तथाविधा कार्य्याकार्य्यविवेकवती देवी 'मे कार्य्यस्य' राजकार्य्यस्य 'उपरोधं' विघ्नं 'परिहरति' त्यजति। राजकार्य्यस्य विघ्नजननम् अकार्य्यम् इति मत्वा निवर्त्तते देवी।

प्रतीहारीति। 'अर्थजातस्य' तैस्तैराधिकारिकै: प्रेषितस्य वित्तसमूहस्य ["अर्थ: प्रकारे विषये वित्तकारणवस्तुषु" इति "जातं व्यक्त्यौघजन्मसु" इति च कोष:] 'गण-नाया.' संख्यानस्य 'बहुलतया 'बाहुल्येन [हेतौ तृतीया] 'एकमेव पौरकार्य्यम् अवेक्षितम्' आलोचितं मया। 'पत्रे आरूढ़'' पत्रस्थं 'तत् देव: प्रत्यक्षीकरोतु' स्वय-मालोचयतु।

NOTES

1. अथ किम् &c.—The poet here very skilfully keeps Vasumati away. Up till now Sanumati has not disclosed the birth of Sarvadamana or that arrangements are being made by the gods for the re-union of Dushyanta and Sakuntala. Vasumati's presence would have prevented the disclosure altogether, and the purpose of introducing Sanumati would have been defeated.

2. प्रत्यक्षीकरोतु—अक्षणी: प्रति इति प्रति + अक्षि + टच् समासान्त = प्रत्यक्षम्। No समास (See प्रदक्षिणीकुरुष्व, प्रत्यक्षीकरिष्यामि, &c. Ante).

राजा—इतः पत्रं दर्शय। (प्रतीहारी उपनयति)।

KING—Here, show the letter. (*The Warder takes it up to him*).

राजा (अनुवाच्य)—कथम्। समुद्रव्यवहारी सार्थवाहो धनमित्रो नाम नौव्यसने विपन्नः। अनपत्यश्च किल तपस्वी। राजगामी तस्यार्थसञ्चय: इत्येतदमात्येन लिखितम्। कष्टं खल्वनपत्यता। वेत्रवति, बहुधनत्वाद्बहुपत्नीकेन तत्रभवता भवितव्यम्। विचार्य्यतां यदि काचिदापन्नसत्वा तस्य भार्य्यासु स्यात्।

KING (*Having read*)—How so! A merchant named Dhanamitra trading by the sea has died in a ship-wreck. And the poor fellow is childless; the wealth hoarded by him has to go to the king. This is what is written by the minister. Childlessness is misery indeed! Vetravati, having great wealth, his good self must be one with many wives. Let it be ascertained if among his wives any one be quick with child.

राजेति। 'अनुवाच्य' पठित्वा। 'कथम्' इत्याश्चर्य्ये। 'समुद्रेण व्यवहरति' पणते, क्रयविक्रयकर्म्म कुरुते यस्तथाविधः 'सार्थान्' वणिक्समूहान् 'वाहयति' प्रापयति देशान्तराणि यस्तथाविधः वणिक्पतिः 'धनमित्रो नाम नावां' पोतानां 'व्यसनं' विपत्तिः, जलेमज्जनमित्यर्थः ["व्यसनं विपदि भ्रंशे" इत्यमरः] तत्र 'विपन्नः' मृतः। 'तपस्वी' अनुकम्प्यः स वणिक् 'अनपत्यश्च' निःसन्तानश्च। 'तस्य अर्थानां सञ्चयो' बाहुल्यं, प्रभूतमर्थजातमिति भावः यद्वा 'अर्थसञ्चयो' वित्तसङ्घः [बहुत्वविवक्षायामच् न तु राशीकरणे। अप्राणिसंघे वा अच्] 'राजानम्' अवश्य' 'गच्छति' यस्तादृशः। 'अनपत्यता' सन्ततिहीनता 'कष्टं खलु' क्लेश एव। 'बहुधनत्वात्' आढ्यत्वात्। 'बहुपत्नीकेन' भार्य्याबाहुल्यवता [नदीत्वात् कप्]। 'विचार्य्यतां' अन्विष्य निर्द्धार्य्यताम् [कर्मणि लोट्]। 'सत्वं' जीवम् 'आपन्न'' यद्वा 'आपन्न' सत्वं' यया तादृशी, गर्भिणी इत्यर्थः।

NOTE

1. अर्थसञ्चयः—सम्+चि+अच् भावे=सञ्चयः plenty बाहुल्यम्। It does not mean राशि a heap; for, then the rule "निवास-चिति-शरीरोपसमाधानेषु आदेश्च कः" will require घञ् and च will change into क giving सङ्कायः। The Vritti thus comments on निचय—"इह कस्मान्न भवति महान् काष्ठनिचयः। बहुत्वमत्र विवक्षितम् न उपसमाधानम् (heaping—राशीकरण)"। अर्थानां सञ्चयः। This means सञ्चिता अर्थाः।

प्रतीहारी—देव, दाणिं एव्व साकेदअस्स सेट्ठिणो दुहिआ णिव्वुत्तपुंसवणा जाआ से सुणीअदि [देव, इदानीमेव साकेतकस्य श्रेष्ठिनो दुहिता निर्वृत्तपुंसवना जाया अस्य श्रूयते]।

WARDER—It is reported that his wife, the daughter of a merchant of Ayodhya, has her Pumsavana ceremony just performed.

राजा—ननु गर्भः पित्र्यं रिक्थमर्हति। गच्छ एवममात्यं ब्रूहि।

KING—Surely, the fœtus deserves (inherits) the paternal property. Go, say so to the minister.

प्रतीहारी—जं देवो आणवेदि [यत् देव आज्ञापयति]। (प्रस्थिता)।

WARDER—What Sire commands. (*Proceeds to go*).

राजा—एहि तावत्।

KING—Do come back.

प्रतीहारी—इअम्हि [इयमस्मि]।

WARDER—Here I am.

राजा—किमनेन सन्ततिरस्ति नास्तीति ।
येन येन वियुज्यन्ते प्रजाः स्निग्धेन बन्धुना ।
स स पापादृते तासां दुष्यन्त इति घुष्यताम् ॥

KING—What is gained by considering if there is or is not progeny? With whomsoever loving kinsman the subjects are separated by death, that one, save the sinful, is Dushyanta unto them—Let this be proclaimed.

प्रतीहारीति । 'अस्य जाया' पत्नी 'साकेतः' अयोध्या यस्य निवासः तस्य [साकेत-शब्दो धूमादिषु पठ्यते । ततः शैषिको वुञ्] 'श्रेष्ठिनः' वणिजः 'दुहिता इदानीमेव निवृत्त' सम्पन्नं 'पुंसवनं' गर्भाधानात् तृतीये मासि कर्त्तव्यः संस्कारविशेषो यस्याः तादृशी इति 'श्रूयते' ।

राजेति । 'ननु' अवधारणे । 'गर्भः' गर्भस्थमपत्यं 'पित्र्यं' पितुरागतं 'रिक्थं' धनम् ["रिक्थमृक्थं धनं वसु" इत्यमरः] 'अर्हति' ।

राजेति । अपरमपि किञ्चित् वक्तुकामः 'एहि तावत्' इति प्रस्थितां प्रतीहारीं निवर्त्तयति ।

राजेति । 'सन्ततिः अस्ति इति' सन्ततिः 'नास्ति' इति 'अनेन' वा 'किम्'? विद्यमाने अपत्ये अविद्यमाने च फलं तुल्यम् । कुत इत्याह—अन्वयः—प्रजाः येन येन स्निग्धेन बन्धुना वियुज्यन्ते, पापात् ऋते दुष्यन्तस्तासां स स इति घुष्यताम् । व्याख्या—'प्रजाः' जनाः 'येन येन स्निग्धेन' स्नेहयुक्तेन 'बन्धुना' बान्धवेन, पित्रादिस्वजनेन 'वियुज्यन्ते' वियुक्ता भवन्ति 'पापात्' पापनिरतात् 'ऋते' विना, पापिनं स्वजनं वर्जयित्वा इत्यर्थः 'दुष्यन्तः' [स्वनामग्रहणेन "दुष्यन्तो मे बन्धुः" इति महती गौरववार्त्ता सूचिता] 'तासां' प्रजानां 'स स' 'बन्धुः' बन्धुस्थाने स्थितः 'इति' एतत् 'घुष्यतां' विज्ञाप्यताम् । यो यो मृतः दुष्यन्तस्तस्य तस्य स्थाने आस्ते । तत् मृते वा स्थिते वा फलं तुल्यमेव । किन्तु यः पापी म्रियते तस्य स्थाने दुष्यन्तो न स्थास्यति ।

NOTES

1. (a). साकेतकस्य—The Prakrita साकेदअस्स should not be

rendered साकेतस्य as has been done by Raghava. साकेतस्य श्रेष्ठी is an awkward phrase, the षष्ठी in such cases being unusual. साकेते जात: or साकेते भव: or साकेते वसति इति साकेत+वुञ्=साकेतक: of Saketa. तस्य। Qualifies श्रेष्ठिन:। (b). श्रेष्ठिन:—अतिशयेन प्रशस्यानि इति प्रशस्य+इष्ठन्=श्रेष्ठानि श्रेष्ठवस्तूनि इत्यर्थ:। तानि अस्य सन्ति इति श्रेष्ठ+इनि मत्वर्थे=श्रेष्ठी।

2. (a). येन वियुज्यन्ते—This is from युजिर् to join रुधादि। वियुज is to *dis*-join. य: प्रजा: वियुनक्ति gives येन प्रजा: वियुज्यन्ते in the कर्मवाच्य। (b). पापात्—पापम् अस्ति अस्य इति पाप +अच् मत्वर्थे=पाप: wicked. (c). घुष्यताम्—घुषिर् विशब्दने चुरादि+लोट् ताम् कर्मणि। विशब्दन is "declaration of views." The भ्वादिगणीय root has a different sense.

प्रतीहारी—एव्वं णाम घोसइदव्वं [एवं नाम घोषयितव्यम्]। (निष्क्रम्य पुन: प्रविश्य) काले पवुट्टं विअ अहिणन्दिदं देवस्स सासणं [काले प्रवृष्टमिव अभिनन्दितं देवस्य शासनम्]।

WARDER—It shall be so proclaimed. (*Going out and coming back*) Sire's command is welcomed like a timely shower.

राजा (दीर्घमुष्णञ्च निश्वस्य)—एवं भो: सन्ततिच्छेदनिरवलम्बना मूलपुरुषावसाने सम्पद: परमुपतिष्ठन्ते। ममाप्यन्ते पुरुवंशश्रिय एष वृत्तान्त:।

KING (*Sighing deep and warm*)—Thus, O, do riches at the death of the original owner, being supportless by the lapse of progeny, pass to a stranger After my demise too such will be the fate of the fortune of Puru's race.

प्रतीहारीति। 'काले' यथाकाले यत् 'प्रवृष्ट' सुवृष्टि: [भावे क्त:] तत् 'इव देवस्य शासनमभिनन्दितं' पूजितम्।

राजेति। 'भो:' इति अलक्ष्यामन्त्रणं प्रतीहारीसंबोधनं वा। 'सन्तत्या: छेदेन' अभावेन 'निरवलम्बना' निराश्रया: 'सम्पद:' विभवा 'मूलपुरुषस्य' अर्जयितुर्वंशधरस्य

'अवसाने' अन्ते, अभावे, नाशे इत्यर्थः 'एवम्' अनेन विधिना 'परम्' अन्यं जनम् 'उपतिष्ठन्ते' संगच्छन्ते। 'उपतिष्ठन्ति' इति पाठे आश्रयन्ति इत्यर्थः। 'ममापि अन्ते' अवसाने, मृते मयि इत्यर्थः 'पुरुवंशश्रियः' पौरवलक्ष्म्याः 'एष वृत्तान्तः' अयं प्रकारः, पराश्रयणं भविता इति वार्त्ता। ["—निरवलम्बना" (त-, न्या-)— "—निरवलम्बानां कुलानाम्" (रा-, वि-, म-)॥ "उपतिष्ठन्ते" (त-, न्या-)— "उपतिष्ठन्ति" (रा-, वि-, म-॥ "—श्रिय एष वृत्तान्तः" (त-, न्या-)—"—श्रीरकालदवोप्तबीजा भूरेवंवृत्ता" (रा-, वि-, म-)]॥

NOTE

1. (a). उप्तम्—It is difficult to see how उप्त निःस्वम् has to be acted. (b). सन्ततिच्छेद &c.—The reading निरवलम्बानां कुलानाम् makes कुल as निरवलम्ब। But if there is सन्ततिच्छेद where is the कुल? When कुल itself does not exist, the question whether निरवलम्बन or सवालम्बन does not arise. On the other hand निरवलम्बनाः qualifying सम्पदः is perfectly intelligible. There being no सन्तति, the wealth amassed has no one to go to—becomes निरवलम्बन। (c). उपतिष्ठन्ते—"उपाद्देवपूजासङ्गतिकरणमैत्रीकरणपथिषु" इति सङ्गतिकरणे आत्मनेपदम्। (d). *Remark*—The reading "श्रीरकाल &c.—" gives no good sense.

प्रतीहारी—पडिहदं अमङ्गलं [प्रतिहतममङ्गलम्]।

WARDER—The evil be averted !

राजा—धिङ्मामुपस्थितश्रेयोऽवमानिनम्।

KING—Fie on me that disregarded the luck that came to hand.

सानुमती—असंसअं सहीं एव्व हिअए करिअ णिन्दिदो णेण अप्पा [असंशयं सखीमेव हृदये कृत्वा निन्दितः अनेन आत्मा]।

SANUMATI—Undoubtedly his self is blamed by him having that very friend of mine in his mind.

राजा—

संरोपितेऽप्यात्मनि धर्मपत्नी त्यक्ता मया नाम कुलप्रतिष्ठा ।
कल्पिष्यमाणा महते फलाय वसुन्धरा काल इवोप्तबीजा ॥

KING—Though my own self was caused to germinate in her, the wife entitled to join me at sacrifices, the support of my family, was foolishly abandoned by me, like a tract of land with seed sown in time and about to become fit for a great harvest.

प्रतीहारीति । 'अमङ्गलं' भवद्गन्तरूपं पौरवश्रिय: पराश्रयणाच्च 'प्रतिहतं' निराकृतं भवतु ।

राजेति । 'उपस्थितं' स्वयंप्राप्तं यत् 'श्रेय:' मङ्गलं सापत्यदाररूपम्, तत् 'अव-मन्यते' यस्तथाविधम् [साधुकारिणि त्विनि:] 'मां धिक्' ।

राजेति । अन्वय:—काले उप्तबीजा महते फलाय कल्पिष्यमाणा वसुन्धरा इव कुलप्रतिष्ठा धर्मपत्नी आत्मनि संरोपितेऽपि मया त्यक्ता नाम । व्याख्या—काले' यथासमये 'उप्तम्' आहितं 'बीजं' यस्यां तादृशी [पत्नीपक्षे ऽपि योज्यम्] अतएव 'महते' प्रभूताय.'फलाय' शस्याय [पत्नीपक्षे पुत्रफलाय] 'कल्पिष्यमाणा' प्रभविष्यन्ती [कृपियोगे सम्पद्यमाने चतुर्थी] 'वसुन्धरा' रत्नधात्री धरित्री 'इव कुलस्य' पुरुवंशस्य 'प्रतिष्ठा' आलम्बनस्वरूपा [वसुन्धरायामपि योज्यमेतत् । "हे प्रतिष्ठे कुलस्य मे । समुद्ररशना चोर्वी सखी च युवयोरियम् ॥" इति प्रागुक्ते:] 'धर्मार्था' प्रजाप्रयोजना इति यावत् 'पत्नी' शकुन्तला 'आत्मनि' स्वरूपे 'संरोपितेऽपि' मत्प्रेरणया संरूढे ऽपि ["आत्मा वै पुत्रनामासि" इत्यात्मन: पुत्रत्वश्रुते:] 'मया त्यक्ता नाम' कुत्सितमेतत्कर्म [नाम कुत्सायाम् । "नाम प्राकाश्यसम्भाव्यक्रोधोपगमकुत्सने" इत्यमर:] ।

NOTES

1. प्रतिहतम् &c.—See Act V. प्रतिहतं भवतु is the construction.

2. (a). संरोपिते—सम् + रुह + णिच् + क्त कर्मणि । (b). नाम—Implies censure. मया धर्मपत्नी त्यक्ता । This is reprehensible, from considerations of after life (परलोक) । Again मया कुलप्रतिष्ठा त्यक्ता,

आत्मनि संरोपितेऽपि त्यक्ता is censurable from worldly (इहलोक) considerations directly, and indirectly from considerations of परलोक so far as it affects the Pitris by पिण्डलोप।

सानुमती—अपरिच्छिण्णा दाणिं दे संददी भविस्सदि [अपरिच्छिन्ना इदानीं ते सन्ततिर्भविष्यति]।

SANUMATI—Your progeny will now continue uninterrupted.

चतुरिका (जनान्तिकम्)—अए इमिणा सत्थवाहवुत्तन्तेण दिउणुव्वेओ भट्टा। णं अस्सासिदुं मेहप्पडिच्छन्दादो अज्जं माढव्वं गेण्हिअ आअच्छेहि [अये अनेन सार्थवाहवृत्तान्तेन द्विगुणोद्वेगो भर्त्ता। एनमाश्वासयितुं मेघप्रतिच्छन्दात् आर्य्यं माधव्यं गृहीत्वा आगच्छ]।

CHATURIKA (*Aside*)—Ah ! By this story of the merchant, Sire has double the anxiety now. Go and come back fetching noble Madhavya from the Meghapratichhanda palace to console him.

प्रतीहारी—सुट्ठु भणासि [सष्ठु भणसि]। (निष्क्रान्ता)।

WARDER—Thou sayest well. (*Exit*).

सानुमतीति। 'इदानीम्' अधुना, शकुन्तलायां जाते सर्वदमने इत्यर्थः 'ते सन्ततिः' कुलप्रवाहः 'अपरिच्छिन्ना' विच्छेदरहिता 'भविष्यति'।

चतुरिकेति। 'सार्थवाहस्य' [प्राक् व्याख्यातः] वणिक्पतेर्धनमित्रस्य 'वृत्तान्तेन' वार्त्तया 'द्विगुणः' समधिक इत्यर्थः 'उद्वेगः' पीड़ा यस्य तथाविधो जातो 'भर्त्ता'। 'एनं' भर्त्तारम् 'आश्वासयितुं' सान्त्वयितुं 'मेघप्रतिच्छन्दात्' तन्नामकात् प्रासादात् [माधव्यस्य ग्रहणे प्रासादो ध्रुवः इति "ध्रुवमपाये—" इत्यपादाने पञ्चमी। भवत्-कर्त्तृकी माधव्यकरणक आश्वास इति समानकर्त्तृकता नेया]।

NOTES

1. अपरिच्छिन्ना—परिच्छिन्ना is इयत्तया निर्णीता। *c. f.*, "परिच्छिन्नप्रभावर्द्धिर्न मया न च विष्णुना"—*Kumara*. Hence अपरिच्छिन्ना is *endless*.

2. आश्वासयितुम्—Here the कर्त्तृत्व of आश्वासनक्रिया is attributed to प्रतीहारी। माधव्य is only the instrument. Otherwise आगमनक्रिया and आश्वासनक्रिया will have different कर्त्ता and the तुमुन् will be barred.

राजा—अहो दुष्यन्तस्य संशयमारूढाः पिण्डभाजः। कुतः,

अस्मात् परं वत यथाश्रुतिसम्भृतानि
को नः कुले निवपनानि करिष्यतीति।
नूनं प्रसूतिविकलेन मया प्रसिक्तं
धौताश्रुशेषमुदकं पितरः पिबन्ति॥

(मोहमुपागतः)।

KING—Alas! The participators of the rice-cakes offered by Dushyanta have reached a dubious situation. For, surely, of the water offered by me distitute of progeny, the forefathers drink what is left after washing their tears brought forth by the thought—"Alas, who in our race, after this person, will do the libations prepared according to the Srutis."(*Goes into a swoon*).

चतुरिका (ससम्भ्रमम् अवलम्ब्य)—समस्ससदु समस्ससदु भट्टा [समाश्वसितु समाश्वसितु भर्त्ता]।

CHATURIKA (*Hastily holding him*)—Take comfort, let Sire take comfort.

राजेति। 'अहो' खेदे। 'दुष्यन्तस्य' [नामग्रहणात् प्रख्यातिद्योतनम्। तेन प्रख्यातस्य ममाप्येवं वृत्तम् इति महत् खेदकारणम्] 'पिण्ड' भजन्ते' लभन्ते ये ते, पितर इत्यर्थः 'संशयं' सङ्कटम् 'आरूढाः' आपन्नाः। नूनमस्मत्कुलमुत्पश्यन्ति पितरः। 'कुतः' इत्याह। अन्वयः—नूनं वत अस्मात् परं नः कुले यथाश्रुतिसम्भृतानि निवपनानि कः करिष्यति इति पितरः प्रसूतिविकलेन मया प्रसिक्तमुदकं धौताश्रुशेषं पिबन्ति। व्याख्या—'नूनं' निश्चितं 'वत' खेदे 'अस्मात्' दुष्यन्तात् 'परं' पश्चात्, कुले

दृषान्ते इत्यर्थः 'नः कुले' पुरुवंशे 'यथाश्रुति' वेदोक्तविधानेन 'सम्भृतानि' सम्यक् चितानि 'निवपनानि' पितृदानानि पिण्डोदककर्माणि 'कः करिष्यति' न कोऽपि। 'इति' एवं सञ्चिन्त्य 'पितरः' पूर्वे पौरवाः 'प्रसूत्या' सन्तत्या 'विकलेन' रहितेन, निःसन्तानेन 'मया प्रसिक्तं' दत्तम् 'उदकं' जलं 'धौतानि अश्रूणि' येन तस्मात् 'शेषम्' अवशिष्टं यथा तथा 'पिबन्ति'। पितरो हि प्रथमं मद्दत्तेन जलेन अश्रुपूर्णं नयनं प्रक्षालयन्ति पश्चात् अवशिष्टं जलं पिबन्ति। तेन मन्ये संशयं गतास्ते इति। ["सम्भृतानि" (रा-, वि-, म-)—"संहितानि" (त-, न्या-) ॥ "करिष्यति" (त-, न्या-)—"नियच्छति" (रा-, वि-, म-) ॥ "अश्रुशेषम्" (रा-, वि-, म-)—"अश्रुसेकम्" (त-, न्या-] ॥ 'मोहं' विसंज्ञतां मूर्च्छाम् 'उपगतः' प्राप्तः।

चतुरिकेति। 'सम्भ्रमेण' त्वरया 'सह अवलम्ब्य' धारयित्वा, राजानमिति शेषः। ["अवलम्ब्य" (वि-)—"अवलोक्य" (रा-, म-)—वङ्गीयास्ते तत् न पठन्ति] ॥ 'भर्त्ता समाश्वसितु' आश्वस्तो भवतु।

NOTES

1. (a). यथाश्रुति &c.—श्रुतेः अनतिक्रमः यथाश्रुति in accordance with the Vedas. अव्ययी—। तत् यथा तथा सम्भृतानि। सहसुपेति समासः। (b). निवपनानि—नि + वप means to offer, especially to the Pitris. नि + वप + ल्युट् भावे = निवपनानि offerings पितृदानानि। (c). प्रसूति &c.—प्र + सू + क्तिन् कर्मणि = प्रसूतिः progeny अपत्यम्। विगताः कलाः भागाः अस्य इति विकलः one whose parts are gone क्षीणः deficient. बहु—। प्रसूत्या विकलः। इतत्—। तेन। (d). धौताश्रु &c.—धाव शुद्धौ + क्त कर्मणि = धौतानि wiped. Here we have व replaced by ऊठ् by the rule "च्छ्वोः शूडनुनासिके च"। This gives धाऊ + त। Now धाऊ becomes धौ by the rule "एत्येधत्यूठ्सु"। शिष्यते इति शिष + घञ् कर्मणि = शेषम् remainder. धौतानि अश्रूणि येन तत् धौताश्रु। तस्मात् शेषम् the remainder after what is used in wiping tears with. Raghava has धौताश्रु च तत् शेषञ्चेति कर्मधा—। Qualifies पिबन्ति or उदकम्। The idea is—They do not get the benefit of *all the water* I offer them, a part being used up in washing their faces with. Hence their thirst is unappeased. *c. f.* "न प्रकामभुजः श्राद्धे स्वधासंग्रहतत्पराः"—*Raghu.* (e). *Readings*

—(i) नियच्छति is the Devanagari reading. But निवपन being श्राद्ध &c., निवपनानि करिष्यति like श्राद्धं करिष्यति sounds more natural. (ii) धौताश्रुशेषम् does not necessarily imply that they do not get enough for drink or that the water is polluted. शेष puts forth prominently the fact—which is what Dushyanta deplores—that a part of the water serves another purpose, hence the supply is *insufficient.*

सानुमती—हद्धी, हद्धी, सदि क्खु दीवे ववधाणदोसेण एसो अन्धआरदोसं अणुहोदि। अहं दाणिं एव्व णिव्वुदं करेमि [हा धिक्, हा धिक्, सति खलु दीपे व्यवधानदोषेण एष: अन्धकारदोषम् अनुभवति। अहमिदानीमेव निर्वृतं करोमि]। अहवा सुदं मए सउन्दलं समस्सासअन्तीए महेन्दजणणीए मुहादो जण्णभाओस्सुआ देवा एव्व तह अणुचिट्ठिस्सन्दि जह अइरेण धम्मपदिणिं भट्टा अहिणन्दिस्सदित्ति। ता जुत्तं एदं कालं पडिपालिदुं। जाव इमिणा वुत्तन्तेण पिअसहीं समस्सासेमि [अथवा श्रुतं मया शकुन्तलां समाश्वासयन्त्या महेन्द्रजनन्या मुखात् यज्ञभागोत्सुका देवा एव तथा अनुष्ठास्यन्ति यथा अचिरेण धर्मपत्नीं भर्त्ता अभिनन्दिष्यति इति। तत् युक्तम् एतं कालं प्रतिपालयितुम्। यावदनेन वृत्तान्तेन प्रियसखीं समाश्वासयामि]। (उद्भ्रान्तकेन निष्क्रान्ता)।

SANUMATI—O Fie, O Fie, the lamp being there,to be sure, he suffers the evil of the gloom through obstruction. I will even now make him happy. However, I have heard from the mouth of the mother of Mahendra who was comforting Sakuntala that the gods themselves, anxious for their share at sacrifices, will so arrange that the husband will without delay

welcome his wife that is entitled to join him at holy rites. So it is proper to bide that time. Meanwhile I console my dear friend with this news. (*Exit dancing an Udbhrantaka*).

मानुमतीति। 'दीपे सति खलु' सत्येव 'व्यवधानं' दूरता, तद्रूपेण दोषेण एव अन्धकारदूषं दोषम् अनुभवति'। चास्ति कुलदीपः सर्वदमनः, अयन्तु दूरस्थत्वमपश्यन् निराशान्धकारे मज्जन् सीदति। 'हा' एतत्। 'इदानीमेव अहम्' एनं 'निर्वृतं' सुखितं, प्रवृत्तिप्रदानेन इति शेषः 'करोमि'। 'अथवा' अयुक्तमेतन्मे। 'यज्ञभागे उत्सुकाः' उत्कण्ठाः, दुर्जयेन दानवगणेन हृतयज्ञभागाः पुनस्तल्लाभे व्यग्रा 'देवा एव तथा अनुष्ठास्यन्ति' विधास्यन्ति 'यथा अचिरेण' सत्वरं 'भर्त्ता' स्वामी 'धर्मपत्नीं' शकुन्तलाम् 'अभिनन्दिष्यति इति मया शकुन्तलां समाश्वासयन्त्या महेन्द्रजनन्याः' अदितेः 'मुखात् श्रुतम्'। 'तत्' तस्मात् 'एतं कालं' यावता कालेन देवा एनं निर्वृतं कुर्वन्ति तं कालमित्यर्थः 'प्रतिपालयितुं' प्रतीक्षितुं 'युक्तम्'। यत्र कर्मणि देवा नियुक्ताः तत्र अयुक्तो मे व्यापारः। 'यावत्' अवधौ। तत्कालम् 'अनेन वृत्तान्तेन' राज्ञो वार्त्तया। अथवा 'यावत्' अवधारणे। 'प्रियसखीं समाश्वासयामि यावत्' इत्यन्वयः। ["युक्तमेतम्" (म-)—"न युक्तम्" (रा-, वि-, त-, न्या-)॥ "कालं प्रतिपालयितुम्" (रा-, वि-, म-)—"मे अत्र विलम्बितुम्" (त-, न्या-)]॥ 'उद्भ्रान्तकेन' तदाख्येन नृत्यभेदेन 'निष्क्रान्ता'।

NOTES

1. (a). सति &c.—Here दीप is सर्वदमन। व्यवधान means a *screen* and also *distance*. अन्धकार is the उपमान of the *despair* of the king. Hence the अलङ्कार is समासोक्तिः। (b). अथवा—Implies आक्षेप। She makes up her mind to reveal everything to Dushyanta (निर्वृतं करोमि) and then checks herself.

2. (a). यज्ञभाग &c.—यज्ञलब्धः यज्ञदत्तो वा भागः यज्ञभागः, शाकपार्थिवादिः। Or यज्ञे भागः, सहसुपेति समासः। यज्ञभागे or यज्ञभागेन उत्सुकाः। सहसुपेति समासः। (b). अचिरेण—अपवर्गे तृतीया। (c). धर्मपत्नीम्—धर्मार्था पत्नी धर्मपत्नी। शाकपार्थिवादि। (d). उद्भ्रान्तकेन—उद्+भ्रम+क्त भावे+कन् स्वार्थे=उद्भ्रान्तकम् literally *going up in the air.* Technically it is a

kind of dance in which first the right foot is lifted, the left is then bent and the body turned rapidly in a direction opposite to the hands of a watch. But Raghava takes it in its literal sense. तेन । तृतीया करणे ।

नेपथ्ये—अव्वम्हणं अव्वम्हणं [अब्रह्मण्यम् अब्रह्मण्यम्]।

IN THE DRESSING-ROOM—This must not be done to a Brahmana ! Must not be done to a Brahmana !

राजा (प्रत्यागतः कर्णं दत्त्वा)—अये माधव्यस्येवार्त्तस्वरः । कः कोऽत्र भोः ।

KING (*Recovering and listening*)—Ha ! The note of distress is like that of Madhavya. Who is here, Ho ! Who is here ?

(प्रविश्य) प्रतीहारी (ससम्भ्रमम्)—परित्ताअदु देवो संसअगदं वअस्सं [परित्रायतां देवः संशयगतं वयस्यम्]।

(*Entering*) WARDER (*With alarm*)—Let Sire save his friend who is in danger.

नेपथ्ये इति । 'ब्रह्मणि' ब्राह्मणे साधु 'ब्रह्मण्यम्' [यत् प्रत्ययः]। 'न ब्रह्मण्यं' ब्राह्मणविषये यत् निषिद्धं तत्, ब्रह्महत्या इत्यर्थः । यदा आततायिनं प्रति उक्तं, तदा "ब्रह्महत्या क्रियते त्वया, विरम पापादस्मात्" इति अर्थः । यदा तु रक्षितारमुद्दिश्य उच्यते तदा "ब्रह्महत्या जायते, निवार्य्यतां भोः" इत्यर्थः । अत द्वावपि सम्भवतः ।

राजेति । 'प्रत्यागतः' लब्धसंज्ञः । एष 'आर्त्तस्य' भीतस्य 'स्वरः' नादः 'माधव्यस्य इव' प्रतिभाति ।

प्रतीहारीति । 'सम्भ्रमेण' त्वरया 'सह' । 'संशयं' सङ्कट' 'गतं' प्राप्त' 'वयस्यं देवः परित्रायतां' रक्षतु ।

राजा—केनात्तगन्धो माणवकः ।

KING—By whom is the poor fellow humbled ?

प्रतीहारी — अदिट्ठरूवेण केण वि सत्तेण अदिक्कमिअ मेघप्पडिच्छन्दस्स पासादस्स अग्गभूमिं आराविदो [अदृष्टरूपेण केनापि सत्त्वेन अतिक्रम्य मेघप्रतिच्छन्दस्य प्रासादस्य अग्रभूमिम् आरोपितः]।

WARDER—By some invisible being, after being overpowered, he is placed on the top of the Meghapratichhanda palace.

राजा (सहसोत्थाय)—मा तावत्। ममापि सत्त्वैरभिभूयन्ते गृहाः। अथवा—

अहन्यहन्यात्मन एव तावज्ज्ञातुं प्रमादस्खलितं न शक्यम्।
प्रजासु कः केन पथा प्रयातीत्यशेषतो वेदितुमस्ति शक्तिः॥

KING (*Suddenly rising*)—Indeed not! [*Or*—This must not be.] Are my places too infested by evil beings? Or, even my own lapses every day through carelessness are not possible to know; is there the power exhaustively to perceive who among the subjects proceeds by which route?

राजेति। मनोः कुत्सितमपत्यं 'माणवकः' माधव्यः [कुत्सितापत्ये अण् णत्वञ्च। अनुकम्पायां कन्] 'केन' जनेन, 'केन विधिना वा 'आर्त्ता' गृहीतो 'गन्धो' गर्वो यस्य तादृशो जातः ["गन्धो गन्धक आमोदे लेशे सम्बन्धगर्वयोः" इति विश्वः]।

प्रतीहारी। 'अदृष्टं रूपम्' आकृतिर्यस्य तथाविधेन 'केनापि सत्त्वेन' जीवेन 'अतिक्रम्य' अभिभूय 'मेघप्रतिच्छन्दस्य प्रासादस्य अग्रे' शिखरे या 'भूमिः' ताम् 'आरोपितः' प्रापितो माणवकः।

राजेति। 'मा तावत्' एवं ब्रूहि। 'ममापि' विश्रुतप्रतापस्य दुष्यन्तस्य 'गृहाः सत्त्वैः' दैवयोनिप्रभृतिभिर्जीवैः 'अभिभूयन्ते' अतिक्रम्यन्ते? नैव अभिभूयन्ते इति काकुः। तदश्रद्धेयं वचो मा तावत् ब्रूहि। यद्वा—मा तावत् विपद्यतां माधव्यः। ममापि गृहा अभिभूयन्ते इत्याश्चर्यम्। 'अथवा' पक्षान्तरे तदपि सम्भवेत्।

अन्वयः—अहनि अहनि आत्मन एव प्रमादस्खलितं तावत् ज्ञातुं न शक्यम्, प्रजासु कः केन पथा प्रयाति इति अशेषतो वेदितुं शक्तिरस्ति ? व्याख्या—'अहनि अहनि' प्रतिदिनम् 'आत्मन एव' स्वस्यापि 'प्रमादेन' अनवधानतया यत् 'स्खलितं' धर्मप्रच्युतिः तत् 'तावत्' साकल्येन ["यावत् तावच्च साकल्ये" इत्यमरः] 'ज्ञातुं न शक्यम्'। अन्यथा कथं मे अज्ञानाद्धर्मपत्नीपरित्यागः। यदि सन्निहिततमे आत्मन्यप्येवं भवेत्, तदा अगोचरासु 'प्रजासु' जनेषु मध्ये 'को' जनः 'केन पथा' सत्पथेन असत्पथेन वा 'प्रयाति' चरति 'इति अशेषतः' साकल्येन 'वेदितुं' ज्ञातुं 'शक्तिः' मे 'अस्ति किं' नास्त्येव इति काकुः। आत्मसम्बन्धेऽपि यस्य सम्यक्ज्ञानं न स्यात्, स कथं ब्रूयात् प्रजासु मे पापः कोऽपि नास्ति, स्थितोऽपि स मद्दोषेषु गृहेषु पापं नाचरेत्।

NOTES

1. माणवकः—मनोरपत्यं कुत्सितम् इति मनु + अण् = माणवः One deformed. न becomes ण by the कारिका—"अपत्ये कुत्सिते मूढे मनोरौत्सर्गिकः स्मृतः। नकारस्य च मूर्धन्यस्तेन सिध्यति माणवः॥" अनुकम्पितो माणवः इति माणव + कन् = माणवकः। The Vidushaka was deformed and the pity is caused by his sad plight.

2. (a). प्रमाद &c.—स्खल + क्त भावे = स्खलितम् slip. Here he hints at his own प्रमाद in discarding शकुन्तला। (b). अशेषतः—अविद्यमानः शेषः अस्मात् इति अशेषः without anything left. बहु:—। तेन इति अशेष + तृतीया + तसि स्वार्थे। आद्यादि। तृतीया करणे। "क्रियाविशेषणानां फलभावनां प्रति करणत्वम्"। Qual. वेदितुम्। (c). *Remark*—The report is disbelived. "Evil spirits dare not enter my palace, something else must have happened to poor Madhavya." [*Or*—Madhavya must be saved. Strange ! My house too is infested by spirits.] The next moment he corrects himself. "I cannot detect the failings of even my own self, how can I hope to control my subjects ?" He counts the spirits also as his प्रजा।

नेपथ्ये—भो वअस्स, अविहा अविहा [भो वयस्य, अविहा अविहा]।

IN THE DRESSING-ROOM—Ah ! Friend, Alas ! Alas !

राजा (गतिभेदेन परिक्रामन्)—सखे, न भेतव्यं न भेतव्यम् ।

KING (*Stepping in a different gait*)—Nothing to fear, friend, nothing to fear.

नेपथ्ये (पुनस्तदेव पठित्वा)—कहं ण भाइस्सं । एस मं को वि पच्चवणदसिरोहरं उच्छुं विअ तिस्सभङ्गं करेदि [कथं न बिभेमि । एष मां कोऽपि प्रत्यवनतशिरोधरम् इक्षुमिव त्रिभङ्गं करोति] ।

IN THE DRESSING-ROOM (*Repeating the same*)—How can I not fear. Here, some one, with my neck bent backwards, is making me bent in three places like a sugar-cane.

राजा (सदृष्टिक्षेपम्)—धनुर्धनुः ।

KING (*Casting his eyes round*)—My bow ; My bow !

(प्रविश्य शाङ्गहस्ता) यवनी—जअदु जअदु भट्टा, एदं हत्थावावसहिदं सरासणं [जयतु जयतु भर्त्ता । एतत् हस्तावापसहितं शरासनम्] । (राजा सशरं धनुरादत्ते) ।

(*Entering bow in hand*) YAVANI—Be victorious, let Sire be victorious. Here is the bow with the hand-guard. (*The king takes the bow with arrows*).

नेपथ्ये इति । 'अविद्दा' इत्यव्ययं खेदे ।

राजेति । 'गतेर्भेदः' पार्थक्यं तेन, भिन्नया गत्या, क्रोधोद्धतगत्या इति भावः ।

नेपथ्ये इति । 'तदेव' अविद्दा अविद्दा इत्येव । 'कोऽपि' अज्ञातस्वरूपः 'एष' जनः 'मां प्रत्यवनता' पृष्ठतो वक्रा 'शिरोधरा' ग्रीवा यस्य तथाविधम् अतएव 'इक्षुमिव त्रिषु' स्थानेषु 'भङ्गो' वक्रता यस्य तथाविधं करोति । मध्ये न्युब्जः पृष्ठे कुब्ज इति त्रिभङ्गोऽहं प्रागेवासम् । अधुना पुनः कोऽप्येष मां ग्रीवायां प्रत्युब्जं विधाय त्रिभङ्गं करोति ।

धरतीति। शृङ्गस्य महिषविषाणस्य विकारः 'शार्ङ्गं' धनुः 'हस्ते' यस्याः तादृशो। 'हस्तम् आवपति' रचति ज्याघातात् इति 'हस्तावापः' वामहस्ते परिधेयचर्मविशेषः [अनेकार्थत्वाद्धातूनां वपिरत्र रचनार्थः]। यद्वा—'हस्तम् अवाप्नोति' लभते रत्यत्वेन इति 'हस्तावापः' [कर्मण्यण्]। तेन 'सहितं शरासनम्'।

NOTES

1. प्रत्यवनत &c.—प्रति against, *i. e.*, the wrong way—*backwards*. धरतीति धृ + अच् कर्त्तरि स्त्रियाम् = धरा holder. शिरसो धरा शिरोधरा neck. प्रत्यवनता शिरोधरा यस्य whose neck is pushed back so as to get a good bite at the throat (*c. f.* अभिनवकण्ठशोणितार्थी, below).

2. (a), हस्तावाप &c.—हस्त + आ + वप + अण् कर्मणि = हस्तावापः। Also see Tika. सम् + धा + क्त कर्मणि = सहितम् or संहितम् the म of सम् disappearing optionally by the Karika "समो वा ततहितयो:"। (b). शरासनम्—शरा अस्यन्ते क्षिप्यन्ते अनेन इति शर + अस + ल्युट् करणे।

नेपथ्ये—

एष त्वामभिनवकण्ठशोणितार्थी
शार्दूलः पशुमिव हन्मि चेष्टमानम्।
आर्त्तानां भयमपनेतुमात्तधन्वा
दुष्यन्तस्तव शरणं भवत्विदानीम्॥

IN THE DRESSING-ROOM—Here, thirsting after fresh throat-blood, I slay thee struggling, as a tiger slays a beast. Let Dushyanta who takes up his bow to remove the fright of the distressed, be thy protector now.

राजा (सरोषम्)—कथं मामेवोद्दिशति। तिष्ठ कुणपाशन त्वमिदानीं न भविष्यसि। (शार्ङ्गमारोप्य)—वेत्रवति सोपान-मार्गमादेशय।

KING (*With fury*)—How so! Hints at me! Stay eater-of-

the-dead (carrion-eater) thou shalt not be now. (*Stringing the bow*) Vetravati, show me the way to the stair-case.

नेपथ्ये इति। अन्वयः—अभिनवकण्ठशोणितार्थी (अहं) शार्दूलः पशुमिव चेष्टमानं त्वाम् एष हन्मि। आर्त्तानां भयमपनेतुम् आत्तधन्वा दुष्यन्तः इदानीं तव शरणं भवतु। व्याख्या—'अभिनवं' नूतनम् उष्णमित्यर्थः यत् 'कण्ठशोणितं' गलरक्तं, प्रवाहेण आयतं धारोष्णं रक्तमिति यावत्। तत् 'अर्थयते' काङ्क्षति यस्तादृशोऽहं 'शार्दूलो' व्याघ्रः 'पशुमिव चेष्टमानं' मद्ग्रासात् मुक्तये यतमानं 'त्वाम् एष हन्मि' हन्मि एवाधुना। 'आर्त्तानां' पीड़ितानां 'भयमपनेतु' दूरीकर्त्तुम् 'आत्तधन्वा' धृतशरासनः [अनङ् समासान्तः], आपन्नाभयसत्रेषु दीक्षितः अधुनापि आर्त्तस्य ते त्राणाय धृतचापः 'दुष्यन्तः इदानीम्' अस्मिन् मत्पराक्रमप्रकाशक्षणे 'तव शरणं' रक्षिता 'भवतु' यदि तस्य शक्तिरस्ति। आस्तां दुष्यन्तः प्रभुः प्राकृतेषु, मत्समीपे को नाम सः। पश्यतस्तस्य त्वां हन्मि इत्युद्दीपनम्।

राजेति। 'कथम्' आश्चर्ये। 'उद्दिशति' अभिलक्ष्य भाषते। जानन्नयमपराध्यति तद्वध्य एव। 'कुणपं' शवम् 'अश्नाति' भक्षयति यस्तत्सम्बुद्धौ [कर्त्तरि युच्]। 'इदानीं त्वं न भविष्यसि' मरिष्यसि इत्यर्थः। 'शार्ङ्गं' धनुः 'आरोप्य' अधिज्यं कृत्वा।

NOTES

1. (a). एष—Implies *immediate execution.* एष हन्मि = I presently kill you. (b). शरणम्—Always neuter.

प्रतीहारी—इदो इदो देवो [इत इतो देवः]।

(सर्वे सत्वरमुपसर्पन्ति)।

WARDER—This way, this way Sire. (*All approach hastily*).

राजा (समन्ताद्विलोक्य)—शून्यं खल्विदम्।

KING (*Looking round*)—This is indeed vacant !

नेपथ्ये—अविहा, अविहा। अहं तुमं पेक्खामि तुमं मं ण पेक्खसि। विड़ालग्गहीदो मूसओ विअ णिरासो म्हि जीविदे

संवुत्तो [अविहा अविहा। अहं त्वां पश्यामि त्वं मां न पश्यसि। विड़ालगृहीतो मूषक इव निराशोऽस्मि जीविते संवृत्तः]।

IN THE DRESSING-ROOM—Alas ! Alas ! I see you, you do not see me. Like a mouse seized by a cat, I have become hopeless of life.

राजा—भोस्तिरस्करिणीगर्वित, मदीयमस्त्रं त्वां द्रक्ष्यति। एष तमिषुं सन्दधे—

यो हनिष्यति वध्यं त्वां रक्ष्यं रक्षिष्यति द्विजम्।
हंसो हि क्षीरमादत्ते तन्मिश्रा वर्जयत्यपः॥

(अस्त्रं सन्धत्ते)।

KING—Oh ! Thou proud in thy magic of invisibility, my weapon will see thee. Here I aim the shaft that will kill thee deserving death and protect the Brahmana worthy of protection. The swan indeed accepts milk and rejects the water mixed up with it. (*Fits the arrow*).

नेपथ्ये इति। 'विड़ालेन गृहीतो' धृतो 'मूषकः इव जीविते' प्राणेषु 'निराशो' भवामि। तत्र कारणम् 'अहं त्वां पश्यामि त्वं मां न पश्यसि' इति। अपश्यन् कथं त्रायेत।

राजेति। 'तिरस्करिण्या' अदर्शनविद्यया 'गर्वित' साहङ्कार, मया अदृश्योऽपि त्वं ममास्त्रेण द्रक्ष्यसे। तेन च हनिष्यसे। तत् अदृष्टोऽहमिति ते गर्वो मा भूत्। ["अस्त्रम्" (त-, न्या-, म-)—"शस्त्रम्" (रा-, वि-)]॥ अन्वयः—यः वध्यं त्वां हनिष्यति रक्ष्यं द्विजं रक्षिष्यति तमिषुम् एष सन्दधे। हि हंसः क्षीरम् आदत्ते तन्मिश्रा अपः वर्जयति। व्याख्या—'यः' इषुः 'वध्यं' पापकरणात् वधार्हं 'त्वां हनिष्यति रक्ष्यं' रक्षणार्हं 'द्विजं' ब्राह्मणं माधव्यं 'रक्षिष्यति तम् इषुं' बाणम् 'एष सन्दधे' अयमहं धनुषि योजयामि। नैतच्चित्रम्। तथा 'हि हंसः क्षीरं' दुग्धम्

'आदत्ते' गृह्णाति 'तेन' क्षीरेण 'मिश्राः' सम्भिन्नाः 'अपः' जलं 'वर्जयति' त्यजति। हंस इव मे भावः, क्षीरमिव त्वम्, आप इवायं ब्राह्मणः। तत् त्वमेव भावस्य मे ग्राह्यः, ब्राह्मणस्त्याज्यः। ["रक्षिष्यति" (त-, न्या-)—"रक्षति च" (रा-, वि-, म-)॥ "मातलिर्विदूषकश्च" (त-, न्या-)—"विदूषकमुत्सृज्य मातलिः" (रा-, वि-, म-)]॥

NOTES

1. अविहा &c.—A cry of despair because Dushyanta cannot see him.

2. (a). तिरस्करिणी &c.—For तिरस्करिणी see *Ante*. तिरस्करणी is more easily derived, thus :—तिरस् + कृ + ल्युट् करणे स्त्रियाम्। तिरस्करिणी requires णिनि and इड्भावः। (b). एष मन्दधे—This is the counterpart of एष हन्मि above.

3. रक्षिष्यति—The reading रक्षति च is not in accord with हनिष्यति which is in the *future*. It is better to have either both *present* or both *future*.

(ततः प्रविशति मातलिर्विदूषकश्च) मातलिः—

कृताः शरव्यं हरिणा तवासुराः शरासनं तेषु विकृष्यतामिदम्।
प्रसादसौम्यानि सतां सुहृज्जने पतन्ति चक्षूंषि न दारुणाः शराः॥

(*Then enter Matali and Vidushaka*). MATALI—The Asuras are made your target by Hari ; at them let this bow be drawn. Of the good, on friendly persons, fall eyes mild with pleasure, not grim arrows.

राजा (ससम्भ्रममस्त्रमुपसंहरन्)—अये मातलिः। स्वागतं महेन्द्रसारथे।

KING (*Hastily withdrawing the arrow*)—Ah ! Matali ! Welcome, O Mahendra's charioteer !

मातलिरिति। अन्वयः—हरिणा असुरास्तव शरव्यं कृताः, तेषु इदं शरासनं विकृष्यताम्। सतां सुहृज्जने प्रसादसौम्यानि चक्षूंषि पतन्ति, दारुणाः शरा न।

व्याख्या—'हरिणा' इन्द्रेण 'असुराः' दानवाः 'तव शरव्य'' लक्ष्यम् [शरव्यमिति क्लीवैकत्वे नित्यम्] 'कृताः' दानवास्त्वया हन्यन्ताम् इति हरेरभिलाष इत्यर्थः। अतः 'तेषु' असुरेषु 'इदं' सज्यं 'शरासनं' धनुः 'विकृष्यतां' सबाणमाकृष्यताम् इत्यर्थः। स्वयमिन्द्रेण प्रार्थितो दानवान् जहि, मास्तु ते मयि शरत्यागः। मयि विषये तु 'सतां' साधूनां भवादृशां 'सुहृज्जने' मादृशे बान्धवजने 'प्रसादैः' प्रसन्नतया 'सौम्यानि' शोभनानि 'चक्षूंषि पतन्ति दारुणाः' घाराः 'शरा न' पतन्ति। सुहृदहं न ते वध्यः।

राजेति। 'सम्भ्रमेण' त्वरया 'अस्त्रम् उपसंहरन्' तूणे प्रतिप्रेरयन्। 'अये' चि 'मातलिः' एषः। हे 'महेन्द्रस्य' देवराजस्य 'सारथे, स्वागतं' शोभनमागमनमस्तु ते।

NOTES

1. मातलिर्विदूषकश्च—The reading विदूषकमुत्सृज्य मातलिः leaves विदूषक outside. But we find he too is on the stage (see below). Hence we prefer the first reading.

2. इदम्—This *i. e*, सज्यं बाणगर्भञ्च। Your bow is already strung, and it is fitted with an arrow too. It remains now to *draw* and *shoot*. Let the last two actions be on *demons*, not on *me*.

विदूषकः—अहं जेण इट्टिपसुमारं मारिदो सो इमिणा साअदेण अहिणन्दीअदि [अहं येन इष्टिपशुमारं मारितः सः अनेन स्वागतेन अभिनन्द्यते]।

VIDUSHAKA—He, by whom I was almost killed like a sacrificial animal, is being greeted by him with welcome !

मातलिः (सस्मितम्)- -आयुष्मन्, श्रूयतां यदर्थमस्मि हरिणा भवत्सकाशं प्रेषितः।

MATALI (*With a smile*)—O long-lived one, hear why I am sent to your presence by Hari.

राजा—अवहितोऽस्मि।

KING—I am attentive.

मातलिः—अस्ति कालनेमिप्रसूतिर्दुर्जयो नाम दानवगणः।

MATALI—There is a race of demons Durjaya by name the descendants of Kalanemi.

राजा—अस्ति। श्रुतपूर्वं मया नारदात्।

KING—There is. I heard this before from Narada.

विदूषक इति। 'येन' अनेन 'अहम् इष्टेः' यज्ञस्य यः 'पशुः' स इव 'मारितः' ईषदूनं हतः [इष्टिपशुशब्दे कर्मणि उपपदे उपमाने मारयतेर्णमुल्] 'सः अनेन' राज्ञा 'स्वागतेन' स्वागतशब्दोच्चारणेन 'अभिनन्द्यते' विसदृशमेतत् वयस्यस्य।

मातलिरिति। 'सस्मित'मिति विदूषकवचनात् स्मितम्। अस्तीति। 'कालनेमीः प्रसूतिः' सन्ततिः 'दुर्जयो नाम' दुर्जय इति प्रसिद्धः 'दानवानां गणः' समूहः 'अस्ति'।

राजा। एतत्तु 'नारदात् मया पूर्वं श्रुतम्' ["भूतपूर्वे चरट्" इति ज्ञापकात् पूर्वशब्दस्य परनिपातः]।

NOTES

1. इष्टि &c.—इष्टिपशुरिव मारितः इति इष्टिपशु + मृ + णिच् + णमुल् भावे = इष्टिपशुमारम् by the rule "उपमाने कर्मणि च"।

2. अस्मि—Construe प्रेषितः अस्मि or take अस्मि as an अव्यय meaning अहम्। Compare "अन्यत्र यूयं कुसुमावचायं कुरुध्वमत्रास्मि करोमि"—*Rudrata.*

मातलिः—

सख्युस्ते स किल शतक्रतोरजय्यस्-
तस्य त्वं रणशिरसि स्मृतो निहन्ता।
उच्छेत्तुं प्रभवति यन्न सप्तसप्तिस्-
तन्नैशं तिमिरमपाकरोति चन्द्रः॥

स भवानात्तशस्त्र एव इदानीं तमैन्द्ररथमारुह्य विजयाय प्रतिष्ठताम्।

MATALI—That race is really not conquerable by your friend Satakratu, and you are thought of (by him) as its destroyer in the front of battle. The nocturnal gloom which

Saptasapti (Sun) is not able to destroy, the moon removes. Let this self of thine even with arms taken up, proceed now to victory, having ascended that car of Indra.

राजा—अनुगृहीतोऽहमनया मघवतः सम्भावनया। अथ माधव्यं प्रति भवता किमेवं प्रयुक्तम्।

KING—I am favoured by this consideration of Maghavat (Indra). Well, why was this procedure adopted by you upon Madhavya ?

मातलिरिति। अन्वयः—स ते सख्युः शतक्रतोः अजय्यः किल। त्वं रणशिरसि तस्य निहन्ता स्मृतः। सप्तसप्तिः यत् नैशं तिमिरम् उच्छेत्तुं न प्रभवति तत् चन्द्रः अपाकरोति। व्याख्या—'सः' दुर्जयो नाम दानवगणः 'ते सख्युः' मित्रस्य 'शतक्रतोः' इन्द्रस्य [कर्त्तरि वैकल्पिकी षष्ठी] 'अजय्यः किल' जेतुमशक्य एव [जय्यः इति शक्यार्थे निपात्यते]। 'त्वं रणशिरसि' युद्धाग्रभागे 'तस्य' दानवगणस्य 'निहन्ता' घातकः 'स्मृतोऽसि' सार्य्यसे इन्द्रेण। एहि भो आगत्य एतान् जहि इति इन्द्रस्त्वां स्मरति इत्यर्थः। न च तेन शतक्रतोर्लाघवम्। 'सप्त सप्तयः' अश्वा यस्य स सूर्य्यः 'यत् नैशं' रात्रिजातं 'तिमिरं' तमः 'उच्छेत्तुं' नाशयितुं 'न प्रभवति' न शक्नोति 'तत्' तिमिरं 'चन्द्रः अपाकरोति' निरस्यति। 'स भवान्' तथाविधस्त्वं, असुरसंहारार्थमाहूतस्त्वमित्यर्थः 'आत्तानि' गृहीतानि 'शस्त्राणि' आयुधानि येन तथाविध 'एव' एतदवस्थ एव, अविलम्बमिति यावत् 'इदानीम्' अधुना 'तं' प्रसिद्धम् [प्रसिद्धार्थत्वात् यच्छब्दोपादानं नापेक्षते]। 'ऐन्द्रं रथमारुह्य विजयाय प्रतिष्ठतां' प्रस्थितो भव ["समवप्रविभ्यः स्थः" इत्यात्मनेपदम्]।

राजेति। 'मघवतः' इन्द्रस्य 'अनया सम्भावनया' सम्माननेन 'अहम् अनुगृहीतः'। यदसौ देवेन्द्रो मामत्र समर्थं मन्यते तत् तस्य मे महाननुग्रहः। 'अथ' इत्यारम्भे। प्रस्तुतमुपसंहृत्य प्रस्तावान्तरमारभते इत्यर्थः। 'एवम्' ईदृशं 'प्रयुक्तम्' अनुष्ठितम्।

NOTES

1. अजय्यः—जेतुं शक्यः इति जि+यत् कर्मणि=जय्यः capable of being conquered. This is by निपातन in the rule "क्षय्यजय्यौ शक्यार्थे"। Thus the usual form जि+यत् कर्मणि=जेयः ought to conquered जेतुमर्हः।

न जय्यः अजय्यः unconquerable. Similarly अचय्यः as in "तपःषड्भागमचय्यं ददत्यारण्यका हि नः"—Act II.

2. स भवान् &c.—The punctuation may be done differently, thus—स भवानात्तशस्त्र एव। इदानीं तम् &c. Translate—That self of thine is armed already. Proceed now &c.

3. (a). मघवतः—The stem is मघवन्। This optionally changes into मघवत् by the rule "मघवा बहुलम्"। In the षष्ठी we get मघोनः and मघवतः in the singular. For practical purposes मघवन् and मघवत् are two different words declined of course differently. (b). सम्भावनया—सम्+भू+णिच्+युच् भावे स्त्रियाम्=सम्भावना। It is the same as सम्भावन which means "कार्य्येषु योग्यताध्यवसानम्"—*Vritti.*

मातलिः—तदपि कथ्यते। किञ्चिन्निमित्तादपि मनः-सन्तापादायुष्मान् मया विक्लवो दृष्टः। पश्चात् कोपयितु-मायुष्मन्तं तथा कृतवानस्मि। कुतः—

ज्वलति चलितेन्धनोऽग्निर्विप्रकृतः पन्नगः फणं कुरुते।
प्रायः स्वं महिमानं क्षोभात् प्रतिपद्यते हि जनः॥

MATALI—That too is explained. Your long-lived self was noticed by me dispirited through affliction of mind from some reason or other. Then, to provoke your long-lived self, I acted thus. For, fire blazes up when the fuel is stirred; the snake shows its hood when molested. Usually people attain their own greatness through provocation alone.

मातलिरिति। 'किञ्चित्' किमपि अज्ञातं वस्तु 'निमित्त' कारणं यस्य तस्मात् 'अपि मनसः सन्तापात्' हेतोः 'आयुष्मान् मया विक्लवः' विह्वलो 'दृष्टः'। [भवन्नय-नार्थमागतवान् मोहं गतश्च भवन्तं दृष्टवान् इति बुद्धिस्थः समुच्चयः अपेरर्थः।] अन्वयः—अग्निः चलितेन्धनो ज्वलति। पन्नगः विप्रकृतः फणं कुरुते। हि जनाः प्रायः क्षोभात् स्वं महिमानं प्रतिपद्यते। व्याख्या—'अग्निः' वह्निः 'चलितानि' घट्टितानि 'इन्धनानि' एधांसि यस्य [चलतेर्णिच्। नित्त्वम्] तादृशः सन् 'ज्वलति' निजस्वरूपं प्रकाशयति। 'पन्नगः' फणी 'विप्रकृतः' उद्वेजितः सन् फणं 'कुरुते' दर्शयति [करोतिः सर्वधात्वर्थ

वक्ति]। 'हि' तथाहि 'जनः' लोकः 'प्रायः' बाहुल्येन [प्रायस् इति बाहुल्यार्थ अव्ययम्] 'क्षोभात्' अभिघातात्, परकृतधर्षणात् 'स्व' निजं 'महिमानं' प्रभावं 'प्रतिपद्यते' गृह्णाति धत्ते। यद्वा—'हि' इत्यवधारणे। क्षोभाद्धि प्रतिपद्यते—क्षोभात् प्रतिपद्यते हि—इति वा अन्वयः। वयस्यस्य माधव्यस्य निग्रहात् धर्षितो भवान् प्रकृतिमापन्नः। एतदुद्दिश्यैव माधव्यं प्रति मया एवं प्रयुक्तम् इति।

NOTES

1. (a). अपि—I take it as implying समुच्चय (See Tika). We cannot say that it adds indefiniteness to the निमित्त, because the चित् has already done this.

2. (a), चलितेन्धनः—चल + णिच् + क्त कर्मणि = चलितानि stirred. If the sense is 'to drag' the root is not of the घटादि class and the form is चालित with वृद्धि।

राजा (जनान्तिकम्)—वयस्य अनतिक्रमणीया दिवस्पतेराज्ञा। तदत्र परिगतार्थं कृत्वा मद्वचनादमात्यपिशुनं ब्रूहि—

त्वन्मतिः केवला तावत् परिपालयतु प्रजाः।
अधिज्यमिदमन्यस्मिन् कर्मणि व्यापृतं धनुः॥

King (*Aside*)—Friend, the command of the lord of the heavens is not to be transgressed. So, making him acquainted with facts in this matter, tell minister Pisuna in my words—"This bow with the string on, is engaged in another work. Till then let your intellect alone protect the people."

विदूषकः—जं भवं आणवेदि [यद्भवानाज्ञापयति]। (निष्क्रान्तः)।

Vidushaka—What your Highness commands. (*Exit*).

मातलिः—आयुष्मान् रथमारोहतु। (राजा रथारोहणं नाटयति)। (निष्क्रान्ताः सर्वे)।

Matali—Let your long lived self ascend the car. (*The king acts ascending the car*). (*Exeunt all*).

राजेति। 'दिवः' स्वर्गस्य 'पत्युः' इन्द्रस्येत्यर्थः; [कस्कादिषु दिवस्पतिशब्दः पठ्यते। तेन सत्वं पाठसामर्थ्यात् अलुक् च] 'आज्ञा अनतिक्रमणीया' अलङ्घनीया'। इदानीमेव मया गन्तव्यम्। 'तत्' तस्मात् 'अत' अस्मिन् विषये 'अमात्यपिशुनं' पिशुनाख्यममात्यं 'परिगतार्थं' विदितवृत्तान्तं 'कृत्वा' 'मद्वचनात्' मद्वचनमवलम्ब्य [ल्यब्लोपे पञ्चमी] 'ब्रूहि'। सत्वरं गतोऽहं स्वयं वक्तुमसमर्थः। त्वं गमनकारणमुक्त्वा वक्ष्यमाणञ्च ब्रूहि इत्यर्थः। अन्वयः—केवला त्वन्मतिस्तावत् प्रजाः परिपालयतु। इदमधिज्यं धनुः अन्यस्मिन् कर्मणि व्यापृतम्। व्याख्या—'केवला' एका असहाया 'त्वन्मतिस्तावत्' त्वदीया सर्वदर्शिनी बुद्धिरेव 'प्रजाः परिपालयतु' रक्षतु। तस्या भवद्बुद्धेः यः सहायः तत् 'इदम् अधिज्यं' दत्तगुणं 'धनुः अन्यस्मिन्' राज्यरक्षाव्यतिरिक्ते 'कर्मणि व्यापृतं' नियुक्तम्। त्वदीया शास्त्रेषु अकुण्ठिता बुद्धिः मम च सज्यं धनुः, इति द्वे मिलिते मे राज्यं रक्षतः। धनुस्तु सम्प्रति कार्यान्तरे व्यापृतं, बुद्धिरेव ते केवला राज्यं रक्षतु इति भावः।

NOTES

1. (a). दिवस्पतेः—दिवः पतिः दिवस्पतिः। The षष्ठी does not disappear and the विसर्ग is replaced by स। This the गणकार explains saying that दिवस्पति occurs in the कस्कादि list. Hence, because the list wants स for विसर्ग, therefore the विसर्ग is *not* dropped as is usual in a समास (अलुक्)। Nagesa first appeals to the rule "तत्पुरुषे कृति बहुलम्"। "वाचस्पत्यादौ तत्पुरुषे कृति इति अलुक्"—*Sekhara.* He has then to refer to the कस्कादि list for the स। The कस्कादि list is आकृतिगण, but so far as given by पाणिनि the word दिवस्पति does not appear in it. If however we take this as a Vedic usage, we may refer to the rule "षष्ठ्याः पतिपुत्रपृष्ठपारपदपयस्पोषेषु" which enjoins सत्व and perhaps by implication अलुक् also.

Remark—Throughout, Matali addresses the king as आयुष्मान् as a सारथि has to do towards the रथिन्।

॥ षष्ठोऽङ्कः ॥ THE SIXTH ACT.

सप्तमोऽङ्कः ।



(ततः प्रविशत्याकाशयानेन रथाधिरूढो राजा मातलिश्च) ।

राजा—मातले, अनुष्ठितनिदेशोऽपि मघवतः सत्क्रियाविशेषादनुपयुक्तमिवात्मानं समर्थये ।

(*Then enter by aerial flight the king seated on a car with Matali*). KING—Matali, although I have executed the orders, I deem myself unworthy as it were owing to the profusion of honours (done me) by Indra.

मातलिः (सस्मितम्) —आयुष्मन् उभयमप्यपरितोषं समर्थये ।
प्रथमोपकृतं मरुत्वतः प्रतिपत्त्या लघु मन्यते भवान् ।
गणयत्यवदानविस्मितो भवतः सोऽपि न सत्क्रियामिमाम् ॥

MATALI (*With a smile*)—O Long-lived one, I see both of you dissatisfied. You, from the honour, deem light the prior benefit conferred upon Indra. He too, surprised at your feat, does not reckon this honour done unto you.

तत इति । 'आकाशेन' विहायसा यत् 'यानं' गमनं, स्वर्गात् भूतले प्रत्यावर्त्तनं तेन ।

राजेति । 'अनुष्ठितः' कृतः 'निदेशः' आज्ञा, दानववधरूपो येन सः, कृतकर्मा इति यावत् । 'मघवतः' इन्द्रस्य । 'सत्क्रिया' पूजा, तस्या 'विशेषः' अतिशय उत्कर्ष इति यावत् तस्मात् [मघवत इति निदेशेन सत्क्रियया च सापेक्षम् । गमकत्वात् समासः । उभयसापेक्षत्वात् स्वयमसमस्तम्] । 'आत्मानम्' माम् 'अनुपयुक्तम्' अयोग्यम्, अपात्रम् 'इव समर्थये' मन्ये ।

मातलिरिति । 'स्मितेन' ईषद्धास्येन 'सह' । 'उभयं' द्वयं भवन्तम् इन्द्रञ्च । 'अपरितोषं' स्वस्वकृत्या असन्तोषम् । इन्द्रस्त्वां प्रपूज्य असन्तुष्टः, भवांश्च महदपि कर्म

कृत्वा असन्तुष्टः। कौतुककरमेतत् इति हासः। अन्वयः—भवान् मरुत्वतः प्रतिपत्त्या प्रथमोपकृतं लघु मन्यते। सोऽपि भवतः अवदानविस्मितः इमां सत्क्रियां न गणयति। व्याख्या—'भवान् मरुत्वतः' देवराजस्य 'प्रतिपत्त्या' गौरवेण, इन्द्रकृतया पूजया इति यावत् ["प्रतिपत्तिस्तु गौरवे" इति हैमः] 'प्रथमं' प्राक् यत् 'उपकृतं दानववधेन त्वया उपकारः कृतः 'तत् लघु' तुच्छं 'मन्यते' सम्भावयति 'सोऽपि' इन्द्रश्च 'अवदानेन' कर्मणा भवत्कृतेन दानववधकर्मणा ["अवदानं खण्डने स्यादितिवृत्ते च कर्मणि" इति मेदिनी] 'विस्मितः' साश्चर्यः सन् 'इमाम्' आत्मकृतां 'सत्क्रियां' पूजां 'न गणयति' कथनयोग्यां न मन्यते। अहो अवदानं तुच्छा मे सत्क्रिया इति मघवतः, अहो सत्कारः तुच्छं मे कर्म इति भवतो भावना। ["प्रथमोप···भवान्" (रा-, वि-, म-)—"उपकृत्य हरेस्तथा भवान् लघु सत्कारमवेत्य मन्यते" (त-, न्या-)॥ "—विस्मितः" (रा-, वि-)—"तोषितः" (म-)—"सस्मितां" (त-, न्या-)॥ "इमाम्" (त-, न्या-)—"गुणान्" (रा-, वि-, म-)]॥

NOTES

Summary—अथ विजित्य दैत्यान् प्रत्यावर्त्तमानो राजा हेमकूटशिखरं प्राप। तत्र तपस्यन्तं भगवन्तं मारीचं द्रष्टुमवातरत्। अवसरप्रतीक्षश्च स्थितः तपस्विनीभ्यामनुगतं बालमेकं चक्रवर्त्तिलक्षणमैक्षिष्ट। तञ्च चापलात् वारयितुं तापसीभ्यामनुरुद्धः स्पृशन् स्पर्शसुखाद्विसिस्मिये। ततः स कथाप्रसङ्गेन पौरवोऽयं बालः, पिता चास्य दारत्यागी, शकुन्तलेति च मातुर्नाम, इति ज्ञात्वा यावन्निश्चयं नाधिगच्छति तावदपश्यत् भूपतितं बालस्य रक्षाकरण्डकम्। तदादाय राज्ञा बालाय समर्पितम्। सा तु ओषधिः पितरौ आत्मानञ्च वर्जयित्वा भूपतिता यदि गृह्यते ततो गृहीतारं सर्पो भूत्वा दशति इति स्थितेऽपि राजानमक्षतं दृष्ट्वा दुष्यन्त एवायमिति निश्चित्य तापसीभ्यां राजानं बोधयित्वा गत्वा शकुन्तला विज्ञापिता। बालस्तु गन्तुमिच्छन् पुत्र इति आभाष्य निरुद्धः "दुष्यन्तो मे पिता न त्वम्" इति विप्रतिपेदे। इत्थं प्रतिवादात् निश्चयश्च जातः शकुन्तला च तत्र प्राप्ता प्रत्यभिज्ञाता च राज्ञा। एवं समागतौ दम्पती मारीचमभ्युपेतौ। तेन च महर्षिणा तदा दुर्वाससा दत्तः अङ्गुरीयकदर्शनावसानः शाप आख्यातः गतश्च दम्पत्योः प्रसादः। ततो दारापत्यसंयोगात् सिद्धार्थो राजा मुदा परमया स्वनगरं प्रत्यागतः।

1. (a). आकाश &c.—See *Ante.* (b). मघवतः—Connected with both निदेश and सत्क्रिया। (c). अनुपयुक्तम्—उप + युज + क्त कर्मणि

= उपयुक्त: worthy, serviceable कृतकर्मा । अनुपयुक्तमिव as if I have done nothing adequate to the reward.

2. (a). मरुत्वत:—मरुत: सन्ति अस्य इति मरुत्+मतुप्=मरुत्वान्। Here मरुत् is not a पद owing to the rule "तसौ मत्वर्थे"। Hence we do not get मरुद्वान्। (b). प्रतिपत्त्या—हेतौ तृतीया। (c). अवदान &c.—अव+दैप् शोधने+ल्युट् करणे=अवदानम् an achievement. Bhanuji has भावे ल्युट्। तेन विस्मित:।

3. *Readings*—(a). The first half as given in the Beng. Rec. is more compact if not more idomatic. The only thing against it is उपकृत्य लघु मन्यते does not state clearly *what* is considered लघु। But does it really sin against perspicuity to say उपक्रिया लघु मन्यते=उपकृत्य तत् उपकृतं लघु मन्यते (The service itself is deemed insignificant)? (b). विस्मित better describes the character of the service rendered than तोषित। (c). गुणान् in the *plural* serves no special purpose. इमाम् draws special attention to *recent* honours and seems more appropriate.

राजा—मातले, मामैवम्। स खलु मनोरथानामप्यभूमिर्विसर्जनावसरसत्कार:। मम हि दिवौकसां समक्षमर्धासनोपवेशितस्य—

अन्तर्गतप्रार्थनमन्तिकस्थं जयन्तमुद्वीक्ष्य कृतस्मितेन।
आमृष्टवक्षोहरिचन्दनाङ्का मन्दारमाला हरिणा पिनद्धा ॥ ५॥

KING—No Matali, say not so. The honour at the time of dismissal is indeed not within the range of thought even. For by Hari, as he smiled looking up to Jayanta who stood near with an inward longing, was put on me, seated on half his seat in presence of the gods, the Mandara-garland marked by the yellow sandal rubbed off from his chest.

राजेति। 'स' इति अनुभूतार्थत्वात् यच्छब्दोपादानं नापेक्षते। 'विसर्जनस्य' राजधानीं प्रतिप्रेरणस्य 'अवसरे' समये य: 'सत्कार: स खलु' नूनं 'मनोरथानामपि

'अभूमिः' अविषयः। ईदृशो मे पूजा भविष्यति इत्यहं मनसापि नाकरवम्। अभूमित्वं दर्शयति—अन्वयः—हि अन्तिकस्थम् अन्तर्गतप्रार्थनं जयन्तमुदीक्ष्य कृतस्मितेन हरिणा आमृष्टवक्षोहरिचन्दनाङ्का मन्दारमाला दिवौकसां समक्षम् अर्द्धासनोपवेशितस्य मम पिनद्धा। व्याख्या—'हि' यतः 'अन्तिकस्थं' समीपवर्त्तिनम्, अतएव प्रीतिमन्तम् 'अन्तर्गता' हृदयस्थिता 'प्रार्थना' मालाभिलाषो यस्य तथाविधम्, अतएव दुष्परिहरं 'जयन्तं' निजतनयम्, अतएव अप्रत्याख्येयम् 'उदीक्ष्य' ऊर्ध्वं प्रेरितैर्नेत्रैर्दृष्ट्वा [एतेन जयन्तस्य अन्येषाञ्च देवानामनुपवेशनं सूच्यते] 'कृतं स्मितं' ईषद्धासो येन तथाविधेन, अन्तर्यामितया पुत्रस्य मनोगतं पश्यन् "अहो ईदृशो ते दुराशा" इति ईषद्धसितवता 'हरिणा' इन्द्रेण 'आमृष्टं' चालितं 'वक्षःस्थितं' यत् 'हरिचन्दनं' पीतचन्दनं तदेव 'अङ्कः' चिह्नं यस्याः तादृशी 'मन्दारमाला' मन्दाराख्यसुरपादपपुष्पमालिका 'दिवौकसां' देवानां 'समक्षं' समीपे [अव्ययीभावः। अच् समासान्तः] 'अर्द्धासने' आत्मनाधिकृतस्य तुल्ये भागे ["अर्द्धं नपुंसकम्" इत्येकदेशिसमासः] 'उपवेशितस्य' स्वयमेव दत्तासनस्य इत्यर्थः 'मम पिनद्धा' आसञ्जिता। यद्वा—'हरिणा हि' स्वयमिन्द्रेण 'पिनद्धा' यत्र वा—'मम हि' न तु जयन्तस्य 'पिनद्धा' इत्यन्वयः। देवाः स्थिताः अहमुपविष्टः इत्येकः सत्कारः, उपवेशनञ्च हरिप्रयुक्तं हरिणैव एकासने इति द्वितीयः, प्रीतिमान् पुत्रः प्रार्थयमानः समीपे एव आस्ते तमुपेक्ष्य मे मालादानम् इति तृतीयः, सा च माला स्वयमुपभुक्ता इति चतुर्थः। एषाम् एकैकमपि मनसाप्यचिन्तितम् इत्यभिप्रायः।

NOTES

1. (a). मम—Construe with पिनद्धा in the verse following. (b). दिवौकसाम्—दिव is here अकारान्त meaning स्वर्ग। "मन्दरः सैरिभः शक्रभवनं खं दिवं नभः" इति विश्वाप्रशेषः quoted by Bhanuji. दिवम् ओको येषां तेषाम्। (c). समक्षम्—अक्ष्णोः समीपे इति सम्+अक्षि+अच् समासान्त by the गणसूत्र = "प्रतिपर (?) समनुभ्यः अक्ष्णः।

2. (a). अन्तर्गत &c.—The force of गत is—प्रार्थनम् अन्तरेव गतं न तु वागुक्त्या वेदितम्। Also see Tika. (b). अन्तिकस्थम्—For force see Tika. (c). उदीक्ष्य—उद् implies upward motion. Hence जयन्त was standing and Indra was *seated* with Dushyanta. (d). आमृष्ट

&c.—वक्षस् implies that Indra took the garland off his own neck. Hence the magnitude of the honour.

मातलिः—किमिव नाम आयुष्मानमरेश्वरान्नार्हति । पश्य—

सुखपरस्य हरेरुभयैः कृतं त्रिदिवमुद्धृतदानवकण्टकम् ।
तव शरैरधुनानतपर्वभिः पुरुषकेसरिणश्च पुरा नखैः ॥

MATALI—What possibly is that which your long-lived self does not deserve of the lord of the immortals. Behold the heaven rendered thoroughly weeded of the thorns of demons unto Hari, addicted to pleasure, by both these—now by the smooth-jointed arrows of thine, and previously by the claws of the man-lion.

राजा—अत्र खलु शतक्रतोरेव महिमा स्तुत्यः ।

सिध्यन्ति कर्मसु महत्स्वपि यन्नियोज्याः
सम्भावनागुणमवेहि तमीश्वराणाम् ।
किं वाभविष्यदरुणस्तमसां विभेत्ता
तं चेत् सहस्रकिरणो धुरि नाकरिष्यत् ॥

KING—In this matter verily the majesty of Indra alone is to be lauded. That agents succeed even in great enterprises, consider that as the effect of their estimation by the mighty. Could Aruna have become the piercer of darkness had not the thousand-rayed Sun placed him in front of his car?

मातलिरिति । 'किं' प्रश्ने । 'इव' अनिश्चये । 'नाम' सम्भाव्ये । 'अमरेश्वरात्' देवराजात् 'न अर्हति' लभ्यं न योग्यो भवति । 'पश्य' एतत् चिन्तय । किं तदित्याह—अन्वयः—अधुना आनतपर्वभिः तव शरैः पुरा च पुरुषकेसरिणो नखैः—उभयैः त्रिदिवं सुखपरस्य हरेः उद्धृतदानवकण्टकं कृतम् । व्याख्या—'अधुना' सम्प्रति 'आनतानि' अनुन्नतानि, मसृणानि इत्यर्थः, 'पर्वाणि' ग्रन्थयः येषां तथाविधैः 'तव शरैः' बाणैः । 'पुरा च' कृतयुगे च 'पुरुषकेसरिणो' नरसिंहरूपस्य भगवतो नारायणस्य

'नखै:'। इति 'उभयै:' द्वाभ्यां गणाभ्याम् [अराणां नखानाञ्च प्रत्येकं बहुत्वात् बहुवचनम्] विविधं दीव्यति इति 'त्रिदिव'' स्वर्ग: [इगुपधलक्षण: क: । दिवशब्देन समासो वा] 'सुखपरस्य' भोगनिरतस्य समर्थस्यापि 'हरे:' इन्द्रस्य सम्बन्धे 'उद्धृतानि' समुत्सादितानि 'दानवरूपाणि कण्टकानि' सुखविघातकानि यस्मात् तथाविधं 'कृतम्'। पूर्वं हिरण्यकशिपोर्वधात् या शान्ति: स्वर्गस्य आसीत् अद्य दुर्जयजयात् सैव भवता भूयोऽपि विहिता। तत् इत्थमुपकृतवतो भवत: किमदेयमस्ति देवेन्द्रस्य इति भाव:।

राजेति। 'अत्र' अस्मिन् मच्छरै: कण्टकोद्धारे 'खलु' नूनं 'शतक्रतोरिव' न मम 'महिमा' प्रभाव: 'स्तुत्य:' प्रशस्य:। मम विजयोऽपि इन्द्रस्यैव प्रसादात् तत् का मे स्तुति: इति भाव:। तदेव दर्शयति। अन्वय:—महत्स्वपि कर्मसु नियोज्या: सिध्यन्ति (इति) यत् तम् ईश्वराणां सम्भावनागुणम् अवेहि। अरुण: तमसां विभेत्ता किं वा अभविष्यत् चेत् सहस्रकिरण: तं धुरि न अकरिष्यत्। व्याख्या—'महत्स्वपि' गुरुष्वपि 'कर्मसु नियोज्या:' नियोजयितुं शक्या: भृत्या इत्यर्थ: [शक्यार्थे ण्यति कृत्यप्रतिषेध:] 'सिध्यन्ति' सिद्धिमन्तो भवन्ति, फलं घटयन्ति इति 'यत्' भृत्यानां यत् कृतार्थता 'तम्' [विधेयप्राधान्यात् पुंलिङ्गता] 'ईश्वराणां' शक्तिमतां स्वामिनां 'सम्भावनाया:' अयमत्र क्षम: इत्येवंरूपाया: समर्थनाया: इति विद्यासागरपादा: 'गुण'' महिमानम् 'अवेहि' जानीहि। 'अरुण:' अनूरु: गरुडाग्रज: 'तमसां' ध्वान्तानां 'विभेत्ता' निरासक: 'किं वा अभविष्यत्' नैव अभविष्यत् 'चेत् यदि सहस्रं किरणा' यस्य अतएव शक्तिमान् अंशुमाली 'तं धुरि' यानमुखे 'न अकरिष्यत्' अस्थापयिष्यत्। धुरि चेत् अकरणं तमसामविभेद:। तत् तमोविभेदे धुरि करणरूपा सम्भावना एव कारणम्। एवमत्र दानवजये इन्द्रेण मदीयो नियोग: कारणं नाहम्। [अकरणाविभेदरूपयो: क्रिययो: हेतुहेतुमद्भावे सति एकस्य वैगुण्यात् अन्यस्य अनिष्पत्ति:। ततो लृङ्] ॥ [मूलम् (रा-, वि-, म-)—"किं प्राभविष्यदरुणस्तमसां वधाय" (त-, न्या-)]॥

NOTES

1. (a). सुखपरस्य—Indra was *pleasure-loving*. Hence he had to seek the aid of others in times of danger. This does not imply that he was weak or timid, but only shows his *aversion to make an effort*. (b). उभयै:—उभ + अयच् = उभयम् a group of two.

उभय is usually *singular*. The plural may be defended as in "उभये देवमनुष्याः"—*Bhashya*. Also see Tika. (c). त्रिदिवम्—त्रि+दिव्+क्त कर्त्तरि = त्रिदिवम्। Or त्रावयवं दिवं त्रिदिवम् शाकपार्थिवादि।

2. (a). सिध्यन्ति—सिध of the दिवादि class means निष्पत्ति as in सिद्धमन्नम्। Hence secondarily it means 'to succeed' which is the sense here. Comp. स्वयमसिद्धः कथमन्यान् साधयेत्। (d). सम्भावना &c.—सम्+भू+णिच्+युच् भावे = सम्भावना estimation. "सम्भावनं क्रियासु योग्यताध्यवसानम्"—*Vritti*. (c). तमसां विभेत्ता—वि+भिद्+तृच् कर्त्तरि = विभेत्ता। We cannot have तृन् for that would bar the षष्ठी in तमसाम्। Besides, no habit is implied here, but simply success through specially favourable circumstances. Hence तृन् is out of the question.

3. *Rhetoric*—From अत खलु to नाकरिष्यत् we have a complete syllogism. The object is to establish the particular case "अत्र शतक्रतोर्महिमा स्तुत्यः"। Towards this is cited the general proposition "सिध्यन्ति···तमीश्वराणाम्"। This much constitutes an अर्थान्तरन्यास। The portion "किं वा...नाकरिष्यत्" is only an *illustration* of the general prop., hence it furnishes a दृष्टान्त।

मातलिः—सदृशं तवैतत्। (स्तोकमन्तरमतीत्य) आयुष्मन्, इतः पश्य नाकपृष्ठप्रतिष्ठितस्य सौभाग्यमात्मयशसः।

विच्छित्तिशेषैः सुरसुन्दरीणां वर्णैरमी कल्पलतांशुकेषु।
विचिन्त्य गीतक्षममर्थजातं दिवौकसस्त्वच्चरितं लिखन्ति॥

MATALI—This is worthy of you. (*Passing a short distance*) O Long-lived one, this way behold the good luck of your fame that has established itself on the surface of the heaven. Yonder denizens of the heaven, with paints left over after the decoration of the heavenly beauties, and on their garments obtained from the Kalpa-creeper, are depicting your (recent) exploit, having thought out materials capable of being set to music (*Or*—worthy of divine melody).

मातलिरिति। 'एतत्' विनयवचनं 'तव सदृशं' योग्यम्। शूरा अविकत्थना भवन्ति इति भावः। ["तव" (त०, व्या०)—"एव" (रा०, वि०, म०)]॥ 'लोकं' किञ्चित् 'अन्तरं' दूरम् 'अतीत्य' गत्वा। 'इतः' अस्यां दिशि इत्यङ्गुल्या निर्देशः 'नाकस्य' स्वर्गस्य 'पृष्ठे' उपरि 'प्रतिष्ठितस्य' कृताधिपत्यस्य 'आत्मनो यशसः' दानवजयजाताया: कीर्त्तेः 'सौभाग्य' शुभादृष्टं 'पश्य'। तदेव दर्शयति—अन्वयः—अमी दिवौकसः गीतक्षमम् अर्थजातं विचिन्त्य सुरसुन्दरीणां कल्पलतांशुकेषु विच्छित्तिशेषैर्वर्णैः त्वच्चरितं लिखन्ति। व्याख्या—'अमी' दूरे दृश्यमाना 'दिवं' स्वर्गः 'ओकः' निवासो येषां ते, देवा इत्यर्थः 'गीतस्य' गानस्य 'क्षमं' योग्यं, सुरसुन्दरीभिर्गानार्हम् 'अर्थानां' वस्तूनां 'जातं' समूहं, पदावलीमित्यर्थः ["अर्थः प्रकारे विषये निवृत्तिकारणवस्तुषु" इति "जातं जात्योघजन्मसु" इति च विश्वः] 'विचिन्त्य' ध्यायं ध्यायं निरूप्य 'सुरसुन्दरीणां' देवस्त्रीणां, प्रनीतां पदावलिं रचयित्वा स्ववनितानां 'कल्पलतायाः' यानि 'अंशुकानि' वस्त्राणि तेषु, कल्पपादपलभ्येषु निजवनितावसनेषु इत्यर्थः 'विच्छित्तेः' अङ्गरागात् ["विच्छित्तिरङ्गरागेऽपि" इति विश्वः] 'शेषैः' अवशिष्टैः 'वर्णैः' तत उद्धृतैः इति भावः 'तव चरितं' दुर्जयजयावदानं 'लिखन्ति'। प्रियजनेन गेयं, प्रियप्रसाधनवर्णेन प्रियपरिहितवसनेषु स्वहस्तेन लिखितं, ते यशः। अहो सौभाग्यम् इति भावः।

NOTES

1. तव—The Devanagarı reading एव entirely misses the meaning.

2. (a). विच्छित्ति &c.—वि + छिद् + क्तिन् भावे = विच्छित्तिः painting. शिष + घञ् कर्मणि = शेषः residue. विच्छित्तेः (पञ्चमी) शेषाः। सुप्सुपा। (b). विचिन्त्य—वि indicates *effort* on the part of the thinkers. They wanted the composition to be worthy of the subject-matter. Hence the effort. (c). गीतक्षमम्—गीतं क्षमते इति गीत + क्षम + अ कर्त्तरि। Or गीतस्य क्षमं योग्यम्। The female voice is sweet, hence सुरसुन्दरीणाम् not सुराणाम्। Comp. "इक्षुच्छायनिषादिन्यस्तस्य गोप्तुर्गुणोदयम्। आकुमारकथोद्घातं शालिगोप्यो जगुर्यशः॥"—*Raghu*.

राजा—मातले, असुरसम्प्रहारोत्सुकेन पूर्वेद्युर्दिवमधिरोहता न लक्षितोऽयं प्रदेशो मया। कतमस्मिन् मरुतां पथि वर्त्तामहे।

King—Matali, yesterday this region was not noticed by me while ascending the heaven, eager as I was for the fight with the demons. In which course of the winds are we?

मातलिः—

त्रिस्रोतसं वहति यो गगनप्रतिष्ठां
ज्योतींषि वर्त्तयति च प्रविभक्तरश्मिः।
तस्य व्यपेतरजसः प्रवहस्य वायोर्-
मार्गो द्वितीयहरिविक्रमपूत एषः॥

Matali—This is the region sanctified by the second foot-step of Hari, free from the operation of the quality Rajas, the region of the wind Pravaha which bears the triple-streamed river that is in heaven and causes the luminaries to revolve with their rays duly apportioned.

राजेति। 'पूर्वेद्युः' पूर्वस्मिन् दिने ["सद्यः परुत्—" इति निपातः] 'दिवमधिरोहता असुरैः' सह यः 'सम्प्रहारः' युद्धं तत्र 'उत्सुकेन मया अयं प्रदेशो न लक्षितः'। अत्र मरुतां पन्थानः सन्ति। तत्र 'कतमस्मिन् पथि' अधुना 'वर्त्तामहे' तिष्ठामः। अत्र हि राजा विनयात् कथान्तरावतारणया आत्मस्तुतिप्रस्तावं परिहरति।

मातलिरिति। अन्वयः—यः गगनप्रतिष्ठां त्रिस्रोतसं वहति, ज्योतींषि प्रविभक्तरश्मि वर्त्तयति च, तस्य व्यपेतरजसः प्रवहस्य वायोः एष द्वितीयहरिविक्रमपूतो मार्गः। व्याख्या—'यः गगने' आकाशे 'प्रतिष्ठा' स्थितिर्यस्याः तथाविधां 'त्रिस्रोतसं' त्रिमार्गगाम् आकाशगङ्गामित्यर्थः 'वहति' धारयति नयति वा 'ज्योतींषि' तारकादीनि 'प्रविभक्ताः' यथाभागं व्यवस्थापिता 'रश्मयो' भासः यस्मिन् कर्मणि तत् यथा तथा 'वर्त्तयति च' मण्डलशो भ्रमयति च 'तस्य' अतएव स्वर्वाहिनीसम्पर्कात् 'व्यपेतं' दूरीभूतं 'रजो' रजोगुणो यस्मात् तस्य 'प्रवहस्य' तन्नाम्नो भूवायोरनन्तरस्य 'वायोः एष द्वितीयेन हरेः' वामनावतारे

त्रिविक्रमरूपस्य श्रीविष्णोः 'विक्रमेण' पादन्यासेन 'पूतः' पवित्रः, शुद्धसत्त्वमय इत्यर्थः 'मार्गः' पन्थाः। आवहप्रवहादिषु सप्तसु वायुषु द्वितीयस्य प्रवहस्य वायोरयमधिकारः। स्वयं ज्योतिर्विभागकर्त्तुरस्य तमसः कथैव नास्ति। परन्तु अयं पूतां मन्दाकिनीं वहन् रजसोऽपि मुक्तः। ततश्च हरिपादपातेन पूतं परमे सत्त्वे स्थित एष पन्थाः। ["प्रविभक्तरश्मि" (रा-)—"प्रविभक्तरश्मिः" (वि-, म-, त-, न्या-)॥ मूलम् (त-, न्या-)—"तस्य द्वितीयहरिविक्रमनिस्तमस्कं वायोरिमं परिवहस्य वदन्ति मार्गम्" (रा-, वि-, म- ॥)]

NOTES

1. (a). असुर &c.—सुरा + अच् मत्वर्थे = सुरः one having a share of the nectar. न सुरः असुरः सुरविरोधी an opponent of the gods. विरोधार्थे नञ्। "तत्ताद्दृश्यमभावश्च तदन्यत्वं तदल्पता। अप्राशस्त्यं विरोधश्च नञर्थाः षट् प्रकीर्त्तिताः॥" सम् implies *reciprocity* व्यतिहार। सम्प्रहरन्ते अस्मिन् इति सम् + प्र + हृ + घञ् अधिकरणे = सम्प्रहारः battle. Or घञ् भावे meaning *fight*. असुरैः सम्प्रहारः। सुप्सुपा। तस्मिन् तेन वा उत्सुकः। सुप्सुपा। (b). कतमस्मिन् &c.—Seven courses of the wind are enumerated. These are आवह, प्रवह, उद्वह, संवह, सुवह, परिवह, परावह in order of distance from the earth. But the names are differently given by different authorities. (c). *Remark*—Raghava thinks that the king introduces a new subject purposely to stop Matali's laudatory remarks.

2. (a). त्रिस्रोतसम्—त्रीणि स्रोतांसि यस्याः सा त्रिस्रोताः the three-streamed, *i. e.*, the Ganges which is supposed to have one stream in the heaven (the Milky Way), one on earth, and a third in the nether regions. (b). प्रविभक्त &c.—रश्मि conveys a pun. It also means the *reins of a horse*. Just as a trainer turns the horse round and round catching hold of the reins, so does प्रवह with regard to the heavenly bodies.

3. (a). व्यपेत &c.—रजस् has a pun. It means धूलि also. The मार्ग is *devoid of* dust because it is above भूवायु which alone contains dust.(b). द्वितीय &c.—The allusion is to the वामनावतार of

Hari. This was to relieve Indra of the oppression of the demon Bali. Vishnu appeared before him in the form of a Brahmana dwarf and asked for the grant of such space as he could cover in three steps. He said he wanted this, for then he would be able to practice penance on his own land ; asceticism observed on another's soil brings no merit. Bali agreed. But lo ! No sooner he pronounced the formula of gift than the manikin assumed gigantic proportions and covered the entire earth with one step, and the heavens with another. The demon who was a devout Vaishnava saw that it was his own Lord that had come to treat with him, and with ecstasy he put forth his head to the Lord to place His third foot on.

4. (a). प्रविभक्तरश्मि—This as a क्रियाविशेषण refers prominently to the *manner* of spinning, and is therefore preferable to the attributive प्रविभक्तरश्मिः qualifying यः । (b). तस्य द्वितीय...मार्गम्—This refers to परिवह the *sixth* course. But Mahamahopadhyaya Nyayapanchanana has the following quotations—"भचक्रं ध्रुवयोर्बद्धमाक्षिप्तं प्रवहानिलैः । पर्य्येत्यजस्रं तन्नद्धा ग्रहकक्षा यथाक्रमम् ।"—*Surya-siddhanta*, "भपञ्जरः खेचरचक्रयुक्तो भ्रमत्यजस्रं प्रवहानिलेन"—*Siddhanta-siromani*, "यस्माज्ज्योतींषि वहति प्रवहस्तेन स स्मृतः"—*Vishnu-purana*. This leaves no doubt that "ज्योतींषि वर्त्तयति च प्रविभक्तरश्मि" applies to प्रवह and *not* to परिवह । The Bengali reading is therefore preferable. This is confirmed by the kings remark मेघपदवीमवतीर्णौ स्वः (see below).

राजा—अतः खलु सबाह्यान्तःकरणो ममान्तरात्मा प्रसीदति । (रथाङ्गमवलोक्य) मेघपदवीमवतीर्णौ स्वः ।

KING—Hence, surely, my inner self, with the internal and external senses, enjoys tranquillity. (*Looking at the wheels*). We have descended to the region of clouds.

मातलिः—कथमवगम्यते ।

MATALI—How is that known ?

राजा—

अयमरविवरेभ्यश्चातकैर्निष्पतद्भि-
र्हरिभिरचिरभासां तेजसा चानुलिप्तैः ।
गतमुपरि घनानां वारिगर्भोदराणां
पिशुनयति रथस्ते शीकरक्लिन्ननेमिः ॥

KING—This chariot of yours with the rims of its wheels wet with sprays, with Chatakas rushing out of the interstices of the spokes, and with the horses tinged with the glow of lightning, indicates passage over clouds having water inside their cavities.

राजेति । 'अतः खलु' अतएव कारणात्, सत्त्वमये मार्गे स्थितत्वात् इत्यर्थः । 'वाह्यैः' श्रोत्रनेत्रादिभिः 'अन्तः' आभ्यन्तरेण मनसा [अन्तःशब्दोऽत्र लक्षणया अन्तःस्थ-वाची] 'सह मम अन्तरात्मा' हृत् 'प्रसीदति' सत्त्वसम्पर्कजमात्मप्रसादं लभते । 'रथाङ्गं' रथचक्रम् । 'मेघानां पदवीं' स्थानं समनन्तरस्य भूवायोरावहस्य मार्गम् 'अवतीर्णौ स्वः' ।

राजेति । अन्वयः—अयं ते शीकरक्लिन्ननेमिः रथः अरविवरेभ्यो निष्पतद्भिश्चातकैः, अचिरभासां तेजसा अनुलिप्तैः हरिभिश्च, वारिगर्भोदराणां घनानामुपरि गतं पिशु-नयति । व्याख्या—'अयं ते' तव, त्वत्परिचालित इत्यर्थः 'शीकरैः' जलकणैः 'क्लिन्ना' आर्द्रा 'नेमयः' चक्रधारा यस्य तादृशो 'रथः' [इदं तावत् प्रथमं सूचकम्] 'अराणां' चक्राङ्गविशेषाणां 'विवरेभ्यः' अन्तरालेभ्यः 'निष्पतद्भिः' उड्डीय वहिरागच्छद्भिः 'चातकैः' मेघप्रियैः पक्षिभिः [द्वितीयमेतत् सूचकम्] 'अचिरा' क्षणिका 'भाः' दीप्तिः यासां तासां, विद्युतामित्यर्थः 'तेजसा' दीप्त्या 'अनुलिप्तैः' रञ्जितैः 'हरिभिश्च' त्वदीयैरश्वैश्च [एतच्च तृतीयं लिङ्गम्] 'वारिगर्भं' जलपूर्णम् 'उदरम्' अभ्यन्तरं येषां तथाविधानां 'घनानां' मेघानाम् 'उपरि' पृष्ठे 'गतं' गमनं 'पिशुनयति' सूचयति । वृष्टिपातप्रत्याशया सन्निहिताश्चातकाः चक्राङ्गाणामवकाशैर्निःसरन्ति । अश्वाश्च ते विद्युत्प्रभारञ्जिताः । आर्द्रं च चक्राङ्गम् । तन्मन्ये समतीत्य सुरवर्त्म मेघमार्गमवतीर्णौ वयमिति ।

NOTES

1. सबाह्य &c.—बाह्यानि च अन्तश्च बाह्यान्त: external and internal. द्वन्द्व। The whole is an अव्यय। बाह्यान्त: करणानि बाह्यान्त:करणानि। कर्मधा—। तै: सह। बहु—।

2. मेघ &c.—This shows transition to the course *immediately* below. Now मेघपदवी is in the course of भूवायु। "भूमेर्वहिर्द्वादशयोजनानि भूवायुरत्राम्बुदविद्युदाद्यम्"—*Siddhanta-siromani* quoted by *Nyayapanchanana.* Hence the subject matter of the previous remark must be the course *immediately above* भूवायु, *i. e.,* प्रवह and *not* परिवह। We say *immediately*, because "अन्तरात्मा प्रसीदति" and "मेघपदवीमवतीर्णौ स्व:" are spoken *in the same breath.*

3. अचिर &c.—चिर is चिरस्थायिनी by लक्षणा। अचिरा transient, नञ्तत्—। तादृशी भा: यासां तासाम्। बहु—।

4. वारि &c.—वारि गर्भे यस्य तत् वारिगर्भम् अधिकरणबहु—of the गड्वादि class like कमण्डलुपाणि।

मातलि:—क्षणादायुष्मान् स्वाधिकारभूमौ वर्त्तिष्यते।

MATALI—In a moment the long-lived one will be in regions owned by himself.

राजा (अधोऽवलोक्य)—मातले, वेगावतरणादाश्चर्यदर्शन: संलक्ष्यते मनुष्यलोक:। तथाहि—

शैलानामवरोहतीव शिखरादुन्मज्जतां मेदिनी * Exp.
पर्णाभ्यन्तरलीनतां विजहति स्कन्धोदयात् पादपा:।
सन्तानात्तनुभावनष्टसलिला व्यक्तिं भजन्त्यापगा:
केनाप्युत्क्षिपतेव पश्य भुवनं मत्पार्श्वमानीयते॥

KING (*Looking below*)—Matali, the region of men appears of a strange spectacle through descent with speed. Thus—Behold the land descends as it were from the summit of up-rising mountains; trees leave their concealment within leaves through

the exhibition of their trunks ; rivers, whose waters had disappeared through thinness, undergo manifestation from expansion ; the world is being brought to my side as it were by some one throwing it up.

मातलिरिति। 'चयात्' चयमतिवाह्य [ल्यब्लोपे पञ्चमी, कारकमध्ये वा] 'स्वस्य अधिकारस्य' नियोगस्य 'भूमौ' स्थाने, भूपृष्ठे 'वर्त्तिष्यते' स्थास्यति।

राजेति। 'वेगेन अवतरणात्' हेतोः 'मनुष्याणां लोकः' भुवनं, पृथिवी इत्यर्थः 'आश्चर्यं' विचित्रं 'दर्शनं' यस्य तथाविधः 'संलक्ष्यते' भाति। तदेव वर्णयति। अन्वयः—पश्य मेदिनी उन्मज्जतां शैलानां शिखरादवरोहतीव। पादपाः स्कन्धोदयात् पर्णाभ्यन्तरलीनतां विजहति। तनुभावनष्टसलिला आपगाः सन्तानात् व्यक्तिं भजन्ति। भुवनम् उत्क्षिपता केनापि मत्पार्श्वम् आनीयते इव। व्याख्या—'पश्य' आश्चर्यमवलोकय [वक्ष्यमाणवाक्यार्थः कर्म]। 'मेदिनी' भूमिः 'उन्मज्जतां' सहसा उत्प्लुत्य इव प्रकटीभवतां 'शैलानां' पर्वतानां 'शिखरात्' शृङ्गात् 'अवरोहतीव' अधःपततीव। न हि शैला उन्मज्जन्ति, नापि मेदिनी अवरोहति। किन्तु वेगात् शैलानामुन्मज्जनं मेदिन्याश्च अवरोहणं द्वयमेतदाश्चर्यं दृश्यते। 'पादपाः' वृक्षाः 'स्कन्धस्य' प्रकाण्डस्य 'उदयात्' आविर्भावात् 'पर्णानां' पत्राणाम् 'अभ्यन्तरे' मध्ये ये 'लीनाः' गुप्ताः, तद्भावं 'विजहति' त्यजन्ति। पूर्वं पत्रपुञ्जमात्राणि इव दृष्टाः पादपाः सहसा काण्डादिमन्तो दृश्यन्ते। एतच्चाश्चर्यं वेगाज्जातम्। 'तनुभावेन' क्षीणतया 'नष्टानि' अलक्षितानि 'सलिलानि' जलानि यासां तथाविधा 'आपगाः' स्रोतस्वत्यः 'सन्तानात्' विस्तारात्, तनुभावविगमात् इत्यर्थः 'व्यक्तिं' प्रकटतां 'भजन्ति' गच्छन्ति। यत्र यत्र दूरात् सूक्ष्मतया जलं न दृष्टं, सहसा सजला नद्यस्तत्र दृश्यन्ते। इत्यप्याश्चर्यं वेगादेव। 'भुवनं' मनुष्यलोकः 'उत्क्षिपता' ऊर्ध्वं प्रेरतया 'केनापि' अतिसुरासुरसत्वेन सत्वेन 'मत्पार्श्वं' मम समीपम् 'आनीयते इव' उपस्थाप्यते इव। वस्तुतस्तु अहमेवाधः पतामि। वेगात् पुनर्भुवनमुत्पततीव भाति। यद्वि दूरात् एकपृष्ठमेकवर्णञ्च आभात्, तदेव भुवनं सहसा गिरितरुसरिदादिरूपेण विभक्तपृष्ठभागमुत्पततीव इत्यहो आश्चर्यम्। ["सन्तानात्" (म॰)—"सन्तानैः" (रा॰, वि॰)—"सन्धानं" (त॰, व्या॰)॥ मूलम् (रा॰, वि॰, म॰)—"तनुभागनष्टसलिलव्यक्त्या भजन्त्यापगाः" (त॰, व्या॰)]॥

NOTES

1. क्षणात्—ल्यब्लोपे पञ्चमी (See Tika), or पञ्चमी by the rule "सप्तमीपञ्चम्यौ कारकमध्ये।" The latter allows the alternative क्षणे। अस्मिन् मुहूर्त्ते मेघपदव्यां वर्त्तमानो भवान् क्षणात् क्षणे वा स्वाधिकारभूमौ वर्त्तिष्यते is the construction.

2. तनु &c.—तनुनः भावः तनुभावः। सामान्ये नपुंसकम्। We avoid the feminine तन्व्याः भावः because that gives तन्वीभावः।

3. *Readings*—सन्धानैः has the plural needlessly. सन्धानं तनुभागनष्टसलिलव्यक्त्या व्रजन्त्यापगाः of the Beng. Rec. may be explained thus—'आपगाः' नद्यः 'तनुभागेषु' सूक्ष्मांशेषु 'नष्टं' दूरत्वात् अदृष्टं यत् 'सलिलं' तस्य 'व्यक्त्या' आविर्भावेण दर्शनेन इत्यर्थः 'सन्धानं व्रजन्ति' कृतसन्धाना इव भान्ति। Comp. "यदर्द्धा विच्छिन्नं भवति कृतसन्धानमिव तत्"—Act I.

मातलिः—आयुष्मन्, साधु दृष्टम् (सबहुमानं विलोक्य)—अहो उदाररमणीया पृथिवी।

MATALI—Well observed, O long-lived one. (*Watching with great appreciation*) Oh ! how grand and charming is the earth !

राजा—मातले, कतमोऽयं पूर्वापरसमुद्रावगाढ़ः कनकरसनिस्यन्दी सान्ध्य इव मेघपरिघः सानुमानालोक्यते।

KING—Matali, what mountain is this that has descended into the eastern and the western seas and pouring liquid gold appears like a bar of evening clouds ?

मातलिः—आयुष्मन्, एष खलु हेमकूटोनाम किम्पुरुषपर्वतः परं तपस्विनां क्षेत्रम्। पश्य—

स्वायम्भुवान्मरीचेर्यः प्रबभूव प्रजापतिः।
सुरासुरगुरुः सोऽत्र सपत्नीकस्तपस्यति॥

MATALI—O long-lived one, this is the mountain of the Kimpurushas, Hemakuta by name, the great resort for the

success of ascetics. Behold, that progenitor of gods and demons, the lord of creation that was born of Marichi the son of the Self-progenitor, here practises penance with his wife.

मातलिरिति। 'उदारा' महती च 'रमणीया' दर्शनीया च इति विशेषोक्तिः।

राजेति। 'अयं कतमः सानुमान्' पर्वतः 'पूर्वं' च 'अपरं' पश्चिमञ्च 'समुद्रम् अवगाढः' प्रविष्टः 'कनकरसस्य' सुवर्णद्रवस्य 'निस्यन्दः' स्रवः। तद्वान् द्रवसुवर्णोद्गारी इत्यर्थः अतएव 'साम्ध्यः' सन्ध्याकालीनः 'मेघपरिघः' मेघमाला 'इव आलोक्यते'।

मातलिरिति। 'किम्पुरुषाणां' 'पर्वतः' तैरध्युषितत्वात्। 'तपस्विनां परं' श्रेष्ठं 'क्षेत्रं' सिद्धस्थानम् ["सिद्धस्थानेऽपि च क्षेत्रम्" इति त्रिकाण्डशेषः]। तदेव स्थान-माहात्म्यं दर्शयति—'पश्य' वक्ष्यमाणमेतदालोचय—अन्वयः—स्वायम्भुवात् मरीचेः यः प्रजापतिः प्रबभूव सुरासुरगुरुः सः सपत्नीकः अत्र तपस्यति। व्याख्या—स्वयं भवतीति स्वयम्भूः ब्रह्मा। तस्यापत्यम् 'स्वायम्भुवः' [अणि सति "ओर्गुणः" इति गुणे प्राप्ते "ओरोदिति वक्तव्ये गुणग्रहणं संज्ञापूर्वको विधिरनित्यो यथा स्यात्। तेन स्वायंभुव इति सिद्धं भवति" इति वृत्तिकारः] ब्रह्मणो मानसः पुत्रः। तस्मात् 'मरीचेः' मरीचि-संज्ञकात् ब्रह्मणो मानसपुत्रात् 'यः प्रजापतिः' लोकस्रष्टा कश्यप इति नाम 'प्रबभूव' जज्ञे 'सुराणां' देवानाम् 'असुराणां' दानवानाञ्च 'गुरुः' पिता 'स' मारीचः 'पत्न्या' अदित्या 'सह अत्र' हेमकूटपर्वते 'तपस्यति' तपश्चरति [क्वचित् "तपसः परमं पदम्" इति पाठः]। पिता ब्रह्मणः पुत्रः। स्वयञ्च सर्वलोकगुरुः। सोऽपि अत्र तपस्यति। अहो हेमकूटस्य माहात्म्यम् इत्याशयः।

NOTES

1. (a). पूर्वापर &c.—अव + गाह + क्त कर्त्तरि = अवगाढ़ः। पूर्वश्च अपरश्च पूर्वापरौ। तौ च तौ समुद्रौ च पूर्वापरसमुद्रौ। तौ अवगाढ़ः। (b). कनक &c.—नि + स्यन्द + घञ् भावे = निस्यन्दः or निष्यन्दः the ष being optional by the rule "अनुविपर्यभिनिभ्यः स्यन्दतेरप्राणिषु" (P. 8. 3. 72). We have मत्वर्थे इनि (See Tika) and not णिनि because स्यन्द is अकर्मक। (c). साम्ध्यः—सन्ध्यायां भव इति सन्ध्या + अण् = साम्ध्यः। सन्ध्या though कालवाची takes अण् instead of ठञ् by the rule "सन्धिवेलाद्यृतुनक्षत्रेभ्यः अण्" (P. 4. 3. 16). It is of the सन्धिवेलादि class. (d). परिघः—परिहन्यते अनेन इति परि + हन

+ अप् करणे = परिघ: or पलिघ: the ल being optional by the rule "परेश्च घाङ्कयो:" (P. 8. 2. 22).

2. किम्पुरुष &c.—कुत्सित: पुरुष: किम्पुरुष: a kind of demi-gods. तत्पुरुष by the rule "किं क्षेपे" (P. 2. 1. 64). "कुत्सा च कस्यचिन्नरमुखाश्वकायत्वात्, कस्यचित् अश्वमुखनरशरीरत्वात्"—*Bhanuji*.

3. (a). स्वायम्भुवात्—स्वयम् आत्मना भवति इति स्वयम् + भू + क्विप् कर्त्तरि = स्वयम्भू: a name of Brahman. स्वयम्भुव: अपत्यम् इति स्वयम्भु + अण् = स्वायम्भुव: । We do not get स्वायम्भव: because the गुण enjoined by the rule "ओर्गुण:" (P. 6. 4. 146) has exceptions, and this is one of them. Thus ओर्गुण: being barred, the rule "अचि श्नुधातुभ्रुवां य्वोरियङुवङौ" applies and भू becomes भुव् । (b). सुरासुर &c.—सुराश्च असुराश्च सुरासुरा: or सुरासुरम् । द्वन्द्व: । सुर and असुर are antagonists. If the antagonism is emphasised and deemed eternal we get सुरासुरम् by the rule "येषाञ्च विरोध: शाश्वतिक:" (P. 2. 4. 9) ; otherwise, these being प्राणिजाति, we have सुरासुरा: as in "पुजितो य: सुरासुरै: ।"

राजा—तेन हि अनतिक्रमणीयानि श्रेयांसि । प्रदक्षिणीकृत्य भगवन्तं गन्तुमिच्छामि ।

KING—Then surely (here are) blessings not to be passed by. I wish to go after having circum-ambulated the reverend sage.

मातलि:—प्रथम: कल्प: । (नाट्येनावतीर्णौ) ।

MATALI—An excellent resolve. (*They act alighting*).

राजा (सविस्मयम्)—

उपोढशब्दा न रथाङ्गनेमय: प्रवर्त्तमानं न च दृश्यते रज: ।
अभूतलस्पर्शतया निरुद्धतिस्तवावतीर्णोऽपि रथो न लक्ष्यते ॥

KING (*With surprise*)—Not being in contact with the ground, the rims of the wheels have made no noise ; no dust too is seen rising ; upward shock is absent. Your car, though descended, is not noticed as such.

राजेति। 'तेन हि' निमित्तेन, यतोऽत्र प्रजापतिरास्ते ततः इत्यर्थः 'अनतिक्रम-णीयानि' अतिक्रम्य गन्तुमनर्हाणि 'श्रेयांसि' शुभानि अत्र सन्ति। तदेव स्पष्टयति 'भगवन्तं' कश्यपं 'प्रदक्षिणीकृत्य' प्रदक्षिणक्रियया प्रपूज्य [अव्ययीभावस्तिष्ठद्ग्वादिः। ततो गतिसमासः। "नानेन समासः अयन्तु समस्यत एव" इति भोजवचनात् साधुः। प्रादिसमासाद्गतिसमासो वा] 'गन्तुमिच्छामि' ततश्च श्रेयो भविता। भगवत्प्रदक्षिणं महते हि शुभाय, तच्च शुभं न उपेक्ष्यम् इति भावः।

मातलिरिति। 'प्रथमो' मुख्यः, उत्तम इत्यर्थः 'कल्पः' सङ्कल्पः। 'नाट्येन' अभि-नयकर्मणा 'अवतीर्णौ' अवतरणमभिनीय स्थितौ इत्यर्थः।

राजेति। अन्वयः—अभूतलस्पर्शतया रथाङ्गनेमयः उपोढशब्दा न। रजश्च प्रवर्त्त-मानं न दृश्यते। निरुद्धतिरत्र रथः अवतीर्णोऽपि न लक्ष्यते। व्याख्या—'अविद्यमानः भूतलस्पर्शः' भूमिसम्पर्को यस्य तस्य भावेन, भूमिसम्पर्कविरहात् इत्यर्थः 'रथाङ्गानां' चक्राणां 'नेमयः' प्रान्ताः 'उपोढाः' प्रारब्धाः 'शब्दा' यैस्तथाविधा 'न' येनाहं शब्द-विरामात् क्रान्तः पन्था इति वक्तुं शक्तः स्याम्। 'रजश्च' धूलयश्च [जातावेकवचनम्]। 'प्रवर्त्तमानं' चक्रैरश्वखुरैश्च उत्क्षिप्तं सत् प्रसर्पत् 'न दृश्यते' येन रजसामप्रवृत्तिं दृष्ट्वा गमननिवृत्तिं जानीयाम्। एतयोरुपरि पुनः 'निर्गता उद्धतिः' प्रतिघातजः क्षोभः यस्मात् तथाविधः 'तव रथः अवतीर्णोऽपि' हेमकूटशिखरे पतितोऽपि 'न लक्ष्यते' पति-तत्वेन न ज्ञायते। यद्वा—गिरिशिखरे पतितेऽपि रथे संस्पर्शशून्यतया स्थितत्वात् चक्रसम्पातशब्दो न जातः, न च धूलिरुत्थितः, नाप्यनुभूतो रथक्षोभः। तत् पतित इति न ज्ञातो मया रथ इति भावः।

NOTES

1. प्रदक्षिणीकृत्य—प्रकृष्टत्वं दक्षिणस्य प्रदक्षिणम् preference of the right side. अव्ययीभाव of the तिष्ठद्ग्वादि class. तत् अस्त्यस्य इति प्रदक्षिण+अच् मत्वर्थे=प्रदक्षिण: one placed preferably to the right. Or प्रगतो दक्षिणं प्रदक्षिण: placed to the right. प्रादितत्—। अप्रदक्षिणं प्रदक्षिणं कृत्वा इति प्रदक्षिण+च्वि+कृ+ल्यप्, गतितत्—।

2. उपोढ &c—उप+वह+क्त कर्मणि=उपोढा: commenced.

3. *Reading*—Raghava reads अभूतलस्पर्शतयानिरुद्धत: and dis-solves अभूतलस्पर्शतया अनिरुद्धत: अनिरोधात्। So he first obtains अनि-

स्तम् with भावे क्त meaning अनिरोध: and then attaches तस्य। Vidyasagara reads निरुन्धत: with the construction निरुन्धत: तव &c. Neither of these seems to give a clear idea. निरवृत्ति: is the Bengali reading, and is evidently much better than either of the above.

मातलि:—एतावानेव शतक्रतोरायुष्मतश्च विशेष: ।

MATALI—Just this much is the difference between Indra and your long-lived self.

राजा—मातले, कतमस्मिन् प्रदेशे मारीचाश्रम: ।

KING—Matali, in which quarter is the hermitage of Maricha ?

मातलि: (हस्तेन दर्शयन्)—

* वल्मीकार्द्धनिमग्नमूर्त्तिरुरसा सन्दष्टसर्पत्वचा
कण्ठे जीर्णलताप्रतानवलयेनात्यर्थसम्पीडित: ।
अंसव्यापिशकुन्तनीड़निचितं बिभ्रज्जटामण्डलं
यत्र स्थाणुरिवाचलो मुनिरसावभ्यर्कबिम्बं स्थित: ॥

MATALI (*Pointing with his hand*)—Where stands, motionless like a tree-trunk, yonder ascetic facing the solar orb, with his body half-buried in an ant-hill, with his chest having a snake-skin adhering on to it, in the neck excessively pressed by a coil of withered tendrils of creepers, bearing a mass of clotted hair spreading over his shoulders and filled with birds' nests.

मातलिरिति । 'एतावान्' एतत्परिमाण: एव 'विशेष:' भेद: नाधिक: । भुवि विचरंश्च शतक्रतो: रथ: अस्पृष्टा गच्छति तव तु स्पृष्ट: । एतन्मात्रं युवयोर्भेद: । अन्यथा स इव भवानप्यानाकरथवर्त्मा इति भाव: ।

मातलिरिति । अन्वय:—यत्र असौ वल्मीकार्द्धनिमग्नमूर्त्ति:, सन्दष्टसर्पत्वचा उरसा जीर्णलताप्रतानवलयेन कण्ठे अत्यर्थसम्पीड़ित:, अंसव्यापि शकुन्तनीड़निचितं जटामण्डलं बिभ्रत्, स्थाणुरिव अचल: मुनि: अभ्यर्कबिम्बं स्थित: । व्याख्या—'यत्र असौ'

दूरे दृश्यमानः 'वल्मीकं' पिपीलिकादिनिर्मितमृत्स्तूपे 'अर्धं' यथा तथा 'निमग्ना' पिहिता 'मूर्तिः' यस्य तथाविधः, 'सन्दष्टा' सम्यक् लग्ना 'सर्पत्वक्' निर्मोको यस्मिन् तथाविधेन 'उरसा' वक्षसा [अचलत्वोपलक्षणम्। उपलक्षणे तृतीया], 'जीर्णानां' शुष्काणां 'लताप्रतानानां' वल्लीतन्तूनां 'वलयेन' वेष्टनेन, वलयितलतातन्तुभिरित्यर्थः [भावानयने द्रव्यानयनम्] 'कण्ठे अत्यर्थं' यथा तथा 'सम्पीडितः', 'अंसौ' स्कन्धौ 'व्याप्नोति' यत् तादृशं 'शकुन्तानां' पक्षिणां 'नीडैः' कुलायैः [बहुवचनेन जटामण्डलस्य महत्त्वम्] 'निचितं' परिव्याप्तं 'जटामण्डलं बिभ्रत्' धारयन्, अतएव 'स्थाणुरिव' काण्डशेषो वृक्ष इव 'अचलः' स्थिरः 'मुनिः अर्कस्य' सूर्यस्य 'बिम्बं' मण्डलम् तत् 'अभि' [अव्ययीभावः] सूर्यमण्डलमभिलक्ष्य इत्यर्थः 'स्थितः' तिष्ठति। तत्र मारीचाश्रमः इति वाक्यशेषः।

NOTE

1. (a). वल्मीक &c.—This indicates motionlessness for a great length of time. अर्धं निमग्ना अर्धनिमग्ना। सुप्सुपा। वल्मीके अर्धनिमग्ना वल्मीकार्धनिमग्ना। सुप्सुपा। तादृशी मूर्तिर्यस्य। बहु—। Or अर्धनिमग्ना मूर्तिर्यस्य सः अर्धनिमग्नमूर्तिः, बहु—। वल्मीके अर्धनिमग्नमूर्तिः। सुप्सुपा। (b). उरसा सन्दष्ट &c.—This implies अचलत्व। Hence इत्थम्भूतलक्षणे तृतीया। (c). अभ्यर्क &c.—अर्कस्य बिम्बम् अर्कबिम्बम्। तत् अभि इति अभ्यर्कबिम्बम्। अव्ययीभाव by the rule "लक्षणेनाभिप्रती आभिमुख्ये" (P. 2. 1. 14). Or we may have अभि and अर्कबिम्बम् uncompounded, the latter taking द्वितीया owing to अभि which is a कर्मप्रवचनीय here in the sense of लक्षण (indicator).

राजा—नमस्ते कष्टतपसे।

KING—Salutation to thee of severe penance.

मातलिः (संयतप्रग्रहं रथं कृत्वा)—एतावददितिपरिवर्धितमन्दारवृक्षं प्रजापतेराश्रमं प्रविष्टौ स्वः।

MATALI (*Restraining the reins of the chariot*)—Here, we have entered the hermitage of the lord of creation where Mandara trees have been reared by Aditi.

राजा—स्वर्गादधिकतरं निर्वृतिस्थानम्। अमृतह्रदमिवावगाढोऽस्मि।

KING—An abode of bliss greater than heaven. I am as if immersed in a lake of nectar.

मातलिः (रथं स्थापयित्वा)—अवतरत्वायुष्मान्।

MATALI (*Having fixed the chariot*)—Let your long-lived self alight.

राजा (अवतीर्य)—मातले भवान् कथमिदानीम्।

KING (*Having alighted*)—Matali, how art thou disposed now?

मातलिः—संयन्त्रितो मया रथः। वयमप्यवतरामः। (तथा कृत्वा)। इत आयुष्मन्। (परिक्रम्य) दृश्यन्तामत्रभवतामृषीणां तपोवनभूमयः।

MATALI—The chariot is secured by me. I am alighting too. (*Doing so*) This way. O long-lived one! (*Going round the stage*) Let the sites of hermitages of the noble sages be observed.

राजेति। 'कष्टं' कष्टकरं कठोरं 'तपो' यस्य तस्मै।

मातलिरिति। 'संयताः प्रगृहाः' रश्मयः यस्य तम्। 'एतौ' इमौ आवाम् 'अदित्याः' इन्द्रजनन्या 'परिवर्धिता' लालिता 'मन्दारवृक्षा' यस्मिन् तादृशं 'प्रजापतेः' कश्यपस्य 'आश्रमं प्रविष्टौ स्वः'।

राजेति। 'निर्वृतेः' सुखस्य 'स्थानम्' आस्पदम् एष मारीचाश्रमः। 'अमृतस्य ह्रदं' कुण्डम् 'अवगाढः' प्रविष्ट 'इव अस्मि'। नेदृशं स्वर्गेऽपि लब्धं सुखं मे इति भावः।

मातलिरिति। 'स्थापयित्वा' सुसंयतं कृत्वा।

राजेति। 'इदानीं' सम्प्रति 'भवान् कथं' केन प्रकारेण आत्मानं व्यापारयिष्यति।

मातलिरिति। 'संयन्त्रितः' सम्यक् यन्त्रितः स्थापित इत्यर्थः। 'तपोवनानां भूमयः' स्थानानि 'दृश्यन्तां' भवता। दर्शनयोग्या हि ताः।

NOTES

1. अदिति &c.—Shows the sanctity of the place. Indra's mother here rears the Mandāra saplings.

2. भवान् कथम् &c.—He inquires if Matali will stay in the chariot or get down.

राजा—ननु विस्मयादवलोकयामि ।
प्राणानामनिलेन वृत्तिरुचिता सत्कल्पवृक्षे वने
तोये काञ्चनपद्मरेणुकपिशे पुण्याभिषेकक्रिया ।
ध्यानं रत्नशिलागृहेषु विबुधस्त्रीसन्निधौ संयमो
यत्काङ्क्षन्ति तपोभिरन्यमुनयस्तस्मिंस्तपस्यन्त्यमी ॥

King—I am indeed observing with wonder. In a forest where Kalpa-trees abound, the necessary sustenance of life is secured with *air* ; in water that is brown with the pollens of golden lotuses, is done the holy act of *ablution* for merit ; in houses of rocks of gems, is performed *meditation* ; in the presence of heavenly maidens is practised *self-restraint*. These are pactising penance scorning all that to which other sages aspire by their austerities.

राजेति । अन्वय:—सत्कल्पवृक्षे वने उचिता प्राणानां वृत्ति: अनिलेन । काञ्चनपद्मरेणुकपिशे तोये पुण्या अभिषेकक्रिया । रत्नशिलागृहेषु ध्यानम् । विबुधस्त्रीसन्निधौ संयम: । अन्यमुनयस्तपोभि: यत्काङ्क्षन्ति तस्मिन् अमी तपस्यन्ति । व्याख्या—'सन्तो' विद्यमाना: 'कल्पवृक्षा' यस्मिन् तादृशे 'वने' कल्पतरुकानने इत्यर्थ: 'उचिता' तपश्चरणयोग्या 'प्राणानां वृत्ति:' जीवनधारणम् 'अनिलेन' वायुना भवति [एकोऽपि कल्पपादपो बहुभोगाय प्रभवति । अत्र कल्पपादपकाननमेव वर्त्तते, तथापि एते वायुभक्षा जीवन्ति । तदपि तपसे यत् पर्य्याप्तं तन्मात्रमेव भवति । इति आश्रमस्य तापसानाञ्च उत्कर्ष:] । 'काञ्चनपद्मानां' सुवर्णकमलानां 'रेणुभि:' परागै: 'कपिशे' पिङ्गलवर्णे 'तोये' जले पुण्या' पावनी 'अभिषेकक्रिया' नियमस्नानकर्म क्रियते [सुचारु-

पङ्कजं जलमलं विहारप्रवृत्तिं जनयितुम्। तत्र पङ्कजमव सौवर्णम्। तथाप्यमी नितरां विहारविमुखा नियमस्नानमात्रपरायणा इत्यहो उत्कर्षस्तापसानामाश्रमस्य च]। 'रत्नविकाराः' याः 'शिलाः' तन्निर्मितेषु 'गृहेषु ध्यानम्' आत्मसाक्षात्कारो भवति [शिलागृहमेकमेव भोगाय सम्पद्यते। अत्र च बहूनि। तानि पुनरहो रत्नमयानि। अमी तु तेषु ध्यानमभ्यस्यन्ति। इति भूतिप्रकर्षस्तापसानामाश्रमस्य च]। 'विबुध-स्त्रियः' सुरनार्यः। तासां 'सन्निधौ' समीपे 'संयमः' पञ्चेन्द्रियनिग्रहः अभ्यस्यते [स्त्रीसन्निधानमेव तपसो विघ्नः। अत्र तु सुरस्त्रीणां सन्निधिः। तथाप्येते जितेन्द्रिया वर्त्तन्ते। अहो ऐश्वर्यं तापसानामाश्रमस्य च]। किं बहुना 'अन्ये मुनयः' विश्वामित्रादयः 'तपोभिः' तपश्चरणैः 'यत्' वस्तु 'वाञ्छन्ति' लब्धुं काङ्क्षन्ति 'तस्मिन्' स्थितमपि तदनादृत्य [अनादरे भावलक्षणे सप्तमी] 'अमी' दृश्यमाना मारीचाश्रमगता मुनयः 'तपस्यन्ति' तपश्चरन्ति [क्यङ् परस्मैपदञ्च]। ["पुण्या···गृहेषु...वाञ्छन्ति" (भो·, त·, न्या·)—"धर्मा...तल्पेषु...काङ्क्षन्ति" (रा·, वि·, म·) ॥

NOTE

1· (a). उचिता—योग्या, *i. e.*, enough to keep body and soul together. Some explain उचिता = अभ्यस्ता and construe—अनिलेन प्राणानां वृत्तिः उचिता have practised to live upon air. (b). सत् &c. There is here quite a forest of Kalpavrikshas. Any amount of luxuries can be got from them for the mere asking. But they eat air. Indicates contempt of luxuries. (c). काञ्चन &c.—कपिश indicates abundance of golden lotuses also their constant presence. (d). तस्मिन्—Raghava renders तस्मिन् स्थाने। In that case यत् means यत् स्थानम्। But do ascetics practise penance to go to Hemakuta ?

मातलिः—उत्सर्पिणी खलु महतां प्रार्थना। (परिक्रम्य, आकाशे) वृद्धशाकल्य, किमनुतिष्ठति भगवान् मारीचः। (आकर्ण्य) किं ब्रवीषि दाक्षायण्या पतिव्रताधर्ममधिकृत्य पृष्टस्तस्यै महर्षिपत्नीसहितायै कथयतीति।

MATALI—High-soaring indeed is the aspiration of the great.

(*Going round—In the air*) Vriddha-Sakalya, what is His Holiness Maricha doing? (*Acting hearing*) Do you say that, questioned by Dakshayani with reference to the duties of those that are devoted to their husband, he is telling her along with the wives of other great sages?

राजा (कर्णं दत्त्वा)—अये प्रतिपाल्यावसरः प्रस्तावः।

KING (*Listening*)—Ah! the subject deserves waiting for an opportunity.

मातलिरिति। 'महतां प्रार्थना' आशंसा 'उत्सर्पिणी' ऊर्ध्वगामिनी 'खलु'। 'आकर्ण्य' श्रुत्वा, श्रवणमभिनीय इत्यर्थः। 'दाक्षायण्या' दक्षकन्यकया अदित्या 'पतिव्रतानां' भर्तृनिरतानां 'धर्मं' सतीत्वमित्यर्थः 'अधिकृत्य' विषयीकृत्य 'पृष्टः' सन् सतीत्वमाहात्म्यविषयके प्रश्ने कृते सति 'महर्षीणां पत्नीभिः सहितायै तस्यै' उत्तरं 'कथयति इति ब्रवीषि किम्'?

राजेति। 'प्रतिपाल्यः' प्रतीक्षायोग्यः 'अवसरः' विरामो यस्य तादृशः अयं 'प्रस्तावः' पतिव्रताधर्मकथनप्रस्तावः। विरते प्रस्तावे उपसर्पामः, अयुक्तः अन्तरा प्रतिबन्धः।

NOTES

1. (a). वृद्धशाकल्य—This is some attendant of मारीच। (b). तस्यै—सम्प्रदाने चतुर्थी। The complete sentence is तस्यै पतिव्रताधर्मं कथयति। Here the कर्म of कथयति is पतिव्रताधर्म, and it is intended for सा। Hence the rule "कर्मणा यमभिप्रैति स सम्प्रदानम्" applies. The followers of the *Vritti* restrict this rule to the कर्म of दा। They have therefore to cite "क्रियार्थोपपदस्य च कर्मणि स्थानिनः" which gives कर्मणि चतुर्थी, with the construction तां बोधयितुं कथयति। But सम्प्रदाने चतुर्थी being the view of the Bhashyakara it must be allowed to over-rule the Vritti, and taken as the correct explanation. (c). इति—This refers to the whole sentence "दाक्षायण्या... कथयति"। It is the कर्म of ब्रवीषि।

2. अये &c.—He means to wait till the discourse is finished.

मातलिः (राजानमवलोक्य)—अस्मिन्नशोकवृक्षमूले ताव-दास्तामायुष्मान् यावत्त्वामिन्द्रगुरवे निवेदयितुमन्तरान्वेषी भवामि ।

MATALI (*Looking at the king*)—Let your long-lived self stay at the foot of this Asoka tree whilst I continue on the look out for an opportunity to report you to Indra's father.

राजा—यथा भवान् मन्यते । (स्थितः । मातलि-र्निष्क्रान्तः) ।

KING—As you deem proper. (*Stays—Exit Matali*).

राजा (निमित्तं सूचयित्वा)—

मनोरथाय नाशंसे किं बाहो स्पन्दसे मुधा ।
पूर्वावधीरितं श्रेयो दुःखं हि परिवर्त्तते ॥

KING (*Acting an omen*)—I hope not for (the object of) my desire, why, O Arm, dost thou throb needlessly. My bliss has been slighted before ; misery alone surrounds me (now) [*Or*—For, bliss, previously slighted, turns into misery].

मातलिरिति । 'इन्द्रस्य गुरुः' पिता कश्यपः । तस्मै 'निवेदयितुं' विज्ञापयितुम् [चतुर्थी सम्प्रदाने] 'अन्तरम्' अवकाशम् साधु 'अन्विष्यति' यः तादृशो 'भवामि' ।

राजेति । 'निमित्त' दक्षिणबाहुस्फुरणं 'सूचयित्वा' अभिनीय । अन्वयः—मनो-रथाय न आशंसे । हे बाहो मुधा किं स्पन्दसे । श्रेयः पूर्वावधीरितम् । दुःखं हि परिवर्त्तते । व्याख्या—'मनोरथाय' अभिलषिताय, शकुन्तलारूपाय, मनोरथं लब्धु-मित्यर्थः; ["क्रियार्थोपपदस्य"—इति चतुर्थी] 'न आशंसे न प्रार्थये । हे 'बाहो' मङ्गल 'मुधा' वृथा [अवाप्यमेतत्] 'किं स्पन्दसे' स्फुरसि । 'श्रेयः' मङ्गलं 'पूर्वं' प्राक् 'अवधीरितम्' अवज्ञातं मया ["ज्ञापकसिद्धं न सर्वत्र" इति पूर्वशब्दस्य पर-निपातो न] । 'दुःखं हि' दुःखमेव अधुना 'परिवर्त्तते' मां परिवृत्य तिष्ठति । यद्वा—'श्रेयो हि पूर्वम् अवधीरितं' सत् 'दुःखं परिवर्त्तते' दुःखरूपेण परिणमति । प्रागेव

शकुन्तलां त्यक्त्वा दुःखैः परिहृतोऽस्मि। तस्या लाभे निराशोऽहम्। तत् किमर्थं वृथा मे बाहुः स्फुरति इति वितर्कः।

NOTES

1. इन्द्रगुरवे—सम्प्रदाने चतुर्थी। For reasons see तस्मै, above. Remember "क्रियाग्रहणमपि कर्तव्यम्" also gives सम्प्रदाने चतुर्थी but applies only to अकर्मक roots.

2. पूर्वाव &c.—अवधीर is a धातु। अवधीर+क्त कर्मणि=अवधीरितम्। पूर्वम् अवधीरितम्। सुप्सुपा। In such cases पूर्व usually appears last in the compound. This is by implication (ज्ञापन) in the rule "भूतपूर्वे चरट्" in which पाणिनि writes भूतपूर्व instead of पूर्वभूत। But what is inferred by implication (ज्ञापकमिद्धम्) is *not universal* (न सर्वत्र). Hence we get पूर्वावधीरित।

नेपथ्ये—मा क्खु चावलं करेहि। कहं गदो एव्व अत्तणो पकिदिं [मा खलु चापलं कुरु। कथं गत एव आत्मनः प्रकृतिम्]।

IN THE DRESSING-ROOM—You must not indeed practise naughtiness. How! have you already gone back to your nature?

राजा (कर्णं दत्त्वा)—अभूमिरियमविनयस्य। को नु खल्वेष निषिध्यते। (शब्दानुसारेणावलोक्य सविस्मयम्) अये को नु खल्वयम् अनुबध्यमान [अवरुध्यमान] स्तपस्विनीभ्याम् अबालसत्त्वो बालः—

अर्धपीतस्तनं मातुरामर्दक्लिष्टकेसरम्।
प्रक्रीडितुं सिंहशिशुं बलात्कारेण कर्षति॥

KING (*Lending his ear*)—This is no place for turbulence. Who could he possibly be that is being checked? (*Looking in the direction of the voice—With amazement*) Ah! Who indeed

could be this boy, attended by two female ascetics, of un-boy-like-strength that for sport is forcibly dragging away ftom its mother a lion-cub that has half-sucked its mother's teat, its manes disordered by the rough encounter ?

नेपथ्ये इति। 'चापलं' चपलतां 'खलु मा कुरु'। इति निषेधः। अगणिते निषेधे 'कथम् इत्याश्चर्य्ये 'आत्मनः प्रकृतिं' स्वभावं चपलभावमित्यर्थः 'गत एव'।

राजेति। 'अविनयस्य' औद्धत्यस्य 'इयम् अभूमिः' अस्थानम्। अत्र मारीचाश्रमे अविनयस्य अवकाशो नास्ति इति भावः। 'निषिध्यते' अविनयात् वार्य्यते। 'शब्दस्य अनुसारः' अनुसरणम्। तेन। यतः शब्द आयातः तं देशं प्रति नेत्रे प्रेर्य्य। 'अये' इति विस्मये। 'नु' वितर्के। 'खलु' अवधारणे। 'तपस्विनीभ्याम् अनुबध्यमानः' अनुगम्यमानः 'अबालस्य' किशोरस्य 'सत्त्वं' बलमिव 'सत्त्व' यस्य तादृशः 'खलु' को नु अयं बालः 'सिंहशिशुं' कर्षति इति परेण सम्बन्धः। अन्वयः—प्रक्रीड़ितुम् आमर्द्दक्लिष्टकेसरम् अर्द्धपीतस्तनं सिंहशिशुं बलात्कारेण मातुः कर्षति। व्याख्या—'प्रक्रीड़ितुं' क्रीड़ा प्रकर्त्तुम् 'आमर्द्देन' स्वकृतविमर्द्देन 'क्लिष्टा' विकीर्णाः 'केसराः' स्कन्धबाला यस्य तम् 'अर्द्धम्' असमग्रं यथा तथा 'पीतः स्तनो' येन तादृशम्, अतएव स्वेच्छया अनायात्तं 'सिंहस्य' कस्यचित् आश्रमकेसरिणः 'शिशुं' शावकं 'बलात्' प्रसह्य [अव्ययमेतत्] यः 'कारः' करणं तेन 'मातुः' जनन्याः, सिंहीकोपमपि अगणयित्वा इत्यर्थः [अपाययोगात् पञ्चमी] 'कर्षति' अपनयति। यद्वा—'मातुः स्तनम्' इति सम्बन्धः।

NOTES

1. अबालसत्त्वो बालः—Compare "बालोऽप्यबालप्रतिमो बभूव"—*Buddha-charita*, II. 23.

2. (a). अर्द्ध &c.—अर्द्धं पीतः अर्द्धपीतः। सुप् सुपा। Next बहु—। Or पीतस्तनः, बहु—। अर्द्धं पीतस्तनः, सुप् सुपा। (b). मातुः—The construction is मातुः कर्षति draws away from the mother. Hence there is अपाय and we get अपादाने पञ्चमी। Raghava takes it with स्तन and makes a शेषषष्ठी। But in that case मातुः is well nigh superfluous. को हि नाम पितुः स्तनं पिबेत् ? (c). बलात् &c.— कृ + घञ् भावे = कारः। बलात् is an

अव्यय in the sense of हठ। "बलादिति हठार्थे"—*Ganakara*. बलात् कारः बलात्कारः forcible performance. कर्मधा—। तेन। तृतीया करणे।

(ततः प्रविशति यथानिर्दिष्टकर्मा तपस्विनीभ्यां बालः)। बालः—जिम्भ सिङ्घ दन्ताइं दे गणइस्सं [जृम्भस्व सिंह दन्तांस्ते गणयिष्यामि]।

(*Then enter the child engaged as described with two female ascetics*). Boy—Yawn, Lion, I will count thy teeth.

प्रथमा—अविणीद, किं णो अपच्चणिव्विसेसाणि सत्ताणि विप्पअरेसि। हन्त, वड्ढइ दे संरम्भो। ट्ठाणे क्खु इसिजणेण सव्वदमणोत्ति किदणामहेओसि [अविनीत, किं नः अपत्यनिर्विशेषाणि सत्त्वानि विप्रकरोषि। हन्त, वर्द्धते ते संरम्भः। स्थाने खलु ऋषिजनेन सर्वदमन इति कृतनामधेयोऽसि]।

First Hermit—Undisciplined child, why do you tease the animals that are not different from our own children? Ha! your turbulence increases! Rightly are you named Sarvadamana by the sages.

राजा—किं नु खलु बालेऽस्मिन् औरस इव पुत्रे स्निह्यति मे मनः। नूनमनपत्यता मां वत्सलयति।

King—Why indeed does my mind soften towards this boy as towards a heart-begotten son? Surely, childlessness makes me affectionate.

तत इति। 'यथा निर्दिष्टं' निर्देशानुरूपं 'कर्म' यस्य सः, यथोक्तव्यापारो 'बालः' सिंहशिशुं कर्षन्नित्यर्थः।

बाल इति। 'जृम्भस्व' जृम्भनं कुरु। यदा जृम्भा ते मुखं व्यादास्यते तदा 'ते दन्तान् गणयिष्यामि'।

प्रथमेति। हे 'अविनीत' दुःशील 'नः अपत्येभ्यः' सन्ततेः निर्विशेषाणि'

अभिज्ञानि 'सत्त्वानि' प्राणिन: 'किं विप्रकरोषि' प्रधर्षयसि। मा एवं कुरु। एतेन अनिवारिते बाले 'हन्त' विषादे। 'ते संरम्भ:' कोप: 'वर्द्धते'। 'स्थाने खलु' युक्तमेव 'सर्वदमन इति कृतं नामधेयं' नाम [स्वार्थे धेयप्रत्यय:] यस्य तथाविधोऽसि।

राजेति। 'किं नु' इति वितर्कगर्भ: प्रश्न:। 'खलु' अवधारणे। स्नेहं प्रत्यव-धारणम्। 'उरसो' हृदयात् जाते 'इव पुत्रे' ["अङ्गादङ्गाद्विनिष्क्रान्तो हृदयादभि-जायसे। आत्मा वै पुत्र नामासि जीवस्व शरदां शतम्॥" इत्युक्ते:] 'स्निह्यति' सस्नेहं भवति। स्वयमेवोत्तरमाह—'अनपत्यता' सन्ततिशून्यता 'वत्सलं' सस्नेहं करोति [तत्करोत्यर्थे णिच्]।

NOTES

1. (a). अपत्य &c.—वि + शिष + घञ् भावे = विशेष: difference निर्गत: विशेष एभ्य निर्विशेषाणि without difference. बहु—। अपत्येभ्यो निर्विशेषाणि। सुप्सुपा। (b). स्थाने—An अव्यय।

द्वितीया—एसा तुमं केसरिणी लङ्घेदि जइ से पुत्तअं ण मुञ्चेसि [एषा त्वां केसरिणी लङ्घयति यद्यस्या: पुत्रकं न मुञ्चसि]॥

Second Hermit—This lioness will surely hurt you if you do not release her whelp.

बाल: (सस्मितम्)—अम्महे, बलिअं क्खु भीदम्हि [अम्महे, बलीय: खलु भीतोऽस्मि]। (अधरं दर्शयति)।

Boy (*Smiling*)—Ho ! Ho ! I am terribly frightened indeed! (*Shows his lower lip*).

राजा (सविस्मयम्)—

महतस्तेजसो वीजं बालोऽयं प्रतिभाति मे।
स्फुलिङ्गावस्थया वह्निरेधापेक्ष इव स्थित:॥

King (*With astonishment*)—This boy, the germ of mighty

energy, appears to me like fire remaining in the state of a spark and awaiting fuel.

द्वितीयेति । 'एषा केसरिणी' सिंही 'त्वां लङ्घयति' अभिभवति [समीपे भविष्यति वर्त्तमानम्] ।

बाल इति । 'अम्महे' इति विस्मये । उपहासार्थं विस्मयाभिनयः । 'बलीयः' अत्यर्थं यथा तथा 'भीतोऽस्मि' । नैव भीतः इत्यर्थः । 'अधरं दर्शयति' इत्यवज्ञाप्रकाशः ।

राजेति । अन्वयः—महतस्तेजसो वीजम् अयं बालः स्फुलिङ्गावस्थया एधापेक्षः स्थितो वह्निरिव मे प्रतिभाति । व्याख्या—'महतः' प्रबलस्य 'तेजसः' प्रतापस्य 'वीजं' निदानम् 'अयं बालः स्फुलिङ्गस्य अग्निकणस्य या 'अवस्था' रूपं तया [हेतौ तृतीया] अतएव 'एधान्' काष्ठानि 'अपेक्षते' स्वरूपलाभार्थं यस्तादृशः [कर्मण्युपपदे अः कर्त्तरि] 'वह्निरिव' ज्वलन इव 'मे' मम 'प्रतिभाति' प्रकाशते । अचिरादेव तेजसा जाज्वल्यमानो जगद्दयमभिभविष्यति इत्यहं मन्ये इति भावः ["एधापेक्षः" (रा-, वि-, म-)—"एधोपेक्षः" (त-, न्या-)] ॥

NOTES

1. अम्महे—An अव्यय indicating विस्मय । "विस्मये अम्महे अम्म नित्यं स्त्रीभिः प्रयुज्यते" इत्यमरः ।

2. महतः &c.—This is differently construed thus—अयं बालः महतस्तेजसो वीजम् । स्फुलिङ्गावस्थया स्थितः एधापेक्षः वह्निरिव मे प्रतिभाति—*Raghava*. एधापेक्षः स्फुलिङ्गावस्थया स्थितः वह्निरिव अयं बालः महतस्तेजसो वीजं मे प्रतिभाति—*Vidyasagara*, *Nyaya-panchanana*. Raghava wants a nominative to प्रतिभाति । He has disconnected बालः from it. In the second construction मे प्रतिभाति is superfluous ; because, that the बालः is महतस्तेजसो वीजम् is undoubted—every one will admit this after witnessing his treatment of the lion-cub. मे प्रतिभाति better suits cases where difference of opinion is very likely. In our construction मे प्रतिभाति goes with एधापेक्षः स्थितः । Admitting the बालः to be महतस्तेजसो वीजम् one may doubt the एधापेक्षिता । But the king does not doubt it ; hence he ought to

say मे प्रतिभाति। The king's surmise is true as will be seen from Maricha's remark "रथेनानुद्धात" &c.—*Infra.*

प्रथमा—वच्छ, एदं बालमिइन्दअं मुञ्च, अवरं दे कीलणअं दाइस्सं [वत्स, एतं बालमृगेन्द्रकं मुञ्च, अपरं ते क्रीड़नकं दास्यामि]।

FIRST H.—My child, let this poor lion-whelp go, I will give you something else to play with.

बालः—कहिं देहि णं [कुत्र। देह्येनत्]।

BOY--Where? Give it.

राजा—कथं, चक्रवर्त्तिलक्षणमप्यनेन धार्य्यते। तथाह्यस्य—

प्रलोभ्यवस्तुप्रणयप्रसारितो विभाति जालग्रथिताङ्गुलिः करः।
अलक्ष्यपत्रान्तरमिद्धरागया नवोषसा भिन्नमिवैकपङ्कजम्॥

KING—How so! The sign of mastery over the whole circle of kings is also borne by him! Thus, his hand, opened from his longing for a desired object, having the fingers arrayed in contact, seems like a beautiful lotus tinged [*Or*—opened] by early dawn that has enhanced its redness and in which the interstices between the petals are not perceptible.

प्रथमेति। 'बालो मृगेन्द्रः' सिंहः 'बालमृगेन्द्रः'। त्वया पीड्यमानत्वादनुकम्पितम् [अनुकम्पायां कन्] तं 'मुञ्च'। 'क्रीड़नकं' क्रीड़ार्थं द्रव्यम्।

राजेति। 'कथम्' इत्याश्चर्ये। 'अनेन चक्रं' राजमण्डले 'वर्त्तते' प्रभुभावेन, यः तस्य 'लक्षणं' चिह्नम् 'अपि धार्य्यते'। तदेव दर्शयति। अन्वयः—प्रलोभ्यवस्तुप्रणयप्रसारितः जालग्रथिताङ्गुलिः अस्य करः इद्धरागया नवोषसा भिन्नम् अलक्ष्यपत्रान्तरम् एकपङ्कजमिव विभाति। व्याख्या—'प्रलोभ्ये' लोभयोग्ये 'वस्तुनि' यः 'प्रणयः' प्रार्थना अभिलाषो वा तेन 'प्रसारितः' उन्मीलितः 'जालमिव ग्रथिताः' संश्लिष्टा 'अङ्गुलयो' यस्मिन् तादृशः 'अस्य करः' पाणिः 'इद्धः' दीपितः, वर्द्धित इत्यर्थः: 'रागः' पद्मस्य

लौहित्यं यया तथाविधया 'नवया' अचिरप्रवृत्तया 'उषसा' प्रभातेन 'भिन्नं' मिश्रं विकसितं वा 'अलक्ष्याणि' अदृश्यानि 'पत्राणां' दलानाम् 'अन्तराणि' अवकाशा: यस्मिन् तथाविधम् 'एकं' मुख्यं 'पङ्कजं' पद्मम् 'इव विभाति' प्रकाशते। ["नवोषसा" (रा॰, वि॰, म॰)—"नवोषया" (त॰, न्या॰)]।

NOTES

1. चक्रवर्ति &c.—Raghava quotes—"अतिरक्त: करो यस्य ग्रथिताङ्गुलिको मृदु:। चापाङ्कुशाङ्कित: सोऽथ चक्रवर्त्ती भवेद् ध्रुवम्॥"

2. (a). जाल &c.—Comp. "जालावनद्धाङ्गुलिपाणिपादम्"—*Buddhacharita*, I, 65, "सुजातजालावततङ्गुली मृदू"—*Ibid*, *VIII*, 55. (b). इद्धरागया—Commentators all take राग here as belonging to उषस्। This represents उषस् as beautifully red, excessively red. This serves no purpose. We want excessive redness *in the lotus* to compare with the *excessively red* (अतिरक्त) कर of the चक्रवर्त्तिलक्षणान्वित boy (see note preceding). The reason why they adopt this undesirable construction is that the root इन्ध is taken by them as अकर्मक and therefore the exposition इद्धो रागो यया is considered by them as grammatically indefensible. They all derive इद्ध with कर्त्तरि क्त। Thus—"इद्ध: समृद्ध: रागो लौहित्यं यस्या: तया" —*Raghava, Nyayapanchanana*, "इद्ध: दीप्त: &c."—*Vidyasagara*. To the contrary we say that कर्मणि क्त may be had also, supposing the root to be अन्तर्भावितण्यर्थ। The root however is often seen as सकर्मक। Westergard quotes—"इन्धते हव्यवाहम्—" *Rig-Veda*, "यत्राग्निर्नित्यमिध्यते"—*Mahabharata*, "समिन्धानोऽस्त्रकौशलम्"—*Bhatti*. 6. 37. &c. Hence इद्ध: दीपित: राग: पङ्कजलौहित्यं यया, as in the Tika, is perfectly legitimate. (c). नवोषसा—नवा उषा: नवोषा: कर्मधा—। तया। उषस् is neuter according to Amara but the लिङ्गानुशासन of पाणिनि has it in the feminine. The rule is "प्रतिपदापद्विपत्संपच्छरत्परिषदुष:संवित्क्षुदुत्सुत्समिध:" (Ling. 27).

द्वितीया—सुव्वदे, ण सक्को एसो वाआमेत्तेण विरमाविदुं [सुव्रते न शक्य एष वाचामात्रेण विरमयितुम्]। ता गच्छ।

ममकेरए उडए मक्कण्डेअस्स इसिकुमारस्स वस्सचित्तिदो मित्ति-आमोरओ चिट्ठदि तं से उवहर [तत् गच्छ। मदीये उटजे मार्कण्डेयस्य ऋषिकुमारस्य वर्णचित्रितो मृत्तिकामयूरस्ति-ष्ठति। तमस्योपहर]।

SECOND H.—Suvrata, he cannot be stopped by mere words. So you go. In my cottage there is a colour-painted clay-peacock belonging to the hermit-boy Markandeya. Present him with that.

प्रथमा—तह [तथा]। (निष्क्रान्ता)।

FIRST H.—So be it. (*Exit*).

बालः—दाव इमिणा एव्व कीलिस्सं [तावदनेनैव क्रीडि-ष्यामि]। (तापसीं विलोक्य हसति)।

BOY—Till then it is with this that I shall play. (*Laughs looking at the female ascetic*).

द्वितीयेति। 'सुव्रता' इति प्रथमाया नाम। 'वाचा' वाक्यमेव इति 'वाचामात्रे' तेन, केवलेन वचसा इत्यर्थः [नित्यसमासः। मयूरव्यंसकादिः। वाचा इति आबन्तः। "आपश्चापि हलन्तानां यथा वाचा निशा दिशा" इति निर्देशात्] 'विरमयितुं' निव-र्त्तयितुम्। 'वर्णैः' विविधैर्वर्णैः 'चित्रितः' आलेपितः। 'मृत्तिकानिर्मितः मयूरः' [शाक-पार्थिवादिः]। 'तं' मयूरम् 'अस्य' [सम्बन्धसामान्ये षष्ठी] 'उपहर' प्रापय।

बाल इति। 'तावत्' यावत् मृन्मयूरो नानीतः [अवधौ तावत्]। 'हसति' इति बालस्वभावः।

NOTE

1. वाचामात्रेण—वाच् produces the stem वाचा by the maxim "वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोः। आपश्चापि हलन्तानां यथा वाचा निशा दिशा॥" So वाच्+आप् or टाप=वाचा words, speech.

राजा—स्पृहयामि खलु दुर्ललितायास्मै ।

आलक्ष्यदन्तमुकुलाननिमित्तहासैर्
अव्यक्तवर्णरमणीयवचःप्रवृत्तीन् ।
अङ्काश्रयप्रणयिनस्तनयान् वहन्तो
धन्यास्तदङ्गरजसा मलिनीभवन्ति ॥

KING—I really long for this naughtily-disposed boy. The blessed alone, carrying their sons—whose buds of teeth are slightly visible by causeless laughs—whose flow of speech is charming by indistinct syllables—who long to cling to their lap, become soiled with the dust of their body.

तापसी—भो, ण मं गणेसि [भो. न मां गणयसि]। (पार्श्वमवलोक्य) को एत्थ इसिकुमाराणां [कः अत्र ऋषिकुमाराणाम्]। (राजानमवलोक्य) भद्दमुह, एहि दाव मोआवेहि इमिणा दुम्मोअहत्थग्गहेण डिम्भलीलाए बाहीअमाणं बालमिइन्दिअं [भद्रमुख, एहि तावत् मोचय अनेन दुर्मोचहस्तग्रहेण डिम्भलीलया बाध्यमानं बालमृगेन्द्रकम्]।

HERMIT—What ho! You do not heed me! (*Looking to one side*) Who is here of the hermit-boys? (*Seeing the king*) Gentle Sir, do come and release this poor young lion which is being teased in boyish play by this boy the grasp of whose hand is hard to unloose.

राजेति। [लड विलासे भ्वादिषु। भावे क्तः। डलयोरभेदः] 'ललितं' विलासः। 'दुष्टं ललितं' यस्य तस्मै 'अस्मै' दुर्विलासाय बालाय ["स्पृहेरीप्सितः" इति सम्प्रदाने चतुर्थी] 'स्पृहयामि खलु'। सतापि दुर्विनीतत्वे एतदर्थं मे अभिलाषो वर्त्तते एव। अन्वयः—धन्या अनिमित्तहासैः आलक्ष्यदन्तमुकुलान् अव्यक्तवर्णरमणीयवचःप्रवृत्तीन् अङ्काश्रयप्रणयिनः तनयान् वहन्तः तदङ्गरजसा मलिनीभवन्ति। व्याख्या—'धन्याः'

-मुकुलिनी जना 'अनिमित्ता' अकारणा ये 'हासाः', तैः कारणैः 'आलक्ष्या' ईषद्दृश्या 'दन्तानां मुकुलाः' कोरकाः, नवोद्गता दन्ता इत्यर्थः, येषां तान् 'अव्यक्तैः' अपरिस्फुटैः 'वर्णैः' अक्षरैः 'रमणीयाः' मनोहारिण्यः 'वचसां प्रवृत्तयो' वाक्योच्चारणानि येषां तान्, 'अङ्के' 'आश्रयः' निवासः, तस्मिन् यः 'प्रणयः' प्रार्थना तद्वतः 'तनयान् वहन्तः' क्रोडे कुर्वन्तः 'तेषां' तनयानाम् 'अङ्गे' यत् 'रजः' धूलिः [जातावेकवचनम्] तेन अमलिना 'मलिना भवन्ति'। पुत्रगात्रधूलिना या मलिनता धन्यता नाम सा मम तु अधन्यस्य नास्ति, अतएव परपुत्राय स्पृहयामि इति भावः ।

तापसीति । 'न गणयसि' तृणाय मन्यसे । 'ऋषिकुमाराणां कः अत्र आस्ते' इति तर्जनम् [मूलम् (त-, न्या-)—"भवतु न मामयं गणयति" (रा-, वि-, म-) ॥ "अवलोक्य" (त-, न्या-)—"अवलोकयति" (रा- वि-, म-) ॥ 'भद्र' मङ्गलं 'मुखं' यस्य तत्सम्बुद्धिः । हे 'भद्रमुख' सौम्य 'एहि तावत्' । आगत्य 'दुर्मोचः' दुष्परिहरः 'हस्तेन ग्रहः' ग्रहणं, मुष्टिरित्यर्थः यस्य तथाविधेन 'अनेन डिम्भानां' बालानां 'लीलया' विलासेन बालसुलभया क्रीडया 'बाध्यमानं' पीड्यमानं 'बालमृगेन्द्रकं मोचय'। यद्वा— 'अनेन' कर्त्रा 'दुर्मोचेन हस्तग्रहेण' करणेन 'बाध्यमानम्' इत्यन्वयः । [मूलम् (वि-) —"दुर्मोक" (रा-)—"दुर्मोच" (त-, न्या-)—"ग्राहेण" (म-)]॥

NOTES

1. (a). अनिमित्त &c.—अविद्यमानं निमित्तं येषां ते अनिमित्ताः । बहु— । तादृशा हासाः । हेतौ तृतीया । The boy has laughed for no cause (*c.f.* "तापसीं विलोक्य हसति" above).

2. *Reading*—(a). भवतु &c.—This evidently is the style of an आत्मगत remark. But the speech is *not* स्वगत । (b). अवलोकयति —The लट् is used at the termination of a speech, ल्यप् is usual in the middle. Hence अवलोक्य is better.

3. दुर्मोच &c.—दुःखेन मुञ्चति परिहरति एतम् इति दुर्+मुच+खल् कर्मणि= दुर्मोचः । ग्रह+अप् भावे=ग्रहः । Now see Tika. Raghava reads दुर्मोक । There is no reason to change च into क । Monier-Williams has ग्राहेण for ग्रहेण । But ग्रह does not take घञ् and cannot give ग्राह in the भाववाच्य । The rule is "ग्रहवृदृनिश्चिगमश्च" (P. 3. 3. 58).

राजा (उपगम्य—सस्मितम्)—अयि भो महर्षिपुत्रक—

एवमाश्रमविरुद्धवृत्तिना संयमः किमिति जन्मनस्त्वया ।
सत्त्वसंश्रयसुखोऽपि दूष्यते कृष्णसर्पशिशुनेव चन्दनः ॥

KING (*Approaching—With a smile*)—O thou, child of a great sage, why is thy progenitor's self-restraint—even that from which comes the virtue of being the resort of all creatures—being thus defiled by thee with a disposition opposed to a hermitage, as a Sandal-tree is by the young black-serpent (cobra).

तापसी—भद्दमुह, ण हु अअं इसिकुमारओ [भद्रमुख, न हि अयम् ऋषिकुमारः] ।

HERMIT—Gentle Sir, he is, in fact, not the son of a sage.

राजेति । 'अयि' इति कोमलामन्त्रणे । अन्वयः—एवम् आश्रमविरुद्धवृत्तिना त्वया जन्मनः सत्त्वसंश्रयगुणोऽपि संयमः कृष्णसर्पशिशुना चन्दन इव किमिति दूष्यते । व्याख्या—'एवम्' अनेन प्रकारेण 'आश्रमस्य विरुद्धा' विसंवादिनी 'वृत्तिः' व्यापारो यस्य तादृशेन 'त्वया जन्मनः' महर्षेः पितुः [अपादाने मनिन्] 'सत्त्वानां' प्राणिनां 'संश्रयः' सम्यगाश्रयणं तदेव 'गुणो' धर्मो यस्य तथाविधोऽपि 'संयमः' आत्मदमनं, येनात्मदमनेन स हि सर्वप्राणिशरणं तदपि 'कृष्णसर्पस्य शिशुना चन्दनः' तदाख्यो वृक्ष 'इव किमिति' कथं 'दूष्यते' कलुषीक्रियते । यथा सुभगोऽपि चन्दनः सर्पावृतत्वात् लोकैस्त्यज्यते, तथा सर्वाश्रयोऽपि ते पिता त्वत्संसर्गात् सर्वैस्त्यक्ष्यते इति भावः ["संयमः" (रा-, वि-, म-) —"संयमी" (त-, न्या-) ॥ "जन्मनः" (म-)—"जन्मतः" (रा , वि)—"जन्मदः" (त-, न्या-) ॥ "गुणः" (त-, न्या-)—"सुखः" (रा-, वि-, म-) ॥ "चन्दनः" (त-, न्या-, रा-टी)—"चन्दनम्" (रा-, वि-, म-)] ॥

NOTES

1. (a). जन्मनः—जायते अस्मात् इति जन + मनिन् अपादाने = जन्म the source, *i. e.*, the father. तस्य । शेषे षष्ठी । Construe जन्मनः संयमः । (b). कृष्णसर्प &c.—कृष्णसर्प is a kind of cobra. A नित्य-समास with अस्वपदविग्रह । Thus सविषः सर्पः कृष्णसर्पः । कर्मधा— । (c).

Metre—The metre is रथोद्धता defined as "रान्नराविह रथोद्धता लगौ" with the scheme—⌒—⌒⌒⌒—⌒—⌒— (d). The following are compared—Boy, Snake ; Boy's father, Sandal tree ; Father's संयम, Fragrance &c. of the Sandal-tree. Both संयम and tree are सत्त्वसंश्रयगुण: and both are दूष्यते and shunned.

2. *Readings*—(a). संयमी for संयम and जन्मद: for जन्मन: refer to the father. The construction being जन्मद: दूष्यते । (b). Raghava's readings are adopted by Vidyasagara and thus explained —"आश्रमविरुद्धा तपोवनविसंवादिनी वृत्तिर्व्यापारो यस्य तथोक्तेन त्वया सत्त्वानां संश्रयेण अभिरक्षणेन सुखं प्रीतिः यस्मात् तादृशोऽपि संयमः तपोवनवासिनां सहजः सर्वहिंसानिवृत्तिरूप आचार कृष्णसर्पशिशुना चन्दनमिव किमिति किमर्थं जन्मतः जन्मन आरभ्य आ शैशवादित्यर्थः एवम् उक्तप्रकारेण दूष्यते सदोषः क्रियते"। Raghava explains सत्त्वसंश्रयसुख: as "सुखयतीति सुखः। सत्त्वसंश्रयश्चासौ सुखश्च।"

राजा—आकारसदृशं चेष्टितमेवास्य कथयति। स्थानप्रत्ययात्तु वयम् एवंतर्किनः। (यथाभ्यर्थितमनुतिष्ठन् बालकस्य स्पर्शमुपलभ्य आत्मगतम्)—

अनेन कस्यापि कुलाङ्कुरेण स्पृष्टस्य गात्रेषु सुखं ममैवम्।
कां निर्वृतिं चेतसि तस्य कुर्याद् यस्यायमङ्गात् कृतिनः प्ररूढः॥

KING—His action, which befits his body, indeed declares it. But from our reliance in the place we guess thus. (*Aside, on feeling the touch of the boy while doing as requested*) Such is *my* joy on being touched in the limbs by this shoot of the race of some one ; what rapture then must he produce in the heart of that lucky person from whose body he has sprung !

तापसी (उभौ निर्वर्ण्य)—अच्छरिअं अच्छरिअं [आश्चर्यमाश्चर्यम्]।

HERMIT (*Marking both*)—Strange ! Strange !

राजा—आर्ये, किमिव।

KING—What is it, noble lady ?

राजेति। 'आकारेण आकारस्य' वा 'सदृशम्' अनुरूपं 'चेष्टितं कर्म' 'एव कथयति' यत् अयम् ऋषिकुमारको न। आकारेण कर्मणा च कथ्यते नायमृषिकुमारक इति। 'स्थाने' अनाश्रमे यः 'प्रत्ययः' विश्वासः, ऋषिजुष्टमिदं स्थानमिति या मे मतिः, तत एव 'एवम्' ईदृशं 'तर्कयति' यस्मादृशोऽहं जातः, ऋषिकुमारकमेनं मेने इत्यर्थः ["एवंतर्किनः" इति तु विधीयते। तेन "अस्मदो द्वयोश्च" इति बहुवचनम्]। 'यथा' यद्वत् 'अभ्यर्थितं' प्रार्थितं तथा, प्रार्थितानुरूपमित्यर्थः 'अनुतिष्ठन्' कुर्वन्, सिंहशिशुमस्य मुष्टेर्मोचयन् इति भावः। 'स्पर्शं' गात्रसम्पर्कम् 'उपलभ्य' प्राप्य। अन्वयः—कस्यापि कुलाङ्कुरेण अनेन गात्रेषु स्पृष्टस्य मम एवं सुखम्, अयं कृतिनः यस्य अङ्गात् प्ररूढः तस्य चेतसि कां निर्वृतिं कुर्यात्। व्याख्या—'कस्यापि' मया निःसम्पर्कस्य जनस्य 'कुलस्य' वंशस्य 'अङ्कुरेण' वंशसन्तानबीजेन 'अनेन' बालेन 'गात्रेषु' केष्वपि प्रत्यङ्गेषु 'दृष्टस्य' न तु आलिङ्गितस्य 'मम एवम्' अनिर्वचनीयं 'सुखं' यदि जातं, तदा 'अयं कृतिनः' कृतःकृतास्य, धन्यस्य 'यस्य अङ्गात्' देहात् 'प्ररूढः' जातः 'तस्य चेतसि' मनसि 'काम्' अवाङ्मनसगोचरां 'निर्वृतिं' सुखं 'कुर्यात्' विदध्यात्। न कोऽप्यहमस्य, तथाप्यस्य दर्शनमात्रेणापि एवमभावनीयं मे सुखम्। यश्चास्य पिता स एनं निर्भरमालिङ्ग्य किं सुखं लभेत वद, मम तु तन्मनसाप्यशक्यं चिन्तयितुम् इत्याशयः।

NOTES

1. एवंतर्किनः—एवम् तर्कयति इति एवम्+तर्क+णिच्+णिनि कर्त्तरि।

2. (a). कुलाङ्कुरेण—अङ्कुर speaks of the continuity of the race. Hence it hints at the extinction of the पुरुवंश। (b). कृतिनः—Indirectly deplores his own अकृतित्व।

तापसी—इमस्स बालअस्स रूवसंवादिणी दे आकिदित्ति। विम्हिदम्हि अपरिइदस्स वि दे अप्पडिलोमो संवुत्तो त्ति [अस्य बालकस्य रूपसंवादिनी ते आकृतिरिति। विस्मितास्मि अपरिचितस्यापि ते अप्रतिलोमः संवृत्त इति]।

HERMIT—It is that your appearance resembles the features of this boy. I am surprised that he has proved not untractable to you though a stranger.

राजा (बालकमुपलालयन्)—न चेन्मुनिकुमारोऽयम् अथ कोऽस्य व्यपदेशः ।

KING (*Fondling the boy*)—If he is not a hermit-boy, then what is his race ?

तापसी—पुरुवंसो [पुरुवंशः] ।

HERMIT—Puru's race.

तापसीति । 'अस्य बालकस्य' यत् 'रूपं' तेन साधु 'संवदति' संगच्छते या। सादृशी 'ते आकृतिः' रूपम् 'इति' एतदाश्चर्य्यम् । "किमिव" इति राज्ञः प्रश्नस्य प्रतिवचनमेतत् । 'अपरिचितस्य' अदृष्टपूर्वस्य 'ते अप्रतिलोमः' अविरुद्धः [प्रादितत्— । अच् समासान्तः । ततो नञ्तत्— ॥ अव्ययीभावपक्षे तु टच् समासान्तः । ततो मत्वर्थीयोऽच् । नञ् समासः] 'संवृत्तो' जातः 'इति' अनेन हेतुना 'विस्मितास्मि' । ["विस्मिता" (त-, न्या-,)—"विस्मापिता" (रा, वि-, म-)] ॥

राजेति । 'बालकम् उपलालयन्' उपलालयमानम्, इच्छानुरूपं प्रवर्त्तमानं, बालकं प्रेरयन् [ईप्सार्थे वर्त्तमानात् चौरादिकात् हेतुमर्णिच्] । 'अथ' प्रश्ने । 'अस्य व्यपदेशः' कुलं 'कः' ।

NOTES

1. (a). रूपसंवादिनी—रूपेण साधु संवदति इति रूप+सम्+वद+णिनि कर्त्तरि साधुकारिणि । (b). अप्रतिलोमः—प्रतिगतो लोमानि इति प्रतिलोमन्+अच् (समासान्त)=प्रतिलोमः against the hair, *i. e.*, refractory. प्रादितत्— । The अच् is attached by the rule "अच् प्रत्यन्ववपूर्वात् सामलोम्नः" । An अव्ययीभाव is not easily available here. If allowed, the form will be प्रतिलोम or प्रतिलोमम् (with टच्) opposition. ननु अस्ति अस्य इति प्रतिलोम+अच् मत्वर्थे=प्रतिलोमः opposed. न तथा । (c). विस्मिता—विस्मापिता supposes इति to be the *agent* (हेतु) that causes विस्मय । This is unnecessarily round-about.

2. उपलालयन्—The root लल is चुरादि आत्मनेपदी giving उपलालयमानः । The परस्मैपद however is seen in cases like "लालयेत् पञ्चवर्षाणि"—*Chanakyasataka*, "उपलालयन्नपि ते सखी न लप्स्यति"—

Malavikagnimitra. The defence is that in these examples a प्रेरणार्थक णिच् is attached to the चुरादि root. Hence अकर्त्रभिप्राये क्रियाफले परस्मैपदम्। Thus बालकः उपलालयते with स्वार्थिक णिच् only. उपलालयमानं बालकं प्रेरयन् उपलालयन् with an additional णिच् in the sense of प्रेरण।

राजा (आत्मगतम्)—कथमेकान्वयो मम। अतः खलु मदनुकारिणमेनमत्रभवती मन्यते। अस्त्येतत् पौरवाणामन्त्यं कुलव्रतम्—

भवनेषु रसाधिकेषु पूर्वं क्षितिरक्षार्थमुशन्ति ये निवासम्।
नियतैकयतिव्रतानि पश्चात् तरुमूलानि गृहीभवन्ति तेषाम्॥

(प्रकाशम्) न पुनरात्मगत्या मानुषाणामेष विषयः।

KING (*Aside*)—How so! My co-lineal! Hence surely does this noble lady consider him as resembling me. There exists this final family-vow of the descendants of Puru, that of those who, for the protection of the world, wish residence in houses, abounding in pleasures, in early life, in latter days the roots of trees, with solely the vow of hermits attached to them, become the homes. (*Aloud*) But this is not a place for mortals (to come to) through their own motion.

तापसी—जह भद्दमुहो भणादि। अच्छरासम्बन्धेण उण इमस्स जणणी एत्थ देवगुरुणो तवोवणे प्रसूदा [यथा भद्रमुखो भणति। अप्सरःसम्बन्धेन पुनरस्य जननी अत्र देवगुरोस्तपोवने प्रसूता]।

HERMIT—As gentle sir says. But this boys' mother, owing to her relationship with the Apsaras, was delivered here in the hermitage of the progenitor of the gods.

राजेति। 'कथम्' इत्याश्चर्ये। 'मम' [सम्बन्धसामान्ये षष्ठी] 'एकः अन्वयो'

वंशो यस्य सः। 'अतः खलु अत्रभवती एनं' बालकं 'माम् अनुकरोति' मया सह संवदति रूपेण यस्मादृशं 'मन्यते'। 'अन्ते' वयसि कर्त्तव्यं 'कुलव्रतं' कुलाचारः। तदेव स्फुटयति। अन्वयः—पूर्वं ये क्षितिरक्षार्थं रसाधिकेषु भवनेषु निवासम् उशन्ति पश्चात् तेषां नियतैकयतिव्रतानि तरुमूलानि गृहीभवन्ति। व्याख्या—'पूर्वम्' आद्ये वयसि 'ये क्षितेः' धरायाः 'रक्षार्थं' रक्षणाय, न तु इन्द्रियसेवार्थं 'रसैः' भोगद्रव्यैः 'अधिकेषु' बहुलेषु भोगाढ्येषु इत्यर्थः 'भवनेषु' गृहेषु 'निवासं' स्थितिम् 'उशन्ति' वाञ्छन्ति 'पश्चात्' अन्ते वयसि 'तेषां नियतं' व्यवस्थितम् 'एकं' केवलं 'यतिव्रतं' वाणप्रस्थो येषु तथाविधानि 'तरुमूलानि' अगृहाणि 'गृहाणि भवन्ति' सम्पद्यन्ते। सदा धर्मोत्तराः पौरवा धर्मार्थमेव यौवने गृहिणः वार्द्धके च मुनिव्रतास्तरुतलं भजन्ते। यत्र तापसी पुरुवंश इत्याह तत्र पृच्छति 'एष पुनः', अयन्तु मारीचाश्रमः 'आत्मनो गत्या' स्वेच्छया 'मानुषाणां 'न विषयः' अभूमिः। अत्र मानुषा देवयोनिभिर्दैवैर्वा प्रेरिताः आगच्छेयुः न हि स्वेच्छया। तत् कथमिह पौरवाः प्राप्ता इति पृच्छामि इति भावः।

तापसीति। 'भद्रमुखो यथा भणति' तथैव एतत्। सत्यमेव मानुषाः स्वयमत्र आगन्तुमशक्ताः। 'अप्सरोभिः' यः 'सम्बन्धः' सम्पर्कः तेन 'पुनः' [पुनरिति भेदे] 'अस्य जननी अत्र देवानां गुरोः' पितुः कश्यपस्य 'तपोवने प्रसूता'।

NOTE

1. रसाधिकेषु—रस्यन्ते इति रस (अदन्त चुरादि) + णिच् + अच् or घञ् कर्मणि = रसाः enjoyments. Next सुप्सुपा (see Tika).

राजा (अपवार्य)—हन्त द्वितीयमिदमाशाजननम्। (प्रकाशम्) अथ सा तत्रभवती किमाख्यस्य राजर्षेः पत्नी।

King (*Aside*)—Ha! Here is a second creator of hope. (*Aloud*) Well, of what royal sage by name is she, the noble lady, the wife?

तापसी—को तस्स धम्मदारपरिच्चाइणो णाम सङ्कीत्तिदुं चिन्तिस्सदि [कस्तस्य धर्मदारपरित्यागिनो नाम सङ्कीर्त्तयितुं चिन्तयिष्यति]।

Hermit—Who will think of pronouncing the name of that deserter of his lawful wife?

राजा (स्वगतम्)—इयं खलु कथा मामेव लक्ष्योकरोति। यदि तावदस्य शिशोर्मातरं नामतः पृच्छामि। अथवा अनार्थ्यः परदारव्यवहारः।

KING (*Aside*)—Surely this story points to me alone. Suppose I do ask to know the mother of this boy by name. Or, reference to another's wife is ignoble.

(प्रविश्य मृन्मयूरहस्ता) तापसी—सव्वदमण, सउन्दलावस्सं पेक्ख [सर्वदमन, शकुन्तलावण्यं प्रेक्षस्व]।

FIRST HERMIT (*Entering with a clay-peacock in hand*)—Sarvadamana, see the *Sakuntalavanya* (bird's beauty).

राजेति। 'हन्त' हर्षे। 'इदं' तापसीवचनं 'द्वितीयम् आशाया जननं' हेतुः। भुजस्पन्दनं प्रथमम्, इदन्तु द्वितीयम्। 'अथ' इति प्रश्ने। 'सा' तत्रभवती अस्य जननी 'का आख्या' नाम यस्य तस्य 'पत्नी'। यस्य सा पत्नी तस्य का आख्या इत्यर्थः।

तापसीति। 'धर्मार्था धर्मप्रयोजना धर्मसहाया' वा 'दाराः'। [शाकपार्थिवादिः]। यद्वा—'धर्मस्य दाराः' [तादर्थ्ये षष्ठीसमासः]। तान् यः साधु 'परित्यक्तवान्' तस्य 'नाम कः सङ्कीर्त्तयितुम्' उच्चारयितुं 'चिन्तयिष्यति'। पापकारणं पापिनामोच्चारणम् इति भावः।

राजेति। 'इयं कथा' दारत्यागकथा। 'लक्ष्य'' विषयभूतं 'करोति'। 'अस्य शिशोर्मातरं यदि तावत् नामतः' [तृतीयार्थे तसिः] 'पृच्छामि'। 'अथवा परस्य दाराणां व्यवहारः' आलोचना तत्सम्बन्धिनी कथा 'अनार्थ्यः' आर्य्यजनविगर्हितः। 'मृन्मयो मयूरो हस्ते' यस्याः। ["मृन्मयूर" (म-)—"मृण्मयूर" (रा-, वि-, त-, न्या-)]॥

तापसीति। 'शकुन्तस्य' मयूरस्यास्य 'लावण्य'' माधुरीं 'प्रेक्षस्व'। दर्शनीयमस्य रूपमित्यर्थः।

NOTES

1. सङ्कीर्त्तयितुं चिन्तयिष्यति—Even the *thought* (चिन्तयिष्यति) to utter is sinful, let alone actual utterance.

2. (a). यदि तावत्—Highly idiomatic. Indicates forming a resolve, making a suggestion &c. Compare "यदि तावदेवं क्रियताम्" —Act. V. (b). अनार्यः—अर्य्यते गम्यते आश्रीयते इति ऋ + ण्यत् कर्मणि = आर्यः any thing good or noble. न आर्यः। Or, taking आर्य to mean the महत्, great men, we have by लक्षणा here आर्य = pertaining to the great. न आर्यः। (c). परदार &c.—वि + अव + हृ + घञ् भावे = व्यवहारः। "वि नानार्थेऽव सन्देहे हरणं हार उच्यते। नानासन्देहहरणाद्व्यवहार इति स्मृतः॥"—*Katyayana.*

3. मृन्मयूर &c.—मृदो मयूरः or मृन्मयो मयूरः मृन्मयूरः। The reading मृण्मयूर is very common, but it is faulty. मृद् + मयूर changes द into न by the rule "यरोऽनुनासिकेऽनुनासिको वा" (P. 8. 4. 45) giving मृन्मयूर or मृद्मयूर। Now the rule "रषाभ्यां नो णः समानपदे" (P. 8. 4. 1) does not apply to मृन्मयूर owing to the injunction "पूर्वत्रासिद्धम्" (P. 8. 2. 1). Even if it did apply, the न here would not become ण because of the prohibition "पदान्तस्य" (P. 8. 4. 37) as मृन् has न at the end of the पद।

बालः (सदृष्टिक्षेपम्)—कहिं वा मे अज्जू [कुत्र वा मे अम्बा]।

Boy (*Casting his looks about*)—Where could my mother be ?

उभे—णामसारिस्सेण वञ्चिदो माउवच्छलो [नामसादृश्येन वञ्चितो मातृवत्सलः]।

Both—Devoted to his mother, he is deceived by the imitation of the name.

द्वितीया—वच्छ, इमस्स मित्तिआमोरस्स रम्मत्तणं देक्खत्ति भणिदो सि [वत्स, अस्य मृत्तिकामयूरस्य रम्यत्वं पश्य इति भणितोऽसि]।

Second Hermit—My child "See the beauty of this clay-peacock" this is what you have been told.

राजा (आत्मगतम्)—किं वा शकुन्तलेत्यस्य मातुराख्या। सन्ति पुनर्नामधेयसादृश्यानि। अपि नाम मृगतृष्णिकेव नाममात्रप्रस्तावो मे विषादाय कल्पते।

KING (*Within himself*)—Really, is Sakuntala his mother's name ? Or, there are resemblances in names. Is it possible that the mention of the mere name, like a mirage, is developing for my distress ?

बाल इति। मातृदर्शनार्थं दृष्टिं पातयित्वा ताञ्च अदृष्ट्वा आह 'कुत्र वा मे अम्बा' माता स्यात् या मया न दृश्यते।

उभे इति। 'नाम्नः सादृश्य" तुल्यता तेन 'मातरि वत्सलः' प्रेमवान् अयं बालो 'वञ्चितः' प्रतारितः। 'सउन्दलावण्ण" इत्यत्र 'शकुन्तलावर्णं' मत्वा 'शकुन्तलाया वर्णं पश्य' इति वञ्चितः।

राजेति। 'किं वा अस्य मातुः शकुन्तला इति आख्या'। इति तृतीयमाशाजननं विधूय आह 'नामधेयेषु' नामसु 'सादृश्यानि' तुल्यताः 'पुनः सन्ति' तेन शकुन्तलेति मातृनाम नेत्र सुतराम् आशाजननम्। 'मृगतृष्णिका' यथा जलसादृश्यं प्रदर्श्य 'विषादाय कल्पते' तथा 'अपि नाम' किमेतत् सम्भावितं यत् 'नाममात्रस्य' केवलस्य शकुन्तलानाम्नः 'प्रस्तावः' अवतारणा अधुना आशां जनयित्वा विषादं घटयितुं प्रवृत्तः।

NOTES

1. कुत्र वा—वा implies परिप्रश्न inquiry.

2. भणितः—भण + क्त कर्मणि। The root has the sense of ब्रू। Hence it is द्विकर्मक। Here अप्रधाने कर्मणि क्त by the maxim "अप्रधाने दुहादीनाम्"।

3. मृगतृष्णिका—See मृगतृष्णिकायाम्, Act VI.

बालः—अज्जिए रोअदि मे एसो भद्दमोरओ [अज्जिके, रोचते मे एष भद्रमयूरः]। (क्रीडनकमादत्ते)।

BOY—Sister, this nice peacock pleases me. (*Takes the toy*).

प्रथमा (विलोक्य सोद्वेगम्)—अम्महे, रक्खाकरण्डअं से मणिबन्धे ण दीसदि [अम्महे, रक्षाकरण्डकम् अस्य मणिबन्धे न दृश्यते] ।

FIRST (*Having noticed—With alarm*)—Oh ! the amulet of protection is not seen on his wrist.

राजा—अलमावेगेन । ननु इदमस्य सिंहशावविमर्द्दात् परिभ्रष्टम् । (आदातुमिच्छति) ।

KING—Away with anxiety. Here indeed it is, slipped through his tussle with the lion-cub. (*Wants to pick it up*).

उभे—मा क्खु, मा क्खु । एदं अवलम्बिअ— । कहं गहिदं णेण [मा खलु, मा खलु । एतदवलम्ब्य— । कथं गृहीतमनेन] । (विस्मयादुरोनिहितहस्ते परस्परमवलोकयतः) ।

BOTH—O don't, O don't. Having touched it—. How so ! Taken by him ! (*Through amazement they stare at each other with hands placed on their chest*).

बाल इति । हे 'अम्बिके' भगिनि 'एष भद्रः' शोभनो 'मयूरः मे' मह्यम् [प्रीयमाणत्वात् सम्प्रदाने चतुर्थी] 'रोचते' । प्रीतोऽहमनेन इत्यर्थः ["अम्बिके" (त-, व्या-)—"मातः" (रा-, वि-)—"आर्य्यके" (म-)] । 'आदत्त' गृह्णाति [कर्त्रभिप्राये क्रियाफले आत्मनेपदम्] ।

प्रथमेति । 'उद्वेगेन' सम्भ्रमेण सह । 'करण्डः' पुष्पपत्रादिकृतो ग्रन्थिबन्धः । क्षुद्रः करण्डः 'करण्डकम्' [अल्पार्थे कन्] 'रक्षार्थं' दत्तं 'करण्डकं मणिबन्धे न दृश्यते' । तददर्शनादुद्वेगः ।

राजेति । 'ननु इदमस्य' इति अङ्गुल्या निर्देशः । 'सिंहशावेन' यो 'विमर्द्दः' सङ्घर्षः । तस्मात् 'परिभ्रष्टं' च्युतं सत् भूमौ पतितम् ।

उभे इति । 'मा खलु' आदत्स्व इति आदाननिषेधः । [आवेगे द्विरुक्तम्] । निषेधकारणमाह—'एतत्' रक्षाकरण्डकम् 'अवलम्ब्य' आदाय—म्रियसे इति वाक्यशेषः ।

असमाप्ते एव वाक्ये राजा तदाददे न तु मत: इति विस्मयात् ते आहतु: 'कथम्' आश्चर्ये। 'उरसि' वक्षसि 'निहित:' स्थापित: 'हस्तो' ययो:। राजा एवायमिति प्रत्यये जाते विस्मयाधिक्यात् वचसि निरुद्धे परस्परावलोकनमात्रं कृतं न च किञ्चिदुक्तम्।

NOTES

1. अत्तिके—अत्तिका is used in Dramas for the elder sister. "चुल्लां ज्येष्ठभगिन्याश्च नाट्योक्तौ कोत्स्यत्तेऽत्तिका" इति विश्वमेदिन्यौ।

2. (a). अम्महे—Indicates विस्मय surprise. "विस्मये अम्महे अम्म नित्यं स्त्रीभि: प्रयुज्यते" इत्यमर:। (b). न दृश्यते—She noticed this when the boy put out his hand to take the toy.

राजा—किमर्थं प्रतिषिद्धा: स्म:।

KING—For what purpose have I been prohibited ?

प्रथमा—सुणादु महाराओ। एसा अवराजिदा णाम ओसही इमस्स जादकम्मसमए भअवदा मारोएण दिण्णा। एदं किल मादापिदरो अप्पाणं च वज्जिअ अवरो भूमिपडिदं ण गेह्णादि [शृणोतु महाराज:। एषा अपराजिता नाम ओषधि: अस्य जातकर्मसमये भगवता मारीचेन दत्ता। एतां किल मातापितरौ आत्मानं च वर्जयित्वा अपरो भूमिपतितां न गृह्णाति]।

FIRST HERMIT—Listen, mighty king. This is the herb named Aparajita given by his sublime highness Maricha at the time of his natal ceremony. No one indeed, excepting the father, the mother, and self, takes it up if dropped on the ground.

राजा—अथ गृह्णाति।

KING—If he does take it up ?

प्रथमा—तदो तं सप्पो भविअ दंसइ [ततस्तं सर्पो भूत्वा दशति]।

FIRST HERMIT—Then, becoming a snake, it bites him.

प्रथमेति। 'मातापितरौ आत्मानञ्च वर्जयित्वा अपरः किल भूमौ पतिताम् एतां न गृह्णाति' अकर्त्तव्यं बुद्ध्वा ग्रहणात् निवर्त्तते।

राजेति। 'अथ' विकल्पे। अपरो भूपतितां 'गृह्णाति' इति विकल्पे किम् इत्यर्थः ["अथाथो संशये स्यातामधिकारे च मङ्गले। विकल्पानन्तरप्रश्नकार्त्स्न्यारम्भसमुच्चये॥" इति मेदिनी]।

NOTE

1. महाराज:—They know it now for certain that he is the king.

राजा—भवतीभ्यां कदाचिदस्याः प्रत्यक्षीकृता विक्रिया।

KING—Has its transformation ever been seen by your honoured selves?

उभे—अणेअसो [अनेकशः]।

BOTH—Several times.

राजा (सहर्षमात्मगतम्)—कथमिव सम्पूर्णमपि मे मनोरथं नाभिनन्दामि। (बालं परिष्वजते)।

KING (*Within himself with joy*)—How is it I do not greet my desire though fulfilled? (*Embraces the child*).

द्वितीया—सुव्वदे, एहि इमं वुत्तन्तं णिअमव्वावुड़ाए सउन्दलाए णिवेदेम्ह [सुव्रते, एहि इमं वृत्तान्तं नियमव्यापृतायै शकुन्तलायै निवेदयामः]। (निष्क्रान्ते)।

SECOND HERMIT—Suvrata, come, we shall report this fact to Sakuntala engaged in austerities. (*Exeunt*).

बालः—मुञ्च मं जाव अम्बाए सआसं गमिस्सं [मुञ्च मां यावदम्बायाः सकाशं गमिष्यामि]।

BOY—Release me, I will go to my mother.

भवतीभ्यामिति। 'अस्या' ओषधेः 'विक्रिया' विकारः सर्पीभवनम् 'कदाचित् प्रत्यक्षीकृता' साक्षाद्दृष्टा किम्।

उभे इति। 'अनेकशः' बहुशः बहुषु कालेषु विक्रिया प्रत्यक्षीकृता। कालाधिकरणे शस्]।

राजेति। 'सम्पूर्णमपि मे मनोरथं' अनुरूपपुत्रलाभरूपं 'कथमिव' किमिव कारणं 'न अभिनन्दामि' सम्भावयामि। अनुचितमेतत्, तदेष: अभिनन्दामि। 'परिष्वजते' आलिङ्गति।

द्वितीयेति। 'एहि' इत आगच्छ 'नियमे' तपश्चरणे 'व्यापृतायै' नियुक्तायै ["कर्मणा यमभिप्रैति—" इति सम्प्रदानत्वात् चतुर्थी]।

बाल इति। 'यावत्' इत्यवधारणे। ["अम्बाया:" (त-, न्या-, म-)—"मातु:" (रा-, वि-)]।

NOTES

1. अनेकशः—न एकः अनेकः which is a सर्वनाम। अनेकस्मिन् काले इति अनेक + शस् अधिकरणे = अनेकशः by the rule "बह्वल्पार्थात् शस् कारकादन्यतरस्याम्" (P. 5. 4. 42).

2. सम्पूर्णमपि—He has now no doubt that this is his boy.

3. नियम &c.—नि + यम + अप् भावे = नियमः vow व्रतम्। "नियमो यन्त्रणायाञ्च प्रतिज्ञानिश्चये व्रते" इति मेदिनी। यम is expected to take घञ् but it has अप् optionally by the rule "यमः समुपनिविषु च"। Hence नियाम is also correct and has the same sense. वि + आ + पृ + क्त कर्त्तरि = व्यापृता engaged. Now see Tika.

4. सकाशम्—समानं काशते इति समान + काश + अच कर्त्तरि = सकाशम्। समान becomes स by योगविभाग in the rule "समानस्य छन्दस्यमूर्द्धप्रभृत्युदर्केषु" (P. 6. 3 84).

राजा—पुत्रक, मया सहैव मातरमभिनन्दिष्यसि।

KING—My son, even with me will you congratulate your mother.

बाल:—मम क्खु तादो दुस्सन्दो ण तुमं [मम खलु तातो दुष्यन्तः न त्वम्]।

BOY—Dushyanta indeed is my father, not you.

राजा (सस्मितम्)—एष विवाद एव प्रत्याययति ।

KING (*Smiling*)—This contradiction itself convinces.

(ततः प्रविशत्येकवेणीधरा शकुन्तला)। शकुन्तला—विआरकाले वि पकिदित्थं सव्वदमणस्स ओसहिं सुणिअ ण मे आसा आसि अत्तणो भाअहेएसु। अहवा जह साणुमदीए आचक्खिदं तह सम्भावीअदि एदं [विकारकालेऽपि प्रकृतिस्थां सर्वदमनस्य ओषधिं श्रुत्वा न मे आशा आसीत् आत्मनो भागधेयेषु। अथवा यथा सानुमत्या आख्यातं तथा सम्भाव्यते एतत्]।

(*Then enters Sakuntala with her hair twisted into a single braid*) SAKUNTALA—Even having heard Sarvadamana's herb to be in its natural state when there was an occasion for transformation, I placed no hope in my luck. Or, from what is related by Sanumati, this seems possible.

राजेति। 'विवादः' पुत्रक इति सम्भाषणस्य प्रतिवादः। 'प्रत्याययति' प्रत्ययं जनयति [बाधनार्थत्वात् न गम्यादेशः]। "मम तातो दुष्यन्तः" इति स्पष्टोक्तेः प्रत्ययः। तत इति। 'एकस्या वेण्या धरा' एकामेव वेणीं धारयन्ती इत्यर्थः। प्रोषितपतिकया एकवेणीधारणमाचारः।

शकुन्तलेति। 'सर्वदमनस्य ओषधिं' रक्षाकरण्डकवर्त्तिनीमपराजितां 'विकारस्य' सर्पीभावस्य 'काले प्रकृतौ' ओषधिभावे या तिष्ठति तादृशीं 'श्रुत्वा अपि' आर्य्यपुत्र एव प्राप्त इत्यसंशयितेऽपि 'आत्मनः' स्वस्य 'भागधेयेषु' भाग्येषु विषये 'मे आशा न आसीत्' प्रसन्नं मे भाग्यमिति प्रत्ययो मे न जातः। 'अथवा' पक्षान्तरे मे आशास्थानमस्ति। 'सानुमत्या यथा' यद्वत् 'आख्यातं' कथितं मे 'तथा' तद्वत् 'एतत् सम्भाव्यते'। सानुमत्युक्तं सतां चेत् नैतदसम्भवम् [यथा-तथा इत्यनुमाने]।

NOTES

1. विवाद एव—The conviction comes after all from the contradiction.

2. एकवेणी &c.—एका वेणी। तस्या धरा। It we attach कर्मधारय with the वाक्य एकवेणीं धरति या सा we get एकवेणीधारी।

3. विकार &c.—अपि is misplaced. It should be taken with श्रुत्वा।

राजा (शकुन्तलां विलोक्य)—अये सेयमत्रभवती शकुन्तला यैषा—

वसने परिधूसरे वसाना नियमक्षाममुखी धृतैकवेणिः।
अतिनिष्करुणस्य शुद्धशीला मम दीर्घं विरहव्रतं बिभर्त्ति॥*

KING (*Seeing Sakuntala*)—Ha ! here is her ladyship Sakuntala—She who, with a pure conduct, wearing two pieces of very grey garments, with her face wasted by penances, bearing a single braid of hair, undergoes the long observance of separation from me who was excessively unkind (cruel) to her.

शकुन्तला (पश्चात्तापविवर्णं राजानं दृष्ट्वा)—न क्खु अज्जउत्तो विअ। तदो को एसो दाणिं किदरक्खामङ्गलं दारअं मे गत्तसंसग्गेण दूसेदि [न खलु आर्य्यपुत्र इव। ततः क एष इदानीं कृतरक्षामङ्गलं दारकं मे गात्रसंसर्गेण दूषयति]।

SAKUNTALA (*Seeing the king pale with remorse*)—Certainly not like my husband ! Who then is this with the contact of his body defiling my boy unto whom auspicious guard was provided ?

* राजेति। अन्वयः—अये या अत्रभवती एषा परिधूसरे वसने वसाना नियमक्षाममुखी धृतैकवेणिः सा इयं शुद्धशीला शकुन्तला अतिनिष्करुणस्य मम दीर्घं विरहव्रतं बिभर्त्ति। व्याख्या—'अये' इति स्मरणे। 'या अत्रभवती' मान्या 'एषा' दृश्यमाना 'परिधूसरे' अतिमलिने 'वसने' वस्त्रे 'वसाना' परिदधाना 'नियमेन' व्रतोपवासादिना 'क्षामं' शुष्कं 'मुखं' यस्याः तादृशी 'धृता एका वेणिः' यया तादृशी इतोमुखमागच्छति 'सा इयं शुद्धं' निष्कलङ्कं 'शीलं' स्वभावो यस्याः तादृशी 'शकुन्तला अतिनिष्करुणस्य' सुतरां क्रूरस्य 'मम दीर्घं विरहस्य विरहोचितं' वा 'व्रतम्' आचारं 'बिभर्त्ति' आचरति। गुरुशोकेन रूपे विकृते प्रथमं मलिनवसना रमणीमात्रमिति ज्ञानम्। ततो नातिदूरे

क्षामेण कपोलेन कठोरं तपश्चरन्ती काचित् तापसीति। ततश्च समीपे एकमात्रशा वेण्या नेयं तापसी किन्तु विरहिणीति। अनन्तरं प्रत्यभिज्ञा "अये सेयं शुद्धशीला शकुन्तला" इति, अपि च क्रूरस्य ममैव विरहव्रतम् इति, तेन चावेगातिशयः। अन्ये तु—परिधूसरे वसने वसाना नियमक्षाममुखी धृतैकवेणिः (अतएव) शुद्धशीला या एषा अतिनिष्करुणस्य मम दीर्घं विरहव्रतं बिभर्त्ति सा इयमत्रभवती शकुन्तला—इत्थं व्याचक्षते। तत्र 'सा इयं शकुन्तला' इत्यभिज्ञानात् प्राक् 'मम विरहव्रतं बिभर्त्ति' इत्यनुपपत्तिः स्पष्टैव।

शकुन्तलेति। 'पश्चात्तापेन विवर्णं' विरूपम्। 'न खलु' न नूनम् 'आर्य्यपुत्र इव' अयं लक्ष्यते। यदि नायमार्य्यपुत्रः 'ततः क एष इदानीम्' [वाक्यालङ्कारे] 'कृतं' विहितं 'रक्षारूपं मङ्गलं' शुभं यस्य तादृशं 'मे दारकं' पुत्रं 'गात्रस्य' स्वशरीरस्य 'संसर्गेण' सम्पर्केण 'दूषयति' कलुषीकरोति। अपराजितामप्यभिभूय बालं मे लङ्घयत्ययं कः इति शङ्कागर्भो वितर्कः। दूरत्वादश्रुतमेतद्राज्ञा।

NOTES

1. (a). वसने—The upper and the lower garments. (b). परिधूसरे—धूसर is पाण्डु, grey. परि is intensive. Indicates the absence of all care after toilet. (c). नियम &c.—क्षै + क्त कर्त्तरि = क्षामम् wane. नियमेन (See नियमव्यापृता, above) क्षामम्। सुप्सुपा। तादृशं मुखं यस्याः। बहु—। नियमक्षाममुखा is an optional form by the rule "स्वाङ्गाच्चोपसर्जनादसंयोगोपधात्" (P. 4. 1. 54). (d). धृतैक &c.—एका वेणिः एकवेणिः। Both वेणि and वेणी are correct (See एकवेणीधरा, above), the ङीष् being optional by the Ganasutra "कृदिकारादक्तिनः"। (e). विरहव्रतम्—See Tika. The व्रत consists of several observations of which केशसंस्कारवर्जन is prominent.

2. कृतरक्षा &c.—रक्ष्यते अनया इति रक्ष + अ करणे स्त्रियाम् = रक्षा guard. Now see Tika.

बालः (मातरमुपेत्य)—अज्ज, एसो को वि पुरिसो मं पुत्तेत्ति आलिङ्गदि [अम्ब एष कोऽपि पुरुषो मां पुत्र इत्यालिङ्गति]।

Boy (*Approaching his mother*)—Mother, here is a man who embraces me as his son.

राजा—प्रिये, क्रौर्य्यमपि त्वयि प्रयुक्तमनुकूलपरिणामं संवृत्तं यदहमिदानीं त्वया प्रत्यभिज्ञातमात्मानं पश्यामि ।

KING—My darling, even the cruelty inflicted by me on you has turned out to be of a favourable termination since I see myself recognised by you.

शकुन्तला (आत्मगतम्)—हिअअ, समस्सस समस्सस । परिच्चत्तमच्छरेण अणुअम्पिदम्हि देव्वेण । अज्जउत्तो क्खु एसो [हृदय, समाश्वसिहि समाश्वसिहि । परित्यक्तमत्सरेण अनुकम्पितास्मि दैवेन । आर्य्यपुत्रः खल्वेषः] ।

SAKUNTALA (*Within herself*)—Courage, courage, my heart. I am pitied by destiny that has renounced its spite. This is indeed my husband.

राजेति । 'त्वयि' त्वां प्रति 'प्रयुक्तम्' आचरितं 'क्रौर्य्यमपि' क्रूरतापि 'अनुकूलः' सरसः 'परिणामो' विपाको यस्य तथाविधं 'संवृत्तं' जातम् । कुत एवमित्याह—'यत्' यस्मात् 'अहम् आत्मानं' मत्स्वरूपं 'त्वया प्रत्यभिज्ञातं' संस्मृतं 'पश्यामि' । साधु ते शीलं यत् विमानितापि विरसासि न मे । पाठान्तरे—'अनुकूलपरिणामं संवृत्त'' सुतस्पर्शसुखलाभात् । 'तत्' तस्मात् 'इदानीमहमात्मानं त्वया प्रत्यभिज्ञातमिच्छामि' तेन पूर्णता स्यादानन्दस्य । ["यत्...पश्यामि" (रा-, वि-, म-)—"तत्...इच्छामि" (रा-, न्या-)] ।

शकुन्तलेति । 'परित्यक्तः' परिहृतः 'मत्सरो' मच्छुभद्वेषो येन तथाविधेन 'दैवेन' विधिना 'अनुकम्पितास्मि' । पुरा वामो यो हि विधिरार्य्यपुत्रेण मे सङ्गतिं न सेहे, स एवाद्य सदय इव तं समानीय मया योजितवानिति भावः ।

NOTES

1. पुत्र इति—This is elliptical for पुत्र इति आभाष्य ।
2. परित्यक्त &c.—मत्सर is अन्यशुभद्वेष spite परश्रीकातरता ।

राजा—प्रिये,

स्मृतिभिन्नमोहतमसो दिष्ट्या प्रमुखे स्थितासि मे सुमुखि ।
उपरागान्ते शशिनः समुपगता रोहिणी योगम् ॥

KING—My darling, O thou with a fine face, (*Or.*—with a gracious expression of face) through luck thou standest before me whose gloom of delusion is dispelled by recollection. Rohini has approached union after the eclipse of the moon.

शकुन्तला—जेदु जेदु अज्जउत्तो [जयतु जयत्वार्यपुत्रः] । (अर्द्धोक्ते वाष्पकण्ठो विरमति) ।

SAKUNTALA—Prosper, let my husband prosper. (*Stops with tears in her throat when half uttered*).

राजा—सुन्दरि,

वाष्पेण प्रतिषिद्धेऽपि जयशब्दे जितं मया ।
यत्ते दृष्टमसंस्कारपाटलोष्ठपुटं मुखम् ।

KING—O fair one, I have prospered though the pronouncement of prosperity was checked by tears, because I have seen your face with lips pale-red through absence of decoration (*Or*,—red though without decoration).

राजेति ।—अन्वयः—हे सुमुखि दिष्ट्या स्मृतिभिन्नमोहतमसो मे प्रमुखे स्थितासि । शशिनः उपरागान्ते रोहिणी योगं समुपगता । व्याख्या—हे 'सुमुखि' प्रसन्नवदने, शोभनानने वा 'दिष्ट्या' भाग्येन [अव्ययमेतत्] 'स्मृत्या' प्रतिप्राप्तेन स्मरणेन 'भिन्न' निरस्तं 'मोहरूपं तमः' अन्धकारः उपचारात् आवरणं यस्य तस्य 'मे प्रमुखे' अग्रे 'स्थितासि' तिष्ठसि । भाग्यमेव मे प्रसन्नं सत् त्वामानीय पुरो निदधे । कीदृशमेतत् तदाह—'शशिनः' चन्द्रस्य यः 'उपरागः' राहुग्रासः तस्य 'अन्ते' अवसाने 'रोहिणी' प्रिया शशिनः पत्नी 'योगं' भर्त्तृसन्निधिं 'समुपगता' सम्प्राप्ता । एतदपि कालान्तरे भाग्येनैव घटते ["शशिनः" (रा॰, त॰, न्या॰, म॰)—"शशिना" (वि॰)] ।

शकुन्तलेति । 'वाष्पः' दुःखजा ऊष्मा 'कण्ठे' यस्याः तादृशी सती [व्यधिकरणपदो बहुव्रीहिः । गड्वादिः] ।

राजेति। अन्वयः—जयशब्दे वाष्पेण प्रतिषिद्धेऽपि मया जितम्। यत् असंस्कारपाटलौष्ठपुटं ते मुखं दृष्टम्। व्याख्या—'जयस्य शब्दे' राजसन्निधौ उच्चारणीये "जयतु जयतु" इत्यादि शब्दे 'वाष्पेण' दुःखजेन ऊष्मणा 'प्रतिषिद्धेऽपि' निरुद्धेऽपि, स्पष्टमनुच्चारितेऽपि 'मया जितं' मया ऋद्धिः प्राप्ता [अकर्मकोऽयं जयतिः प्रकर्षलाभे वर्त्तते]। कुत एवमित्याह—'यत्' यस्मात् 'असंस्कारात्' संस्काराभावात् 'पाटलम्' ईषद्रक्तम्, यद्वा असंस्कारेऽपि 'पाटलं' रक्तं स्वभावरक्तम् 'ओष्ठयोः पुटं' यस्मिन् तत् 'ते' तव 'मुखं दृष्टम्'। भूयोऽपि त्वां द्रक्ष्यामि इत्याशा नासीत्, तथापि यत् त्वमद्य दृष्टा परा हि मा मे ऋद्धिः काष्ठा इति भावः।

NOTES

1. (a) प्रमुखे—प्रगतं मुखम्। प्रादितत्—। तस्मिन्। (b). सुमुखि—सुमुखी and सुमुखा are optional forms (See नियमक्षाममुखी, above). (c). उपराग &c.—उपरञ्जनम् or उपरज्यते अनेन इति उप+रञ्ज+घञ् भावे करणे वा=उपरागः। This is restricted to mean राहुग्रास (eclipse) perhaps because the sun and moon become copper-coloured (उपरञ्जन) at the time of eclipse. तस्य अन्तः। (d). शशिनः—This agrees better than शशिना with मे।

2. *Remark*—Raghava construes प्रमुखे स्थितासि इति यत् तत् रोहिणी योगं समुपगता। Hence he takes this as an instance of निदर्शना or निदर्शनम् (See under "शुद्धान्तदुर्लभ—", Act I), "आर्थाभ्यां यत्तद्भ्याम् एकवाक्यत्वात् सम्भवद्वस्तुसंबन्धा निदर्शना"—*Raghava.* The printed text of Raghava is here very un-reliable. I have made obvious corrections. If we take the first half as one complete sentence and the second half another, then it becomes an instance of प्रतिवस्तूपमा (see under "शुद्धान्तदुर्लभ—", Act I). दृष्टान्त is not recognised by Dandin as a separate अलङ्कार। Note however, the दृष्टान्त of later writers is "दृष्टान्तः पुनरेतेषां सर्वेषां प्रतिबिम्बनम्"। But in the present case t[illegible] is not reflected (प्रतिबिम्बन)। Hence we should not call it [illegible] दृष्टान्त।

3. (a). वाष्पकण्ठी—ङीष् is attached in the feminine by the Varttika "अङ्गगात्रकण्ठेभ्यश्च"। (b). विरमति—"व्याङ्परिभ्यो रमः" इति परस्मैपदम्।

4. असंस्कार—This gives a विभावना (See "इदं किला"—Act I) if पाटल is *bright* red. Others make their lips red by संस्कार yours are ruddy without संस्कार। It seems better to take पाटल as *pale* red. संस्कार makes it bright red.

बालः—अम्ब को एसो [अम्ब क एषः] ।

Boy—Mother, who is this ?

शकुन्तला—वच्छ दे भाअहेआइं पुच्छेहि [वत्स, ते भागधेयानि पृच्छ] । (रोदिति) ।

Sakuntala—My child, ask thy destiny. (*Weeps*).

राजा—

सुतनु हृदयात् प्रत्यादेशव्यलीकमपैतु ते Exp.
किमपि मनसः संमोहो मे तदा बलवानभूत् ।
प्रबलतमसामेवंप्रायाः शुभेषु हि वृत्तयः
स्रजमपि शिरस्यन्धः क्षिप्तां धुनोत्यहिशङ्कया ॥

(पादयोः पतति) ।

King—O fair one, let the grief of repudiation disappear from thy heart. Some-how a powerful delusion of my mind occurred at the time. Of those in whom Tamas is supreme, such indeed is generally the disposition towards blessings. Even a garland placed on his head the blind man tosses off taking it for a snake. (*Falls at her feet*).

शकुन्तलेति। 'ते' तव 'भागधेयानि' भाग्यानि 'पृच्छ'। "क एषः" इत्यस्य उत्तरं ते भाग्यमेव दातुं प्रभवति। प्रत्यादिष्टाहं कथं ब्रूयां क एषः। यदि सम्राट्सुत-श्चक्रवर्ती भवेः इति ते भाग्यं, तदा "अयं ते पिता" इति वक्तुं नाय्यम्। अथ ईदृशं ते भाग्यं यदिहैव वने वसन् तपश्चरिष्यसि तदा "धराधिपोऽयं दुष्यन्तः" इत्येवास्य पर्य्याप्तः परिचयः। इति मनसा प्रागवृत्तमालोचयन्ती दुःखदग्धा 'रोदिति'।

राजेति। इत्थं नवमिव प्रत्यादेशदुःखं भूयोऽप्यनुभवन्तीमेनां वीक्ष्याह। अन्वयः—हे

-सुतनु, ते हृदयात् प्रत्यादेशव्यलीकम् अपैतु। तदा किमपि मे बलवान् मनसः सम्मोहः अभूत्। शुभेषु प्रबलतमसाम् इत्तयः एवंप्राया हि। अन्धः शिरसि क्षिप्तां स्रजमपि अहिशङ्कया धुनोति। व्याख्या—हे 'सुतनु' चारुवपुः शकुन्तले ते' तव 'हृदयात्' मनसः 'प्रत्यादेशात्' मत्कृतात् प्रत्याख्यानात् जातं यत् 'व्यलीकं' दुःखं तत् 'अपैतु' दूरे यातु दुःखं त्यज इत्यनुनयः। 'तदा' प्रत्याख्यानकाले 'किमपि' [illegible] कारणात् 'मे बलवान्' गुरुः 'मनसः सम्मोहः' चेतोविस्मृतिः 'अभूत्' जा[illegible]। प्रत्याख्यानञ्च अज्ञानकृतम् इत्यनुनयानुकूला युक्तिः। 'शुभेषु' मङ्गलेषु विषय 'प्रबल' घोरं 'तमः' मोहः अन्धकारश्च येषां तेषां 'वृत्तयः' व्यापाराः 'प्रायेण' बाहुल्येन [“प्रायः[illegible] मृत्यौ तुल्यबाहुल्ययोरपि” इति विश्वः] 'एवम् हि' ईदृशी एव [तत्पुरुषपक्षे मयूर-व्यंसकादिः। अन्यथा सुपसुपा इति समासः। प्रायशब्दस्य पूर्वनिपातफलकोपसर्जनत्वा-भावात् परनिपातः]। इत्याकारा युक्तेः समर्थनम्। 'अन्धः' सदा तमसा अभिभूतः सन् 'शिरसि' निजमस्तके 'क्षिप्ताम्' अन्येन स्थापितां 'स्रजमपि' मालामपि शाल्मतमाम् 'अहेः' सर्पस्य 'शङ्कया' भ्रान्त्या 'धुनाति' कम्पयति, शिरसश्चालयति। इति समर्थकं प्रति दृष्टान्तः। [“राजा” (त॰, व्या॰)—“राजा शकुन्तलायाः पादयोः प्रणिपतन्” (रा॰, वि॰, म॰)]। “पादयोः पतति” इति प्रसादनम् [राघवादीनामेतन्नास्ति]।

NOTES

1. रोदिति—The pathos is very deep here (See Tika).

2. (a). सुतनु &c.—Sakuntala avoids replying to the boy's question and she weeps. The king sees what is passing in her mind (see Tika on भागधेयानि पृच्छ) and is anxious to appease her. (b). सुतनु—शोभना तनूः or तनुः यस्याः सुतनूः with ऊङ् attached in the feminine. Hence the vocative singular is सुतनु and not सुतनो। (c). प्रत्यादेश &c.—'व्यलीकं त्वप्रियेऽनृते' इत्यमरः। The renunciation still rankles in your heart, or you would not have wept and avoided the answer to the boy.

2 एवंप्रायाः—प्रायेण एवम् एवंप्रायाः; usually such, मयूरव्यंसकादि or सुप्सुपा। To account for the परनिपात of प्राय in such cases take the example प्रायेण जिताः शत्रवः। This gives जितप्रायाः शत्रवः। The compound will take different case-endings according to the

context. Thus जितप्राया: शत्रव: प्रणिपेतुः, जितप्रायान् शत्रून् अगृह्णीत्, जितप्रायै: शत्रुभि: ऊचे ; &c. If we had not compounded, we should have said प्रायेण जिता: शत्रव: प्रणिपेतुः, प्रायेण जितान् शत्रून् अगृह्णीत्, प्रायेण जितै: शत्रुभि: ऊचे &c. In these प्रायेण does not change its विभक्ति, it is एकविभक्ति। Its पूर्वनिपात is prohibited by the rule "एकविभक्ति चापूर्वनिपाते"।

4. पादयो: पतति—Raghava &c. make the king fall at her feet before the speech. But the repetition उट्ठेदु उट्ठेदु shows how shocked Sakuntala was at this move of the king. It is therefore impossible for her to wait for him to finish his speech lying prostrate at her feet. The king fell at her feet after uttering the verse and was *immediately* raised by Sakuntala.

शकुन्तला—उट्ठेदु उट्ठेदु अज्जउत्तो। णूणं मे सुअरिअप्पडिबन्धअं पुरा किदं तेसु दिअहेसु परिणाममुहं आसि। जेण साणुक्कोसो वि अज्जउत्तो मइ विरसो संवुत्तो [उत्तिष्ठतु आर्यपुत्र:। नूनं मे सुचरितप्रतिबन्धकं पुरा कृतं तेषु दिवसेषु परिणाममुखम् आसीत्। येन सानुक्रोशोऽपि आर्यपुत्रो मयि विरस: संवृत्त:]। (राजोत्तिष्ठति)।

SAKUNTALA—Rise, let my husband rise. Surely some thing formerly done by me obstructing my good work, was by those days about to bear its fruit (mature), through which my husband, though kindly disposed towards me, became pitiless.

(The king rises).

शकुन्तलेति। 'मे' मया 'पुरा कृतम्' अनुष्ठितं 'सुचरितस्य' पुण्यकर्मण: 'प्रतिबन्धकं' प्रतिरोधकं, पुण्यफलरोधकमित्यर्थ: 'तेषु दिवसेषु' प्रत्याख्यानवेलासु 'परिणामे' परिणती 'मुख'' यस्य तादृशं, पाकाभिमुखमिति यावत् 'आसीत्'। 'येन' हेतुना 'सानुक्रोशोऽपि' सदयोऽपि 'आर्यपुत्र: मयि विगतो रसो' राग:, अनुराग इत्यर्थ: ["शृङ्गारादौ विषे वीर्य्ये गुणे रागे द्रवे रस:" इति कोष:] यस्य तथाविध:, निरनुराग:

इति यावत् 'संवृत्तः' जातः। पुरा पुण्यमाचरितं मया तेन त्वया सङ्गता। पापञ्चापि कृतं यस्य फलं प्रत्याख्यानवेलायां विपक्कमासीत्। तेन पुण्यफलं निरुद्धम् अहञ्च प्रत्याख्याता। इत्थं ममैव पापस्यायं विपाकः न ते दोषः।

शकुन्तला—अह कहं अज्जउत्तेन सुमरिदो दुक्खभाई अअं जणो [अथ कथमार्य्यपुत्रेण स्मृतो दुःखभागी अयं जनः]।

SAKUNTALA—How was this miserable person remembered by my husband ?

राजा—उद्धृतविषादशल्यः कथयिष्यामि।

मोहान्मया सतनु पूर्वमुपेक्षितस्ते
यो वाष्पविन्दुरधरं परिबाधमानः।
तं तावदाकुटिलपक्ष्मविलग्नमद्य
कान्ते प्रमृज्य विगतानुशयो भवामि॥

(यथोक्तमनुतिष्ठति)।

KING—With the dart of grief extracted, I will tell you. O fine-framed one, having wiped off the tear-drop sticking in your slightly curved eye-lashes to-day—that tear-drop which, through delusion, was formerly disregarded by me paining your lower lip, O my darling, I shall indeed [*Or*—I shall first] be free from remorse. *(Does as said)*.

'अथ' इति प्रश्ने। 'दुःखं भजते' प्राप्नोति यस्तादृशः 'अयं जनः' [इत्यात्मनिर्देशः] अहमित्यर्थः 'कथं स्मृतः'।

राजेति। 'उद्धृतम्' उत्खातं 'विषादरूपं शल्यं' शङ्कुः येन तादृशो भूत्वा 'कथयिष्यामि' कथं स्मृत इति। शल्योद्धरणप्रकारं वर्णयति। अन्वयः—हे सुतनु कान्ते यो वाष्पविन्दुः पूर्वं ते अधरं परिबाधमानः मया मोहात् उपेक्षितः तमद्य आकुटिलपक्ष्मविलग्नं प्रमृज्य विगतानुशयो भवामि तावत्। व्याख्या—हे 'सुतनु' वरगात्रि 'कान्ते' प्रिये शकुन्तले 'यो वाष्पस्य' नेत्रजलस्य 'विन्दुः पूर्वं' प्रत्याख्यानकाले 'ते' तव 'अध'

[illegible] लम्बमान:’ [illegible], नेत्रयोर्निर्गत्य, कपोलौ अतिक्रम्य, अधरे न केवलं स्थित:, किन्तु एकैकश इयद्दूरमागत्य उपचयेन चिरावस्थानेन च अधरं पीड़यन्नपि ‘मया मोहात्’ चित्तवैकल्यात् ‘उपेक्षित:’ औदासीन्येन दृष्ट:, अतएव यो विषादशल्यभूतो मे हृदयमनुदिनं दारयति ‘तं’ तथाविधं वाष्पम् ‘अद्य आकुटिलेषु’ ईषद्वक्रेषु ‘पक्ष्मसु’ नेत्रलोमसु ‘विलग्न’’ स्थितं, न नु तत: प्रसृतं ‘प्रमृज्य’ शोधयित्वा ‘विगत: अनुशय:’ पश्चात्तापो यस्य तथाविधो ‘भवामि तावत्’ भवाम्येव [तावदवधारणे। तच्च द्विधा नेयम्। वाष्पं प्रमृज्य एव नान्यथा। अथवा भवाम्येव तत: कथयामि]। पूर्वं चिरोपेक्षया शल्यवेध:, अद्य दृष्टे एव मृष्टे शल्योद्धार:, इति तात्पर्य्यम्। [“वाष्पविन्दु:” (रा-, त-, न्या-, म-)—“बहुविन्दु:” (वि-)॥ “कान्ते” (त-, न्या-)—“वाष्पम्” (रा-, वि-, म-)]॥ ‘यथोक्तं’ वाष्पविन्दुप्रमार्जनम् इत्यर्थ:।

NOTES

1. उद्धृत &c.—The विषाद here is the same as the अनुशय in the verse following.

2. *Readings*—(a). वाष्पविन्दु:—बहुविन्दु is rare and has no special recommendation. We have retained the more common reading. (b). कान्ते—Here वाष्पम् is a repetition and should be avoided.

शकुन्तला (नाममुद्रां दृष्ट्वा)—अज्जउत्त, एदं तं अङ्गुलीअअं [आर्य्यपुत्र एतत्तदङ्गुलीयकम्]।

SAKUNTALA (*Seeing the signet ring*)—My husband, this is that ring.

राजा—अस्मादङ्गुलीयोपलम्भात् खलु स्मृतिरुपलब्धा।

KING—From the recovery of this ring was indeed memory recovered.

शकुन्तला—विसमं किदं णेण जं तदा अज्जउत्तस्स पच्चाअणकाले दुल्लहं आसि [विषमं कृतमनेन यत् तदा आर्य्यपुत्रस्य प्रत्यायनकाले दुर्लभमासीत्]।

SAKUNTALA—Impropriety was enacted by it, for it became scarce at the time of convincing my husband.

राजा—तेन हि ऋतुसमवायचिह्नं प्रतिपद्यतां लता कुसुमम् ।

KING—Then let the creeper do bear the flower as a token (witness) of its union with the season.

राजेति । 'अङ्गुलीयस्य उपलम्भः' प्राप्तिः तस्मात् 'खलु' तत एव 'स्मृतिः' स्मरणम् 'उपलब्धा' प्राप्ता ।

शकुन्तलेति । 'अनेन' अङ्गुरीयकेण 'विषमं' विसदृशं 'कृतम्' । 'यत्' यस्मात् 'तदा प्रत्यायनस्य' प्रत्ययोत्पादनस्य 'काले दुर्लभमासीत्' ।

राजेति । 'तेन' तस्मात्, यदि एतेनैव प्रत्यायनं ततः इत्यर्थः 'लता' लतेव तन्वी त्वम् 'ऋतुना' वसन्तेन, मया इति गूढम्, यः 'समवायः' समागमः, पुनः समागम इति भावः तस्य 'चिह्नं' सूचकम् इदं 'कुसुमम्' अङ्गुरीयकमित्याशयः 'प्रतिपद्यतां' गृह्णातु ! इत्यङ्गुलीयकं भूयोऽपि दातुमिच्छति ।

NOTES

1. नामसुद्रां दृष्ट्वा—She notices it while the king wipes off the tear from her eyes.

2. तेन हि—The flower in the creeper bears testimony to the advent of the season ; so let the ring be witness of our re-union. The flower is in the creeper, let the ring be with you.

शकुन्तला—ण से विस्ससिमि । अज्जउत्तो एव्व णं धारेदु [नास्य विश्वसिमि । आर्य्यपुत्र एव एतत् धारयतु] ।

SAKUNTALA—I do not trust it. Let my husband do wear it.

(ततः प्रविशति मातलिः) । मातलिः—दिष्ट्या धर्मपत्नी-समागमेन पुत्रमुखदर्शनेन च आयुष्मान् वर्द्धते ।

(*Then enters Matali*) MATALI—O joy, the long-lived one thrives by union with his lawful wife and by seeing his son's face.

राजा—अभूत् सम्पादितस्वादुफलो मे मनोरथः। मातले, न खलु विदितोऽयमाखण्डलेन वृत्तान्तः स्यात्।

KING—My desire appears with a sweet fruit developed. Matali, I guess this event is not known by Indra.

मातलिः (सस्मितम्)—किमीश्वराणां परोक्षम्। एह्यायुष्मन्, भगवान् मारीचस्ते दर्शनं वितरति।

MATALI (*Smiling*)—What is out of sight of the omnipotent? Come, O Long-lived one, Maricha the Perfect, grants you a visit.

शकुन्तलेति। 'अस्य' अङ्गुलीयकस्य [सम्बन्धमात्रविवक्षया षष्ठी अन्यथा सप्तमी स्यात्] 'न विश्वसिमि' पूर्वं प्रत्यायनकाले आत्मनः असान्निध्येन विषमाचरणादिति भावः।

मातलिरिति। 'दिष्ट्या' इति हर्षे अव्ययम् ["दिष्ट्या हर्षे मङ्गले च" इति मेदिनी] अहो आनन्द 'आयुष्मान् धर्मपत्न्या' यः 'समागमः' तेन 'पुत्रमुखस्य' यत् 'दर्शनं' तेन च 'वर्द्धते'। भवद्दृद्ध्या हर्षो मे इति भावः।

राजेति। 'मे मनोरथः सम्पादितं' विधिना विपाचितं 'स्वादु' मधुरं 'फलं' यस्य तादृशः 'अभूत्'। 'अयं वृत्तान्तः' पुत्रपत्नीसमागमो मे इत्यर्थः 'आखण्डलेन' इन्द्रेण 'न खलु' [खलु वाक्यालङ्कारे] 'विदितः स्यात्' [सम्भावनायां लिङ्। विदित इति यथाप्राप्तं भूते क्तः।. तेन आखण्डलेन इति न षष्ठी]

मातलिरिति। देवेन्द्रेऽपि राज्ञा अज्ञानारोपात् 'स्मित'कृत्वा आह—'ईश्वराणां' प्रभूणां 'परोक्षम्' अगोचरं 'किं' वस्तु अस्ति, न किमपि। विज्ञातमेवं तदिन्द्रस्य।

NOTES

1. धर्मपत्नी &c.—धर्मार्था पत्नी धर्मपत्नी। शाकपार्थिवादि। तया समागमः। पत्नी in connection with धर्म is more appropriate than भार्या, कान्ता &c. because पत्नी implies यज्ञसंयोग by the rule "पत्युर्नो यज्ञसंयोगे" (P. 4-1-33).

2. अभूत्—भूतसामान्ये लुङ्।

3. सस्मितम्—Smiles at the king's simplicity.
4. वितरति—वर्त्तमानसामीप्ये भविष्यति लट्।

राजा—शकुन्तले, अवलम्ब्यतां पुत्रः। त्वां पुरस्कृत्य भगवन्तं द्रष्टुमिच्छामि।

KING—Sakuntala, let the boy be supported by you. I wish to see the Perfect One having placed thee in front.

शकुन्तला—हिरिआमि अज्जउत्तेन सह गुरुसमीवं गन्तुं [जिह्रेमि आर्य्यपुत्रेण सह गुरुसमीपं गन्तुम्]।

SAKUNTALA—I feel shame (bashful) to go with my husband, near my superiors.

राजा—अप्याचरितव्यमभ्युदयकालेषु। एह्येहि।

KING—This may be done on auspicious occasions. Come, Come.

(सर्वे परिक्रामन्ति। ततः प्रविशति अदित्या सार्द्धमासनस्थो मारीचः)। मारीचः (राजानमवलोक्य)—दाक्षायणि,

पुत्रस्य ते रणशिरस्ययमग्रयायी
दुष्यन्त इत्यभिहितो भुवनस्य भर्त्ता।
चापेन यस्य विनिवर्त्तितकर्म जातं
तत् कोटिमत् कुलिशमाभरणं मघोनः॥

(*All go round the stage. Then enters Maricha with Aditi seated*) MARICHA (*Seeing the king*)—Dakshayani, this is the one that marches in front at the head of thy son's battles, called as Dushyanta, the sustainer of the world; by whose bow, with the work fully performed, that keen-edged thunderbolt has become a piece of jewellery to Indra.

शकुन्तलेति। 'गुरुसमीपं गन्तुं जिह्रेमि' लज्जे। आर्य्यपुत्रसाहचर्य्यात् लज्जा

[गन्तुम् इति "कर्त्तरि कृत्" इति पक्षे 'गन्ता' अहं 'जिह्रेमि' इत्यर्थः। "अव्ययकृतो भावे" इति पक्षे तु 'गन्तु' गमनं, तस्मात् 'जिह्रेमि' इति]।

राजेति। 'अभ्युदयस्य' सम्बन्धि: ये 'काला:' क्षणाः तेषु 'आचरितव्यमपि' कर्त्तव्यमपि। आभ्युदयिकेषु गुरुसाक्षात्कारे यद्येष भर्त्रा सह वा यायात्, तत्र न दोषः [अपि कामचारकरणे]। यद्वा—'अभ्युदयकालेषु आचरितव्यमपि' आचारोऽपि अनुसर्त्तव्यः। भर्त्रा सह गुरुसाक्षात्कार आचारः। तमाचारं प्रतिपद्यस्व [अपि समुच्चये]।

मारीच इति। अन्वयः—अयं दुष्यन्त इत्यभिहितः भुवनस्य भर्त्ता ते पुत्रस्य रणशिरसि अग्रयायी। यस्य चापेन विनिवर्त्तितकर्म (सत्) कोटिमत् तत् कुलिशं मघोनः आभरणं जातम्। व्याख्या—'अयम्' एष दृश्यमानो जनः 'दुष्यन्त इति अभिहितः' ख्यातः, दुष्यन्त इति नाम्ना लोके प्रसिद्धः 'भुवनस्य' भुवः 'भर्त्ता' पालकः 'ते' तव 'पुत्रस्य' इन्द्रस्य ये 'रणाः' समराः तेषां 'शिरसि' समरमूर्द्धनि 'अग्रयायी' पुरोगामी। साक्षात् भुवो भर्त्ता, परोक्षतो दिवोऽपि इति भावः। न ह्यस्य अग्रेगमनमात्रं समरेषु, किन्तु स एवायं 'यस्य चापेन' धनुषा 'विनिवर्त्तितं' सुसम्पादितं 'कर्म' शत्रुघातनरूपं यस्य तथाविधं सत् 'कोटिमत्' प्रशस्यकोटियुक्तं 'तत्' प्रसिद्धं 'कुलिशं' वज्रं 'मघोनः' इन्द्रस्य 'आभरणं' भूषणमात्रं 'जातम्'। सत्यं कोटिमता वज्रेण इन्द्रस्य भूषणमात्रं जातम्। शत्रुपातस्तु अस्य चापेन क्रियते इति भावः।

NOTES

1. गन्तुं जिह्रेमि—The तुमुन् may be explained in two ways. In the अष्टाध्यायी it is not specifically stated in what वाच्य it is attached. It is natural to say then that the general rule कर्त्तरि कृत् applies, not being barred by special injuctions. This requires तुमुन् to be in the कर्त्तृवाच्य। गन्तुम् then means गन्ता। The Bhashyakara simplifies the matter by laying down that a कृत् producing an अव्यय word is to be in the भाववाच्य। गन्तुम् then means गमनम्। गन्तुं जिह्रेमि = गमनात् जिह्रेमि।

2. अपि आचरितव्यम् &c.—(a). अपि implies option कामचार। (b). आचरितव्यम् has एतत् (*i. e.*, भर्त्रा सह गुरुसाक्षात्कारः) for its कर्म

understood. In the alternative exposition (See Tika) आचरि-तव्यम् = आचारेण वर्त्तितव्यम्। यथा आचारः तथा कर्त्तव्यम्। (c). एहि एहि—The repetition implies *impatience.*

3. (a). दाक्षायणि—दक्षस्य अपत्यं स्त्री इति दक्ष+फक् स्त्रियाम् = दाक्षायणी। तत्संबुद्धौ। अदिति was Daksha's daughter. (b). ते—Yours, hence you should feel interested in him. (c). तत्—*That* thunder-bolt, *i. e.*, the one which in days of yore had done such service. प्रसिद्धार्थत्वात् यच्छब्दोपादानं नापेक्षते। (d). मघोनः—See मघवतः, *Ante.*

अदितिः—सम्भावणीआणुभावा स आकिदी [सम्भावनीयानुभावा अस्य आकृतिः]।

Aditi—His form is one from which prowess is capable of being inferred.

मातलिः—आयुष्मन् एतौ पुत्रप्रीतिपिशुनेन चक्षुषा दिवौकसां पितरावायुष्मन्तमवलोकयतः। तदुपसर्प।

Matali—O long-lived one, these parents of the denizens of heaven are beholding you with eyes that speak of affection as towards a son. So approach.

राजा—मातले,

प्राहुर्द्वादशधा स्थितस्य मुनयो यत्तेजसः कारणं Allusion

भर्त्तारं भुवनत्रयस्य सुषुवे यद्यज्ञभागेश्वरम्।

यस्मिन्नात्मभु (भ) वः परोऽपि पुरुषश्चक्रे भवायास्पदं

द्वन्द्वं दक्षमरीचिसम्भवमिदं तत् स्रष्टुरेकान्तरम्॥

King—Matali, with Daksha and Marichi for its origin, removed one step from the creator, is this the pair which sages call the source of the energy that exists in twelve forms,—(the pair) which brought forth the sustainer of the three worlds, the disposer of the shares at sacrifices,—(the pair) in-

which the Soul higher than even the self-existent [*Or*—even the self-born Soul Supreme] took up abode for birth ?

अदितिरिति। 'अस्य आकृतिः' 'शरीरं सम्भावनीयः' अनुमेयः 'अनुभावः' प्रभावः सामर्थ्यं, दानवजययोग्यता इत्यर्थः यस्याः तादृशी। देहं दृष्ट्वा एव सामर्थ्यमस्य अनुमीयते इति भावः।

मातलिरिति। 'एतौ दिवौकसां' देवानां 'पितरौ' अदितिकश्यपौ 'पुत्रे' या 'प्रीतिः' तस्या यत् 'पिशुनं' सूचकम् ["पिशुनौ खलसूचकौ" इत्यमरः] तेन 'चक्षुषा' [जातावेकवचनम्] 'आयुष्मन्तं' त्वाम् 'अवलोकयतः'। इन्द्रतुल्योऽसि इत्यर्थः। प्रीतौ भगवन्तौ त्वयि 'तत्' तस्मात् 'उपसर्प' समीपे गच्छ।

राजेति। अन्वयः—हे मातले इदं तत् दक्षमरीचिसम्भवं स्रष्टुरेकान्तरं द्वन्द्वं यत् मुनयो द्वादशधा स्थितस्य तेजसः कारणं प्राहुः, यत् भुवनत्रयस्य भर्त्तारं यज्ञभागेश्वरं सुषुवे, यस्मिन् चात्मभवः परः पुरुषोऽपि भवाय आस्पदं चक्रे। व्याख्या—हे 'मातले' ननु पृच्छामि 'इदं' दृश्यमानं 'तत् दक्षश्च मरीचिश्च सम्भवः' उत्पत्तिस्थानम् [अपादाने अप्] यस्य अतएव 'स्रष्टुः' ब्रह्मणः 'एकम्' एकमात्रम् 'अन्तरम्' अवकाशो यस्य तत्, एकपुरुषव्यवहितमित्यर्थः 'द्वन्द्वं' मिथुनं किम्। इदं किं तत् द्वन्द्वम् इति काकुमुखेन प्रश्नः। कतमत् द्वन्द्वमित्याह—'यत् द्वन्द्वं' 'मुनयः' वेदनिष्णाता महर्षयो 'द्वादशधा' द्वादशसु मासेषु द्वादशात्मना 'स्थितस्य तेजसः' आदित्यस्य इत्यर्थः 'कारणं' जनकं 'प्राहुः' वदन्ति। पुनः कतमत् द्वन्द्वम्—'यत्' द्वन्द्वं 'भुवनानां त्रयस्य' त्रिभुवनस्य 'भर्त्तारं' पालकं 'यज्ञेषु' ये 'भागाः' तेषाम् 'ईश्वरं' प्राधान्येन ग्रहणात् स्वामिनम्। यद्वा—यज्ञभागाः सन्ति येषां तेषां देवानामित्यर्थः [मत्वर्थीयोऽच्] 'ईश्वरं' स्वामिनम् इन्द्रमिति यावत् 'सुषुवे' जनयामास। पुनश्च कतमत् द्वन्द्वम्—'यस्मिन्' द्वन्द्वे 'आत्मनो भवो' जन्म यस्य तादृशः, स्वयं जातः, अज इत्यर्थः 'परः' परमः सर्वातिशायी 'पुरुषोऽपि' पुरुषोत्तमो विष्णुरपि 'भवाय' जन्मने 'आस्पदं' स्थानं 'चक्रे' यत् भवाय समुपस्थित इत्यर्थः। 'आत्मभुव' इति पाठे 'आत्मभुवो' ब्रह्मणोऽपि 'परः' अधिकः श्रीविष्णुरित्यर्थः [वामनावतारे बलेश्छलनार्थं कश्यपाददितौ जातो हरिः]। ["आत्मभवः" (रा-, वि-, म-)—"आत्मभुवः" (त-, न्या-)]।

NOTES

1. (a). द्वादशधा—द्वादशसु भागेषु इति द्वादश + धाच्। Refers to the sun. The sun changes its character apparently in different months. The summer-sun is supposed not to be the same as the mid-winter-sun. This leads to the assumption of the existence of twelve suns. (b). यज्ञ &c.—यज्ञस्य भागः यज्ञभागः। स अस्ति एषाम् इति यज्ञभाग + अच् मत्वर्थे = यज्ञभागाः those who enjoy a share in sacrifices, *i. e.*, the gods. तेषाम् ईश्वरः। Also see Tika.

2. (a). आत्मभवः—Qual. पुरुषः। Refers to Vishnu. आत्मभुवः is पञ्चम्यन्त। आत्मभूः is Brahman. "ब्रह्मात्मभूः सुरज्येष्ठः" इत्यमरः। (b). अपि—Even the आत्मभवः (self born) went to him for the sake of भव (birth)—इति परं हि विस्मयान्तविरोधं स्थानम्। (c). भवाय—भू + अच् कर्तरि or घ करणे = भवः birth. तस्मै। तादर्थ्ये चतुर्थी। (d). आस्पदम्—आ समन्तात् पद्यते अस्मिन् इति आ + पद + घ अधिकरणे = आस्पदम् residence, abode, प्रतिष्ठा। The सुट् comes in by निपातन in the rule "आस्पदं प्रतिष्ठायाम्"। (e). द्वन्द्वम्—द्वयम् अभिव्यज्यते इति द्वि द्वि = द्वन्द्वम् by निपातन in the rule "द्वन्द्वं रहस्य-मर्यादावचन-व्युत्क्रमण-यज्ञपात्रप्रयोग-अभिव्यक्तिषु" (P. 8-1-15). "द्विशब्दस्य द्विर्वचनं पूर्वपदस्य अम्भावः, अत्वञ्चोत्तरपदस्य निपात्यते"—*Vritti.* (f). स्रष्टुः—From the creator. बौद्धमपायमाश्रित्य पञ्चमी। (g). एकान्तरम्—Each removed *one* step. Thus—(1) Brahman, Marichi, Kasyapa. (2) Brahman, Daksha, Aditi.

3. *Remark*—आत्मभवः seems the better reading. It brings out the विरोधाभास more prominently. Thus—It is *absurd* to speak of भव of one who is आत्मभवः (आत्मभवो भव इति विरोधः)। But the majesty of the Lord Supreme (परः पुरुषः) is incomprehensible. Everything is possible with Him (परोऽसौ पुरुषः अचिन्त्यमहिमा महिम्नैव आस्पदं चक्रे इति विरोधपरिहारः)। Hence the अलङ्कार is विरोधाभासः।

मातलिः—अथ किम्।

MATALI—What else (yes) ?

राजा (प्रणिपत्य)—उभाभ्यामपि वासवनियोज्यो दुष्यन्तः प्रणमति।

KING (*Prostrating himself*)—Dushyanta, Indra's servant, salutes both of you.

मारीचः—वत्स, चिरं जीव। पृथिवीं पालय।

MARICHA—My son, live long. Protect the earth.

अदितिः—वच्छ, अप्पडिरहो होहि [वत्स, अप्रतिरथो भव]।

ADITI—My son, be you without a rival car.

(शकुन्तला पुत्रसहिता पादयोः पतति)।

(*Sakuntala with her child prostrates herself at their feet*).

मारीचः—वत्से,

आखण्डलसमो भर्त्ता जयन्तप्रतिमः सुतः।
आशीरन्या न ते योग्या पौलोमीसदृशी भव॥

MARICHA—My child, thy husband is Indra's equal, thy son resembles Jayanta. No other benediction is suitable to you; be you like Paulomi (Sachi).

अदितिः—जादे, भत्तुणो बहुमदा होहि। अअञ्च दीहाऊ वच्छओ उहअकुलणन्दणो होदु। उवविसह [जाते, भर्त्तुर्बहुमता भव। अयञ्च दीर्घायुर्वत्सक उभयकुलनन्दनो भवतु। उपविशतम्]।

ADITI—My child, mayest thou be much esteemed by thy husband; and may this little darling be long-lived and the delighter of both (paternal and maternal) families. Sit down.

राजेति। 'नियोज्यः' भृत्यः [शक्यार्थे ण्यति कुत्वाभावः]। 'वासवस्य' इन्द्रस्य 'नियोज्यः'। 'उभाभ्याम्' उभे 'अपि' अनुकूलयितु' 'प्रणमति' इत्यर्थः ["क्रियार्थोपपदस्य—" इति चतुर्थी]।

अदितिरिति। प्रतिकूलो रथः 'प्रतिरथः' उपचारात् प्रतिद्वन्द्वी। 'अविद्यमानः' प्रतिरथो यस्य तादृशो 'भव'।

मारीच इति। अन्वयः—भर्त्ता आखण्डलसमः, सुतः जयन्तप्रतिमः, वत्से पौलमी-सदृशी भव, अन्या आशीः ते योग्या न। व्याख्या—'भर्त्ता' पतिः दुष्यन्तः 'आखण्डलेन' इन्द्रेण 'समः' तुल्यः। तव 'सुतः' पुत्रः सर्वदमनः 'जयन्तेन' इन्द्रपुत्रेण तुल्यः 'जयन्त-प्रतिमः' [नित्यसमासः। यद्वा—प्रतिमाति इति प्रतिमः सदृशः। जयन्तस्य प्रतिमः]। अतएव हे 'वत्से' पौलोम्या' इन्द्रपत्न्या शच्या 'सदृशी' तुल्या अविधवा इत्यर्थः 'भव'। भर्त्तुः सुतस्य च तथाविधत्वात् 'अन्या आशीः ते योग्या' अनुरूपा 'न'। ["पौलोमी-सदृशी" (रा-, वि-, म-)—"पौलोमीमङ्गला" (त-, ब्रा-)]।

अदितिरिति। 'भर्त्तुः बहुमता' पूजिता 'भव'। 'अयञ्च वत्सकः' [अन्यार्थे कन्] 'दीर्घमायुः' यस्य तथाविधः सन् 'उभयोः' द्वयोरपि पैतृकस्य मातृकस्य च 'कुलयोः' वंशयोः 'नन्दनः' प्रीतिप्रदः 'भवतु'।

NOTES

1. उभाभ्याम्—कर्मणि चतुर्थी (See Tika). Or treating प्रणमति as अविवक्षितकर्मा we get सम्प्रदाने चतुर्थी by the Varttika "क्रियाग्रहणमपि कर्त्तव्यम्"।

2. (a). जयन्तप्रतिमः—Amara has "स्युरुत्तरपदे त्वमी। निभसङ्काशनीकाशप्रतीकाशोपमादयः॥" By आदि several other words are included. If प्रतिम is one of these, then it can mean *equal* only when final in a compound (उत्तरपद)। So the वाक्य—जयन्तस्य प्रतिमः does not mean *Jayanta's equal*. The वाक्य thus should not contain प्रतिम, *i. e.*, the समास is obligatory (नित्यसमास)। If however प्रतिम is *not* included, or if some derivation may be given to make it mean सम, then of course an ordinary समास becomes possible (See Tika). (b). पौलोमी &c.—पौलोमी is पुलोमजा, *i. e.*, शची, Indra's wife. "पुलोमजा शचीन्द्राणी" इत्यमरः। पौलोम्या सदृशी Sachi's equal. This implies अवैधव्य which the sage thought was the best benediction he could pronounce.

3. *Reading*. The Beng. reading पौलोमीमङ्गला means the same. मङ्गलम् is *an auspicious thing*. पौलोम्या मङ्गलम् the auspi-

cious luck of Paulomi, *i. e.*, अवैधव्यम्। तत् अस्ति अस्याः इति पौलोमी-मङ्गल + अच् मत्वर्थे स्त्रियाम्।

4. बहुमता—As a woman, she prizes the husband's favour more than अवैधव्य। Besides, her benediction seems to have reference to Sakuntala's repudiation by Dushyanta. Be thou the husband's favourite so that repudiation may not occur again.

(सर्वे प्रजापतिमभितः उपविशन्ति)।

(*All sit down round the Progenitor).*

मारीचः (एकैकं निर्दिशन्)—

दिष्ट्या शकुन्तला साध्वी सदपत्यमिदं भवान्।
श्रद्धा वित्तं विधिश्चेति त्रितयं तत् समागतम्॥

Maricha (*Pointing to each one at a time*)—How auspicious! Virtuous Sakuntala, this noble child, and thyself—indeed the celebrated triad, *viz.*, Faith, Wealth, Action—have come together!

राजा—भगवन्, प्रागभिप्रेतसिद्धिः पश्चाद्दर्शनमित्यपूर्वः खलु वोऽनुग्रहः। कुतः—

उदेति पूर्वं कुसुमं ततः फलं घनोदयः प्राक् तदनन्तरं पयः।
निमित्तनैमित्तिकयोरयं क्रमस्तव प्रसादस्य पुरस्तु सम्पदः॥

King—O Perfect One, first the fulfilment of wish afterwards your sight! Thus thy favour is strange indeed! For, flower appears first, then the fruit. The rise of clouds happens first, after that the shower. This is the order of the cause and the caused. But, of your favour, the prosperity is in advance.

मातलिः—एवं विधातारः प्रसीदन्ति।

Matali—Thus do ordainers show favour.

'प्रजापतिं' कश्यपम् 'अभितः' तं परिवार्य्य।

मारीच इति। 'एकम् एकम्' इति वीप्सा [द्विर्वचनम्। बहुव्रीहिवद्भावः] 'निर्द्दिशन्' अङ्गुल्या दर्शयन्। अन्वयः—दिष्ट्या साध्वी शकुन्तला, इदं सदपत्यं, भवान्—श्रद्धा वित्तं विधिः इति तत् च वितयं—समागतम्। व्याख्या—'दिष्ट्या' मङ्गले। अहो मङ्गलम्। यद्वा—'दिष्ट्या' हर्षे। अहो आनन्दः। 'साध्वी' पतिव्रता 'शकुन्तला, इदं सत्' साधु 'अपत्य'' सन्ततिः इत्यर्थः, 'भवान्' त्वं राजोत्तमो दुष्यन्तः— 'श्रद्धा' शास्त्रोक्ती भक्तिः, 'वित्तं' शास्त्रीयक्रियायाः द्रव्यसंग्रहोचितं धनं, 'विधिः' शास्त्रीयकर्मानुष्ठानम् 'इति तत् च' तदेव प्रसिद्धं 'वितयं' त्र्यवयवं वस्तु 'समागतम्' एकत्र मिलितम् [भाविनमवयवसमागममुद्दिश्य तयप्रत्ययः]। मङ्गलमेतत् [आनन्दो मे इति वा] यत् श्रद्धारूपा शकुन्तला, वित्तरूपः सर्वदमनः, विधिरूपो भवान् इति वयमद्य युक्तम्।

राजेति। हे 'भगवन्' एष समागमो भवदनुग्रहस्य फलम्। अनुग्रहश्च मे पुण्येन स्यात्। पुण्यञ्च भवद्दर्शनजमेव मदभिमतफलप्रसवे समर्थम्। किन्तु अद्य दर्शनात् 'प्राक् अभिप्रेतस्य' अभिलषितस्य फलस्य 'सिद्धिः' निष्पत्तिर्जाता। 'पश्चात् दर्शनं' जातम् 'इति अपूर्वः' नूतनो 'वः अनुग्रहः'। प्राक् फलं पश्चात् दर्शनम् इत्यपूर्वता। 'कुतः' इति चेत् शृणु—अन्वयः—पूर्वं कुसुमम् उदेति ततः फलम्। प्राक् घनोदयः तदनन्तरं पयः। अयं निमित्तनैमित्तिकयोः क्रमः। तव प्रसादस्य तु पुरः सम्पदः। व्याख्या—'पूर्वं'' प्रथमं 'कुसुममुदेति' पुष्पमाविर्भवति 'ततः' तदनन्तरं तत्कर्म 'फलं' दृश्यते। 'प्राक्' आदौ 'घनोदयः' मेघसञ्चा 'तदनन्तरं' ततः परं तत्कृतं 'पयः' जलम्। 'अयम्' एष 'निमित्तस्य' कारणस्य निमित्तेन संसृष्टस्य 'नैमित्तिकस्य' कार्य्यस्य च 'क्रमः' नियमः आनुपूर्वी। प्रथमं कारणं पश्चात् कार्य्यम् इत्येव कार्य्यकारणयोः क्रमः। भवतु, किं तेन इत्याह—'तव प्रसादस्य तु' भवतोऽनुग्रहस्य पुनः 'पुरः' पूर्वं तत्कार्य्यं 'सम्पदः' प्रसादपात्रस्य श्रियः। प्रसन्नो भविष्यति भवानमुष्मिन् इति जानत्यः सम्पदः प्रागेव प्रसादपात्रमुपतिष्ठन्ते। यद्वा—मयि सानुग्रहो भगवान् इति ज्ञानात् पूर्वमेव अनुगृहीतस्य सम्पदः सम्पद्यन्ते इति भावः।

मातलिरिति। 'विधातारः' कर्त्तारः ईशाः इत्यर्थः 'एवम्' अनेन विधिना 'प्रसीदन्ति' अनुगृह्णन्ति। भवतायं लौकिकः कार्य्यकारणक्रम उक्तः। अलौकिके तु क्रमो

भिन्न एव। इच्छाविहय ईशा यद्देवेच्छन्ति तत्क्षणं तदैव सम्पद्यते। इह भगवानिच्छति दुष्यन्तस्य पुत्रकलत्रसमागमो भवतु इति। यदि तत्क्षणमसम्पन्ना सा इच्छा भवत्कृतं भगवद्दर्शनमपेक्षेत, तर्हि अनीशता भगवत आपद्येत।

NOTES

1. त्रितयम्—त्रयवयवं वस्तु इति त्रि+तयप्=त्रितयम् a triad. But we cannot speak of a *group* before the constituents become समागत। त्रीणि समागतानि त्रितयं भवति। त्रितयं समागतम् is defended saying that the language is used with an eye to the *future concurrence*. See Tika "भाविनम्" &c.

2. निमित्त &c.—निमित्त is cause कारणम्। निमित्तेन संवृत्तम् इति निमित्त+ठक्=नैमित्तिकम् effect कार्यम्।

राजा—भगवन्, इमामाज्ञाकरीं वो गान्धर्वेण विवाहविधिना उपयम्य कस्यचित् कालस्य बन्धुभिरानीतां स्मृतिशैथिल्यात् प्रत्यादिशन्नपराद्धोऽस्मि तत्रभवतो युष्मत्सगोत्रस्य कण्वस्य। पश्चादङ्गुलीयकदर्शनादूढपूर्वां तद्दुहितरमवगतोऽहम् तच्चित्रमिव मे प्रतिभाति।

यथा गजो नेति समक्षरूपे तस्मिन्नपक्रामति संशयः स्यात्।
पदानि दृष्ट्वा तु भवेत् प्रतीतिस्तथाविधो मे मनसो विकारः॥

KING—O Perfect one, having wedded this handmaid of thine by the Gandharva rites of marriage and rejecting through laxity of memory when brought by friends after some time, I had become an offender to your kinsman the revered Kanva. Afterwards through seeing the ring I knew his daughter as previously married. This appears strange to me. The perversion of my mind is of that kind by which, with the form before the eyes, the belief can be "It is not an elephant", (then) doubt can arise when it is passing out of sight, but conviction can come after seeing the foot-prints.

राज्ञेति। 'वः आज्ञां करोति' या तां परिचारिकां शकुन्तलाम् [अङ्गुल्या निर्देशः]। 'कस्यचित् कालस्य' परस्तात् [गम्यमानातसर्थप्रत्यययोगात् षष्ठी]। 'आनीतां' मत्समीपमुपस्थापिताम्। 'स्मृतेः शैथिल्यं' दुर्बलता, तस्मात् 'प्रत्यादिशन्' निराकुर्वन्। गोत्रवान् सगोत्रः। 'युष्माभिः' भवता 'सगोत्रस्य' गोत्रवतः, भवद्गोत्रीयस्य इत्यर्थः 'तत्रभवतः' पूज्यस्य 'कण्वस्य' [सम्बन्धसामान्ये षष्ठी] 'अपराद्धोऽस्मि' कृतापराधोऽहम्। 'पश्चात्' प्रत्याख्यानकृतादपराधात् परं 'पूर्वम् ऊढाम्' ["भूतपूर्वे चरट्" इति निपातनात् पूर्वशब्दस्य परनिपातः] 'अवगतोऽहम्' [कर्त्तरि क्तः]। 'तत्' एतत्, साक्षाद्दृष्टायामज्ञानम् अङ्गुरीयकदर्शनात् ज्ञानम्, 'चित्रमिव' आश्चर्यं 'प्रतिभाति'।

अन्वयः—यथा समक्षरूपे गजो न इति, अतिक्रामति तस्मिन् संशयः स्यात्, पदानि दृष्ट्वा तु प्रतीतिः भवेत्, मे मनसो विकारस्तथाविधः। व्याख्या—'यथा' येन प्रकारेण, याद्दृशेन विकारेण इत्यर्थः 'समक्षं' प्रत्यक्षं 'रूपं' यस्य तादृशे कस्मिंश्चित् सत्त्वे अयं 'गजो न इति' मिथ्याज्ञानं, ततः 'अपक्रामति' दूरे गच्छति 'तस्मिन्' जीवे गजो वा स्यात् इति 'संशयः स्यात्' पश्चात् 'तु पदानि' भूमौ पदचिह्नानि 'दृष्ट्वा' सत्यं गज एव इति 'प्रतीतिः' सम्प्रत्ययो 'भवेत्—मे' मम 'मनसो विकारः' चित्तभ्रमः 'तथाविधः' तादृशः। प्रथमं साक्षादुपगतायां शकुन्तलायां नेयं मत्परिग्रहः इति मे ज्ञानमासीत्। ततः पुरोधसा दूरं नीयमानायां तस्यां दूयमानेन हृदयेन सन्देहोऽभूत्। पश्चात्, अङ्गुलीयकदर्शनेन परिग्रहः एव इति प्रतीतिर्जाता। अङ्गुलीयकदर्शनसाध्या प्रतीतिः साक्षाद्दर्शनान्न जायेत इति किमेतत् चित्रं न बुध्यते मया।

NOTES

1. (a). आज्ञाकरीम्—आज्ञां करोति इति आज्ञा + कृ + ट कर्त्तरि स्त्रियाम् = आज्ञांकरी a woman-servant. ताम्। (b). अपराद्धः—अप + राध + क्त कर्त्तरि। (c). युष्मत् &c.—सगोत्र is well-known in the sense of समानं गोत्रमस्य where समान becomes स by the rule "ज्योतिर्जनपदरात्रिनाभिनामगोत्ररूपस्थानवर्णवयोवचनबन्धुषु" (P. 5. 3. 85). युष्माभिः सगोत्रः having the same गोत्र with thyself. But this sounds improper because काश्यप himself is the originator of the गोत्र [स्वयं गोत्रप्रवर्त्तकस्य पुनः किं गोत्रम्]। We therefore propose to expound गोत्रेण सह सगोत्रः *having a gotra*. युष्माभिः सगोत्रः *now* means having a gotra *because*

of thee, *i. e.*, you have given him his *gotra* ; he derives his *gotra* from you.

2. (a). समचक्षुरूपे—सामीप्यमक्ष्णोः इति सम्+अक्षि+अच् समासान्तः= समक्षम् vicinity of the eyes. अव्ययी—। The अच् comes in by the Ganasutra "प्रति (पर ?) समनुभ्योऽक्ष्णः"। समक्षम् अस्ति अस्य इति समक्ष+अच् मत्वर्थे=समक्षम् before the eyes. तादृशं रूपं यस्य तस्मिन्। (b). पदानि—पदचिह्नानि। The strangeness lies in this—समक्षरूपे गजो न इति ज्ञानं, परोक्षरूपे तस्मिन् पदानि दृष्ट्वा गज एव इति प्रतीतिः।

मारीचः—वत्स, अलमात्मापराधशङ्कया। सम्मोहोऽपि त्वय्युपपन्नः। श्रूयताम्—

MARICHA—My son, away with suspicion of your own offence. Delusion too in you is accountable. Listen.

राजा—अवहितोऽस्मि।

KING—I am attentive.

मारीचः। यदैव अप्सरस्तीर्थावतरणात् प्रत्यक्षवैक्लव्यां शकुन्तलामादाय मेनका दाक्षायणीमुपगता, तदैव ध्यानादवगतोऽस्मि दुर्वाससः शापादियं तपस्विनी सहधर्मचारिणी त्वया प्रत्यादिष्टेति। स चायमङ्गुलीयकदर्शनावसानः।

MARICHA—When Menaka came to Dakshayani carrying Sakuntala whose distress was personally witnessed by her owing to her descent to Apsarastirtha, at that very moment I learnt from meditation that through the curse of Durvasas this poor co-worker in the path of virtue (wife) had been disowned by you. And that curse has its termination at the sight the ring.

मारीच इति। 'आत्मनः अपराधः'। तस्य 'शङ्का' अपराद्धोऽहं कण्वस्य इति ज्ञानम्। 'त्वयि' यत्तदा 'सम्मोहः' चेतोविकृतिरभूत् सोऽपि 'उपपन्नः' युक्त एव, कारणाधीन इत्यर्थः; ["उपपन्नः" (त॰, वि॰, न्या॰)—"अनुपपन्नः" (रा॰, म॰)]।

यदैवेति। 'अप्सरस्तीर्थे' यत् 'अवतरणं' पर्य्यायप्राप्त' सान्निध्यं कर्त्तुं' गमनं, तस्मात्

हेतोः 'प्रत्यक्षं' साक्षाद्दृष्टं 'वैक्लव्यं' कातरता यस्याः तथाभूतां 'शकुन्तलामादाय मेनका दाक्षायणीं' दक्षकन्यकामदितिम् 'उपगता' प्राप्ता । स्वयं कन्यायाः शोकं पश्यन्ती अनुकम्पमाना तां गृहीत्वा प्राप्ता इत्यर्थः । 'तपस्विनी' दीना [एतेन तया एव प्राप्तः शाप इति सूच्यते] ["प्रत्यादिष्टा" (त०, न्या०)—"प्रत्यादिष्टा नान्यथा" (रा०, वि०, म०)] ॥ 'स च अयं' शापः । अवसीयते अनेन इति 'अवसानम्' अन्तकरणम् [करणे ल्युट्] । 'अङ्गुलीयकदर्शनम् अवसानं' यस्य तादृशः । यद्वा—'अङ्गुलीयकदर्शनात् अवसानं' यस्य तादृशः [भावे ल्युट्] ।

NOTE

1. उपपन्नः—The reading अनुपपन्नः contradicts सम्मोह। But सम्मोह is a *fact* and cannot be denied. The sage only explains how the सम्मोह was caused.

राजा (सोच्छ्वासम्)—एष वचनीयान्मुक्तोऽस्मि ।

KING (*With a sigh of relief*)—Here, I am cleared of infamy.

शकुन्तला (स्वगतम्)—दिट्ठिआ अकारणपच्चादेसी ण अज्जउत्तो । ण उण सत्तं अत्ताणं सुमरेमि । अहवा पत्तो मए स हि सावो विरहसुण्णहिअआए ण विदिदो । जदो सहीहिं सन्दिट्ठम्हि भत्तुणो अङ्गुलीअअं दंसइदव्वं त्ति [दिष्ट्या अकारणप्रत्यादेशी न आर्य्यपुत्रः । न पुनः शप्तमात्मानं स्मरामि । अथवा प्राप्तो मया स हि शापो विरहशून्यहृदयया न विदितः । यतः सखीभिः सन्दिष्टास्मि भर्त्रे अङ्गुलीयकं दर्शयितव्यमिति] ।

SAKUNTALA (*To herself*)—O Joy ! It is not that my husband disowned me without reason. But I do not remember myself as cursed. Or, I must have come by the curse which was not known by me with the heart a blank through separation. For,

I was told by the friends that the ring had to be shown to my husband.

'उच्छ्वासेन' उत्साहजातनिश्वासत्यागेन 'सह'। 'एष:' अयमहं 'वचनीयात्' निन्दाया: 'मुक्तोऽस्मि'। धर्मदारत्यागी अयं दुष्यन्त:, अस्य नाम न कर्त्तव्यम्, इति या मे निन्दासीत् सा अद्य अपगता।

शकुन्तलेति। 'दिष्ट्या' हर्षे। अहो आनन्द:। 'आर्य्यपुत्रो' मे 'अविद्यमानं कारणं' यस्मिन् तत् यथा तथा 'प्रत्यादिशति' निराकरोति यस्मादृशो 'न'। शप्ताहं तत: प्रत्यादिष्टा, कोऽस्य दोष:। 'न पुन:' किन्तु नाहम् 'आत्मानं शप्तं स्मरामि'। स्मृत्यभावे कारणमाह—'अथवा' पक्षान्तरे 'शाप: प्राप्त:' अपि तु 'विरहेण शून्यं हृदयं' यस्या: तथाविधया मया 'न विदित:' ज्ञात:। तत्रापि प्रमाणम्—'यत:' यस्मात् 'भवे' प्रत्यभिज्ञानमन्थराय आर्य्यपुत्राय 'अङ्गुलीयकं दर्शयितव्यमिति सखीभि:' आश्रमत्यागकाले 'सन्दिष्टास्मि'। असति शापे ताभिरेवमुक्तं न स्यात्।

NOTES

1. वचनीयात्—वच+अनीयर् कर्मणि=वचनीयम् that which has to be said. The say here is a *censure*. Hence it means that for which one is *censured*, निन्दा। तस्मात्।

2. अकारण &c.—अकारण is a बहुव्रीहि (See Tika). अकारण+प्रति+आ+दिश+णिनि कर्त्तरि साधुकारिणि। She was under the impression that the king had wantonly repudiated her. Now she sees that what happened was not without reason. This gives her great relief and her mind is now perfectly clear towards her husband.

मारीच:—वत्से, विदितार्थासि। तदिदानीं सहधर्मचारिणं प्रति न त्वया मन्यु: कार्य्य:। पश्य—

*** शापादसि प्रतिहता स्मृतिरोधरूक्षे** Substance.
भर्त्तर्य्यपेततमसि प्रभुता तवैव।

छाया न मूर्च्छति मलोपहतप्रसादे
शुद्धे तु दर्पणतले सुलभावकाशा ॥

MARICHA—My child, thou art now informed of the facts. So now no resentment must be cherished by thee towards thy co-worker in the path of virtue. Know that you were baffled in your husband on his becoming rough by obstruction of memory through the curse; the obstruction having departed from him, yours surely is the ascendancy. The image appears not on the surface of a mirror with its polish marred by dirt, but finds room easily when it is clear.

मारीच इति। 'विदित:' ज्ञात: 'अर्थ:' वस्तु, वृत्तान्त इति यावत् यया तादृशी 'असि'। 'तत्' तस्मात् 'सह' त्वया एकत्र 'धर्मं चरति' यस्तं 'प्रति' पतिं प्रति इत्यर्थ: 'मन्यु:' कोप: 'न कार्य्य:'। अन्वय:—शापात् स्मृतिरोधरूक्षे भर्त्तरि प्रतिहता असि। अपेततमसि तव प्रभुता एव। छाया मलोपहतप्रसादे दर्पणतले न मूर्च्छति, शुद्धे तु सुलभावकाशा। व्याख्या—स्मृतिं रुणद्धि यत् तत् 'स्मृतिरोधं' स्मरणावरणकं, तम इत्यर्थ:। 'शापात्' दुर्वाससा दत्तात् जातं यत् 'स्मृतिरोधं' तम: तेन [यद्वा—'स्मृतेरोधेन' विलोपेन हेतुना] 'रूक्षे' कर्कशे, 'असमृणे इत्यर्थ: 'भर्त्तरि' पत्यौ 'प्रतिहता' प्राप्तप्रतिघाता 'असि'। 'अपेतं' दूरे यातं 'तमो' यस्मात् तस्मिन् पत्यौ 'तव प्रभुता' प्रसर 'एव'। यथा चलितमयोगोलोकमुच्चावचेषु प्रतिहतं सत् गमनात् विरमति, मसृणेषु पृष्ठेषु च चलति, तथा त्वमपि रूक्षे पत्यौ प्रतिहता मसृणे तस्मिन्नधुना प्राप्तप्रसरा एव। दृष्टान्तमाह—'छाया' प्रतिबिम्बं 'मलेन' श्यामिकया 'उपहत:' नष्ट: 'प्रसादो' निर्मलता यस्य तस्मिन् 'दर्पणस्य' मुकुरस्य 'तले' पृष्ठे 'न मूर्च्छति' न प्रसरति 'शुद्धे तु निर्मले पुनस्तस्मिन् 'सुलभ:' सुखप्राप्य: 'अवकाश:' स्थानं यया तादृशी भवति।

NOTES

1. विदित:—विद + क्त कर्मणि। The क्त is अतीते *not* वर्त्तमाने। The rule "मतिबुद्धिपूजार्थेभ्यश्च" *allows* वर्त्तमाने क्त but *does not bar* अतीते क्त। Hence we get here तृतीया कर्त्तरि in मया।

2. शापात् &c.—(a). प्रतिहता—suggests collision against a hard thing. (b). स्मृतिरोध &c.— स्मृतेः रोधः स्मृतिरोधः—*Raghava*. Also see Tika. रूक्ष is *harsh* also *rugged*. (c). भर्त्तरि—अधिकरणे सप्तमी। (d). अपेत &c.—तमस् is मोह। The mention of तमस् here seems to support the explanation of स्मृतिरोध in the sense of तमस् as given in the Tika. (e). मलोप &c.—मल here also supports स्मृतिरोध in the sense of तमस्। (f). *Remark*—The sloka ends in उपमा। The अलङ्कार is प्रतिवस्तूपमा according to दण्डिन्। The counter-parts in the two halves are—(1). भर्तृ and दर्पणतल, (2). स्मृतिरोध and मल, (3). रूक्ष and उपहतप्रसाद, (4). प्रतिहता अपि and न मूर्च्छति, (5). अपेततमस् and शुद्ध, (6). प्रभुता and सुलभावकाशत्व, (7). त्वम् (understood) and छाया।

राजा—यथाह भगवान्।

KING—As the Perfect one says.

मारीचः—वत्स, कच्चिदभिनन्दितस्त्वया विधिवदस्माभिरनुष्ठितजातकर्मा पुत्र एष शाकुन्तलेयः।

MARICHA—My son, I hope, this your boy born of Sakuntala, with his natal ceremony duly performed by me, has been greeted by you.

राजा—भगवन्, अत्र खलु मे वंशप्रतिष्ठा। (बालं हस्तेन गृह्णाति)।

KING—O Worshipful Sage, in him indeed lies the permanence of my race. (*Takes the boy by the hand*).

मारीचः—तथाभाविनं चक्रवर्त्तिनमेनमवगच्छतु भवान्। पश्य—

रथेनानुद्धातस्तिमितगतिना तीर्णजलधिः
पुरा सप्तद्वीपां जयति वसुधामप्रतिरथः।

इहायं सत्वानां प्रसभदमनात् सर्वदमनः
पुनर्यास्यत्याख्यां भरत इति लोकस्य भरणात् ॥

MARICHA—Let your noble self know him as destined to become so and to rule over the circle of kings. Note that without a rival car, this boy, having crossed the seas in a car with a gliding motion through the absence of obstruction, will very soon conquer the earth with the seven islands. Here known as Sarvadamana through forcible taming of animals, he will again acquire the name Bharata from sustaining the world.

वत्से ति। 'कच्चित्' इति कामप्रवेदने। 'अस्माभिर्विधिवत्' यथाविधि 'अनुष्ठितं जातकर्म' यस्य तथाविधः 'एष पुत्रः शाकुन्तलेयः' [पुत्र इति सामान्यतोऽभिनन्दनहेतुः अस्माभिरनुष्ठित इति तु विशेषोक्तिः] 'त्वया कच्चिदभिनन्दितः'। अभिनन्दितो भवतु इति कामो मे।

राजेति। 'अत्र खलु' अस्मिन् शाकुन्तलेये एव 'मे वंशस्य प्रतिष्ठा' स्थितिः। पुरुवंशसन्ततेरयं निदानम्। तत् अभिनन्दित इति किमु वक्तव्यम्।

मारीच इति। अवश्यं 'तथा भविष्यति' वंशप्रतिष्ठारूपो भविष्यति यस्मादृशम्, अपि च 'चक्रवर्त्तिनं' सम्राजम् 'एनमवगच्छतु भवान्'। अन्वयः—अयम् अप्रतिरथः अनुद्घातस्तिमितगतिना रथेन तीर्णजलधिः पुरा सप्तद्वीपां वसुधां जयति, इह सत्त्वानां प्रसभदमनात् सर्वदमनः पुनर्लोकस्य भरणात् भरत इति आख्यां यास्यति। व्याख्या—'अयम्' एष शाकुन्तलेयः 'अविद्यमानः प्रतिरथः' प्रतियोद्धा यस्य तादृशो भूत्वा 'अनुद्घातेन 'उद्घाताभावात्, अत एव कृतप्रतिरोधविरहात् इत्यर्थः 'स्तिमिता' स्थिरा, अविक्षुब्धा इति यावत् 'गतिः' यस्य तादृशेन 'रथेन तीर्णा' लङ्घिता 'जलधयः' सप्तद्वीपपरिखाभूताः सप्तसागराः येन तथाविधः सन् 'पुरा' झटित्येव 'सप्तद्वीपां' जम्बुप्रभृतिसप्तसागरसमेतां 'वसुधां' रत्नधात्रीं धरित्रीं 'जयति' जेष्यति [पुरा इति भविष्यदासत्तौ अव्ययम्। तद्योगे लट्]। 'इह' अस्मिन्नाश्रमे 'सत्त्वानां' प्राणिनां 'प्रसभ' बलात् [अव्ययमेतत्] 'दमनात्' शासनाद्धेतोः 'सर्वदमनः' सर्वदमननामा अयं 'पुनः' भूयोऽपि 'लोकस्य भरणात्' पृथिव्याः पोषणात् 'भरत इति आख्यां' नाम [इतिना अभिहितत्वात् प्रथमा] 'यास्यति' लप्स्यते।

NOTES

1. कच्चित् &c.—Welcome him because he is your son (पुत्र:), also congratulate him because he had the good fortune of having his natal ceremonies done by myself.

2. (a). तथाभाविनम्—अवश्यं तथा भविष्यति इति तथा + भू + णिनि कर्त्तरि आवश्यके = तथाभावी । तम् । (b). पश्य—There is nothing to *see* here ; दृश् here means 'to note'.

राजा—भगवता कृतसंस्कारे सर्वमस्मिन् वयमाशास्महे ।

KING—We expect all this in this boy whose purification has been performed by thy Worshipful Self.

अदिति:—भअवं, इमाए दुहिदिमणोरहसम्पत्तीए कण्वोऽपि दाव सुदवित्थारो करीअदु । दुहिदिवच्छला मेणआ इह एव्व उवचरन्ती चिट्ठइ [भगवन्, अस्या दुहितृमनोरथसम्पत्ते: कण्वोऽपि तावत् श्रुतविस्तर: क्रियताम् । दुहितृवत्सला मेनका इहैव उपचरन्ती तिष्ठति] ।

ADITI—Worshipful Sir, let Kanva too be made informed of the details of the fulfilment of his daughter's wish. Menaka, attached to her daughter, is indeed staying here, in attendance.

राजेति । 'भगवता कृत: संस्कारो' जातकर्मादि यस्य तस्मिन् 'अस्मिन्' शाकुन्तलेये 'सर्वं वयम् आशास्महे' कामयामहे । सर्वा: सम्पदोऽस्य भगवत्संस्कारशक्तिमूला: सम्पत्स्यन्ते इत्याशय: ।

अदितिरिति । 'अस्या:' एतस्या: [सम्पत्तिविशेषणमेतत्] 'दुहितु:' यो 'मनोरथ:' अभिलाष:, भर्तृप्रतिग्रहणरूप: तस्य या 'सम्पत्ति:' सिद्धि: तस्या: [विस्तरापेक्षया षष्ठी] 'श्रुत: विस्तर:' व्यासोक्ति:, आमूलवर्णनमित्यर्थ: येन तादृश: [विस्तर इत्यस्य सम्पत्त्या सापेक्षत्वेऽपि गमकत्वात् समास:] 'क्रियताम्' । सर्वमेतदामूलं कण्वाय निवेद्यतामिति भाव: । 'दुहितरि' शकुन्तलायां 'वत्सला' स्नेहवती 'मेनका इहैव उपचरन्ती' मां सेवमाना 'तिष्ठति' । श्रुतविस्तरा एव सा इत्याशय: ।

NOTES

1. (a). दुहितृमनोरथसम्पत्तेः श्रुतविस्तरः—This is equivalent to श्रुतदुहितृमनोरथसम्पत्तिविस्तरः । (b). दुहितृ &c.—वत्स+लच् अस्त्यर्थे स्त्रियाम् =वत्सला affectionate. Hence, she too ought to be informed. But we are relieved of that duty, as she is here present and knows everything already.

शकुन्तला (आत्मगतम्)—मणोगदं मे भणिदं भअवदीए [मनोगतं मे भणितं भगवत्या] ।

SAKUNTALA (*Within herself*)—What is in my mind is said by her Worshipful Self.

मारीचः—तपःप्रभावात् प्रत्यक्षं सर्वमेव तत्रभवतः ।

MARICHA—Through the power of penance everything is indeed present to his noble self.

राजा—अतः खलु ममानतिक्रुद्धो मुनिः ।

KING—Then [*Or*—Hence] surely the sage is not very angry with me.

मारीचः—तथाप्यसौ प्रियमस्माभिराप्रष्टव्यः । कः कोऽत्र भोः ।

MARICHA—Nevertheless we have to report the good news to him. Who is here, Ho ! Who is here ?

(प्रविश्य) शिष्यः—भगवन्नयमस्मि ।

(*Entering*) DISCIPLE—Worshipful Sir, here I am.

मारीचः—गालव, इदानीमेव विहायसा गत्वा मम वचनात् तत्रभवते कण्वाय प्रियमावेदय, यथा पुत्रवती शकुन्तला तच्छापनिवृत्तौ स्मृतिमता दुष्यन्तेन प्रतिगृहीतेति ।

MARICHA—Galava, even now having gone by the sky, in my words report the good news to noble Kanva that Sakun-

tala with her son has been accepted by Dushyanta who has recovered his recollection at the expiry of her curse.

शिष्यः—यदाज्ञापयति भगवान् । (निष्क्रान्तः) ।

DISCIPLE—What the Worshipful Sage commands. (*Exit*).

शकुन्तलेति । "मनोगतम्" (वि-, त-, न्या-)—"मनोरथः" (रा-, म-) ॥ "भणितम्" (वि-)—"भणितः" (रा-, म-)—"व्याहृतम्" (त-, न्या-)] ।

राजेति । 'अतः' अस्माद्धेतोः विदितसर्ववृत्तान्तत्वादित्यर्थः 'मम' सम्बन्धे 'अनतिक्रुद्धः खलु' लघुकोप एव ।

मारीच इति । 'तथापि' विदितवृत्तान्तोऽपि 'असौ अस्माभिः प्रियम् आप्रष्टव्यः' प्रियमेतद्वृत्तं विदितं किं ते इत्याभाषितव्यः । 'कः कोऽत्र' [इति न कस्कादिः । तेन सत्वाभावः इति प्राग्व्याख्याम्] ॥

मारीच इति । 'इदानीमेव' [अविलम्बार्थम्] 'विहायसा' आकाशेन [एतेन शीघ्रगमनम्] । 'मम वचनात्' मम वचनमवलम्ब्य [ल्यब्लोपे पञ्चमी] । 'तस्याः शापः' तया प्राप्तत्वात् । तस्य 'निवृत्तौ' अवसाने 'स्मृतिमता' लब्धस्मृतिना ।

NOTES

1. (a). तपःप्रभावात्—भू+घञ् भावे=भावः । प्रकृष्टो भावः प्रभावः । प्रादितत्— । तपसः प्रभावः । तस्मात् । (b). प्रत्यक्षम्—प्रतिमुखत्वमक्ष्णाम् इति प्रति+अक्षि+अच् समासान्त=प्रत्यक्षम् cognizance of the senses. अव्ययी— । The अच् is by the Ganasutra "प्रति (पर ?) समनुभ्योऽक्ष्णः" । प्रत्यक्षम् अस्ति अस्य इति प्रत्यक्ष+अच् मत्वर्थे=प्रत्यक्षम् cognizable by the senses, Or take अक्ष as the word here, meaning इन्द्रिय । प्रतिगतम् अक्षाणि प्रत्यक्षम् । प्रादितत्— ।

मारीचः—वत्स, त्वमपि सापत्यदारः सख्युराखण्डलस्य रथमारुह्य राजधानीं प्रतिष्ठस्व ।

MARICHA—My son, you too with child and wife, riding the car of your friend Indra, proceed to your capital.

राजा—यदाज्ञापयति भगवान् ।

KING—What the worshipful sage commands.

मारीचः—अपि च,

तव भवतु बिडौजाः प्राज्यवृष्टिः प्रजासु
त्वमपि विततयज्ञः स्वर्गिणः प्रीणयस्व ।
युगशतपरिवर्त्तानेवमन्योऽन्यकृत्यैर्-
नयतमुभयलोकानुग्रहश्लाघनीयैः ॥

MARICHA—Moreover, Let Indra be pouring heavily on your subjects ; you too with protracted sacrifice gratify the denizens of the heaven. May you two thus pass a cycle of a hundred Yugas with mutual acts laudable because benefiting both the worlds.

मारीच इति । 'अपत्येन' शाकुन्तलेयेन 'दारैः' शकुन्तलया च [दारशब्दो बहुत्वे पुंसि] 'सह राजधानीं प्रतिष्ठस्व' प्रतिगच्छ ["सापत्यदारः" (त॰, न्या॰)—"सापत्यदारसहितः" (वि॰)—"स्वापत्यदारसहितः" (रा॰, म॰)] ॥

अपि चेति । अन्वयः—बिडौजाः तव प्रजासु प्राज्यवृष्टिर्भवतु, त्वमपि विततयज्ञः स्वर्गिणः प्रीणयस्व । एवम् उभयलोकानुग्रहश्लाघनीयैः अन्योन्यकृत्यैः युगशतपरिवर्त्तान् नयतम् । व्याख्या—'विट्' व्यापकम् 'ओजः' प्रतापो यस्य स 'बिडौजाः' इन्द्रः [पृषोदरादिः] 'तव प्रजासु' विषये 'प्राज्या' प्रभूता 'वृष्टिः' वर्षणं यस्य तादृशो 'भवतु' [एतत् इन्द्रस्य कर्तृ मनुष्यलोकानुग्रहः] । 'त्वमपि वितता' अजस्रं प्रक्रान्ता 'यज्ञाः' येन तथाभूतः सन् 'स्वर्गिणः' स्वर्गस्थान्, सुरानित्यर्थः 'प्रीणयस्व' तर्पयस्व [एतद्दुष्यन्तस्य कर्तृ देवलोकानुग्रहः । आत्मकर्तृ प्राग् दुष्यन्तः करिष्यते । ततफलमिन्द्रकर्तृ वृष्टिपातः । एवं न हि मुख्यतो देवानुग्रहबुद्ध्या यागः, किन्तु यागेन तृप्तेषु देवेषु वृष्टिर्भविता, तेन आत्मोपकार इति । ततः कर्तृगामिनि क्रियाफले णिचि प्रीणयतेरात्मनेपदम्] । 'एवम्' अनेन विधिना 'उभयोर्लोकयोः' देवमानवलोकयोः 'अनुग्रहेण श्लाघनीयैः' प्रशस्यैः [वृत्तिविषये उभशब्दात् नित्यमयच्प्रत्ययः] 'अन्योन्यस्य' परस्परस्य 'कृत्यैः' कर्त्तव्यैः कर्मभिः 'युगानां' सत्यत्रेतादीनां 'शतपरिवर्त्तान्' शतसंख्यकानि आवर्त्तानि

'नयतम्' अतिवाहयतम्। परस्परोपकारेण शतयुगं जीवतम् इत्यर्थः। मूलम् (वि-)—"वज्रिण: प्रीणयालम्" (त-, न्या-)—"स्वर्गिण: प्रीणयालम्" (म-)॥ "परिवृत्तैः" (त-, न्या-)। राघवभट्टेतं श्लोकं न पठति]॥

NOTES

1. (a). सापत्यदार:—अपत्यञ्च दाराश्च अपत्यदारौ। द्वन्द्व:। Here we do not get अपत्यदारा: in the *plural*, because only two things being mentioned, we get dual by the rule "द्व्येकयोर्द्विवचनैकवचने"। The Lexicons direct बहुत्व of दार, no doubt. "भार्य्या जायाथ पुंभूम्नि" इत्यमर:। But they say nothing of compounds ending in दार। Hence in the absence of special provisions, the general principle "द्व्येकयोर्द्विवचनैकवचने" applies. This is the view of Nagesa who cites the example "भर्तृदारयो: अप्रतेजसो:" in support. The compound is in the masculine owing to the rule "परवल्लिङ्गं द्वन्द्वतत्पुरुषयो:"। अपत्यदाराभ्यां सह। बह—। सापत्यदारसहित: and स्वापत्यदारसहित: are unnecessary circumlocutions. (b). प्रतिष्ठस्व—"समवप्रविभ्य: स्थ:" इत्यात्मनेपदम्।

2. (a). विडौजा:—वेवेष्टि इति विष (ह्रादि)+क्विप कर्त्तरि=विट् व्यापकम् all-pervading. Now see Tika. The form expected is विड्ओजा:, but पृषोदरादित्वात् विडौजा इति। Or विड्ति भिनत्ति रिपून् इति विड्+क कर्त्तरि=विड्म् the cleaver of enemies. तादृशम् ओजो यस्य विडौजा: no irregularity. A name of Indra. (b). प्राज्य &c.—आ समन्तात् अञ्जनीयम् इति आ+अञ्ज्+क्यप् कर्मणि=आज्यम् clarified butter घृतम्। प्रकृष्टम् आज्यमस्मिन् प्राज्यम् very creamy. Primarily this applies to milk which is very rich. Next we have a double transference. First, from *quality* we pass on to *quantity*; next, from *milk* we transfer to *water*. Hence प्राज्य, applied to rain, means *abundant*. प्राज्या वृष्टिर्यस्य। (c). युग &c.—परि+वृत+घञ् भावे=परिवर्त्त: revolution. शतसंख्यका: परिवर्त्ता: शतपरिवर्त्ता:। शाकपार्थिवादि। युगानां शतपरिवर्त्ता:। तान्। (d). अन्योऽन्य &c.—कर्त्तव्यानि इति कृ+क्यप् कर्मणि =कृत्यानि duties. अन्यस्य अन्यस्य कृत्यानि has अन्यस्य repeated owing to व्यतिहार (reciprocity) by the Varttikas "कर्मव्यतिहारे सर्वनाम्नो द्वे वाच्ये

समासवच्च बहुलम्" and "अन्यपरयोर्न समासवत्"। Next we get अन्यस्, अन्यस्य कृत्यानि, the षष्ठी in the first अन्यस्य becoming स् by the Varttika "असमासवद्भावे पूर्वपदस्थस्य सुपः सुर्वक्तव्यः"। Lastly, compounding with कृत्यानि we have अन्योऽन्यकृत्यानि। In this अन्यस् does not drop स्। This is an irregularity suggested by the word बहुलम् (बहुलग्रहणात् पूर्वपदस्थाया विभक्तेर्न लुक्)। (e). उभय &c.—उभौ लोकौ उभयलोकौ the two worlds, *i. e.*, heaven and earth. उभ becomes उभय when compounded (See Tika). तयोः अनुग्रहः उभयलोकानुग्रहः। तेन श्लाघनीयानि। तैः।

3. *Readings*—In वज्रिणः प्रीणयालम् the अलम् is superfluous, and the षष्ठी in वज्रिणः rather awkward to explain. स्वर्गिणः प्रीणयालम् gets rid of the षष्ठी no doubt, but the अलम् is still there. These seem to illustrate attempts on the part of scribes to avoid the आत्मनेपद in प्रीणयस्व। But that ought to present no difficulty and does not justify interference with the text. As explained in the Tika, the आत्मनेपद is quite legitimate.

राजा—भगवन्, यथाशक्ति श्रेयसे यतिष्ये।

KING—I shall try for good to the utmost of my power, O Worshipful Sage.

मारीचः—वत्स, किं ते भूयः प्रियमुपहरामि।

MARICHA—My son, what further good can I bring unto you?

राजा—अतः परमपि प्रियमस्ति। तथाप्येतदस्तु (भरतवाक्यम्)—

प्रवर्त्ततां प्रकृतिहिताय पार्थिवः
सरस्वती श्रुतिमहतां महीयताम्।
ममापि च क्षपयतु नीललोहितः
पुनर्भवं परिगतशक्तिरात्मभूः॥

(निष्क्रान्ताः सर्वे)।

was still an ordinary attributive. The poet flourished long before the lexicographer (See *Introduction*).

3. *Readings*—(a). "श्रुतमहताम्" means श्रुतेन शास्त्रेण महताम् (*Raghava*), and is almost the same as श्रुतिमहताम्। "श्रुतिमहती" mighty because of the support of the Vedas. (b). "महीयसताम्" requires a क्विप् after महीङ्। Sense is not much altered. "महीयताम्" is about the same. With "महीयसाम्", construe—"श्रुतमहता महीयसाम् उत्कृष्टानां कवीनां सरस्वती प्रवर्त्तताम्"—*Raghava*. The construction is evidently faulty. First, because a च is wanting. Secondly, because, with a च supplied, प्रकृतिहिताय will have to be taken with *both* पार्थिवः and सरस्वती। It is doubtful if the poet means it. If he does, the meaning becomes—पार्थिवः, श्रुतिमहतां सरस्वती च, प्रकृतिहिताय प्रवर्त्तताम्—A good deal of mischief is being done by the pernicious preaching of the learned who induce kings to adopt measures calculated to work great evil with the people. Let these cease, and let the learned hence-forth counsel salutary measures and the king adopt them.

4. *Remark*—The metre is रुचिरा ("चतुर्ग्रहैरिह रुचिरा जभस्जगाः") with the scheme—

ज	भ	स	ज	ग
⏑ — ⏑,	— ⏑ ⏑,	⏑ ⏑ —,	⏑ — ⏑,	—

सप्तमोऽङ्कः। THE SEVENTH ACT.

(समाप्तमिदमभिज्ञानशकुन्तलं नाम नाटकम्)।

(*Here ends the Drama named the Abhijnana-Sakuntalam*).

BHATTI-KAVYAM

CANTOS I & II

BY

S. RAY, VIDYAVINODA, M. A.

OPINIONS

Pandit *Kasichandra Vidyaratna*, a veteran of the orthodox School of Sanskrit scholars, writes—

"আপনার ভট্টি প্রথম সর্গের পরিশিষ্ট নামক প্রবন্ধ আদ্যন্ত পাঠ করিয়া পরম প্রীত হইলাম। আপনি যে প্রণালীতে পরমতনিরসনপূর্ব্বক স্বমত সংস্থাপন করিয়াছেন তাহা পণ্ডিত মাত্রেরই হৃদয়গ্রাহী ও সন্তোষজনক তদ্বিষয়ে সন্দেহ নাই"।

Principal *Vanamali Vedantatirtha*, M. A., one of the leaders of the modern School of Sanskrit scholars in Bengal, writes—

"I got your remarks on...plagiarisms. I have always told everybody that you are *the most original of the commentators* and that *your minute knowledge of Panini is astounding.* But would you tell me *who* edited...this time ?

Yes. Our boys and our professors are very much to blame in encouraging plagiarists...".

Professor *Srischandra Chakravarti*, B. A., one of our best exponents of the system of Panini, writes—

"...Your *Parisishta* is, as it ought to be, *a smashing rejoinder* to your opponent. But the question is, has he been able to clearly understand and appreciate it ?..."

SAKUNTALA

BY

S. RAY, VIDYAVINODA, M. A.

In his "Annual Address" at a meeting of the Asiatic Society of Bengal, in February, 1909,

The Hon'ble Justice Sir Ashutosh Mukerjea, Sarasvati, Sambuddhagamachakravarti, K.t, C.S.I., says :—

"Professor Saradaranjan Ray has, in an interesting paper on the age of Kalidas, re-investigated this interesting problem, and the force of his arguments has to my mind a distinct tendency to make the pendulum cscillate back to the ancient tradition..."

The venerable recluse **Pandit Krishnakamal Vidyambudhi** late principal, Ripon College, Emeritus Professor of Sanskrit, Presidency College, Calcutta, says :—

"...when handling it by chance I could not resist the temptation and so went through the Introduction and certain other parts. ... Having done this, I cannot refrain from doing myself the pleasure of telling you what I think. My idea is that your edition should form an epoch in the study of the incomparable drama of

India's immortal poet. I admire and envy your thorough acquaintance with his works and appreciate how cleverly and dexterously you make use of your knowledge in demolishing certain good-for-nothing theories propounded by a set of scholars who take a delight in belittling the antiquity of our ancestors. ... "

Rai Bahadoor Rajendra Chandra Sastri, M. A, says :—

"...The preface is very interesting reading and will unquestionably add to your reputation as a Sanskrit scholar. ...There are very few, let me assure you, among our present day scholars who bring so much industry, scholarship and erudition to bear on their work like your worthy self."

S RAY'S SANSKRIT WORKS

B. A. Standard for 1919 &c.

1. **Abhijnana Sakuntalam**—(3rd Edition) with notes, Analysis, a Sanskrit commentary—the Mitabhashini, and an Essay on the age of Kalidasa. Cloth Rs 3-4, Paper Rs. 3.
2. **Shishupalabadham**—(In the press).
3. **Mudra Rakshasham**—(In preparation).

I. A. Standard for 1918, 1919 &c.

4. **Dasakumara Charitam** (Kumarotpatti)—and
5. **Mahabharatam**—with Synonyms English and Bengali Translation, Original Sanskrit commentary entitled the Mitabhasini, Anglo Sanskrit notes, questions and answers. Re. 1 Each.
6. **Kumara Sambhavam**—Canto I (3rd Edition) and
7. Do Do Canto II (2nd Edition),

   With the Commentary of Mallinatha. Cloth Rs. 1-4 Each
8. **Bhatti Kavyam**—Canto I (8th Edition) and
9. Do Do Canto II (7th Edition).

   Edited with A New Commentary, the commentaries of Jaymangala and Mallinatha, Translations and Critical and Explanatory notes &c. Price, Cloth, Canto I Rs. 12, Canto II Rs. 1-4.

Matriculation Course for 1919 &c.

10. **Mitabhashini**—A Key to the Matriculation Sanskrit Course, for 1919 &c. Parts I and II with full notes and Test Questions and Answers. Prose Rs. 2, Poetry As. 12.

OPINIONS

(Received From Utter Strangers)

Old School Opinions —Translation

"*Whom should not* the Mitabhashini, *this new thoughtful commentary of the Sakuntalam* written by Sri Saradaranjan Ray, *please by its intrinsic merit?* Lovers of sentiment are eager to enjoy new ideas. *Your commentary*, therefore, *excellent in thoughts and sentiments, will certainly delight the good.* By disclosing *new thoughts and sentiments* therein, you have, to-day, *added fresh charms*, to Kalidasa's treasure the Abhijnana-Sakuntalam. *Having seen the Mitabhashini, your commentary on the Sakuntalam*, having witnessed your clever powers in the matter of poesy, having noticed, moreover, that you have no Sanskrit degree, *I do hereby confer on you the degree of* **Vidya-vinoda.**"—*Mahamahopadhyaya Sivachandra Sarvabhauma*, Principal, Sanskrit College, Mulajor, late President, Vangiya Brahmana Sabha.

"I have derived pleasure from a cursory reading of the Abhijnana-Sakuntalam edited by Pandita Pravara Saradaranjan Ray with a commentary of his own. New ideas appear in many places in his Tika. He describes it as बालप्रबोधजननी (enlightener of the young) and मितभाषिणी (of measured speech). The latter is appropriate, for in but a few words it brings out the true sense of the original. But regarding the first epithet, I must say that, in places, I consider it not only बालप्रबोधजननी but it has become विद्वत्प्रबोधजननी (an enlightener of the learned) too. I need not say more."—*Mahamahopadhyaya Kamakhya-natha Tarkavagisa.*

Modern School Opinions

"...You are perfectly right in claiming recognition for a distinct recension of Sakuntala...**I fully sympathise with your work...**"——* * *, Prof. of Sanskrit, Central College, *Benares.*

"...will prove a **useful help to teachers and pupils.** I will strongly recommend this **scholarly work** to my students ..." ---* * *, Prof. of Sanskrit, Khalsa College, *Amritsar.*

"...**your name is a guarantee for the usefulness of the work**.. the edition prepared by you is **one of the best...**" ---* * *, Prof. of Sanskrit, Maharaja's College, *Jaypur.*

"...your **excellent edition**...I believe yours will **be the best of all the numerous editions** *of the Abhijnana-Sakuntalam* **that I have come across.**" ---* * *, Prof. of Sanskrit, *Agra College.*

"...you have **done a true service to the mother-land by your out and out the best edition**...the best not so much on account of the English translation which has been done with equal sucess by western scholars--nor on the score of the paper, get up, and neatness of printing in which respects it does not yield to any of the editions last mentioned--but because **the Sanskrit explanation** given by you is **invariably correct,** is expressed in **well-chosen words and contains neither more nor less than what a student of Sanskrit requires**...there is **brevity** and **terseness of expression** and that **not at the expense of erudition**—an achievement rarely to be met with in Sanskrit works of the kind...your Sanskrit explanation, on the other hand, is **sure to make the student understand the spirit of the original without effort** and at the same time will make him really learned. One special satisfactory feature which I am glad to note in your work is that the English translation is given side by side with the Sanskrit original...I have already spoken highly of your work to some of the eminent scholars and Pundits in this part of the Presidency..."---* * *, Prof. of Sanskrit, Maharaja's College, *Pudukoto* (*Madras*).

The Press

"...will henceforth be one of the standard editions of that work for all students of Sanskrit. It will certainly be the best edition for intending candidates at the B. A. Examination. It is easy to see that great care has been taken in compiling the text. The English translation is accurate and literal...The book is tastefully got up, and to read it will be a pleasure, both in respect of matter and manner..."—*The Indian Nation, March 2, 1908.*